1945

अधिकरणरत्नमालाप्रारंभः ग्रंथसंख्या १०८६०

ZZ62

47538
a
3163

श्रीगणेशायनमः ॥श्रीसरस्वत्यैनमः॥ ॥ वागीशाद्याःसुमनसः सर्वार्थानामुपक्रमे॥ यंनत्वाकृतकृत्याःस्यु
स्तंनमामिगजाननं॥ १॥ युक्तिमानवतींविदन्स्थिरमतिर्भेदेविनाबार्थभागोत्साहः क्रमकृत्स्वयुक्तिनिपुणःश्लाघ्या
तिदेशोन्नतिः॥ नित्यस्फूर्त्यधिकारवान्गतसदाबाधः स्वतंत्रश्चराजागर्त्तिश्रुतिमत्प्रसंगचरितः श्रीबुक्कणक्ष्मापतिः
॥२॥ यद्ब्रह्मप्रतिपाद्यते प्रगुणयत्तत्स्वयंचमूर्त्तिप्रथांतत्रायंस्थितिमूर्त्तिमाकलयतिश्रीबुक्कणक्ष्मापतिः॥ विद्यातीर्थमु
निस्तदात्मनिलसन्मूर्त्तिस्त्वनुग्राहिकातेनास्यस्वगुणैरखंडितपदंसर्वज्ञमुद्योतते॥ ३॥ इंद्रस्यांगिरसोनलस्यसुमतिः
शैब्यस्यमेधातिथिर्धौम्योधर्मसुतस्यवैन्यनृपतेः स्वौजानिमेगौतमिः॥ प्रत्यग्दृष्टिररुंधतीसहचरोरामस्यपुण्यात्मनो
यद्वत्तस्यविभोरभूत्कुलगुरुर्मंत्रीतथामाधवः॥ ४॥ सखलुप्राज्ञजीवातुः सर्वशास्त्रविशारदः॥ अकरोज्जैमिनिमत
न्यायमालांगरीयसीं॥ ५॥ तांप्रशस्यसभामध्येवीरश्रीबुक्कभूपतिः॥ कुरुविस्तरमस्यास्त्वमितिमाधवमादिशत्
॥६॥ कृपामव्याहतांलब्ध्वापराध्यप्रतिमोभवेत्॥ सभव्यांभारतीतीर्थयतींद्रचतुराननात्॥ ७॥ निर्माय माधवाचा
र्योविद्वदानंददायिनीं॥ जैमिनीयन्यायमालांव्याचष्टेबालबुध्धये॥ ८॥ न्यायमालाया आदौस्वकीयग्रंथत्वद्योतना
यस्वमुद्रारूपमनेकार्थगर्भंदेवतानमस्कारप्रतिपादकंश्लोकंपठति॥ वागीशाद्याइति॥ इष्टदेवतांनमस्कृत्यचिकी
र्षितार्थप्रतिपालनायपालकस्वामितिविद्यमानंमहिमानमनुस्मारयति॥ युक्तिमानवतीमिति॥ अत्रचिकीर्षितेध
र्मशास्त्रेवर्तमानानांद्वादशाध्यायानांप्रतिपाद्याअर्थायेचनीतिशास्त्रोक्ताराजधर्मास्तेसर्वेप्यस्मिनभूपतौउपलभ्यं
ते॥ नीतिपक्षेयुक्तियोगः संधिः साचयुक्तिर्मानवतीमानः सत्कारः चतुर्षुसामदानभेददंडेषूपायेषुप्रथमउपायः॥
वैरिणाबुध्धिभेदाद्वितीयः॥ एताभ्यांदानदंडावुपलक्ष्येते॥ एतैश्चतुर्भिरुपायैर्विशेषणार्थंधनंभजतिप्राप्नोतिएतावता
शत्रुक्षयः कथितः॥ अविच्छिष्टेनस्वराज्यप्रतिपालनप्रकारः॥ प्रतिपाद्यतेआप्तेष्वमात्यप्रभृतिषुपुरुषेष्वयमीदृश
स्यव्यापारस्ययोग्योनान्यस्येत्येवमूहापोहकुशलः॥ राजसभायामेततपस्विनः पूज्याविप्रादक्षिणभागउपवेशनी
याएतेचक्षत्यावामभागइतिक्रमंकरोतितत्तत्कार्येष्वधिकृतान्पुरुषाननुचितबुध्धिप्रदानेनप्रयोक्तुंनिपुणः॥ समुद्रपर्यंत

श्रीः

१

3
1945

त्वेनातिबहुलस्यदेशस्योन्नतिः समस्तवस्तुसंपत्तिः साचपरराष्ट्रनिवासिभिः सकलप्राणिभिः श्लाघ्यते॥ इदंचकर्त्तव्य
मिदंनेत्येवंकार्याकार्यविषयास्फूर्त्तिस्तस्यामधिकारोस्यराज्ञोनित्यः सर्वत्राप्रतिहतबुध्धित्वात्॥ गतोविनिवारितःस
तांनपस्विनामाबाधाविघ्नोयेनासौगतसबाधोदेशांतराधिपतीनांराज्ञामेतदधीनत्वेनापरप्रेष्यत्वादयंस्वतंत्रः॥ जगदी
श्वरस्यविद्यातीर्थमुनेर्भोगमूर्त्तित्वेनायमीश्वरः॥ यस्यसभायांगोष्ठीरूपप्रसंगोवेदार्थविषयत्वेनश्रुतिमान्यदीयंच
रितमपिवेदोक्तरहस्यार्थानुष्ठानरूपत्वेनश्रुतिमद्भवतिसोयंश्रुतिमत्प्रसंगचरितः॥ एवंविधोबुक्कणभूपतिरंतः परमेश्व
रध्यानेबहिः प्रजापालनेचनित्यंजागर्त्तियथानीतिशास्त्रोक्तेषुसामभेदादिष्वयंकुशलः तथासर्वज्ञावतारत्वाद्धर्मशा
स्त्रोक्तेषुप्रमाणादिप्रसंगागतेषुअध्यायार्थेषुकुशलस्तेचाध्यायार्थाउपरिष्टात्प्रदर्शयिष्यंते॥ राज्ञः सर्वज्ञत्वंसोपपत्तिकं
प्रकटयति॥ ॥यद्ब्रह्मप्रतिपाद्यते॥ ॥ प्रगुणयत्तत्स्वयंचमूर्त्तिप्रथांतत्रायंस्थितिमूर्त्तिमाकलयतिश्रीबुक्कणक्ष्मापतिः॥
विद्यातीर्थमुनिस्तदात्मनिलसन्मूर्त्तिस्त्वनुग्राहिकातेनास्यस्वगुणैरखंडितपदंसार्वज्ञ्यमुद्योतते॥ सर्वासूपनिषत्सुप्रतीयमा
नंयत्परंब्रह्मतदेवशैवागमेषुसृष्टिस्थितिसंहारनिरोधनानुग्रहलक्षणपंचकृत्यमित्यर्थमीशानतत्पुरुषाघोरवामदेवस
द्योजातलक्षणानांपंचानांमूर्तीनांप्रथांप्रसिध्धिंविस्तारंवाप्रगुणयतिप्रकटीकरोतिइतिप्रतिपाद्यते॥ तत्रतास्तुमूर्त्तिष्वयंभूपालः
स्थितिमूर्त्तिंधत्ते॥ तस्यामूर्त्तेरात्मनिलसन्विद्यातीर्थमुनिः कृत्स्नस्यजगतोनुग्राहिकामूर्त्तिरित्युच्यते॥ यस्मादयंभूपोवेद
नोक्तंप्रसत्वयस्माच्चागमोक्तामहेश्वरस्यस्थितिमूर्त्तिर्यस्माच्चश्रीविद्यातीर्थमुनिस्तदात्मनित्वंनिधायप्रकाशते॥ तस्मात्सर्वज्ञ
त्वमस्यराज्ञः उत्कर्षेणाद्विद्वंगनागोपालमविवादेनप्रतिभासते॥ उक्तगुणोपेतस्यराज्ञोमंत्रिणंनानाप्रसिध्धदृष्टांतैर्हितुका
रितयाप्रशंसति॥ इंद्रस्येतिचिकीर्षितग्रंथेश्रध्धातिशययुत्पादयितुंकर्तृगौरवप्रकटयति॥ श्रुतिस्मृतिसदाचारपालको
माधवोबुधः॥ स्मार्त्तव्याख्यायसर्वार्थद्विजार्थंश्रौतउद्यतः सर्ववर्णाश्रमानुग्रहायपुराणसारपराशरस्मृतिव्याख्यानां
दिनास्मार्त्तोधर्मः पूर्वंव्याख्यातः इदानींद्विजातीनांविशेषानुग्रहायश्रौतधर्मव्याख्यानायप्रवृत्तः॥ ग्रंथमारिप्सुर्गुरु
मूर्त्युपाधिकंसकलवेदशास्त्रप्रवर्त्तकत्वेनात्रोचितमिष्टदेवतारूपंपरमेश्वरमादौनमस्कृत्यश्रोतृप्रवृत्तिंसिध्ध्यर्थंविषय

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अधिकरणमाला॰ प्रयोजनेदर्शयंस्तंग्रंथंप्रतिजानीते॥ प्रणम्यपरमात्मानंश्रीविद्यातीर्थरूपिणं॥ जैमिनिन्यायमालाश्लोकैः संगृह्यतेस्फु
टं॥जैमिनिप्रोक्तानिधर्मनिर्णायकान्यधिकारणानिन्यायाःतेस्यग्रंथस्यविषयः पठितुंसुशक्यैः कतिपयैरवश्लोकैस्ते
२ षांस्फुटीभावःप्रयोजनं॥न्यायमालासंगृह्यतइतिग्रंथनामनिर्देशपूर्विकाप्रतिज्ञा॥ करिष्यमाणस्यग्रंथस्यप्रकारं
दर्शयति॥ एकोविषयसंदेहः पूर्वपक्षावभासकः॥ श्लोकापरस्तुसिद्धांतवादीप्रायणकथ्यते॥ चत्वारावयवाएकश्लो
कनोक्ताः क्वचित्क्वचित॥ यत्रक्वापिबहुश्लोकैरुच्यंतेतानविस्तरः॥एकैकस्याधिकरणस्यविषयः संदेहः संगतिः पू
र्वपक्षःसिद्धांतश्चेतिपंचावयवाः तत्रसंगतिरनंतरमेवव्युत्पादयिष्यमाणनप्रकारेणप्रत्यधिकरणंस्वयमेवोहितुं
शक्यते॥अवशिष्टानांचतुर्णामवयवानांसंग्रहकाः क्वचिद्द्वयः श्लोकाः क्वचिदेकइत्यावापोद्वापाभ्यामंततः प्रत्यधि
करणंश्लोकंद्वित्वेसंख्यापर्य्यवस्यति॥अतोबहुत्वाद्विष्यताग्रंथगौरवशंकानकर्तव्या॥तमेवग्रंथबाहुल्याभावंस्फुटी
कुर्वनरूपकव्याजेनसुबोधत्वंदर्शयति॥ सर्वथासहस्रद्वनातिक्रामतिसंग्रहः॥ मीमांसासागरस्तनक्रीडापुष्करिणी
कृतः॥ श्लोकेनश्लोकाभ्यांश्लोकैर्वायथासंभवंन्यायः संगृह्यतां॥ सर्वथापिसहस्रन्यायसंग्रहरूपोग्रंथः श्लोकद्व
यसहस्रपूर्वेरर्वागेवसमाप्यते॥नतुसहस्रद्वयमितिक्रामति॥भाष्यकादीनांबहुत्वात दुरवगाहत्वाच्चमीमांसासागर
समापूर्वमासील्क्रीयमाणेनतनानेनग्रंथनदोषद्वयरहितनराजपुत्राणांबालानांक्रीडार्थंनिर्मितयानाभिदघ्यापुष्करि
ण्यासमाभविष्यति॥ यद्यपिशास्त्रदीपिकादौक्वचितक्वचित्संग्रहश्लोकोस्तितथापिनसर्वत्रविद्यते॥ यत्रास्तितत्रापि श्रीः
विषयसंशययोरसंग्रहान्तस्लोकपाठमात्रेणाधिकरणमुपन्यसितुंशक्यतेतोनक्वापिगतार्थत्वंशंकनीयं॥संगतिंव्युत्पा
दयति॥ ॥शास्त्रध्यायतथापादन्यायसंगतयस्त्रिधा॥शास्त्रादिविषयज्ञानेतत्तत्संगतिरूह्यतां॥शास्त्रसंगतिरध्यायसं २
गतिः पादसंगतिश्चेतित्रिधासंगतिः॥साचशास्त्रीणांत्रयाणामसाधारणेविषयेज्ञातेसतिस्वयमेवोहितुंशक्या॥शास्त्र
स्याध्यायानांचासाधारणंविषयंदर्शयति॥ धर्मोद्वादशलक्षण्याव्युत्पाद्यस्तत्रलक्षणैः प्रमाणभेदशेषत्वप्रयुक्तिक्र
मसंज्ञकाः॥ अधिकारोतिदेशश्चसामान्यनविशेषतः॥ऊहोबाधश्चतंत्रंचप्रसंगश्चोदिताः क्रमात॥लक्षणान्यध्या

यः॥ द्वादशानांलक्षणानांसमाहारोद्वादशलक्षणीतादृशस्यद्वादशाध्यायोपेतस्यशास्त्रस्यधर्मोविषयः प्रमाणादयः प्र
संगांताद्वादशपदार्थाः क्रमातद्वादशानामध्यायानांविषयः॥ प्रथमेध्यायविध्यर्थवादादिरूपंप्रमाणंनिरूपितं॥द्वितीये
यागदानादिकर्मभेदः॥ तृतीयेप्रयाजादीनांदर्शपूर्णमासाद्यर्थत्वेनशेषत्वंचतुर्थेगोदोहनस्यपुरुषार्थत्वप्रयुक्त्यानुष्ठा
नंनतुक्रत्वर्थंप्रयुक्त्येत्येवमादयः॥ पंचमेक्रमनियतिविधेयत्वादयः॥षष्ठेकर्तुरधिकारोनांधादेरित्यादयः॥सप्तमेस
मानमितरच्छ्येनेनेत्यादिप्रत्यक्षवचनेनाग्निहोत्रादिनाम्नानुमितवचनेनचसामान्यतोतिदेशः॥ अष्टमेसौर्य्यंचरुंनि
र्वपेदित्यत्रनिर्वापस्तद्धितेनदेवतानिर्देशएकदेवत्यत्वमोषधद्रव्यकत्वमित्यादिलिंगेनाग्नेयपुरोडाशेतिकर्तव्यतेवना
यस्येत्येवमादिर्विशेषतोतिदेशः॥ नवमेप्रकृतावग्नयेजुष्टंनिर्वपामीत्येवमादिरूहः॥ दशमेकृष्णलेषुचोदकप्राप्तस्याव
घातस्यवितुषीकरणासंभवेनलोपइत्येवमादिर्बाधः॥एकादशेबहूनामाग्नेयादीनांप्रधानानांसकृदनुष्ठितेनप्रयाजाद्यं
गेनोपकारइत्यादितंत्रं॥द्वादशेप्रधानस्यपशोरुपकारायानुष्ठितेनप्रयाजाद्यंगेनपश्वंगपुरोडाशेप्युपकारइत्यादिप्रसंगः
॥ पादानामसाधारणंविषयंदर्शयति॥ विध्यर्थवादस्मृतयोनामचेतिचतुर्विधं॥ प्रथमाध्यायगैः पादैश्चतुर्भिर्मानमीरि
तं॥ प्रथमपादेविधिरूपंमानमीरितं॥ द्वितीयेर्थवादरूपंअर्थवादोमंत्रस्याप्युपलक्षकः॥ तृतीयेस्मृतिरूपंस्मृतिराचारस्या
प्युपलक्षिका॥ चतुर्थेउद्भिच्चित्रादिनामरूपं॥ उपोद्घातः कर्मभेदमानंतस्यापवादगीः॥ प्रयोगभेदइत्येतेद्वितीयाध्याय
पादगाः॥द्वितीयाध्यायस्यप्रथमेपादेआख्यातमेवापूर्वबोधकमपूर्वसद्भावइत्यादिकः कर्मभेदचिंतोपयुक्तउपोद्घातोवर्णि
तः॥ द्वितीयेधातुभेदपुनरुक्त्यादिभिः कर्मभेदः॥ तृतीयेरथंतरादीनांकर्मभेदप्रामाण्यापवादः॥ चतुर्थेनित्यकाम्ययोः
प्रयोगयोर्भेदः॥श्रुतिलिंगंचवाक्यादिविरोधः प्रतिपत्तयः॥अनारभ्योक्तिबह्वर्थस्वाम्यर्थाअष्टपादगाः॥तृतीयाध्या
यस्यप्रथमपादेशेषत्वबोधकानांश्रुतिलिंगादीनांमध्येश्रुतिर्विचारिता॥ द्वितीयेलिंगं॥ तृतीयेवाक्यप्रकरणादि॥ चतु
र्थेनिवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णायहेतुः श्रुत्यादेः परस्परमविरोधसदसद्भावः॥ पंचमेप्रतिपत्तिकर्माणि॥
षष्ठेनारभ्याधीतानि॥सप्तमेबहुप्रधानोपकारकप्रयाजादीनि॥अष्टमेयाजमानानि॥ प्रधानस्यप्रयोक्तृत्वमप्रधा

5
1945

न प्रयोक्तृत्वा॥ फलचिंताजघन्यांगचिंते स्येते चतुर्थगाः॥ चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतामिक्षा दध्यानयनस्य प्र
योजिका इत्यादि प्रधानप्रयोक्तृत्वं विचारितं॥ द्वितीये त्व प्रधानं वत्सापाकरणं शाखाछेदप्रयोजकमित्याद्यप्रधानप्रयोक्तृ
त्वं॥ तृतीये जुहूपर्णमयीत्वादेरपापश्लोकश्रवणादिफलभावाभावचिंता॥ चतुर्थे राजसूयगतजघन्यांगाक्षद्यूतादिचिंता
॥ श्रुत्यादिभिः क्रमस्तस्य विशेषास्तथ्य वर्धने॥ श्रुत्यादेर्बलिताचेति पंचमाध्यायपादगाः॥ पंचमाध्यायस्य प्रथमे पादे श्रुत्य
र्थपाठादिभिः क्रमो निरूपितः॥ द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्मसमापनमित्यादिक्रमविशेषः॥ तृतीये पं
चप्रयाजादीनामावर्त्तनेनैकादश्यमित्यादि वृद्धिः॥ अदाभ्यग्रहचित्रिण्यादिरनावृत्तिरित्यादिरध्यभावः॥ चतुर्थे क्रमनियाम
कानां श्रुत्यर्थपठनादीनां प्रबलदुर्बलभावः॥ अधिकारी तस्य धर्माः प्रतिनिध्यर्थलोपने॥ दीक्षासत्रं देयवह्नी षष्ठपादेष्वमी स्थि
ताः॥ षष्ठाध्यायस्य प्रथमे पादे कर्माधिकारः॥ कर्तुरस्त्यंधादेर्नास्ति स्त्रिया अस्ति स च पत्न्या सहेत्येवमादिनाधिकारी निरूपितः॥
द्वितीये सत्राधिकारिणां प्रत्येकं कृत्स्नफलं दर्शपूर्णमासयोः कर्तैक्यनियमः काम्यकर्म समापनीयमित्येवमादयोऽधिकारिध
र्मा उक्ताः॥ तृतीये द्रव्यस्य प्रतिनिधिरस्ति॥ देवादीनामग्न्यादीनामधिकारिणश्च स नास्तीत्यादि निरूपणं॥ चतुर्थे पदार्थलोप
नं विचारितं॥ अवत्तनाशे सत्याज्येन यजेदिति द्व्यर्थस्य नाशे सति शेषान्तर्याह्यमित्यादिकं पंचमे ज्योतिष्टोमस्यैकादयादीक्षा द्वा
दशाहस्य द्वादशदीक्षा इत्यादि निरूपितं॥ षष्ठे सत्राधिकारिणस्तत्यकल्या एव सत्रविप्रस्यैवेत्येवमादिकं चिंतितं॥ सप्तमे पुत्रा
दिकं न देयं महाभूमिर्न देयेत्येवमादिर्देयविचारः॥ अष्टमे लौकिकाग्नावुपनयनहोमः स्थपतीष्टिस्तथेत्येवमाद्यग्निविचारः कृ
तः॥ प्रत्यक्षात्त्याति देशोस्य शेषः सामनिरूपणात्॥ नामलिंगातिदेशौ द्वौ सप्तमाध्यायपादगाः॥ सप्तमाध्यायस्य प्रथमे पादे स
मानमितरच्छ्येनेनेत्यादि प्रत्यक्षवचनातिदेशः द्वितीये रथंतरशब्देन गानमात्राभिधायिना गानस्यैवातिदेश्यत्वमित्येतादृशः
पूर्वोक्तातिदेशस्य शेषो विचारितः॥ तृतीयेऽग्निहोत्रनाम्नातिदेशः चतुर्थे निर्वापोषधद्रव्यादिलिंगातिदेशः॥ स्पष्टलिंगादस्पष्टा
स्पष्टात्प्रबलादपवादतः॥ अतिदेशविशेषाः स्युरष्टमाध्यायपादगाः अष्टमस्य प्रथमे पादे स्पष्टेन लिंगेनातिदेशविशेषः॥ त
द्यथा सौर्यं चरावतिदेशकाभिनिर्वापस्तद्धितेन देवतानिर्देश एकदेवतत्वमित्यादीनि स्पष्टान्याग्नेयलिंगानि॥ द्वितीये त्वस्पष्ट

लिंगेनातिदेशाः॥ तद्यथा वाजिने हविः सामान्येन लिंगपर्यालोचनेनोक्तिदिश्यते॥ अत्र लिंगमस्पष्टं शीघ्रं तद्बुध्यनुत्पादनात्॥ तृतीये
प्रबलेन लिंगेनातिदेशाः॥ तद्यथाभिचारिके धाग्नावैष्णव सारस्वत बार्हस्पत्येषु हविःषु त्रित्वेन लिंगेन यथाक्रममाग्नेयादि विध्यु
न्न प्राप्तेद्विदेवत्यत्वेन लिंगेन प्रथमे आग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विध्यंतोतिदिष्टः॥ प्रबलं च द्विदेवत्यत्वं शब्दोच्चारणमात्रे
ण सहसा प्रतिभासनात् क्रमस्तु विलंबेन प्रतीत्या दुर्बलः॥ चतुर्थे दर्विहोमेष्वतिदेशो नो द्यते॥ ऊहारंभोथ सामोहो मंत्रोहस्तत्प्रसंगजः॥
नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्तिताः॥ नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्वकमूहविचारप्रारंभः॥ तत्र प्रयाजादयो धर्माः अपू
र्वप्रयुक्ताः॥ अवघातमंत्रादिष्वविवक्षितं व्रीह्यग्न्यादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरूपोद्घातः॥ सवितृशिवपूषशब्दा
नां कृतिषु नास्त्यूहः॥ अग्निशब्दस्यास्त्यूहः इत्यादिक ऊहविचारारंभः॥ द्वितीये सपरिकरः सामोहः॥ तृतीये मंत्रोहः॥ चतुर्थे मंत्रोह
प्रसंगपतितो विचारः॥ द्वारलोपोस्य विस्तारः कार्य्यैकत्वं समुच्चयः॥ ग्रहसामप्रकीर्णानि नवार्थश्चाष्टपादगाः॥ दशमाध्यायस्य
प्रथमे बाधहेतुद्वारलोपो निरूपितः॥ तद्यथा स्वयंकृता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन निष्पादकानामुद्धन
नादीनां बाधः कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः॥ द्वितीये संक्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहर
णैर्विस्तारः॥ तृतीये बाधकारणं कार्य्यैकत्वं॥ तद्यथा प्रकृतौ गवाश्वादिदक्षिणया त्विक्परिक्रयः कार्यं॥ तथा विकृतिरूपभूनाम्न्येक
हधेनुरूपाया दक्षिणायास्तदेव कार्य्यं तेनाध्यान्वा गवाश्वादिदक्षिणा विकृतौ चोदकप्राप्ता बाध्यते॥ चतुर्थे नक्षत्रेष्टिविहितोपहोमा अ
तिदेशप्राप्तैर्नारिष्टहोमैः सह समुच्चीयंते इत्यादिः समुच्चयः पंचमे षोडशिग्रहः प्रकृतिगामी सत्त्वाग्रयणपात्रादेव ग्रहीतव्य इत्या
दिग्राह्यप्रसंगागताग्रहादिविचारः॥ षष्ठे एकं साम तृचे गेयमित्यादिर्बाधप्रसंगागतः सामविचारः॥ सप्तमे पशवंगेषु हविर्भेदो गृहमे
धीयमपूर्वकर्मेत्यादिर्बाधप्रसंगागतः प्रकीर्णविचारः॥ अष्टमे नानुयाजेष्विति पर्युदासो न सोम इत्यर्थवादो नावेद इति प्रतिषेध इ
त्यादिर्बाधोपयुक्तो नञर्थविचारः॥ उपोद्घातस्तथा तंत्रावापौ तंत्रस्य विस्तृतिः॥ आवापविस्तृतिश्चैकादशाध्यायस्य पादगाः
॥ एकादशाध्यायस्य प्रथमे तंत्रस्योपोद्घातो वर्णितः॥ द्वितीये तंत्रावापौ संक्षेपेणोक्तौ॥ तृतीये तंत्रमुदाहरणबाहुल्येन प्रपंचितं च
तुर्थे तथैवावापः प्रपंचितः॥ प्रसंगस्तंत्रिनिर्णीतिः समुच्चयविकल्पने॥ द्वादशाध्यायपादार्था इति पादार्थसंग्रहः॥ द्वादशाध्या

7/1945

यस्य प्रथमे पादे पशुधर्मिणां पशुपुरोडाशे प्रसंगः सौमिकवेदेरुत्तरकालीनकर्मसु प्रसंग इत्यादिविचारः॥ द्वितीये सवनी
यशोस्तंत्रित्वं न तु सवनीयपुरोडाशानामन्वारंभणीयाविकृतिष्वपि स्यान्न तु प्रकृतावेवेत्यादिविचारः॥ तृतीये त्वग्वासंसोः
समुच्चयः॥ आघारगतानामन्वारंभणीयाविकृतिष्वपि स्यान्न तु प्रकृतावुत्वसंततत्वादीनां समुच्चय इत्यादिके प्राधान्येन
यवव्रीह्योर्विकल्प इत्यादिकं समुच्चयापवादत्वेनेत्युभयं चिंतितं॥ चतुर्थे चैंद्राबार्हस्पत्ययाज्यानुवाक्यायुगलयोर्विकल्प
इत्यादिकं प्राधान्येन याज्यानुवाक्ययोः समुच्चय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिंतितं॥ तदेवं द्वादशाध्यायगतेषु
षष्टिसंख्याकेषु पादेषु प्रतिपाद्या अर्थाः संगृहीताः॥ ननु यथोक्तेभ्यः पदार्थेभ्योन्येप्यर्था बहवस्तत्पादेषु विचार्यंते तेषां
कथं तत्तत्पादांतर्भाव इत्याशंक्याह॥ उपोद्घातापवादाभ्यां प्रसंगानुप्रसंगतः॥ तत्तत्पादगतत्वेन विचारांतरमुन्नयेत्॥ यथो
क्तपादप्रतिपाद्यादन्येष्वर्थेषु यथोचितं कश्चिदुपोद्घातः कश्चिदपवादः कश्चित्प्रसंगः पतितः कश्चिदनुप्रसंगपतित इत्येवं पा
दांतर्भाव उन्नेयः॥ ननु संत्वेवमध्यायानां पादानां च व्यवस्थिता अर्थास्तदीयस्तु क्रमः कथमवगंतव्य इत्यत आह॥ शास्त्रपूर्वो
त्तरीभावोध्यायानामभिधास्यते॥ पादानां तु तमत्रैव लेखवाक्युत्पादयामहे॥ एकस्मिन्नध्याये समाप्ते सत्यध्यायांतरारंभे तयो
रध्यायोः पूर्वोत्तरीभावो वलक्ष्यते॥ प्रथमाध्यायगतानां पादानां पूर्वोत्तरीभावउदाहृते सति तच्युत्पत्त्या पादांतरेष्वपि
तस्याक्षिप्तुं शक्यत यातमुदाहरति॥ विधिः साक्षान्मितिर्धर्मे तस्य शेषार्थवादगीः वेदमूलास्मृतिर्नामवाक्यांशामीष्व
तः क्रमः जिज्ञास्यत्वेन प्रतिज्ञाते धर्मे विधिवाक्यं साक्षात्प्रमाणमिति तद्विचारः॥ प्रथमे पाद युक्तः॥ अर्थवादवाक्यस्य विधि
द्वारा प्रामण्याविध्युपनंतरभावित्वं स्मृतिवाक्यस्य सार्थवादविधिरूपवेदमूलतया प्रामाण्यादर्थवादोत्तरभावित्वं नामधेयस्य
वाक्यैकदेशत्वेन पूर्वोक्तत्रिविधवाक्यविचारोत्तरकालीनत्वं॥ अनेन न्यायेनोत्तराध्यायगतपादानां परस्परं क्रममुन्नयः॥ इ
त्थं शास्त्रस्याध्यायानां पादानां क्रमं च विशेषविशिष्टानामसाधारणप्रतिपाद्यमर्थं निरूप्य तन्निर्णयफलं दर्शयति॥ उ
हित्वा संगतीस्तिस्रस्तथावांतरसंगतिं॥ उद्दाक्षेपदृष्टांतप्रत्युदाहरणादिकं शास्त्रादिप्रतिपाद्यार्थसंबंधितयाधिकरणे
योजिते सति तस्याधिकरणस्य शास्त्रसंगतिरध्यायसंगतिः पादसंगतिश्चेति तिस्र उहिता भवंति॥ तद्यथा प्रथमाध्यायप्रथम

1/1945

पादस्य द्वितीयाधिकरणे धर्मस्य लक्षणं प्रमाणराहित्यं पूर्वपक्षीकृत्य तत्सद्भावः प्रतिपादितः तस्याधिकरणस्य धर्मसंबंधि
तया धर्मविचारशास्त्रसंगतिः प्रमाणविचारत्वपत्त्या प्रथमाध्यायसंगतिः विधिवाक्यस्य प्रमाणत्वेनोपन्यासात्प्रथमपाद
संगतिः॥ यथैतत्संगतित्रयमूहितं तथा पूर्वोत्तराधिकरणयोः परस्परमवांतरसंगतिरूहनीया॥ सा चानेकरूपा आक्षेप
संगतिर्दृष्टांतसंगतिः॥ प्रत्युदाहरणसंगतिः प्रासंगिकसंगतिरुपोद्घातसंगतिरपवादसंगतिश्चेत्येवमादिरूपा॥ तासामाक्षे
पादिसंगतीनामूहं व्युत्पादयति॥ पूर्वन्यायस्य सिद्धांतयुक्तिं वीक्ष्य परे नये॥ पूर्वपक्षोक्तयुक्तिं च तत्राक्षेपादिं योजयेत्॥ त
देतत्सर्वं योजयित्वा प्रदर्श्यते॥ प्रथमेध्याये प्रथमपादस्य प्रथमाधिकरणे धर्मविचारशास्त्रं वैधमिति सिद्धांतः॥ अर्थज्ञा
नहेतावध्ययने नियमविधेः संभवादिति तद्युक्तिः॥ द्वितीयाधिकरणे धर्मे लक्षणं प्रमाणं च नास्तीति पूर्वपक्षः॥ लौकिकाका
रहीनत्वात्प्रत्यक्षाद्यप्रवृत्तेश्चेति तद्युक्तिः॥ तया युक्त्या धर्मस्य लक्षणप्रमाणराहित्ये सति नरविषाणसमो धर्म इति तद्विचा
रशास्त्रस्य वैधत्वमनुपपन्नमित्याक्षेपसंगतिः॥ यथा प्रथमाधिकरणे नियमविधिसंभवेन हेतुना विचारशास्त्रस्य विधेय
त्वमुक्तं॥ तथा द्वितीयाधिकरणे लौकिकाकारहीनत्वप्रत्यक्षाद्यप्रवृत्तिरूपेण हेतुना धर्मे लक्षणप्रमाणे न स्त इति दृष्टांतसंगतिः॥ य
था प्रथमाधिकरणसिद्धांते पूर्वोक्तयुक्तिरव लोक्यते तथा द्वितीयाधिकरणसिद्धांते काचिदपि युक्तिं न पश्याम इति प्रत्युदाह
रणसंगतिः॥ एते दृष्टांतप्रत्युदाहरणसंगती मंदबुद्धिभिरपि सर्वत्रोत्प्रेक्षितुं शक्येते॥ पंचमाधिकरणे विधिवाक्यस्य निरपे
क्षत्वात्प्रामाण्यं वर्णितं॥ तस्य च वाक्यस्य शब्दार्थयोर्मध्ये शब्दकोटिनिविष्टत्वाद्वाक्यप्रसंगेन शब्दनित्यत्वं षष्ठाधिकरणे
वर्ण्यत इति प्रासंगिकसंगतिः॥ सप्तमाध्यायस्य चतुर्थे पादे द्वितीयाधिकरणेन सौर्यादिविकृतिषु वैदिकमंगजातमुपदिष्ट
तदुपयोगित्वेन प्रथमाधिकरणे धर्मसापेक्षत्वं साधितं॥ तत्र प्रथमाधिकरणमुपोद्घातः से यमुत्तराधिकरणेन सह पूर्वाधिकर
णस्योपोद्घातसंगतिः॥ प्रथमाध्याये तृतीयपादस्य प्रथमाधिकरणेष्टकादिस्मृतेः प्रामाण्यमुक्तं॥ द्वितीयाधिकरणे सर्व
विरुद्धस्मृतेः पूर्ववत्प्राप्तं प्रामाण्यमपोद्यते सेयमपवादसंगतिः॥ अनया दिशा सर्वत्र संगतिरूहनीया इत्थं संगतिस्तु साद्या
थ प्रत्यधिकरणं विषयसंशयपूर्वसिद्धांताश्चतुरो वयवान् संजिघृक्षुः॥ प्रथमाध्यायस्य प्रथमे पाद प्रथमाधिकरणं भ

इमंतेनावतारयति॥ स्वाध्यायोऽध्येतव्य इत्यस्य विधानस्य प्रयुक्तितः॥ विचारशास्त्रं नारभ्यमारभ्यं वेति संशयः॥ अर्थधीर्हेतुता
धीतत्वात् लोकसिद्धावघातवत्॥ नियामकं न चैवातो वैधारंभो न संभवी॥ दर्शपूर्ववदस्त्यत्र क्रत्वपूर्वं नियामकं॥ अर्थनिर्णायकं
शास्त्रमत आरभ्यतां विधेः॥ चोदनालक्षणोऽर्थो धर्म इत्यारभ्यान्वाहार्य्ये च दर्शनादित्येतदंतं जैमिनिप्रोक्तं सूत्रजातं धर्मवि
चारशास्त्रं तदेतस्य प्रथमाधिकरणस्य विषयः स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिरक्षरग्रहणमात्रपर्य्यवसायीति केचि
द् मन्यंते॥ अपरे त्वेवमाहुः॥ अर्थज्ञानरूपदृष्टप्रयोजनायेदमध्ययनं विधीयते॥ अर्थज्ञानं च विचारमंतरेण न संभवतीति त
तो विधिर्विचारशास्त्रस्य प्रयोजक इति॥ तत्रैवं संशयः॥ इदं विचारशास्त्रं किं विधिप्रयुक्त्या नारंभणीयमुतारंभणीयमिति॥
तत्रार्थज्ञानायाध्ययनविधिरिति वदन्वादी प्रष्टव्यः॥ किमत्यंतमप्राप्तमध्ययनं विधीयते॥ १॥ किं वा पक्षे प्राप्तमवघातवन्निय
म्यत इति॥ नाद्यः विमतं वेदाध्ययनमर्थज्ञानहेतुरध्ययनत्वाद्भारताध्ययनावदित्यनुमानेनैव विधिनिरपेक्षेण प्राप्तत्वात्॥
स्तु द्वितीयपक्षः॥ अवघातवन्नियमविधिसंभवात्॥ यथा नखैरवघातेन वा तंडुलनिष्पत्तिसंभवात्॥ २॥ पक्षे प्राप्तोऽवघातो
विधिनावश्यं कर्त्तव्य इति नियम्यते॥ तथा लिखितपाठेन गुरुपूर्वकाध्ययनेन वार्थज्ञानसंभवात्पक्षे प्राप्तमध्ययनं विधिना नियम्य
त इति चेत्॥ न वैषम्यात्॥ अवघातनिष्पन्नैरेव तंडुलैः क्रतोरपूर्वद्वारेण दर्शपूर्णमासौ परमापूर्वं जनयतो नान्यथा॥ ततो दर्श
पूर्वमवघातस्य नियमहेतुः॥ अत्र तु लिखितपाठजन्येनैवार्थज्ञानेन क्रत्वनुष्ठानसिद्धेरध्ययनस्य नियमहेतुर्नास्ति॥ अतो द्विवि
धविध्यसंभवादर्थज्ञानहेतुविचारशास्त्रारंभस्य वैधत्वं नास्ति॥ तर्हि श्रूयमाणस्य विधेः का गतिरिति चेत्॥ स्वर्गो वाक्षरग्रह
णमात्रं विधेयमिति वदामः॥ अश्रुतोऽपि स्वर्गो विश्वजिन्न्यायेन कल्पनीयः॥ स स्वर्गः स्यात्सर्वान्प्रत्यविशेषादिति सूत्रेण वि
श्वजित्यश्रूयमाणमप्यधिकारिणं संपादयितुं तद्विशेषणं स्वर्गफलं युक्त्या रूढापितं॥ तदध्ययनेऽप्यस्तु॥ एतदेवाभिप्रे
त्योक्तं॥ विनापि विधिनादृष्टलाभान्नहि तदर्थता॥ कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवदिति॥ एवं च सति वेदम
धीत्य स्नायादिति शास्त्रमनुगृह्यते॥ अस्मिन्नु शास्त्रे वेदाध्ययनसमावर्तनयोर्नैरंतर्यं प्रतीयते॥ त्वत्पक्षे त्वधीतेऽपि वेदे ध
र्मविचाराय गुरुकुले त्वधिवासः कर्त्तव्यः॥ तथा सति नैरंतर्य्यं बाध्यते॥ तस्माद्विचारशास्त्रस्य वैधत्वाभावात्पाठमात्रेण

धर्मसिद्धेः समावर्तनशास्त्राच्च धर्मविचारशास्त्रं नारंभणीयमिति पूर्वः पक्षः॥ अत्रोच्यते॥ यदुक्तं लोकसिद्धत्वान्नाप्राप्तवि
धिः इति तत्तथैवास्तु॥ नियमविधित्वं तु न वारयितुं शक्यं॥ यथा दर्शपूर्णमासजन्यं परमापूर्वमवघातनियमजन्यस्यावांत
रापूर्वस्य कल्पकमेवमशेषक्रतुजन्यमपूर्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यस्यापूर्वस्य कल्पकं भविष्यति॥ नियमादृष्टा
नंगीकारे च श्रूयमाणो विधिरनर्थकः स्यात्॥ न च विश्वजिन्न्यायेन स्वर्गार्थत्वं युक्तं॥ दृष्टफलेऽर्थज्ञाने संभवत्यदृष्टस्य कल्पयितु
मशक्यत्वात्॥ अत एवोक्तं॥ लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना॥ विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यतीति॥ नन्वेवमपि श्रु
तव्याकरणाद्यंगस्याधीतवेदस्य पुरुषस्यार्थज्ञानसंभवाद्विचारशास्त्रस्य वैयर्थ्यमिति चेत्॥ न ज्ञानमात्रसंभवेऽपि निर्णयस्य
विचाराधीनत्वात् अक्ताः शर्करा उपदधातीत्यत्र घृतेनैव तैलादिनेत्ययं निर्णयो व्याकरणेन निगमेन निरुक्तेन वा न सिध्य
ति विचारशास्त्रं तु तेजो वै घृतमिति वाक्यशेषादर्थं निर्णेष्यति॥ अतो विचारो वैधः वेदमधीत्य स्नायादिति शास्त्रं त्व
ध्ययनसमावर्त्तनयोः पूर्वापरीभावं समानकर्तृकत्वं एवाचष्टे न त्वानंतर्य्यं॥ तस्माद्विधिवशादेव विचारशास्त्र
मारंभणीयमिति सिद्धांतः॥ अस्मिन्नेवाधिकरणे गुरुमतमाह॥ अथवाध्ययनात्सिद्धेर्नैवास्त्यध्ययने विधिः॥
तेन पूर्वोत्तरौ पक्षौ प्रसाध्यावन्यहेतुभिः विधेयाध्यापनं सिध्येद्बालस्यार्थधियं विना॥ तेनानिर्विषयं शास्त्रं नि
ष्फलं वेत्युपेक्ष्यतां॥ स्वतः प्राप्तार्थबोधस्य विवक्षानयनोदनात्॥ विषयादिषु संपादं शास्त्रमारभ्यतां ततः अष्टवर्षं ब्राह्म
णमुपनयीत तमध्यापयीतेत्यध्यापनं विहितं न चात्र नियोज्याभावः॥ आचार्यत्वकामिनो नियोज्यत्वात्॥ उपनयीतेत्यने
नाचार्यकरणे विहिते नात्मनेपदेन नियोज्यविशेषमाचार्यत्वं प्रतीयते॥ उपनयने यो नियोज्यः स एवाध्यापनेऽपि तयोरे
कप्रयोजनत्वात्॥ एवं च सत्याचार्यकर्तृकमध्यापनं माणवककर्तृकेणाध्ययनेन विना न सिध्यतीत्यध्यापनविधिप्रयु
क्तेनैवाध्ययनानुष्ठानसिद्धेर्न पृथगध्ययने विधिरभ्युपगंतव्यः॥ श्रूयमाणविधिवाक्यं नित्यानुवादत्वेनाप्युपपद्यते॥ त
तोऽध्ययनविधिमुपजीव्य पूर्वमुपन्यस्तौ पूर्वोत्तरपक्षावन्यथा वर्णनीयौ॥ विषयसंशययोस्तु नास्ति विप्रतिपत्तिः विचार
शास्त्रं विषयः अवैधं वैधं वेति संशयः॥ तत्र वैधत्ववादी प्रष्टव्यः॥ विधेयमाचार्यकर्तृकमध्यापनं किं माणमकस्यार्थ

11
1945

ज्ञानमपि प्रयुंजीत किंवा पाठमात्रं॥ नाद्यः अंतरेणाप्यर्थज्ञानमध्यापनसिद्धेः॥ पाठमात्रे तु विचारस्य विषयो न संभवति॥
आपाततः प्रतीतः संदिग्धोर्थो विषयः तथा सति यत्रार्थप्रतीतिरेव नास्ति तत्र संदेहस्य का कथा॥ निर्णयो विचारस्य फलं सोपि
विषयवद्दूरापेतः अतो विषयप्रयोजनाभावाद्विचारशास्त्रं नारंभणीयमिति पूर्वपक्षः॥ अत्रोच्यते मानामाध्यापने नार्थाव
बोधः प्रयुंज्यतां॥ तथापि सांगवेदाध्यायिनो निगमनिरुक्तव्याकरणैर्व्युत्पन्नस्य पौरुषेयग्रंथेष्विव वेदेप्यर्थावबोधः स्वत
एव प्राप्नोति॥ ननु यथा विषं भुंक्ष्वेत्यत्र प्रतीयमानोप्यर्थो न विवक्षितः॥ तथा वेदार्थस्याविवक्षायां विषयाद्यभावस्तदवस्थ इति
चेत् न॥ विवक्षाया अपनोदितुमशक्यत्वात्॥ विषभोजनवाक्यस्याप्तप्रणीतत्वेन बाधो मा भूदिति मुख्यार्थस्तत्र परित्यक्तः॥ वे
दे तु कुतो न विवक्षितार्थत्वं विवक्षिते च वेदार्थे अत्र यत्र पुरुषस्य संदेहः स सर्वोपि विचारशास्त्रस्य विषयः तन्निर्णयः प्रयोजनं
॥ ततोध्यापनविधिप्रयुक्तेनाध्ययनेन बुध्यमानस्यार्थस्य विचार्यत्वाद्विचारशास्त्रस्य वैधत्वं सिद्धं॥ ११॥ द्वितीयं भट्टमतेना
रचयति॥ विचारविषयो धर्मो लक्षणेन विवर्जितः मानेन वाथवोपेतस्ताभ्यामिति विचिंत्यते॥ लौकिकाकारहीनस्य किन्नाम
लक्षणं॥ मानशंका तु दूरेत्र प्रत्यक्षाद्यप्रवर्तनात्॥ चोदनागम्य आकारो ह्यर्थत्वे सति लक्षणं॥ अत एव प्रमाणं च चोदनैवात्र
नो कुतः॥ लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः॥ अत एवाहुः मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणादिति॥ सजातीयविजा
तीयव्यावर्तको लक्ष्यगतः कश्चिल्लोकप्रसिद्ध आकारो लक्षणं तेन च लक्षणेन लक्ष्ये वस्तुनि संभावनाबुद्धौ जातायां प्रमातुमुद्यु
क्तः प्रमाणेन तदवगच्छति॥ तद्यथा॥ सास्नादिर्गोरीत्युपश्रुत्य चतुष्पात्सु जीवेषु तल्लक्षणलक्षितं पदार्थमन्विष्यायं गौरिति च
क्षुषा च गच्छति॥ एवं च सति लौकिकत्वाद्धर्मस्य नास्ति लक्षणं तत्र कुतः प्रमातुमुद्योगः॥ कथंचित्तदुद्योगेपि न तत्र प्रमाणसद्भावः
शंकितुमपि न्याय्यः॥ न तावदत्र प्रत्यक्षं क्रमते धर्मस्य रूपादिरहितत्वात्॥ अत एव व्याप्तिग्रहणाभावान्नास्त्यनुमानं॥ प्रत्यक्षा
नुमानमूलश्च शब्दस्य संगतिग्रहः॥ ततो व्युत्पत्त्यभावान्नागमोपि तत्र प्रवर्तते॥ तस्माद्धर्मो लक्षणप्रमाणरहित इति प्राप्ते ब्रूमः
माधुर्यस्वरादिगम्यो लौकिक आकारः तथा चोदनागम्यः स्वर्गफलसाधनत्वादिलक्षण आकारोस्ति तेनार्थत्वे सति चोदनाग
म्योर्थो धर्म इति लक्षणं भवति॥ अर्थो धर्म इत्युक्ते प्रमाणि चैत्यवंदनादौ घटादौ चातिव्याप्तिस्तद्व्यवच्छेदाय चोदनागम्य इत्यु

13 / 1945

क्तं॥ नाव त्वेवोक्ते विधिगम्येनानर्थफलत्वेनानर्थरूपे श्येनाद्यभिचारकर्मण्यतिव्याप्तिः तद्व्यवच्छेदायार्थ इत्युक्तं॥ यद्यपि श्येनस्य श
त्रुवधः फलं न तु नरकस्तथापि तस्य वधस्य नरकहेतुत्वाद्वधद्वारा श्येनोनर्थः॥ न चैवमग्नीषोमीयपशुहिंसायामपि वधत्वेन न
रकहेतुत्वं स्यादिति शंकनीयं तस्याः क्रत्वंगत्वेन क्रतुफलस्वर्गव्यतिरेकेण फलांतराभावात्॥ यतश्चोदनागम्यत्वे सत्यर्थत्वं धर्म
लक्षणं अत एव गम्ये धर्मे गमनं विधिवाक्यं प्रमाणं॥ यद्यपि प्रत्यक्षानुमानयोरविषयो धर्मस्तथापि प्रसिद्धपदसमभिव्याहारेण
व्युत्पत्तिः संभवति तस्माल्लक्षणप्रमाणाभ्यामुपेतो धर्मः॥ अस्मिन्नेवाधिकरणे गुरुमतमाह॥ यज्जिज्ञास्य वेदार्थः किं मंत्रा
र्थवबोधितः सिद्धार्थोप्यथ विध्येकगम्यः कार्यार्थ एव वा॥ सिद्धेपि पुंजन्मादौ व्युत्पत्ते रुपपत्तितः मंत्रादिगम्यसिद्धस्य वेदार्थ
त्वेपि का क्षतिः॥ हर्षहेतुबहुत्वेन व्युत्पत्तिः पुत्रजन्मनि॥ दुर्लभा फलभा कार्ये वेदार्थोतः स एव हि॥ अथातो धर्मजिज्ञासेत्यत्रा
र्थशब्देन कृत्स्नवेदाध्ययनानंतर्यमुच्यते॥ अतः शब्देन कृत्स्नस्य वेदस्याविवक्षितार्थत्वं हेतूक्रियते॥ उक्तशब्दद्वयानुसारेण धर्म
शब्दोपि कृत्स्नवेदार्थमाचष्टे॥ ततः सूत्रे वेदार्थो जिज्ञास्य इति प्रतिज्ञा कृता॥ तत्र संशयः किं मंत्रार्थवादप्रतीतः सिद्धार्थोपि वेदार्थो भ
वति॥ किं वा विधिवाक्यप्रतीतः कार्यार्थ एक वेदार्थ इति॥ तत्र लोकावगतसामर्थ्यः शब्दो वेदेपि बोधकः॥ इति न्यायेन व्युत्पत्त्यनु
सारी वेदार्थो वर्णनीयः॥ व्युत्पत्तिश्च सिद्धार्थेप्यस्ति पुत्रस्ते जात इति वार्ताहरव्याहारजन्यं श्रोतुर्हर्षमनुमाय हर्षहेतौ पुत्रजन्मनि सं
गतिं प्रतिपद्यते ततो मंत्रार्थवादप्रतीतोप्यर्थो वेदार्थ इति प्राप्ते ब्रूमः॥ पुत्रजन्मवद्धर्षहेतूनां धनलाभादीनां बहुत्वादस्य वाक्यस्य
पुत्रजन्मैवार्थ इति निर्णयो दुर्बलः॥ गामानयेति वाक्ये तु गवानयनरूपां मध्यमवृद्धप्रवृत्तिमवलोक्य संगतिग्रहणं सुलभं॥
तस्मात्कार्यरूप एव वेदार्थ इति तृतीयं भट्टमतेनारचयति॥ धर्मस्य ज्ञापकं मानं यदुक्तं चोदनात्मकं॥ एतत्किं न परीक्ष्यं स्यात्किं वा
सम्यक्परीक्ष्यतां॥ मानोपदेशान्मेयस्य सिद्धत्वात्किं परीक्षया॥ मैवं विचारशास्त्रेस्मिन्परीक्षोपेक्ष्यते कुतः॥ स्पष्टोर्थः॥ ॥
अस्मिन्नेवाधिकरणे गुरुमतमाह॥ ॥ आदौ परीक्ष्यो वेदार्थश्चोदनामानताथवा वेदार्थस्य प्रधानत्वात्प्रथमं तत्परीक्षणं॥
चोदनामानतैवात्र प्रथमं साध्यतां गता॥ अनपेक्षतयातस्य यतो मुख्यत्वमाश्रितं॥ द्वितीयाध्यायाद्यैः कर्मभेदशेषशेषित्वादि
रूपो वेदार्थः॥ सूत्रकारेण परीक्षिष्यते॥ चोदनाप्रामाण्यस्य तु प्रथमेध्याये परीक्षात्तदेतदयुक्तं॥ कुतः वेदार्थस्य प्रधानत्वेना

दीपरीक्षणीयत्वात् प्रधानभूतोहि वेदार्थः पुरुषार्थत्वेनानुष्ठेयत्वात् प्रमाणं तु तद्बोधनाय प्रवृत्तं सत्तच्छेषतया न प्रधानमिति प्राप्ते
ब्रूमः॥ अस्त्वनुष्ठानोपाधौ वेदार्थप्रमाणयोः प्रधानोपसर्जनभावः प्रमाणप्रमेयभावोपाधौ तु प्रमाणस्यैव मुख्यत्वं निरपेक्षत्वा
त्॥ नहि स्वतः प्रामाण्यवादिनां मते सापेक्षता प्रमाणस्यास्ति प्रमेयं तु सापेक्षं मानाधीना मेयसिद्धिरित्युक्तत्वात्॥ तदेतन्मुख्य
त्वमाश्रित्य सूत्रकारः॥ प्रमाणपरीक्षामादौ चकारेति युज्यते॥ अथान्यत् प्राधान्यमाश्रित्य धर्मविचार एवादौ कस्मान्न कृतः अ
परीक्षितेन प्रमाणेन धर्मस्यासिद्धौ तद्विचारस्याश्रयासिद्धेः तदेवमधिकरणत्रयेव्युत्पादनाय भाट्टप्राभाकरमतभेद उप
न्यस्तः॥ अथ प्रायेण भाट्टमतमेवोपन्यस्यते॥ ॥ चतुर्थमारचयति॥ ॥ प्रत्यक्षादिभिरप्येष गम्यते विधिनैव वा॥ अक्षादी
नां प्रमाणत्वान्मेयधर्मावाभासिता॥ वर्त्तमानैकविषयमक्षं धर्मस्तु भाव्यसौ॥ अक्षमूलानुमानादिस्तेन विध्येकमेयता अक्षं प्र
त्यक्षं॥ प्रत्यक्षादीनां प्रमाणत्वात् प्रमेयावभासकत्वं तावदविवादं॥ धर्मश्च प्रमेयः असंदिग्धाविपर्यस्तत्वे सति बुध्यमानत्वा
द्घटादिवत्॥ तस्मात्प्रत्यक्षादिभिरप्येष धर्मो गम्यत इति प्राप्ते ब्रूमः॥ धर्मस्य प्रमेयत्वेपि प्रत्यक्षायोग्यता नास्ति॥ प्रत्यक्षस्य
वर्त्तमानमात्रविषयत्वात्॥ यस्तु प्रत्यक्षस्यात्यंतमविषयस्तत्रानुमानादीनां कैव कथा॥ क्वचित्प्रत्यक्षेण गृहीते व्याप्त्यादौ
पश्चादनुमानादीनां प्रवृत्तिः॥ तस्माद्विधिनैव धर्मो गम्यते॥ ॥ पंचममारचयति॥ ॥ अबोधको बोधको वा न तावद्बोधको वि
धिः शक्तेरलौकिके धर्मे ग्रहणं दुर्घटं यतः॥ समभिव्याहृते धर्मे शक्तिग्रहणसंभवात्॥ बोधकस्य विधेर्मीत्वमनपेक्ष्यत या स्थितं
॥ यथा धर्मे प्रत्यक्षादीनां प्रामाण्यं नास्ति तथा विधेरपि नास्ति प्रामाण्यं शक्तिग्रहपूर्वकं हि प्रामाण्यमाप्तवाक्यस्य लोके दृष्टं॥ श
क्तिश्च लोकप्रसिद्धे गवादौ गृह्यते॥ धर्मस्त्वलौकिकः अतस्तत्र शक्तिग्रहणं दुर्घटं॥ तस्माद्विधेरबोधकत्वान्न धर्मे प्रामाण्यमिति
प्राप्ते ब्रूमः॥ यथा प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति इत्यत्र मधुकरपदस्यार्थमजानन्॥ अन्यपदार्थमवगत्य तत्सम
भिव्याहारात् कमलमध्यगते मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकर० शब्दस्य संगतिं गृहीत्वा वाक्यार्थं प्रतिपद्यते॥ तथा कारी
र्या वृष्टिकामो यजेतेत्यत्र लोकप्रसिद्धार्थवृष्ट्यादिपदमभिव्याहारणादलौकिकभावनायां विधेः संगतिं गृहीत्वा विधिवाक्यार्थं
पुरुषो बुध्यते॥ तस्मादबोधकत्वलक्षणमप्रामाण्यं नास्ति॥ न च संवादाभावादप्रामाण्यं॥ समनंतरभाविप्रतिनियतदृष्टफ

ले दृष्ट्यादौ संवादस्यापि संभवात्॥ अनियतदृष्टफले चित्रायागादौ प्रतिनियतजन्मांतरफले ज्योतिष्टोमादौ च संवादः कथमि
ति चेत्॥ एवं तर्हि स्वतः प्रामाण्याभ्युपगमान्नास्ति क्वापि संवादाद्यपेक्षा तस्मादबोधकत्वसापेक्षत्वयोरप्रामाण्यकारणयो
रभावाद्विधेः स्वतः सिद्धं प्रामाण्यं नोपह्नोतुं शक्यं॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ विध्यादिरूपोयः शब्दः सो नित्यो वा
विनश्वरः॥ अनित्यो वर्णरूपत्वाद्वर्णजन्मोपलंभनात्॥ अबाधितप्रत्यभिज्ञानबलाद्वर्णस्य नित्यता॥ उच्चारणप्रयत्नेन व्यज्य
ते सो न जन्यते शब्दनित्यत्ववादिनो वैय्याकरणास्तावदेवं मन्यंते॥ वर्णसमूहश्रवणानंतरमिदमेकं पदमिति प्रत्ययो मानसेन प्र
त्यक्षेणोत्पद्यते॥ तस्य च प्रत्ययस्य वर्णव्यतिरिक्तः॥ कश्चित्स्फोटनामकः पदार्थो विषयः स च नित्यः स एव शब्दो न तु वर्णा इति
॥ तदेतन्नैय्यायिकादयो न सहंते॥ वर्णेष्वेवैकार्थावच्छेदोपाधिना पदैक्यबुद्धेरुपपत्तेर्वर्णातिरिक्तस्फोटकल्पनानिरर्थिका॥ तस्मा
द्वर्णानामेव शब्दत्वं वर्णाश्च प्रतिपुरुषं प्रत्युच्चारणं च जन्मविनाशवंत उपलभ्यंते॥ तस्मादनित्यः शब्दस्तस्य च कारणदोषसं
भवात्॥ विधेरप्रामाण्यमिति पूर्वः पक्षः बहुभिः॥ पुरुषैः प्रत्येकं बहुकृत्व उच्चारिते गोशब्दे त एवामी गकारादयो वर्णा इत्यबाधित
प्रत्यभिज्ञा जायते तद्बलान्नित्या वर्णाः॥ न च वर्णानां जन्माभावे बहुकृत्व उच्चारणप्रयत्नो व्यर्थ इत्याशंकनीयं॥ तत्प्रयत्नस्य व्यं
जकत्वांगीकारात्॥ एवं सति पुरुषभेदा उच्चारणभेदाश्च यथायोगमुदात्तादिभेदैः पटुमृदुत्वादिभेदैश्चोपेतान् ध्वनिघोषानुत्पा
द्य चरितार्था भविष्यंति तस्मान्नित्ये शब्दे कारणदोषाभावान्नास्त्यप्रामाण्यं॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ वेदवाक्यमभा
नं स्यान्मानं वा नास्य मानता॥ पृथक् संकेतवीक्षाया मनपेक्षत्ववर्जनात्॥ वेदेपि लोकवन्नैव वाक्यार्थे संगतिः पृथक् ग्रहीतव्या
ततो वाक्यं प्रमाणं निरपेक्ष्यतः॥ यद्यपि वर्णानां नित्यत्वादेकार्थावच्छेदकस्य पदस्यापि वर्णरूपतायां नित्यत्वाद्वर्णपदद्वारा वे
दस्य कारणसापेक्षत्वं नास्ति॥ तथाप्यग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादि वाक्यस्य वाक्यार्थे संगतिग्रहणमपेक्षितं ततो निरपेक्ष्या
भावात्प्रामाण्यं नास्तीति प्राप्ते ब्रूमः॥ लोके गामानयेत्यादिपदप्रयोगेषु पदपदार्थयोरेव संगतिर्गृह्यते॥ वाक्यं त्वाकांक्षायोग्य
तासन्निधिवशात्स्वार्थं प्रतिपादयतीत्यविवादं॥ तथा वेदवाक्यस्यापि प्रत्यायकत्वादनपेक्षकत्वेन प्रामाण्यमविरुद्धं॥ ॥ अष्ट
माधिकरणमारचयति॥ ॥ पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत्॥ समा

15/1945

अ० क० माला०
९

स्याध्यापकत्वेन वाक्यत्वं तु पुराहतं॥ तत्कत्रनुपलंभेन स्यात्ततोऽपौरुषेयता॥ काठकं कौथुमं तैत्तिरीयमित्यादिसमाख्यातन्त्वेद
विषयालोके दृष्टा॥ तद्धितप्रत्ययश्चतेन प्रोक्तमित्यस्मिन्नर्थे वर्त्तते॥ तथासति व्यासेन प्रोक्तं वैय्यासकिं भारतमित्यादाविव पौरुषे
यत्वं प्रतीयते॥ किंचविमतं वेदवाक्यं पौरुषेयं वाक्यत्वात्कालिदासादिवाक्यवदिति प्राप्ते ब्रूमः॥ अध्ययनसंप्रदायप्रवर्त्तकत्वेन
समाख्योपपद्यते॥ कालिदासादिग्रंथेषु तत्तत्सर्गावसाने कर्त्तार उपलभ्यंते॥ तथा वेदस्यापि पौरुषेयत्वे तत्कर्त्रोपलभ्येत न
चोपलभ्यते॥ तो वाक्यत्वहेतुः प्रतिकूलतर्कपराहतः॥ तस्मादपौरुषेयो वेदः तथासति पुरुषबुद्धिदोषकृतस्याप्रामाण्यस्यानाशं
कनीयत्वाद्विधिवाक्यस्य धर्मे प्रामाण्यं सुस्थितं॥ ॥ इतिश्रीमाधवीये जैमिनीयन्यायमालाविस्तरे प्रथमाध्यायस्य प्र
थमः पादः॥ ॥ १॥ ॥अथमाधिकरणमारचयति॥ ॥ वायुर्वा इत्येवमादेरर्थवादस्य मानता॥ नविधेयेऽस्ति धर्मे
किं किं वास्ते तत्र विद्यते॥ विध्यर्थवादशब्दानां मिथोऽपेक्षापरिक्षयात्॥ नास्त्येकवाक्यता धर्मे प्रामाण्यं संभवेत्कुतः॥ विध्यर्थ
वादौ साकांक्षौ प्राशस्त्यपुरुषार्थयोः॥ तेनैकवाक्यता तस्माद्वादानां धर्ममानता॥ काम्यपशुकांडे विध्यर्थवादौ श्रूयेते॥ वायव्यं
श्वेतमालभेत भूतिकाम इति विधिः॥ वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्यर्थवादः
॥ तत्र विधिवाक्यगता वायव्यादिशब्दा अर्थवादशब्दनैरपेक्ष्येणैव विशिष्टमर्थं दधति॥ अर्थवादशब्दाश्च तन्नैरपेक्ष्येणैव भूता
र्थमन्याचक्षते॥ क्षिप्रगामी वायुः स्वोचितेन भागधेयेन तोषितो भागं प्रदायैश्वर्यं प्रयच्छतीत्युक्ते रामायणभारतादाविव वृत्तांतः
कश्चित्प्रतीयते॥ न त्वनुष्ठेयं किंचित् अत एकवाक्यत्वाभावान्नास्त्यर्थवादस्य धर्मे प्रामाण्यमिति प्राप्ते ब्रूमः॥ माभूत्पदैकवा श्री
क्यता वाक्यैकवाक्यता तु विद्यते विधिवाक्यं तावत्पुरुषं प्रेरयितुं विधेयार्थस्य प्राशस्त्यमपेक्षते॥ अर्थवादवाक्यं च फलवदर्था
वबोधपर्यवसितत्वाध्ययनविधिपरिगृहीतत्वेन पुरुषार्थमपेक्षते॥ ततः पुरुषार्थपर्यवसितविध्यपेक्षितप्राशस्त्यं लक्षणावृत्त्या स ९
मर्पयदर्थवादवाक्यं विधिवाक्येन सहैकवाक्यतामापद्यते॥ यतः क्षिप्रगामी स्वभावत आशीघ्रफलप्रदो वायुरस्य पशोर्देवता ततः
प्रशस्तमिमं वायव्यं पशुमालभेतेति वाक्ययोरन्वयः॥ तस्मादर्थवादा धर्मे प्रमाणं॥ अस्मिन्नेवाहकरणे मतांतरमनुसृत्य पूर्वोत्तरपक्षा
वाह अर्थवादोक्तहेत्वपेक्षत्वान्न विधेर्मानतेति चेत्॥ सत्यन्वयस्य तद्द्वारापेक्षेति गुरुर्जगौ॥ यथा वायुः क्षिप्रमेव फलप्रदः अतो वायव्य

17
1945

मालभेतेत्येवमर्थवादोक्तं हेतुमपेक्ष्य विधिः पुरुषं नियुङ्क्ते॥ ततः सापेक्षत्वादप्रामाण्यमिति पूर्वपक्षः विमतं कर्मानुष्ठेयं
फलप्रददेवतोपेतत्वात्॥ राजसेवावदित्यनुमानं यद्यर्थवादे विवक्ष्यते॥ तदानीमागमप्रमाणस्य विधिवाक्यस्य मानांतर
सापेक्षत्वं स्यात्॥ नन्वेवं विवक्षितं किंतु फलप्रददेवतोपेतत्वोपन्यासमुखेन कर्मप्राशस्त्यमुपलक्ष्यते॥ तथासति प्रशस्तं
कर्मानुष्ठेयमित्यस्मिन्नर्थे सार्थवादस्य विधेः पर्यवसानादेकवाक्यता लभ्यते॥ तत्कुतः सापेक्षत्वं तस्माद्विधिः प्रमाणमिति
राद्धांतः॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ ऊर्जोऽवरुध्या इत्येष विधिवल्लिंगदोनर्किं॥ यूपोदुंबरतां स्तौति स्तौति वा त
द्विधित्सया॥ चतुर्थ्या फलतालाभाद्यूपोदुंबरता फलं॥ ऊर्जोऽवरोधं कथयत्कथं स्तौति परो भवेत्॥ अस्तु वौदुंबरत्वस्या
विधानात्कस्य तत्फलं॥ अर्थद्वैधे वाक्यभेदस्तेन स्तावक एव सः॥ इदमाम्नायते औदुंबरो यूपो भवत्यूर्ग्वा उदुंबर ऊर्क्प
शव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोऽवरुद्ध्या इति अमृतशब्दाभिधेयोऽत्यंतसारभूतः सूक्ष्मोऽन्नरस ऊर्गुच्यते उदुंबररूपया
ऊर्जा यमानार्थमध्वर्युः पशुरूपामूर्जमाप्नोति॥ ततो यूपस्यौदुंबरत्वमूर्जः संपादनायभवतीत्यर्थः॥ अत्रावरुद्ध्या इति तादर्थ्ये
चतुर्थी तया फलत्वं गम्यते॥ धनलाभाय राजसेवेत्यादौ तद्दर्शनात्॥ न च फलपरस्य वचनस्य स्तावकत्वं युज्यते॥ अन्य
था स्वर्गकाम इत्यस्यापि ज्योतिष्टोमस्तावकत्वप्रसंगादिति प्राप्ते ब्रूमः॥ अयमूर्जोऽवरोधः कस्य फलं किं विहितस्यौदुंब
रत्वस्य उताविहितस्य नाद्यः॥ अनुष्ठानमंतरेण द्रव्यमात्रात्फलानुत्पत्तेः॥ द्वितीये किमत्र विधिः प्रत्यक्षः॥ उतोन्नेयः नाद्य
औदुंबरो यूपो भवतीत्यत्र लिङ्प्रत्ययाश्रवणात्॥ द्वितीये स्तुत्या संउन्नेयः॥ न चात्र स्तुतिमंगीकरोषि अथोच्येत॥ वि
धानायौदुंबरत्वं स्तूयते तत्फलं चावबोध्यत इति॥ तर्हि वाक्यं भिद्येत॥ ततः फलविधिवल्लिंगद्यमानमप्येतद्वाक्यं स्ताव
कमेव॥ १॥ अत्रैव गुरुमतेन पूर्वोत्तरपक्षावाह॥ आप्नोतीति विधित्वस्य वादत्वस्याप्यनिर्णयात्॥ नप्रमा चोदनेत्येतन्नवा
दाद्येकवाक्यतः॥ ऊर्जं पशूनाप्नोतीत्यपूर्वार्थत्वाद्विधित्वं प्रतिभासते॥ लिङनद्यभावादर्थवादत्वं॥ अतः संदिग्धत्वान्नप्रा
माण्यं चोदनाया इति पूर्वः पक्षः॥ एकवाक्यत्वभावेनार्थवादत्वं निर्णीयते तेन प्रमाणं चोदनेति राद्धांतः॥ ३॥ २॥ तृतीयमार
चयति॥ ॥ तेनह्यन्नमिति प्रोक्ता बादो हेतुरुत स्तुतिः॥ हिनाश्रुता हेतुता तात् शूर्पमन्यच्च साधनं॥ शूर्पसाधनता श्रौतीना
श्रौतेः सा विकल्प्यते॥ अतो निरर्थको हेतुः स्तुतिस्तस्मात्प्रवर्त्तिका॥ इदमाम्नायते॥ शूर्पेण जुहोति तेन ह्यन्नं क्रियत इति॥

अयमर्थवादोविधेयशूर्पेहेतुत्वेनान्वेति॥ हिशब्दस्य हेतुवाचित्वात्॥ यस्मादन्नसाधनंतस्माच्छूर्पेणहोतव्यमित्युक्ते यद्यदन्न
साधनंदर्व्युपिठरादितेनसर्वेणहोतव्यमितिलभ्यतेततः पिठरादयः शूर्पेणसह विकल्प्यंतइतिप्राप्तेब्रूमः॥ शूर्पस्यहोमसा
धनंश्रौतं॥ तृतीययातदवगमात्॥ पिठरादीनांत्वानुमानिकं अतोसमानबलत्वान्नविकल्पोयुक्तः॥ ततोहेतुर्व्यर्थःस्तुति
स्तुप्ररोचनायोपयुक्ता॥ तस्मात्स्तुतित्वेनान्वयः॥ ३॥ चतुर्थमारचयति॥ ॥ मंत्राउरुप्रथस्वेतिकिमदृष्टैकहेतवः॥ आ
होस्वित्पुरोडाशप्रथनादेशभासकाः॥ ब्राह्मणेनापितज्ज्ञानान्मंत्राः पुण्यैकहेतवः॥ नतज्ज्ञानस्यदृष्टत्वाद्दृष्टंवरमदृष्टतः॥
उरुप्रथस्वेत्ययंकश्चिन्मंत्रः॥ तस्यायमर्थः॥ भोः पुरोडाशत्वंउरुविपुलतायथाभवतितथाप्रसरेति॥ एतदादयोमंत्रायागप्रयोगोच्चार्यमाणाअदृष्टमेवजनयंति॥ नत्वर्थप्रकाशनायतदुच्चारणंपुरोडाशप्रथनलक्षणस्यार्थस्यब्राह्मणवाक्ये
नापिप्राप्तत्वात्॥ उरुप्रथस्वेतिपुरोडाशंप्रथयतीतिहिब्राह्मणवाक्यंनैतदुक्तं॥ अर्थप्रत्यायनस्यदृष्टप्रयोजनस्यसंभवे
सतिकेवलादृष्टस्यकल्पयितुमशक्यत्वात्॥ तस्माद्दृश्यमानार्थानुस्मरणमेवयागप्रयोगेमंत्रोच्चारणस्यप्रयोजनंब्राह्म
णवाक्येनाप्यर्थानुस्मरणसंभवेमंत्रेणैवानुस्मरणीयमितियोनियमः तस्यदृष्टासंभवाददृष्टंप्रयोजनमस्तु॥ अत्रैवमतांतरे
णपूर्वोत्तरपक्षावाह॥ मंत्रब्राह्मणयोर्यद्वत्फलहोविनियोजनेनमंत्रलिंगसिद्धार्थमनुवक्तीतरद्यतः॥ अस्यमंत्रस्यलिंगेनविनि
योगेब्राह्मणवाक्यमविवक्षितार्थंस्यात्॥ वाक्येनविनियोगेमंत्रलिंगेनविवक्ष्यतेत्युभयोर्विरोधादप्रामाण्यंचोदनायाइतिपूर्वः
पक्षः॥ नायंविरोधः॥ प्रबलेनलिंगेनविनियोगसिद्धौवाक्यस्यानुवादकत्वादितिराद्धांतः॥ ४॥ इतिश्रीमाधवीयेजैमिनिन्या
यमालाविस्तरेप्रथमस्यद्वितीयः पादः॥ ॥ तृतीयपादस्यप्रथमाधिकरणमारचयति॥ ॥ अष्टकादिस्मृतेर्धर्मेणमानंमा
नताथवानिर्मूलत्वान्नमानंसावेदार्थोक्तोनिरर्थता॥ वैदिकैःस्मर्यमाणत्वात्संभाव्यावेदमूलता॥ विप्रकीर्णार्थसंक्षेपात्सार्थत्वाद
स्तिमानता॥ अष्टकाः कर्त्तव्याइत्यादिस्मृतिवाक्यंनधर्मेप्रमाणं॥ पौरुषेयवाक्यत्वेसतिमूलप्रमाणरहितत्वाद्विप्रलंभकवाक्यव
त्॥ अथमूलप्रमाणवत्त्वायवेदार्थएवस्मृतिभिरुच्यतइतिमन्येथाः॥ तर्हिवेदेनैवतदर्थस्यावगतत्वाद्वियंस्मृतिरनर्थास्यात्॥ तदा
नीमनुवादकत्वादप्रामाण्यमितिप्राप्तेब्रूमः॥ विमतास्मृतिर्वेदमूलावैदिकमन्वादिप्रणीतस्मृतित्वात्॥ तदानीमनुवादकत्वं॥
उपनयनाध्ययनादिस्मृतिवत्॥ नचैवंवैयर्थ्यं अस्मदादीनांप्रत्यक्षेषुपरोक्षेषुचनानावेदेषुविप्रकीर्णस्यानुष्ठेयार्थस्यैकत्रसंक्षि

19
1945

प्यमाणत्वात्॥ तस्मादियंस्मृतिर्धर्मेप्रमाणं॥ ३॥ १॥ अस्मिन्नेवमतांतरेणपूर्वोत्तरपक्षावाह॥ नमास्मात्तीष्टकांगत्वाद्यांजनाइतिमं
त्रगीः॥ तन्नस्मृतेर्मूलवेदेतुमितेमात्वसंभवात्॥ यांजनाः प्रतिनंदंतीत्ययंमंत्रोष्टकाश्राद्धस्यांगंतच्चश्राद्धंस्मार्त्तंनहितस्यप्रतिपा
दकंवेदवाक्यमुपलभामहे॥ तस्मादिदंमंत्रवाक्यंनधर्मेप्रमाणमितिचेत्॥ न॥ तन्मूलस्यवेदस्यानुमेयत्वात्॥ अनुमानंचदर्शि
तं॥ तस्मात्सौमंत्रोधर्मेप्रमाणं॥ १॥ २॥ द्वितीयाधिकरणमारचयति॥ ॥ उदुंबरीवेष्टनीयासर्वेत्येषास्मृतिर्मितिः॥ अमितिर्वाथ
संदेहेमितिः स्यादष्टकादिवत्॥ औदुंबरींस्पृशन्गायेदितिप्रत्यक्षवेदतः॥ विरोधान्मूलवेदस्याननुमानादमानता॥ ज्योतिष्टोमेसदो
नामकस्यमंडपस्यमध्येकाचिदौदुंबरीशाखानिखन्यते॥ तस्याश्रवाससावेष्टनंस्मर्यते॥ औदुंबरीसर्वावेष्टयितव्येतिसापूर्वन्या
येनप्रमाणमितिप्राप्तेब्रूमः॥ औदुंबरींस्पृष्ट्वोद्गायेदित्यनेनप्रत्यक्षवेदवचनेनस्पर्शोविधीयते॥ नचसर्ववेष्टनेस्पर्शः संभवति॥
अतोमूलवेदानुमानंकालात्ययापदिष्टं॥ तस्माद्विप्रलंभकवाक्यवन्निर्मूलास्मृतिरप्रमाणं॥ अत्रैवमतांतरमाह॥ प्रत्यक्षानुमित
श्रुत्योर्यद्वाव्याघातदर्शनात्॥ अमात्वेशंकितेबाधोनुमानस्यात्रवर्ण्यते॥ परप्रत्यक्षवेदोत्रमूलंचेद्वेष्टनस्यतत्॥ अस्त्वेवमप्यनु
ष्ठानंस्वप्रत्यक्षानुरोधतः॥ स्पर्शसर्वविषययोः प्रत्यक्षानुमितयोःश्रुत्योः परस्परविरोधादुभयोरप्यप्रामाण्यमितिपूर्वः पक्षः॥ अ
नुमानस्यकालात्ययापदिष्टत्वेनविरुद्धश्रुत्यभावेनस्पर्शश्रुतिः स्वार्थेप्रमाणं॥ अथपुरुषांतरप्रत्यक्षवेदः॥ सर्ववेष्टनस्मृतेर्मूल
मित्युच्यते॥ तर्हिमाभूत्तस्याअप्रामाण्यंतथापि परप्रत्यक्षात्स्वप्रत्यक्षस्याभ्यर्हितत्वेनस्पर्शएवात्रानुष्ठेयोनसर्ववेष्टनं॥ ॥तृती
यमारचयति॥ ॥ वैसर्जनाख्यहोमीयवासोग्रहणसंस्मृतिः॥ प्रमानवाश्रुत्यबाधात्प्रमास्याददष्टकादिवत्॥ दृष्टलोभैकमूलत्वसंभ
वेश्रुत्यकल्पनात्॥ सर्ववेष्टनवद्बाधहीनाप्येषानहिप्रमा॥ ज्योतिष्टोमेग्नीषोमीयस्यपशोस्तंत्रेप्रक्रांतेवैसर्जनहोमोविहितः॥ त
त्रयजमानंपत्नींपुत्रांश्चभ्रातॄंश्चाहतेनवाससासंछाद्यवाससोंतेस्रुग्दंडमुपनिबध्यजुहोतितस्मिन्वासस्येवंश्रूयते॥ वैसर्जन
होमीयंवासोध्वर्युर्गृह्णातीतिसेयंस्मृतिः॥ सर्ववेष्टनस्मृतिवत्प्रत्यक्षश्रुत्यानबाध्यतेततोष्टकादिस्मृतिवत्प्रमाणमितिप्राप्तेब्रूमः
॥ कदाचित्कश्चिदध्वर्युर्लोभादेतद्वासोजग्राहतन्मूलैवैषास्मृतिरित्यकोपिल्पनासंभवतीति॥ दृष्टानुसारिणीचेयंकल्पनादक्षिण
यापरिक्रीतानामृत्विजांलोभदर्शनात्॥ तथासत्यस्याः स्मृतेरन्यथाप्युपपत्तौअष्टकादिस्मृतिवन्नमूलश्रुतिः कल्पितुंशक्यते॥
अतोबाधाभावेपिमूलवेदाभावान्नप्रमाणं॥ चतुर्थभाष्यमतमारचयति॥ ॥ आचांतेनेत्यमामावास्मृतिरेषानमाभवेत्॥ वेदं

अ० क० माला० त्वेति यः श्रौतः क्रमः तेन न विरोधतः॥ आचांत्यादिपदार्थोत्र क्रमो धर्मः पादार्थगः॥ धर्मस्य धर्म्यपेक्षत्वादबाधादस्ति मानता॥
१० क्षुत आचामेदिति विहितं पुरुषार्थमाचमनं यदा तु क्षुतमध्ये। क्षुतादिनिमित्तं प्राप्नोति तदा नैमित्तिकमाचमनं क्रत्वंगत्वेन
स्मृत्या विधीयते॥ आचांतेन कर्तव्यमिति सेयं स्मृतिर्न प्रमाणं॥ कुतः विरुद्धत्वात् वेदं कृत्वा वेदिं करोतीति श्रुतौ पूर्वकालवाचि
नात्का प्रत्ययेन क्रमः प्रतीयते वेदो नाम दर्भमयं संमार्जनसाधनं॥ वेदिराहवनीयगार्हपत्यमध्यवर्तिनी चतुरंगुलखाता
भूमिः तयोर्मध्ये यदा क्षुतादिनिमित्तमाचमनं कुर्यात् तदा श्रुत्युक्तं नैरंतर्यं विरुध्येत॥ तस्माद्वेष्टन स्मृतिवदाचमनस्मृतिर्न प्रमाण
मिति प्राप्ते ब्रूमः॥ वेदवेद्यादिश्रुत्युक्तपदार्थवदाचमनादयः॥ स्मृत्युक्ता अनुष्ठेयपदार्थाः क्रमस्तु पदार्थनिष्ठो धर्मः स च पद
र्थानुपजीवति॥ ततउपजीव्यविरोधात् क्रम एव बाध्यते॥ न तु क्रमेणाचमनादयः स्मृत्युक्तानुष्ठेयपदार्थस्य बोधे॥ स्ति तस्मा
दियं स्मृतिः प्रमाणं॥ ॥ अस्मिन्नेव वार्तिककारः प्रकारांतरेण विचारद्वयं चकार॥ तत्र प्रथमविचारं दर्शयति॥ शाक्याद्य
हिंसनं धर्मो न वाधर्मः श्रुतत्वतः॥ न धर्मो नहि पूतं स्याद्गोक्षीरं श्वदृतौ धृतं॥ ब्रह्मचर्यमहिंसां चापरिग्रहं च सत्यं च यत्नेन रक्षे
दिति श्रुतावहिंसादिः॥ धर्मत्वेनोक्तः स एव धर्मः शाक्येनाप्युक्तः तस्माच्छाक्यस्मृति धर्मे प्रमाणमिति चेत् न॥ स्वरूपेण धर्मस्या
पि गोक्षीरन्यायेन शाक्यसंबंधे सति अधर्मत्वप्रसंगात्॥ तदीयग्रंथेनाहिंसादिर्नावगंतव्यः॥ तस्मान्न सा धर्मे प्रमाणं विः
चारांतरं दर्शयति॥ सदाचारो प्रमा मा वा निर्मूलत्वादमानता॥ अष्टकादेरिवैतस्य समूलत्वात्प्रमाणता॥ होलाकोत्सवादिसदा
चारस्य मूलभूतवेदाभावादप्रामाण्यमिति चेत्॥ न॥ वैदिकैः शिष्टैः परिगृहीतत्वेनाष्टकादिवद्वेदमूलत्वात्॥ अत एव मन्वा
दिभिर्ग्रंथगौरवभयाद्विशेषाकारेणानुपदिष्टोपि सदाचारः सामान्याकारेणोपदिष्टः॥ श्रुतिः स्मृतिः सदाचार इत्येवं धर्मप्रामा
णोपन्यासात्॥ तस्माच्छिष्टाचारः प्रमाणं॥ ॥ पंचमाधिकरणमारचयति॥ ॥ यवादिशब्दाः किंद्व्यर्था नो वार्यम्लेच्छसाम्यतः॥ श्रीः
दीर्घशूकप्रियंग्वाद्याद्येप्यर्था विकल्पिताः॥ यत्रान्यादृतिशास्त्रस्थाः प्रसिद्धिस्तु बलीयसी॥ शास्त्रीयधर्मेतेनात्र प्रियंग्वादिर्न १०
गृह्यते॥ यवमयश्चरुर्भवति वाराही उपानहावुपमुंचते इति श्रूयते॥ तत्र यवशब्दमार्या दीर्घशूकेषु प्रयुंजते॥ वराहशब्दं च शूक
रे॥ म्लेच्छा यस्तु यवशब्दं प्रियंगुषु॥ वराहशब्दं कृष्णशकुनौ॥ तथा सति लोकव्यवहारेण निश्चेतव्येषु शब्दार्थेषु आर्यम्लेच्छप्रसि
द्ध्योः समानबलत्वादुभयविधा अप्यर्था विकल्पेन स्वीकार्या इति प्राप्ते ब्रूमः॥ शास्त्रीयधर्मावबोधे शास्त्रप्रसिद्धिर्बलीयसी॥

21
1945

प्रत्यासन्नत्वादविच्छिन्नपारंपर्यागतत्वाच्च॥ शास्त्रे च यवविध्यर्थवाद एवं श्रूयते॥ यत्रान्या ओषधयो म्लायंते अथैते मो
दमाना इवोत्तिष्ठंतीति॥ इतरौषधिविनाशकालेपि दृष्टिर्दीर्घशूकेषु दृश्यते न तु प्रियंगुषु॥ तेषामितरौषधिपाकात्पूर्वं
पच्यमानत्वात्॥ उपानद्विध्यर्थवादश्चैवं भवति॥ वराहं गावोनुधावंतीति गवामनुधावनं सूकरे संभवति॥ न तु कृष्णशकु
नौ॥ तस्माद्दीर्घशूकादिर्यवशब्दार्थः॥ अत्र वार्तिककारः पीलुशब्दमुदाजहार॥ तं च म्लेच्छा हस्तिनि प्रयुंजते॥ आर्यास्तु वृ
क्षे॥ तत्रापि प्रभूतव्यवहारस्यार्येषु संभवाद्वृक्ष एव पीलुशब्दार्थः॥ अस्मिन्नेवाधिकरणे गुरुमतमाह॥ यवाद्यर्थानिर्णये न त
द्वाक्यं न प्रमेति चेत्॥ न शास्त्रस्य बलीयस्त्वेन तत्प्रसिद्धार्थनिर्णयात्॥ स्पष्टोर्थः॥ अस्मिन्नेवाधिकरणे वार्तिककारमतेन व
र्णकांतरमारचयति॥ या मातुलविवाहादौ शिष्टाचारः प्रमा न वा॥ इतराचारवन्मानमस्मार्त्तं बाधनात्॥ स्मृतिमूलो हि
सर्वत्र शिष्टाचारस्ततोत्र च॥ अनुमेया श्रुतिः स्मृत्या बाध्या प्रत्यक्षया तु सा॥ केषुचिद्दक्षिणदेशेषु मातुलस्य दुहितरं शिष्टाः प
रिणयंति॥ सोयमाचारः प्रमाणं शिष्टाचारत्वात्॥ होलाकाद्याचारवदिति चेन्न स्मृतिविरुद्धत्वात्॥ आत्यमापदिष्टत्वात्॥ तथा च स्मृ
तिः॥ मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च॥ समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेदिति॥ न च स्मृत्याचारयोर्मूलवेदानुमा
पकत्वसाम्यात्समबलत्वमिति वाच्यं॥ होलाकादिसदाचारस्य मन्वादिस्मृतिवद्वेदानुमापकत्वायोगात्॥ न हीदानींतनाः शि
ष्टा मन्वादिवद्देशकालविप्रकृष्टं वेदं दिव्यज्ञानेन साक्षात्कर्तुं शक्नुवंति॥ येन शिष्टाचारो मूलवेदमनुमापयेत्॥ शक्नोति तु यः
कोपि शिष्टो यत्र क्वापि देशविशेषे कालविशेषे च यं कंचिदपि होलाकाद्याचारस्य मूलभूतं स्मृतिग्रंथमवलोकयितुं॥ त
स्माच्छिष्टाचारेण स्मृतिरेवानुमातुं शक्यते॥ न तु श्रुतिः॥ अनुमिता च स्मृतिर्विरुद्धया प्रत्यक्षया स्मृत्या बाध्यते॥ अत एवाहुः
॥आचाराच्च स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनं॥ तेन द्व्यंतरितं तेषां प्रामाण्यं विप्रकृष्यते॥ तस्मादप्रामाण्यमीदृशस्याचार
स्याभ्युपेयं॥ तत्रैव परं वर्णकमारचयति॥ ॥ लौकिको वाक्यगो वार्थस्त्रिवृदादेः समोत्वतः॥ उभो विध्यर्थवादैकवाक्यत्वा
दस्त्विहांतिमः॥ त्रिवृद्बहिः पवमानमिति श्रुतौ त्रिवृच्छब्दस्य त्रैगुण्यं लोकसिद्धोर्थः॥ वाक्यशेषादृक्त्रयात्मके पुत्रिषु सूक्तेष्व
वस्थितानां बहिष्पवमानात्मकस्तोत्रनिष्पादनक्षमाणामुपास्मै गायता नर इत्यादीनामृचां नवकमर्थः॥ तत्र धर्मनिर्णये वे
दस्य प्रबलत्वेपि पद पदार्थनिर्णये लोकवेदयोः समानबलत्वादुभावर्थौ विकल्पेन गृहीतव्याविति चेन्नैवं॥ लौकिकार्थस्वीकार

अ० क० माला० पक्षे विधिवाक्येर्थः त्रैगुण्यमर्थवादवाक्ये स्तोत्रियाणामृचां नवकमित्येवं विध्यर्थवादयोर्वैयधिकरण्यादेकवाक्यत्वं न स्यात्॥
अत एकवाक्यत्वाय स्तोत्रीया नवकमेव विधिवाक्ये नियतोर्थः॥ ६ः॥ षष्ठाधिकरणमारचयति॥ ॥ कल्प्यः पिकादिशब्दा
११ र्थो ग्राह्यो वा म्लेच्छरूढितः॥ कल्प्यो ह्यार्य्येष्वप्रसिद्धत्वात् अनार्याणामनादरात्॥ ग्राह्यो म्लेच्छर्याप्रसिद्धिस्तु विरोधादर्शने सति॥
पिकनेमादिशब्दानां कोकिलाद्यर्थतातत॥ आर्याः पिकादिशब्दाः नक्काप्यर्थे प्रयुंजते॥ म्लेच्छाश्च न प्रमाणभूताः॥ तस्मान्नि
गमनिरुक्तव्याकरणैः पिकनेमादिशब्दानामर्थः कल्पनीय इति चेन्मैवं॥ आर्यप्रसिद्धिविरोधः स्यात् एतेनं दृशो विषये म्लेच्छ
प्रसिद्धेरप्यादरणीयत्वात्॥ कल्प्यमानाद व्यवस्थितादर्थाद्वरं म्लेच्छरूढिः॥ यत्रेदृश्यो अपि रूढेरभावस्तत्र निरुक्तादयश्चारि
तार्थः॥ तस्मादनार्यप्रसिद्धापिकः लौकिकः नेमशब्दोर्धवाची तामरसशब्दः पद्मवाचीइत्येवं द्रष्टव्यं॥ अस्मिन्नेवाधिकरणे
गुरुमतमाह॥ अर्थबोधात् प्रामाणे विकालंभन चोदना॥ मैवं म्लेच्छप्रसिद्ध्यापि तद्बोधादविरुद्धया॥ स्पष्टोर्थः॥ ॥सप्तमाधि
करणमारचयति॥ ॥अपौरुषेयाः कल्पाद्याः कृत्रिमा वा न कृत्रिमाः॥ श्रुतिस्मृत्योरिव बुद्धेः स्वतो मात्वं यतः समं॥ पुंना
म्नोक्तेः पौरुषेयाः काठकाद्यसमत्वतः॥ तत्रोपलेभिरे केचिदापस्तंबादिकर्तृतां॥ बौधायनापस्तंबाश्वलायनकात्यायना
दिनामांकिताः कल्पसूत्रादिग्रंथा निगमनिरुक्तषडंगग्रंथा मन्वादिस्मृतयश्चापौरुषेयाः धर्मबुद्धिजनकत्वाद्वेदवत्॥ न च मू
लप्रमाणसापेक्षत्वेन वेदवैषम्यमिति शंकनीयं॥ उत्पन्नायां बुद्धेः स्वतः प्रामाण्यांगीकारेणानिरपेक्षत्वात्॥ मैवं॥ उक्तानुमान
स्य कालात्ययापदिष्टत्वात्॥ बौधायनसूत्रमापस्तंबसूत्रं इत्येव पुरुषनाम्ना तेषां ग्रंथा उच्यते॥ न च काठकादिसमाख्यावत्॥
प्रवचननिमित्तत्वं युक्तं॥ तद्ग्रंथनिर्माणकाले तदानींतनैः कैश्चिदुपलब्धत्वात्॥ तच्चाविछिन्नपारंपर्येणानुवर्त्तते॥ ततः का श्री
लिदासादिग्रंथवत्पौरुषेयाः॥ तथापि वेदमूलत्वात्प्रमाणं॥ अत्रैव गुरुमतमाह॥ कल्पे सर्वतिथौ दर्शकार्यतोक्तेः श्रुतिर्नमा॥ न क
ल्प्यसाध्यवेदत्वप्रहाणाद्दुर्बलः॥ त्वतः॥ सर्वतिथौ दर्शयागकर्त्तव्यतां कल्पसूत्रकार आह॥ सर्वास्तु तिथिष्वमावास्या कर्त्तव्येति ११
श्रुतिस्त्वमावास्यायामेव तिथौ तत्कर्तव्यतां ब्रूते॥ ततः कल्पसूत्ररूपेण वेदेन विरुद्धत्वादियं श्रुतिर्न मानमिति चेन्मैवं॥ कल्पवे
दत्वं नाद्यापि सिद्धं किंतु प्रयत्नेन साधनीयं न च तत्साधयितुं शक्यं॥ पौरुषेयत्वस्य समाख्यया तत्कर्तुरुपलंभेन च साधितत्वा
त्॥ अतः कल्पसूत्रस्य दुर्बलत्वान्न श्रुतेरप्रामाण्यं॥ ॥अष्टमाधिकरणमारचयति॥ ॥होलाकादेर्व्यवस्थास्यात्साधारण्यमुता

28
1945

स्विमः॥ देशभेदेन दृष्टत्वात्साम्यं मूलसमत्वतः॥ होलादिशिष्टाचाराणां हारितादिस्मृतिविशेषाणां वानुष्ठातृपुरुषभेदेन व्यवस्थि
तं॥ प्रामाण्यं कुतः॥ देशविशेषेनैषां दृष्टत्वाद्धोलाकादयः प्राच्यैरेव क्रियंते॥ वसंतोत्सवो होलाका॥ आह्नीनेबुकादयो दाक्षि
णात्यैः॥ स्वस्वकुलागतं करंजार्कादिस्थावरदेवतापूजादिकमाह्नीनेबुकाशब्देनोच्यते॥ उद्वृषभयज्ञादय उदीच्यैः॥ ज्येष्ठ
मासस्य पौर्णमास्यां बलीवर्द्दानभ्यर्च्य धावयंति सोयमुद्वृषभयज्ञः॥ एवं हारीतादिस्मृतिः काचित् क्वचिद्देशविशेषे दृश्यते त
स्माद्व्यवस्थितं प्रामाण्यमिति चेन्मैवं॥ तन्मूलत्वेनानुमितस्य वेदस्य सर्वसाधारणत्वेन तेषामपि सर्वसाधारणत्वात्॥ अत्रै
व गुरुमतमाह॥ प्राच्यादिपदयुक्ताया श्रुतेरनुमितौ पदे॥ अर्थाबोधादमात्वं चेन्नातामान्यानुमानतः॥ प्राच्यादिभिर्व्यव
स्थया होलाकादिष्वनुष्ठीयमानेषु श्रुतिरपि प्राच्यादिपदयुक्तैवानुमातव्या॥ तत्र प्राच्यादिपदस्यार्थो न बुध्यते॥ ये पुरुषाः
किंचित्काले प्राच्यां निवसंति त एव कालांतरे प्रतीच्यां दिशि वसंतीति उपलभ्यंते॥ तत्र श्रौतप्राच्यादिपदस्यार्थाबोधादप्रमा
णं श्रुतिरिति चेन्मैवं॥ अनुष्ठानसामान्यमूलश्रुतिकल्पकत्वात्॥ अतः प्राच्यादिपदराहित्ये सत्यर्थबोधादनुमिता श्रुतिः प्र
माणं॥ ॥ नवमाधिकरणमारचयति॥ ॥ गौगाव्यादिषु साधुत्वे प्रयोगे वान कश्चन॥ नियमोत्रास्ति वा नास्ति व्याकृतेर्मूल
वर्जनात्॥ साधूनेव प्रयुंजीत गवाद्या एव साधवः॥ इत्यस्ति नियमः पूर्वपूर्वव्याकृतिमूलतः॥ व्याकरणाभिज्ञैः सास्नादिमद्व्यक्ते
र्गौरित्येष शब्दः प्रयुज्यते॥ तदनभिज्ञैस्तु स्वस्वदेशीयभाषामनुसृत्य गावी गोणी गोपतलिकेत्येवमादयः शब्दाः प्रयुज्यंते॥
तत्रेदृश एव शब्दः साधुर्नेदृश इति अस्मिन्नर्थे नियामकं नास्ति॥ तथा प्रयोगेपि तन्नास्ति ईदृश एव शब्दः प्रयोक्तव्यो नेदृश इति
न तावद्वृद्धव्यवहारो नियामकः॥ तस्य सर्वेषु शब्देषु समानत्वात्॥ नापि व्याकरणस्मृतिर्नियामिका॥ तस्या निर्मूलत्वेनाप्रमा
णत्वात्॥ नह्यभियुक्तप्रयोगस्तन्मूलं॥ अन्योन्याश्रयत्वप्रसंगात्॥ व्याकरणस्मृतेः प्रामाण्यसिद्धौ तदनुसारेण प्रयोक्तृणा
मभियुक्तत्वसिद्धिः॥ तत्सिद्धौ तत्प्रयोगमूलतया व्याकरणस्य प्रामाण्यं॥ तस्मान्नास्ति साधुत्वप्रयोगयोर्नियम इति प्राप्ते ब्रू
मः॥ साधूनेव शब्दान् प्रयुंजीत न त्वपशब्दानिति अस्ति नियमः उभयत्र क्रमेण गुणदोषवादिनोर्वेदवाक्ययोः श्रवणात् एकः
शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गेलोके कामधुग्भवतीति गुणवाक्यं॥ तस्माद्ब्राह्मणेन न म्लेच्छितवै म्लेच्छो ह वा एष यदपश
ब्द इति दोषवाक्यं॥ यथा प्रयोगे नियमस्तथा साधुत्वेपि नियमो द्रष्टव्यः॥ गवाद्या एव साधवो न तु गाव्यादय इत्यस्मिन्नर्थे व्या

करणस्यनियामकत्वात्॥ नचनिर्मूलत्वंपूर्वपूर्वव्याकरणस्यतन्मूलत्वादेतदेवाभिप्रेत्योक्तं॥ तत्र यूपादिकरणवत्व्याकरणप
रंपरानादित्वादनुपालंभइतिव्याकरणप्रामाण्यं॥ साक्षादेववेदेनोपन्यस्तं॥ तथाचाथर्वणिकाआमनंतिविद्येवेदितव्येइतिहस्म
यद्ब्रह्मविदोवदंति॥ पराचैवापराचतत्रापराऋग्वेदोयजुर्वेदः सामवेदोथर्वणवेदः शिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योति
षमिति॥ तैत्तिरीयब्राह्मणेपिव्याकरणस्योपादेयताश्रूयते॥ वाग्वैपराच्यव्याकृतावदंतेदेवाः इंद्रमब्रुवन्निमान्नोवाचंव्याकुर्वि
तितामिंद्रोमध्यतोपक्रम्यव्याकरोत्तस्मादियंव्याकृतावागुद्यतइति॥ व्याकर्तारश्चपाणिनिकात्यायनपतंजलयोमन्वादिसमा
नाः॥ तस्मात्साधूनामेवप्रयोगोगवादीनामेवसाधुत्वेव्याकरणस्मृतिः प्रमाणं अत्रैवगुरुमतमाह॥ अश्वालंभनशास्त्रस्य
दंत्यतालव्यसंशयात्॥ अमात्वेदंत्यनिर्णीतिराप्तोक्तव्याकृतेर्बलात्॥ अश्वमालभेतेत्यत्राकारवकारयोर्मध्यवर्तिनोवर्णस्य
दंत्यत्वेस्वंधनंतद्रहीतंदरिद्रमालभेतेत्यर्थोभवति॥ तालव्यत्वेतुरंगमवाचित्वंततः संशयादप्रामाण्यमितिचेत् न॥ व्या
करणानुसारेणशब्दुङ्व्याप्तावित्यस्माद्धातोरौणादिकेवप्रत्ययेकृतेतालव्यत्वनिर्णयात्॥ तस्मादश्वालंभनशास्त्रंप्रमाणं॥
॥दशमाधिकरणेप्रथमवर्णकमारचयति॥ ॥ लोकेपदपदार्थौयौनुतौवेदेथवान्यतो॥ रूपभेदात्पदंभिन्नमुक्तानादिभिदास्फु
टा॥ वर्णैकत्वात्पदैकत्वंक्वाचित्कीरूपभिन्नता॥ प्रायिकेणपदैक्येनतदर्थैक्यंतथाविधं॥ वैदिकौपदपदार्थौलौकिकाभ्यांपदपदा
र्थाभ्यांअन्यौकुतः॥ रूपभेदात्॥ पदेतावद्रूपभेदोदृश्यते॥ आत्मशब्दआकारादित्वेनलोकेनियतः वेदेतुक्वचिदाकाररहितःप
ठ्यतेप्रयतंपुरुषंत्मनेति॥ ब्राह्मणाइतिलोकेवेदेत्वन्यथापठ्यते॥ ब्राह्मणासःपितरःसोम्यासइति॥ अर्थभेदोपिस्फुटः॥ उत्तानावै
देवगावोवहंतिइतिश्रूयते॥ मनुष्यगावस्त्ववांचोवहंति॥ वेदेवनस्पतिर्हिरण्यपर्णः॥ तथाचश्रूयते॥ देवेभ्योवनस्पतयः हवींषि
हिरण्यपर्णप्रदिवस्तेअर्थमितितस्माल्लोकवेदयोः पदयोः पदपदार्थाविन्याविति प्राप्तेब्रूमः॥ यएवलौकिकाः पदार्थास्तएव
वैदिकाः॥ तथाहिवर्णानांतावन्नित्यत्वंप्रथमेपादेसाधितंयथाप्रयोक्तृणांपुरुषाणांभेदेप्येकैकस्यपुरुषस्यबहुकृत्वउच्चार
णभेदेपितएवामीवर्णाइतिप्रत्यभिज्ञानात्॥ वर्णैक्यंतथायानिलोकेगवादिपदानितान्येववेदेअधीयमानानित्यबाधितप्रत्य
भिज्ञयापदैकत्वमभ्युपेयंत्मनादेवासइत्यादिपदभेदस्तुक्वाचित्कः नैतावताबहुलप्रत्यभिज्ञावगतंपदैक्यमपोढुंशक्यंअन्य
थाप्यायंदेवदत्तइतिप्रत्यभिज्ञातंदेवदत्तैक्यमपिदेशादिभेदमात्रेणापोह्येत पदैक्येचार्थैकत्वमवश्यंभावि अन्यथावेदेपृथग्व्युत्प

25
1945

त्त्यभावादबोधकत्वंप्रसज्येत॥ एतदेवाभिप्रेत्योक्तं॥ लोकावगतसामर्थ्यः शब्दोवेदेपिबोधकइति॥ यूपत्वयूपाहवनीया
दिशब्दानांतदर्थानांचालौकिकत्वेपिप्रसिद्धपदसमभिव्याहाराद्व्युत्पत्तिः संभवतिउत्तानहवनादिकंत्वर्थवादः॥ अस्तुवा
तथाहवनंतथाप्युत्तानादिशब्दास्तदर्थाश्चलोकसिद्धाएव॥ तस्माद्यएवलौकिकाः पदपदार्थास्तएववैदिकाः॥ ॥द्वि
तीयवर्णकमारचयति॥ ॥ व्यक्तिर्व्रीह्यादिशब्दार्थआकृतिर्वाक्रियान्वयात्॥ व्यक्तिर्व्युत्पत्तिवेलायामाकृत्यासोपल
क्ष्यते॥ शक्तिग्रहादियुक्तिभ्यआकृतेरर्थतोचिता॥ क्रियापर्यवसानायव्यक्तिस्तत्रोपलक्ष्यतां॥ व्रीहीनवहंतिपशुमा
लभेतगामानयनब्राह्मणोनहंतव्यइत्यादिप्रयोगेषुव्रीह्यादिशब्दानांव्यक्तिरर्थः॥ कुतः अवहननादिक्रियाभिर्व्यक्ते
रन्वेतुंशक्यत्वात्॥ नह्याकृतिरवहंतुमालब्धुमानेतुंवायोग्यानन्वानंत्यव्यभिचाराभ्यांनव्यक्तौव्युत्पत्तिः संभवति॥ अनं
ताहिगाव्यक्तयः अतीतानामनागतानामनेकदेशवर्तिनांगवामियत्तायाअनवधारणात्॥ किंचशुक्लोव्यक्तौव्यु
त्पन्नोगोशब्दः कृष्णव्यक्तौप्रयुज्यमानः॥ स्वार्थंव्यभिचरेत् तत्रकथंव्युत्पत्तिरितिचेत्॥ एवंतर्हिव्युत्पत्तिकालेसा
व्यक्तिराकृत्योपलक्ष्यतामितिप्राप्तेब्रूमः॥ अन्वयव्यतिरेकाभ्यामाकृतेः शक्तिग्रहणनिमित्तत्वात्॥ शब्दार्थत्वंतस्याए
वोचितं॥ किंचगोशब्दउच्चरितेव्यक्तिवादिनः संशयोभवेत्॥ तस्मादाकृतेरेवाभिधेयत्वं॥ यद्याकृतावहननादिक्रिया
नपर्यवस्येत्तर्हिव्यक्तिस्तत्रोपलक्षणीया॥ किंचश्येनचितंचिन्वीतेत्यादावाकृतेरेवसादृश्यप्रतियोगितयाकार्यान्वयोदृश्य
ते॥ तस्मादाकृतिः शब्दार्थः॥ अत्रैवगुरुमतमाह॥ ॥ गवादिचोदनानोभाजातिव्यक्त्योरनिर्णयात्॥ आनंत्यव्यभिचारा
भ्यांनव्यक्तिरितिनिर्णयः॥ स्पष्टोर्थः॥ ॥ इतिश्रीमाधवीयेजैमिनिन्यायमालाविस्तरेप्रथमाध्यायस्यतृतीयः पादः समा
प्तः॥ ॥ चतुर्थपादस्यप्रथमाधिकरणंवार्तिककारोन्नीतमारचयति॥ ॥ उद्भिदादिपदंधर्मेकिममानमुतप्रमा॥ विध्य
र्थवादमंत्रांशेष्वनंतर्भावतोनमा॥ अंतर्भावविधावुद्भिदायजेतेतिदृश्यते॥ नामत्वेनान्वयोवाक्येवक्ष्यतेतः प्रमेवतत्॥ उद्भि
दायजेतविश्वजितायजेतेत्येवंसमाम्नायते॥ तत्रोद्भिदादिपदंनधर्मेप्रमाणंकुतः प्रमाणत्वेनाभिमतेषुत्रिषुवेदविभागेष्वनं
तर्भावात्॥ तथाहि॥ विधिः साक्षात्प्रमाणंअर्थवादमंत्रौतुविध्यन्वयेनतत्रनतावदुद्भिदादिपदंविधावंतर्भवतिविध्यर्थस्व
पायाभावनायाअंशेषुभाव्यकरणेतिकर्तव्यतारूपेषुकस्याप्यवाचकत्वात्नाप्यर्थवादत्वं॥ स्तुतिबुद्धेरभावान्नापिमंत्रत्वं॥

उत्तमपुरुषादीनां मंत्रलिंगानामभावात्॥ तथाचोक्तं॥ उत्तमा मंत्रणास्यं तत्वांतद्रूपाद्यभावतः॥ मंत्रप्रसिध्यभावाच्च मंत्रे तेषामयुज्यते इति॥ अग्नये जुष्टं निर्वपामीत्युत्तमपुरुषः॥ अग्नेयशक्त्विन्यत्रासेममपयेत्यामंत्रणं॥ उर्वी चासि वस्वी चासीत्यस्यं तद्रूपं॥ इषे त्वोर्जे त्वेति त्वां तद्रूपं॥ आदिशब्देनाग्नीर्देवताप्रतिपादनादयः॥ एवमाद्यनंतर्भावादमानमिति चेत्॥ न विध्यंतरोककरणंतर्भावात्॥ यद्यपि लिङ्पदेन सह समानपादोपात्तो यजिधात्वर्थः॥ करणं तथापि तस्य यजेर्नामत्वेनोद्भिदादिपदमन्वेति तस्मात्प्रमाणं॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ गुणो यं नामधेयं वा खनित्रे स्यान्निरुक्तितः॥ ज्योतिष्टोमं समाश्रित्य पश्वर्थं गुणचोदना॥ फलोद्भिदात्समानेषा निरुक्तिर्यागनामनि॥ नामत्वमुचितं यागसमानाधिकरण्यतः॥ उद्भिदा यजेत पशुकाम इत्यत्र तृतीयांतेनोद्भित्पदेन योर्थो विवक्षितः सोयं यागे कश्चिद्गुणः स्यात्॥ दध्ना जुहोतीत्यनेन गुणविधिना समानत्वात्॥ अथोच्येत दधिशब्दार्थो लोकप्रसिध्धः॥ उद्भिच्छब्दार्थस्त्वप्रसिद्ध इति॥ तन्न रूढ्यभावेप्यवयवार्थनिरुक्त्या तत्प्रसिद्धेः॥ उद्भिद्यते भूमिरनेनेति व्युत्पत्त्या खनित्रं वाच्य सोशब्दः न चात्र पशुफलकः कश्चिद्यागो विधीयत इति वाच्यं पशूनां गुणफलत्वात्॥ यथा गोदोहनेन पशुकामस्येत्यत्र पश्वो गोदोहनगुणस्य फलं तथेह खनित्रगुणस्य फलमस्तु यदि च मसेनापः प्रणयेदिति विहितं प्रकृतमपां प्रणयनमाश्रित्य गोदोहनं विधीयते॥ तर्ह्यत्रापि ज्योतिष्टोमेन यजेतेति विहितं प्रकृतं ज्योतिष्टोममाश्रित्य खनित्रं विधीयतां तस्माद्गुणविधिरिति प्राप्ते ब्रूमः॥ पशुकामो यजेतेत्यस्य पदद्वयस्यायमर्थः पशुरूपं फलं यागेन कुर्यादिति तत्र केन यागेनेत्यपेक्षायां तृतीयांतपदं यागनामत्वेनान्वेति उद्भिद्यते पशुफलमनेन यागेनेति निरुक्त्या नामत्वमुद्भित्पदस्योपपद्यते॥ एवमपि गुणविधिनामधेयत्वयोः शब्दनिर्वचनसाम्यान्न निर्णय इति चेत्॥ मैवं सामानाधिकरण्यस्य निर्णायकत्वात् उद्भिन्नामकेन यागेन फलं कुर्यादित्युक्ते सामानाधिकरण्यं लभ्यते गुणत्वे तु खनित्रेण साध्यो यो यागस्तेनेत्येवं वैयधिकरण्यं स्यात्॥ यदि खनित्रवता यागेनेति सामानाधिकरण्यं योज्यते तदा मत्वर्थलक्षणा प्रसज्येत तस्मादुद्भिदादिपदं नामधेयं॥ दध्ना जुहोति व्रीहिभिर्यजेतेत्यादिषु द्रव्यविशेषे दध्यादिशब्दानामत्यंतरूढतया यागनामत्वासंभवादगत्या गुणत्वमाश्रितं॥ सोमेन यजेतेत्यत्राप्यप्रसिद्धार्थनामधेयत्वकल्पनातो वरं प्रसिद्धार्थद्वारण लक्षणाश्रयणमित्यभिप्रेत्य सोमद्रव्यवता यागेनेति मत्वर्थलक्षणा स्वीकृता॥ उद्भिच्छब्दस्य तु लोकप्रसिद्धार्थाभावादुक्त

27
1945

रीत्या नामत्वं युक्तं प्रयोजनं तु नाम्नः सर्वत्र व्यवहार एव॥ नह्यंतरेण नामधेयमृत्विग्वरणादिष्वनाहं यक्ष्य इत्याख्यानोपायो लघुः कश्चिदस्ति तस्मादुद्भिदादिकं नामधेयं॥ ॥ अत्रैव गुरुमतमाह॥ ॥ लौकिके गणयागस्य विधेः सापेक्षतेति चेत्॥ निरुक्त्या श्रौतयागस्य नामत्वान्निरपेक्षता॥ उद्भिदा यजेतेत्ययं गुणविधिः॥ न चास्य कश्चिच्छ्रौत आश्रयो लभ्यते ततो लौकिको मातृगणयागादिराश्रयत्वेनापेक्षणीयः॥ तस्मिन् यागे गुणो यं विधीयते तथा सति सापेक्षत्वादप्रामाण्यमस्याश्चोदनाया इति चेत्॥ मैवं पूर्वोक्तनिरुक्त्या श्रौतयागनामत्वे सति निरपेक्षत्वात्॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ यच्चित्रया यजेतेति तद्गुणौ नाम वा भवेत्॥ चित्रस्त्रीत्वगुणौ रूढेरग्नीषोमीयके पशौ॥ द्वयोर्विधौ वाक्यभेदो वैशिष्ट्ये गौरवं ततः॥ स्यान्नामच्छष्टान्ये बहिष्पवमानेषु तत्तथा॥ चित्रया यजेत पशुकाम इत्याम्नायते तत्र चित्राशब्दो नोद्भिच्छब्दवद्यौगिकः॥ किंतु रूढ्या चित्रत्वं स्त्रीत्वं चाभिधत्ते॥ ततो न पूर्वन्यायेन नामत्वं तथा सत्यग्नीषोमीयं पशुमालभेतेति विहितं पशुयागमत्र यजेतेत्यनेन पदेनानूद्य तस्मिन्पशौ चित्रत्वस्त्रीत्वे गुणौ विधीयेते इति प्राप्ते ब्रूमः॥ चित्रत्वं स्त्रीत्वं चेति द्वावेतौ गुणौ तयोर्विधाने वाक्यं भिद्येत॥ तथा चोक्तं प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः॥ अप्राप्ते तु विधीयेरन्बहवोप्येकयत्नत इति॥ अथ वाक्यभेदपरिहाराय गुणद्वयविशिष्टं पशुद्रव्यरूपं कारकं विधीयेत तदा गौरवं स्यात्॥ तस्माच्चित्राशब्दः पूर्ववद्यजिसामानाधिकरण्येन यागनामधेयं भवति॥ चित्रत्वं च तस्य विलक्षणद्रव्यद्वारेणोपपद्यते दधि मधु घृतमापो धानास्तंडुलास्तत्संसृष्टं प्राजापत्यं इति दध्यादीनि विचित्राणि देयद्रव्याणि षडाम्नातानि॥ तदेतच्चित्रा नाम कस्य यागस्योत्पत्तिवाक्यं॥ यागस्वरूपभूतयोर्दध्यादिद्रव्यप्रजापतिदेवतयोरत्रोपदिश्यमानत्वात्॥ उत्पन्नस्य तस्य यागस्य चित्रया यजेत पशुकाम इत्येतत्फलवाक्यं एवं सति प्रकृतार्थो लभ्येत॥ अग्नीषोमीयपश्वनुवादेन गुणविधाने प्रकृतहाना प्रकृतप्रक्रिये प्रसज्येयातां लिङ्प्रत्ययस्य चानुवादत्वांगीकारान्मुख्यो विध्यर्थो बाध्येत ततस्माच्चित्रापदं नामधेयं यथा चित्राशब्दे नामधेयत्वं तथा बहिष्पवमानशब्द आज्यशब्दे पृष्ठशब्दे च तत्कर्मनामधेयत्वं योजनीयं॥ एवं हि श्रूयते त्रिवृद्बहिष्पवमानं पंचदशान्याज्यानि सप्तदशानीति अस्य वाक्यत्रयस्यार्थो विविच्यते॥ सामगानामुत्तराग्रंथे तृचात्मकानि सूक्तान्याम्नातानि तत्रोपास्मै गायता नर इत्याद्यं सूक्तं॥ दविद्युतत्या रुचेति द्वितीयं पवमानस्येति कव इति तृतीयं॥ ज्योतिःष्टोमस्य प्रातःसवनानुष्ठाने तेषु सूक्तेषु गायत्रं॥

साम गातव्यं॥ तदिदं सूक्तत्रयगानसाध्यं स्तोत्रं बहिष्पवमानमित्युच्यते॥ तत्रावस्थितानामृचां पवमानार्थत्वाद्बहिः संचरणाच्च॥ न खल्विदं स्तोत्रं इतरस्तोत्रवत्सदोनामकस्य मंडपस्य मध्ये औदुंबर्याः स्तंभशाखायाः सन्निधौ प्रयुज्यते किंतु सदसो बहिः प्रसर्पद्भिः प्रयुज्यते तस्य च बहिष्पवमानस्य त्रिवृन्नामकस्तोमो भवति॥ तस्य च स्तोमस्य विधायकं ब्राह्मणवाक्यमेवमाम्नायते॥ तिसृभ्यो हिंकरोति स मध्यमया तिसृभ्यो हिंकरोति स प्रथमया तिसृभ्यो हिंकरोति स मध्यमया तिसृभ्यो हिंकरोति स उत्तमयोद्यती त्रिवृतो विष्टुतिरिति॥ अयमर्थः॥ सूक्तत्रयगतानां नवानामृचां गानं त्रिभिः पर्यायैः कर्तव्यं तत्र प्रथमपर्याये त्रिषु सूक्तेषु आद्यास्तिस्र ऋचः॥ द्वितीये पर्याये मध्यमाः॥ तृतीये पर्याये चोत्तमाः तिसृभ्य इति तृतीयार्थे पंचमी हिंकरोतीति गायतीत्यर्थः॥ सेयं यथोक्तप्रकारोपेता गीतिस्त्रिवृत्स्तोमस्य विष्टुतिः॥ स्तुतिप्रकारविशेषः॥ तस्या विष्टुते रुद्यतीति नामेति॥ एवं परिवर्तिनी कुलायिनी त द्वे विष्टुती तयोः परिवर्तिन्येवमाम्नायते॥ तिसृभ्यो हिंकरोति स पराचीभिस्तिसृभ्यो हिंकरोति स पराचीभिः परिवर्तिनी त्रिवृतो विष्टुतिरिति॥ पराचीभिरनुक्रमाम्नाताभिरित्यर्थः॥ कुलायिन्येवमाम्नायते तिसृभ्यो हिंकरोति स पराचीभिस्तिसृभ्यो हिंकरोति या मध्यमा सा प्रथमा योत्तमा सा मध्यमा या प्रथमा सोत्तमा॥ तिसृभ्यो हिं योत्तमा सा प्रथमा या प्रथमा सा मध्यमा या मध्यमा सोत्तमा॥ कुलायिनी त्रिवृतो विष्टुतिरिति॥ अत्र प्रथमसूक्ते पाठक्रम एव द्वितीये मध्यमोत्तमप्रथमाः तृतीये उत्तममध्यमाद्या इत्येवं व्यत्ययेन मंत्रा गातव्याः॥ तदिदं विष्टुतित्रयं विकल्पितं॥ त्रिवृच्छब्दस्य दशस्तोमस्वरूपमर्थो न तु त्रैगुण्यमिति॥ पूर्वपादे निर्णीतं॥ उत्तराग्रंथे बहिष्पवमानसूक्तेभ्यस्त्रिभ्य ऊर्ध्वं चत्वारि सूक्तान्याम्नातानि॥ अग्न आयाहि वीतय इत्याद्यं सूक्तं॥ आ नो मित्रावरुणेति द्वितीयं॥ आयाहि सुषुमाहित इति तृतीयं॥ इंद्राग्नी आगतं सुतमिति चतुर्थं॥ तान्येतानि प्रातःसवने गायत्रसाम्ना गीयमानानि चत्वार्याज्यस्तोत्राणीत्युच्यंते॥ तन्निर्वचनं श्रूयते यदाजिमीयुस्तदाज्यानामाज्यत्वमिति आज्यस्तोत्रेषु पंचदशस्तोमस्य विष्टुतिरेवमाम्नायते॥ पंचभ्यो हिंकरोति स तिसृभिः स एकया स एकया पंचभ्यो हिंकरोति स एकया स तिसृभिः स एकया पंचभ्यो हिंकरोति स एकया स एकया स तिसृभिरित्येकं सूक्तं त्रिरावर्तनीयं॥ तत्र प्रथमावृत्तौ प्रथमाया ऋचः त्रिरभ्यासः द्वितीयावृत्तौ मध्यमायास्तृतीयावृत्तावुत्तमायाः॥ सोयं पंचदशस्तोमः॥ उक्तेभ्यश्चतुर्भ्यः सूक्तेभ्य ऊर्ध्वमुत्तराग्रंथे त्रीणि माध्यंदिनपवमानसूक्तान्याम्नायते तत ऊर्ध्वं चत्वारि सूक्तान्याम्नातानि तं वभित्वा शूर नोनुम इत्याद्यं॥

29
1945

कयानश्चित्र आभुवदिति द्वितीयं॥ तं वो दस्ममृतीषहं इति तृतीयं॥ तरोभिर्वो विदद्वसुमिति चतुर्थं॥ एतानि क्रमेण रथंतरवामदेव्यनौधसकालेयसामभिर्माध्यंदिनसवने गीयमानानि पृष्ठस्तोत्राणीत्युच्यंते॥ स्पर्शनात्पृष्ठानीत्येवं निरुक्तिर्द्रष्टव्या॥ तेषु स्तोत्रेषु सप्तदशस्तोमो भवति॥ तस्य स्तोमस्य विष्टुतिरेवमाम्नायते पंचभ्यो हिंकरोति स तिसृभिः स एकया स एकया पंचभ्यो हिंकरोति स एकया स तिसृभिः स एकया सप्तभ्यो हिंकरोति स एकया स तिसृभिः स तिसृभिरिति॥ अत्र प्रथमावृत्तौ प्रथमाया ऋचस्त्रिरभ्यासः द्वितीयावृत्तौ मध्यमायास्तृतीयावृत्तौ मध्यमोत्तमयोः॥ सोयं सप्तदशस्तोमः॥ अत्र त्रिष्वपि वाक्येषु त्रिवृत्पंचदशसप्तदशशब्दा गुणविधायकत्वेन संमताः यद्वि बहिष्पवमानाज्यपृष्ठशब्दा अपि गुणविधायकाः॥ स्युस्तदा प्रत्युदाहरणं गुणद्वयविधानाद्वाक्यभेदः स्यात्॥ तस्माद्बहिष्पवमानादिशब्दाः स्तोत्रनामधेयानि॥ तेर्नामभिः कर्माण्यनूद्य त्रिवृदादिगुणा विधीयंते॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ अग्निहोत्रं जुहोत्याघारमाघारयतीत्यमू॥ विधेयौ गुणसंस्कारौ वा होस्वित्कर्मनामनी॥ अग्नये होत्रमंत्रेति बहुव्रीहिगतो नलः॥ गुणो विधेयो नामत्वे रूपं न स्यात् क्षरत घृते॥ संस्क्रियाघारमाघारयतीत्युक्ता द्वितीयया॥ आघारेत्यग्निहोत्रेति यौगिके कर्मनामनी॥ अग्निर्ज्योतिरिति प्रोक्तो मंत्राद्देवस्तथा घृतं॥ चतुर्गृहीतवाक्योक्तं द्वितीयायास्त्वियं गतिः॥ नासाधितं हि धात्वर्थकरणत्वं ततोस्य सा॥ साध्यतां वक्ति संस्कारो नैवाशंक्यः क्रियात्वतः॥ अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य कर्मनामत्वे द्रव्यदेवतयोरभावात्॥ यागस्य स्वरूपमेव न सिध्येत्॥ ततोग्निदेवतारूपो गुणोनेन दर्विहोमे विधीयते॥ आघारशब्दश्च घृक्षरणदीप्त्योरित्यस्माद्धातोरुत्पन्नः क्षरत घृतमाचष्टे॥ तस्मिंश्च घृते द्वितीयाविभक्त्या संस्कार्यत्वं प्रतीयते॥ तच्च संस्कृतं घृतमुपांशुयाजे द्रव्यं भवति॥ तस्मादग्निहोत्राघारशब्दौ गुणसंस्कारयोर्विधायकाविति प्राप्ते ब्रूमः॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति विहितेन मंत्रेण प्राप्तत्वाद्देवता न विधेया॥ ततोग्निसूर्यदेवताकस्य सायंप्रातःकालयोर्नियमेनानुष्ठेयस्य कर्मणोग्निहोत्रमिति यौगिकं नामधेयं॥ योगश्च बहुव्रीहिणा दर्शितः॥ चतुर्गृहीतं वा एतदभूत्तस्याघारमाघारयतीत्यनेनैवाज्यद्रव्यस्य प्राप्तत्वात्क्षरद्घृतसंस्कारस्याविधेयत्वादाघारशब्दोपि यौगिकं कर्मनामधेयं यस्मिन्कर्मणि नैर्ऋतीदिशमारभ्यैशानीं दिशमवधिं कृत्वा संततं घृतं क्षार्यते तस्य कर्मण एतन्नाम॥ ननु नामधेयत्वे सति उद्भिदा यजेत ज्योतिष्टोमेन यजेतेत्यादाविव धात्वर्थेन करणेन समानाधिकरण्या

याग्निहोत्रेण जुहोत्याघारेणाघारयतीति तृतीयया भवितव्यं नैष दोषः अनुष्ठानादूर्ध्वं धात्वर्थतया सिद्धत्वाकारेण करणत्वेपि ततः पूर्वं साध्यत्वाकारं च कर्मग्निहोत्रं आघारमिति द्वितीयायात्युक्तत्वान्न चाच्च द्वितीयानुसारेण व्रीहिन्प्रोक्षतीत्यादाविव संस्कारः शंकनीयः॥ व्रीहिशब्दवदग्निहोत्राघारशब्दयोः प्रसिद्धद्रव्यवाचकत्वाभावेन क्रियावाचित्वाभ्युपगमात्॥ तस्मादग्निहोत्राघारशब्दो दर्विहोमोपांशुयाजयोर्गुणसंस्कारविधायिनौ न भवतः॥ किंतु कर्मांतरयोर्नामनी॥ ॥ पंचमाधिकरणमारचयति॥ ॥ श्येनेनाभिचरन्मर्त्यो यजेतेति श्रुतौ गुणः॥ विधीयते पक्षिरूपो नाम वा तस्य कर्मणः॥ श्येनेनेति गुणः काम्यः सोमिकः सोमबाधया॥ न चित्रावद्वाक्यभेदोन्नूढश्चैवमनुग्रहः॥ यथावैश्येनेनेन इत्युक्त्याप्युपमानोपमेयता॥ नैकस्मिंस्तेन गौण्यास्य वृत्त्या कर्मनामता॥ श्येनेनाभिचरन्यजेतेत्यत्र नामत्वे द्रव्यदेवतयोरभावात्॥ यागस्वरूपमपि न सिद्ध्येत् ततः सोमयागे नित्यं सोमद्रव्यं बाधित्वा सोमस्य स्थाने पक्षिद्रव्यरूपो गुणः काम्यो विधीयते॥ तथा सति श्येनशब्दस्य पक्षिणि लोकप्रसिद्धार्थ्यादिरप्युपगता भवति॥ न च गुणविधित्वे चित्रायामिव वाक्यभेदमापादयितुं शक्यः॥ चित्रत्वस्त्रीत्वगुणद्वयाभावादिति प्राप्ते ब्रूमः॥ यथा वै श्येनो निपत्यादत्त एवमयं द्विषंतं भ्रातृव्यमादत्ते यमभिचरति श्येनेनेति वाक्योक्त उपमानोपमेयभावः पक्षिण्येकस्मिन्न युज्यते॥ तस्मात्पक्षिण उपमानस्य गुण उपमेये कर्मणि अस्तीति श्येनशब्दस्याभिचारकर्मनामत्वं॥ संदंशेनाभिचरन्यजेत गवाभिचर्यमाणो यजेतेत्यत्र संदंशगोशब्दयोर्नामत्वं श्येनशब्दवद्द्रष्टव्यं॥ तथा संदंशेन दूरादानमादत्ते यथा गावो गोपयंतीति वाक्यशेषाभ्यामुपमानोपमेयभावाभिधानात्॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ यजेत वाजपेयेन स्वाराज्यार्थीत्यसौ गुणः॥ नाम वा गुणता तत्र योगाद्गुणफलद्वये॥ साधारणं यजेः कर्मकरणत्वेन तंत्रता॥ त्रिकद्वयं विरुद्धं स्यात्तंत्रतायां प्रतिफलं॥ उपादेयविधेयत्वगुणत्वाख्यं त्रिकं यजेः॥ उद्देश्यानूक्तिमुख्यत्वत्रिकं तस्य गुणं प्रति॥ त्यक्त्वा तंत्रं तदावृत्तौ वाक्यं भिद्येत तेन सः॥ वाजपेयेति शब्दोपि कर्मनामाग्निहोत्रवत्॥ वाजपेयेन स्वाराज्यकामो यजेतेत्यत्र वाजपेयशब्देन गुणो विधीयते॥ अन्नवाची वाजशब्दः॥ तच्चान्नं पेयं सुराद्रव्यं तच्चात्र गुणः सुराग्रहणामनुष्ठितत्वात्॥ ननु गुणत्वे वाजपेयगुणवता यागेन स्वाराज्यं भावयेदित्येवं मत्वर्थलक्षणा प्रसज्येत॥ मैवं सकृदुच्चारितस्य यजेतेत्याख्यातस्य वाजपेये गुणे स्वाराज्यफले च तंत्रेण संबंधांगीकारात्॥ वाजपेयेन द्रव्येण स्वाराज्याय यजेतेत्येवमुभयसंबंधः॥ ननु गुणसंबंधे सति वाजपेयगुणेन यागं कुर्यादिति यजेः कर्मकारकत्वं भवति॥ फलसंबंधे तु यागेन स्वाराज्यं संपादयेदिति करणकारकत्वं तत

31
1945

कथमुभयसंबंध इति चेत्॥ नायं दोषः यजेः साधारणत्वेन द्विरूपत्वसंभवात्॥ यजेतेत्यत्र प्रकृत्या यागउक्तः॥ प्रत्ययेन भावनोक्ता तयोश्च समभिव्याहारात्संबंधमात्रं गम्यते तत्र कर्मत्वकरणत्वयोः साधारणं॥ न खलु तत्र कर्मत्वस्यैव वा साक्षादभिधायिका काचिदसाधारणा विभक्तिः श्रूयते अतः साधारणस्य यजेरुभाभ्यां गुणफलाभ्यां युगपत्संबंधे सति तथोचितं संबंधिविशेषं पर्यवस्यति॥ एवं तंत्रेण संबंधांगीकारे वाजपेयद्रव्येण यागं कुर्यादित्यर्थस्य लभ्यमानत्वाद्गुणविधित्वेपि नास्ति मत्वर्थलक्षणा यद्वदुद्भिदादिष्वप्येवं गुणविधिः स्यात्॥ तर्हि तान्यपि वाक्यान्यत्रोदाहृत्य तदीयः॥ सिद्धांतः पुनराक्षिप्यतामिति प्राप्ते ब्रूमः॥ यजेस्तंत्रेणोभयसंबंधे सति विरुद्धत्रिकद्वयापातिः स्यात्॥ उपादेयत्वं गुणत्वं विधेयत्वं चेत्येकं त्रिकं॥ उद्देश्यत्वमनुवाद्यत्वं मुख्यत्वं चेत्यपरं त्रिकं॥ तत्रोद्देश्यत्वादयः त्रयः स्वाराज्यफलनिष्ठा धर्माः उपादेयत्वादयस्त्रयः साधनभूतयजिनिष्ठाः धर्माः फलमुद्दिश्य यजिरुपादीयते फलमनूद्य यजिर्विधीयते फलं प्रधानं यजिरुपसर्जनं॥ फलस्योद्देश्यत्वं नाम मानसापेक्षाविषयत्वाकारः॥ यजेरुपादेयत्वं नामानुष्ठीयमानत्वाकारः॥ तावुभौ मनःशरीरोपाधिकौ धर्मौ अनुवाद्यत्वविधेयत्वधर्मौ तु शब्दोपाधिकौ ज्ञातस्य कथनमनुवादः॥ अज्ञातस्यानुष्ठेयत्वकथनं विधिः॥ फलयागयोः साध्यसाधनत्वरूपतया प्रधानत्वोपसर्जनत्वे एवं सति फलतत्साधनयोः स्वाराज्ययागयोः स्वभावपर्यालोचनाय फलस्योद्देश्यत्वादित्रिकं व्यवतिष्ठते तथा यागस्य वाजपेयस्य च साध्यसाधनभावपर्यालोचनायां यागस्योद्देश्यत्वादिकं वाजपेयद्रव्यस्योपादेयत्वादित्रिकं च पर्यवस्यति ततो यागस्य फलद्रव्याभ्यां युगपत्संबंधे सति विरुद्धं त्रिकद्वयमापद्यते न नु माभूत्तंत्रेणोभयसंबंधः॥ पृथक्संबंधाय यजिरावर्त्यतामिति चेत्॥ न वाक्यभेदप्रसंगात्॥ द्रव्येण यागं कुर्यादित्येकं वाक्यं यागेन फलं कुर्यादित्यपरं तस्माद्वाजपेयशब्दो न गुणविधायकः॥ किंतु यथोक्तद्रव्यान्निमित्तीकृत्य अग्निहोत्रशब्दवत्कर्मनामधेयं॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ यदाग्नेयोष्टाकपाल इति नाम गुणो थवा॥ नामाग्निहोत्रवन्नैवं नामत्वे देवता नहि॥ मंत्रोपि नह प्रत्यक्षस्तद्विताद्देवताविधिः॥ देवद्रव्यविशिष्टस्य विधानादेकवाक्यता॥ दर्शपूर्णमासयोः श्रूयते यदाग्नेयोष्टाकपालोमावास्यायां च पौर्णमास्यां चाच्युतो भवतीति॥ तत्र यथाग्निहोत्रशब्दोग्नये होत्रमत्रेत्यमुमर्थं निमित्तीकृत्य कर्मनामधेयं तथाग्नेयशब्दोप्यग्निसंबंधं निमित्तीकृत्य कर्मनाम स्यादिति चेत् मैवं॥ नामत्वे देवतादिराहित्यप्रसंगात्॥ अग्निहोत्रे अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीत्यनेन वचनेन विहितो मंत्रः प्रत्यक्षविहित इति॥

मंत्रवर्णिकी देवताभ्यते इह तु न तादृशो मंत्रोस्ति आग्नेयशब्दस्तु देवतां विधातुं शक्नोति अग्निर्देवतास्येत्यस्मिन्नर्थे तद्धितस्यो
त्पन्नत्वात्॥ न च द्रव्यदेवतयोरुभयोर्गुणयोर्विधानाद्वाक्यभेद इति शंकनीयं॥ कर्मणोऽप्राप्तत्वेन गुणद्वयविशिष्टस्य कर्मण एके
नवाक्येन विधानात्॥ तस्मादाग्नेयशब्देन देवता गुणो विधीयते॥ ॥ अत्र गुरुमतमाह॥ ॥ यदाग्नेयमिति प्रोक्ते न मानं विध्य
संभवात्॥ इति चेन्न विशिष्टार्थविधौ सत्यप्रमा कुतः॥ उदाहृतवाक्ये देवताराहित्यप्रसंगेन नामत्वाभावाद्गुणयोर्विधौ वाक्यभे
दात्॥ च विध्यसंभवादप्रामाण्यमिति पूर्वः॥ पक्षः गुणद्वयविशिष्टकर्मविधिसंभवात्प्रामाण्यमिति सिद्धांतः॥ ॥ अष्टमाधिक
रणमारचयति॥ ॥ बर्हिराज्यपुरोडाशशब्दाः संस्कारवाचिनः॥ जात्यर्था वा शास्त्ररूढेस्तेस्युः संस्कारवाचिनः॥ जातिं त्यक्त्वा
न संस्कारे प्रयुक्ता लोकवेदयोः॥ विनापि संस्कृतिं लोके दृष्टत्वाज्जातिवाचिनः॥ दर्शपूर्णमासयोः श्रूयते बर्हिर्लुनाति आज्यं
विलापयति पुरोडाशं पर्यग्निकरोतीति तत्र बर्हिरादिशब्दानां शास्त्रे सर्वत्र संस्कृत एव तृणादिषु प्रयोगात्पीलु वादिशब्दे
षु शास्त्रीयरूढिप्राबल्यस्योक्तत्वाद्यूपाहवनीयादिशब्दवत्संस्कारवाचिनो बर्हिरादिशब्दा इति चेत्॥ मैवं॥ अन्वयव्यति
रेकाभ्यां जातिवाचित्वात्॥ यत्र यत्र बर्हिरादिशब्दप्रयोगस्तत्र जातिरित्यस्या व्याप्तेर्लोकवेदे च नास्ति व्यभिचारः॥ संस्कार
रस्तु लौकिकप्रयोगे व्यभिचारो दृश्यते॥ क्वचिद्देशविशेषे लौकिकव्यवहारे जातिमात्रमुपजीव्य विना संस्कारं ते शब्दाः प्रयु
ज्यन्ते बर्हिरादय गावो गता इति क्रय्य आज्यमिति पुरोडाशेन मे माता प्रहेलकं ददातीति च तस्मात् जातिवाचिनः॥ प्रयोजनं
तु बर्हिषा यूपावटमवस्तृणातीत्यत्र विना संस्कारेण स्तरणसिद्धिः॥ अत्र गुरुमतमाह॥ ॥ बर्हिरादौ निमित्तस्य दुर्वचत्वान्न
मति च॥ जातेस्तत्र निमित्तत्वात्तच्छक्ता चोदनप्रमा॥ स्पष्टोऽर्थः॥ ॥ नवमाधिकरणमारचयति॥ ॥ प्रोक्षणीः संस्कृतिर्जा
तिर्यौगावा सर्वक्षमिषु तथोक्तेः संस्कृतिर्जातिः स्याद्रूढेः प्रबलत्वतः॥ अन्योन्याश्रयतो नाद्यो न जातिः कल्प्यशक्तितः॥ योग
त्वात् क्लृप्तशक्तित्वात् क्लृप्तिर्व्याकरणादिवत्॥ दर्शपूर्णमासयोः श्रूयते॥ प्रोक्षणीरासादयतीति तत्र प्रोक्षणीशब्दस्याभिमंत्रणा
सादनादिसंस्कृतिप्रवृत्तिनिमित्तं कुतः सर्वेषु वैदिकप्रयोगप्रदेशेषु संस्कृतानामेवापां प्रोक्षणीशब्देनोच्यमानत्वादित्येकः
पक्षः॥ लोके जलक्रीडायां प्रोक्षणीभिरुद्वेजिताः स्मइत्यसंस्कृतास्वप्सु प्रयोगाद्बर्हिरादिशब्दवज्जातौ रूढत्वादुदकत्वजा
तिः प्रवृत्तिनिमित्तं॥ न च प्रकर्षेणोक्षत आभिरिति योगोऽत्र शंकनीयः॥ रूढेः प्रबलत्वादिति पक्षांतरं॥ तत्र न तावत्संस्कारो युक्तः अ

श्री:
१६

33
1945

न्योन्याश्रयत्वात्॥ विहितेष्वभिमंत्रणादिषु संस्कारेष्वनुष्ठितेषु पश्चात्संस्कृतास्वप्सु प्रोक्षणीशब्दप्रवृत्तिः तत्प्रवृत्तौ
सत्यां प्रोक्षणीशब्देनापो नूद्याभिमंत्रणादिविधिरिति॥ अन्योन्याश्रयत्वं॥ नापि जातिपक्षो युक्तः उदकजातौ प्रोक्षणी
शब्दस्य वृद्धव्यवहारे पूर्वमक्लृप्तत्वेनेतः परं शक्तेः कल्पनीयत्वात् ततो गोशब्दवदश्वकर्णशब्दवच्च रूढो न भवति योग
स्तु व्याकरणे क्लृप्तः सोपसर्गादुक्षतेः करणे ल्युट्प्रत्ययेन व्युत्पादनात्तस्मात् प्रोक्षणीशब्दो यौगिकः घृतादेः प्रोक्ष
णत्वं प्रयोजनं॥ ॥ दशमाधिकरणमारचयति॥ ॥ रूढिर्योगो योगरूढिर्वा निर्मथ्यस्य वर्त्तनं॥ आद्यो पूर्ववदंत्यो
चिरजातौ नावनीतवत्॥ अग्निचयने श्रूयते। निर्मथ्येनेष्टकाः पचंतीति तत्र निर्मथ्यशब्दस्य स्वार्थे कीदृशी वृत्तिरिति
संशये बर्हिरादिशब्दवल्लौकिकवैदिकसाधारण्यादग्निजातौ रूढिरित्येकः पक्षः॥ प्रोक्षणीशब्दवद्रूढेरक्लृप्तत्वादर
णिनिर्मथनजन्यत्वाद्योग इति पक्षांतरं॥ लौकिकनिर्मथनेन चिरं निर्मथनेन च जन्यं वारयितुं योगरूढिः पंकजादि
शब्दवदाश्रयणीया॥ आधानकाले निर्मथ्य गार्हपत्ये नित्यं धृतोऽग्निश्चिरं निर्मथितः सद्य एव लौकिकमंथनेन जातो
ऽग्निरचिरं निर्मथितः तेनेष्टकाः पच्यंते यथा पुराणनूतनयोर्घृतयोर्नवनीतजन्यत्वे समानेपि योगरूढ्या नूतनमेव
नावनीतमिति व्यवह्रियते तद्वत्॥ ॥ एकादशाधिकरणमारचयति॥ ॥ चातुर्मास्याद्यपर्वप्रोक्ताग्नेयाद्यष्टको
तिके॥ वैश्वदेवेतिशब्दोक्तो गुणः संघस्य नामवा नामत्वे रूपराहित्याद्विधिगुणता ततः॥ अग्न्यादिभिर्विकल्प्यंते विश्वे
देवास्तु सप्तसु॥ अनूद्याष्टौ यजेतेति तत्संघे नाम वर्णितं॥ अविधित्वेप्यर्थवत्स्यान्नाम प्राग्रवणादिषु॥ इज्यंते त्रयजे
नैवा विश्वेदेवा इतीदृशी॥ निरुक्तिर्न विकल्पः स्यादुत्पत्युत्पन्नशिष्टतः॥ चातुर्मास्ययागस्य चत्वारि पर्वाणि वैश्वदेवो वरु
णप्रघासः साकमेधः शुनासीरीयश्चेति॥ तेषु प्रथमे पर्वण्यष्टौ यागा विहिताः॥ आग्नेयमष्टकपालं निर्वपति सौम्यं चरुं
सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमिति
तेषामष्टानां यागानां सन्निधाविदमाम्नायते॥ वैश्वदेवेन यजेतेति तत्राग्नेयादीन्यागाननूद्य वैश्वदेवशब्देन देव
तारूपो गुणस्तेषु विधीयते यद्यपि वैश्वदेव्यामामिक्षायां वैश्वदेवाः प्राप्तास्तथाप्याग्नेयादिषु सप्तसु यागेष्वप्राप्तत्वा
द्विधीयंते॥ तेष्वप्यग्न्यादिदेवताः संतीति चेत्॥ तर्हि गत्यभावात्तेषु देवताविकल्प्यंतां नामधेयत्वे तु नाममात्रस्यावि

धेयत्वात्॥ द्रव्यदेवतयोरभावेन यागस्यात्रस्वरूपासंभवात्॥ श्रूयमाणे विधिः॥ अनर्थकः स्यात्॥ तस्माद्गुणविधि
रिति प्राप्ते ब्रूमः॥ उत्पत्तिवाक्यैर्विहितानाग्नेयादीनष्टौ यागान् यजेतेत्यनूद्याष्टानां संघे वैश्वदेवशब्दो नामत्वेनोपवर्ण्य
ते न च विधित्वाभावे विनामोपदेशवैयर्थ्यं प्राचीनप्रवणे वैश्वदेवेन यजेत इत्यादिषु वैश्वदेवशब्देनैकेनैवाष्टानां संघस्य
व्यवहर्तव्यत्वात्॥ नामप्रवृत्तिनिमित्तभूतानिरुक्तिर्द्विधा॥ अमिक्षायागे विश्वेषां देवानामिज्यमानतया तत्सहचरितानां
नां सर्वेषां छत्रिन्यायेन वैश्वदेवत्वं॥ अथवा विश्वेदेवा अष्टानां कर्तार इति वैश्वदेवत्वं॥ तथा च ब्राह्मणं॥ यद्विश्वेदेवाः
समयजंत तद्वैश्वदेवस्य वैश्वदेवत्वमिति देवताविकल्पस्तु समानदैवतो बलत्वाभावान्न युज्यते अग्न्यादय उत्पत्तिशि
ष्टत्वात्प्रबलाः विश्वेदेवा उत्पन्नशिष्टत्वाद्दुर्बलाः तस्माद्वैश्वदेवशब्दः कर्मनामधेयं॥ ॥अत्र गुरुमतमाह॥ ॥गुण
नामत्वसंदेहादप्रमा चोदनेति चेत्॥ नोक्तन्यायेन संघस्य नामधेयत्वनिर्णयात्॥ स्पष्टोऽर्थः॥ ॥द्वादशाधिकरणमारच
यति॥ ॥यद्वादशकपाले स्ट्वैश्वानर्या अनंतरं॥ श्रुतमष्टाकपालादि तद्गुणो नाम वा स्तुतिः॥ अंतर्भावादष्टतादेर्नामस्या
दग्निहोत्रवत्॥ द्रव्यं द्रव्यांतरे नो चेद्गुणस्तर्हि फलेत्वसौ॥ वाक्यैक्यमुपसंहाराद्विस्पष्टं तन्नबाध्यते॥ नानागुणविधौ तस्मा
दंशद्वारा हि संस्तुतिः॥ काम्येष्टिकांडे श्रूयते वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति गायत्रियैवैनं ब्र
ह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपा
लस्त्रिष्टुभैवास्मिन्निंद्रियं दधाति यद्द्वादशकपालो जगत्यैवास्मिन्पशून्दधाति यस्मिन् जात एतामिष्टिं निर्वपति पूत एव तेज
स्व्यन्नाद इंद्रियावी पशुमान्भवतीति॥ अत्राष्टत्वादिसंख्यासामान्यात्पुरोडाशानां गायत्र्यादित्वकल्पनात्ताद्दृष्टिविधा
यकं वाक्यमेवं द्वादशसंख्या तस्यामष्टत्वादिसंख्यानामंतर्भावात्ताः संख्यानिमित्तीकृत्याग्निहोत्रशब्दवदष्टाकपालादिश
ब्दाः कर्मनामधेयानीत्येकः पक्षः॥ नात्र द्वादशकपालशब्दः संख्यापरः किंतु पुरोडाशद्रव्यपरः द्वादशसु कपालेषु संस्कृत
इति व्युत्पत्तेः एवमेवाष्टाकपालादिशब्दा अपि॥ तथा सति द्रव्यस्य द्रव्यांतरेऽनंतर्भावान्नामधेयस्य निमित्तं नास्तीति चे
त्॥ एवं तर्हि पुरोडाशद्रव्यरूपो गुणो विधीयतां न चोत्पत्तिशिष्टद्वादशकपालपुरोडाशावरुद्धत्वादष्टाकपालादेरनवकाश
इति वाच्यं॥ ब्रह्मवर्चसादिफलाय तद्विध्युपपत्तेरित्यपरः पक्षः अयमप्यनुपपन्नः॥ बहूनां गुणानां विधौ वाक्यभेदाप

35
1945

त्तेः॥ न च भिन्नान्येवैतानि वाक्यानीति वाच्यं वैश्वानरं द्वादशकपालं निर्वपेदिति विहितस्य यस्मिन् जात एतामित्युपसंहा
रेण वाक्यैकत्वावगमात्॥ तस्मादेशैरष्टाकपालादिभिरंशी द्वादशकपालः स्तूयते॥ ॥अत्र गुरुमतमाह॥ ॥अगुण
त्वादनामत्वादमंत्रत्वादनन्वये॥ अष्टत्वाद्यप्रमाणं चेत् नार्थवादतयान्वयात्॥ उक्तरीत्या गुणत्वं नामत्वं च न संभवति॥ उ
त्तमपुरुषामंत्रणाद्यभावान्न मंत्रत्वमतोऽष्टाकपालादीनामनन्वयादप्रमाणं वाक्यस्येति चेत्॥ मैवं स्तावकत्वेनान्वयस्यो
क्तत्वात्॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥यजमानः प्रस्तरोऽत्र गुणो वा नाम वा स्तुतिः॥ समानाधिकरण्ये
न स्यादेकस्यान्यता मता॥ गुणो वा यजमानोऽस्तु कार्ये प्रस्तरलक्षिते॥ अंशांशित्वाद्यभावेन पूर्ववन्नात्र संस्तुतिः अर्थभेदा
दनामत्वं गुणश्चेत्प्रक्रियेत सः॥ यागसाधनताद्वारा विधेयः प्रस्तरः स्तुतिः॥ इदमाम्नायते यजमानः प्रस्तर इति तत्र य
जमानस्य प्रस्तरशब्दो नामधेयं प्रस्तरस्य वा यजमानशब्दो नामधेयं॥ कुतः उद्भिदा यागेनेत्यादाविव सामानाधिकरण्या
दित्येकः पक्षः॥ गुणविधिरेष इत्यपरः पक्षः॥ यद्यपि यजमानकार्ये जपादौ प्रस्तरस्याचेतनस्य सामर्थ्याभावात्॥ प्रस्तरका
र्ये तु स्रुग्धारणादौ यजमानस्य शक्तत्वाद्यजमानरूपगुणो विधीयते एवं सति पश्चाच्छ्रुतस्य प्रस्तरशब्दस्य कार्यलक्षकत्वेपि
प्रथमश्रुतो यजमानशब्दो मुख्यवृत्तिर्भविष्यति॥ न चात्र पूर्वन्यायेन स्तुतिः संभवति अष्टाकपालद्वादशकपालयोरि
व प्रस्तरयजमानयोरंशांशित्वाभावात् वायुर्वै क्षेपिष्ठा देवता ऊर्जो वरुध्या इत्यादिवत् स्तुतिरिति चेत्॥ न क्षिप्रत्वादिधर्मवत्
कस्यचिदुत्कर्षस्याप्रतीतेस्तस्मान्नामगुणयोरन्यतरत्वमिति प्राप्ते ब्रूमः॥ गोमदिषयोरिवार्थभेदस्यात्यंतप्रसिद्धत्वान्नाम
त्वं न युक्तं॥ गुणपक्षे त्वं प्रहरणस्य प्रस्तरकार्यत्वाद्यजमाने प्रहृते सति कर्मलोपः स्यात्तस्माद्विधेयः प्रस्तरो यजमानशब्दे
न स्तूयते॥ यथा सिंहो देवदत्त इत्यत्र सिंहगुणेन शौर्यादिनोपेतो देवदत्तः सिंहशब्देन स्तूयते तथा यजमानगुणेन यागसाध
नत्वेन युक्तः प्रस्तरो यजमानशब्देन स्तूयते॥ एवं यजमान एककपाल इत्यादिषु द्रष्टव्यं॥ ॥चतुर्दशाधिकरणमारचयति
॥ ॥आग्नेयो ब्राह्मणो यापि पूर्ववत्सर्वनिर्णयः॥ द्वारं तु मुखजन्यत्वमाग्नेयत्वेन संस्तवे॥ इदमाम्नायते॥ आग्नेयो वै ब्रा
ह्मण इति॥ अत्रात्यंतप्रसिद्धार्थभेदादाग्नेयशब्दो नामधेयं॥ नाप्यग्निदेवतारूपो गुणो विधीयते॥ आग्नेयं सूक्तमाग्नेयं
हविरित्येवं देवतातद्धितस्य सूक्तहविर्विषयत्वात्॥ न ब्राह्मणः सूक्तं नापि हविः अतः संबंधवाचिना तद्धितांतेनाग्नेयशब्दे

अ॰ कर॰ माला॰ नब्राह्मणः स्तूयते॥ यद्यपिब्राह्मणेनाग्निसंबंधः तथाप्यग्निसंबंधोमुखजन्यत्वगुणोब्राह्मणेविद्यते॥ तथा चाग्निब्रा
१९ ह्मणयोर्मुखजन्यत्वंकस्मिंश्चिदर्थवादेसमाम्नायते॥ प्रजापतिरकामयतप्रजाः सृजेयेतिसमुखतस्त्रिवृतंनिरमिमीत
मग्निर्देवतान्वसृज्यत गायत्रीछंदोरथंतरं सामब्राह्मणोमनुष्याणामजः पशूनां तस्मात्ते मुख्यामुखतोह्यसृज्यंतेति
तस्मादाग्नेयशब्दस्तावकः॥ एवमैंद्रोराजन्योवैश्योवैश्वदेवइत्यादिषुद्रष्टव्यं॥ ॥ पंचदशाधिकरणमारचयति॥ ॥
आदित्योयूपइत्यत्रस्तुतिरादित्यशब्दतः॥ द्वारंचाक्षुषसान्निध्यघृताक्ततेजसास्तितत॥ आदित्येयच्चक्षुर्गम्यंतेजस्वित्वं
तद्यूपेप्यस्तिघृताक्तस्ययूपस्यतेजस्वित्वावभासात्॥ ततआदित्यशब्देनयूपस्तूयते॥ एवंयजमानोयूपइत्यत्रचक्षुर्गम्यस्यो
र्ध्वत्वस्यसमानत्वाद्यजमानशब्देनयूपस्तूयते॥ ॥ षोडशाधिकरणमारचयति॥ ॥ पशवोन्येगवाश्वेभ्यःपशवोवाइति
श्रुतं॥ अजादिष्वपशुत्वंयद्गुणोवाथवास्तुतं॥ स्तुत्यभावाद्गुणस्तेषुपशुकार्यनिषेधनं॥ अशक्यत्वान्निषेधस्यघटार्थी
द्यभिधायिना॥ पशवोपशुशब्देनप्राशस्त्याभावसाम्यतः॥ लक्ष्यास्तत्रनिमित्तंतुप्रशंसैवगवाश्वयोः॥ इदमाम्नायते॥
पशवोवाअन्येगोअश्वेभ्यः पशवोगोअश्वाइति तत्राजादिषुश्रूयमाणंयदपशुत्वंतस्यार्थवादत्वंनसंभवति पशुत्वनिषेध
मात्रेणस्तुतेरभावात्॥ ततः पशुकार्यनिषेधरूपोगुणोविधीयतइतिचेत्मैवं॥ अजादिपशुविधिवैयर्थ्यप्रसंगेननिषेद्धुम
शक्यत्वात्॥ अपशुशब्दः पशुव्यतिरिक्तंघटादिपदार्थमभिदधातितस्मिन्घटादौगवाश्ववत्॥ प्राशस्त्यंनास्तिसोयंप्राश
स्त्याभावोजादिषुपशुष्वस्तीत्यनेनाभिप्रायेणपशवएवसंतोप्यजादयोघटादिसाम्यादपशुशब्देनलक्ष्यते॥ पूर्वेयजमान
कार्यसिद्धिराग्नेयमुखजन्यत्वमादित्यवत्तेजस्वित्वं॥ चयजमानादिशब्दानांप्रस्तराद्यर्थेषुप्रवृत्तिनिमित्तंतत्प्रवृत्तिफलं श्रीः
प्रस्तरादिप्रशंसाइहत्वपशुशब्दस्याजादिषुप्रवृत्तौगवाश्वयोः प्रशंसैवनिमित्तंफलंचद्विप्रकाराद्धिप्रशंसावस्तुनिविद्यमा
नगुणोत्कर्षएकः प्रकारः॥ स्तावकेनशब्देनसंपादितोगुणोत्कर्षः अपरः प्रकारः॥ गवाश्वयोरजादिभ्यः उत्कर्षोलोकप्रसि १९
द्धः सोत्रनिमित्तंअजादयः स्वभावतः पशवोपिसंतोगवाश्वौप्रत्यपशवः संपन्नाईदृशोगवाश्वयोर्महिमेतिस्तुतिः फलं
तस्मादपशवोवाइत्ययमर्थवादः॥ अयमेवन्यायउदाहरणांतरेयोजनीयः॥ अयज्ञोवाएषयोसामेत्येकमुदाहरणं॥ असत्रंवा
एतद्यदछंदोममित्यपरमुदाहरणंअग्निहोत्रदर्शपौर्णमासादियज्ञोपिसामहीनत्वात॥ अयज्ञोभवतिईदृशः साम्नामहिमा॥

37/1945

छंदोमशब्देनचतुर्विंशश्चतुश्चत्वारिंशोष्टाचत्वारिंशइत्येतेत्रयस्तोमाउच्यंते॥ अक्षरसंख्यासाम्येनगायत्रीत्रिष्टु
ब्जगतीछंदोभिर्गीयमानत्वात्॥ तेषांचविष्टुतिः सामब्राह्मणेद्रष्टव्या॥ अतः सत्रमपिचतुर्दशरात्रादिकंछंदोमरहि
तत्वादसत्रंभवति॥ ईदृशांछंदोमानांमहिमेत्येवंस्तावकत्वादर्थवादत्वं॥ ॥ सप्तदशाधिकरणमारचयति॥ ॥ सृष्टी
रुपदधातीतियेमंत्राः सृष्टिलिंगकाः विधेयास्तेगुणत्वेनवादोवात्रगुणेविधिः॥ आख्यातेनाभिसंबंधादविध्यंतरयोग
तः॥ लिंगप्रकरणप्राप्तेमंत्राणांविध्यसंभवात्॥ ताननूद्येष्टकाधानंविदध्यात्स्तोष्यते यतः॥ यथासृष्टेत्यनेनातः सृष्टी
रित्यर्थवादगीः॥ एकयास्तुवतेत्यादौमंत्रसंघेक्वचिन्नहि॥ सृष्टिशब्दस्तथाप्युक्तिः सृष्टिशब्देनभूमतः॥ अग्निचय
नेश्रूयतेसृष्टीरुपदधातीतिसृष्टिशब्दोपेतामंत्रायासामिष्टकानामुपधानेविद्यंतेताइष्टकाः सृष्टयइत्युच्यंते॥ सृ
ष्टिमांतासामुपधानेमंत्रइतिविगृह्यतद्धानासामुपधानइत्यादिव्याकरणसूत्रसिद्धप्रक्रियया तन्निष्पादनात्सृष्टि
शब्दोपेताश्चोपधानमंत्राएकयास्तुवतेत्यस्मिन्ननुवाकेसमाम्नाताब्रह्मासृज्यतभूतान्यसृज्यंतेत्यादिनासृजतिधातो
स्तेषुप्रयुक्तत्वात्तेमंत्राअत्रसृष्टिशब्देनोपधानेगुणत्वेनविधीयंतेकुतः उपदधातीत्यनेनाख्यातेनाभिसंबंधात्॥ नचा
र्थवादत्वस्यसंभवतिविध्यंतरेणसहैकवाक्यत्वाभावादितिप्राप्तेब्रूमः॥ अग्निचयनप्रकरणेपठितत्वात्तेषांमंत्राणांसा
मान्यतश्चयनसंबंधोवगम्यते॥ विशेषसंबंधः सृजतिलिंगादवगंतव्यः॥ तथासतिप्राप्तत्वान्नतेमंत्राः अत्रविधीयंते
किंतुतान्मंत्राननूद्येष्टकोपधानंविधीयते॥ सृष्टिशब्देनानुवादस्तुवक्ष्यमाणार्थवादोपपत्त्यः॥ यथासृष्टमेवावरुंधइ
तिहिवक्ष्यमाणोर्थवादः यदिविधिवाक्येमंत्राणामनुवादकः॥ सृष्टिशब्दोनस्यात्तदानीमर्थवादेसृष्टशब्दप्रयोगाद्वि
ध्यर्थवादयोर्वैयधिकरण्यभ्रमः स्यात्तस्मान्मंत्रानुवादीसृष्टिशब्दोनगुणविधायकः किंत्वर्थवादः॥ ननुप्रथममंत्रेसृ
जतिधातुर्नप्रयुक्तः किंतुदधातिधातुः प्रयुक्तः॥ एकयास्तुवतप्रजाअधीयंतेतितत्पाठात्॥ बाढंतथापिद्वितीयतृतीया
दिषुबहुषुमंत्रेषुसृजतिधातुप्रयोगाद्बहुरूपंसादृश्यमतियत्रसर्वाणिवाक्यानिसृष्टिशब्दोपेतानियत्रयथासृष्टि
भूमतातथाअत्रापीतिभूमगुणयोगेनसृष्टस्यसृष्टिसंधेसृष्टिशब्दप्रयोगः॥ ॥ अष्टादशाधिकरणमारचयति॥ ॥
सृष्टिवत्प्राणभृत्तत्रसादृश्यंलिंगभूमतः॥ अत्रैकमंत्रगोलिंगसमवायोविशिष्यते॥ प्राणभृतउपदधातीत्यत्रापिसृ

श्न्यायेन मंत्रविधिरिति पूर्वः पक्षः॥ लिंग प्रकरण प्राप्तमंत्रानुवादेनैष कोपधानविधिः॥ एतस्यैव प्राणाऽनुदधातीत्यस्य व
क्ष्यमाणार्थवादस्योपपत्तये प्राणभृच्छब्देन मंत्रानुवादः॥ पूर्वद्वितीयादिमंत्रेषु सृष्टिलिंगानां बाहुल्यं॥ इह तु प्रथममंत्रे एव
प्राणभृल्लिंगमाम्नायते॥ अयं पुरो भुवस्तस्य प्राणो भौवायन इति एकस्यैव मंत्रस्य प्राणभृत्त्वपि छत्रिणो गच्छंतीतिवत्तत्सहच
रिताः सर्वे मंत्राः प्राणभृच्छब्देन लक्ष्यंते तदेवं यजमानकार्यसिद्ध्यादयो गुणवृत्तिहेतवो निरूपिताः॥ तथा चोक्तं तत्सिद्धिजा
तिसारूप्य प्रशंसालिंगभूमभिः॥ षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पितेति॥ ॥ एकोनविंशाधिकरणमारचयति॥ ॥
शर्करा उपधत्ते क्वासं तेजो वै घृतं त्र्यक्तिं॥ तैलादिना जिता अक्ता घृतेनैवाथ वांजनं॥ तैलादिनापि मुख्यत्वादसंजातविरोधना
त्॥ अप्राप्तार्थत्वतश्चास्य विधेर्वादाद्बलित्वतः॥ सामान्यमननुष्टेयं विशेषस्तु विधौ नहि॥ घृतेनैवांजनं वाक्यशेषात्स
दिग्धनिर्णयात्॥ अर्थवादगतार्थे चेत्स्तौति घृतमुपेयुषी॥ बोधयंती विधेयत्वं घृतस्य गमयेद्विधिं॥ अक्ताः शर्करा उपदधा
ति तेजो वै घृतमिति श्रूयते मृत्तिका॥ मिश्राः क्षुद्रपाषाणाः शर्कराः ताश्च घृततैलवसादीनामन्यतमेन द्रव्येणांजनीयाः
कुतः अंजनसामान्यबोधकस्य विधिवाक्यस्य घृतविशेषबोधकादर्थवादात्प्रबलत्वात् प्राबल्ये च मुख्यत्वादयस्त्रयो
हेतवः स्वार्थतया विधेर्मुख्यत्वं प्रथमश्रुतत्वाच्चासंजातविरोधित्वं अनधिगतार्थबोधकत्वाद प्राप्तार्थत्वं॥ अर्थवादस्तु
विधिस्तावकत्वादमुख्यः॥ चरमश्रुतत्वात्संजातविरोधी ज्ञातार्थानुवादित्वात् प्राप्तार्थः॥ तस्माद्येन केनाप्यंजनमिति प्राप्त
ब्रूमः॥ विधिवाक्ये न किमंजनसाधनसामान्यं विधीयते तद्विशेषो वा नाद्यः॥ सामान्यस्याननुष्टेयत्वान्न द्वितीयः॥ घृततैला
दिविशेषवाचकशब्दाभावात्तत उक्तरीत्या प्रबलमपि विधिवाक्यमनुष्ठानयोग्यविशेषसंदेहजनकत्वान्निर्णयहेतुमर्थवाद
पेक्षते न तु तेन सह विरुध्यते॥ अर्थवादेपि घृतस्य विधिर्नास्तीति चेत्॥ न विधेरुन्नेयत्वात्॥ तेजो वै घृतमित्येवं तेजस्त्वेन घृ
तस्य स्तूयमानत्वाद्विधेयत्वं गम्यते॥ यत्स्तूयते स विधीयत इति न्यायात्॥ तेन च विधेयत्वेन विधायकः शब्दः कल्प्यते॥
घृतेनाक्ताइति तस्माद्घृतेनैवांजनं॥ ॥ विंशाधिकरणमारचयति॥ ॥ स्रुवेणाथ स्वधितिना हस्तेनावद्यतीत्यमी॥ आ
ज्यमांसे पुरोडाशे संकीर्णा वा व्यवस्थिता॥ व्यवस्थापकराहित्यात्स्रुवाद्या अव्यवस्थिताः॥ अवस्थापकताशक्तेस्तद्वशेन व्यव
स्थितिः स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यतीति श्रूयते॥ तत्रावदेयेष्वाज्यमांसपुरोडाशेषु हविष्षु मीस्रुवाद्या अव

श्रीः
१९

39
1941

दानहेतवः संकीर्णाः कुतः व्यवस्थापकस्य शब्दस्याभावादिति चेत् मैवं शक्तेर्व्यवस्थापकत्वात्॥ आख्यातानार्थे मंब्रुवतां श
क्तिः सहकारिणीति न्यायात् कटे भुंक्ते कांस्यपात्र्यां भुंक्ते इत्यत्र लौकिकास्तत्तद्वस्तु शक्त्यनुसारेण व्यवस्थां कल्पयंति॥ क
ट आसीनः कांस्यपात्र्यामोदनं निधायेति वेदेप्यंजलिना सक्तून् प्रदाय जुहुयादित्यत्र यद्यपि द्विहस्तसंयोगोंजलिस्तथापि
गुरुदेवतादिप्रसादनार्थोंजलिवन्निश्छिद्रसंयोगो न भवति तादृशेंजलौ सक्तूनामवकाशाभावात्॥ अतः सामर्थ्यात्संयुक्त
प्रसृतिद्वयात्मको मध्यगतावकाशोपेतोंजलिर्गृहीतः॥ एवमत्रापि द्रव्यस्याज्यस्य स्रुवो योग्यः छेदनीयमांसस्य शस्त्र
विशेषः स्वधितिः॥ संहतस्य पुरोडाशस्य हस्त इत्यनेन प्रकारेण स्रुवाद्याः व्यवस्थिता॥ ४२॥ ॥ इति श्रीमाधवीये जैमि
निन्यायमालाविस्तरे प्रथमाध्यायस्य प्रथमः चतुर्थः पादः समाप्तः॥ ॥ श्रीरस्तु॥ ॥ श्रीमहाकाल्यै नमः॥ ॥ प्रमा
णमुपजीव्यत्वात् प्रथमेध्याय ईरितं॥ मानाधीनस्य धर्मस्य द्वितीये भेद उच्यते॥ अनेन प्रथमद्वितीययोरध्याययोः पूर्वो
त्तरभाव उपपादितः॥ द्वितीयाध्यायस्य प्रथमपादे प्रथमाधिकरणं प्रथमवर्णकमारचयति॥ ॥ विधिवाक्ये पदैः सर्वै
रपूर्वं प्रतिपाद्यते॥ प्रत्येकमथ वैकेन सर्वैस्तत्प्रतिपादनं॥ फलान्वयित्वात्सर्वेषां प्रधानान्वयलाभतः॥ लाघवादेकबो
ध्यत्वं तच्छेषस्तु पदांतरं॥ विधिवाक्यमदृष्टार्थमखिलमत्रोदाहरणं॥ विधिवाक्ये यावंति पदानि संति तानि सर्वाणि क्रि
याकारकसंबंधमनादृत्य प्रत्येकमपूर्वस्य प्रतिपादकानि॥ कुतः अपूर्वस्य फलवत्त्वेन सर्वेषां पदानां फलान्वयित्वात्
अपूर्वप्रतिपादनाभावेपि क्रियाकारकयोः परस्परान्वयोस्त्येवेति चेत्सत्यं तथापि प्राधान्यान्वयो लभ्यते फलं हि प्रधानं
पुरुषार्थतया साध्यमानत्वादिति प्राप्ते ब्रूमः॥ अपूर्वस्यात्यंतादृष्टत्वादेककल्पनयैव वाक्यस्योपपन्नत्वादनेककल्पने गौर
वं स्यात्॥ तस्मादेकमपूर्वमेकेन पदेन प्रतिपाद्यते पदांतरं तु तच्छेषतयान्वेति॥ ननु यस्य पदस्यार्थो पूर्वस्य कल्पकस्तस्य
पदार्थस्य साधनतया फलं प्रत्युद्देश्यत्व विधेयत्व गुणत्वान्यभ्युपगंतव्यानि॥ तथास्य शेषभूतपदांतरार्थं प्रत्युद्देश्यत्वा
नुवाद्यत्वप्रधानत्वानामपि प्राप्तत्वात् उपादेयत्वोद्देश्यत्वयोः विधेयत्वानुवाद्यत्वयोर्गुणत्वप्रधानत्वयोश्च विरोधः॥
त्रिकद्वयापत्तिरिति चेन्न॥ मैवं॥ उद्भिदा यजेत पशुकामः श्येनेनाभिचरन् यजेतेत्यादौ उद्भिन्नामकेन यागेन पशून् भाव
येत्॥ उद्भिदादिशब्दानां नामत्वेनान्वये सति यागसाधनवाचित्वाभावेन यजेतावुद्देश्यत्वाद्विरुद्धत्रिकापादकत्वाभावात्॥

अ० कर० माला० सोमादिषु मत्वलक्षणाश्रयणात्॥ तस्मादेकमेव पदमपूर्वं प्रतिपादिकं न च धर्मभेदचिंता प्रसक्तां परित्यज्य किमित्यत्रा
पूर्वचिंत्यत इति वाच्यं॥ अपूर्वस्यैव धर्मत्वात्॥ ॥ द्वितीयवर्णकमारचयति॥ ॥ द्रव्यादिशब्दतो पूर्वधीर्भावार्थप
२० दाद्रुत॥ द्रव्यादीनां पदार्थत्वात्तच्छब्देनत्यपूर्वधीः॥ क्रियाद्वारमृते द्रव्यं फलेन नहि युज्यते॥ भावनावाचिनो पूर्वमा
ख्यातादव गम्यते॥ धात्वर्थव्यतिरेकेण भावना नेति चेन्नतत्॥ सर्वधात्वर्थसंबध्धः करोत्यर्थो हि भावना॥ धात्वर्थः
करणं तस्यां समानपदवर्णितः॥ द्रव्याद्युपकृतिर्दृष्टा धात्वर्थोत्पादनात्मिका इदमाम्नायते॥ सोमेन यजेत हिरण्यमा
त्रेयाय ददाति तस्मात्सुवर्णं हिरण्यं धार्य्यं श्येनेनाभिचरन् यजेत॥ चित्रया यजेत पशुकाम इत्यादि तत्र सोमहिरण्यशब्दौ
द्रव्यवाचिनौ सुवर्णशब्दो गुणवाची श्येनचित्रशब्दौ कर्मवाचिनौ तैर्द्रव्यादिशब्दैरपूर्वं प्रत्येति कुतः द्रव्यादीनां सिद्धरू
पाणां साध्यं फलं प्रति साधनत्वसंभवात्॥ यागदानादिरूपस्तु भावार्थः स्वयमपि फलवत्साध्यरूपत्वात् न साधनं भ
वितुमर्हति॥ ततो द्रव्यादीनां फलं प्रति करणत्वात् द्रव्यादिशब्दा अपूर्वप्रत्यायका इति प्राप्ते ब्रूमः॥ क्रियां विना द्रव्याणि
फलं साधयितुं न क्षमंते॥ क्रियामंतरेण माषकाष्ठस्थाल्यादीनामोदनसाधकत्वादर्शनात्॥ अतो भावनावाचिना यज
ति ददातीत्याख्यातेनापूर्वं प्रतीयते॥ ननु धात्वर्थ एव भावना तदन्या वा नाद्यः तस्य तां प्रति करणत्वोक्तेः नद्वितीयः धात्व
र्थव्यतिरिक्तायाः क्रियाया दुर्लक्ष्यत्वादिति चेत्॥ मैवं॥ सर्वधात्वर्थसंबंधरूपेण लक्षयितुं शक्यत्वात्॥ तदुक्तमाचार्यैः
धात्वर्थव्यतिरेकेण यद्यप्येषा न लक्ष्यते॥ तथापि सर्वसामान्यरूपेणैवावगम्यत इति॥ अन्यैरप्युक्तं॥ सिद्धसाध्यस्वभा
वाभ्यां धात्वर्थो द्विविधस्तयोः॥ अन्योत्पादानुकूलात्मा भावना साध्यरूपिणीति॥ पचतीत्युक्ते पाकं करोतीत्येतमर्थं सर्वज
नाः प्रतीयंते॥ तत्र पाकः पक्तिः पचनमित्यादिशब्दैर्व्यवह्रियमाणो लिंगकारकसंख्यायोग्यो धात्वर्थः सिद्धस्वभावः॥ श्रीः
करोतीत्यनेन व्यवह्रियमाणो लिंगाद्यन्वयायोग्यः साध्यस्वभावस्तत्र सिद्धस्वभावद्योतनाय यथा घञ्प्रत्ययादयो २०
विहितास्तथा साध्यस्वभावद्योतनायाख्यातप्रत्ययविधिः॥ स चाख्यातप्रत्ययार्थः॥ ओदनोत्पत्तेरनुकूलस्ततो भवि
तुरोदनस्य प्रयोजकव्यापारस्तु णिजंतेन भावना शब्देनोच्यत इत्यन्ये भावनापक्षा अयुक्ताः प्रयत्नो भावनेति चेत्॥ रथो
गच्छतीत्यत्र तदभावप्रसंगः॥ स्पंद इति चेन्नमानसत्वागरूपे यजतावव्याप्तिः॥ उभयसाधारणमुदासीनत्वविच्छेदसा

41
1945

मान्यं भावनेति चेत्॥ शब्दभावनायामव्याप्तिः॥ नहि शब्दस्य विभोरचेतनस्य स्पंदः प्रयत्नो वास्ति लिङ्लोट्तव्यप्रत्यय
मात्रगता शब्दभावना सर्वाख्यातगतार्थभावना॥ तदुक्तं॥ अभिधां भावनामाहुरन्यामेव लिङादयः॥ अर्थात्मभावना त्वन्या स
र्वाख्यातेषु गम्यत इति किंच स्पंदादिवादिनोपि न स्वरूपेण स्पंदनादीनां भावनात्वमाहुः किंत्वन्योत्पादानुकूलं स्वरूपं तस्मा
दस्मदुक्तैव भावना॥ यथा पचतीत्यत्रोदनफलोत्पत्त्यनुकूला तथा यजतीत्यत्र स्वर्गादिफलोत्पत्त्यनुकूला तस्यां च फलभाव
नायां प्रत्ययवाच्यायामेकपदोपात्तत्वेन प्रत्यासन्नत्वात् प्रकृत्यर्थः॥ करणं न तु द्रव्यादि तस्य पदांतरोपात्तत्वेन विप्रकृष्टत्वा
त्॥ साध्यरूपोपि प्रकृत्यर्थः स्वसाधनैर्निष्पादितः सन् शक्नोति फलं साधयितुं द्रव्यादीनां तु प्रकृत्यर्थोत्पादने नदृष्ट एवोपका
रः॥ द्रव्यादिनिष्पादितेन साधुवाच्येन यागादिकरणेन स्वर्गादिफलोत्पत्तौ सत्यां येयमनुकूलव्यापारात्मा कृतिः शब्दाभि
धेया फलोत्पादना सेयं पच्यादिधातूनामन्यतमेन केनापि धातुना नाभिधीयते सर्वधात्वर्थानुयायित्वात्॥ अतो न भावना
याः प्रकृत्यर्थत्वमाशंकितुं शक्यं॥ अस्तु तर्हि धात्वर्थसामान्यमेव भावनेति चेत्॥ न॥ प्रतिधात्वर्थं विलक्षणरूपत्वात्॥ अन्य
द्धि पाकस्यौदनं प्रत्यानुकूल्यं अन्यच्च ज्वलनस्य संयोगविभागौ प्रति अन्यथा फलविभागानुपपत्ते भिन्नौ सु भावना
त्वं कि घु भावनात्वसामान्यमनुवर्ततां नाम नैतावता प्रकृत्यर्थसामान्यं तद्भवति तस्माद्विशेषरूपात्सामान्यरूपाच्च यज्यादि
धातुवाच्याद् अन्यैवाख्यातप्रत्ययवाच्या भावना तथा सति यजेतेत्यत्राख्यातस्य भावयेदित्यर्थो भवति॥ तत्र किं भावयेत्॥
केन भावयेत् कथं भावयेदित्याकांक्षायां स्वर्गं भावयेत् केन भावयेद्यागेन भावयेदग्न्यन्वाधानप्रयाजावघातादिभिरुपकारं सं
पाद्य भावयेदित्येवं भाव्यकरणेतिकर्तव्यतासमर्पणेनाकांक्षापूर्णात्मकरणाम्नातः सकलः शब्दसंदर्भो भावनावाचिन आ
ख्यातस्यैव प्रपंचः॥ भाव्याद्यंशत्रयवतीत्येयमर्थभावनेत्युच्यते॥ सा सर्वापि शब्दभावनया भाव्या विधायको लिङादिः क
रणं अर्थवादसंपादितास्तुतिरितिकर्तव्यता॥ सेयं शब्दभावना लिङादिभिरेवावगम्यते॥ अर्थभावना तु सर्वैराख्यातप्रत्य
यैर्गम्यत इत्युक्तं॥ तस्यां चार्थभावनायां स्वर्गस्य भाव्यत्वं कामियोगादवगम्यते॥ प्रकृत्यर्थस्य करणत्वं तृतीयाश्रुत्या तथा च
श्रूयते॥ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति चित्रया यजेत पशुकाम इति तत्र च करणत्वमपूर्वकल्पनामंतरेण संभवतीत्य
भिधास्यते तस्मादाख्यातप्रत्ययांताद्धावार्थपदादपूर्वं गम्यते॥ चिंताप्रयोजनं तु पूर्वपक्षे द्रव्याद्युपचारे प्रतिनिध्यभावः सि

श्रांते तु सद्भावइति॥ ॥द्वितीयाधिकरणमारचयति॥ ॥अपूर्वसदसद्भावसंशयेसति नास्तितत्॥ मानाभावात्फलंयागात्सि
द्धं शास्त्रप्रमाण्यतः॥ क्षणिकस्यविनष्टस्यस्वर्गहेतुत्वकल्पनं॥ विरुद्धमंतरेणातुः श्रेयो पूर्वस्यकल्पनं॥ अवांतरव्यापृतिर्वा
वाक्रियायागयोच्यते॥ अपूर्वमितितद्भेदः प्रक्रियातोव गम्यतां॥ पूर्वाधिकरणेवर्णकाभ्यांयदीदमुक्तं॥ अपूर्वस्यकमेवपदप्र
त्यायकंतच्च यजेतेत्याख्यातांतंभावार्थपदमिति॥ तदनुपपन्नं अपूर्वसद्भावे मानाभावात् यजेत्याभ्यांप्रकृतिप्रत्ययाभ्यांकर
णभावनयोरभिधानात्॥ अपूर्वाभावे कालांतरभाविस्वर्गसाधनत्वं विनश्वरस्य यागस्यानुपपन्नमितिचेत्॥ नाशास्त्रप्रामा
ण्येनतदुपपत्तिरिति प्राप्तेब्रूमः॥ दर्शपूर्णमासाभ्यांइतितृतीयाश्रुत्या तावद्यागस्यस्वर्गसाधनत्वं प्रतितंपद्यथोपपद्यतेतथा
वश्यंभवतापिकल्पनीयं॥ तत्रकिंयावत्फलंयागस्यानुष्ठानंकल्प्यतेकिंवाविनष्टस्यापिस्वर्गोत्पादनं॥ नाद्यः॥ यागेक्षणिकत्व
स्यप्रत्यक्षसिद्धत्वात्नद्वितीयः॥ मृतयोर्दंपत्योः पुत्रोत्पत्त्यदर्शनात्॥ अतोमानांतरविरुद्धाद्भवदीयकल्पनादस्मदीयविरु
द्धमपूर्वकल्पनंज्यायः कल्पितेप्यपूर्वेतस्यैवस्वर्गसाधनत्वाद्यागस्यस्वर्गसाधनत्वश्रुतिर्विरुद्ध्येतितेचेत्॥ नयागावांतरव्या
पारोपूर्वमित्यंगीकारात्॥ नह्युद्यमाननिपतनयोरवांतरव्यापारयोः सत्वेपिकुठारस्यसाधनत्वमपैति॥ यदिव्यापारवा
तोयागस्यनाशेव्यापारोनतिष्ठेत्तर्हियागजन्याकाचिच्छक्तिरपूर्वमस्तुशक्तिव्यवधानेपियागस्यसाधनत्वमविरुद्धं॥ओ
दन्यव्यवहितेप्यग्नेदाहकत्वांगीकारात्॥ यथागारजन्यमौष्ण्यंशांतेप्यंगारेपुजलेनुवर्तते॥ तथायागजन्यमपूर्वंनष्टेपि
यागेकर्तर्यात्मन्यनुवर्ततां॥ तस्मादस्त्यपूर्वं तद्विशेषस्तुसंप्रदायसिद्धयाप्रक्रिययावगंतव्यतथाहि प्रक्रियापूर्वाचार्यैरित्थंदर्शि
ता॥ प्रथमंतावत्फलवाक्येनकर्मणः फलसाधनताबोध्यते॥ यागेनस्वर्गंकुर्यादिति॥ कथंविनश्वरेणफलंकर्तव्यमित्यपेक्षायां
अपूर्वरूपत्वेत्युच्यते॥ प्रथमपूर्वंक्रियतइत्यपेक्षायां यागानुष्ठानप्रकारेणेति॥ तच्चापूर्वंदर्शपूर्णमासयोरनेकविधं॥ फलापूर्वं
समुदायापूर्वमुत्पत्त्यपूर्वमंगापूर्वंचेतियेनस्वर्गआरभ्यतेतत्फलापूर्वं अमावास्यायांत्रयाणांयागानामेकः समुदायः पौर्ण
मास्यामपरस्तयोर्भिन्नकालवर्त्तिनोः संहत्यफलापूर्वारंभायोगात्तदारंभायसमुदायजन्यमपूर्वद्वयंकल्पनीयंतयोरेकैकस्या
रंभायैकैकसमुदायवर्त्तिनांत्रयाणांयागानांभिन्नक्षणवर्त्तित्वेनसंघातापत्त्यभावात् यागत्रयजन्यानित्रीण्युत्पत्त्यपूर्वाणिक
ल्पनीयानि॥ तेषांचअंगोपकारमंतरेणानिष्पत्तेरंगानांचानेकक्षणवर्त्तिनांसंघातासंभवादंगापूर्वाणिकल्पनीयानितत्रत्व

43
1945

यंविभागः॥ सन्निपत्यापकारकाण्यवघातादीनिद्रव्यदेवतासंस्कारद्वारेणयागस्वरूपस्यैवातिशयाधानेनतदुत्पत्त
पूर्वनिष्पत्तौव्याप्रियंतेतद्द्वारेणफलापूर्वे॥ आरादुपकारकाणिप्रयाजादीनित्वुत्पत्त्यपूर्वेभ्यः फलपूर्वनिष्पत्तौसाक्षादे
वव्याप्रियंते॥ एवंप्रकारभेदेसत्यपिसर्वाण्यंगान्यपूर्वनिष्पत्तावनुग्राहकान्युत्पत्यंगरूपेणेत्थंभावेनस्वीक्रियंतेअनयैवदि
शासर्वत्रापूर्वप्रक्रियावगंतव्या॥ ॥अत्रगुरुमतमाह॥ ॥यागक्रियासूक्ष्मरूपापरमाणवात्मसंश्रिता॥ यावत्फलंनियो
गाख्यंनापूर्वमितिचेन्नतत्॥ मानहीनंक्रियासौक्ष्म्येनियोगस्तुलिंगादिनाअभिधेयः पृथक्त्वभावादपूर्वकार्यमस्यतः
गुरुणायन्नियोगाख्यमपूर्वमभिप्रेयतेतन्नास्तिकुतः अंतरेणतदपूर्वंफलनिष्पत्तेनचयागनाशात्कथंफलसिद्धिरितिवा
च्यंनहियागक्रियासर्वात्मनानश्यतिकिंतुसूक्ष्मरूपत्वेनादृश्यासतीस्वर्गदेहारंभकेषुयागसंबंधिद्रव्यगतपरमाणुषुयाग
कर्तर्यात्मनिचावरुध्यफलमारभतइतिपूर्वः पक्षः नैतद्युक्तं॥ उक्तेर्थेप्रमाणाभावात् नचनियोगोपिप्रमाणभावः शंकनी
यः वैदिकलिङादीनांतदभिधायकत्वात्॥ ततोधात्वर्थातिरिक्तंकालांतरभाविकाम्यफलसाधनमपूर्वमस्ति॥ ॥तृतीया
धिकरणमारचयति॥ ॥अवघातादिनापूर्वमुत्पाद्यंविद्यतेनवा॥ यजत्यादिवदस्त्येववाक्यवैयर्थ्यमन्यथा॥ दृष्टतुवि
मोकेनात्रपूर्वंद्रव्यतंत्रतः स्याद्यजत्रादिवैषम्यंनियमापूर्वमुद्वचः॥ दर्शपूर्णमासयोः श्रूयतेव्रीहीनवहंतितंडुलान्पिनष्टी
ति॥ तत्रावघातपेषणेअपूर्वजनकेविहितधात्वर्थत्वाद्यज्यादिधात्वर्थवत्॥ विपक्षेविधिवाक्यवैयर्थ्यरूपोबाधस्तर्कोव
गंतव्यः॥ तुषविमोकचूर्णत्वयोर्दृष्टप्रयोजनयोर्लोकसिद्धत्वेनतादर्थ्येत्वघातपेषणयोर्विधिर्व्यर्थः स्यात्॥ तस्मादस्त्यपूर्वमि
तिप्राप्तेब्रूमः॥ दृष्टफलेसंभवत्यपूर्वंनकल्पनीयं॥ यज्यादिदृष्टांतस्तुविषमः॥ तत्रक्रियाप्राधान्येनद्रव्यपारतंत्र्याभावादपू
र्वसाधनत्वंक्रियायायुक्तं॥ इहतुव्रीहीनितिकर्मकारकविभक्त्याव्रीहीणामीप्सिततमत्वेनप्राधान्यावगमाद्द्रव्यपरतंत्रोवघा
तोद्रव्यएवातिसंशयंकुर्यात्॥ नत्वपूर्वंजनयतिनचविधिवैयर्थ्यं॥ नखनिर्भेदादिनातुषविमोकसंभवेप्यवघातेनैवासोक
र्तव्यइतिधार्यं॥ नियमस्तस्यनियमस्यापूर्वहेतुत्वेनविधेयत्वात्॥ तस्मान्नास्त्यवघातादिजन्यमपूर्वं॥ ॥अत्रगुरुमतमाह
॥ ॥द्वितीयांसक्तुवद्वस्तुनियोगेन्वीयतांक्रिया॥ साक्षादितिनमंतव्यंदृष्टस्यात्रोपपत्तितः॥ सक्तून्जुहोतीत्यत्रद्रव्यप्राधा
न्यंपरित्यज्यद्वितीयायाभंगंकृत्वाक्रियाप्राधान्यायसक्तुभिर्जुहोतीतितृतीयात्वेनविपरिणामोवक्ष्यते॥ तद्याव्रीहिभिरवहं

अ० क० माला

२२

तीतिविपरीणामेण प्रधानभूतात्क्रियाद्द्रव्यव्यवधानमंतरेण साक्षादेव नियोगन्वेतव्येति चेत् मैवं॥ वैषम्यात् तत्र होमे
न सक्तुषु संस्कारो न भवति भस्मीभूतानामन्यत्र विनियोगासंभवात्॥ इत्यभिप्रेत्य संस्कारकर्मत्वं परित्यक्तं॥ इह दृष्ट
स्तु विषमोकः संस्कार उपपद्यते तु विषाणां तेषां पुरोडाशे विनियोगसंभवात्॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥
संमार्ष्टि स्रुच इत्यत्र किं प्रधानाख्य कर्मता॥ गुणकर्मत्वमथवा दृष्टाभावे वघातवत्॥ गुणत्वं न हि संभाव्यं प्राधा
न्यं तु प्रयाजवत्॥ अदृष्टकल्पनेनापि गुणत्वं स्यात् द्वितीयया॥ दर्शपूर्णमासयोर्जुह्वादीनां दर्भैः संमार्जनमाम्ना
यते स्रुचः संमार्ष्टीति॥ तत्र संमार्जनं प्रधानकर्म कुतः गुणकर्मलक्षणरहितत्वात्॥ प्रधानकर्मलक्षणयुक्तत्वा
च्च॥ सूत्रकारो हि कर्मणां राशिद्वयं प्रतिज्ञाय तयोर्लक्षणं पृथक् सूत्रयामास तानि द्वैधं गुणप्रधानभूतानि यैः कर्म
भिस्तु द्रव्यं चिकीर्ष्यते गुणद्रव्य स्तत्र प्रतीयते तस्य द्रव्यप्रधानत्वात्॥ यैस्तु द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि
द्रव्यस्य गुणभूतत्वादिति॥ यैः कर्मभिर्द्रव्यमुत्पादयितुं संस्कर्तुं चेष्यते तेषु कर्मसु गुणत्वं॥ कुतः तस्य कर्मणो द्रव्य
प्रधानत्वात् द्रव्यं प्रधानमस्येति बहुव्रीहिः यूपं तक्षत्याहवनीयमादधातीत्यादौ यूपाहवनीयादिद्रव्यमुत्पादयितु
मिष्यते॥ व्रीहीन् अवहंति तंडुलान् पिनष्टीत्यादौ व्रीह्यादिद्रव्यं संस्कर्तुमिष्टं॥ प्रयाजादिषूक्तवैपरीत्यात्प्रधानकर्मत्वं॥
एवं सत्यवघातवत् गुणकर्मत्वाभावात्॥ प्रयाजादिवत् प्रधानकर्मत्वमिति प्राप्ते ब्रूमः॥ स्रुच इति द्वितीया कर्मका
रके विहिता कर्मत्वं चेप्सिततमत्वे सति संभवति कर्तुरीप्सिततमं कर्मेति कर्मसंज्ञाविधानात्॥ क्रतुसाधनत्वेन च स्रुचा
मुक्तमीप्सिततमत्वं॥ अतः प्रधानभूताः स्रुचस्तथा सति संमार्जनक्रियायाः गुणकर्मत्वमवघातवद्भविष्यति॥
यादृष्टस्य दृष्टोतिशयो न स्यात्॥ तदा पूर्वं कल्पनीयं॥ ॥ पंचमाधिकरणमारचयति॥ ॥ प्रउगं शंसतीत्यादौ
गुणतो न प्रधानता॥ दृष्टादेव स्मृतिस्तेन गुणता स्तोत्रशस्त्रयोः॥ स्मृत्यर्थत्वे स्तोतिशंस्योर्धात्वोः श्रौतार्थबाधनं॥ श्री
तेनादृष्टमुपेत्यापि प्राधान्यं श्रूयते मतं॥ ज्योतिष्टोमे श्रूयते॥ प्रउगं शंसति निष्केवल्यं शंसति आज्यैः स्तुवते पृष्ठैः स्तु २२
वत इति प्रउगनिष्केवल्यशब्दौ शस्त्रविशेषनामनी॥ आज्यपृष्ठशब्दौ तु व्याख्यातौ॥ अप्रगीतमंत्रसाध्या स्तुतिः श
स्त्रं॥ प्रगीतमंत्रसाध्या स्तुतिः स्तोत्रं॥ तयोः स्तुतिशस्त्रयोर्गुणकर्मत्वं युक्तं॥ कुतः॥ तुषविमोकवत् दृष्टार्थत्वलाभात्॥

45
1995

पठ्यमानेषु मंत्रेषु अनुस्मरणेन देवता संस्क्रियत इति प्राप्ते ब्रूमः॥ स्तोतव्यायां देवतायां स्तावकैर्गुणैः संबंधकीर्तनं स्तोतिशं
सतिधात्वोर्वाच्योर्थः यदि मंत्रवाक्यानि गुणसंबंधाभिधानपराणि तदा धात्वोर्मुख्यार्थलाभात् श्रुतिरनुगृहीता भविष्यति॥
यदा तु गुणद्वारेणानुस्मरणीयदेवतास्वरूपप्रकाशनपराणि मंत्रवाक्यानि स्युस्तदा धात्वोर्मुख्यार्थो न स्यात्॥ लोके हि दे
वदत्तश्चचतुर्मेधाभिज्ञ इत्युक्ते स्तुतिः प्रतीयते॥ तस्य वाक्यस्य गुणसंबंधपरत्वात्॥ यदा तु देवदत्तश्चतुर्वेदाभिज्ञस्तमान
येत्युच्यते तदा स्तुतिः प्रतीयते तस्य वाक्यस्य गुणद्वारेण देवदत्तस्वरूपोपलक्षणत्वेन परगुणसंबंधपरत्वाभावात्॥ ततश्चा
ग्न्यैंद्र्वं प्रकाशयस्तेष्टैंद्र्यं प्रकाशयेदित्येवं विध्यर्थपर्यवसानाद्धात्वोर्मुख्यार्थो बाध्येत॥ ततो धातुश्रुतिमबाधितुं स्तोत्रशस्त्रयोः
प्रधानकर्मत्वमप्युपेतव्यं तत्र दृष्टप्रयोजनं नास्तीति चेत्॥ तर्ह्यपूर्वमस्तु॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ देवांश्चयाभि
र्यजत इत्याख्यातं तु मंत्रगं॥ विनायकं न चान्येन समत्वात् द्विधायकं॥ यच्छब्दादेः क्षीणशक्तिर्नविधिस्त्रिविधं लतः॥ आख्यात
मभिधानं च प्रधानगुणकर्मणी॥ अयं मंत्र आम्नायते॥ देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सहेति॥ अय
मर्थः॥ गोपतिर्यजमानो याभिर्गोभिर्देवान् यजते याश्च गाः ब्राह्मणेभ्यो ददाति चिरमेव ताभिः सह परलोके वतिष्ठत इति॥ तत्र
यथा ब्राह्मणगतमाख्यातपदं प्रधानगुणकर्मणोरन्यतरस्य विधायकं॥ तथा मंत्रगतमपीति चेन्मैवं यच्छब्दादिना विधिशक्तेः
क्षीणत्वात्॥ सति हि यच्छब्दे तस्य वाक्यस्यानुवादकत्वं प्रतीयते॥ न तु विधायकत्वं॥ यच्छब्दादेरित्यादिशब्देनोत्तमपुरुषामंत्रणा
दयः॥ बर्हिर्देव सदनं दामीत्यत्रोत्तमपुरुषः॥ अग्नीदग्नीन्विहरेत्यमंत्रणं॥ एवं ब्राह्मणेपि यस्यामयं हविरार्तिमार्छेदिंद्रं पंचदशाप्त
वं मा दर्वंनिर्वपेदित्युदाहरणीयं॥ तस्मादाख्यातस्य प्रधानकर्मविधायकत्वं गुणकर्मविधायकत्वं चेत्येवं द्वावेताववप्रकारौ न
भवतः किंत्वभिधायकत्वमप्यस्ति तृतीयप्रकारः॥ ततो मंत्रगतमाख्यातस्याविधायकत्वं॥ ॥ सप्तमाधिकरणमारचय
ति॥ ॥ अहिर्बुध्नियमंत्रम इति मंत्रस्य लक्षणं नास्त्यस्ति किं वा नास्त्येतदव्याप्त्यादेरवारणात्॥ याज्ञिकानां समाख्यानं लक्षणं
दोषवर्जितं॥ नानुष्ठानस्मारकादौ मंत्रशब्दं प्रयुंजते॥ आधाने इदमाम्नायते॥ अहिर्बुध्नियमंत्रं मे गोपायेति॥ तत्र मंत्रस्य लक्ष
णं नास्ति अव्याप्त्यतिव्याप्त्योर्वारयितुमशक्यत्वात्॥ विहितार्थाभिधायको मंत्र इत्युक्ते वसंताय कपिंजलानालभत इत्यस्य मंत्र
स्याविधिरूपत्वादव्याप्तिः॥ मननहेतुर्मंत्र इत्युक्ते ब्राह्मणेतिव्याप्तिः॥ एवमसिपदांतो मंत्र उत्तमपुरुषांतो मंत्र इत्यादिलक्षणानामपर

तीतिविपरीणामेण प्रधानभूताक्रियाद्रव्यव्यवधानमंतरेणसाक्षादेवनियोगन्वेतव्येतिचेतमेवं॥ वैषम्यात् तत्र होमे
नसक्तुषुसंस्कारोनभवतिभस्मीभूतानामन्यत्रविनियोगासंभवात्॥ इत्यभिप्रेत्यसंस्कारकर्मत्वंपरित्यक्तं॥ इह दृष्ट
स्तुविषमोकः संस्कारउपपद्यतेतुविषाणांतेषांपुरोडाशेविनियोगसंभवात्॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥
संमार्ष्टिस्रुचइत्यत्र किंप्रधानाग्व्यकर्म्मता॥ गुणकर्मत्वमथवादृष्टाभावेवघातवत्॥ गुणत्वंनहिसंभाव्यंप्राधा
न्यंतुप्रयाजवत्॥ अदृष्टकल्पनेनापिगुणत्वंस्यात्द्वितीयया॥ दर्शपूर्णमासयोर्जुह्वादीनांदर्भैः संमार्जनमाम्ना
यते स्रुचः संमार्ष्टीति॥ तत्रसंमार्जनंप्रधानकर्मकुतः गुणकर्मलक्षणरहितत्वात्॥ प्रधानकर्मलक्षणयुक्तत्वा
च्च॥ सूत्रकारोहिकर्मणाराशिद्वयंप्रतिज्ञायतयोर्लक्षणंपृथक्सूत्रयामासतानिद्वैधंगुणप्रधानभूतानियैःकर्म
भिस्तुद्रव्यंचिकीर्ष्यतेगुणद्रव्यस्तत्रप्रतीयतेतस्यद्रव्यप्रधानत्वात्॥ यैस्तुद्रव्यंनचिकीर्ष्यतेतानिप्रधानभूतानि
द्रव्यस्यगुणभूतत्वादिति॥ यैः कर्मभिर्द्रव्यमुत्पादयितुंसंस्कर्तुंचेष्यतेतेषुकर्मसुगुणत्वं॥ कुतः तस्यकर्मणोद्रव्य
प्रधानत्वात्द्रव्यंप्रधानमस्येतिबहुव्रीहिः यूपंतक्षत्याहवनीयमादधातीत्यादौयूपाहवनीयादिद्रव्यमुत्पादयितु
मिष्यते॥ व्रीहीनवहंतितंडुलान्पिनष्टीत्यादौव्रीह्यादिद्रव्यंसंस्कर्तुमिष्टं॥ प्रयाजादिषूक्तवैपरीत्यात्प्रधानकर्मत्वं॥
एवंसत्यवघातवत्गुणकर्मत्वाभावात्॥ प्रयाजादिवत्प्रधानकर्मत्वमितिप्राप्तेब्रूमः॥ स्रुचइतिद्वितीयाकर्मका
रकेविहिता कर्मत्वंचेप्सिततमत्वेसतिसंभवतिकर्तुरीप्सिततमंकर्मेतिकर्मसंज्ञाविधानात्॥ क्रतुसाधत्वेनचस्रुचो
युक्तमीप्सिततमत्वं॥ अतः प्रधानभूताः स्रुचस्तथासतिसंमार्जनक्रियायाः गुणकर्मत्वमवघातवद्भविष्यति॥
यदिस्रुक्षुदृष्टोतिशयोनस्यात्॥ तदादृष्टपूर्वंकल्पनीयं॥ ॥ पंचमाधिकरणमारचयति॥ ॥ प्रउगंशंसतीत्यादौ
गुणतोनप्रधानता॥ दृष्टादेवस्मृतिस्तेनगुणता स्तोत्रशस्त्रयोः॥ स्मृत्यर्थत्वेस्तौतिशंस्योर्धात्वोः श्रौतार्थबाधनं॥
तेनादृष्टमुपेत्यापिप्राधान्यंश्रूयतेमतं॥ ज्योतिष्टोमेश्रूयते॥ प्रउगंशंसतिनिष्केवल्यंशंसतिआज्यैस्तुवतेपृष्ठैस्तु
वतइतिप्रउगनिष्केवल्यशब्दौशस्त्रविशेषनामनी॥ आज्यपृष्ठशब्दौतुव्याख्यातौ॥ अप्रगीतमंत्रसाध्यास्तुतिःश
स्त्रं॥ प्रगीतमंत्रसाध्यास्तुतिः स्तोत्रं॥ तयोस्तुतिशस्त्रयोर्गुणकर्मत्वंयुक्तं॥ कुतः॥ तुषविमोकवत्दृष्टार्थत्वलाभात्॥

श्री
२२

45
1945

पद्यमानेषुमंत्रेषुअनुस्मरणेनदेवतासंस्क्रियतइतिप्राप्तेब्रूमः॥ स्तोतव्यायादेवतायास्तावकैर्गुणैः संबंधकीर्तनंस्तौतिशं
सतिधात्वोर्वाच्योर्थः यदिमंत्रवाक्यानिगुणसंबंधाभिधानपराणितदाधात्वोर्मुख्यार्थलाभात्श्रुतिरनुग्रहीताभविष्यति॥
यदातुगुणद्वारेणानुस्मरणीयदेवतास्वरूपप्रकाशनपराणिमंत्रवाक्यानिस्युस्तदाधात्वोर्मुख्यार्थोनस्यात्॥ लोकेहिदे
वदत्तश्चचतुर्वेदाभिज्ञइत्युक्तेस्तुतिः प्रतीयते॥ तस्यवाक्यस्यगुणसंबंधपरत्वात्॥ यदातुदेवदत्तश्चतुर्वेदाभिज्ञस्तमान
येत्युच्यतेतदास्तुतिः प्रतीयतेतस्यवाक्यस्यगुणद्वारेणदेवदत्तस्वरूपोपलक्षणत्वेनपरगुणसंबंधपरत्वाभावात्॥ ततश्चा
ग्नेर्देवंप्रकाशयेत्स्पष्टेंद्रंदेवंप्रकाशयेदित्येवंविध्यर्थपर्यवसानाद्धात्वोर्मुख्यार्थोबाध्येत॥ ततोधातुश्रुतिमबाधितुंस्तोत्रशस्त्रयोः
प्रधानकर्मत्वमभ्युपेतव्यंतत्रादृष्टंप्रयोजनंनास्तीतिचेत्॥ तर्ह्यपूर्वमस्तु॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ देवांश्चयाभि
र्यजतइत्याख्यातंतुमंत्रगं॥ विनायकंनचान्येनसमत्वात्तद्विधायकं॥ यच्छब्दादेः क्षीणशक्तिर्नविधिस्त्रिविधंततः॥ आख्यात
मभिधानंचप्रधानगुणकर्मणी॥ अयंमंत्रआम्नायते॥ देवांश्चयाभिर्यजतेददातिचज्योगित्ताभिः सचतेगोपतिःसहेति॥ अय
मर्थः॥ गोपतिर्यजमानोयाभिर्गोभिर्देवान्यजतेयाश्चगाः ब्राह्मणेभ्योददातिचिरमेवताभिः सहपरलोकेवतिष्ठतेइति॥ तत्र
यथाब्राह्मणगतमाख्यातपदंप्रधानगुणकर्मणोरन्यतरस्यविधायकं॥ तथामंत्रगतमपीतिचेन्मैवंयच्छब्दादिनाविधिशक्तेः
क्षीणत्वात्॥ सतिहियच्छब्देतस्यवाक्यस्यानुवादकत्वंप्रतीयते॥ नतुविधायकत्वं॥ यच्छब्दादेरित्यादिशब्देनोत्तमपुरुषामंत्रणा
दयः॥ बर्हिर्देवसदनंदामीत्यत्रोत्तमपुरुषः॥ अग्नीदग्नीन्विहरेत्यमंत्रणं॥ एवंब्राह्मणेपियस्योभयंहविरार्तिमार्छेदैंद्रंपंचदशश
रावमोदनंनिर्वपेदित्युदाहरणीयं॥ तस्मादाख्यातस्यप्रधानकर्मविधायकत्वंगुणकर्मविधायकत्वंचेत्येवंद्वावेतावेवप्रकारौन
भवतः किंत्वभिधायकत्वमप्यस्तितृतीयप्रकारः॥ ततोमंत्रगतमाख्यातस्याविधायकत्वं॥ ॥ सप्तमाधिकरणमारचय
ति॥ ॥ अहिर्बुध्नियमंत्रमइतिमंत्रस्यलक्षणंनास्त्यस्तिकिंवानास्त्येतदव्याप्त्यादेरवारणात्॥ याज्ञिकानांसमाख्यानंलक्षणं
दोषवर्जितं॥ नानुष्ठानस्मारकादौमंत्रशब्दंप्रयुंजते॥ आधानेइदमाम्नायते॥ अहिर्बुध्नियमंत्रंमेगोपायेति॥ तत्रमंत्रस्यलक्ष
णंनास्तिअव्याप्त्यतिव्याप्तीवारयितुमशक्यत्वात्॥ विहितार्थाभिधायकोमंत्रइत्युक्तेवसंतायकपिंजलानालभतइत्यस्यमंत्र
स्यविधिरूपत्वादव्याप्तिः॥ मननहेतुर्मंत्रइत्युक्तेब्राह्मणेतिव्याप्तिः॥ एवमसिपदांतोमंत्रउत्तमपुरुषांतोमंत्रइत्यादिलक्षणानांपर

स्यरमव्याप्तिरितिचेत॥ मैवं॥ याज्ञिकसमाख्यानस्यनिर्दोषलक्षणत्वात॥ तच्चसमाख्यानमनुष्ठानस्मारकादीनां मंत्रत्वं गमयति॥
उरुप्रथस्वेत्यादयोनुष्ठानस्मारकाः॥ अग्निमीळे पुरोहितमित्यादयस्स्तुतिरूपा इषेत्वेत्यादयस्त्वांगताः॥ अग्नआयाहिवीतयइत्या
दयः आमंत्रणोपेताः॥ अग्नीदग्नीन्विहरेत्यादयः प्रैषरूपाः॥ अधःस्विदासीदुपरिस्विदादयोविचाररूपाः॥ अंबेअंबाल्यंबिकेनमा
नयतिकश्चनेत्यादयः परिदेवनरूपाः॥ पृच्छामित्वापरमंतं पृथिव्यादयः इत्या प्रश्नरूपाः वेदिमाहुः परमंतं पृथिव्याइत्यादयउत्तर
रूपाः एवमन्यदप्युदाहार्यम्॥ ईदृशेष्वत्यंतविजातीयेषु समाख्यानमंतरेण नान्यः कश्चिदनुगतोधर्मोस्ति यस्यलक्षणत्वमुच्येत लक
्षणस्यापयोगः पूर्वाचार्यैर्दर्शितः॥ ऋषयोपिपदार्थानांनांतं यांति पृथक्कृशः॥ लक्षणेन तु सिद्धानामंतं यांति विपश्चितः॥
इतितस्मादभियुक्तानां मंत्रोयमिति समाख्यानं लक्षणं॥ ॥अष्टमाधिकरणमारचयति॥ ॥ नास्तीतत्ब्राह्मणस्यत्र लक्षणं
विद्यतेथवा॥ नास्तीयंतोवेदभागाइतिक्लृप्तेरभावतः॥ मंत्रश्चब्राह्मणं चेतिद्वौभागौतेन मंत्रतः॥ अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्म
णलक्षणं॥ चातुर्मास्येष्विदमाम्नायते॥ यद्ब्राह्मणान्येवपंचहवींषीति॥ तत्रब्राह्मणस्यलक्षणंनास्तिकुतः वेदभागानामियत्तान
वधारणेनब्राह्मणभागेष्वन्यभागेचलक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वात्पूर्वोक्तोमंत्रभागस्तु भागांतरणिका
निचित्पूर्वैरुदाहर्तुं संगृहीतानि॥ हेतुर्निर्वचनं निंदाप्रशंसासंशयोविधिः॥ परक्रियापुराकल्पोव्यवधारणकल्पनेति॥ तेनह्यन्नंक्रि
यतइतिहेतुः॥ तद्दध्नोदधित्वमितिनिर्वचनं॥ अमेध्यावैमाषाइतिनिंदा॥ वायुर्वैक्षेपिष्ठादेवतेतिप्रशंसा॥ तद्व्यचिकित्सन् जुहवानी३
होषा३मितिसंशयः॥ यजमानेनसंमितौदुंबरीभवतीतिविधिः॥ माषानेवमह्यंपचतेतिपरकृतिः पुराब्राह्मणा अभैषुरितिपुराकल्पः
यावतोश्वान्प्रतिगृह्णीयात तावतोवारुणान्चतुष्कपालान्निर्वपेदितिविशेषावधारणकल्पना॥ एवमन्यदप्युदाहार्यं न च हेत्वादी
नीमन्यतमंब्राह्मणमितिलक्षणं मंत्रेष्वपिहेत्वादिसद्भावात्॥ इंदवोवामुशंतिहीतिहेतुः॥ उदानिषुर्महीरितितस्मादुदकमुच्यतइति
निर्वचनं॥ मोघमन्नंविंदतेअप्रचेताइतिनिंदा॥ अग्निर्मूर्धादिवः ककुत्पतिरितिप्रशंसा अधःस्विदासीदितिसंशयः॥ कपिंजलाना
लभेतइतिविधिः॥ सहस्रमयुतंददामीतिपरकृतिः॥ यज्ञेनयज्ञमयजंतदेवाइतिपुराकल्पः॥ इतिकरणबहुलं ब्राह्मणमितिचेत॥ न॥
इत्यददाइत्ययजथाइत्यपचइतिब्राह्मणागायेदित्यस्मिन् ब्राह्मणेनगातव्यमंत्रेतिव्याप्तेः॥ इत्याहेत्यनेनवाक्येनोपनिबद्धं ब्राह्म
णमितिचेत॥ न॥ राजाचिद्यंभगंभक्षीत्याह॥ योवारक्षाःशुचिरस्मीत्याहेत्यनयोर्मंत्रयोरतिव्याप्तेः आख्यायिकारूपं ब्राह्मणमिति

47
1945

चेन्न॥ यमयमीसंवादसूक्तादावतिव्याप्तेस्तस्मान्नास्तिब्राह्मणस्यलक्षणमितिप्राप्तेब्रूमः॥ मंत्रब्राह्मणरूपौद्वावेववेदभागावि
त्यंगीकारान्मंत्रलक्षणस्य पूर्वमभिहितत्वादवशिष्टोवेदभागोब्राह्मणमित्येतल्लक्षणंभवति॥ ॥नवमाधिकरणमारचयति॥ ॥ऊह
प्रवरनाम्नां किंमंत्रतास्त्यथवानहि॥ मंत्रास्तदेकवाक्यत्वात् नतल्लक्षणवर्जनात॥ अग्नयेजुष्टंनिर्वपामीत्यस्यसौर्येचरौसूर्यायजु
ष्टंनिर्वपामीत्येवंपदांतरप्रक्षेपऊहः॥ अदीक्षिष्टायंब्राह्मणइत्यस्यमंत्रस्यशेषत्वेन प्रयोगकालेब्राह्मणनामधेयविशेषंतदीय
प्रवरंचैवपठंति असौदेवदत्तोमनुष्यपुत्रोमनुष्यनप्तेतिअमुष्याः पुत्रोमनुष्याः पुत्रोमनुष्यानप्तेतिआंगिरसबार्हस्पत्यभारद्वा
जगोत्रइतिचैतेषामूहप्रवरनामधेयानां मंत्रत्वमस्ति॥ कुतः मंत्रेणसहैकवाक्यत्वादितिचेत॥ मैवं॥ याज्ञिकप्रसिद्धरूपस्यमंत्र
लक्षणस्यतेष्वभावात॥ नह्यध्येतारऊहादीन्मंत्रकांडेधीयते॥ तस्मान्नास्तिमंत्रत्वं॥ ॥ दशमैकाधिकरणमारचयति॥ ॥तत
द्वादशाधिकरणमारचयति॥ ॥ नर्क्सामयजुषांलक्ष्मसांकर्यादितिशंक्यते॥ पादाश्चगीतिः प्रश्लिष्टपाठइत्यस्यसंकरः॥ इ
दमाम्नायते॥ अहेर्बुध्निय मंत्रं मे गोपायय मृषयस्त्रैविदाविदुः॥ ऋचः सामानियजूंषीति॥ त्रीन्वेदान्विदंतीतित्रिविदः त्रिवि
संबंधिनोध्येतारस्त्रैविदास्तेचमंत्रभागमृगादिरूपेणत्रिविधमाहुः॥ तं गोपायेतियोजना॥ तत्रत्रिविधानामृक्सामयजुषांव्य
वस्थितंलक्षणंनास्तिकुतः॥ सांकर्यस्यदुष्परिहरत्वात॥ अध्यापकप्रसिद्धेषुऋग्वेदादिषुपठितोमंत्रऋगादिः इतिलक्षणव्यक्त्य
तच्चसंकीर्णं देवोवः सवितोत्पुनात्वच्छिद्रेण पवित्रेणवसोः सूर्यस्यरश्मिभिरित्ययंमंत्रोयजुर्वेदे संप्रतिपन्नयजुषांमध्येपठितः नत
स्ययजुष्ट्वमस्ति नतब्राह्मणेसावित्र्याऋचाइतिऋक्त्वेनव्यवहृतत्वात॥ एतत्सामगायन्नास्तइतिप्रतिज्ञायकिंचित्सामयजुर्वेदेगीतं
अक्षितमस्यच्युतमसिप्राणसंशितमसीतित्रीणियजूंषिसामवेदसमाम्नातानितथागीयमानस्यसाम्नआश्रयभूताऋचः सामवे
दसमाम्ना तानितथागीयमानस्यसाम्नआश्रयभूता ऋचः सामवेदसमाम्नायंतेतस्मान्नास्तिलक्षणमितिचेत॥ न॥ पादादीनाम
संकीर्णलक्षणत्वात॥ पादेनार्धेनचोपेताहत्तबद्धामंत्राऋचः॥ गीतिरूपाः मंत्राः सामानिरत्नगीतिवर्जितत्वेनप्रश्लिष्टपठितामंत्राय
जूंषित्येकैकेनक्वापिसंकरः॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥ प्रोक्षणीरासादयेतिनिगदस्त्रिविधाद्बहिः॥ यजुर्वायस्त
द्धर्मस्यभेदादस्यचतुर्थता॥ परप्रत्यायनार्थत्वादुच्चैस्त्वंयजुरेवसः॥ तल्लक्षणेनयुक्तत्वात्त्रैविध्यमितिसुस्थितं॥ प्रोक्षणीरासा
दयध्मावर्हिरुपसादयअग्नीदग्नीन्विहरबर्हिस्तृणीहिइंद्रआगच्छेत्यादयोनिगदाआम्नाताः परप्रत्यायनार्थमंत्रानिगदाएतेच

पूर्वोक्तेभ्य ऋग्यजुःसामभ्यो बहिर्भूतास्त्वचतुर्थप्रकाराः कुतः पादगीत्योर्ऋक्सामलक्षणयोरभावात् प्रश्लिष्टपाठस्य यजुर्लक्ष
णस्य सत्त्वेपि धर्मभेदेन यजुष्ट्वे तदभावानुपपत्तेः उपांशु यजुषा उच्चैर्निगदेनेति धर्मभेदः इति प्राप्ते ब्रूमः॥ बहिर्ब्राह्मणाभोज्यं तां प
रिव्राजकास्त्वेतद् इत्यत्र सत्यमेव परिव्राजकानां ब्राह्मण्ये पूजानिमित्तो विशेषो यथा॥ तथा निगदानां यजुर्लक्षणापतत्वेन यजुषा
मेव सतां परप्रत्ययननिमित्त उच्चैस्त्वधर्मस्ततो मन्त्राणां त्रैविध्यं सुस्थितं॥ ॥ चतुर्दशाधिकरणमारचयति॥ ॥ देवस्यत्वे
ति वाक्यस्य भिन्नत्वमथवैकता॥ एकप्रयोजकस्यात्र दुर्बोधत्वेन भिन्नता॥ विभागे सति साकांक्षस्यैकार्थत्वं प्रयोजकं॥ तस्मादा
क्यैक्यमेतेन यजुरंतावधार्यते॥ दर्शपूर्णमासयोराम्नायते॥ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अग्नये जु
ष्टं निर्वपामीति॥ तत्र वाक्यानि भिन्नानि भवितुमर्हंति॥ कुतः एकनियामकस्य दुर्बोधत्वात्॥ अर्थैक्यं वाक्यैक्यप्रयोजकमिति
चेत्॥ न॥ एकस्मिन् पदे तिव्याप्तेः पदसमूहस्य वाक्यत्वे समभिहितामर्थबहुत्वसंभवाद्वाक्यभेद इति चेत्॥ मैवं॥ यद्विभागे सा
कांक्षमविभागे चैकार्थं तदेकं वाक्यमिति प्रयोजकस्य बोद्धुं शक्यत्वात्॥ विभागे साकांक्षमित्युक्ते अतिव्याप्तिः स्यात्॥ स्योनं ते स
दनं करोमि घृतस्य धारया सुशेवं कल्पयामीति॥ तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इत्यत्र तस्मिन्नित्यादि
पदसमूहस्य विभागे सति प्रकृतवाचितच्छब्दार्थनिर्णयाय पूर्वपदसमूहसाकांक्षत्वमस्ति॥ अतस्तद्व्यवच्छेत्तुमेकार्थमित्युच्य
ते॥ नहि तत्रैकार्थत्वमस्ति॥ पूर्वसमूहस्य सदनकरणमर्थ उत्तरसमूहस्य पुरोडाशप्रतिष्ठापनं॥ स्योनं समीचीनं सुशेवं सुष्टु सेवि
तुं योग्यं मेध सारभूत पुरोडाशेत्यर्थः॥ अत्र द्वयोः समूहयोर्वाक्यद्वयत्वमुभयवादिसिद्धं॥ तदेकार्थमित्यनेन व्यावर्त्यते॥ एका
र्थमित्युक्ते तिव्याप्तिः स्यात्॥ भगो वां विभजतु पूषा वां विभजतु इत्यत्रानयोर्विभजनमंत्रत्वेन संमतयोः पदसमूहयोस्तात्पर्यविष
यस्य द्रव्यभागरूपस्यार्थस्यैकत्वात्॥ तद्व्यवच्छेत्तुं विभागे साकांक्षमित्युक्तं प्रकृते त्वग्नये जुष्टमित्यादि समूहे पृथक्कृते पूर्वो देवस्य
त्वेति समूहः साकांक्षो भवति एकीकृते तु कृत्स्नस्यैकत्वनिर्वापोर्थः॥ एतेनैकवाक्यत्वनिर्णयेनानियतपरिमाणस्य यजुषोवसानं
निश्चेतुं शक्यं॥ ॥ पंचदशाधिकरणमारचयति॥ ॥ ईषेत्वादिर्मंत्र एको भिन्नो वैकः क्रियापदे॥ असत्यार्थस्मारकत्वा
दे कादृष्टस्य कल्पनात्॥ छेदने मार्जने चैतौ विनियुक्तौ क्रियापदे॥ अध्याहृते स्मारकत्वान्मंत्रभेदोर्थभेदतः॥ ईषेत्वोर्जेत्वेति श्रूय
ते॥ सोयं पदसमुदाय एको मंत्रः॥ अस्य मंत्रस्यादृष्टार्थत्वेन एकस्यैवादृष्टस्य कल्पने लाघवात्॥ न चोरुप्रथस्वेत्यादिमंत्रवदनुष्ठे

49
1945

यार्थस्मारकत्वं भवति॥ क्रियापदाभावेन तदर्थप्रतीत्यसंभवादिति प्राप्ते ब्रूमः॥ इषेत्वेति छिनत्ति ऊर्जेत्वेत्यनुमार्ष्टीति पलाशशा
खायाः छेदनमार्जनयोरेतौ विनियुक्तौ ततस्तदनुसारेण छिनद्मि अनुमार्ज्मीत्येवं क्रियापदेध्याहृते सत्यनुष्ठेयार्थस्मारक
त्वात्॥ अर्थभेदेन वाक्यभेदाद्यजुर्मंत्रभेदः॥ इषइष्यमाणायान्नाय भोः पलाशशाखे त्वां छिनद्मि ऊर्जे रसाय बलाय त्वा
मनुमार्ज्मीत्यर्थभेदः एवं आयुर्यज्ञेन कल्पतां इत्यादौ क्ळृप्तिसामान्यरूपस्यार्थस्यैकत्वेप्यायुरादिभिर्भिन्नत्वात्॥ अर्थभेदवा
क्यभेदयोः स्पष्टत्वात्॥ क्ळृप्तीर्वाचयतीति क्ळृप्तिबहुत्वस्यादितत्वाच्च यजुर्भेदो द्रष्टव्यः॥ ॥ षोडशाधिकरणमारचयति॥
॥ ॥ याते अग्ने रजेत्यध्याहारो यद्वानुषंजनं॥ तनुरित्यन्यशेषत्वादध्याहारोत्र लौकिकः॥ वेदाकांक्षां पूरणीया वेदेनेत्यनु
षंजनं॥ अन्यशेषोपि बुद्धिस्थो लौकिकस्तु न तादृशः॥ ज्योतिष्टोमे उपसद्धोमेष्वेवमाम्नायते॥ याते अग्ने याशया तनूर्वर्षिष्ठा
गह्वरेष्ठा उग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा॥ याते अग्ने रजःशया याते अग्ने हराशयेतीति॥ अयमर्थः॥ ॥ अय
सा रजते नहिरण्येन च निर्मिता आग्नेस्तिस्र स्तनवस्ता स्वाध्याये यमुक्तास्तनूः सातिशयेन प्रसद्धा गह्वरे तीक्ष्णद्रव्ये लोहे वा
स्थिता तया तन्वा स्वकृत्विपासे उपपातकं वीरहत्यादि महापातकं च हतवानस्मीति तथा च ब्राह्मणं॥ उग्रं वचो अपावधीं त्वेषं वचो
अपावधीं स्वाहेति॥ अशनयापिपासे ह वा उग्रं वचः॥ एनश्च वैरहत्यं च त्वेषं वच इति॥ तत्र स्वाहांतः प्रथमो मंत्रः॥ संपूर्णवाक्य
त्वान्निराकांक्षः॥ द्वितीयस्तृतीयमंत्रयोराकांक्षां पूरयितुं उचितो लौकिको वाक्यशेषोध्याहर्तव्यः॥ नहि तनूर्वर्षिष्ठेत्यादि भाग
स्तयोरन्वेतुं योग्यस्तस्य प्रथममंत्रशेषत्वादिति प्राप्ते ब्रूमः॥ वैदिकयोर्मंत्रयोराकांक्षा वैदिकेनैव वाक्यशेषेण पूरणीया ततस्त
नूर्वर्षिष्ठेत्यादिभाग उत्तरमंत्रयोरनुषज्यते॥ यद्यप्यसावन्यशेषस्तथापि बुद्धिस्थः सन् कल्पनीयादध्याहारात्सन्निकृष्यते॥ तस्मा
दनुषंगः कर्तव्यः॥ ॥ सप्तदशाधिकरणमारचयति॥ ॥ नानुषंगोनुषंगो वाच्छिद्रेणेत्यस्य शेषिणो॥ चित्पतिस्त्वेत्यनाकांक्षावतो
नात्रानुषज्यते॥ करणत्वं क्रियापेक्षं क्रिया चैका पुनात्विति॥ मंत्रत्रये तस्तद्द्वारात्सर्वशेषोनुषज्यते॥ ज्योतिष्टोमे दीक्षाप्रकरणे प
ठ्यते॥ चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति॥ तत्र तृती
यमंत्रशेषोच्छिद्रेणेत्यादि भागः प्रथमद्वितीयमंत्रयोर्नानुषज्यते॥ कुतः निराकांक्षत्वात्॥ नहि चित्पतिस्त्वा पुनातु वाक्प
तिस्त्वा पुनात्विति इत्यनयोः शेषिणोः संपूर्णवाक्ययोः काचिच्छेषाकांक्षास्तीति प्राप्ते ब्रूमः॥ माभूच्छेषिणोराकांक्षा॥ तथापि शेष

स्याकांक्षास्ति पवित्रेण रश्मिभिरित्युक्तं करणत्वं हि क्रियामपेक्षते क्रिया च पुनास्त्वित्येषा त्रिष्वपि मंत्रेष्वेकात तया क्रियायासं
बंधः शेषः॥ क्रियाद्वारात्तृतीयमंत्रे निरपेक्षेपि यथान्वेति तथा पूर्वयोरप्यन्वेतुमर्हतीति तस्मादस्त्वनुषंगः॥ ॥अष्टादशाधि
करणमारचयति॥ ॥गछतामितिशब्दस्यानुषंगोस्ति न वोपरि॥ संयज्ञपतिरित्यत्र योग्यत्वात्सोस्ति पूर्ववत्॥ तदेकवचनं मध्ये
मंत्रे गानीत्यनेन नहि॥ नान्वेतितद्व्यवायेन नोपर्यप्यनुषज्यते॥ अग्नीषोमीय पशौ श्रूयते॥ संते वायुर्वातेन गछतां संयजत्रैरंगानि
संयज्ञपतिराशिषेति॥ अयमर्थः॥ भोः पशो तव प्राणो वायुर्बाह्यवायुना संगछतां तव द्रूदयाद्यंगानि यागविशेषैः संयुज्यतां॥
यज्ञपतिराशिषा संयुज्यतामिति॥ तत्र यज्ञपतिरित्यस्मिन्तृतीये मंत्रे सतित्युपसर्गस्य क्रियापदाकांक्षत्वात्प्रथममंत्रगतस्य
गछतामितिपदस्यएकवचनांतस्य यज्ञपतिशब्देनान्वेतुं योग्यत्वात् पूर्ववत्॥ बुद्धिस्थत्वेन संनिहितत्वात्॥ आकांक्षासंनि
धियोग्यतानां सद्भावेन क्रियापदमनुषज्यत इति प्राप्ते ब्रूमः॥ मध्यममंत्रे बहुवचनांतेनागानीत्यनेनान्वेतुमयोग्यत्वात्तद्व्यवा
येन बुद्धिसांनिध्याभावान्नास्त्यनुषंगः॥ ततो द्वितीयतृतीयमंत्रयोर्यथोचितं वाक्यशेषोध्याहर्तव्यः॥ ॥ इति श्रीमाधवी
ये जैमिनीन्यायमालाविस्तरे द्वितीयाध्यायस्य प्रथमः पादः समाप्तः॥ ॥१॥ द्वितीयपादस्य प्रथमाधिकरणमारचयति
॥ ॥ ददाति यजतीत्यादौ भावनैक्यमुतान्यता॥ आख्यातैक्यात्तदेकत्वं धातुभेदो प्रयोजकः॥ धातुभेदेन भिन्नत्वमाख्यातेष्व
यते ततः॥ उत्पत्त्येकानुरक्तत्वाद्विद्यंते भावनामिथः॥ इहैकप्रकरणगतान्यपर्यायधातुनिष्पन्नान्याख्यातानि यजति ददाति
जुहोतीत्युदाहरणं तानि चैवं श्रूयंते सोमेन यजेत हिरण्यमात्रेयाय ददाति दाक्षिणानि जुहोतीति तेषु भावनावाच्चिन आख्यातप्र
त्ययस्यैकत्वात् भावनायाएकत्वं युक्तं॥ न च धातुभेदाद्भावनाभेदः॥ तद्वाचित्वाभावेन धातोः तस्यां प्रयोजकत्वादिति प्राप्ते ब्रू
मः॥ अस्त्वाख्यातमेव भावनायाः प्रयोजकं तच्चाख्यातं प्रतिधातु भिन्नं॥ न हि बहूनां धातूनामुपर्येक आख्यातप्रत्ययः श्रूय
ते नापि व्याकरणे धातुसमूहादेकमाख्यातं विहितं तत आख्यानां बहूनामेकैकधातुविशेषानुरक्तत्वेनैवोत्पन्नानां भावनावाचि
त्वेन यागदानहोमभावनाः परस्परं भिद्यंते॥ अत्र गुरुमतमाह॥ ॥ नियोगैकत्वतः शास्त्रमभिन्नमिति चेन्न तत्॥ धातुभेदा
च्छास्त्रभेदो नियोगोपि भिद्यते बलात्॥ कर्मभेदचिंतानाध्यायार्थः॥ किंतु शास्त्रभेदचिंतेति गुरोर्मतं॥ यत्र यजेत दद्यात् जुहु
यादित्येतेषु लिङ्प्रत्ययवाच्यस्य नियोगस्यैकत्वात् धातूनां नियोगवाचकत्वाभावेनाप्रयोजकत्वादेकनियोगार्थं कृत्स्नं शास्त्र

मेकमिति पूर्वः पक्षः॥ प्रतिधातु लिङ्प्रत्ययस्य हेतुत्वाभिन्नत्वाद्धात्वर्थानुबंधभेदेन तद्विशिष्टे नियोगेपि भेदस्य वारयितुम
शक्यतया नियोगानुसारिशास्त्रं भिन्नमिति राद्धांतः॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ समिधो यजतीत्यादावेक
त्वमुत भिन्नता॥ धातुप्रत्यययोरैक्यादेकत्वं भिन्नता कुतः॥ अभ्यासात्कर्मभेदोत्र नामत्वान्न विधिर्गुणे॥ विधीयत्वं श्रुति
तो भाति सन्निधेरनुवादता॥ दर्शपूर्णमासयोः श्रूयते॥ समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाका
रं यजतीति तत्र पंचकृत्वः श्रूयमाणे यजतिपदे पूर्वोक्तेषु यजति ददातीत्यादिपदेष्विव धातुभेदो नास्ति येन भावनाभेदः आशंक्य
ते तस्मादाख्यातैक्यमनिवार्यमिति चेत् मैवं॥ यजतिपदाभ्यासेन कर्मभेदावगमात्॥ कर्मैकत्वे त्वभ्यासे निरर्थः स्यात्॥ अ
थोच्येत समिधो यजतीत्यनेन प्रथमश्रुतेन वाक्येन विहितं समिन्नामकयागमुपरितनैश्चतुर्भिर्यजतिपदैरनूद्यते न नपादादयो
देवता नूपाद्रव्यरूपा वा गुणाश्चत्वारो विकल्पिता विधीयंते॥ ततोनुवादार्थत्वान्नाभ्यासवैयर्थ्यमिति॥ तन्न॥ तनूनपादादिश
ब्दानां यागनामत्वेन विधित्वाभावात्॥ न तावदत्र देवताविधिश्चतुर्थ्यंतद्धितयोरश्रवणात्॥ नापि द्रव्यविधिस्तृतीयांतत्वाभा
वात् ततोग्निहोत्रं जुहोतीत्यादाविव द्वितीयांतानां युक्तं नामत्वं॥ यच्चैतुर्वर्णामुपरितनानां यजतिपदानामनुवादकत्वमिति तदसत्॥ पु
तेषां विधायकत्वात्॥ यथा समिधो यजतीत्यत्र यजतिपदे विधित्वं श्रुत्या प्रतीयते न तथान्येष्वपि चतुर्षु पदेषु विधित्वं श्रौतमनु
वादकत्वं तु पुरोवादरूपस्य समिधो यजतीत्यस्य सन्निधिनावगम्यते॥ सन्निधिश्च श्रुतेर्दुर्बलः विधित्वे तु पूर्ववाक्यविहितस्य स
मिन्नामकस्य यागस्य पुनर्विधानायोगात्॥ तनूनपादादिनामकानि यागांतराणि विधीयंते॥ नन्वेवं सति संज्ञाभेदात् कर्मभे
दः संपद्यते न त्वभ्यासात्॥ तथा सति वक्ष्यमाणाधिकरणेन संकीर्यते॥ मैवं॥ वैषम्यात्॥ अथैष ज्योतिरित्यस्मिन् वक्ष्यमाणो
दाहरणे यागावगमात्॥ प्रागेव संज्ञात्वावगमात् संज्ञायाः कर्मभेदहेतुत्वं इह तु विधायकैर्यजतिपदैर्यागेष्ववगतेषु भेदेनाभ्यासाव
गते भिन्नानां यागानां समित्संज्ञायाः अन्याः संज्ञाश्चापेक्षिता इति तनूनपादादीनां संज्ञात्वं पश्चादवगम्यते॥ तस्मादभ्यास एवात्र
भेदहेतुः॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ एवं विद्वान् पौर्णमासीममावास्यामितीरितं॥ कर्माप्युत पूर्वोक्तसमुदायानुवा
दकं॥ कर्मांतरं स्यादभ्यासाद्वैवं द्रव्यं हि देवता॥ वार्तघ्नात्यादितो लभ्यानुवादस्तु न युज्यते॥ वार्तघ्नीत्याज्यभागांगव्यवस्थोक्तेर्न
देवता॥ पौर्णेत्यनूद्यते पौर्णमासीयुक्तं त्रिकं तथा॥ अमेत्यपि समूहस्याद्विलसिद्धिः प्रयोजनं॥ सहस्थितिः पौर्णमास्यामित्युक्ति

57
1945

भ्यांत्रिकेत्रिके॥ विद्वद्वाक्येविधौविध्यावृत्तिराग्नेयकादिना॥ विहितस्य फलित्वेन प्राधान्यमितरे गुणाः॥ इदमाम्नायते॥ य
एवंविद्वान् पौर्णमासीं यजते यएवंविद्वानमावास्यां यजत इति॥ अत्र यजतिना कर्मांतरं विधीयते॥ न तु प्रकृता आग्नेयादयः
षाड्यागा अनूद्यंते॥ आग्नेयादयः स्वकालसंयुक्तास्तस्मिन् प्रकरण एवमाम्नायंते॥ यदाग्नेयोष्टाकपालोमावास्यायां
च पौर्णमास्यां चाच्युतो भवतीति॥ तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्निति ताभ्यामेतमग्नीषोमीयमे
कादशकपालं पौर्णमासे प्रायच्छदिति॥ ऐंद्रं मध्वमावास्यायामिति॥ ऐंद्रं पयोमावास्यायामिति च एतेभ्यः प्रकृतेभ्यः ष
ड्भ्य आग्नेयादिभ्यो विद्वद्वाक्यविहितस्य कर्मणोन्यत्वे सति पूर्वाधिकरणन्यायेन विध्यभ्यासउपपद्यते॥ न च कर्मांतरे द्र
व्यदेवतयोरभावः ध्रौवाज्यसद्भावात्॥ अत एवोक्तं॥ ध्रौवं साधारणं द्रव्यं देवता मांत्रवर्णिकी॥ रूपवंतौ ततो यागौ विधी
येते पृथक्तयेति॥ सर्वस्मैवा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति ध्रौवस्य साधारणत्वं श्रुतं॥ देवतायां मांत्रवर्णि
कत्वमित्थमुन्नेतव्यं॥ तस्माद्वार्त्रघ्नी पौर्णमास्यामनूच्येते॥ वृधन्वती अमावास्यायामिति॥ वार्त्रघ्नोवृधन्वत्योश्च योः क
मेण कालद्वयोपेते कर्मणी विधीयेते॥ तत्राग्निर्वृत्राणि जंघनदिति॥ एवो वार्त्रघ्नो मंत्रः॥ अग्निर्वृत्राणि जंघनत्॥ द्रविणस्यु
र्विपन्यया॥ समिद्धः शुक्र आहुतः॥ जुषाणो अग्निराज्यस्य वेतु त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा॥ त्वं भद्रो असि क्रतुः
॥ जुषाणः सोम आज्यस्य हविषो वेत्वित्यस्य परस्तयोरुक्ताव ग्नीषोमौ पौर्णमासीदेवता॥ अवमं नेरोतं माम्नातयोर्वृधन्वतु
युक्तमंत्रयोरुक्तावग्नीषोमाव मावास्यादेवताताभ्यां द्रव्यदेवताभ्यां रूपवत्वात् यागांतरमत्र विधीयते॥ षड्यागानुवेदत्वेत
दनुवादेन विधीयांतरस्य कस्यचिदर्शनाद्विद्वद्वाक्यमनर्थकं स्यात्॥ न केवलं तदानर्थक्यं किंतु पौर्णमास्यां पौर्णमास्या य
जेत॥ अमावास्यायां अमावास्यया यजेतेत्येतदपि व्यर्थं स्यात्॥ न चैतत्कालविधायकं॥ यदाग्नेय इत्याद्युत्पत्तिवाक्यैरे
वतद्विधानात्॥ कर्मांतरत्वं तु कालं विधास्यतितस्मात्कर्मांतरविधिरितिप्राप्तेब्रूमः॥ अस्तां तावतद्द्रव्यं॥ देवतानुविधि
त्सितस्य कर्मांतरस्य सर्वथा न लभ्यते वार्त्रघ्नोर्वृधन्वत्योश्चाज्यभागदेवताप्रतिपादकत्वात्॥ होत्रे मंत्रकांडे समिधेनी
रावाहननिगदप्रयाजमंत्रांश्चाम्नाय प्रयाजानंतरभाविनोराज्यभागयोः क्रमेण वार्त्रघ्नौ वृधन्वत्यौ चाम्नाते॥ लिंगं चा
ग्निविषयं सोमविषयं च तत्रोपलभ्यते॥ ततो लिंगक्रमाभ्यामाज्यभागविषयत्वमवगम्यते॥ यत्तु वार्त्रघ्नी पौर्णमास्यां

53
1945

इत्यादिवाक्यं तल्लिंगक्रमक्लृप्तयोराज्यभागांगयोर्मंत्रयुगलयोः कालद्वयव्यवस्थामाचष्टे॥ न तु नूतनकर्मांगतां तयोर्वि
दधाति॥ अतो रूपराहित्याद्विद्वद्वाक्यं कर्मांतरविधायकं न भवति किं तर्हि पूर्वप्रकृतेष्वाग्नेयादिषु षट्सु त्रिकद्वयोर्द्वौ समुदाया
वनुवदति॥ न च कालवाचिभ्यां पौर्णमास्यमावास्याशब्दाभ्यां यागानुवादानुपपत्तिः॥ तत्तत्कालविहितयोर्यागत्रिकयोरुप
लक्षितत्वात्॥ न चानुवादो व्यर्थः॥ समुदायद्वित्वसिद्धेस्तत्र प्रयोजनत्वात्॥ तस्मिंश्चैव दर्शपूर्णमासाभ्यां स्वर्गकामो यजे
तेत्यस्मिन् फलवाक्ये षड्यागविवक्षयाद्विवचननिर्देश उपपद्यते॥ यदप्युक्तं॥ अनुवादपक्षे पौर्णमास्यामित्यादिवाक्यं वैयर्थ्य
मिति तदयुक्तं॥ कालविधानासंभवेप्येकैकस्य त्रिकस्य सहप्रयोगविधानात्॥ आग्नेयोपांशुयाजाग्नीषोमीयाणां त्रयाणां पौ
र्णमासीकालविहितानां सहप्रयोगः॥ पौर्णमास्येत्यनेन तृतीयैकवचनांतेन विधीयते॥ एवमितरत्रापि॥ ननु विद्वद्वाक्यस्य क
र्मांतरविधायकत्वाभावेपि नानुवादकत्वं॥ तस्य यागविधायकत्वाभ्युपगमात्॥ आग्नेयोष्टाकपाल इत्यादिवाक्यानि विहितया
गानुवादेन द्रव्यदेवतालक्षणगुणविधायकानीति चेत् न॥ तथा सत्येकेन वाक्येनानेकगुणविध्यसंभवात्प्रतिगुणं पृथग्विधौ
विध्यावृत्तिः प्रसज्येत॥ आग्नेयादिवाक्यानां विधायकत्वे तु विशिष्टविधित्वात्॥ नास्ति विध्यावृत्तिप्रदोषः॥ तस्मादाग्नेयादिवाक्य
विहितानां विद्वद्वाक्यमनुवादकं किंचानुवादमभ्युपगम्य कर्मांतरविधिं वदतः॥ प्रयाजादीनामाग्नेयादीनां च गुणप्रधानभावो
न सिध्येत् तथाहि॥ समिधो यजति आघारमाघारयतीत्यादयः कालयोगरहिताः॥ केचिद्विधय आम्नाताः॥ यदाग्नेयोष्टाकपालोमा
वास्यायां च पौर्णमास्यां चेत्यादयः कालयुक्ता अपरे तेषामुभयेषां प्रकृतत्वाद्दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्येन स
र्वेषां फलसंबंधो बोधनीयः॥ दर्शपूर्णमासाभ्यामिति द्विवचनं बहुवचनत्वेन परिणतव्यं॥ विद्वद्वाक्यविहिते द्वे कर्मांतरे प्रयाजाद
य आग्नेयादयश्चेत्येते पुद्वित्वासंभवात्॥ सर्वेषां च फलसंबंधे राजसूयगतेष्टिपशुसोमवत्सम प्राधान्यात्प्रयाजादीनां गुणभा
वो न स्यात्॥ तदभावे चानंगत्वात्सौर्यादिविकृतिष्वाग्नेयादीनामिवातिदेशो न स्यात्॥ अनुवादपक्षे तु॥ त्रिकयोः कालयोगेन दर्श
पूर्णमासशब्दार्हत्वात्समुदायद्वित्वेन द्विवचनार्हत्वाच्च॥ आग्नेयादीनामेव फलसंबंधेन प्राधान्यं॥ प्रयाजादीनां तु गुणभावइ
ति न कोपि दोषस्तस्माद्विद्वद्वाक्यमनुवादकं॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ उपांशुयाजमित्येषानुवादोत्राथवा विधिः॥
विस्पष्टादिवाक्येविस्पष्टविधेरस्यानुवादता॥ आमित्वोक्तेंतराल उपांशुगुणकेविधौ॥ सत्यर्थवादो विस्पष्टादिस्तद्रूपं ध्रौव मंत्रतः॥ इ

दमाम्नायते॥ आमिवाएतद्यज्ञस्यक्रियते यदन्वंचौपुरोडाशोउपांशुयाजमंतरायजति॥ विष्णुरुपांशुयष्टव्योआमित्वायाग्नी
षोमोउपांशुयष्टव्यावआमित्वायेति॥ तत्रविष्ण्वादिवाक्येषुविहितस्ययागत्रयसमुदायस्यायमनुवादइतिचेतमैवं॥ आग्नेया
ग्नीषोमीयपुरोडाशद्वयनैरंतर्यकृतस्यआमित्वदोषस्यवाक्योपक्रमेउपन्यासात पुरोडाशयोरंतरालेकिंचिद्विधित्सितं॥ न
त्वंतरालगुणविशिष्टंविधेयंविष्ण्वादिवाक्येषुप्रतीयते॥ पूर्ववाक्येतुतत्प्रतीयतइतिविधायकंतद्वाक्यं नचात्रयजतीतिवर्तमा
नोनादेशःशंकनीयः॥ पंचमलकारस्याश्रयणात॥ अंतरालकालवदुपांशुत्वगुणस्यापिविशेषणत्वात्तद्विशिष्टकर्मणउपांशु
याजनामकत्वेसत्येवंगुणद्वयविशिष्टकर्मण्याद्येनवाक्येनविहितेविष्ण्वादिवाक्यत्रयमर्थवादःस्यात॥ नचाविहितयागानुवा
देनदेवताविधिःशंकनीयः॥ समाधातव्येनआमित्वदोषेणोपक्रमादजामित्वेनसमाधानेनोपसंहाराच्च आमिवाइत्यादेरजामिता
येत्यंतस्यसर्वस्यमहावाक्यस्यएकत्वप्रतीतेः॥ नखल्वेकस्मिन्वाक्येविषयबाहुल्यंसंभवति॥ नचात्रविधिविवक्षितस्योपांशु
याजस्यद्रव्याऽभावः ध्रौवस्यतत्रद्रव्यत्वात॥ नापिदेवताया अभावः॥ नानाशाखास्वत्रोपांशुयाजक्रमेपठितैर्वैष्णवप्राजापत्या
ग्नीषोमीयमंत्रैर्विकल्पेनदेवतात्रयस्यप्रतीयमानत्वात्तस्माद्यजतीत्येतद्विधायकंम॥ ॥पंचमाधिकरणमारचयति॥ ॥
अग्निहोत्राघारवाक्यमनुवादोथवाविधिः॥ अनुरूपत्वाच्चुदध्यूर्ध्ववाक्येनोक्तमनूद्यते॥ गुण्यसिद्धेर्नदध्यादिगुणोद्देशविशि
ष्टता॥ रूपंदध्यादिमंत्राभ्यामतोसौगुणिनोविधिः॥ इदमाम्नायते॥ अग्निहोत्रंजुहोतिदध्नाजुहोतिपयसाजुहोतीति इदमपरमा
म्नायते॥ आघारमाघारयतिऊर्ध्वमाघारयतीति॥ ऋजुमाघारयतीति च॥ तत्राग्निहोत्रवाक्यंदध्यादिवाक्यैर्विहितस्यकर्मस
मुदायस्यानुवादः॥ आघारवाक्यंचोर्ध्वादिवाक्यविहितस्यनत्वेतद्वाक्यद्वयंकर्मविधायकंकुतः द्रव्यदेवतालक्षणरूपयागरूप राम
स्याभावादितिचेत॥ तत्रवक्तव्यंकिंदध्यादिवाक्येनगुणमात्रंविधीयते॥ किंवागुणविशिष्टंकर्मनाद्यः॥ अग्निहोत्रादिवाक्यस्य
त्वन्मतेकर्मविधायकत्वाभावेनगुणिनः॥ कस्यचिदसिद्धौगुण्यनुवादपुरःसरस्यगुणमात्रविधानस्यासंभवात॥ द्वितीयेवि
धिगौरवंस्यात॥ तच्चसत्यागतावयुक्तं॥ अग्निहोत्रादिवाक्यंकर्मविधायकं॥ तत्रद्रव्यंदध्यादिवाक्यैर्लभ्यते॥ देवतातुमांत्रवर्णि २९
की॥ आघारेप्येवंद्रव्यदेवतेउन्नेतव्ये॥ ॥षष्ठाधिकरणमारचयति॥ ॥ यजत्यालभतीत्येतावनुवादौविधीउत॥ गृह्णात्य
वद्यतीताभ्यांविहितेर्थेनुवादिनौ॥ नानुवादौपुरोवादेयज्यालभ्योरतोविधिः॥ ग्रहणंसोमसंस्कारोवदानंपशुसंस्क्रिया॥ सो

मेनयजेतेतिश्रूयते॥ तत्रैंद्रवायवंगृह्णातिमैत्रावरुणंगृह्णातीत्यादीन्यपिश्रुतानि॥ अग्नीषोमीयंपशुमालभेतेतिश्रूयते॥ त
त्रहृदयस्याग्रेवद्यतिअथजिह्वायाःअथवक्षसइत्यादीन्यपिश्रुतानि॥ तत्रैंद्रवायवादिवाक्यैर्यागादिविधीयंते॥ इंद्रवाय्वादिश्रु
तिपादकदेवतानांतद्धितेनसोमरसद्रव्यस्यचप्रतीयमानत्वात॥ एतेषांग्रहणवाक्यविहितानांयागानांसमुदायः सोमेनयजे
तेनेत्यनेनानूद्यते॥ तथावदानवाक्येषुहृदयादिद्रव्यंश्रुतं॥ ततोद्रव्यविशिष्टयागस्तत्रविधीयंते॥ तदनुवादेनपशुमालभवा
क्येग्नीषोमरूपादेवताविधीयते॥ तस्मादवदानवाक्यविहितानांयागानांसमुदायः पशुनालभेतेत्यनेनानूद्यतइतिप्राप्तेब्रू
मः॥ सतिहिपुरोवादेनुवादोभवति नचात्रपुरोवादोस्तिसोमेनयजेतेत्यनेनप्रतीतस्यार्थस्यग्रहणवाक्येष्वप्रतीतेर्नहिग्रहणंय
जनंभवति॥ नापितद्धितप्रत्ययाक्तोरसः सोमलतानचतद्धितप्रत्ययः सर्वनामार्थेविहितः प्रकृतंब्रूतेनतुरसमितिशंकनीयं
॥धारयागृह्णातीतिरसस्यैवप्रकृतत्वात॥ तथापशुमालभेतेत्यनेनप्रतीतोर्थोनावदानवाक्येषुप्रतीयते॥ ततःपुरोवादाभा
वेनानुवादासंभवात यजत्यालभतिभ्यांकर्मणीविधीयेते॥ ग्रहणवाक्यस्तुदेवताविशिष्टः सोमसंस्कारोविधीयते॥ अवदान
वाक्यैश्चपशुसंस्कारः॥ ॥सप्तमाधिकरणमारचयति॥ ॥ आहुतिस्तिस्रइत्यत्रकर्मैक्यमुतभिन्नता॥ एकत्वंसकृदाम्ना
तात्संख्यावत्त्वात्प्रयाजवत॥ आख्यातमात्रंनोमानंसंख्ययाबहुकर्मता॥ आवृत्त्यैकादशत्वंतुप्रयाजेगत्यभावतः॥ पञ्चन्सप्त
दशप्राजापत्यानित्यत्रभाष्यकृतविचारमाह॥ पूर्वत्रक्रियात्रित्वस्फुटत्वतः॥ बहुत्वोपेतपशुभिर्देवयोगादभिन्नता॥ रूपस्य
तेनकर्मैक्यंसंख्यानात्रक्रियागता॥ देवतासंगतस्यैवतल्लिप्तार्थस्यपश्चिमः॥ बहुत्वसंगमोत्रूपसंख्ययातःक्रियाभिदाति
स्रआहुतीर्जुहोतीतिश्रूयते॥ तत्रजुहोतीत्येतदाख्यातंसमिधोयजतीत्यादिषन्नाभ्यस्तंकिंतुसकृदेवाम्नातंततएकमिदंकर्म
त्रित्वसंख्यातुतस्यैवकर्मणआवृत्त्यानेतव्या॥ तथाचयथाप्रयाजेष्वेकादशत्वसंख्यापंचानामेवप्रयाजानामावृत्त्यानीता॥
तद्वदितिप्राप्तेब्रूमः॥ किमिदमाख्यातंपदांतरनिरपेक्षंकर्मैक्येप्रमाणंपदांतरान्वितं॥ नाद्यः॥ वाक्यांशस्यपदमात्रस्य
प्रमितिजनकत्वाभावात॥ द्वितीयेत्रित्वसंख्याविशेषितेनाख्यातेनकर्मबहुत्वंगम्यतेप्रयाजानांतुपूर्वमेवपंचसंख्यावरु
द्धत्वादावृत्तिमंतरेणैकादशत्वंदुःसंपादं॥ इहत्वेतद्विरुध्यमितः पूर्वकर्मणएकत्वसंख्यावरोधोनास्तीतिवैषम्यंतदेतद्वृत्ति
काराद्युदाहरणं॥ भाष्यकारोनानुमन्यते॥ कर्मवाचिनआहुतिशब्दस्यविशेषणेनत्रिशब्देनकर्मबहुत्वस्यस्फुटतयापूर्वपक्षा

55
1941

नुत्थानात्॥ इदंत्वत्रोदाजहार॥ सप्तदश प्राजापत्यान् पशूनालभत इति अत्र प्रजापतिर्देवता येषां पशूनां ते प्राजापत्या इति त
द्धितव्युत्पत्तौ बहुत्वोपेताः पशवएकंद्रव्यं॥ ततो द्रव्यैक्यात् देवतैक्याच्च यागस्य रूपमभिन्नमित्येकमिदं कर्म॥ यातु सप्तदशेति सं
ख्यासा पशुद्रव्यगता॥ ननु पूर्वोदाहृते त्रित्वसंख्येव क्रियागता॥ तस्मान्न कर्मभेदमापादयतीति प्राप्ते ब्रूमः॥ अत्र प्रजापतिर्दे
वता यस्य पशोः स प्राजापत्य इति तद्धितांतं प्रातिपदिकं व्युत्पाद्य पश्चात्तद्धितांत प्रातिपदिकार्थस्य प्रजापतिदेवताविशिष्टस्य प
शोः कर्मत्व बहुत्व विवक्षायामुत्पन्ने इमे द्वितीया विभक्ति बहुवचने॥ तत्र प्रथम भाविन्याः द्वितीया विभक्तेरेव तावत्तद्धितोत्पत्ति
वेलायां अन्वयो नास्ति कुतः पश्चाद्भाविनो बहुवचनस्यान्वयः॥ एवं सति प्राजापत्या इत्यनेन तद्धितांत प्रातिपदिकेनैकपशु
द्रव्यमेकदेवतोपेतं यागस्य रूपं समर्प्यते॥ तादृशानां रूपाणां बहुत्वाय बहुवचनं॥ बहुत्व विशेषस्यैवसप्तदशेति निर्दिश्यते
तस्मादत्र संख्यया कर्मभेदः॥ एवं सत्यष्टम च वक्ष्यमाण सप्तदश पशूनामेकादशिन्या पशुगण विकृतित्वमुपपद्यते॥ ॥
अष्टमाधिकरणमारचयति॥ ॥ अथैषज्योतिरित्यत्र गुणो वा कर्म वा पृथक्॥ गुणः सहस्रदानात्मा ज्योतिष्टोमेह्यनूद्यते॥
अथेति प्रकृतात् छिन्न एतच्छब्दोग्रगं वदेत्॥ संख्यया वान्यकर्मत्वमिह नूतन संज्ञया॥ अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्यो
तिरेतेन सहस्रदक्षिणेन यजेतेति श्रूयते॥ अत्र प्रकृत ज्योतिष्टोम मेषज्योतिरित्यनूद्य तस्मिन् सहस्रदानलक्षणो गुणो विधीय
त इति चेन्न॥ प्रकृतस्य ज्योतिष्टोमस्याथेत्यनेन विच्छिन्नत्वात्॥ न चैवं सत्यथैष ज्योतिरितित्यत्रैतच्छब्दोनुपपन्न इति वाच्यं
॥ सन्निहितवाचिनैतच्छब्देनातीतमनिहितस्यापि परामर्श संभवात्॥ आगामि सन्निहितश्च ज्योतिः शब्दार्थः स च ज्योतिः शब्दो
तीतमपरामृशन्॥ अपूर्व संज्ञा रूपत्वान्नूतनं किंचित्कर्माभिधत्ते॥ ततो यथा पूर्वत्र संख्यया कर्मभेदः॥ तथात्रापि संज्ञया कर्म
भिद्यते॥ विश्वज्योतिः सर्वज्योतिः शब्दयोरप्ययमेव न्यायो द्रष्टव्यः॥ ॥ नवमाधिकरणमारचयति॥ ॥ गुणः कर्मांतरं
वास्या द्वाजिभ्यो वाजिनं त्विति॥ गुणो देवान नूद्योक्तः समुच्चयविकल्पितः॥ आमिक्षोत्पत्ति शिष्टत्वात् प्रबलात्र वाजिनं॥ गु
णो प्रविश्य कर्मान्यत्कल्पयेद्वाजि दैवकं॥ तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रूयते॥ घनीभू
तः पिंडः आमिक्षा जलं वाजिनं तत्रामिक्षा द्रव्यभाजो ये विश्वेदेवा उक्ताः॥ ते वाजिभ्य इत्यनेनानूद्यंते॥ वाजो न्नमामिक्षारूपं तेषा
यस्तीति तन्निष्पत्ते स्तानमूद्य वाजिन द्रव्यरूपो गुणो विधीयते॥ तच्च द्रव्यमामिक्षा द्रव्येण सह समुच्चीयतां विकल्प्यतां वेति प्रा

57
1945

प्ते ब्रूमः॥ उत्पत्तिशिष्टेनामिक्षा द्रव्येणावरुद्धे वैश्वदेव यागे वाजिन द्रव्यस्योत्पन्नशिष्टस्य प्रवेशाभावाद्वाजिनं वाजिशब्दार्थ
स्य देवतांतरतामापादयतीति॥ ततो द्रव्य देवता लक्षण रूपस्य भिन्नत्वात् कर्मांतरं॥ ॥ १२ दशमाधिकरणमारचयति॥ ॥
दधिहोमेन्य कर्मत्वं गुणो वान्यस्तु पूर्ववत्॥ निर्गुणत्वादग्निहोत्रे युक्तो दध्यादिको गुणः॥ दध्ना जुहोतीति श्रूयते तत्राग्निहोत्रं
जुहोतीत्यस्मात्प्रकृतात्कर्मणोन्यत् दधिहोम रूपं कर्मेति पूर्वन्यायेनैव गम्यते यथा पूर्वत्र वाजिन द्रव्येण कर्म भिद्यते तथा द
धि द्रव्येणेति चेन्न॥ वैषम्यात् यथा वैश्वदेवो याग आमिक्षा गुणावरुद्धस्तथाग्निहोत्रं न गुणांतरावरुद्धं प्रत्युत निर्गुणत्वात्
गुणमाकांक्षति तस्मादयं विधिः गुणविधिः एवं पयसा जुहोतीत्यादिषु द्रष्टव्यं पयो दध्यादीनां सर्वेषामुत्पन्नशिष्टतया स
मबलत्वादेकैकेन द्रव्येणाग्निहोत्र निष्पत्तेश्च व्रीहियववद्विकल्पः॥ ॥ एकादशाधिकरणमारचयति॥ ॥ यद्दध्नेंद्रिय
कामस्य जुहुयादिति तत् पृथक्॥ गुणो वाभिद्यते कर्म धात्वर्थस्य फलित्वतः॥ मत्वर्थेगौरवादिभ्यो नान्यत्कर्म फलाय तु॥ गुणे
विधेयेधात्वर्थो विहितत्वदनूद्यते॥ दध्नेंद्रियकामस्य जुहुयादिति श्रूयते॥ तदिदं प्रकृतादग्निहोत्रादन्यत्कर्म न त्वत्र गुणविधिः
कुतः इंद्रियकामस्येत्युक्तस्य फलस्य धात्वर्थमंतरेण द्रव्यमात्रादनिष्पत्तेरिति चेत्॥ मैवं॥ कर्मांतरविधौ दधिमता होमेनें
द्रियं भावयेदिति मत्वर्थलक्षणा प्रसंगात् गुणविशिष्ट क्रिया विधौ गौरवात्॥ प्रकृतहाना प्रकृत प्रक्रिया प्रसंगाच्च॥ गुणमात्रं
तु फलाय विधीयते॥ यद्यपि दध्ना जुहोतीति दधि प्राप्तं तथापि फलसंबंधो न प्राप्तः॥ धात्वर्थाभावे फलासंभव इति चेन्न॥ अ
ग्निहोत्रं जुहुयादिति विहितस्य धात्वर्थरूपस्यानूद्यमानत्वात्॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ उक्ताग्निष्टुतमेत
स्य वारवंतीय सामहि॥ रेवतीष्वप्यकृत्वेति श्रुतं पशुफलाप्तये॥ रेवत्यादि गुणः कर्म पृथग्वा पूर्ववद्गुणः रेवती वारवंतीय
संबंधाख्यः पशुप्रदः॥ सांस्थात्र फल कर्मभ्यां संबंधे वाक्यभिन्नता॥ तेनोक्त गुणसंयुक्तं मन्यत्कर्मोत्र वाच्यते॥ फलेत्रि
वृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेतेत्येतस्य संनिधौ श्रूयते॥ एतस्यै
व रेवतीषु वारवंतीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति॥ ॥ अस्यायमर्थः॥ ॥ अग्निष्टोमस्य विकृतिरूपः
कश्चिदेकाहोग्निष्टुन्नामकः॥ स च पंचस्तोत्रो त्रिवृत्स्तोम युक्तत्वात्रिवृदित्युच्यते॥ अग्निष्टोमादीनां सप्तानां सोमसं

स्थानां मध्ये अग्निष्टोमसंस्थारूपत्वात् अग्निष्टोम इत्युच्यते ॥ प्रस्तौ तृतीयसवने आर्भवपवमानस्योपरि यज्ञायज्ञीयं सा
म गीयते ॥ तेन साम्ना अग्निष्टोमयागस्य समाप्यमानत्वात् ॥ अग्निष्टोमसामेत्युच्यते ॥ तच्च प्रकृतौ यज्ञायज्ञा वो अग्नये गि
रा गिरा च दक्षसे इत्यस्यामाग्नेय्यामृचि गीयते ॥ अस्मिंस्त्वग्निष्टुति ब्रह्मवर्चसकामेन वायव्यायामृचि तत्साम गातव्यं तच्च गि
रा च दक्षसे प्रकृतावि वैकविंशस्तोमयुक्तं ॥ पशुकामस्तु रेवतीर्नः सधमाद इंद्रे संतु तुविवाजाः ॥ क्षुमंतो याभिर्मदेम इत्यादिषु रे
वतीष्वृक्षु वारवंतीयं साम गायेदिति ॥ तच्च रेवतीनां ऋचां वारवंतीयनामकेन साम्नायः संबंधः सोयं पशुफलायाग्निष्टुति
विधीयते ॥ एतस्यैवेति प्रकृतपरामर्शिकेन तच्छब्देनान्यव्यावर्तकेनैवप्रकारेण चाग्निष्टुतः समर्प्यमाणत्वात् ॥ यथा पूर्वाधि
करणे इंद्रियफलाय प्रकृतेग्निहोत्रे दधिगुणो विहितस्तद्वदिति प्राप्ते ब्रूमः ॥ विषमो दृष्टांतः ॥ दध्नो होमजनकत्वं न शास्त्रेण
बोधनीयं ॥ तस्य लोकतोवगंतुं शक्यत्वात् ॥ फलसंबंध एव शास्त्रबोध्य इति न तत्र वाक्यभेदः ॥ इह तु रेवत्यृगाधारकवारवं
तीयसाम्नोग्निष्टुत्कर्मसाधनत्वं फलसाधनत्वं चेत्युभयस्य शास्त्रैकबोध्यत्वाद्दुर्वारो वाक्यभेदः तेन पशुफलकं यथोक्तगुणवि
शिष्टं कर्मांतरं विधीयते ॥ एतच्छब्द एवकारश्च विधीयमानकर्मांतरविषयतया योजनीयौ ॥ ॥ त्रयोदशाधिकरणमारचय
ति ॥ ॥ वृष्ट्यन्नस्वर्गकामानां सौरभस्तोत्रमीरितं ॥ निधनान्यपि हीषूर्गूडिति वृष्ट्यादिकामितां फलांतरं किं वृष्ट्यादिहीषादी
नामुतोदितसौभरफलसंभिन्नो निधनं वि नियम्यते ॥ फलांतरं चतुर्थ्योक्तं वृष्टिकामाय हीषिते ॥ सौभरस्य फलं वृष्टिर्हीषि
त्युक्त्यापि वर्द्धते ॥ नात्र वृष्ट्यन्नकामानामन्यत्वं प्रत्यभिज्ञया ॥ नियमेपि च तुर्थ्येषा तादर्थ्यादुपपद्यते ॥ यो वृष्टिकामो योन्नाद्यकामो
यः स्वर्गकामः सौभरेण स्तुवीत ॥ सर्वे वै कामाः सौभरमिति समाम्नाय पुनः समाम्नायते ॥ हीषिति वृष्टिकामाय निधनं कुर्यादू
र्गित्यन्नाद्यकामायोर्ध्व इति स्वर्गकामायेति ॥ सौभरं साम विशेषः ॥ निधनं नाम पंचभिः ॥ सप्तभिर्वा भागै रूपेतस्य साम्नोंतिमो भागः
॥ तस्मिन्निधने हीषादयो विशेषाः सौभरसामसाध्यस्तोत्रफलेभ्यो वृष्ट्यादिभ्योन्यानि वृष्ट्यादिफलानि जनयितुं विधीयंते ॥
कुतः हीषादिविधिवाक्ये वृष्टिकामायेत्यादिना चतुर्थीश्रावणात् सा च ता चतुर्थी ब्रुवती हि षादीनां वृष्ट्यादिकामपुरुषशेषत्वं गम
यति ॥ तच्छेषत्वं च पुरुषाभिलाषितफलसाधनत्वे सत्युपपद्यते ॥ अतः सौभरस्य हीषिति विधनविशेषस्य च फलभूतद्वृष्टीभ

57
1945

वतः ॥ तदुभयमेल नान्महती हि वृष्टिरिति प्राप्ते ब्रूमः ॥ सौभरविधौ यो वृष्ट्यादिकामः स एव हीषादिविधौ प्रत्यभिज्ञायते ॥ अतः सौभ
रस्य फलभूता ये वृष्ट्यादयस्त एव हीषादिवाक्येष्वनूद्यंत इति न फलांतरं ॥ अथोच्येत नूतनफलाभावाद्धीषादीनां च नानाशाखा
ध्ययनादेव सौभरप्राप्तत्वादनर्थकोयं विधिरिति ॥ तन्न फलत्रयकामानां त्रयाणां अनियमेन हीषादिमध्ये यस्य कस्यचिन्नि
धनप्राप्तौ विधेर्नियमार्थत्वात् तादर्थ्ये तु फलांतराभावेपि सौभरवाक्याक्तवृष्ट्यादिफलसाधने सौभरे हीषादीनां नियम्यमान
त्वात् ॥ उपपद्यते ॥ तस्मादयं निधनविशेषनियमविधिः ॥ ॥ इति माधवीये जैमिनीन्यायमालाविस्तरे द्वितीयस्याध्या
यः पादः ॥ ॥ तृतीयपादप्रथमाधि० ॥ ॥ रथंतरं साम सोम भवेत्तद्बृहज्जगत् ॥ ऐंद्रवायवशुक्राग्रयणाग्रस्य ग्रहाः
श्रुताः ॥ रथंतरादिमन्यकर्माथवा गुणः ॥ गायत्र्यादियुतात्पूर्वदन्यद्व्यावर्तिनो गुणः ॥ सोमशब्दप्रकरणे ज्योतिष्टोमसमर्प्यके
॥ ग्रहाग्रत्वं गुणस्तत्र व्यावृत्तेस्तु परस्परं ॥ ज्योतिष्टोमप्रकरणे श्रूयते ॥ यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान्गृह्णीयात् ॥
यदि बृहत्सामा शुक्राग्रान्यदि जगत्सामाग्रयणाग्रानिति ॥ तत्र सोमशब्देन सोमलतासाधनको यागोभिधीयते ॥ तस्मिंस्तु
यागे माध्यंदिने सवने पृष्ठस्तोत्रे रथंतरं बृहत् ॥ जगन्नामकानि सामानि विकल्पेन विहितानि ॥ अभि त्वा शूर नोनुम इत्येतस्यां योनावु
त्पन्नं रथंतरं ॥ त्वामिद्धि हवामहे इत्येतस्यामुत्पन्नं बृहती जगतीछंदस्काया मृत्युत्पन्नं जगत् ॥ ऐंद्रवायवो मैत्रावरुणः आश्वि
नः शुक्रो मंथ्याग्रयण उक्थ्यो ध्रुव इत्यादिनामका ग्रहाः प्रातःसवने गृह्यंते ॥ दारुपात्रेषु सोमरसस्य ग्रहणात् ग्रहा भवंति ॥ सो
मयागस्य रथंतरसामोपेतत्वपक्षे तेषु ग्रहेष्वैंद्रवायवः प्रथमं ग्रहीतव्यः ॥ बृहत्सामोपेतत्वपक्षे शुक्रः प्राथमिकः ॥ जगत्सा
मोपेतत्वपक्षे आग्रयणः प्राथमिक इति विषयवाक्यस्यार्थस्तत्र प्रकृतो ज्योतिष्टोमो गायत्र्यादिसामोपेतस्तद्व्यावृत्त्यर्थमि
ह रथंतरादयो गुणाः कीर्त्यंते तस्मादैंद्रवायवाग्रत्वादिगुणोपेतानि कर्मांतराण्यत्र विधीयंत इति प्राप्ते ब्रूमः ॥ यदि रथंतर
सामा सोमः स्यादित्युक्तोयः सोमशब्दस्तद्बलेन प्रकरणेन चात्र ज्योतिष्टोमः समर्प्यते ॥ समर्पिते तस्मिन् यथोक्तग्रहाग्र
त्वं गुणो विधीयते ॥ न च रथंतरादिगुणानुवादेन ज्योतिष्टोमस्य व्यावृत्तिः संभवति ॥ तस्य प्रातःसवनादौ गायत्र्यादिसामो
पेतत्वेपि पृष्ठस्तोत्रे रथंतरादियोगस्यापि सद्भावात् ॥ किं तर्हि व्यावर्त्यत इति चेत् ॥ रथंतरबृहज्जगतां परस्परव्यावृत्तिरिति

अधि० क० माला वदामः॥ रथंतरादयः एवंस्तोत्रेविकल्पिताः॥ तत्ररथंतरादिनुवादेनेतरः पक्षोव्यावृत्यतेएवमितरत्रापि॥ तस्मादयंगुण
३० विधिः ननुयः प्रकृतोज्योतिष्टोमः सोन्येषांसोमयागानांप्रकृतिः॥ नहिप्रकृत्योजगत्सामुत्पन्नंसामविहितमस्ति॥ अतएव
दशमाध्यायेपंचमपादस्यपंचमाधिकरणेप्रथमवर्णकेयदिजगत्सामेतिवाक्यंक्रमाग्रयणाग्रत्वंविकृतोविषुवन्नाम
के मुख्येहनिव्यवस्थापितं॥ बाढं॥ तथापिनात्रकश्चिद्विरोधः आग्रयणाग्रत्ववाक्यंनकर्मांतरविधायकं॥ किंत्वन्येनवि
हितेसोमयागेयत्रजगत्सामसंभवति॥ तत्रगुणविधायकमित्येतावन्मात्रस्यप्रतिपाद्यत्वात्॥ ॥ द्वितीयवर्णकमारच
यति॥ ॥ राजसूयंप्रकृत्येष्टिरवोध्यारव्याश्रुताव्रतु॥ विप्रक्षत्रियविड्भेदाद्धविषांव्यत्ययः क्रमे॥ विप्रादेरनुवादःस्या
त्प्रापणंवानुवादगीः॥ व्यत्ययायत्रयाणांचराजत्वात्प्रातिरस्तिहि॥ नराज्ययोगाद्राजत्वंक्षत्रियेतंतुततः॥ अप्राप्तप्रा
पणंतस्मान्नरथंतरतुल्यता॥ राजसूयप्रकरणेकाचिदिष्टिरवेष्टिनामिकाश्रूयते॥ आग्नेयमष्टाकपालंनिर्वपतिहि
रण्यंदक्षिणेंद्रमेकादशकपालंऋषभोदक्षिणावैश्वदेवंचरुंपिशंगीपष्ठौहीदक्षिणामैत्रावरुणीमामिक्षांवशादक्षिणा
बार्हस्पत्यंचरुंशितिपृष्ठोदक्षिणेति॥ तस्यामेवेष्टौहविषांक्रमव्यत्ययः श्रूयतेयदिब्राह्मणोयजेतबार्हस्पत्यंमध्येनिग
धायाहुतिंआहुतिंहुत्वाभिघारयेद्यदिराजन्यऐंद्रंयदिवैश्योवैश्वदेवमिति॥ तत्रयथापूर्वाधिकरणेऐंद्रवायवाग्रत्वंव्य
वस्थापयितुंयदिशब्दयुक्तेनवाक्येनरथंतरंनिमित्तत्वेनानूदितंएवमत्रापिपंचमस्थानेश्रूयमाणंबार्हस्पत्यंचरुंमध्येतृ
तीयस्थानेस्थापयितुंयदिब्राह्मणइतितन्निमित्तत्वेनानूद्यते॥ द्वितीयस्थानेऋ॥ तस्यैंद्रंतृतीयस्थानेस्थापयितुंयदि स्य०
राजन्यइत्यनुवादः वैश्वदेवस्यस्वतएवतृतीयस्थानेश्रवणात्तत्रमध्येविधानविधिर्नित्यानुवादः॥ ननुराजकर्तृकेराजसू
येब्राह्मणवैश्ययोः प्राप्त्यभावात्॥ नानुवादोयुक्तइतिचेत्नतयोपरिराज्ययोगेनराजसूयार्थत्वाशब्दार्थत्वादितिप्राप्ते श्री
ब्रूमः॥ राजशब्दः क्षत्रियजातौरूढः॥ ननुराज्ययोगस्तस्यप्रवृत्तिनिमित्तंप्रत्युतराज्यशब्दस्यराजयोगः॥ प्रवृत्तिनि ३०
मित्तंराज्ञः कर्मेतिविगृह्यराजप्रातिपदिकस्योपरिप्रत्ययविशेषविधानात्॥ ब्राह्मणवैश्ययोः प्रजापालनेतुराजशब्द
उपचरितस्तस्मादवेष्टौब्राह्मणवैश्योपूर्वमप्राप्तोअनेनवचनेनप्राप्यते॥ ननुराजसूयस्यराजकर्तृकत्वात्तदंतर्गताया

61
1945

अवेष्टेरपितथात्वात्तस्यांब्राह्मणवैश्ययोः प्रापणमयुक्तमितिचेत्॥ मैवं॥ अंतरवेष्टौतदसंभवेपिराजसूयात्बहिः प्रयुज्य
मानायामवेष्टौतत्संभवात्॥ तस्मादत्रब्राह्मणादिकर्तृकंयथोक्तगुणविशिष्टंकर्मांतरंविधीयतइतिरथंतरादितुल्य
त्वंयदिशब्दस्तुनिपातत्वादर्थेनकोर्थांतरवाचीत्यनन्वयं॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ वसंतविप्रआ
दध्यात्तत्रैवोपनयीततं॥ अनुवादः प्रापणंवानुवादः कालसिद्धये॥ अंतरेणाग्निविद्याभ्यांकर्मानुष्ठित्यसंभवात्॥
क्लृप्तेआधानोपनीतिप्राप्तेविप्रादयःस्ततः॥ लौकिकाग्नेः पुस्तकाच्चनसिद्धेनास्तिकल्पनं कालविप्रादिसंयुक्तमतोत्र
तंविधीयतेवसंतेब्राह्मणोग्निमादधीतग्रीष्मेराजन्यः शरदिवैश्यइतिश्रूयते॥ वसंतेब्राह्मणमुपनयीतग्रीष्मेराज
न्यंशरदिवैश्यमितिच॥ तत्रवसंतादिकालविशेषविधातुंब्राह्मणादयोनूद्यंते॥ नचतेषांप्राप्त्यभावः कृत्यनुष्ठा
नान्यथानुपपत्याक्लृप्तस्यात्॥ नह्याहुत्याधारभूतमग्निमनुष्ठानप्रकारज्ञापिकांविद्यांचविनाकर्मानुष्ठानंसंभव
ति॥ अग्निश्चनाधानमंतरेणास्तीति॥ ब्राह्मणादिकर्तृकमाधानंकल्पयति॥ विद्याचोपनयनपूर्वकाध्ययनमं
तरेणासंभवति ब्राह्मणाद्युपनयनंकल्पयतीति॥ तत्प्राप्तिरितिचेत्॥ मैवं॥ लौकिकाग्नेर्हेतुंपुस्तकपाठेनाधिगंतुं
चशक्यत्वेनोप्रधानोपनयनयोरकल्पनेब्राह्मणादीनामप्राप्तेः॥ तस्माद्वसंतादिकालविशिष्टब्राह्मणादिकर्तृकेआ
धानोपनयनेअत्रविधीयेते॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ यद्दाक्षायणयज्ञेनस्वर्गकामोयजेततत्॥ कर्मां
तरंगुणोवात्रदर्शादौफलसिद्धये॥ गुणस्यःस्याप्रसिध्यत्वात्कर्मभेदोत्रसंज्ञया॥ गुणाव्युत्पत्तिशेषात्स्यामावृत्याख्या
ननामतत्॥ दर्शपूर्णमासप्रकरणेश्रूयते॥ दाक्षायणयज्ञेनस्वर्गकामोयजेतेति॥ तत्रदाक्षायणशब्दवाच्यस्यक
स्यचिद्गुणस्यलोकेप्रसिद्ध्यभावात्॥ उद्भिदादिवद्यजिसामानाधिकरण्येनकर्मनामत्वादथैषज्योतिरित्यादिवदपूर्व
संज्ञयाकर्मांतरविधिरितिचेत्न॥ दाक्षायणशब्दस्यावृत्तिवाचकत्वात्॥ तच्चशब्दनिर्वचनाद्वाक्यशेषादवगम्य
ते॥ तथाहिअयनमित्यावृत्तिरुच्यते॥ दक्षस्यमेदाक्षाः तेषामयनमितितन्निर्वचनं॥ दक्षउत्साहीपुनःपुनरावृत्ता
वनलसइत्यर्थः॥ तदीयानांप्रयोगानामावृत्तिर्दाक्षायणशब्दार्थः तथाचावृत्त्यायुक्तः प्रकृतोदर्शपूर्णमासात्मकोयज्ञो

दाक्षायणयज्ञः॥आवृत्तिप्रकारस्तु द्वे पौर्णमास्यौ यजेत द्वे अमावास्ये इत्यादिवाक्यशेषादवगम्यते॥ ततो दध्यादिवदप्रसि
द्धार्थत्वात्॥ दर्शपूर्णमासयोः प्रकृतयोरयं स्वर्गफलसिध्यर्थ आवृत्त्याख्यगुणस्य विधिः॥ न तूद्भिदादिवत्कर्मनामधेयं॥ एवं सा
३१ कंप्रस्थानीयेन यजेत पशुकाम इत्यत्रापि द्रष्टव्यं॥ अमावास्यायागे द्वौ दोहौ सांनाय्यं च तस्मिन्दधिपयसोः कुंभीनां सह प्रस्थानं
साकं प्रस्थाय्यः॥ तद्युक्तो दर्शयागः साकंप्रस्थायीयः॥ तथा सति प्रकृते दर्शयागे पशुफलाय साकंप्रस्थायाख्यो गुणो विधीय
ते॥ ॥पंचमाधिकरणमारचयति॥ ॥वायव्यः श्वेत आलभ्यो भूत्यै सौर्यं चरुं तथा निर्वपेत्॥ ब्रह्मतेजोर्थमीषा मुष्टीनिरुप्तयोः॥
गुणाः श्वेतचरुं किवायात्कौ वैथितकर्मणि॥ फलार्थे अथवायागौ विशिष्टौ विहितौ विहाय श्वेतत्वं वायुस्टगीषामायाग्नेयचरवि
प्रमे॥ चरुर्गुणः चरुस्थाली निर्वापस्तु तदाश्रितः॥ फलाहानेर्नतालिंतुयावत्वौदितत्कर्म तत्॥ द्रव्यादिरूपसंपत्तेरवार्यौ याग
तार्थिकौ॥ अनारभ्येदमाम्नायते॥ वायव्यं श्वेतमालभेत भूतिकाम इति सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति च॥ तदेवं दर्शपू
र्णमासयोरिदमाम्नातं॥ ईषामालभेतेति॥ चतुरो मुष्टीन्निर्वपतीति च॥ ईषा शकटगतो लांगलदंडीवद्दीर्घः काष्ठविशेषस्तस्या
आलम्भः स्पर्शस्तमेतं दर्शपूर्णमासगतमीषालंभमनूद्य तस्यामालभ्यायामीषायां श्वेतत्वगुणो विधीयते॥ तस्य च श्वेतका
ष्ठस्य वायुना स्पर्शमात्राद्वा यव्यता संभवति तथा चतुर्मुष्टिनिर्वापमनूद्य चतुर्गुणो विधीयते॥ चरुस्थाले सा च निर्वापस्याश्र
यः॥ निरुप्तस्य हविष आग्नेयतया सूर्यवत्प्रभासंबंधात्सौर्यत्वं॥ भूतिर्ब्रह्मवर्चसफले च सार्वकामिकयोर्दर्शपूर्णमासयोः
पूर्वसिद्धत्वादनूद्येते तस्माद्गुणविधीय इत्येकः पूर्वः पक्षः॥ नादिफलसाधयोर्नित्यवत्तुतयोः संभवत्प्रयोजनायाश्च पाक्षि
कानुवादत्वमानर्थक्यं वायुक्तं तस्माद्गुणफलविशिष्टकर्मांतरे विधीयेते॥ तथाविधयागस्याश्रवणादालंभनिर्वापयोरेवश्रव
णाद्यावदुक्तकर्मांतरविधिरिति द्वितीयः पूर्वः पक्षः श्वेतपशुचरुद्रव्ययोर्वायुसूर्यदेवतयोश्च स्पष्टं प्रतीयमानतया रूप
वतोर्यागयोरार्थिकयोर्वारयितुमशक्यत्वात्॥ द्रव्यदेवताविशिष्टयोर्यागयोर्विधिरभ्युपगंतव्यः॥ भूतिकामो वायव्येन श्वे
तेन पशुना यजेत ब्रह्मवर्चसकामः सौर्येण चरुणा यजेतेत्येवं विधार्थसिद्धो विधिर्द्रव्यदेवतासंबंधकल्पितस्य यागस्यालिं
ङ्प्रत्ययेन कर्तव्यताविधावालंभनिर्वापयोर्धात्वर्थयोः का गतिरिति चेत् अनुवाद इति ब्रूमः॥ तत्प्राप्तिश्चार्थिकी निर्वापालं

भावं तरेण तद्यागासिद्धेस्तस्माद्याग विधिरिति सिद्धांतः॥ ॥षष्ठाधिकरणमारचयति॥ ॥वत्सालंभो यजिः स्पर्शो वा वाय
व्यादिवत् यजिः॥ स्पर्शः स्याद्देवराहित्यात्संस्कारः प्रायपाठतः अग्निहोत्रे दोहाधिकारे श्रूयते वत्समालभेतेति॥ तत्र किमालंभो
यजिः स्पर्शो वा स्यात्॥ विमतो आलंभो यजिः प्राणिद्रव्यकालंभत्वाद्वायव्यालंभवदिति चेन्न॥ देवताराहित्येन तद्वैषम्यात्॥
किंचायं वत्सालंभोग्निहोत्रांगसंस्कारस्तत्प्राये पठितत्वादितरसंस्कारवत्॥ तस्मादत्र स्पर्शमात्रविधिः॥ ॥सप्तमाधिकर
णमारचयति॥ ॥चरुर्भवति नैवारउपधत्ते चरुं त्विति॥ यागः स्यादुपधानं वा यागः शेषोक्तदेवतः॥ यागत्वानिश्चये शेषा
नापेक्षोतो यजिकुतः॥ किंतूपधानमात्रत्वं यावदुक्तं चरोरकृतं॥ अग्नौ श्रूयते नैवारश्चरुर्भवतीति चरुमुपदधातीति च॥ तत्र
चरुद्रव्यको यागो विधीयते॥ न चात्र देवताया अभावः॥ बृहस्पतेर्वा एतदन्नं यन्नीवारा इति वाक्यशेषेण देवतासिद्धेरुपधानं
यागोपयुक्तस्य प्रतिपत्तिः स्विष्टकृदादिवदिति प्राप्ते ब्रूमः॥ यागविधौ निश्चिते सति पश्चाद्देवताया मपेक्षिता यां वाक्यशेष
बलाद्देवताक्लृप्तिः॥ इह तु देवताकल्पनेन यागविधित्वनिश्चय इत्यन्योन्याश्रयः॥ तस्मादिहोपधानमात्रं विधीयते॥ ॥अ
ष्टमाधिकरणमारचयति॥ ॥पर्यग्निकृतः पात्नीवत उत्सृज्यत इत्यसौ॥ यागो गुणो वा यागः स्यादन्वयाव्यवधानतः॥ प्रत्य
भिज्ञातमालभ्यमनूद्योत्सर्गशब्दतः गुणः पर्यग्निकृत्याख्यं वक्त्युत्तरनिरन्वये॥ न दुष्टा परिसंख्यात्र चोदकात्प्राकृतिर्भोस
ति॥ पर्यग्निकरणांतां गृह्णीतिः कृप्तोपकारतः॥ त्वाष्ट्रं पात्नीवतमालभेतेति प्रकृत्येदमाम्नातं पर्यग्निकृतं पात्नीवतमुत्सृज
तीति॥ पर्यग्निकृतशब्देन रकृत पशुद्रव्यस्य पात्नीवतशब्देन पात्नीवतं नामकं देवतासंबंधस्य च प्रतीयमानत्वादयं यागवि
धिः॥ एवं सति पर्यग्निकृत पात्नीवतशब्दयोरव्यवहितान्वयो लभ्यते॥ सिद्धांते तु पर्यग्निकृतमुत्सृजतीत्यन्वयः वांछति॥ त
दाव्यवहितान्वयो दुर्वारस्तस्माद्वायव्यपशुवद्यागविधिरिति प्राप्ते ब्रूमः॥ अनारभ्याधीतत्वान्नास्ति वायव्ये प्रकृतप्रत्यभिज्ञा
॥ इह त्वालभ्यत्वेन प्रकृतः पशुः पात्नीवतशब्देन प्रत्यभिज्ञायते॥ तमनूद्य पर्यग्निकृतशब्दान्विते नोत्सृजतीत्याख्यातेन पर्य
ग्निकरणाख्यो गुणो विधीयते॥ न च प्रकृतिगतस्य पर्यग्निकरणस्य विकृतौ चोदकेन प्राप्तत्वादनर्थकोयं विधिरिति वाच्यं॥
उपरितनांगनिवृत्तेर्विधिप्रयोजनत्वात्॥ नन्वेवं सति परिसंख्या स्यात्॥ सा च दोषत्रयदुष्टा॥ स्वार्थत्यागो न्यार्थस्वीकारः॥ प्रा
प्तबाधश्चेति त्रयो दोषाः॥ पर्यग्निकरणवाक्ये स्वार्थो विधिस्त्यज्यते अन्यार्थो निषेधः स्वीक्रियते॥ चोदकप्राप्तात्परितनांगा

63 / 1945

निबाध्येरन्॥ मैवं॥ पर्यग्निकरणोत्तरभावीन्यंगानिनानुष्ठेयानिएत्येतस्याः परिसंख्यायाः अनंगीकारात्॥ कथंतर्हितन्निवृत्तिः॥आर्थिकीतिब्रूमः॥ चोदकप्रवृत्तेः प्रागेवार्थविधिः प्रवर्तते॥ प्रत्यक्षोपदेशस्य शीघ्रबुद्धिजनकतयाकल्प्यादतिदेशात्प्रबलत्वात्॥ तथासतिउपदिष्टैरवांगैर्निराकांक्षायांविकृतौ चोदकस्य प्रवृत्त्यैवोपरितनान्यंगानिन प्राप्यंते॥ नचानेनन्यायेन पर्यग्निकरणात्प्राचीनानामप्यप्राप्तिरितिवाच्यं॥ विधीयमानस्य पर्यग्निकरणस्य नूतनत्वेसत्युपकारकत्वनापत्तेः॥ प्रकृतौ चकॢप्तोपकारंपर्यग्निकरणं तदवस्थस्यैवात्रविधेयत्वात्प्रकृतौ च प्राचीनांगानंतरभाविनएवोपकारः कॢप्तइत्यत्रापितादृशस्यैवविधानात् पर्यग्निकरणांतांगरीतिः सिध्यति॥ एवंसत्युक्तरूजतीत्याख्यातेनयथोक्तपर्यग्निकरणनिधावर्थसिद्धउपरितनांगोत्सर्गोधात्वनानूद्यतेतदेवमत्रगुणविधिः॥ ॥ नवमाधिकरणमारचयति॥ ॥ यददाभ्यंगृहीत्वेतिगृह्णात्यंशुमितिद्वयम्॥ तद्यागोवागुणोवास्यात्यागोदाभ्यांशुनामतः॥ ग्रहयोरेवनामस्यादानंतर्याद्विधिस्तयोः॥ गुणोतस्तस्यवाक्येनज्योतिष्टोमाभिगामिता॥ अनारभ्यश्रूयते॥ अदाभ्यंगृहीत्वासोमाययजतइति अंशुंगृह्णातीतिचतत्रादाभ्यशब्दस्यज्योतिरादिवत्॥ अपूर्वनामत्वात्॥ तन्नामकोयागोयजतइतिआख्यातेनविधीयते॥ अंशुमित्यत्रयजतेरश्रवणेपिनामविशेषबलादेवापूर्वयागविधिर्नचात्रद्रव्यदेवतयोरभावः॥ ग्रहणलिंगेनज्योतिष्टोमविकृतित्वावगतौतदीयविध्यंतातिदेशेनतत्सिद्धिरितिप्राप्तेब्रूमः॥ भवत्वदाभ्यांशुशब्दयोर्नामत्वंतेचनामनीग्रहयोरेवस्यातांनतुयागयोः गृहीत्वेतिशब्दस्यानंतरमेवपाठात्॥ यजतिस्तुव्यवहितस्तादृशोपियजिरंशुवाक्येनास्तितस्माद्ग्रहणयोरत्रविधिः॥ ग्रहणंचज्योतिष्टोमगतस्यसोमरसस्यसंस्काररूपोगुणः ऐंद्रवायवादिग्रहणसमानत्वात्॥ यद्यप्यत्रनप्रकृतोज्योतिष्टोमःस्तथापितत्संबंधिग्रहणद्वारावाक्यात्॥ ज्योतिष्टोमगामित्वंअतएवसोमार्थमदाभ्यंगृहीत्वेतिनिर्दिश्यते॥ अथवातैत्तिरीयाणांषष्ठकांडस्यषष्ठेप्रपाठके प्राकरणिकविनियोजकवाक्यंद्रष्टव्यं॥ तस्माज्ज्योतिष्टोमेगुणविधिः॥ ॥ दशमाधिकरणमारचयति॥ ॥ अग्निंचिन्वीतेत्यत्र यागोवासंस्कृतिर्यजिः॥ लिंगेनयागनामत्वाद्यजिनाचानुवादतः रूढ्याद्रव्यस्यनामैतत्॥ अग्नेराधानवच्चितिः संस्कृतिः संस्कृतेबलाच्चाग्निष्टोमोविधीयते॥ यएवंविद्वानग्निंचिनुतइत्येवंविषयेश्रूयते॥ अथातोग्निमग्निष्टोमेनानुयजतितमुक्थेनतं

षोडशिनेतिअत्राग्निशब्दोयागवाचीस्तोत्रशस्त्रादेः क्रतुलिंगस्यश्रूयमाणत्वात्॥ तच्चलिंगमेवंश्रूयते॥ अग्नेःस्तोत्रमग्नेःशस्त्रमिति॥ षडुपसदोग्नेश्चित्यस्यभवतीतिचयदिलिंगंप्रापकापेक्षंतर्हियजिनातदनुवादःप्रापकोस्तु॥ अग्निमग्निष्टोमेनानुयजतीत्यस्मिन्वाक्येग्निंयजतीतिसामानाधिकरण्यादुपांशुयाजंयजतीतिवद्यागनामत्वं॥ अथोच्येतअनुशब्दस्याग्निशब्देनान्वयाद्यजत्यन्वयोग्निष्टोमस्येति॥ तथाप्यग्नेःपुरोयजनेसतिअग्निष्टोमस्यानुयजनंसंभवति॥ देवदत्तमनुगच्छतियज्ञदत्तइत्यत्रदेवदत्तेपुरोगमनदर्शनात्तस्मादग्निंचिनुतइत्यत्राग्निनामकोयागआख्यातेनविधीयते॥ चिनोतिस्त्विष्टकाभिरग्निंचिनुतइतिवाक्यप्राप्तस्यचनयस्यसोमयागविकृतित्वप्राप्तस्यग्रहसमुदायस्येवानुवादइतिप्राप्तेब्रूमः॥ अग्निशब्दोरूढ्यावह्निद्रव्यमाचष्टेरूढिश्चकॢप्ततयालिंगादिकल्प्याद्यागवाचित्वात्॥ बलीयसीतिनयागनामत्वं॥ नचात्रयागरूपमस्तिद्रव्यदेवतयोरसिद्धेः अतोग्निमादधीतेत्याधानवदग्निंचिनुतइत्युक्तं॥ चयनमग्निद्रव्यसंस्कारः॥ नचसंस्कृतस्यविनियोगाभावः॥ अग्निष्टोमेनयजेतेत्यादिवाक्यैरयमग्निष्टोमादौविनियोगोत्तस्मात्संस्कारविधिः॥ ॥ एकादशाधिकरणमारचयति॥ ॥ मासंजुहोतीत्यग्निहोत्रंगुणोन्यत्कर्मवागुणः॥ अनूद्यप्राप्तकर्मात्रमासोप्राप्तोविधीयते॥ उपसद्भिश्चरित्वेतिनित्येतासामसंभवात्॥ अनेकस्याविधेयत्वात्कर्मप्रकरणांतरात्॥ कुंडपायिनामयनेश्रूयते॥ मासमग्निहोत्रंजुहोतिमासंदर्शपूर्णमासाभ्यांयजेतेति॥ अत्रप्राप्तंनित्याग्निहोत्रमनूद्यमासलक्षणोगुणोप्राप्तत्वाद्विधीयतेइतिचेत्मैवं॥ किंमासएवविधीयतउतोपसद्भिश्चरित्वेत्युक्तत्वयाउपसदोपिनाद्यः उपसदामपिनित्याग्निहोत्रेप्राप्तिराहित्यान्नांत्वन्मतेविधातव्यत्वात्॥ नद्वितीयः प्राप्तेकर्मण्यनेकगुणविधौवाक्यभेदापत्तेः ननुमाभूत्तर्हिगुणविधिः कर्मांतरत्वेकिंप्रमाणमितिचेत्॥ प्रकरणांतरमितिब्रूमः॥ नह्येतस्मिन्नित्याग्निहोत्रस्यप्रकरणंअसन्निहितत्वात्॥ अयनस्यत्वेतत्प्रकरणं॥ अनयमारभ्याधीतत्वात्कातर्हिनित्याग्निहोत्रेगुणविधिशंकेतिचेत्॥ प्रकरणस्यासमर्थकत्वेप्यग्निहोत्रशब्देनतत्समर्पणादेषाशंकाभवति॥ सात्ववाक्यभेदापत्त्यानिराकृता॥ तथासतिस्वतःसिद्धंप्रकरणभेदंनिराकृत्यप्रकरणेक्यापादेनगुणविधापयितुंप्रवृत्तस्याग्निहोत्रशब्दस्यशक्तोनिरूढायांतदवस्थप्रकरणभेदान्नित्याग्निहोत्रादिकंकर्मभिनत्ति॥ अग्निहोत्रशब्दः धर्मातिदेशार्थइतिसप्तमेवक्ष्यतेननूपसन्मासाभ्यांगुणाभ्यांविशि

65/1945

Bombay Branch of the Royal Asiatic Society

ष्टमिदंकर्मविधीयते॥ ततोवाजिनन्यायेन गुणभेदात्कर्मभेदोनप्रकरणभेदादितिचेत्॥ न॥ वैषम्यात्॥ उपादेयतया
विधेयोगुणोवाजिनंमासश्चनुपादेयइत्येकंवैषम्यंद्रव्यत्वेनान्तर्गतंवाजिनंमासोनतथेत्यपरंवैषम्यं॥ परमार्थत
स्तत्र॰प्रथमतरप्रतीतेनप्रकरणभेदेनसिद्धंकर्मभेदंगुणभेदउपोद्बलयति॥ ततः प्रकरणांतरमेवात्रभेदहेतुः॥ ॥द्वा
दशाधिकरणमारचयति॥ ॥ अष्टाकपालमाग्नेयंरुक्कामः प्राकृतेफलं॥ कर्मान्यद्वाफलंभानात्पूर्वन्यायाप्रवेशना
त्॥ माभूद्भिन्नंप्रकरणंकर्मांतरमसंन्निधेः॥ अनारभ्याधीतमेतद्रूपमन्त्रूनमीक्षते॥ अनारभ्यश्रूयते॥ आग्नेयमष्टाक
पालंनिर्वपेद्रुक्कामइति॥ तत्रसंशयः किंप्रकृताग्नेयेफलविधिरितितत्रफलविधिः॥ कुतः॥ वाक्येनाग्नेयफलसंबंधस्य
भासमानत्वात्॥ नचपूर्वोक्तमासाग्निहोत्रन्यायेनकर्मांतरत्वंवैषम्यात्॥ तत्रायनमारभ्याधीतत्वादस्तिप्रकरणांतरत्वं
॥इहत्वनारभ्याधीतत्वेनप्रकरणमेवतावन्नास्तिकुतोन्यप्रकरणत्वं॥ किंच॥ मासोरुपादेयः अग्निहोत्रानुष्ठानेन
संपादयितुमशक्यत्वात्॥ फलंतूपादेयं॥ दार्शिकपौर्णमासिकाग्नेयानुसारेणतेजसः कामयितुंशक्यत्वात्॥
तस्मात्फलविधिरितिप्राप्तेब्रूमः॥ प्रकरणांतरत्वाभावेप्यनारभ्याधीतत्वात्॥ असन्निधिरस्त्वेवसएवात्रकर्मभि
नत्ति॥ नचात्रवाजिनन्यायेनकर्मभेदः॥ अष्टाकपालद्रव्याग्निदेवतात्मनोरूपस्योभयत्रैकत्वात्॥ यदिप्रकरणांतर
त्वमप्यसंन्निधिरेवमासाग्निहोत्रेकर्मभेदहेतुस्तर्हितस्यैवायंप्रपंचोस्तुफलंचमासवदनुपादेयं॥ अन्यथासाधनवदफ
लत्वप्रसंगात्॥ कामनाचविषयसौंदर्यज्ञानात्स्वतएवोत्पद्यते॥ नतुविधिवशात्संपाद्यते॥ यद्याधिकरणयोन्यायभेदः॥ य
दिचन्यायैक्यंसर्वथातेजस्कामेष्टिकर्मांतरंकाम्येष्टिकांडपठितेष्वैंद्राग्नमेकादशकपालंनिर्वपेत्प्राजाकामइत्यादिष्वयमे
वन्यायोद्रष्टव्यः॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥यजेतसमेपौर्णमास्यांयावज्जीवंतथेतया॥ अन्नाद्यकामंइत्या
दौकर्मभेदोथवागुणः॥ विध्युपादानयोरैक्याद्देशादेरनुपादितः॥ आवश्यकेकर्मविधौतद्वद्दः पुनरुक्तितः॥ देशादियोगस्या
प्राप्तेर्विधिर्नह्येकतानयोः॥ पुंशब्दयोर्व्यावृत्तत्वात्पुनरुक्त्याह्यनूद्यते॥ दर्शपूर्णमासप्रकरणेदेशकालनिमित्तान्याम्नाय
ते॥ समेयजेत॥ पौर्णमास्यांपौर्णमास्यायजेतयावज्जीवंदर्शपौर्णमासाभ्यांयजेतेति॥ अवेष्टिप्रकरणेफलमाम्नातंएतया
न्नाद्यकामंयाजयेतेति॥ आदिशब्देनसंस्कारोगृहीतः सचदर्शपूर्णमासप्रकरणेसमाम्नातः शेषात्स्विष्टकृतेसमवद्यतीति॥

67/1995

तत्रदेशकालनिमित्तफलसंस्कारोःअनुष्ठेयत्वादनुपादेयाः॥ अतएवविधेयाः॥ उपादानविधिशब्दयोः पर्यायत्वात्॥ त
तः कर्मविधिरित्यवश्यमभ्युपेयं॥ तत्रप्रकरणेनोदर्शादेः पूर्वविहितस्ययैभिर्वाक्यैः पुनर्विधानेसमिधोयजतीत्यादिवद
भ्यासादेवकर्मभेदइतिप्राप्तेब्रूमः॥ देशादीनामविधेयत्वेपिविहितकर्मणासहतेषांसंबंधोविधीयतेसचकर्मवत्पूर्वंनवि
हितइत्यप्राप्तत्वाद्विधिमर्हति॥ यदुक्तमुपादानविधिशब्दौपर्यायाविति तदसत्॥ अप्रवृत्तप्रवर्तनंविधानंतच्चपुरुषविषयः
शब्दव्यापारः॥ अनुष्ठितस्यानुष्ठानमुपादानंतच्चकर्मविषयः पुरुषव्यापारइतितयोर्महान्भेदः योपिदर्शादीनांपुनर्वि
धिः सोपिदेशादिसंबंधंविधातुंकर्मानुवादइतिनकर्मभेदमावहति॥ समिधोयजतीत्यादौविधेयगुणांतराभावेनानुवादा
संभवात्॥ पुनर्विधानंभेदहेतुरितिवैषम्यं॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥ दर्शपूर्णमासयोः प्रोक्तआग्नेयः केव
लेप्यसौ॥ दर्शेयादितिवाक्याभ्यांकर्मान्यद्वानुवादगीः॥ अभ्यासादन्यकर्मत्वंद्विदेशेष्टौप्रयुज्यतां॥ एकत्वंप्रत्यभिज्ञाना
त्॥ अनुक्त्यैंद्राग्नसंस्कृतिः॥ यदाग्नेयोष्टाकपालोमावास्यायांचपौर्णमास्यांचाच्युतोभवतीतिकालद्वयेविहितं॥ यदा
ग्नेयोष्टाकपालोमावास्यायांभवतीत्येकस्मिन्कालेपुनर्विहितंतत्राविशेषपुनःश्रुतिलक्षणेनाभ्यासेनप्रयाजानामि
वभेदः॥ तथासत्याग्नेययागस्यदर्शकालेद्विःप्रयोगइतिचेत्॥ न॥ प्रत्यभिज्ञानात्॥ आग्नेयस्यैकत्वेसत्येककालवाक्य
स्यानुवादकत्वात्॥ नचानुवादोव्यर्थः॥ विधेयैंद्राग्नस्तुत्यर्थत्वात्॥ यद्यप्याग्नेयोष्टाकपालोमावास्यायांभवतितथापि
नकेवलेनाग्निनासाधुर्भवति॥ इंद्रसहितोग्निः समीचीनतरः तस्मादैंद्राग्नः कर्तव्यइतिविधेयश्रुतिः॥ प्रयाजवैषम्यंतू
क्तमेवानुसंधेयंतस्मादयमनुवादः॥ ॥इतिश्रीमाधवीयेजैमिनिन्यायमालाविस्तरेद्वितीयस्याध्यायस्यतृतीयः
पादः॥ ॥चतुर्थपादस्यप्रथमाधिकरणमारचयति॥ ॥ यावज्जीवंजुहोतीतिधर्मः कर्मणिपुंसिवा॥ कालत्वात्क
र्मधर्मोतः काम्यंकर्मप्रयुज्यतां॥ नकालोजीवनंतेननिमित्तप्रतिभागतः॥ काम्यः प्रयोगोभिन्नः स्याद्यावज्जीवप्रयोग
तः॥ बह्वृचाब्राह्मणेश्रूयते॥ यावज्जीवमग्निहोत्रंजुहोतीति॥ तत्रयावज्जीवशब्दोमरणांतकालपरः॥ तत्कालसंबंधश्च
प्रकृतेकाम्याग्निहोत्रेपूर्वमप्राप्तत्वात्॥ जुहोतीत्यनूदितेकर्मणिविधीयते॥ तथासत्यस्यवाक्यस्यनित्यप्रयोगविधा
कत्वाभावेनवाक्यांतरविहितः काम्यप्रयोगएकएवाग्निहोत्रस्यपर्यवस्यतिसचकाम्यप्रयोगोभ्यसितव्यः॥ सकृदनुष्ठा

अ० कर० माला० न स्यादग्निहोत्रं कुर्यात्स्वर्गकाम इत्यनेनैव सिद्धत्वात्॥ यावज्जीवमिति कालविधेर्वैयर्थ्यप्रसंगात्॥ तस्मादयं काम्यकर्म
३४ णोऽभ्यासमसिद्धये कालरूपकर्मविधिरिति प्राप्ते ब्रूमः॥ यावज्जीवशब्देन कालस्य वाचकः॥ किं तु लक्षकः॥ वाच्यार्थस्तु
कृत्स्नजीवनं॥ न च जीवनं कर्मधर्मत्वेन विधातुं शक्यं॥ तस्य पुरुषधर्मत्वात्॥ तत्र पुरुषधर्मं निमित्तीकृत्याग्निहोत्रप्रयो
गो विधीयते॥ न चात्र कर्मभेदः॥ तद्धेतूनां शब्दांतरादीनामभावात्॥ न चाभ्यासः तद्धेतुः॥ निमित्तविशेषसद्भावादविशेषे
पुनः श्रुतेरभावात्॥ अतः प्रयोगभेदः पर्यवस्यति॥ जीवनस्यात्र निमित्तत्वात्॥ सति निमित्ते नैमित्तिकस्य त्यागायोगात्॥
नित्यत्वमर्थत्वमर्थसिद्धं॥ न च जीवनेनैरंतर्येण प्रयोगनैरंतर्यापत्तिः॥ सायंप्रातः कालयोर्विहितत्वात्॥ तस्माज्जीवनस्य
पुरुषधर्मत्वात् नित्यकाम्यप्रयोगौ भिन्नौ॥ ॥द्वितीयाधिकरणमारचयति॥ ॥शाखाभेदात्कर्मभेदो न वा कर्मात्र भिद्यते॥
दृष्टं काठकनामादि यद्भेदस्य कारणं॥ ग्रंथद्वारादिना ह्येते युज्यंते भेदहेतवः॥ रूपादिप्रत्यभिज्ञानादभिन्नं कर्म गम्यते
काठककाण्वमाध्यंदिनतैत्तिरीयादिशाखासु दर्शपूर्णमासाख्यं कर्माम्नातं॥ तत्र शाखाभेदात्कर्म भिद्यते॥ कुतः भेदका
रणानां नामभेदादीनां बहूनामुपलंभात्॥ काठककाण्वादिको नामभेदः॥ कारीरीवाक्यान्यधीयानाः केचित् शाखि
णो भूमौ भोजनमाचरंति शाखांतराध्यायिनो नाचरंतीति धर्मभेदः॥ एकस्यां शाखायामधीता इषेत्वेत्यादयो मंत्राः पत्र
शशाखाछेदादयः॥ क्रियाश्च शाखांतरेऽप्यधीयंत इति पुनरुक्तिः॥ एवमशक्यादयो भेदहेतव उदाहार्याः॥ नह्यल्पायुषाम
नुष्येण सर्वशाखाध्ययनपूर्वकं कर्मानुष्ठानं कर्तुं शक्यते॥ तस्माच्छाखाभेदेन कर्मभेद इति प्राप्ते ब्रूमः॥ रूपाद्यभेदादे
कं कर्म आग्नेयाष्टाकपालादियागरूपं यदेवैकस्यां शाखायां तदेवान्यत्राप्युपलभ्यते॥ दर्शपूर्णमासाभ्यां यजेतेति॥ श्री
यागरूपः पुरुषस्य व्यापारश्चैकविधः॥ दर्शपूर्णमासावितिकर्मणामाप्येकं स्वर्गकाम इति फलसंबंधोऽप्येकः॥ तस्मादभि
न्नं कर्म पूर्वपक्षहेतवस्त्वन्यथा संगच्छंतां॥ काठकादिकं ज्योतिरादिवन्न कर्मनाम काठकेन यजेतेत्यश्रवणात्॥ काठकमधी ३४
यत इति प्रयोगात्॥ ग्रंथनामेत्यवगंतव्यं॥ भूमिभोजनाद्यध्ययनधर्मः॥ पुनरुक्तिरध्येतृभेदान्न दुष्यति॥ अल्पायुषा
पि स्वशाखाध्ययनेन कर्मानुष्ठातुं शक्यते॥ तस्मादनन्यसिद्धरूपप्रत्यभिज्ञानाच्छाखाभेदेऽपि कर्म न भिद्यते॥ ॥इति
श्रीमाधवीये जैमिनिन्यायमालाविस्तरे द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥

69
1995

श्रीगणेशाय नमः॥ ॥द्वितीये कर्मणां भेदे सिद्धे भिन्नक्रियास्वयं॥ बुभुत्सितः शेषशेषिभावो ह्यत्राभिधीयते॥ अनेन द्विती
ययोरध्याययोः पौर्वापर्यं निरूपितं॥ तृतीयाध्यायस्य प्रथमपादे प्रथमाधिकरणमारचयति॥ ॥अशाब्दी शेषता शाब्दी वा न
शाब्दा प्रतीतितः॥ क्रियाकारकसंसर्गमात्रे व्युत्पत्तिसंभवात् गुणप्रधानभावेन संसर्गेत मीस्वत्यसेव्युत्पत्तिसंभवात्तत्र शाब्द
ता क्रियादिवत्॥ यदीदमस्मिंस्तृतीयाध्याये प्रतिपाद्यं शेषत्वं तच्छाब्दं॥ कुतः॥ केनापि शब्देन शेषत्वस्याप्रतीयमानत्वात्॥
व्युत्पन्नो हि शब्दः प्रत्यायकः॥ व्युत्पत्तिश्च न शेषिशेषभावे क्वचिद्दृष्टा लोके सर्वत्र क्रियाकारकान्वयस्यैव व्युत्पत्तिप्रयोज
कत्वदर्शनात्॥ अतः शेषताया अशाब्दत्वान्नायमध्याय आरंभणीय इति चेत्॥ मैवं॥ अन्वये शेषशेषिभावस्यांतर्भावात्
नहि गुणप्रधानभावमंतरेणान्वयः संभवति॥ द्वयोर्गुणयोः परस्पराकांक्षारहितत्वेनान्वययोग्यत्वाभावात्॥ एवं द्वयोः प्रधा
नयोरपि अतो व्युत्पत्तिसंभवात्॥ क्रियाकारकतदन्वयाय यथा शाब्दास्तथा तदन्वयांतर्गतः॥ शेषशेषिभावोऽपि शाब्दस्तस्माद
यमध्याय आरंभणीयः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥स्वरूपहेतून स्तोत्र स्तोयानैवानिरूपणात्॥ पारार्थ्यं शे
षताहेतू रूपं तेनोपलक्षितं॥ न तावदत्र शेषत्वस्य स्वरूपं निरूपयितुं शक्यते॥ तथाहि शेषत्वं नाम किमविनाभूतत्वं प्रयोज्यत्वं
वा॥ विध्यंतविहितत्वं वा॥ नाद्यः॥ पञ्चयागानामविनाभूतानां परस्परशेषत्वसंगात्॥ न द्वितीयः॥ पुरोडाशकपालेन तुषानु
पवपतीत्यत्र तुषोपवपनं प्रतिशेषस्यापि कपालस्य तत्प्रयोज्यत्वाभावात्॥ न तृतीयः॥ विध्यादिविहितस्य पलाशशाखाछे
दस्य सत्यपि शेषत्वे विध्यंतविहितत्वाभावात्॥ तस्मान्नास्ति शेषतायाः स्वरूपं नापि हेतुरस्ति॥ विमतः शेषः॥ एवं त्वादिति
कस्यचिद्धेतोरनिरूपणादिति प्राप्ते ब्रूमः॥ विमतः प्रयाजादिशेषः परार्थत्वात् भृत्यादिवदिति हेतुः निरूपितः॥ अविनाभूतत्वा
दीनां लक्षणानां दुष्टत्वेऽपि परार्थः शेष इति लक्षणस्यादुष्टत्वात्तेन लक्षित आकारः स्वरूपं न च पारार्थ्यस्यैव हेतुत्वे लक्षणत्वे च
सांकर्ये आकारभेदेन तद्भेदात्॥ दृष्टांतेन गृहीतव्याप्तिसहायीकृत्य बोधकत्वाकारो हेतुः इतरव्यावृत्त्याबोधकत्वाकारो लक्ष
णं॥ तस्माच्छेषताया हेतुस्वरूपे विद्येते॥ ॥तृतीयाधिकरणमारचयति॥ ॥किं द्रव्यगुणसंस्कारमात्रं शेषोऽथवा फलं॥ पु
मान्चर्मं च पक्षोद्वा वादयो मतभेदतः॥ शेषत्वमुपकारित्वं द्रव्यादावाह बादरिः॥ पारार्थ्यं शेषता तच्च सर्वेष्वस्तीति जैमिनिः॥ स्फ्य
कपालादिकं द्रव्यं आरुण्यादिको गुणः॥ अवघातप्रोक्षणादिकः संस्कारः एतेषु त्रिष्वेव शेषत्वं॥ स्वर्गः फलं तत्कामी पुरुषः॥

अ० क० माला
३५

दर्शपूर्णमासौ कर्म न हि फलादीनां त्रयाणां शेषत्वमस्ति॥ उपकारित्वस्य शेषत्वलक्षणस्य फलादिष्वसावादिति बादरेर्मतं॥
परार्थं तल्लक्षणमभिप्रेत्य फलादयोपि शेषा इति जैमिनेर्मतं॥ तथा च त्रीणि सूत्राणि पठ्यंते॥ कर्मण्यपि जैमिनिः॥ फलार्थ
त्वात्॥ फलं च पुरुषार्थत्वात्॥ पुरुषश्च कर्मार्थत्वादिति॥ तत्रोपकारित्वमतिव्याप्तं॥ प्रधानभूतेपि स्वामिनि र्गभदासोप
कारित्वदर्शनात्॥ तस्माज्जैमिनिमतमेव मुख्यः सिद्धांतः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ क्रतौ व्रीह्याज्यसान्ना
य्यधर्माः संकार्यं गामिनः॥ व्यवस्थिता वा सांकार्यं फलापूर्वेण संगतेः॥ अवांतरापूर्वसत्वात्॥ साक्षात्तेनैव संगतेः॥ क्र
त्वाव्यवस्थापितास्ते साहि प्रकरणोत्तमा॥ व्रीहिधर्मा अवघातप्रोक्षणादयः॥ आज्यधर्माः उत्पवनावेक्षणादयः॥ सान्ना
य्यधर्माः दोहनातंचनादयः॥ ते सर्वे फलहेतुनया दर्शपूर्णमासापूर्वेण संगच्छंते॥ अवांतरापूर्वकस्यचिदभावात्॥ एकेने
वापूर्वेण फलसिद्धावपूर्वांतरस्य कल्पकाभावात्॥ फलापूर्वप्रयुक्तया चानुष्ठीयमाना धर्मा यस्मिन् कस्मिन्नपि द्रव्ये नुष्ठि
ताः फलापूर्वं जनयंत्येवेति सांकार्यं प्राप्तेब्रूमः॥ आग्नेयादयः षड्यागा भिन्नक्षणवर्त्तिनो विनश्वराः संभूय फलापूर्वं ज
नयितुं शक्नुवंति॥ ततस्तत्जननसामर्थ्यायाग्नेयादिजन्यानि षडवांतरापूर्वाणि कल्प्यानि॥ तेषु पुरोडाशद्रव्यकयागज
न्यापूर्वं व्रीहिधर्माणां प्रयोजकं॥ प्रत्यासन्नत्वात्॥ फलापूर्वं तु तेन व्यवहितं॥ एवं आज्यधर्माणां सान्नाय्यधर्माणां तत्तद्द्रव्य
कयागजन्यापूर्वांतरापूर्वेणैव साक्षात्संगतिस्तथा सति तत्तदपूर्वप्रयुक्ताः संस्कारास्तत्तदपूर्वसाधनप्रकृतिद्रव्येष्वेव व्य
वतिष्ठंते॥ ननु दर्शपूर्णमासप्रकरणसंस्काराणां विनियोजनं॥ तच्च सर्वप्रकृतिद्रव्यसाधारणमिति तदवस्थमेव सांकर्य
मथोच्येत तु पर्वि मोकस्य व्रीहिष्वेव संभवात्तेषु एवावघातोन्नत्वाज्यसान्नाय्ययोः॥ एवं विलापनमाज्य एव दोहनादि
कं सान्नाय्य एवेति बाढं॥ दृष्टार्थानां धर्माणां व्यवस्थितत्वेप्यदृष्टार्थाः प्रोक्षणादयः संकीर्येरन्नेवेति चेत् मैवं॥ व्रीहीन् श्री
प्रोक्षत्याज्यमवेक्षत इत्यादि द्वितीयाश्रुत्या व्यवस्थापितत्वात्॥ श्रुतिश्च प्रकरणाद्बलीयसी॥ तस्माद्व्यवस्थिता धर्माः॥ ३५
॥ पंचमाधिकरणमारचयति॥ ॥ द्रव्यस्य स्फ्यकपालादेः सांकार्यं वा व्यवस्थितिः॥ यज्ञायुधत्वं सर्वांगसमं तेनात्र
संकरः॥ वाक्यस्याद्धननादेः स्यादेव यर्थ्यं संकरे सति॥ अनुवादो ह्यायुधोक्तिर्व्यवस्थानेन पूर्ववत्॥ दर्शपूर्णमासयोः श्रू
यते॥ स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै

71/1941

दश यज्ञायुधानीति॥ स्फ्यशब्देन खड्गाकारं काष्ठमुच्यते॥ अग्निहोत्रहवणी निर्वापसाधनं काष्ठपात्रं॥ शम्या मुसलाकारं का
ष्ठं॥ तत्र व्रीह्यादिद्रव्येष्ववघातादिसंस्काराणां सांकर्यं निराकृतेपि स्फ्यकपालादिद्रव्याणामुद्धननपुरोडाशश्रवणाद्यंग
क्रियासु सांकर्यं निराकर्तुमशक्यं॥ येन केनापि द्रव्येण यस्यां कस्यांचित् क्रियायां कृतायामपि श्रूयमाणस्य यज्ञायुधत्व
स्याविरोधात्तद्व्यवस्थामात्रेण यज्ञसाधनत्वमपैतीति प्राप्ते ब्रूमः॥ स्फ्येनोद्धंति कपालेषु श्रपयति अग्निहोत्रहवण्या ह
वींषि निर्वपति॥ शूर्पेण विविनक्ति कृष्णाजिनमधस्तादुलूखलस्यावस्तृणाति॥ शम्यया दृषदमुपदधाति॥ उलूखल
मुसलाभ्यामवहंति॥ दृषदुपलाभ्यां पिनष्टीत्येतेषां विशेषसंयोगबोधकानां वाक्यानां वैयर्थ्यं सांकार्यपक्षे प्रसज्येत ननु
व्यवस्थापक्षेपि सामान्यबोधकं यज्ञायुधवाक्यमनर्थकमिति चेत् न॥ उद्धननादिवाक्यसिद्धार्थानुवादित्वात्॥ न च वै
परीत्येनोद्धननादिवाक्यानामेवानुवादित्वमिति वाच्यं॥ बहूनां वैयर्थ्यस्य जघन्यत्वात्॥ न चात्यंतं यज्ञायुधानुवादस्य वै
यर्थ्यं यज्ञायुधानि संभरतीत्यासादनविधानायोपयुक्तत्वात्॥ तस्मादवघातादिसंस्कारवत् स्फ्यकपालादिद्रव्याणि
व्यवस्थितानि॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ क्रीणात्यरुणयेत्येतत् संकीर्णं वा क्रयैकभाक्॥ क्रयेणानन्वयात्
संकीर्णः सर्वद्रव्येषु रक्तिमा॥ द्रव्यद्वारा क्रयेयोगात्तद्भागेनान्वयः पुनः॥ साक्षात्क्रयेगुणस्यार्थात् द्रव्ये संनिहिते त्वसौ॥
ज्योतिष्टोमे श्रूयते॥ अरुणया पिंगाक्ष्यैकहायन्या सोमं क्रीणातीति तत्रारुणशब्दोरुणिमानं गुणमाचष्टे॥ गुणिविष
यतया प्रयुज्यमानस्यापि नागृहीतविशेषणा विशिष्टबुद्धिरिति न्यायेन गुणबोधकत्वात्॥ अन्वयव्यतिरेकाभ्यां गुणमा
त्रे तच्छक्त्युत्पत्तेश्च॥ तस्य चारुणिमगुणस्य तृतीयाश्रुत्या सोमक्रयसाधनत्वं प्रतीयते॥ तच्चानुपपन्नं॥ अमूर्तस्य गुणस्य
वासोहिरण्यादिवत्क्रयसाधनत्वासंभवात्॥ ततस्तृतीयाश्रुतेर्विनियोजकत्वाभावेन प्रकरणस्यात्र विनियोजकत्वं वक्त
व्यं॥ प्रकरणं च ग्रहचमसाद्यखिलद्रव्येष्वरुणिमानं निवेशयति॥ न चानेन न्यायेन पिंगाक्ष्यैकहायनीशब्दार्थयोरपि सर्व
द्रव्यगामित्वं शंकनीयं॥ तयोः शब्दयोः द्रव्यवाचित्वात्॥ पिंगवर्णे अक्षिणी यस्या गोः सा गौः पिंगाक्षी॥ एवमेकहायनी॥
यद्यप्येकगोवाचिनो शब्दौ तथापि विशेषणभूत धर्मभेदाच्छब्दद्वयं॥ तच्च युगपत्प्रवृत्तं सत् धर्मद्वयविशिष्टं गोद्रव्यं
क्रयसाधनत्वेन विदधाति॥ न चेतरद्द्रव्यमितरद्रव्ये निवेशयितुमशक्यं॥ अरुणिमगुणस्तु द्रव्येस्तु पुविशेषणत्वेनान्वे

अ० कर० माला० तुं योग्यत्वात्तेषु निवेश्यते॥ तत्रैषा रसयोजना॥ अरुणयेत्येतत् पृथक्वाक्यं॥ तत्र तृतीयाश्रुत्या प्राकरणिकानि साधन
३८ द्रव्याणि सर्वाण्यनूद्य प्रातिपादिकेन गुणो विधीयते॥ यानि ज्योतिष्टोमे साधनद्रव्याणि तानि सर्वाण्यरुणानि कर्तव्या
नीति॥ तस्माद्गुणः संकीर्ण इति प्राप्ते ब्रूमः॥ यद्यप्यमूर्त्तो गुणस्तथापि हायनवदक्षिवच्च गोद्रव्यमवच्छिन्नत्ति तच्च द्रव्यं
साधनमिति॥ तद्द्वारा गुणस्य क्रयेणान्वयो भवति एवं सति वाक्यभेदो न भविष्यति न नु वाक्यभेदाभावेपि लक्षणा दुर्वा
रा गुणवाचिनः शब्दस्य गुणिद्रव्यपरत्वांगीकारान्मैवं॥ गुणस्यैवात्र तृतीयाश्रुत्या साधनत्वमुच्यते॥ तच्च द्रव्यद्वार
मंतरेण संभवतीत्यर्थापत्त्या द्रव्यावच्छेदकत्वं कल्प्यते तर्हि ग्रहचमसादिद्रव्यमप्यवच्छिद्यतामिति चेत्॥ न तस्य द्रव्यस्य
क्रयसाधनत्वाभावेन तदवच्छेदेन गुणस्य श्रूयमाणक्रयसाधनत्वासिद्धेः॥ तर्हि वाससा क्रीणात्यजया क्रीणातीति व
स्त्रादीनां क्रयसाधनत्वात्तदवच्छेदोस्त्विति चेत् न॥ तेषां क्रयांतरसाधनत्वात्॥ न हि तत्राग्निहोत्रे पयोदध्यादिविकल्प
वत् क्रयानुवादेन वस्त्रादिद्रव्यविकल्पो विधीयते॥ अनुवाक्यस्य क्रयमात्रस्याग्निहोत्रवदन्यत्राविधानात्॥ ततो व
स्त्रादिद्रव्यविशिष्टाः क्रयांतरविधयः॥ न हि स्ववाक्यस्थगतमेकहायनीद्रव्यमुपेक्ष्य वस्त्राद्यवच्छेदो युक्तः॥ तस्मात्क्र
मेण साक्षात्क्रियान्वितयोर्द्रव्यगुणयोः पश्चादर्थापत्त्या परस्परावच्छेदकत्वेनान्वयः तथा सत्यारुण्यविशिष्टयैकहायन्या
क्रीणातीत्यर्थः॥ पर्यवस्यति॥ तस्मादारुण्यगुणः क्रयहेतुमेकहायनीमेव भजते॥ ॥ सप्तमाधिकरणमारचयति॥
॥ ॥ संमार्ष्टि ग्रहमित्येको ग्रहः शोध्य उताखिलः एकत्वं उद्देश्यसंख्याया उपादेयवदादरात्॥ प्राधान्यात्तद्गुणत्वेनैक
त्वमनपेक्षितं॥ तद्विधौ वाक्यभेदात्तो द्वयोस्त्रया सर्वशोधनं॥ सोमे श्रूयते॥ दशापवित्रेण ग्रहं संमार्ष्टि दशापवित्रं वासः॥
खंडः तत्र यथा पशुना यजेतेत्यत्रोपादेयपशुगतमेकत्वं विवक्षितं तद्वदुद्देश्यग्रहगतमप्येकत्वं विवक्षितव्यं॥ किंच ग्र श्री
हशब्दस्य जातिवाचित्वेन जातेः संस्कार्यत्वे सति तदाश्रयभूते यस्मिन्कस्मिन्नपि द्रव्येनुष्ठितेन संस्कारेण जातिः संस्कृ ३६
ता भवति॥ तस्मादेक एव ग्रहः शोधनीयः॥ इति प्राप्ते ब्रूमः॥ ग्रहमिति द्वितीयया ग्रहस्योद्देश्यतया प्रयोजनवत्त्वाच्च
प्राधान्यं गम्यते॥ ग्रहणं प्रति गुणः संमार्गः प्रति प्रधानं च गुण आवर्तनीय इति न्यायेन यावंतो ग्रहाः संति ते सर्वे संमार्ज
नीयाः एवं निश्चये सति संमार्जयितव्यग्रहेयत्तायाः अबुभुत्सितत्वादुद्देश्यगतमेकत्वं श्रूयमाणमविवक्षितं॥ अथोच्यते॥

73
1945

नेदमुद्दिश्यगतं किंतु स्वयं विधेयमिति॥ तन्न वाक्यभेदापत्तेः ग्रहं संमृज्यात्॥ तं चैकमित्येवं विधेयार्थभेदाद्वाक्यभेदः॥ पशुना
यजेतेत्यत्र तु यागं प्रति गुणत्वेपि ततः पशुः न हि प्रति गुणं प्राधान्यावृत्तिरिति कश्चिन्न्यायोस्ति तदियत्ताया बुभुत्सितत्वाच्छ्रूयमाण
मेकत्वं विवक्षितं इति वैषम्यं॥ न च जातिः संस्कार्या तस्या अमूर्तत्वात्॥ ततो जातिद्वारा द्रव्यलक्षको ग्रहशब्दस्तत्र चोक्तिर्निरु
क्ता॥ तस्मात्सर्वे ग्रहाः संमार्जनीयाः॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ चमसादिं च संमृज्यान्नो वा तस्यास्ति मार्जनं॥ ए
कत्ववद्ग्रहत्वस्याप्यनादरणसंभवात्॥ अत्र चानादरे हेतुर्वाक्यभेदस्तु नैव हि॥ चमसो न संमार्गः श्रुत्वात् द्विषयार्पणात्॥ ग्रह
मित्यत्र तत्प्रत्ययार्थभूतमेकत्वं यथा न विवक्षितं॥ तथा प्रातिपदिकार्थस्य ग्रहत्वस्याप्यविवक्षा संभाव्यते॥ ततो ग्रहशब्दस्य सोम
पात्रोपलक्षकत्वाद्ग्रहाणामिव चमसानामपि संमार्गेण सोमरसैकनिर्हरणप्रयोजनसंभवाच्चमसादयो मार्जनीया इति प्राप्ते ब्रू
मः॥ एकत्वं वाक्यभेदेन दुष्टत्वान्न विवक्षितं॥ अदुष्टत्वं तु कुतो न विवक्ष्यते॥ ततः सत्यपि प्रयोजने प्रमाणाभावाच्चमसादीनां ना
स्ति संमार्गः न च विषयापेक्षया तत्र कल्पनं ग्रहश्रुत्यैव तद्विषयसमर्पणात्तस्मान्नास्ति संमार्गः॥ ॥ नवमाधिकरणमारचय
ति॥ ॥ भवेत्सप्तदशारत्निर्वाजपेयस्य यूपकः॥ उन्मानं द्रव्यगं वाजपेयस्यांगं पशोरुत॥ अनंतर्यात् प्रकरणात् कर्मांगं षोडशि
दन्यतः॥ ऊर्ध्वपात्रे खादिरे ग्नेः संयुग्न्यान्वेति कर्मणा यूपद्वारा पशोरंगं पशुद्वारा च कर्मणः॥ सोमिकत्वाद्वाजपेये यूपो नास्ति
पशुं विना॥ वाजपेयप्रकरणे श्रूयते सप्तदशारत्निर्वाजपेयस्य यूपो भवति॥ तत्र यूपद्रव्यगतं सप्तदशारत्निशब्दोदितं यदू
र्ध्वमानं द्वाजपेयकर्मणोगं॥ सप्तदशारत्निशब्दवाजपेयशब्दयोरानंतर्यात्॥ प्रकरणं चैवमनुगृह्यते॥ यदि कर्मणः साक्षादू
र्ध्वमानं न संभवेत्॥ तर्हि वाजपेयगतं खादिरमूर्ध्वं यत् षोडशिपात्रं तस्मिन्नुन्मानं प्रथमं संयुज्यते द्वारा कर्मणान्वेतीति प्राप्ते
ब्रूमः॥ सप्तदशारत्निर्यूपसामानाधिकरण्याद्यूपेन साक्षात् संबध्यते॥ तस्य यूपस्य पश्वंगत्वात्तन्मानं यूपद्वारा पशोरंगं
भवति॥ तस्यापि पशोर्वाजपेयांगत्वात् पशुद्वारा कर्मणोंगं यद्यपि वाजपेययूपशब्दयोरानंतर्यमस्ति तथापि वाजपेयस्य सो
मयागतया साक्षाद्यूपसंबंधाभावात्॥ पशुव्यवधानमभ्युपेयं वाजपेयस्येति षष्ठ्या संबंधमात्रवाचित्वेन व्यवहितसंबंध
मप्यसावभिधत्ते॥ देवदत्तस्य नप्तेतिवत्॥ यत्तु सप्तदशारत्निवाजपेयशब्दयोरानंतर्यं यच्च प्रकरणं॥ तदुभयमविरुद्धं पश्वं
गत्वेप्यंततो वाजपेयांगत्वांगीकारात्॥ किंच पूर्वपक्षे यूपशब्देन षोडशिपात्रं लक्षणीयं सिद्धांते तु नासौ दोषः॥ ॥ दशमाधिक

करणमारचयति॥ ॥ अतिक्रामंजुहोतीतियुक्तं कर्त्रादिविलस्यतत॥ किंवा प्रयाजमात्रस्य कृत्स्नकर्तृयुक्तं भवेत॥ प्रयाजा
तिक्रमणयोः क्रियात्वादुभयोरपिमिथः संबंधराहित्यान्नैवं तेपिसमत्वतः॥ कर्तृयोगाददोषश्चेत समानेयंसमाहित॥ततः
प्रयाजसान्निध्यात तत्कर्त्रैवास्य संयुतिः॥ दर्शपूर्णमासयोः प्रयाजसमीपेश्रूयते अभिक्रामंजुहोतीतितत्रहोमकालेयद
तदाहवनीयमभितः संचरणं॥ ततकृत्स्नदर्शपूर्णमासकर्त्रा संबध्यते॥ नतुप्रयाजमात्रकर्त्रा॥कुतः अभिक्रमणस्य क्रिया
रूपस्यकारकत्वाभावेनप्रयाजक्रियया संबंधाभावादितिचेत॥ मैवं॥ क्रियात्वरूपत्वादेवदर्शपूर्णक्रियायाअपिसंबंधासं
भवात॥ अथोच्येत॥ अभिक्रमणंकर्तृकारकेणसाक्षात्संबध्यते तद्वाराकृत्स्नदर्शपूर्णमासकर्मणासंबध्यतइतितदेतत्स
माधानंप्रयाजसंबंधेपिसमानं॥ अतः संनिधिबलात प्रयाजकर्त्रा संबध्यते॥ तदेवाधिकरणं वार्त्तिककारमतेनारचयति
॥ वाक्याद्बलित्वंसान्निध्यादस्तिप्रकरणेततः॥ दर्शादिप्रक्रियाधीतेक्रमणेस्यात्तदंगता॥ अवांतरप्रकरणंसमिधोयजतीत्यतः
॥ तन्मध्यपाठात्तस्यांगंतद्वारादर्शशेषता॥ अस्मिन्नपि मतेतावेवविषयसंशयौ॥ पूर्वोत्तरपक्षहेतुमात्रमन्यत्प्रयाजसं
निधितोपिदर्शपूर्णमासस्यप्रकरणस्य प्रबलत्वात प्राकरणिकेषु कृत्स्नेषु अभिक्रमणंनिविशतइतिपूर्वः पक्षः॥ समिधोयज
तीत्यारभ्याम्नातंअवांतरप्रयाजप्रकरणं॥ तन्मध्येभिक्रमणमाम्नातं॥ तस्य चाभिक्रमणविधेरुभयतः प्रयाजविषयैर्वाक्यैः
संदृष्टत्वाभिक्रमणं॥ प्रयाजमात्रेनिविशतइतिराद्धांतः॥ अस्मिन्नपिपक्षेमहाप्रकरणंनविरुध्यते॥ प्रयाजद्वारादर्शपूर्णमा
संयोर्निवेशात्॥ ॥ एकादशाधिकरणमारचयति॥ ॥ उपव्ययतइत्यस्यसामिधेन्यंगताथवा॥ दर्शांगताप्रक्रियेपावां
तरातास्विह्याग्निमः॥ लिंगादत्रांगभूतैर्निवित्संज्ञकमंत्रकैः॥ विच्छेदसतिदर्शांगंमहाप्रकरणाश्रितः॥ दर्शपूर्णमासप्रकरणो
विश्वरूपोवत्वाष्ट्र इत्यस्मिन्प्रपाठके सप्तमाष्टमयोरनुवाकयोः सामिधेनीब्राह्मणमाम्नातं॥ नवमेनिवित्संज्ञकानामग्नेमहां
असिब्राह्मणभरतत्यादीनांमंत्राणांब्राह्मणंदशमेकाम्याः सामिधेनीपक्षाः एकादशेतू पवीतमेवंविहितंनिवीतंमनुष्याणां
प्राचीनावीतंपितृणामुपवीतंदेवानामुपव्ययतेदेवलक्ष्ममेवततकुरुतइतितत्रपूर्वन्यायेनसामिधेनीप्रकरणस्यावांतरस्यां
गीकारात्सामिधेन्यंगमुपवीतमितिचेन्न॥ निविद्ब्राह्मणेनसामिधेनीप्रकरणस्यविच्छेदितत्वान्नचविनिदामपिसामिधेन्यं
गतयातत्प्रकरणपाठादविच्छेदकत्वमितिवाच्यं॥ लिंगेननिविदामग्न्यंगत्वावगमात॥ आहुत्यधिकरणभूतमग्निंसंबोध्यम

75/1945

हानसीत्यादिभिर्न्निविद्वाक्यैरग्नेस्तुत्याहजननायतद्गुणा आवेद्यंते॥ अतएवनिर्वचनमेवंश्रूयतेनिर्वद्भिर्न्यदेवैन्नानिविदांनि
वित्वमिति॥ ननुसम्यगिध्यतेयाभिर्ऋग्भिस्ताः सामिधेन्यइतिव्युत्पत्त्याताअप्यग्निज्वलनद्वारेणाग्न्यर्थाएवेतिचेत॥ संतु
नामनेतावतापरस्परमंगांगीभावः॥ ननुविच्छिद्यतांसामिधेनीप्रकरणंनिवित्प्रकरणेनोपवीतस्यनिविदंगत्वंस्यादितिचे
न्न॥ पूर्वोत्तरानुवाकयोः निविदामश्रवणेनप्रकरणाभावात॥ सन्निधिनातदंगत्वमितिचेदुन॥ काम्यसामिधेनीभिर्व्यव
धानात॥ नचकाम्यसामिधेन्यंगताशंकनीया॥ सन्निधितः प्रकरणस्यप्रबलत्वात॥ तस्मादिहप्रयाजन्यायाभावात॥
दर्शपूर्णमासांगमुपवीतं॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ वैकंकतादिकंपात्रंपवमानहविष्वथ॥ यज्ञेखिलप्र
करणादाधानेन्वितमस्तुतत॥ अनर्थकंतदंगेषुहविःष्वावतिष्ठते॥ नाधानहविषांसाम्यात वाक्याद्यज्ञेखिलेभवेत॥
आधानप्रकरणेदारुपात्रंहोमार्थयज्ञार्थेचश्रूयते॥ तस्माद्दारुणोवैयज्ञावचरः स्यात॥ नत्वेतेनजुह्वयादैकंकतोयज्ञाव
चरस्यात॥ जुहूवादेवतेनेति॥ यज्ञावचरोयज्ञप्रचारहेतुः तत्रवैकंकतादिपात्रंप्रकरबलादाधानेनप्रथममन्वेति एते
नपात्रेणाधानेप्रयोजनाभावादाधानांगेषुपवमानहविःष्वेतत्पात्रंनिविशते॥ अस्तिहिपवमानहविषांआधानांगत्वंतत्प्र
करणपाठात अग्निकास्वग्नीदधीतत्यस्मिन प्रकरणेप्रजापतिर्वाचः सत्यमपश्यदित्यस्मिन्ननुवाकेत्रीणिहवींषिनिर्वपतीत्या
दिनातानिविहितानि॥ ततोयथाम्नदशारग्नित्वंवाजपेयेसाक्षादसंभवात्तदंगस्यपशोरंगेनिविशते॥ तद्वदिदमपीतिप्राप्ते
ब्रूमः॥ अग्निमुद्दिश्याधानं यथाविहितं॥ तथापवमानहवींष्यपियदाहवनीयेजुह्वतितेनसोस्याभीष्टः प्रीतइत्याहवनीयो
द्देशेनपवमानहविर्होमविधानात॥ तस्मादग्निसंस्कारत्वेनसमाम्नातानामाधानहविषांनास्तिपरस्परमंगांगिभावः॥ तथा
सतिप्रकरणस्यपात्रंप्रतिविनियोजकत्वाभावात॥ वैकंकतोयज्ञावचरइतिवाक्येनदर्शपूर्णमासादिसर्वयज्ञेषुतद्विनियु
ज्यते॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥ वार्त्रघ्नीपूर्णमासेस्तोवृधन्वत्यौतुदर्शगे॥ इतिप्राधान्यशेषत्वमुक्तंकिं
वाव्यवस्थितिः॥ क्रमेणप्रापितामंत्राश्चत्वारोप्याज्यभागयोः॥ क्रमाद्वाक्यंबलीयोतस्यांदर्शादिशेषता॥१॥ नमुख्यसो
मएकोस्तिनाधारत्वादिकालयोः॥ दर्शादेरव्यवस्थित्या प्राप्तोवाक्यात व्यवस्थितिः॥ दर्शपूर्णमासप्रकरणेश्रूयते॥ वार्त्र
घ्नीपूर्णमासेनूच्येतेवृधन्वतीअमावास्यायामिति॥ तत्रेदंवार्त्रघ्नीयुगलंवृधन्वतीयुगलंचहोत्रकांडआज्यभागयोःक्रमे

ग्निर्वृत्राणिजंघनदितित्यनुवाकेनाम्नातं॥उदाहृतेनतुब्राह्मणवाक्येनदर्शपूर्णमासयागयोस्तद्विधिरवगम्यते॥तत्रवाक्य
स्यप्रबलत्वादेषांमंत्राणांदर्शपूर्णमासयागांगत्वंनत्वाज्यभागांगत्वमितिप्राप्तेब्रूमः॥अग्निर्वृत्राणिजंघनदित्याग्नेयीप्र
थमावार्त्तघ्नीत्वंसोमासिसत्पतिरितिसौम्याद्वितीयावार्त्तघ्नी॥अग्निःप्रत्नेनजन्मनेत्याग्नेयीप्रथमावृधन्वती॥सोम
गीर्भिष्ट्वावयमितिसौम्याद्वितीयावृधन्वती॥तत्रमुख्ययोर्दर्शपूर्णमासयोर्यागयोराग्नेयपुरोडाशसद्भावादाग्नेयी
द्वयस्यविकल्पेनपुरोनुवाक्यात्वंकथंचिद्भवतु॥सौम्ययोस्तुतन्नसंभवति॥सोमदेवताया अभावात्॥नह्यग्नीषोमी
येपिकेवलःसोमोविद्यते॥किंचपूर्णमासेअमावास्यायामितिसप्तमीभ्यांमाधारत्वंगम्यते॥तत्रयागवाचित्वेयागस्य
मुख्यत्वान्नसंभवति॥कालस्यतूपसर्जनत्वात्तद्वाचित्वंयुक्तं॥किंचप्रयाजमंत्रानुवाकस्यानंतरमेवायमनुवाकः
पठितःसचाज्यभागयोरंगयोःक्रमः॥नतुमुख्ययोर्दर्शपूर्णमासयोस्तत्रान्मंत्रचतुष्टयस्यनमुख्ययागांगत्वंकिंत्वा
ज्यभागांगत्वंनन्वेतत्क्रमेणबलवत्॥तत्राप्याग्नेयेप्रथमेआज्यभागेमंत्रोप्याग्नेयःसौम्येद्वितीयेसौम्यइत्येषा
व्यवस्थालिंगेनैवलभ्यते॥बाढं॥तथापिवार्त्तघ्नीयुगलंपौर्णमासीकालेवृधन्वतीयुगलममावास्यायामित्येषाव्यवस्था पूर्वमप्रा
प्ताब्राह्मणवाक्येनाभिधीयतइतिनतद्वैयर्थ्यं॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥हस्तौदावनेनिक्रेस्तृणात्युलपरा
जिकां॥दर्भास्तरणएवांगंहस्तप्रक्षालनंतारिवले॥तन्मात्रांगत्वमत्रस्यादानंतर्यात्मकात्क्रमात्॥लिंगप्रकरणाभ्यांतुसर्वानु
ष्ठानशेषता॥दर्शपूर्णमासप्रकरणेश्रूयते॥हस्तावनेनिक्त्वोलपराजीःस्तृणातीति॥वेद्यामास्तरीतुंसंपादितःस्तृणस्तं
बउलपराजिः॥तत्रहस्तप्रक्षालनदर्भास्तरणवाक्ययोर्नैरंतर्येणपठितत्वात्क्रमप्रमाणेनहस्तप्रक्षालनस्यास्तरणमात्रस्यांगमितिचे
त्॥मैवं॥अवनेजनंहस्तसंस्कारःसंस्कृतौचहस्तौसर्वानुष्ठानयोग्यावित्येतादृशसामर्थ्यंलिंगंप्रकरणंचदर्शपूर्णमास
योःस्फुटं अतःप्रबलाभ्यांलिंगप्रकरणाभ्यांक्रमबाधात्सर्वशेषाहस्तप्रक्षालनः अयंन्यायोवाग्यमेपिद्रष्टव्यः॥सचवाग्य
मोज्योतिष्टोमे प्रकरणेश्रुतःमुष्टीकरोतिवाचंयच्छतीति॥तदनंतरमेवेदंश्रुतंदीक्षितमावेदयतीति॥आवेदनप्रकारश्चै
वंश्रुतः॥अदीक्षिष्टायंब्राह्मणइतित्रिरुपांश्वाहदेवेभ्यएवैनंप्राहत्रिरुच्चैरुभयेभ्यएवैनंदेवमनुष्येभ्यःप्राहेत्यत्रमुष्टी
करणवाग्यमाभ्यांहस्तजिह्वागतचापलेनिवारितेसतिमनसएकाग्र्यस्यसर्वकर्मसुयोग्यत्वंलिंगंतेनक्रमोबाध्य श्रीः ३८

ते॥ ॥पंचदशाधिकरणमारचयति॥ ॥चतुर्द्धाकार्यआग्नेयःपुरोडाशइतीरितं॥चतुर्द्धाकरणंसर्वशेषोवाग्नेयमात्रगं॥उपल
क्षणताग्नेययुक्तातःसर्वशेषता॥अग्नीषोमीयऐंद्राग्नयतोस्त्याग्नेयताततः॥नाग्नेयत्वंतयोर्मुख्यंकेवलाग्न्यनुपाश्रयात्॥
तेनैकस्मिन्पुरोडाशेचतुर्द्धाकरणस्थितिः॥दर्शपूर्णमासयोःश्रूयते॥आग्नेयंचतुर्द्धाकरोतीतितत्राग्नेयवदैंद्राग्नीषोमीययोरपिपु
रोडाशयोरग्निसंबंधादाग्नेयशब्देनपुरोडाशत्रयमुपलक्ष्यतेअतःत्रयाणांशेषइतिचेत्॥मैवं॥नह्याग्नेयइत्ययंतद्धितःसंबंधमा
त्रेविहितः॥किंतुदेवतासंबंधेअग्निश्चकेवलोद्विदेवत्ययोःपुरोडाशयोर्नदेवताततोदेवतैकदेशेनकृत्स्नदेवतोपलक्षणादाग्नेय
त्वंतयोर्नमुख्यमिति॥मुख्यएवाग्नेयेचतुर्द्धाकरणंव्यवतिष्ठते॥ ॥इतिश्रीमाधवीयेजैमिनिन्यायमालाविस्तरेतृतीयाध्या
यस्यप्रथमःपादः॥ ॥द्वितीयपादेप्रथमाधिकरणमारचयति॥ ॥देवोपसदनंबर्हिर्द्दामीतिमुख्यगौणयोः॥तल्लिंगमर्थयो
र्मंत्रंनियुंक्तेमुख्यएववा॥शब्दार्थत्वाद्द्वयोःस्तत्रयुज्यतेविनियोगोजनेनप्रथमावगतत्वेनमुख्येतद्विनियम्यते॥बर्हिर्देवसदनं
दामीतिलवणप्रकाशकोमंत्रआम्नातः॥तत्रलवनप्रकाशनसामर्थ्यलक्षणेनलिंगेनायंमंत्रोलवनाक्रियायांविनियुज्य
ते॥लवितव्यंचबर्हिर्द्विविधंमुख्यंगौणंच॥मुख्यंकुशकाशादिदशदर्भरूपंगौणं॥तुतत्सदृशंतृणांतरंतस्मिन्बर्हिःशब्दस्यमा
णवकेग्निशब्दवत्॥गुणयोगेनप्रवृत्तत्वात्तथासतिमुख्यवद्गौणस्यापिशब्दार्थत्वेनदर्भस्यतृणांतरस्यचलवनेमंत्रविनियो
गइतिप्राप्तेब्रूमः॥मुख्यस्यशीघ्रंप्रतीतत्वेप्रमुख्यमंत्रविनियुज्यचरितार्थंलिंगंविलंबप्रतीतिकंगौणापेक्षांनकरोतितस्मान्मु
ख्यस्यैवलवनेमंत्रोविनियुज्यते॥ ॥द्वितीयाधिकरणमारचयति॥ ॥ऐंद्र्यानिवेशनेह्यग्निर्गार्हपत्यंभवेदिति॥प्रकाशो
मुख्यइंद्रेवागौणेमुख्येस्तुपूर्ववत्॥एकस्यगौणतामध्रौव्येमंत्रस्यैवानुवादतः॥गौणताताग्न्युपस्थानमंत्रश्रुत्यानियुज्यते॥
अग्निचयनेनिवेशनःसंगमनइत्यादिकाकाचिदृगैंद्रीसमाम्नाता॥तस्यांतुशक्रइंद्रोनतत्क्रतारितिपठ्यमानत्वात्॥तन्मंत्र
विधायकंब्राह्मणंचैवमाम्नातेय॥निवेशनःसंगमनोवसूनामित्यैंद्र्यागार्हपत्यमुपतिष्ठतइतिएतेनब्राह्मणेनगार्हपत्योप
स्थानेविनियुज्यमानोमंत्रोर्थंप्रकाशयन्मुख्यमिंद्रंप्रकाशयति॥मुख्यश्चेंद्रःस्वर्गाधिपतिःसहस्राक्षस्तत्रेंद्रशब्दस्येंद्रत्वा
द्रौणस्त्विंद्रोगार्हपत्यः॥तस्यैश्वर्यगुणयोगेनयज्ञसाधनत्वेनवामुख्येंद्रसदृशत्वात्तत्रपूर्वन्यायेनशीघ्रप्रतीत्यामुख्येंद्रेमंत्रे
णप्रकाशितेसतिमंत्रब्राह्मणयोर्विसंवादंनिवारयितुंगार्हपत्यशब्देनमुख्येंद्रोगार्हपत्यसमीपदेशोवालक्षणीयइतिप्राप्तेब्रूमः॥

इंद्रगार्हपत्यशब्दयोरन्यतरस्य गौणत्वेवश्यंभाविनी सति ब्राह्मणवाक्यस्य विधायकत्वाद प्राप्तार्थत्वेन विधौ लक्षणाया अ
न्याय्यत्वात्प्राप्तार्थत्वेनुविधौ लक्षणाया अन्याय्यत्वा प्राप्तार्थत्वेतु॥ नबोदको मंत्र एवेंद्रशब्देन वह्निं लक्षयिष्यति॥ ततो गार्हप
त्य प्रकाशने समर्थमेव मंत्रमैंद्र्येति तृतीयाश्रुतिवशादुपस्थाने विनियुंक्ते॥ ॥तृतीयाधिकरणमारचयति॥ ॥हविष्कृदेही
त्यामंत्र्य त्रिरवघ्नन् समाह्वयेत्॥ विनियोगोवघाते स्यादाह्वाने वावघातकें॥ ऐंद्रीवन्मंत्रमाह्वानं गौणं हंतिर्यथान्यथा॥ पाठेन प्रा
पितं त्रित्वं ह्वयते रुपचारगीः॥ त्रिरभ्यासो विधातव्यो नित्यप्राप्तेरभावतः॥ हंतिना लक्ष्यते कालः प्राप्तो सोह्वयतिस्तथा॥ विनियोगवा
क्यभेदो लिंगादाह्वाननोदिता॥ नैंद्रीन्यायः श्रुत्यभावात्बर्हिन्यायेन मुख्यता॥ दर्शपूर्णमासयोः श्रूयते॥ हविः कृदेहीति त्रिरव
घ्नंनाह्वयतीति॥ देवानामर्थाय हविः संपादयति सा हविष्कृत्॥ तामनां संबोध्याध्वर्युरेहीति ब्रू``ते॥ तथाचायं ब्राह्मणेन व्याख्या
यते॥ हविः कृदेहीत्याह्वयत्येवदेवानां हविष्कृतः तानाह्वयतीति॥ तमिमं मंत्रमुच्चार्य अध्वर्युस्त्रिवारमवघातं कुर्वन्नाह्वयतीत्यर्थः॥
अनेन वाक्येन मंत्रोवघाते विनियुज्यते॥ नन्वाह्वाने समर्थो न त्ववघात इति चेन्न॥ तस्य चावघातलक्षकत्वाद्यथा पूर्वोदाहृताया
मैंद्र्यामृचींद्रशब्दो गौणस्तद्वदेहीति पदं मंत्रगतत्वेनावघाते गौणं भविष्यति॥ अन्यथा मंत्रब्राह्मणयोराह्वानपरत्वाद्ब्रुयमाण
मवघ्नन्निति पदमनर्थकं स्यात्॥ प्राप्तमवघातमुद्दिश्य तत्र हि मंत्रस्य त्रित्वस्य च विधौ वाक्यभेद इति चेन्न त्रित्वस्य प्राप्तत्वेनानु
वादकत्वात्॥ कस्यांचिच्छाखायामयं मंत्रो मंत्रकांडे त्रिवारमभ्यस्याम्नातः॥ आह्वयति पदं त्वेहीतिवदघातपरतयोपचारणीय
मिति प्राप्ते ब्रूमः॥ त्रिरभ्यासस्य नित्यवद्विधीयते॥ नचावघ्नन्नित्यस्य वैयर्थ्यं तस्य काललक्षकत्वात्॥ तोसो नित्यवत्प्राप्तिः पा
ठमात्रेण न सिध्यति कस्यांचिच्छाखायां हि पाठात् कस्याचित्सकृत्पाठात् लक्षकत्वात्॥ कालस्यापि विधौ वाक्यभेद इति चेत्॥ न॥
प्राप्तत्वान्नह्यवघाते सहायाह्वानमन्यस्मिन्काले भवति॥ ततोर्थप्राप्तकालः आह्वानमपि मंत्रसामर्थ्यादेव प्राप्तत्वान्न विधेयं॥ श्रीः
नत्वेहीति मंत्रपाठ आह्वानमंतरेणोपपद्यते॥ मंत्रव्याख्यानं चोदाहृतं॥ तत्रायं वाक्यार्थः संपन्नः॥ अवघातकाले यदाह्वानं ३९
तस्य त्रिरभ्यासः कर्तव्य इति॥ अत एव शाखांतरे विस्पष्टमाह्वानानुवादेनाभ्यासो विधीयते त्रिराह्वयति त्रिषत्या हि देवा इति॥
एवं सति मंत्रस्यापि विनियोगवाक्यभेदः स्यात्॥ लिंगेन त्वाह्वाने विनियुज्यते नावघाते न चैंद्रीन्यायोत्र प्रसरति॥ तृतीयाश्रुत्य
संभवात्॥ बर्हिर्देवसदनं दामीत्यत्रोक्तेन तु न्यायेन मुख्य एवाह्वान लिंगेन मंत्र विनियोगो न त्ववघातरूपे गौणाह्वाने तस्मादाह्वा

नशेषोयं मंत्रः॥ ॥चतुर्थाधिकरणमारचयति॥ ॥उत्तिष्ठन्प्रवदेदग्नीनित्यादिकं तथा॥ कृणुतव्रतमित्येवं पठन्वाचं वि
मुंचति॥ मंत्रौ विधेयौ कालो वा मंत्रावुत्थानमोकयोः विनियोज्यो न कालस्य लक्षणा युज्यते विधौ॥ मंत्रार्थानन्वयात्तत्र तद्विधिर्नै
विशक्यते॥ अगत्या लक्षणा प्यस्तु तेन कालो विधीयते॥ ज्योतिष्टोमे समामनंति उत्तिष्ठन्नन्वाहाग्नीदग्नीन्विहरेति॥ तथा व्रतं कृ
णुतेति वाचं विसृजतीति॥ तत्राग्नीध्रं संबोध्याग्निविहरणादि प्रैषरूपो मंत्रो वाक्येनोत्थाने शेषतया विनियुज्यते॥ तथा मुष्टिं कृ
त्वा नियमितवाचो दीक्षितस्य वाग्विमोके व्रतं कृणुतेति मंत्रो विनियुज्यते॥ नचात्र पूर्वोक्तावघातशब्दवदुत्थानविमोकशब्दौ का
ललक्षकौ॥ तत्कालयोरवघातकालवदर्थाप्राप्त्यभावेन विधेयत्वे सति लक्षणाया अन्याय्यत्वादिति प्राप्ते ब्रूमः॥ अग्निविहरणप्रै
षपयः पानरूपव्रतसंपादनप्रैषवाग्निताव तौ॥ न तूत्थाने वाग्विमोके च॥ अतो समर्थयोर्विनियोगासंभवादगत्या लक्षणाप्यं
गीकृत्य कालो विधीयते॥ ॥पंचमाधिकरणमारचयति॥ ॥प्रस्तरं सूक्तवाकेन प्रहरेदिति कालधीः॥ अंगांगितावास्या
त्कालो ह्युपलक्ष्यत्वाद्यनन्वयात्॥ प्रहृतेरिष्टदेवार्थसंस्कारकारत्वात्तदन्वयः॥ संपाद्यो देवताद्वारात्तृतीयाश्रुतितोंगता॥ दर्शपू
र्णमासयोराम्नायते॥ सूक्तवाकेन प्रस्तरं प्रहरतीति १ इदं द्यावापृथिवी भद्रमभूदित्यादिको मंत्रः सूक्तवाकः॥ तस्मिन्मंत्रेग्निं
संबोध्य त्वं सूक्तवाकमसीत्याम्नानात्॥ प्रस्तरो दर्भमुष्टिः तस्य प्रहरणमग्नौ प्रक्षेपः॥ तत्र सूक्तवाकेनेत्येतत्पदं कालं लक्षयति॥
होत्रा मंत्रेस्मिन्पठ्यमाने तत्पाठकालेध्वर्युः प्रस्तरं प्रहरेत्॥ न त्वत्र प्रहरणे मंत्रोयं विनियोक्तुं शक्यः॥ पूर्वोक्तप्रैषमंत्रवदत्रान्वया
भावात्॥ अग्निरिदं हविरजुषतावीवृधत महोज्यायोकृतेत्यादिकं मंत्रे पठ्यते॥ पुरोडाशसेवयाभिवृद्धोग्निः स्वस्मिन्यजमानेवा तेजोबा
हुल्यं कृतवानिति तस्यार्थः॥ न चासौ प्रस्तरप्रहरणेन्वेतुं शक्य इति प्राप्ते ब्रूमः॥ सूक्तवाकेनेति तृतीयाश्रुत्या प्रहरणे मंत्रो विनियुज्य
ते॥ न चात्यंतमन्वयाभावः॥ मंत्रो ह्ययं पूर्वमिष्टानग्न्यादिदेवाननुस्मारयति॥ प्रस्तरं प्रहरणं च इष्टदेवतासंस्कारः अतो देवताद्वारा
मंत्रप्रहरणयोरन्वयान्मंत्रो विनियुज्यते॥ ननु प्रहरणं नाम प्रक्षेपमात्रं॥ न तु देवतोद्देशेन प्रक्षेपः॥ यजिधातोरश्रवणात्तथा सति
देवतानामत्राभावात्तद्द्वारापि नान्वय इति चेत्॥ मैवं॥ देवनां सद्भावादग्न्यादिदेवताप्रकाशकस्य सूक्तवाकस्य तृतीयाश्रुत्या प्र
हरणांगत्वं बोध्यते॥ यदि प्रहरणेग्न्यादयो देवता भवेयुः तदा तत्प्रकाशेनेन दृष्टार्थो मंत्रस्य लभ्येत॥ ततो देवताकल्पनेन तदुद्दे
शपूर्वकस्य प्रक्षेपस्य यागत्वं सिद्ध्यति॥ ॥तस्माद्देवताद्वारास्त्येवान्वयः॥ ॥षष्ठाधिकरणमारचयति॥ ॥प्रहृतेरखिलं॥

79
1945

सूक्तवाकांगस्याद्विभज्यवा॥ समाख्याकृत्स्नगातेनविभक्तस्यांगतानहि॥ दर्शपूर्णमासयोर्देवानजुसृज्यविभज्यतामृ॥
आख्यालिंगेनबाधित्वाभागेनायन्नूह्यते॥ पूर्वोदाहृतमंत्रेसूक्तवाकसमाख्याकृत्स्नमंत्रविषयायाज्ञिकैः कात्स्न्येनं
तच्छब्दप्रयोगात्ततः सर्वोपिप्रहरणांगमितिचेतन॥ लिंगस्यसमाख्यायाबाधित्वात्तस्मिन्मंत्रेपूर्णमासदेवताम्नानंक
स्मिंश्चिद्भागेहृश्यते॥ अग्नीषोमाविदंहविरजुषेतामिति॥ भागांतरेतुदर्शदेवताम्नानं॥ इंद्राग्नीइदंहविरजुषेतामि
ति॥ इंद्रइदंहविरजुषतेति महेंद्रइदंहविरजुषतेतिच॥ इंद्राग्नीद्रमहेंद्राः पुरुषभेदनदर्शोव्यवस्थिताः॥ तथासतिमं
त्रलिंगेनतत्तद्भागवतत्कालेपवतिष्ठते सूक्तवाकशब्दश्चभागयोगिकः सूक्तंवक्तीतिव्युत्पत्तेः॥ यागकालेतन्मंत्रे
सम्यगुक्तंदेवंवक्तीत्यर्थः॥ अतएवब्राह्मणेनव्याख्यातं॥ अग्निरिदंहविरजुषतेत्याहयाअयाक्ष्मदेवतास्ताअरीरधामे
तिवाचैतदाहेति॥ अरीरधामअराधितास्मइष्टानकर्मेत्यर्थः॥ तस्मादयंविभज्यविनियुज्यते॥ ॥ सप्तमाधिकरण
मारचयति॥ ॥ ऐंद्राग्न्यादीष्टयः काम्यायाज्याअप्युदिताः क्रमात्॥ कांडयोस्तायथालिंगंसंचार्यानियमोथवा॥ लिंगं
क्रमसमाख्याभ्यांप्रबलंतद्व्यवस्थादमूः॥ अकाम्यास्वपिसंचार्यायाज्याः सर्वत्रकाक्षतिः॥ समाख्यानात्कांडयोगः क्रमादि
ष्टिषुयोजयोजनं॥ अपेक्षतेदवमात्रंशक्तिः काम्यकागास्ततः॥ काम्येष्टयस्तौस्तेडक्रमेणाम्नाताः॥ ऐंद्राग्नमेकादशकपा
लंनिर्वपेद्यस्यसजातावीयुरित्यादिनासजाताज्ञातयः वीयुर्विगताविप्रतिपन्नाइत्यर्थः॥ इंद्राग्नीरोचनेत्यादिकेमंत्रकां
डयोः प्रथमायामिष्टौप्रथमंपठितेयाज्यानुवाक्येइत्यादिव्यवस्थाक्रमेणाक्रियतेमंत्रगतंचैंद्राग्नलिंगंकाम्यायानित्या
यांचैंद्राग्नेष्टौतयाज्यानुवाक्याविनियुंक्तेलिंगंचप्रबलमितिसर्वत्रतयोर्विनियोगइतिप्राप्तेब्रूमः॥ नात्रलिंगेनक्रमसमाख्ये
बाधितुंशक्येते॥ उपजीव्यत्वादिंद्राग्निदेवतास्वरूपमात्रप्रकाशनंलिंगं॥ नचतावन्मात्रेणमंत्रकर्मणोरंगांगीभावः॥ न
तः समाख्याबलान्मंत्रकांडकर्मकांडयोः संबंधावगतौ सामान्येनमंत्रकर्मणोः संबंधोवगम्यते॥ विशेषतस्त्वस्मिन्प्रथ
मेकर्मण्ययंमंत्रः प्रथमइतिक्रमादवगम्यते॥ ननुऐंद्राग्नेष्टावैंद्राग्नमंत्रोनवैश्वानरमंत्रइत्येतादृशोविशेषोलिंगेनैवा
वगम्यतइतिचेतन॥ लिंगसाधारण्येक्रमापेक्षणात्॥ ऐंद्राग्नमेकादशकपालंनिर्वपेत्भ्रातृव्यवानितिद्वितीयेष्टिरपि
तत्रैंद्राग्नीपठितामंत्रकांडेपींद्राग्नीनवतमित्यादिकंपरमैंद्राग्नंयाज्यानुवाक्यायुगलमाम्नातंनहितत्रक्रममंतरेणनिर्ण

81/1945

तुंशक्यंते॥ नचक्रमेणैवतत्सिद्धेर्लिंगमप्रयोजकमितिवाच्यं॥ क्वचिल्लिंगस्यैवव्यवस्थापकत्वादैंद्राबार्हस्पत्येष्टिरेकैवाम्नाता
यंकामयेतराजन्यमनपाव्योजायेतइत्याग्नंश्च्वरेदिति॥ तस्मादेतमैंद्राबार्हस्पत्यंचरुंनिर्वपेदिति॥ यंराजपुत्रंजायमानंप्रति
राज्ञः पुरोहितस्ययाकामएवंभवति॥ अयमातृगर्भेदैवकृतविघ्नेनकेनाप्यप्रतिबद्धोजायतां॥ जातश्चशत्रून्मारयन्संचरेदिति॥
तद्राजपुत्रार्थेयमिष्टिर्मंत्रकांडेतदिष्टिक्रमेयाज्यापुरोनुवाक्येऐंद्राबृहस्पतिदेवताकेद्विविधेआम्नाते॥ इदंवामास्येहविरित्या
दिकमेकंयुगलं अस्मेइंद्राबृहस्पतीइत्यादिकंपरंमं॥ तयोः प्रथमयुगलस्यक्रमेणविनियोगेपिद्वितीययुग्मंलिंगेनैवविनियो
क्तव्यं॥ तस्मात्कर्मसमाख्यासहकृतेनलिंगेनकाम्येष्टिष्वेवतायाज्यानियम्यंते॥ ॥ अष्टमाधिकरणमारचयति॥ ॥आ
ग्नेय्याग्नीध्रमित्यग्निदेवताकाऋचोखिलाः॥ उपस्थानेप्रयोक्तव्याः प्रकृताएवताउत॥ साधारण्येनशब्दोक्तेः सर्वाभिस्तदु
पस्थितिः॥ विशेषविधिसंक्रान्त्याप्रकृताभिरितीष्यतां॥ ज्योतिष्टोमेश्रूयते॥ आग्नेय्याग्नीध्रमुपतिष्ठतइति॥ तत्राग्नीध्र
नामकस्यमंडपस्ययदुपस्थानंयद्ययाकयाचिदृचादाशतयीगतयाग्निसंबोधिन्याकर्तव्यं॥ अग्निर्देवतायस्याऋचसाग्ने
यीतिसाधारण्याच्छब्दविशेषस्याप्रतीतेरितिचेतमैवं॥ क्रतुप्रकरणपठितानामाग्नेयीनामृचांक्रतुप्रयुक्तव्यापारसाधन
त्वंप्रकरणादवगतं॥ कोसौव्यापारइतिविशेषबुभुत्सायामग्नीध्रोपस्थानरूपोयमितिबोधयन्नयंविधिर्विशेषमात्रेसंक्राम
तीतिलाघवं॥ अप्रकृतानांतुक्रतूपेक्षाव्यापारसाधनत्वंतद्व्यापारविशेषश्चेत्युभयमनेनबोध्यतइतिगौरवं॥ तस्मात्प्र
कृताभिराग्नेयीभिस्तदुपस्थानं॥ एवमैंद्र्यासदोवैष्णव्याहविर्धानंत्रसदोहविर्धानामकयोर्मंडपयोरुपस्थानेप्रकृताना
मेवैंद्रीणांवैष्णवीनांचप्रयोगइतिद्रष्टव्यं॥ ॥ नवमाधिकरणमारचयति॥ ॥ पक्षेहीत्यनुवाकोयंसर्वोभक्षणागामुत॥
ग्रहणादौयथायोगंविभज्यव्यवतिष्ठते॥ अविधेर्ग्रहणादीनांभक्षणेनिखिलोस्तकः॥ अर्थाक्षिप्तेषुतेष्वेवयथालिंगंविभज्य
ते॥ ज्योतिष्टोमेहुतस्यसोमस्यशेषभक्षणंविहितं॥ अतएवाम्नातं॥ अभिक्रम्याहवनीयेहुत्वाप्रत्यंचः॥ परेत्यसदसिसोमं
भक्षयंतीति॥ तस्मिन्भक्षणेग्रहणावेक्षणनिगरणसम्यग्जरणरूपाश्चत्वारोव्यापाराः संति॥ मंत्रश्चभक्षेहीत्याद्यनुवा
केसमाम्नातस्तत्रसमाख्यातुभक्षानुवाकइत्येवंरूपाभक्षणमात्रविषयातस्मात्कृत्स्नस्याप्यनुवाकस्यभक्षणएवविनि
नियोगइतिप्राप्तेब्रूमः॥ अविहितान्यपिग्रहणादीन्यर्थाक्षिप्तानितद्व्यतिरेकेणभक्षणासंभवात्॥ अतस्तेषुअनुवाकोय

थालिंगं विभज्य विनियोक्तव्यः॥ तत्र भक्षेहीत्यारभ्याश्विनोस्त्वा बाहुभ्यां सघ्यासमित्यंतो ग्रहणं प्रकाशयति॥ एहीत्याह्वान
स्य बाहुभ्यां स्वीकरवाणीत्येतस्य च दर्शनात्॥ नृचक्षसं त्वा देव सोम सुचक्षा अवख्येषमित्ययं भागो वेक्षणं प्रकाशय
ति॥ शोभनचक्षुरहं मनुष्येषु प्रख्यातं त्वामवेक्षिषीयेत्यभिधानात्॥ हिन्वमे गात्रेत्यादिर्मामेवाङ्नाभिमतीगा इत्यंतस्त
स्य जरणं प्रकाशयति॥ गात्रप्रीणनेनाधो भागनाभ्यतिक्रमणमिति निषेधेन च तदवगमात्॥ जरणं नार्थाक्षिप्तं तेन
विनापि भक्षसिद्धिरिति चेत्॥ न॥ जरणपर्यंतस्यैव सार्थकभक्षणत्वात्॥ न च जरणे पुरुषव्यापाराभावः॥ सम्यगुपवे
शनादेर्जरणार्थत्वात्॥ मंद्राभिभूतिरित्यादिर्भक्षयामीत्यंतो भक्षणं प्रकाशयति॥ तस्माल्लिंगेन समाख्यां बाधित्वा वि
नियोगः कर्तव्यः॥ ॥ दशमाधिकरणमारचयति॥ ॥ मंद्रेति वसुमच्चेति द्वयं तर्पणभक्षयोः॥ विभक्तव्यमुताशेषं तृ
प्तिसंयुक्तभक्षणे॥ लिंगाद्विभागो मैवं स्यात् तृप्तिभक्षणतोन्यतः॥ लिंगस्यासंभवं वाक्यशेषात् सर्वोस्तु भक्षणे॥ मंद्राभिभूतिरित्यादि
शुषाणा सोमस्य तृप्यत्वित्यंतो भागो हृद्याया अरुचिमभिभवंत्याः सोमं सेवमानायाः निकायास्तृप्तिं प्रकाशयति॥ वसुमद्गण
स्येत्यादिर्भक्षयामीत्यंतो भागो भक्षणं प्रकाशकस्तत्र पूर्ववल्लिंगेन विभज्य विनियोग इति चेन्मैवं॥ न खलु तृप्तिर्भक्षणादन्ये
नव्यापारेण जायते॥ किंतर्हि भक्षणानुनिष्पादिनी हि सा तथा सति कस्मिन्व्यापारे तृप्तिप्रकाशको भागो विनियुज्येत ततो
लिंगेन विनियोगासंभवाद्भक्षणमंत्रवाक्यस्य शेषस्तृप्तिप्रकाशको भागो भविष्यति उपयुक्तश्च तत्रायं सा गुरु तृप्तिसहि
तभक्षणप्रकाशनेन पुरुषोत्साहजननात्तस्मान्मंद्रादिः सर्वो भक्षणे विनियुज्यते॥ ॥ एकादशाधिकरणमारचयति॥ ॥
इंद्रपीतस्येति भक्षमंत्रांशः किमिदैंद्रकेः॥ केवलेन्यत्र वोहाच्च सर्वत्रोत यथाश्रुतं॥ ऐंद्र एव समर्थत्वात्तूष्णीमेवान्यभक्षणं
ऊहेवान्य॥ शुक्रमर्थस्य प्यस्त्यूहो भक्षभेदतः॥ इंद्रेण यस्मिन्सवने सोमः पीत इतीरणात्॥ सवनस्येषु सर्वेषु मंत्रो नूहेन प
श्रीः
ठ्यतां॥ भक्षमंत्रेकश्चिदंशः इंद्रपीतस्येत्येवं विधः श्रूयते॥ तत्रेंद्रेण पीतस्य सोमस्य शेषं भक्षयामीत्यर्थो भवति॥ तथा
सत्यस्य मंत्रस्यैंद्रप्रदानशेषभक्षण एव समर्थत्वात्तत्रैवायं मंत्रो विनियुज्यते॥ न तु मैत्रावरुणादिशेषभक्षणे तस्मादमंत्रकमेव तद्भक्षणमित्येकः पूर्वः पक्षः॥ इंद्रपीतस्येति पदस्यासमर्थत्वेपि मित्रावरुणपीतस्येत्येवमूहेति सामर्थ्यं भ ४३
विष्यति॥ नन्वाग्नेययागस्य प्रकृतित्वात्तद्गतस्याग्नये जुष्टमिति मंत्रस्य विकृतौ सौर्ये चरौ सूर्याय जुष्टं इत्येवमूहः कि

यते॥ इह तु कर्मैक्यान्नोह इति चेत् न॥ कर्मभेद इव भक्षभेदेप्यूहितं शक्यत्वादिति द्वितीयः पूर्वः पक्षः॥ इंद्रपीतस्येत्यत्र बहुव्री
हिर्द्रष्टव्यः॥ तत्पुरुषत्वे समासस्येति सूत्रेणांतोदात्तत्वप्रसंगात्॥ आद्युदात्तं चैतत्पदमाम्नातं॥ इंद्रप्रातिपदिकं तु स्वतः
आद्युदात्तं॥ तथा सति बहुव्रीहौ प्रकृत्या पूर्वपदमिति सूत्रेण पूर्वपदप्रकृतिस्वरविधानात्॥ समस्तं पदमप्याद्युदात्तमेव संप
द्यते॥ इंद्रेण पीतः सोमो यस्मिन्सवन इति विग्रहात्सवनपरत्वे सत्यैंद्रभक्षण एवेति नियंतुमसमर्थत्वात्सर्वभक्षणेष्वनूहेनै
वायं मंत्रः प्रयोक्तव्यः॥ इति राद्धांतः॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ ऊहपक्षे यदूह्यं तच्चिंत्यते न्यायपंचके॥ इंद्रहु
तेऽथ तच्छेषे होत्रकैश्च समस्थिते॥ सोमोभ्युन्नीयदेवेभ्यो हुत्वा संभक्षते तदा॥ इंद्रो न लक्ष्यो लक्ष्यो वा न शेषेन्यार्थता यतः॥ उ
न्नीत एव संबंधो न पूर्वो देवतांतरैः॥ अत इंद्रस्य सिध्यर्थे लक्ष्यो सावितरैः सह॥ पूर्वाधिकरणे योयमूहस्तो द्वितीयः पूर्वपक्ष
स्तत्प्रसंगात्कृत्वा चिंता रूपपान्यायपंचकमोहविषयाश्चिंत्यते॥ मैत्रावरुणब्राह्मणाच्छंसिपोत्रादयश्च लिंजो होत्रकास्तेषां
चमसांतिचमसाः पात्रविशेषस्थिताः सोमरसाश्चमसास्तेर्वषट्कारानुवषट्कारयोर्होतव्यं चमसानामेवं हुत्वा ह्यनुर्वषट्कारे प्र
थममिंद्रो हुतः॥ अनंतरं च समस्थितशेषे पुनः सोमांतरमभ्युन्नीय देवतांतरेभ्यो होत्रका अनुवषट्कारे जुह्वति॥ तत्र मैत्रा
वरुणो मित्रं वयं हवामह इति मंत्रेण मित्रावरुणौ जयेति ब्राह्मणाच्छंसी इंद्रं त्वा वृषभं वयमिति मंत्रेणेंद्रं यजति॥ पोता मरुतो
यस्य हि क्षय इति मंत्रेण मरुतो यजति॥ एवं हुत्वा पश्चात्सोमो भक्ष्यते तस्मिन्भक्षणे मित्रावरुणपीतस्येति मंत्र ऊहनीयः
॥ तदानीमिंद्रमित्रावरुणपीतस्येत्येवं मित्रावरुणाभ्यां सहेंद्र उपलक्षणीयः॥ कुतः इंद्रशेषे पुनरभ्युन्नीतस्यतेन शेषेण स
ह मित्रावरुणार्थत्वे सति तस्य शेषस्येंद्रसंबंधराहित्यात्॥ पुनरुन्नीतस्यैवान्यार्थत्वं न पूर्वस्येति चेत् न॥ उन्नयनकालेन ह
मित्रावरुणाद्यर्थोयमिति संकल्पाभावात्॥ प्रदानकाले तु पूर्वशेषेण तत्सहैव मित्रावरुणादिभ्यः प्रदीयते तस्मादिंद्रसंबं
धराहित्यान्नेंद्रो लक्षणीय इति प्राप्ते ब्रूमः॥ मा भूत्संकल्पस्तथाप्युन्नयनं करिष्यमाणं मित्रावरुणादियागार्थमेव॥ न तु तस्य
पूर्वानुष्ठितेंद्रयागार्थत्वं संभवति॥ तस्मादुन्नीमित्रावरुणादिसंबंधः शेष इंद्रसंबंध एवेत्युभयभक्षणे मित्रावरुणादिभिः॥
सहेंद्रोप्युपलक्षणीयः॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥ द्विदेवशेष आदित्यस्थाल्यामाग्रयणाभिधांस्थालीं प्रा
प्तस्ततः पात्नीवतस्य ग्रहणे सति॥ तद्गणे द्विदेवाः किं सार्धं पात्नीवतेन त॥ उपलक्ष्या न वा पूर्वन्यायेनास्तूपलक्षणं॥ अन्य

83
1945

47538

आग्रयणात्पात्नीवतोनैतस्यविद्यते॥ आकांक्षापूर्वदेवेषुपत्नीवानेषुलक्ष्यते॥ ऐंद्रवायवादयोर्हि देवत्यास्तेषांत्रेषं आदित्यस्था
लीमागच्छति॥ पुनरपितस्याः स्थाल्या आग्रयणस्थालीमागच्छति॥ तस्या आग्रयणस्थाल्याः पात्नीवतोगृह्यतेतस्यपात्नीवतस्य
भक्षणेंद्रवायवादयउपलक्षणीयाः॥ पूर्वाधिकरणेमित्रावरुणादिभिः सहेंद्रउपलक्षितः तद्वदितिप्राप्तेब्रूमः॥ यदुपांशुपा
त्रेण पात्नीवतंआग्रयणात्गृह्णातीत्याग्रयणपात्रस्यापादानत्वश्रवणात्रतोनिःसृतस्यसोमरसस्यतत्संबंधोपेतेसतिष
श्चात्पत्नीतद्देवतायेग्रहणंभवतितश्चासत्यत्वंतभिन्नस्यपात्नीवतस्यपूर्ववद्देवघ्राकांक्षानास्तिपुनस्युन्नीतस्तुसोमऐंद्रवा
यणसंसृष्टः॥ तस्यसंसृष्टस्यभक्षणेमैत्रावरुणादीनामिवेंद्रस्यापिसंबंधोनापैतीतिवैषम्यं॥ तस्मात्पात्नीवतभक्षणेइंद्रवाय्वा
द्योनोपलक्षणीयाः॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥सहपत्नीवतात्वष्टातद्धहेलक्ष्यतेनवा॥ सहत्वष्ट्रापिबेत्युक्तेर्दे
वत्वात्सोपिलक्ष्यते॥ सहत्वमात्रंत्वष्टुःस्यातनपातृत्वमशब्दवत्॥ चोदनाया अभावाच्चनदेवोतात्रलक्ष्यते॥ तस्मिन्नेवपत्नी
वतग्रहशेषभक्षणमंत्रेपत्नीवतासहत्वष्टाप्युपलक्षणीयः॥ कुतःत्वष्टुरपितद्देवत्वात्॥ तच्चहोममंत्रादवगतं अग्न्याइत्
पत्नीवाःसजूर्देवेनत्वष्ट्रासमंपिबस्वाहेत्यस्मिन्मंत्रेपात्नीवतंमग्निपूर्तातेनपदेनसंबोध्यत्वष्ट्रादेवेनसहपिबेत्यभिधाना
त्॥ पातृत्वेनपात्नीवतइवत्वष्टासजूरित्यनेनपदेनप्रतीयते॥ नतुपातृत्वेअसंबोधितस्यत्वष्टुः पिबेत्यनेनशब्देनसमाना
धिकरण्याभावात्॥ नचपातृसहभावमात्रेणपातृत्वं॥ सहैवदशभिःपुत्रैर्भारंवहतिगर्दभीत्यपुत्रपुत्राणांवोढृत्वादर्शना
त्॥ आस्तांमंत्रःविधिबलात्त्वष्टुर्देवत्वमितिचेत्॥ नपात्नीवतमाग्रयणम्गृह्णातीत्यत्रत्वष्टुरप्रतीतेः॥ तस्मादवदेवत्वात्
त्वष्टानोपलक्षणीयः॥ ॥पंचदशाधिकरणमारचयति॥ ॥पात्नीवंतस्त्रयस्त्रिंशद्देवास्तान्मादयेत्यमी॥ लक्ष्यानवा
याज्ययोक्तेर्देवत्वादुपलक्षणं॥ एकोग्निर्यजमानेनमादितोन्येतुवह्निना अतोग्नेरेवदेवत्वान्नान्येषामुपलक्षणं॥ तस्य
वपात्नीवतग्रहणस्ययाज्यायामग्निंसंबोध्यपत्नीवन्नामधारिणस्त्रयस्त्रिंशद्देवान्मादयेत्यभिधीयते॥ पत्नीवतस्त्रिंश
तंत्रींश्चदेवाननुष्वधमावहमादयस्वेति॥ अनुष्वधमनुप्रधानं॥ अत्रइज्यमानेनसोमरसेनमादनीयत्वात्त्रयस्त्रिंशतांतद्दे
वत्वंअतस्तेपिभक्षणेलक्षणीयाइतिचेत्न॥ यजमानेनमादनीयस्याग्नेरेवतद्देवत्वात्॥ त्रयस्त्रिंशद्देवास्तुवह्निनामा
द्यंतइतिनतेषामत्रदेवत्वंतस्मान्नोपलक्षणं॥ ॥षोडशाधिकरणमारचयति॥ ॥सोमस्याग्नइतिप्रोक्तावानुवषट्कारदे

श्रीः
४२

वता॥ लक्ष्यानवादेवतात्वाल्लक्ष्यात्रिंशद्विलक्षणा॥ प्रकृतोविद्यमानोग्निरनुद्देशादलक्षितः॥ उद्देश्यऐंद्रोलक्षितोतोविकृतावपि
तत्तथा॥ सोमस्याग्नेवीहीत्यनुयजतीतिश्रूयते॥ तत्रानुवषट्कारस्यमांत्रवर्णिकोग्निर्देवतानचत्रयस्त्रिंशद्देवतानामिववह्नेर्देवता
त्वं॥ मंत्रेवह्निंसंबोध्यसोमपातृत्वाभिधानात्॥ तस्मादग्निर्लक्षणीयइतिचेत्न॥ प्रकृतावलक्षितत्वात्॥ ऐंद्रश्चमसः प्रकृतिः
इतरेविकृतिरूपाः तत्राहिऐंद्रस्थः सोमोगृह्यतेमीयतेचतेनैंद्रेष्वेवसोमःअनैंद्रेषुसोमत्वानास्तीतिसर्वसोमधर्माऐंद्रेष्वेव
अनैंद्राअधर्मकाधर्मसाकांक्षाश्चोदकेनसर्वधर्मकाइतिविकृतित्वंगृह्यमाणस्यमीयमानस्यचसोमस्यैंद्रत्वमिंद्रायत्वा
वसुमतइत्यादेर्ग्रहणमंत्रादवगम्यते॥ तस्यप्रकृतिभूतस्यैंद्रचमसस्यसभक्षणेग्निरनुवषट्कारदेवतोपलक्षितः॥ कुतःग्रह
णेतदुद्देशाभावात्॥ इंद्रस्तूद्देश्यत्वादुपलक्षितः॥ एवंविकृतावप्युद्देश्यदेवानामेवोपलक्षणंन्याय्यं॥ तस्मादग्निर्नोपलक्ष्यः
॥ ॥सप्तदशाधिकरणमारचयति॥ ॥अमंत्रपक्षमाश्रित्यकृत्वाचिंतांतरत्रये॥ ऊहोस्तिनोवासोस्त्यत्रविकृतौतस्यसंभवा
त्॥ सोमेनेतिविधेःसर्वप्रदानेषुसमत्वतः॥ अधिकारेत्वनूहोतोनैंद्रेनिर्मंत्रभक्षणंउक्ताभ्यःपंचभ्यःकृत्वाचिंताभ्यःपूर्वस्मि
न्नेवाधिकरणेयोयमनैंद्रेषमंत्रभक्षणमित्येवंरूपःप्रथमःपूर्वःपक्षः॥ तमेवमनसिनिधायपुनःकृत्वाचिंतितान्नंत्रयम
भिधीयते॥ यतअनैंद्रेषूत्कृतीत्याविकृतित्वेनोहसंभवादस्त्यूहइतिचेत्न॥ अनैंद्राणाविकृतत्वसंभवात्॥ सोमेनयजेतेत्युत्पत्तिः
श्रुतःसोमःकर्मणोंगंनतुप्रदानविशेषस्यकस्यचिदंगंसएवसोमःसर्वप्रदानेष्वभ्यस्यतइतिसर्वाणिसमप्रधानानिअतऐं
द्राणामनैंद्राणांचप्रकृतिविकृतिभावासंभवान्नास्त्यत्रोहः॥ इंद्रायत्वावसुमतमित्यादिमंत्रोलिंगादैंद्रविषयोस्तुनैतावताप्रकृ
तिविकृतिभावःसिद्ध्यतितस्मादुक्तमंत्रस्यलिंगादैंद्रमात्रविषयत्वादितरेष्वमंत्रकंभक्षणं॥ ॥अष्टादशाधिकरणमारच
यति॥ ॥समंत्रकममंत्रंवास्यादैंद्राग्न्यादिभक्षणं॥ ऐंद्राग्नेपींद्रपीतत्वसंभवात्तत्समंत्रकं॥ नपानमशरीरस्ययुक्तंदानंतु
मिश्रगं॥ मंत्रोयंतुनमिश्रार्हस्तस्मादेतदमंत्रकं॥ यदेतदैंद्राग्नंगृह्णातीतिविहितशेषभक्षणं॥ तत्रैंद्राग्निभ्यांपीतःसोमइंद्रे
णापिपीतोभवतीतिलिंगेनैवविनियोगात्समंत्रकंभक्षणमितिचेत्मैवं॥ नवमाध्यायेवक्ष्यमाणदेवताधिकरणन्यायेनअ
शरीरस्येंद्रस्यपानासंभवात्॥ अथपीतशब्देनदानंविवक्ष्यतेतदानीमिंद्रायदत्तःसोमइतिमंत्रार्थोभवति॥ नचात्रयजमा
नइंद्रमुद्दिश्यददौकिंत्विंद्राग्नीउद्दिश्यतस्माद्दानंमिश्रविषयंमंत्रस्तुनमिश्रविषयःइतिअमंत्रकंभक्षणं॥ ॥एकोनविंश

85
1945

अ॰ क्र॰ माला॰

४३

धिकरणमारचयति॥ ॥ ऐंद्रदानेविगायत्रमात्रयुक्तेथवेतरेः॥ छंदोभिरपियुक्तस्यादाद्योमंत्रेतथोक्तितः इयोः समोबहुव्री
हिरेकछंदास्कनक्वचित॥ नानाछंदस्येंद्रएवकृत्वाचिंतेत्थमीरिता॥ सर्वनार्थेंद्रपीतोक्तिरित्युद्घाटणमीरितं॥ तेनसर्वप्रदानेपु
मंत्रपाठोयथास्थितः॥ तस्मिन्नेवभक्षणमंत्रेगायत्रछंदसइंद्रपीतस्येतिश्रूयतगायत्रमेवछंदोयस्येतिमंत्रपदेसमासाभि
धानादेकछंदोयुक्तेऐंद्रसोमभक्षणमंत्रइतिचेतमैवं॥ बहुछंदोयुक्तेपिबहुव्रीहेः समानत्वात॥ एवकारंपरित्यज्यगायत्रंछंदो
यस्येतिविग्रहसंभवाद॥ एकछंदस्कस्कसोमोनक्वाप्यस्तितस्मान्नानाछंदस्केसोमेऐंद्रप्रदानमंत्रोनान्यत्रतदेवंकृत्वाचिंतात्र
यंसमाप्तंद्विविधंकृत्वाचिंतोद्घाटनातुप्रागेवसिद्धांतिनादर्शिता॥ ॥इतिश्रीमाधवीयजैमिनिन्यायमालाविस्तरेतृतीया
ध्यायःस्यद्वितीयःपादः॥ २ ॥ ॥ तृतीयपादप्रथमाधिकरणमारचयति॥ ॥ कर्तव्यमुच्चैः सामर्ग्भ्यामुपांशुयजुषेत्य
मी॥ मंत्राणांवाथवेदानांधर्मामंत्रगतायतः॥ विध्युद्देशेमंत्रवाचिशब्दाः प्रोक्ताः ऋगादयः॥ ऋग्वेदोग्नेः समुत्पन्नइत्युपक्र
मवेदगीः॥ असंजातविरोधोतस्तद्वशादुपसंहृतः॥ नयनेसतिवाक्येनधर्माणांवेदगामिता॥ ज्योतिष्टोमेश्रूयते॥ उच्चैरृचा
क्रियतेउपांशुयजुषाउच्चैः साम्नेति॥ तत्रविधिवाक्येमंत्रवाचिनामृगादिशब्दानांप्रयोगान्मंत्रधर्माउच्चैस्त्वादयस्तथास
तियजुर्वेदोत्पन्नाअध्वर्युणाप्रयुज्यमानाअप्यृचउच्चैरेवपठितव्याइतिचेतमैवं॥ असंजातविरोधित्वेनप्रबलमुपक्रममनु
सृत्यतद्वशेनोपसंहारस्यनेतव्यत्वात॥ उपक्रमेहिवदशब्दःश्रुतः त्रयोवेदाअसृज्यंत अग्नेर्ऋग्वेदोवायोर्यजुर्वेदः आदित्या
त्सामवेदइति॥ अतउपक्रमवेदानुसारेणविध्युद्देशगतानामप्यृगादिशब्दानांवेदपरत्वेसत्यृचोपियजुर्वेदोत्पन्नाउपांशुपठ
नीयानं॥ नूपक्रमार्थवादत्वातदुर्बलः उपसंहारोपिविध्युद्देशत्वात्प्रबलइतिचेत्नबाढं॥ लब्धात्मनोहिविध्युद्देशस्यप्राबल्यं॥
इहतुप्रथमोतोविध्युत्पादकउपक्रमस्तदधीनलब्धात्मकत्वान्नतस्यबाधकत्वं॥ पश्चात्तुवाक्यैकत्वायतदविरोधेनेवात्मा
नंलभ्यते॥ तदेवंमुपक्रमोपसंहारैकवाक्यताबलेननिर्णयाद्वाक्यविनियोगोयं॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥
यजुर्वेदरूढमाधानंतदंगंसामतत्रकिं॥ उच्चैरुपांशुवागानमुच्चैः शीघ्रप्रवर्तितः॥ उत्पत्तेर्विनियोगोत्रप्रबलोनुसृतिर्यतः
मुख्यस्यांगेनकर्तव्यातस्माद्गानउपांशुता॥ आधानस्यात्रमुख्यत्वंगानस्यगुणताथवा॥ विनियोगस्यमुख्यत्वमुत्पत्ते
र्गुणतास्थिता॥ आधानेवामदेव्यादिसामान्यंगत्वेनविहितानितत्रयद्यप्येतानियजुर्वेदगतस्याधानस्यांगानि॥ तथापिसा

श्रीः

४३

मवेदेतेषांमुत्पन्नत्वादुत्पत्तेश्चशीघ्रबुद्धिहेतुत्वात्सामवेदधर्मेणगेयानीतिचेत न॥ विनियोगस्यप्रबलत्वात॥ सचयजुर्वेदे
श्रुतः यएवंविद्वान्वामदेव्यंगायतीतिगुणोनहिमुख्यस्यानुसरणंन्याय्यं॥ कोगुणः किंमुख्यमितिचेत॥ अत्रांगित्वादा
धानंमुख्यंसामगानस्यांगत्वेनगुणस्तथासतिधर्मः॥ शिरइत्यादयआधानांगभूतामंत्रायथोपांशुपदेतितथासामान्य
प्याधानानुसारेणोपांशुगेयानि॥ अथवाविनियोगोहुत्पादकविधित्वान्मुख्यः॥ उत्पत्तिविधिरतथाविधत्वाद्गुणस्तत्रविनि
योगवेदानुसारेणोपांशुगेयानि॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ ज्योतिष्टोमोयजुः सामवेदयोरस्तितत्रकिं॥ उच्चै
स्त्वमुतनीचैस्त्वंहेत्वभानादनिर्णयः॥ यजुष्यधिगतेद्रव्यदेवतेतत्रतद्विधिः॥ तद्वशात्स्वरनिर्णतेरुपांशुस्यादनुष्ठितिः॥ ज्यो
तिष्टोमेनस्वर्गकामोयजेतेत्येतद्वाक्यंवेदद्वयेसमाम्नातं॥ तत्रकोविधिः॥ कश्चगुणविधानायानुवादइतिजिज्ञासायांनिया
मकहेतोरप्रतिभानादेतस्यवेदस्यधर्मोनुष्टेयमितिअनिर्णयइतिचेत न॥ सोमद्रव्यस्येंद्रवाय्वादिदेवतायाश्चयजुर्वेदाधि
गतत्वात॥ अंगबाहुल्यश्रवणात्चतत्रैवविधिरित्युपांशुप्रयोगः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ नक्रत्वंगंप्रयाजा
दिक्रत्वंगंवानचांगता॥ प्रक्रियायाअमानत्वान्नैराकांक्षेणवाक्ययोः॥ प्रयाजादेः फलेपक्षाकथंभावेपिचक्रतोः॥ तेनप्र
करणाम्नातंतस्मादंगागितातयोः॥ साधिवादद्वयेयानिविनियोजकत्वेनोक्तानिश्रुतिलिंगवाक्यानितेभ्योतिरिक्तंप्रकरण
नामकंकिंचित्प्रमाणंनवेदेपश्यामः॥ नहिपदतत्सामर्थ्यान्वयैरसंस्पृष्टः कश्चिद्वेदभागः केनचिदाम्नायते॥ एकवाक्यता
मापन्नोवाक्यसमूहः प्रकरणमितिचेतन॥ वाक्ययोः सतोः पश्चादेकवाक्यतायाअभावात॥ नहिपूर्णमासाभ्यांस्वर्गका
मोयजेतसमिधोयजतीत्यनयोर्वाक्ययोः परस्पराकांक्षास्तियेनवाक्यैकताकल्प्येत तस्मान्नप्रयाजादीनांदर्शपूर्णमासांगत्व
मितिप्राप्तेब्रूमः॥ प्रयाजादयः फलहेतवः पुरुषप्रवृत्तिरूपत्वात्सेवादिव२ दर्शपूर्णमासावुपकरणोरुपकार्यौकरणत्वात्प्रदी
दीपापकृतचक्षुर्वत॥ तथासतिकिंप्रयाजादेः फलंकिंवादर्शपूर्णमासयोरुपकरणमित्याकांक्षायांसंपन्नवाक्यैकवाक्य
तारूपंप्रकरणंतेनप्रयाजादीनामंगत्वंप्रमीयते॥ ॥ पंचमाधिकरणमारचयति॥ ॥ दब्धिनामेतिमंत्रोंगमुपांशुयज
तेर्नवा॥ साधारणत्वाल्लिंगादेर्नामभावादनंगता॥ मंत्राणांकर्मणांचात्रकर्म्मणाम्नानमीक्ष्यते॥ प्रक्रियावत्क्रमोमानंयथा
संख्यमतोंगता॥ क्रमः समानदेशत्वंपाठादर्थाच्चपाठतः यथासंख्यंसंनिधिश्चयथासंख्यमुदाहृतं॥ शुंधध्वमितिसांनाय्य

87/1945

पात्रांगसंनिधेर्मतं॥ परकृधर्मोथसादेश्याद्ग्नीषोमीयगोभवत्॥ दर्शपूर्णमासयोर्याजमानेमंत्रकांडेकश्चिन्मंत्रआम्नायते॥
दब्धिरस्यदब्धोभूयासममुंदभेयमिति॥ अस्यमंत्रस्योपांशुयाजांगतायांश्रुतिवाक्येन विधेते॥ ब्राह्मणेविनियोगमनाम्न
र्थविवरणस्यैवाम्नानात्॥ एतयावैदब्ध्यादेवाअसुरानदभ्नुवन् तयैवभ्रातृव्यंदभ्नोतीतिब्राह्मणेदब्धिर्वारकमायुधं॥अ
ग्नेआग्नीषोमीययोरप्यनिष्टवारकत्वाल्लिंगंसाधारणंप्रकरणंचत्रयाणामेकमेव॥ ततोमानाभावादयंमंत्रोनोपांशुयाजांग
मितिप्राप्तेब्रूमः॥आध्वर्यवेकांडेआग्नेयोपांशुयाजाग्नीषोमीयकर्म्माणिक्रमेणाम्नातानि॥ याजमानेचकांडेतद्विषया
मंत्राः क्रमेणाम्नाताः॥अग्नेरहंदेवयज्ययान्नादोभूयासंदब्धिरस्यदब्धोभूयासममुंदभेयमग्नीषोमयोरहंदेवयज्ययावृत्र
हाभूयासमिति॥तत्रयथावाक्यद्वयानुसंधानसंपन्नः क्रमः कुतोनमानंस्यात्॥नचास्यप्रकरणेंतर्भावः॥द्वयोर्वाक्य
योरिवप्रकरणयोरेकवाक्यत्वाभावात्॥ तस्मात्क्रमेप्रमाणेनमध्यवर्तिनउपांशुयाजस्यमध्यवर्त्तीमंत्रोंगं॥ समान
देशत्वंक्रमइतिक्रमस्यस्वरूपं॥ तच्चद्विविधंपाठकृतमर्थकृतंच॥ तत्रपाठकृतमपिद्विविधंयथासंख्यंसंनिधिश्चेति
तयोराद्यस्यदधिमंत्रउदाहरणं॥ शुंधध्वंदैव्यायकर्मणइत्ययंमंत्रः॥ शोधनीयेषुवस्तुषुसाधारणोभासते॥ तत्रसा
न्नाय्यपात्राणिकुंभीशाखापवित्रादीन्यन्यतरेषुमातरिश्वनइत्यादिमंत्रेष्वेवभासंतेइतिसंनिधिनातत्पात्रप्रोक्षणेशुं
ध्वमितिमंत्रोविनियुज्यते॥ अनुष्ठानसादेश्यात्परकृधर्माणामग्नीषोमीयांगत्वंतदेवंक्रमस्यस्वरूपंविध्यंद्रव्यंष्ट॥ ॥षष्ठा
धिकरणमारचयति॥ ॥ वेदत्रयोक्तधर्माणामृत्विग्भिः संगतिस्त्रिभिः॥ अनियत्यानिपत्यावानियतिर्नानिरूपणात्॥हो
त्रादिसमाख्यानंनियतेर्गमकंस्वतः॥ निर्बाधंचान्यवत्तच्चतेनात्रविनियोजकं॥ याज्यापुरोनुवाक्यापाठादयोधर्माऋग्वे
देशाखादोहननिर्वापादयोयजुर्वेदआज्यस्तोत्रपृष्ठादयः सामवेदे॥ तत्रास्थ्येवैतेधर्माइतिनियामकस्यदुर्निरूपत्वात्॥
येनकेनाप्यृत्विजादयः कोपिधर्मइच्छयासंगच्छतइतिचेन्मैवं॥ हौत्रमाध्वर्यवमौद्गात्रमितिसमाख्यातेननियतिर्बोध्यते॥
नचसमाख्यानस्यबाधकंकिंचित्पश्यामः॥ तस्माद्बाधकत्वाभितस्योरप्रामाण्यकारणयोरभावात्श्रुतिलिंगादिप्र
त्यकवत्प्रमाणेनसमाख्यानेनधर्मास्त्ववस्थाप्यंते॥ ॥सप्तमाधिकरणमारचयति॥ ॥ऐंद्र्यापस्थीयतां
वह्निरितींद्राग्न्योर्विकल्पनं॥समुच्चयोवोतशक्रस्याग्निः केवलोथवा॥ विकल्पः श्रुतिलिंगाभ्यां गुणत्वात्समुच्चयः॥श्रुति

89
1995

शास्त्यनुसारीविशक्रएकोत्रलिंगगतः॥ शक्तिरुक्ताश्रुतिः शीघ्रालिंगंश्रुत्यनुमापकं॥ नैराकांक्षात्मकेबोधेश्रुत्यावाकेवले
स्थितिः॥ ऐंद्र्यागार्हपत्यमुपतिष्ठतइतिश्रूयते॥ कदाचननस्तरीरसिनेंद्रसश्चसिदाशुषे॥ इत्यसावैंद्रीतत्रेंद्रस्यप्रकाशनात
भोइंद्रकदाचिदपिघातकोनभवसिकिंतुदत्तवतेयजमानायश्रीयसइत्यर्थः॥ तत्रेंद्रप्रकाशनसामर्थ्यरूपाल्लिंगान्मंत्रस्ये
विषयक्रियासाधनत्वंगम्यते॥ यद्यसौमंत्रइंद्रप्रधानक्रियायाः साधकोनभवेत्तदानीमनेनमंत्रेणेंद्रप्रकाशनंव्यर्थंस्यात्त
स्मादेतन्मंत्रकरणकक्रियांप्रतिइंद्रः प्रधानमित्येतावद्बुध्यत्पादनेलिंगविनियोगः कासौक्रियेतिविशेषजिज्ञासायामैंद्र्या
पतिष्ठतइत्यनेनविरुद्धपदद्वयरूपेणवाक्येनोपस्थानंक्रियायांपर्यवसानंक्रियते॥ तथासत्यैंद्र्येणेंद्रमुपतिष्ठेतेत्ययमर्थः
पर्यवस्यति॥ तथागार्हपत्यइत्यनयाद्वितीयांतपदरूपयाश्रुत्यागार्हपत्यस्यप्राधान्यंगम्यते॥ नचगुणभूतांयत्किंचित्क
रणकक्रियामंतरेणनसंभवति॥ ततः स्ताद्दशींकांचित्क्रियांप्रतिगार्हपत्यः प्रधानमित्येतावद्बुद्ध्युत्पादनंश्रुतिविनियोगः
॥ऐंद्र्योपतिष्ठतेइतिपदद्वयेनमंत्रविशेषक्रियाविशेषयोः पर्यवसानंभवति॥ तथासत्यैंद्रेणमंत्रेणगार्हपत्यमुपतिष्ठतइ
त्यर्थोभवति॥ तदेवंश्रुतिलिंगयोर्विरोधेसतिप्रमाणत्वाविशेषाद्व्रीहियववद्विकल्पइत्येकः पूर्वः पक्षः॥ यइंद्रगार्हपत्ययोः
प्रधानत्वाविशेषादुपस्थानस्यचगुणत्वात्प्रतिप्रधानंगुणावृत्तिरितिन्यायेनोपस्थानावृत्त्याश्रुतिलिंगयोः समुच्चयइति
यः पूर्वः पक्षः॥ श्रुतिर्विनियुंजानावस्तुसामर्थ्यमनुसृत्यैवविनियुंक्ते॥ अन्यथावह्निनासिंचेद्वारिणादहेदित्यपिविनियु
ज्येत॥ ततउपजीव्यत्वेनलिंगस्यप्रबलत्वादिंद्रएवमंत्रेणोपस्थेयइतितृतीयः पूर्वः पक्षः॥ ऐंद्रमंत्रस्यगार्हपत्येमुख्य
वृत्त्याशक्यभावेगुणवृत्त्याशक्तिरस्तीतिनिवेशनइतिअस्मिन्नुदाहरणेपूर्वमेवदर्शितं॥ तथासतिसामर्थ्याभावकृतप्र
तिबंधभावान्निर्विघ्नाश्रुतिः शीघ्रंविनियुंक्ते॥ लिंगंतुविलंबतेमंत्रपदान्यादौस्वाभिधेयमर्थंप्रतिपादयंति॥ ततऊर्ध्वं
मंत्रस्यसामर्थ्यंनिरूप्यतेपश्चात्सामर्थ्यवशात्साधनत्ववाचिनीप्राधान्यवाचिनीचश्रुतिः कल्प्यते॥ साचश्रुतिर्मं
त्रेणेंद्रमुपतिष्ठतेइतिविनियुंक्ते॥ तथासतिप्रत्यक्षश्रुतौस्वाभिधेयप्रतिपादनविनियोगयोर्मध्यवर्तिनौसामर्थ्यनिरूपणश्रु
तिकल्पनव्यापारौनस्तइतिप्राबल्यात्तयालिंगंबाध्यते॥ नचप्रत्यक्षश्रुतिविनियोगवेलायांअलब्धात्मकत्वेनाप्राप्तंलिं
गंकथंबाध्यतेतिशंकनीयंभविष्यत्प्राप्तिप्रतिबंधकस्यैवात्रबाधकत्वात्श्रुत्याविनियुक्तस्यमंत्रस्यपुनर्विनियोगा

कांक्षाया अनुदयाद्विनियोजकं लिंगं कथं प्राप्स्यति तस्माद्गार्हपत्योपस्थाने मंत्रः प्रत्यक्षश्रुत्या नियुज्यते॥ ॥ अष्टमाधिकरणमारच
यति॥ ॥ स्योनं त इति पूर्वार्द्धं तस्मिन्सीदेति चोत्तरं॥ सादने सादने चार्थ्सर्वार्थाई व्यवस्थिते॥ तद्वद्वाक्यं वाक्यत्वे सेदाद्यः श्रुतिं
प्रति॥ लिंगस्य सन्निकृष्टत्वात् द्वाक्य बाधव्यवस्थितिः॥ उदाहरतीति यं वाक्य बाधेन त्वेद्रियेत्यसौ॥ बाधादूर्ध्वं निरर्थत्वाद प्रामाण्य
प्रसंगतः॥ दर्शपूर्णमासयोः श्रूयते॥ स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणा
मेध सुमनस्यमान इति भो पुरोडाश तव समीचीनं स्थानं करोमि तच्च स्थानं घृतस्य धारया सुष्ठु सेवितुं योग्यं कल्पयामि भो व्रीहि
सारभूत त्वं समाहितमनस्कस्तस्मिन् समीचस्थाने उपविश तत्र स्थिरो भवेत्यर्थः॥ तत्र तस्मिन्नित्येतेन तच्छब्देन प्रकृतवाचिना
पूर्वोत्तरार्धयोरेकवाक्यत्वे सति मंत्रद्वयारम्भावात्॥ सर्वोऽप्ययं मंत्रः स्थानकरणस्यांगं॥ तत्र विनियोजिका श्रुतिरेवं कल्पयोनीसर्व
णानेन मंत्रेण स्थानं कर्तव्यमिति॥ तथा सर्वेण पुरोडाश स्थापनीयः इत्यपि कल्पनीया सदनांगत्ववत्॥ प्रतिष्ठापनांगत्वस्यापि
तद्वाक्य बाधितत्वात्॥ तथा सति सदनस्थापनयोरस्य मंत्रस्य विकल्पः समुच्चयो वा स्वेच्छया भविष्यतीति प्राप्ते ब्रूमः॥ तदेतत्पूर्वोत वि॰
तरार्द्धयोः परस्परान्वयेन संपन्नमेकवाक्यं तदेतदुत्तरार्धस्य सदनकरणे शक्तिमकल्पयित्वा कृत्स्नं मंत्रं सदने नियोक्तुं नार्हति॥
तथा पूर्वार्द्धस्य स्थापने शक्तिमकल्पयित्वा न तत्र प्रभवति॥ अतो लिंगकल्पनं व्यवधानेन वाक्यं श्रुतिं प्रति विप्रकृष्यते॥ प्रत्यक्षं तु
लिंगद्वयं सन्निकृष्यते तथा सति लिंगेन वाक्यबाधादर्थद्वयं उभयोर्व्यवस्थितं॥ नन्वैन्द्र्या गार्हपत्यमित्यत्रापि पदद्वयान्वयरूपस्य वाक्य
स्य विनियोजकत्वप्रतीतेर्लिंगवाक्यविरोधायतदेवोदाह्रियतामिति चेत॥ मैवं॥ तत्र लिंगेन वाक्ये बाधिते सत्येकैकपदस्यार्थप्रत्याय
कत्वाभावे न श्रुतिकृतविनियोगस्याप्यसिद्धेरप्रामाण्यमेवोदाहृतस्य प्रसज्येत इह तु मस्थ वाक्ये बाधितेऽप्यवांतरवाक्ययोरर्थप्रती
तेर्लिंगविनियोगः प्रसिद्ध्यतीत्येतदेवोदाहरणं॥ ॥ नवमाधिकरणमारचयति॥ ॥ अग्नीषोमाविदं हव्यमजुषेतामिति क्रारि श्रीः
नातमात॥ अपच्छिद्येदमित्यादि सर्वं शेषो भवेन्नवा॥ प्रक्रियातो भवन्नैवं प्रक्रियांतरितात्रिभिः॥ वाक्यं द्वयंतरितं मेन भवत्प्रकर
णाद्बलि॥ सूक्तवाके श्रूयते॥ अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महोज्यायोऽक्रातामिंद्राग्नी इदं हविरजुषेतामवीवृधेतां महो ४५
ज्यायोऽक्रातामित्यादिनाब्दे तत्र देवतावाचकमग्नीषोमादिपदं पौर्णमास्यादिकाले यथादेवतं विभज्य प्रयोक्तव्यमिति पूर्वपादे
निर्णीतं यच्चिदं हविरित्यादिकमविशिष्टं पदजातं तदग्नीषोममंत्रगतमप्यमावास्यायामग्नीषोमपदपरित्यागेन पठनीयं॥

91
1945

एवमिंद्राग्नी मंत्रगतमपि पौर्णमास्यामिंद्राग्निपदपरित्यागेन पठनीयं॥ तथा सत्यपि मंत्रभागानां सर्वशेषत्वबोधको दर्श
पूर्णमासप्रकरणपाठोऽनुगृह्यत इति प्राप्ते ब्रूमः॥ अग्नीषोममंत्रशेषस्येंद्राग्निपदान्वयाश्रवणात् प्रकरणेन प्रथमं तदन्व
यरूपं वाक्यं कल्पनीयं तेन वाक्येनेंद्राग्निप्रकाशनसामर्थ्यरूपं लिंगं कल्प्यते॥ तच्च लिंगमनेन मंत्रभागेनेंद्राग्निविषया
क्रियानुष्ठेयेति विनियोजिकां तृतीयां श्रुतिं कल्पयति॥ ततः प्रकरणविनियोगयोर्मध्ये त्रिभिर्व्यवधानं भवति॥ अग्नी
षोमपदान्वयरूपं तु वाक्यं श्रूयमाणत्वाल्लिंगश्रुतिभ्यामेव व्यवधीयते॥ तस्माद्वाक्येन प्रकरणस्य बाधितत्वात्तच्छेष
स्तत्र तत्र व्यवतिष्ठते॥ ॥ दशमाधिकरणमारचयति॥ ॥ राजसूयेऽभिषेचाख्ययागे स्युर्देवनादयः॥ तच्छेषास्ते
खिलार्था वा तच्छेषास्तस्य सन्निधेः॥ राजसूय कथंभावानुवृत्तेः सर्वशेषता॥ कल्प्याकांक्षाभिषेच्यस्य प्रक्रिया प्रबलातः
॥ राजसूये पवित्रादिसोमयागा बहवः प्रधानभूतास्तत्राभिषेचनीयाख्यः कश्चित्सोमयागस्तस्य सन्निधौ विदेवनादयः श्रू
यंते॥ अक्षैर्दीव्यति राजन्यं जिनाति शौनःशेपमाख्यापयतीति जिनाति जयति॥ बह्वृचब्राह्मणे समाम्नातं शुनःशेपविषय
मुपाख्यानं शौनःशेपं॥ तत्र सन्निधिबलाद्देवनादयोऽभिषेचनीयांगमिति चेन्मैवं॥ राजसूयस्य कथंभावाकांक्षायामनुवृत्ता
यां विहितत्वाद्देवनादयः॥ प्रकरणेन राजसूयशेषाः राजसूयश्च बहुयागात्मक इति॥ तत्रत्यसर्वयागशेषत्वं॥ न चाभिषेचनी
यस्य काचिदाकांक्षा देवनादिष्वस्ति॥ ज्योतिष्टोमविकृतित्वेनातिदिष्टैः प्रकृतांगैरेव तदाकांक्षानिवृत्तेः॥ सन्निहितविधि
बलादाकांक्षोत्पाद्यत इति चेन्न॥ अत एवाकांक्षारूपमवांतरप्रकरणमादौ परिकल्प्यं तद्द्वारा वाक्यलिंगश्रुति कल्पनया सं
निधिर्विप्रकृष्यते॥ राजसूयाकांक्षारूपं तु महाप्रकरणं क्लृप्तत्वादेकपाकंक्षया संनिकृष्यते तस्मात्प्रकरणेन सन्निधिबा
धात्सर्वशेषा देवनादयः॥ ॥ एकादशाधिकरणमारचयति॥ ॥ शुंधध्वमिति मंत्रोंऽगं पौरोडाशिकशोधने॥ सान्ना
य्यपात्रशुद्धौ वा प्रथमोऽस्तु समाख्यया॥ पुरोडाशिकमित्यत्र प्रत्ययात्तद्धितेन वा॥ सन्निध्यनुक्तितः कल्प्यक्लृप्ताच्चचर
मः क्रमात्॥ शुंधध्वं दैव्याय कर्मण इत्ययं मंत्रः॥ पौरोडाशिकमिति याज्ञिकैः समाख्यायते॥ कांडे पठितत्वात्समा
ख्यया पुरोडाशकांडोक्तानामुलूखलोलूखलादीनामपि शोधनेंऽगमिति चेन्मैवं॥ पुरोडाशिकमिति समाख्यायां प्रकृतिः
पुरोडाशमात्रमभिधत्ते॥ तद्धितप्रत्ययश्च कांडं॥ न चैतावता कृत्स्नपुरोडाशपात्राणां मंत्रसन्निधिः प्रत्यक्षोऽभवतीति किं

त्वर्थापत्या कल्प्यते॥ यद्युक्तः सन्निधिर्नस्यात्॥ तदा मंत्रप्रतिपादकग्रंथस्ये पोरोडाशिकसमाख्यानस्यात्॥ नह्यसन्निहितानामि
षेत्वादिमंत्राणामाग्नेयकांडसमाख्याभवति॥ सन्निहितानां तु शुंधध्वं दैव्याय कर्मण इत्यादिमंत्राणांभवत्येषासमाख्या तस्मात्कांड
समाख्यया संनिधिं परिकल्प्य तत्संनिध्यन्यथानुपपत्त्या परस्पराकांक्षारूपं प्रकरणं कल्पयित्वा तद्द्वारा वाक्यलिंगश्रुतीः
कल्पयित्वा तयाथ कल्प्या विनियोग इति समाख्यायाविप्रकर्षः सान्नाय्यपात्राणां शोधनमंत्रसन्निधिस्तु प्रत्यक्षः इध्माबर्हिः संपादनस्य
मुष्टिनिर्वापस्य चांतराले सान्नाय्यपात्राणांदेशउक्तः॥ मंत्रश्चेध्माबर्हिर्विनिर्वापविषययोर्मंत्रानुवाकयोर्मध्यमानुवाके पठ्यते।
तेन च प्रत्यक्षसन्निधिना प्रकरणादीनां चतुर्णामेककल्पनात्संनिधिः संनिकृष्यते॥ तस्मात्क्रमेण समाख्यां बाधित्वा सान्नायपात्र
शोधनशेषा मंत्र इत्ययं चरमः पक्षोऽभ्युपेयः॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ बाधोनयुक्तो युक्तो वा प्राप्त्यप्राप्त्यो र्नयुज्यते॥
अप्रवृत्तं प्रसक्तं यद्भियात स्यास्तु बाध्यता॥ प्रमाणतः प्रसक्तस्य बाधोदाशमिको न्नतु॥ विभ्रमेण प्रसक्तस्य तस्माद्प्राप्तबाधनं॥ प्राप्त
स्य प्रतीतिरतीतेति तन्निवारणं शक्यं॥ अप्राप्तस्य बाधविषयत्वेनावरुद्धानमेवन्नास्तितस्मान्न युक्तो बाध इति चेन्नैवं॥ बुध्याविं
षयीकृतस्य बाधयितुं शक्यत्वान्न चेतत्त्यत्तं प्रवृत्तं अनुष्ठानरूपं फलपर्यवसानाभावात्॥ नाप्यत्यंतमप्रवृत्तं तद्बुध्धेरुत्पन्नत्वात्॥
अतो नोक्तदोषद्वयं दशमे चोदकप्रमाणेनावबुध्यार्थो बाध्यत इति प्राप्तबाध इह तु पूर्वप्रमाणविरुद्धे रुत्तरात्प्रमाणाभासेर बुद्ध
स्येत्यप्राप्तबाधः॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥ तिस्र एव हि तासांह्नस्युरहीने द्वादशोत्यतः॥ ज्योतिष्टोमद्वादशत्वमथ
वाहर्गणे भवेत्॥ अस्तु प्रकरणाद्याद्योनाहीनत्वं विरुध्यते॥ प्रकृतित्वान्नकेनापि हीतनोता त्र विकल्प्यतां॥ साह्नाद्विन्नाहीनसंज्ञा
रूढेषाहर्गणेभवेत्॥ षष्ठीश्रुत्या द्वादशत्वं प्रक्रियातोपकृष्यतां॥ ज्योतिष्टोमप्रकरणे श्रूयते॥ तिस्र एवस्योपसदो द्वादशाहीन
स्येति॥ एकेनाह्नानिष्पाद्यत्वात्साह्नो ज्योतिष्टोमः दिक्षादिवसात् उर्ध्वं सोमाभिषवदिवसात्पूर्वं कर्त्तव्याहोमा उपसदस्तासां द्वा
दशत्वं प्रकरणबलात्॥ ज्योतिष्टोमे निविशते॥ अहीनशब्दश्च तस्मिन्नेव कल्प्यते॥ ज्योतिष्टोमस्य निखिलसोमयागप्रकृति
त्वेन सर्वेषामंगानां तत्रोपदेशे सति तदुपदेशाविकलविकृतीनामवहीनत्वात्॥ अतो द्वादशत्वत्रित्वयोर्विकल्प्य इति प्राप्तेब्रूमः॥ आ
वृत्तसोमयागरूपो द्विरात्रादिरहर्गणस्तस्मिन्नहीनशब्दो रूढो योगिकत्वेतु न इति विग्रहः समासकृते सत्य यज्ञादिशब्दवदाद्यु
दात्तः स्यात्॥ मध्योदात्तस्त्वाम्नायते॥ रूढिश्चविग्रहनिरपेक्षत्वाच्छीघ्रबुद्धिहेतुः अतो ज्योतिष्टोमबाधितः साह्नशब्दाद्भिन्न

श्रीः
४६

य महीनसंज्ञा॥ ज्योतिष्टोमाद्भिन्नमहर्गणमभिधत्ते॥ तस्मिन्नहर्गणे षष्ठीश्रुत्या तदुक्तं द्वादशत्वं निविशते॥ तत्सिद्ध्ये प्रकरणा
दिदमपनेतव्यं॥ ॥ चतुर्दशाधिकरणमारचयति॥ ॥ युवं हीति द्वयोः कर्त्तो बहूनां चैतदित्यसूं॥ कुर्यात्प्रतिपदं ज्योतिष्टोमे सा
हर्गणे थवा॥ एकस्य शक्तिराहित्ये द्वाभ्यां बहुभिरेववा॥ ज्योतिष्टोमस्य कार्यत्वात्प्रकृते त्रैव साभवेत्॥ यजमानस्य नानात्वं सा
क्षाद्विरुक्ति पुश्रुतं॥ उत्कृष्य प्रतिपत्तेन कुलायादिषु नीयतां॥ ज्योतिष्टोमे श्रूयते॥ युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्र
तिपदं कुर्यादिति॥ एते असृग्रमिंदव इति बहुभ्यो यजमानेभ्य इति स्तोत्रस्योपक्रमे पठनीयामृचं प्रतिपच्छब्दोभिधत्ते॥ सा चोदा
हृता प्रतिपत्प्रकारणात्॥ ज्योतिष्टोमे विनिशते॥ न च तत्र यजमानद्वित्वबहुत्वयोरसंभवः॥ एकस्य यजमानस्य द्रव्यालाभा
दिना तदशक्तो नित्यकर्म्मणः परित्यागासंभवेन द्वाभ्यां बहुभिर्वा तस्यावश्यकर्तव्यत्वादिति प्राप्ते ब्रूमः॥ यजमानद्वित्वं कुलाय
नामके यज्ञे न साक्षादाम्नातं एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति यजमानबहुत्वं सत्रेष्वाम्नातं चतुर्विंशतिपरमाः
सत्रमासीरन्निति॥ ततो द्विशब्दबहुशब्दरूपाभ्यां श्रुतिभ्यां प्रकरणं बाधित्वा कुलायादिषु यथोक्त प्रतिपदोरुत्कर्षः कर्तव्यः॥
न चाशक्तावपि यजमानद्वित्वबहुत्वे संभवतः॥ अशक्तेन स्वीकृतस्य पुरुषांतरस्य प्रतिनिधित्वे यजमानत्वाभावात्॥ यजमान
स्य प्रतिनिधिर्नास्तीति वक्ष्यते॥ यद्यन्यः पुरुषः स्वयमेव प्रवर्त्तते॥ तदानीं स्वकीयमेव प्रयोगं कुर्यान्नत्वशक्तस्य साहाय्यमा
चरेत्॥ तस्माद्बहुयमाणस्य यजमानेकत्वस्य कालादिवदनुपादेयांगत्वेन त्यक्तुं अशक्यत्वान्न ज्योतिष्टोमे यजमानस्य द्वित्वबहु
त्वे संभवतः॥ ॥ पंचदशाधिकरणमारचयति॥ ॥ संयाजयंति जाघन्या पत्नीरित्यत्र शाउत॥ दर्शादौ तत्पशौ युक्तं जाघन्याः सम
वायतः॥ जाघनीनामभागोस्मो दर्शादौ समवैति हि॥ नोत्कृष्यानसंस्कार्या साधनत्वात्तृतीयया॥ दर्शपूर्णमासप्रकरणे श्रूय
ते॥ जाघन्या पत्नीः संयाजयंतीति जाघनी पशोः पुच्छं पत्नीशब्दो आकृतिचतुष्टयात्मकस्य कर्म्मणो नामधेयैकदेशः॥ अतएव
श्रूयते॥ पंच प्रयाजा इज्यंते चत्वारः पात्नीसंयाजा इति तत्र तृतीया कृतो देवपत्नीनां देवतात्वात्तद्द्वारा कर्मनाम्नः पत्नीसंयाजाशब्द
स्य प्रवृत्तिस्तत्र जाघनीमुद्दिश्य पत्नीसंयाजसंस्कारो विधीयते जाघनी च पशोः समवेता॥ नतु दर्शपूर्णमासयोः॥ अतः प्रकरणाद्बु
त्कृष्य पशौ निवेशनमिति प्राप्ते ब्रूमः॥ जाघनीशब्देन पशोर्भागो विधीयते॥ स च दर्शपूर्णमासयोः पशुयागत्वाभावेपि क्रय्यादिना सं
पादयितुं शक्यते॥ न चात्र पशौ विद्यमानायां जाघन्यां पत्नीसंयाजैः संस्कार्यत्वं तृतीययासाधनत्वावगमात्॥ तस्मान्न प्रकरणा

93
1941

यमहीनसंज्ञा॥ज्योतिष्टोमादिन्नमहर्गणमभिधत्ते॥तस्मिन्नहर्गणेषष्ठीकृत्यातदुक्तंद्वादशाहत्वंनिवेश्यते॥तत्सिद्धयेप्रकरणा
दिदमपनेतव्यं॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥युवंहीतिद्वयोःकर्त्रोर्बहूनांचैतदित्यमूं॥कुर्यात्प्रतिपदंज्योतिष्टोमेसा
हर्गणेथवा॥एकस्यशक्तिराहित्येद्वाभ्यांबहुभिरेववा॥ज्योतिष्टोमस्यकार्यत्वात्प्रकृतेत्रैवसाभवेत्॥यजमानस्यनानात्वंसा
क्षाद्विरूतिपृथक्तं॥उत्कृष्यप्रतिपत्तेनकुलायादिषुनीयतां॥ज्योतिष्टोमेश्रूयते॥युवंहिस्थःस्वर्पतीइतिद्वयोर्यजमानयोःप्र
तिपदंकुर्यादिति॥एतेअसृग्रमिंदवइतिबहुभ्योयजमानेभ्यइतिस्तोत्रस्योपक्रमेपठनीयामृचंप्रतिपच्छब्दोऽभिधत्ते॥साचोदा
हृताप्रतिपत्प्रकरणात्॥ज्योतिष्टोमेविनिशते॥नचतत्रयजमानद्वित्वबहुत्वयोरसंभवः॥एकस्ययजमानस्यद्रव्यालाभा
दिनातदशक्तोनित्यकर्मणःपरित्यागासंभवेनद्वाभ्यांबहुभिर्वातस्यावश्यकर्तव्यत्वादितिप्राप्तेब्रूमः॥यजमानद्वित्वंकुलाय
नामकेयज्ञेनसाक्षादाम्नातंएतेनराजपुरोहितौसायुज्यकामौयजेयातामितियजमानबहुत्वंसत्रेष्वाम्नातंचतुर्विंशतिपरमाः
सत्रमासीरन्निति॥ततोद्विशब्दबहुशब्दरूपाभ्यांश्रुतिभ्यांप्रकरणंबाधित्वाकुलायादिषुयथोक्तप्रतिपदोरुत्कर्षःकर्तव्यः॥
नचाशक्तावपियजमानद्वित्वबहुत्वेसंभवतः॥अशक्तेनस्वीकृतस्यपुरुषांतरस्यप्रतिनिधित्वेयजमानत्वाभावात्॥यजमान
स्यप्रतिनिधिर्नास्तीतिवक्ष्यते॥यद्यन्यःपुरुषःस्वयमेवप्रवर्तेत॥तदानींस्वकीयमेवप्रयोगंकुर्यान्नत्वशक्तस्यसाहाय्यमा
चरेत्॥तस्मादूह्यमाणस्ययजमानैकत्वस्यकालादिवदनूपादेयत्वेनत्यक्तुंअशक्यत्वान्नज्योतिष्टोमेयजमानस्यद्वित्वबहु
त्वेसंभवतः॥ ॥पंचदशाधिकरणमारचयति॥ ॥संयाजयंतिजाघन्यापत्नीरित्यशाउत॥दर्शादौतत्पशौयुक्तंजाघन्याःसम
वायतः॥जाघनीनामभागोस्मोदर्शादौसमवैतिहि॥नोत्कृष्ट्यानसंस्कार्यासाधनत्वात्तृतीयया॥दर्शपूर्णमासप्रकरणेश्रूय
ते॥जाघन्यापत्नीःसंयाजयंतीतिजाघनीपशोःपुच्छंपत्नीशब्दोशाकृतिचतुष्ट्यात्मकस्यकर्मणोनामधेयैकदेशः॥अतएव
श्रूयते॥पंचप्रयाजाइज्यंतेचत्वारःपात्नीसंयाजाइतितत्रतृतीयाश्रुतौदेवपत्नीनांदेवतात्वात्तद्वाराकर्मनाम्नःपत्नीसंयाजशब्द
स्यप्रवृत्तिस्तत्रजघनीमुद्दिश्यपत्नीसंयाजसंस्कारोविधीयतेजाघनीचपशौसमवेता॥नतुदर्शपूर्णमासयोः॥अतःप्रकरणादु
त्कृष्यपशौनिवेशनमितिप्राप्तेब्रूमः॥जाघनीशब्देनपशोर्भागोविधीयते॥सचदर्शपूर्णमासयोःपशुयागत्वाभावेपिक्रय्यादिनासं
पादयितुंशक्यते॥नचात्रपशोर्विद्यमानार्थाजाघन्यापत्नीसंयाजैःसंस्कार्यत्वंतृतीययासाधनत्वावगमात्॥तस्मान्नप्रकरणा

अ॰ क॰ मा॰ दुत्कर्षः॥ ॥ षोडशाधिकरणमारचयति॥ ॥ संतर्दने दीर्घसोमे तद्विकृतौ प्रकृतावुत॥ दीर्घस्य सोम इत्युक्तेः प्रकृतावस्तु दर्शनं॥
४७ सामानाधिकरण्यस्य षष्ठीतो बलवत्वतः॥ दैर्घ्ययुक्ता कथ्यसंस्थादावुत्कर्षोऽन्यत्र बाधनात्॥ ज्योतिष्टोमे श्रूयते दीर्घसोमे संतृद्ये धृ
त्या इति सोमयागविशेषो दीर्घसोमस्तस्मिन्सोमाभिषवाधारयोरधिषवणफलकयोः संतर्दनं कार्यं अन्योन्यविनियोगेन शैथिल्य
मापद्य दृढसंश्लेषः संतर्दनं॥ तदेतत्संतर्दनं प्रकरणबलात्प्रकृतौ विनिवेशितं न च तत्र दीर्घत्वानुपपत्तिर्दीर्घस्य सोम इत्येवं दीर्घशब्द
स्य यजमानस्य विशेषणत्वेनाप्युपपत्तेरिति प्राप्ते ब्रूमः॥ षष्ठीसमासात्कर्मधारयो बलवानिति वक्ष्यते॥ तथा सति दीर्घत्वं सोमस्य
धर्मो न तु यजमानस्य न न्वेवमपि प्रकृतिभूतस्य सोमस्येष्टिपशुपक्षया दीर्घत्वमस्त्येवेति चेन्न॥ सोमशब्देनैव तदवगतौ दीर्घशब्द
स्य वैयर्थ्यात्॥ न हीष्टिपशुपेक्षया ह्रस्वः कश्चित्सोमोऽस्ति यस्य व्यावृत्तये दीर्घशब्दः प्रयुज्येत॥ तस्मात्प्रकृतिरूपं ह्रस्वं सोमं व्या
वर्तयितुमयं दीर्घशब्दः विकृतिषु सत्यादिषु अहाधिक्येन दीर्घत्वं॥ द्विरात्रादिषु चावृत्त्या दीर्घत्वं॥ तस्माद्वाक्यप्रकरणं बाधित्वा वि
कृतिषु तन्निवेशः॥ प्रकृतौ तु दीर्घशब्दस्य बाधः पूर्वमुक्तः॥ संतर्दनबाधश्च साक्षाच्छ्रूयते हनूवा एते यज्ञस्य यदधिषवणे न संतृण
त्यसंतृणा हि हनू इति तस्मान्न प्रकृतौ निवेशः॥ ॥ सप्तदशाधिकरणमारचयति॥ ॥ न प्रवृञ्ज्यादाद्ययज्ञे क्रतौ सोऽनुष्ठितावुत॥
प्रतिबन्धः क्रतौ युक्त उक्तात्वस्याद्ययज्वता॥ प्रवृणक्त्युपसद्भ्यः प्रागिति वाक्यात्क्रतौ विधेः॥ आद्यप्रयोगे प्रथम्यान्निषेधः
कृचिद्द्वयसः॥ ज्योतिष्टोमे प्रवर्ग्याख्यं कर्म प्रकृत्य श्रूयते॥ न प्रथमयज्ञे प्रवृञ्ज्यादिति सोऽयं प्रतिषेधो ज्योतिष्टोमक्रतौ द्रष्टव्यो न तु दी ते
यप्रथमप्रयोगकृतः एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इति तस्य प्रथमयज्ञत्वाभिधानादिति चेन्मैवं॥ पुरस्तादुपसदां प्र
वर्ग्यं प्रवृणक्तीति वाक्येन क्रतौ प्रवर्ग्यस्य विहितत्वात्॥ न च विधिनिषेधवाक्ययोः समानबलत्वादनिर्णयः॥ निषेधवाक्ये प्रथम
शब्देन निषेधस्य प्रयोगपरत्वनिर्णयात्॥ प्रथमद्वितीयादिशब्दाः क्रियाया आवृत्तौ मुख्यास्तत्संबंधाद्वस्तुषूपचर्यंते॥ प्रथमम श्रीः
ध्येतव्यत्वात्प्रथमं काण्डं तदनंतरमध्येतव्यत्वाद्द्वितीयं काण्डं एवमादावुत्पन्नत्वात्प्रथमः पुत्रः तदनंतरमुत्पन्नत्वात्प्रथमः पुत्रस्तद
नंतरमुत्पन्नत्वाद्द्वितीयः॥ तथा सति प्रयोगक्रियाया आवृत्तिविशेषे प्रथमशब्दो मुख्यस्तदावृत्तिविषयतया यज्ञे लाक्षणिकः॥ त ४७
त्पक्षेऽपि क्रतौ मुख्यो यज्ञशब्दः प्रयोगे लाक्षणिकः स्यादिति चेत्॥ बाढं॥ तथाप्यसंजातविरोधित्वाल्लाक्षणिकत्वकल्पनाद्वारमुत्तर
पदे तत्कल्पनं॥ तस्माज्ज्योतिष्टोमस्य प्रथमप्रयोगे प्रवर्ग्यनिषेधः॥ ननु सप्तसंस्थायुक्तस्य ज्योतिष्टोमस्य प्रथमसंस्थारूपोऽग्नि

95/1945

ष्टोमस्तत्रायं निषेधः पर्यवस्यति विधिश्च तत्र श्रूयते॥ अग्निष्टोमे प्रवृणक्तीति॥ एवं तर्ह्यधिकारीभेदेन विधिनिषेधयोर्व्यवस्थाऽ
स्तु॥ तथा हि श्रूयते॥ कामं तु योऽनूचानः स्यात्तस्य प्रवृञ्ज्यादिति॥ तस्मादनूचानव्यतिरिक्तकर्तृकेऽग्निष्टोमप्रथमप्रयोग एवायं
निषेधः॥ ॥ अष्टादशाधिकरणमारचयति॥ ॥ अपिष्टभागः पूषेति प्रकृतौ विकृतावुत॥ इष्टिप्रकरणादेव प्रकृतौ विनियुज्यते॥
संतर्दनादिवद्वाक्याद्विकृतौ पूषसंभवात्॥ सिद्धस्य पुनरप्युक्तिकरधिकस्य विवक्षया॥ दर्शपूर्णमासप्रकरणे श्रूयते॥ तस्मात्पूषा प्रपि
ष्टभागोऽदंतको हीति॥ तत्र दंतरहितस्य पूष्णः पिष्टभागत्वं संतर्दनप्रतिपादित्वत्सिद्धं॥ तथाप्युत्तराधिकरणे तस्मिन्नेव विषयविशे
षं वक्तुमिदं प्रस्तूयते॥ ॥ एकोनविंशाधिकरणमारचयति॥ ॥ चरौ पशौ पुरोडाशे च रावेवात पेषणम्॥ विशेषादर्शनादेतत्सर्वे
ष्वपि विधीयते॥ प्राप्तत्वान्न पुरोडाशेऽक्षुद्राद्याकारनाशनात्॥ न पशौ पारिशेषेण चरावेव हि पेषणं॥ पौष्णं चरुं मनु निर्वपेदिति
चरुर्विहितः॥ पौष्णं श्याममालभेतान्नकाम इति पशुविधिः पशुमालभ्य पुरोडाशं निर्वपतीत्येन चोदकेन पौष्णपशौ प्राप्तं॥ तत्र
यद्देवत्यः पशुः तद्देवत्यः पुरोडाश इति न्यायेन पुरोडाशस्य पूषा देवता॥ तत्र पूर्वोक्तं पेषणं विषयीकृत्योच्यमानाः संशयपूर्वोत्तर
पक्षाः स्पष्टाः॥ ॥ विंशाधिकरणमारचयति॥ ॥ द्विदेवतेऽपि किं पिंष्यादुत पूषैकदैवते॥ द्विदैवतेऽपि तत्पूष्णः सत्वात्पेषणभागिनः
॥ देवतापि फलत्वेन पेषणं न प्रयोजयेत्॥ यागस्य तत्व भागो क्तेर्न यागांतरगामि तत्॥ राजसूये श्रूयते सोमापौष्णं चरुं निर्वपेदैंद्रा
पौष्णं चरुमिति॥ तत्र द्विदेवकेऽपि चरौ पिष्टभाजः पौष्णः सत्वात्पेषणं पूषार्थं कर्तव्यमिति चेत्॥ तत्र वक्तव्यं किं पेषणस्य देवता
प्रयोजिका किं वा यागः नाद्यः यागमंतरेण केवलं देवता फलजनकत्वाभावेन पेषणं॥ प्रयोक्तुं न प्रभवति॥ पौष्णस्य यागस्य पे
षणप्रयोजकत्वे तु तत्पेषणं द्विदेवकयागांतरगंतुं नार्हति॥ पूषा प्रपिष्टभाग इत्यत्र यागो न श्रुतत इति चेन्नैवं॥ भागशब्दान्य
थानुपपत्त्या यागस्य कल्पनात्॥ न हि देवतात्वमंतरेण विशिष्टद्रव्यभाक्त्वं सिध्यति॥ सति च देवतात्वे द्रव्यदेवतयोर्लाभाद्यागः क
ल्प्यते॥ तस्मादेकदेवतयागस्य पेषणप्रयोजकत्वान्न द्विदेवकयागे पेषणमस्ति॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमाला
विस्तरे तृतीयाध्यायस्य तृतीयः पादः॥ ३ ॥ ॥ चतुर्थपादे प्रथमाधिकरणमारचयति॥ ॥ निवीतं तु मनुष्याणामिति विधि
र्वोऽर्थवादकः॥ अपूर्वत्वात्प्रकरणाच्च क्रतौ वापि विधीयते॥ प्राप्तं निवीतं मर्त्येषु प्रायेण तस्य दर्शनात्॥ उपवीतविधायकवाक्य
त्वादर्थवादता॥ दर्शपूर्णमासप्रकरणे श्रूयते॥ निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययते देवलक्ष्मा

मेवतत्कुरुतइति॥ तत्रनिवीतस्य पूर्वमानांतरणाप्राप्तत्वाद्विधेयत्वमभ्युपेतव्यं॥ तच्चनिवीतं मनुष्याणामितिषष्ठ्यापुरुषार्थत्वे
नविधीयतइत्येकः पूर्वः पक्षः॥ अस्मिन्पक्षे मनुष्यसंबंधाद्विविधः स्कवर्णधारणवत्सर्वपुरुषसंबंधइत्येकः प्रकारः॥ उपवीत
प्राचीनावीतयोः क्रतुप्रवेशरहितयोः स्वतंत्रदैविकपैतृककर्म्मणोरपिदर्शनात्॥ तत्साहचर्येणस्वतंत्रआचार्यातिथ्यादिम
नुष्यविषयेकर्मणिनिवीतमित्यपरः प्रकारः प्रकरणवत्वात्प्रयाजादिवत् यागधर्मइतिद्वितीयः पूर्वः पक्षः॥ अस्मिन्पक्षेम
नुष्यग्रहणंकर्तृसंबंधानुवादः षष्ठीश्रुतिप्रकरणयोरविरोधादुभयावलंबनेनक्रतुसंबंधिमनुष्यधर्मइतिपक्षांतरमुदेति॥
तत्रद्विविधंलोहितोष्णीषादिवदृत्विग्धर्म्मइत्येकः प्रकारः॥ क्रतावेवयन्मनुष्यप्रधानंकर्म्मान्वाहार्यदानादितधर्म्मत्वेसति
उपवीतसहचर्यमप्यनुगृह्यतइत्यपरः प्रकारः सर्वथानिवीतंनार्थवादइतिप्राप्तेब्रूमः॥ अत्रप्रतीयमानंनिवीतादिकंवासो
विषयंनतुत्रिवृत्सूत्रविषयं अजिनंवासोवादक्षिणतउपवीयेत्यनेनसदृशत्वात्॥ वस्त्रस्यचनिवीतंसौकर्यायप्राप्तं॥ प्राची
नावीतोपवीतयोरथस्वमेकस्मिन्पार्श्ववस्त्रमधः पतेत्॥ अतः प्राप्तेर्थेमनुष्याणामितिषष्ठीश्रुतिर्नविधायिका॥ नचप्र
करणात्क्रत्वंगत्वेनविधिर्वाक्यभेदप्रसंगादुपवीतंतावद्विधीयते॥ अन्यथादेवलक्ष्ममेवतत्कुरुतइतिप्रशंसायावैयर्थ्यापत्ते
स्तस्मिंश्चोपवीतविधावर्थवादत्वेननिवीतप्राचीनावीतयोरेकवाक्यत्वसंभवेपृथग्विधानमयुक्तं॥ निवीतप्राचीनावीतेमनु
ष्यपितृविषयत्वाद्दैविककर्म्मण्ययोग्ये॥ उपवीतंतुयोग्यमितिव्यतिरेकमुखेनस्तावकंनिवीतंतस्मादर्थवादः॥ ॥ द्वितीयाधि
करणकमारचयति॥ ॥ सर्वार्थमुतदर्शाद्यर्थमुपव्ययतइत्यदः॥ सर्वार्थमग्निहोत्रेस्यादुपवीतीतिलिंगतः॥ दर्शाद्यर्थंप्रक
रणाल्लिंगेस्यात्सिद्धिरन्यथा॥ दोहंमृताग्निहोत्रस्यस्तौतुमेतदनूदितं॥ यज्ञोपवीतीहिदेवेभ्योदोहतीयत्वेवमग्निहोत्रेय
ज्ञोपवीतस्यसिद्धवदनुवादेनलिंगेनसर्वकर्म्मार्थमुपवीतमितिचेत्तन॥ लिंगस्यान्यथोपपत्तेर्मृताग्निहोत्रंतस्मिन्दिनेन्येनहू
यते॥ तत्रप्राचीनावीतीदोहयेदितिविधायतस्यस्तुतयेयज्ञोपवीतीत्याद्यनूदितं॥ अतोलिंगभासेनबाधासंभवात्प्रकरणा
द्दर्शपूर्णमासांगमुपवीतं॥ ॥ तृतीयाधिकरणकमारचयति॥ ॥ उपव्यानेनुवादोवाविधिर्वाद्यायतः स्मृतो॥ प्राप्तमेवम्
पूर्वत्वात्क्रतोर्लेटाविधीयते॥ नित्योदकोनित्ययज्ञोपवीतीतिस्मृत्याप्राप्तस्योपव्ययतइत्ययमनुवादइतिचेन्मैवं॥ पुरुषार्थ
थस्यप्राप्तावपिक्रत्वर्थस्यप्राप्त्यभावात्॥ पंचमलकारेणदर्शपूर्णमासांगतयाविधीयते॥ ॥ चतुर्थाधिकरणकमारच

यति॥ ॥ उपवीतीहिदेवेभ्यः पुरोदंचोद्दयंविधिः॥ वादोवास्यान्यतोप्राप्तेरपूर्वार्थोविधीयते॥ द्वियत्वद्वयाद्वादः स्मृत्युपव्यानतो
द्वयं॥ संप्राप्तंदक्षिणाग्रत्वप्राचीनावीतयोः स्मृतेः॥ प्रेताग्निहोत्रेश्रूयते॥ प्राचीनावीतीदोहयेत्॥ यज्ञोपवीतीहिदेवेभ्योदोहयती
तियेपुरोदंचोदर्भास्त्वान्॥ दक्षिणाग्रांस्तृणीयादितिच॥ तत्रमृतस्याग्निहोत्रेदोहनेप्राचीनावीतंदर्भास्तरणेदक्षिणाग्रत्वंयथा
विधीयते॥ तथामरणात्पूर्वंजीवतोग्निहोत्रेदोहनांगमुपवीतंदर्भास्तरणांगमुत्तराग्रत्वंचविधातव्यं॥ देवेभ्योयज्ञोपवीतीदोहये
न्मरणात्पुरायेदर्भास्तउदंचः कार्याइतिवचनव्यक्तिः नह्येतदुभयमन्यतः प्राप्तंतस्मादपूर्वार्थोविधीयतामितिचेन्मैवं॥ हिश
ब्देनचोभयानुवादत्वप्रतीतेः अस्तिचतयोः प्राप्तिः अग्रवंत्युदगग्राणीतिस्मृत्यासर्वस्मिन्दैविकेकर्म्मणिप्राप्तमुत्तराग्रत्वमनू
द्यविधेयंदक्षिणाग्रत्वंश्रूयते॥ तथादर्शपूर्णमासयोरुपव्ययतइत्येतेनविधिनाप्राप्तंदैविकमुपवीतमनूद्यविधेयंप्राचीनावीतं
स्तूयते॥ तस्मादनुवादः॥ ॥ पंचमाधिकरणमारचयति॥ ॥ धारयत्रुपरिष्टाद्धिदेवेभ्यइतिसंस्तवः॥ विधिर्वाधोधृतेपित्र्येप्र
क्रायाः पूर्ववत्स्मृतिः॥ ऊर्ध्वविधारणंप्राप्तंसमिधोनान्यमानतः॥ अतोहिशब्दसत्त्वादगापूर्वार्थोविधीयते॥ प्रेताग्निहोत्रएवंश्रू
यते॥ अधस्तात्समिधंधारयन्ननुद्रवेदुपरिहिदेवेभ्योधारयतीति॥ अत्रापित्र्यंहविर्होतुंहस्तेधारयन्पदामंत्रंपाठतितदानींस्रुक्
दंडस्याधस्तात्समिधंधारयतीतियद्विधीयते॥ तदेतद्दैविकेनोपरिधारणेनस्तूयते हिशब्देनपूर्वाधिकरणइवानुवादत्वप्रतीतेरिति
चेत् मैवं॥ वैदिकेहिविधिस्रुकदंडस्योपरिसमिद्धारणस्यापूर्वार्थत्वेनविधातव्यत्वात्॥ अनुवादत्वगमकोहिशब्दोसंभवादुपेक्षणी
यः॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ दिशांप्रतीचीमनुजाव्यभजंतेत्यसौविधिः॥ वादोवात्रपुराकल्पस्तत्योर्थोविधिमर्हति॥
प्राचीनवंशवाक्यानेकविधावस्येकवाक्यतः॥ हविर्भागार्थवादोयमुपवीतेनिवीतवत्॥ ज्योतिष्टोमेश्रूयते॥ प्राचीनवंशंकरो
तिदेवमनुष्यादिशोव्यभजंत प्राचींदेवादक्षिणापितरः प्रतीचींमनुष्याउदीचींरुद्रायत्प्राचीनवंशंकरोतिदेवलोकमेवतद्यजमा
नउपावर्तेतइति॥ तत्रदेवादीनांकर्म्मानधिकारान्नतत्रविधिशंका॥ मनुष्याः प्रतीचींविभजेयुरित्येवंविधिः स्यात्कुतः पुराकल्प
रूपेणार्थवादेनस्तूयमानत्वात्॥ पूर्वपुरुषाचरितत्वाभिधानंपुराकल्पः व्यभजंतेत्यनेनभूतार्थवाचिनातदभिधीयते॥ तस्माद्वि
धिरितिपूर्वपक्षः यस्यमंडपविन्यासस्यापरिवंशाः प्रागग्राभवंति॥ सप्राचीनवंशः तद्विध्येकवाक्यतावगमादर्थवादः॥ सावंका
शीनाप्यादौप्रतीचीप्राप्ता॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ परुषिछिन्नमित्युक्त्याबर्हिषस्तुसमूलतां॥ घृतंदेवेभ

स्त्तपिचमित्युक्त्या नवनीतकं॥ योविदग्धः सदुत्क्तया पुरोडाशस्य पक्वतां॥ स्तोतिपूर्वोत्तरो पक्षौ योऽजनीयो निवीतवत्॥ दर्शपूर्ण
मासयोः पिंडपितृयज्ञेश्रूयते॥ यत्पकर्षिदिनं॥ तद्देवानां॥ यदंतरा॥ तन्मनुष्याणां॥ यत्समूलं॥ तत्पितृणां॥ समूलंबर्हिर्भवति॥ व्या
वृत्यादुति॥ परुः पर्वदिनंखंडितं॥ तथाज्योतिष्टोमेश्रूयते॥ दीक्षार्थाभ्यंगेघृतंदेवानां मस्तुपितृणां॥ निष्पक्वंमनुष्याणां॥ एतद्वाए
तत्सर्वदेवत्यं यन्नवनीतं यन्नवनीतेनाभ्यंक्तेसर्वाएवदेवताः प्रीणातीति॥ मस्तुदधिभवंमंडंनिष्पक्वंशिरसिप्रक्षेपुमीषद्विलीनंनवनी
तंतक्रंवादर्शपूर्णमासयोः पुरोडाशश्रपणेश्रूयतेविदग्धः सनेर्ऋतोयोः शृतः सरौद्रायः शतः ससदेवस्तथादविदहताशृतंकृत्याः स
देवत्वायेति॥ विदग्धोत्यंतंपक्वोशृतोपक्वः स्तत्रबर्हिषिसमूलछेदस्याभ्यंगेनवनीतस्य पुरोडाशे यथोचितपाकस्यचविधेयतया
सर्वमवशिष्टंस्तावकंनिवीतविचारस्येवायंप्रपंचः एवंयत्पूर्णतन्मनुष्याणामित्यत्रापिद्रष्टव्यं॥ तत्रतुर्मास्येषुपितृयज्ञेपितृभ्यो
ग्निष्वात्तेभ्योमथमित्यत्रवत्सरहितायाअभिधानीशब्दाभिधेयायाः धेन्वादुग्धेपिष्टंप्रक्षिप्यक्रियमाणंमंथनेश्रूयते॥ यत्पूर्णतन्मनु
ष्याणांउपर्यर्धोदेवानां॥ अधः पितॄणां॥ अर्धउपमंथति॥ अर्धाहिपितॄणामिति॥ तत्रपात्रस्याधोभागरूपेणार्धेनपरिमितदुग्धमं
थनस्यकर्तव्यत्वात्सोर्धोविधीयते॥ सचपूर्णादिवाक्येनस्तूयते॥ ॥ अष्टमाधिकरचयति॥ ॥ अनृतंनवदेद्वेधः पुंधर्मोवानुवा
दगीः॥ सक्रमतो पुंसिशक्तेवा क्रतौयद्वाविधिः क्रतौ॥ अनृतोक्तेः पुमर्थत्वात्तन्निषेधस्तथाविधिः॥ स्मार्तानुवादः पुंकत्वाः क्रतिप्र
क्रियायोर्वशात्॥ आख्याते पुरुषानुक्तेः क्रतावेवप्रयाजवत्॥ सत्योक्तिनियमादन्यः संयोगेतः॥ क्रतौविधिः॥ दर्शपूर्णमासप्रक
रणेश्रूयते॥ नानृतंवदेदिति॥ तत्रपुरुषधर्मत्वेनायंप्रतिषेधोविधीयते॥ कुतः प्रतियोगिनोनृतवदनस्य पुरुषधर्मतयातन्निषेध
स्यापिपुरुषधर्मत्वेनैवविधातव्यत्वात्॥ वेदेदित्येतदाख्यातंतावत्कर्तृवाचकंतेनाख्यातेनकर्तुः प्रतीयमानत्वात्॥ पुरुषस्याख्या
तप्रत्ययवाच्यत्वेसति प्रकृत्यर्थस्यवदनस्य पुरुषधर्मत्वंयुक्तं॥ प्रकृतिप्रत्ययौ प्रत्ययार्थंसहतः प्राधान्येनेति शाब्दिकेरुद्घोष श्री:
णात्॥ वदनस्यपुरुषधर्मत्वेतन्निषेधस्यापि पुरुषधर्मत्वंयुक्तं॥ अन्यथाभिन्नविषयत्वेबोधकत्वंस्यात्॥ तस्मात्पुरुषवाचका
ख्याख्यातश्रुत्याप्रकरणंबाधित्वा पुरुषार्थोयंप्रतिषेधोविधीयते॥ अस्त्वयंस्मार्तः प्रतिषेधइतिचेत्॥ तर्हितस्येतच्छ्रुतिवाक्यं ४९
मूलमस्तु तस्मात्पुरुषार्थइत्येकः पूर्वः पक्षः॥ आख्यातश्रुतेः प्रकरणस्यचाविरोधायक्रतुयुक्तपुरुषधर्मोस्तु॥ नह्येतद्वाक्यं
स्मृतेर्मूलंभिन्नविषयत्वात्॥ स्मृतिश्वापनयनमारभ्यामरणंपुरुषस्यानृतंप्रतिषेधतितन्मध्यपातित्वात्क्रतावपिस्मार्तेनैनि

99/1995

षेधः प्राप्तएव॥ ततउभयार्थोप्ययंप्रतिषेधोनविधीयतेकिंत्वनूद्यतइतिद्वितीयः पूर्वः पक्षः॥ आख्यातेनभावनाभिधीयते॥ क
र्तातुतदविनाभूतोर्थात्प्रतीयते॥ अतः श्रुत्यभावात्केवलेनप्रकरणेनप्रजायादिवदारादुपकारकः क्रतावेवनिविशते॥ नचतत्रा
पिविधीयते॥ किंतुसार्वत्रिकस्यनिषेधस्यक्रतावपिप्राप्तत्वादनूद्यतइतितृतीयः पूर्वः पक्षः॥ सत्यमेववदेन्नानृतमितियोयंस्मा
र्तोनियमरूपः पुरुषार्थसंयोगः सतस्मादयमन्यः क्रत्वर्थः संयोगः अतोप्राप्तत्वाद्विधीयते॥ एतद्व्यतिक्रमेक्रतोरेववैगुण्यंनतुपु
रुषस्यप्रत्यवायः॥ अतोत्रक्रतुगामिप्रायश्चित्तंपुरुषार्थनियमातिक्रमेपुरुषस्यैवप्रत्यवायोनक्रतोर्वैगुण्यं॥ तत्रस्मार्तंप्रायश्चि
त्तमितिविशेषः॥ ॥ नवमाधिकरणमारचयति॥ ॥ जंजभ्यमानधर्मोक्तिः पुंसोधर्मः क्रतोरुत॥ वाक्यादाद्यः प्रक्रिययाद्विती
यास्त्वविरुद्धया॥ दर्शपूर्णमासप्रकरणेश्रूयते॥ प्राणापानौदक्षोपानः क्रतुस्मोस्तेज्जंजभ्यमानोब्रूयान्मयिदक्षक्रतूइतिप्राणापा
नावेवात्मंधत्तइति॥ गात्रविनामेनविदारितमुखः पुरुषोज्जंजभ्यमानस्तस्यवाक्यान्मंत्रोक्तिः प्रतीयते॥ वाक्यंचप्रकरणाद्बली
यः तस्मात्केवलपुंधर्मइतिचेन्नैवं॥ क्रतावपिजंजभ्यमानपुरुषसंभवेनवक्यप्रकरणयोर्विरोधाभावेसत्युभाभ्यांक्रतुयुक्तपुरु
षसंस्कारत्वावगमात्॥ ॥ दशमाधिकरणमारचयति॥ ॥ विप्रायापगुरेन्नेतिक्रत्वर्थोवापुमर्थता॥ फलवत्क्रतुसान्निध्या
त्क्रत्वर्थः पूर्वमंत्रवत्॥ यातनापरिहारस्यनिषेधफलतोचिता॥ निषेधोयंपुमर्थत्वात्प्रक्रियातोपकृष्यतां॥ दर्शपूर्णमासप्र
करणेश्रूयते॥ योब्राह्मणायापगुरेत्तंशतेनयातयात्॥ तस्माद्ब्राह्मणायनापगुरेदिति॥ तत्रयथापूर्वाधिकरणेमंत्रपाठस्यफ
लरहितस्यफलवतिक्रतावंगत्वंप्रकरणेनावगम्यते॥ एवमत्रापिब्राह्मणावगुरणनिषेधस्यक्रत्वंगत्वमितिचेन्न॥ वैषम्यात्॥
पूर्वत्रह्यात्मनिप्राणापानधारणंमंत्रोच्चारणफलंनसंभवति॥ तस्यप्रागेवसिद्धत्वादिहत्ववगोरणेशतसंवत्सरयातनानामुप
न्यस्तावगोरणनिषेधाघातनापरिहारस्यनिषेधफलत्वमुचितंतस्मान्निषेधस्यकेवलपुरुषार्थतयाप्रकरणादुत्कर्षोयुक्तः॥
॥ ॥ एकादशाधिकरणमारचयति॥ ॥ नसंवदेतमलवद्वाससेत्यपिपूर्ववत्॥ पुमर्थः स्यात्क्रतौक्वापिसंवादस्याप्रसक्तितः॥
दर्शपूर्णमासप्रकरणेश्रूयते॥ मलवद्वाससानसंवदेतेति॥ अस्यनिषेधस्यप्रकरणात्क्रत्वंगत्वमितिचेन्नैवं॥ अप्रसक्तप्र
तिषेधप्रसंगात् यस्यव्रत्येहन्पत्न्यनालंधुकाभवति॥ तामुपरुध्ययजेतेति॥ रजस्वलायानिःसारणेनक्रतौतत्संवादस्याप्रस
क्तिः तस्मात्केवलपुरुषार्थस्यास्यप्रकरणादुत्कर्षः॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ हिरण्यंवर्णवद्धार्यंक्रत्वंगंभरणं

भवेत्॥ हिरण्यसंस्कृतिर्वात्र वर्णो वा तत्पुमर्थता॥ वैदिकत्वात्क्रतुस्मृत्या तदंगं कर्मकारके॥ प्राधान्यात्संस्कृतिर्वर्णो गुणोस्तु विधिलाघव
त्॥ अनारभ्याधीतत्वेन नियता नु क्रतुस्मृतिः॥ अतः पुमर्थता स्वर्गः कल्प्यो न्याय्यस्तु रात्रिवत्॥ अनारभ्य श्रूयते॥ तस्मात्सुवर्णं हि
रण्यं भार्यं सुवर्ण एव भवतीति॥ तत्र यदेतत् शोभनवर्णोपेतहिरण्यधारणं तस्य वैदिकक्रियात्वात्तेन क्रतुस्मारकत्वात् क्रत्वंगं धारण
मित्येकः पक्षः॥ क्रत्वंगत्वेपि नारादुपकारकं किं तु क्रतुगतं हिरण्यं धारणेन संस्क्रियते॥ भार्यमित्यत्र ण्यत्प्रत्ययस्य कर्मणि विहितत्वेन
कर्मकारकस्य हिरण्यस्य प्राधान्यावगमादिति द्वितीयः पक्षः॥ वर्णविशिष्टधारणविधाने गौरवात्॥ धारणसहितहिरण्यमनूद्य शो
भनवर्णमात्रं विधीयमिति तृतीयः पक्षः॥ त्रेधापि क्रत्वर्थो विधिर्न तु पुरुषार्थ इति प्राप्ते ब्रूमः॥ तद्धि क्रतुप्रकरणे श्रुतं तस्यास्ति नियमेन
क्रतुस्मारकत्वं इदं त्वनारभ्याधीतं॥ न चात्र हिरण्यं जुहू क्वचित्॥ क्रतावव्यभिचरितं येन क्रतुस्मृतिर्नियम्यते॥ न तु संस्कार्यत्वान्य
थानुपपत्त्या क्रतुप्रवेशः स्यात्॥ न हि धारणेन संस्कृतस्य हिरण्यस्य लौकिकः॥ कश्चिदुपयोगोस्तीति चेत्॥ क्रतावप्युपयोगाभावात्॥
क्रतूपयोगित्वेन संस्कार्यत्वं॥ तेन च क्रतूपयोग इत्यन्योन्याश्रयत्वात्॥ न च कर्मकारकत्वात्॥ संस्कार्यत्वं॥ परसमवेतक्रियाफलशा
लित्वमात्रस्य कर्मलक्षणत्वात्॥ अथ वा रात्रिसत्रे यथा तथा वाक्यशेषेणार्थवादेन च श्रुता प्रतिष्ठा फलत्वेन कल्प्यिता॥ तथात्रापि सुव
र्ण एव भवति दुर्वर्णोस्य भ्रातृव्य इत्यर्थवादगतं फलमस्तु॥ तस्मात्पुरुषार्थो धारणविधिः॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥
येनेतेत्कर्मणा तत्र जयहोमोखिलार्थता॥ वैदिके ष्वेव वा सर्वशेषासंकोचकत्वतः॥ होम आहवनीये स्यात्कृष्यादिषु न सोस्ति हि॥ तेनाना
रभ्य पाठापि वैदिकेष्वेव ते जयाः॥ अनारभ्य श्रूयते॥ येन कर्मणेर्त्सेत् तत्र जयां जुहुयात्॥ राष्ट्रभृतो जुहोत्यभ्यातानां जुहोतीति॥ इत्येत
त् वाक्यमिलेन॥ चित्तं च स्वाहेत्यादयो जयाः ऋताषाडित्यादयो राष्ट्रभृतः अग्निर्भूतानामित्यादयोभ्यातानाः॥ तत्र वैदिककर्मणि वलौकि
के कृष्यादिकर्मणा प्यृद्धेरभ्यमाणत्वात्॥ तासंकोचे कारणाभावाज्जयादिहोमः॥ सर्वशेष इति चेत् मैवं॥ यदाहवनीये जुहोति तेन सो
स्याभीष्टः प्रीतिरिति वाक्येन होममुद्दिश्याहवनीयविधानात्॥ कृष्यादौ तदभावाद्वैदिकेष्वेव जयादिहोमः॥ ॥ चतुर्दशाधिकरणमा
रचयति॥ ॥ अश्वप्रतिग्रहेष्टिस्तु दातुरित्यभिधास्यते॥ दानद्वये लौकिके वा वैदिके वा भवेदियं॥ अविशेषाद्द्वयोर्यद्वा न देयः केसरी य
तः॥ निषेधाल्लौकिका तत्र प्रायश्चित्तिरियं भवेत्॥ न जलोदरहेतुत्वं प्रमितं लौकिके क्वचित्॥ वैदिके तु श्रुतं तस्मात्प्रायश्चित्तमियत्र
सा॥ इदमाम्नायते॥ यावतोश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान्निर्वपेदिति॥ तत्र प्रतिग्रहशब्दो दानपर इत्यनंतर

श्री

८०

101/1945

मेव वक्ष्यते॥ तत्र विशेषाश्रवणाल्लौकिकवैदिकदानयोरुभयोरप्येषा विष्टिरित्येकः॥ पक्षः॥ न केसरिणो ददातीति स्मृत्या मित्रदायादिभ्यः
प्रीत्या क्रीयमाणं लौकिकमश्वदानं निषिद्धं॥ तदनुष्ठाने प्रायश्चित्तरूपेयमिष्टिरिति द्वितीयः॥ पक्षः॥ वरुणो वा एतं गृह्णाति योश्वं प्रतिगृ
ह्णातीत्यश्वदाने जलोदराख्याधिरूपो दृष्टदोषो वरुणग्रहवाक्येनोच्यते॥ न च लौकिकस्याश्वदानस्य तद्धेतुत्वं प्रमितं॥ वैदिकस्य तु जन्मां
तरविषयं दोषश्रवणं॥ अतो वैदिकदाने सेष्टिः प्रायश्चित्तं॥ अस्ति हि वैदिकमश्वदानं वडवा दक्षिणेत्यादिश्रवणोत्यादिश्रावणात्॥ ॥
पंचदशाधिकरणमारचयति॥ ॥ यावतः प्रतिगृह्णीयादश्वांस्तावत्य इष्टयः प्रतिग्रहीतुर्दातुर्वा स्यादाद्यो स्तु यथाविधि॥ असंजातवि
रोधार्थवादाद्दातुः प्रजापतेः॥ इष्टिः श्रुता न तो दातुः प्रजापतेः र्णिजस्यापि विधिं नयेत्॥ पूर्वोदाहृतवाक्ये प्रतिगृह्णीयादिति विधिपदश्र
वणात्॥ प्रतिग्रहीतुरिष्टिरिति चेत् न॥ उपक्रमे रूपेणार्थवादेन दातुस्तदिष्टिप्रतीतेः॥ उपश्रुतक्रमश्चैवं श्रूयते॥ प्रजापतिर्वरुणायाश्व
मनयत् स स्वां देवतामार्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तं निरवपत्ततो वै स वरुणपाशादमुच्यतेति अनयत् ददत्तवान्॥
स च ददाता प्रजापतिः स्वकीयां वरुणदेवतां जलोदररोगप्रदां प्राप्तवान्॥ तेन च रोगेण ग्रस्तः स प्रजापतिर्विदीर्णो भूत्वा रोगपरिहारायेष्टिं
कृत्वा रोगादमुच्यतेत्यत्र दातुरिष्टिरित्यवगम्यते॥ असंजातविरोध्युपक्रमानुसारेण विधायकपदमपि प्रतिग्राहयेदित्येवमंतर्भावि
तणिजर्थपरतया व्याख्येयं॥ ॥ षोडशाधिकरणमारचयति॥ ॥ सोमवामिचरुर्लौकिके वैदिके द्वियसंक्षयः॥ दृष्टदोषाल्लौकिके तावमने
विहितश्चरुः॥ अदोषावमनायैव लोके पानं श्रुतौ पुनः॥ जरणायतनीवांतिदोषशांत्यै मतेचरुः॥ इदमाम्नायते॥ ॥ सोमेंद्रं चरुं निर्वपे
च्छ्यामाकं सोमवामिन इति॥ तत्र लौकिके सोमवमने विहितोयं चरुः कुतः विवा एष इंद्रियेण वीर्येण व्यृध्यते यः सोमं वमितीति॥ दृष्ट
दोषमुपन्यस्य तच्छांतये चरुविधानादिति चेन्मैवं॥ लोके धातुसाम्यार्थिना वमनायैव सोमस्य पाने सति वमनस्य दोषस्य हेतुत्वाभावा
त्॥ वेदे तु हिन्वमे गात्रा हरिवइत्यनेन मंत्रेण जरयितुं सोमः पीतेयं॥ तत्र मन प्रायश्चित्तार्थोयं चरुः॥ ॥ सप्तदशाधिकरणमारचय
ति॥ ॥ ऋत्विजां वमनेप्येष कर्तुरेवात्र वर्जनात्॥ विशेषस्याग्निसोमेवं कर्तुरेव निरूपितः॥ ईदृशा सोमस्य वमने चरुरिति विशेष
स्याभावादृत्विजां यजमानस्य च वमने सर्वत्रापि चरुः इति चेन्मैवं॥ यो वमति स निर्वपतीति निर्वप्तुर्वमनं चरुनिमित्तं निर्वप्ता च यजमा
नः॥ ऋत्विजो निर्वप्तृत्वं त्वधिकारांतरत्वप्रसंगात्तस्माद्यजमानस्यैव वमने चरुविधिः॥ ॥ अष्टादशाधिकरणमारचयति॥ ॥ यागे
हविस्त्यजेत्कृत्स्नं कोप्यंशः शिष्यते यथा॥ देवार्थत्वात्त्यजेत्सर्वं शिष्यते द्विरवत्ततः॥ आग्नेयोष्टाकपाल इत्यत्र कृत्स्नोपि पुरोडाशोग्न

येत्यकव्यः॥ तद्धितेन कृत्स्नस्याग्निदेवतासंबंधावगतेस्त्यागमंतरेणेतदनुपपत्तेरिति चेन्मैवं॥ द्विर्हविषोवद्यतीत्यवदानद्वयं श्रूयते॥
अवदेयं चांगुष्ठपर्वमात्रं॥ तथा च कल्पसूत्रकारः॥ आग्नेयस्य पुरोडाशस्य मध्यादंगुष्ठपर्वमात्रमवदानं तिरश्चीनमवद्यतीति ततो
हविषः सकाशादंगुष्ठपर्वद्वयमात्रं खंडयित्वात्यक्तव्यं॥ इतरच्छेषणीयं देवतासंबंधस्त्वाशाद्वारेणाप्युपपद्यते॥ ॥ एकोनविंशाधि
करणमारचयति॥ ॥ शेषात्स्विष्टकृतदेकस्मात्सर्वेभ्यो वृकतः कृते शास्त्रार्थसिद्धिः सर्वेभ्यः कार्यसंस्कारसाम्यतः॥ दर्शपूर्णमास
योः श्रूयते॥ शेषात्स्विष्टकृते समवद्यतीति तत्राग्नेयादीनां त्रयाणां हविषां मध्ये कस्यकस्यचिदेकस्य हविषः शेषादवदातव्यं ताव
तैव शास्त्रानुष्ठानसिद्धेरिति चेन्मैवं॥ उपयुक्तं हविः संस्कर्तुमिदमवदीयते॥ संस्कारश्च सर्वेष्वपि हविःषु समानस्तस्मात्सर्वेभ्यो हवि
शेषेभ्यः स्विष्टकृदनुष्ठेयः॥ ॥ विंशाधिकरणमारचयति॥ ॥ यदेकस्मात्तदामुख्यनियतिर्नोत विद्यते॥ नाकृते रस्ति मुख्यानि
कर्मणे हेत्वभावतः॥ एकस्मादेव हविः शेषात्स्विष्टकृदिति यः पूर्वाधिकरणे पूर्वपक्षः स्तस्मिन्पक्षे नियामकस्याकृतत्वाद्यस्मात्क
स्माच्चिद्धविः शेषादिति प्राप्ते ब्रूमः॥ प्रथमातिक्रमे कारणाभावात्प्रथमहविः शेषेणैव संस्कारसिद्धावितरत्र प्राप्त्यभावादस्ति निय
तिः॥ ॥ एकविंशाधिकरणमारचयति॥ ॥ इदं ब्रह्मण इत्युक्तिः क्रयार्था भक्षणाय वा॥ भक्षाकृतेः क्रयार्थाता यथेष्टं तैर्नियुज्य
तां॥ देवतायै समस्तस्य कॢप्तत्वात्स्वामिता नहि॥ शेषस्य प्रतिपत्त्यर्थं भक्षणं तत्र युज्यते॥ चतुर्धाकृतस्य पुरोडाशस्य भागान्॥ यज
मान एवं निर्दिशेत् इदं ब्रह्मण इदं होतुरिदमध्वर्योरिदमग्नीध इति योयं निर्देशः स न भक्षणार्थः॥ भक्षणस्याकृतत्वात्ततो भृतिद
नेन तानृत्विजः परिक्रेतुमयं निर्देशः कृतः॥ क्रयश्च तदंगीकारानुसारेण स्वल्पेनाप्युपपद्यते॥ तस्मात्स्वकीयाभागास्तैरिच्छ
या पयोक्तुं शक्या इति प्राप्ते ब्रूमः॥ अग्नये जुष्टं निर्वपामीति कृत्स्नस्य हविषो देवतार्थं संकल्पितत्वेन तत्र यजमानस्य स्वामित्वाभा
वान्न युक्तः परिक्रयः भक्षणं तु प्रतिपत्त्यर्थत्वाद्युक्तं॥ अवशिष्टस्य यः कोप्युपयोगः प्रतिपत्तिः पुरोडाशस्य भक्षणार्हत्वाद्भक्षण
न कर्मकाराणामुत्साहजननाच्च भक्षणार्थो निर्देशो युज्यते॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे तृतीयाध्यायस्य
चतुर्थः पादः॥ ॥ ४॥ पंचमपादे प्रथमाधिकरणमारचयति॥ ॥ उपांशुयाजद्रव्येण शेषकार्यं भवेन्नवा॥ भवेद्धविर्भ्यः सर्वेभ्य
इत्युक्त्या प्रापितत्वतः॥ उक्तद्रव्यं शेषस्थाभाव्युपस्तरणादिकृत॥ अतो न प्रतिपत्त्यर्हः शेषकार्यं ततः क्व॥ ध्रौवाज्यादुपांशुयाजा
र्थमवदाने कृते तच्छेषेण ध्रौवेण स्विष्टकृदादिकं शेषकार्यं कर्तव्यं॥ कुतः सद्यत्सर्वेभ्यो हविर्भ्यः समवद्यतीति वाक्येन प्रापितत्वादि
ति चेन्मैवं॥ कृतार्थद्रव्यशेषात्स्यात्प्रयोगापेक्षः प्रतिपत्तुमर्हति॥ ध्रौवं त्वाज्यं न कृतार्थं तेन कर्तव्यानां भविष्यतामुपस्तरणादीनां सद्भावा

103
1945

ति चेन्मैवं॥ कृतार्थद्रव्यशेषात्स्यात्प्रयोगापेक्षः प्रतिपत्तुमर्हति॥ ध्रौवं त्वाज्यं न कृतार्थं तेन कर्तव्यानां भविष्यतामुपस्तरणादीनां सद्भावा
त्तस्मान्न तेन शेषकार्यं भवति॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ आक्रामत्सु हू कुंभीभिरस्ति शेषक्रिया न वा॥ जुह्वावदानात्प्रकृता
विशेषक्रियान्विता॥ कुंभी पुनः शेषासंसिद्धेः साकंप्रस्थायीनकर्मणि॥ नस्विष्टकृदिदं कार्यं आग्नीध्रस्कन्दप्रदानतः साकंप्रस्थायीनयजे
त पशुकाम इति विहितके कर्मणि श्रूयते॥ सहकुंभीभिरभिक्रामन्नाहेति॥ तत्र चतसृभिर्द्धिपयः कुंभीभिः सहाहवनीयदेशोभिक्रम
णमात्रं श्रुतं न तु तत्र कुंभीभिर्होमः श्रुतः॥ तथा सत्यस्य कर्मणः सान्नाय्यविकृतित्वाज्जुह्वा कुंभीभ्यावदाय होतव्यं॥ कृतशेषेण च
स्विष्टकृदादिकं सान्नाय्यशेषेणैव कर्तव्यमिति प्राप्ते ब्रूमः॥ नात्र कुंभीषु हुतशेषः सिध्यति सान्नायवज्जुह्वा तदवदानाभावात्॥ अग्नी
धः कुंभी प्रदाय सहकुंभीभिरभिक्रामन्नित्युक्त्यानुजुह्वू पभृतोः प्रतत्वादभिक्रमणस्य होमार्थत्वाच्च कुंभीभिरेव दधिपयसोर्होमे सति
कुंभीमात्रमवशिष्यते न तु हविः शेषस्तत्र कुतः शेषकार्यं॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ सौत्रामण्यां ग्रहे स्विष्टकृदाद्यस्ति
न वास्ति तत॥ शेषणान्न सुराक्षीरयोरन्यत्रोपयोगतः॥ सौत्रामणीनामके यागे श्रूयते॥ पयोग्रहाः सुराग्रहाः गृह्यंत इति॥ तत्र प्रकृ
तिगतसोमग्रहेष्विव शेषकार्यं स्विष्टकृदादिकमस्ति॥ न चात्र पूर्ववच्छेषाभावः॥ उच्छिष्टाश्चिनसर्वं जुहोतीत्येव शेषयितव्यत्वश्रव
णादिति चेन्मैवं॥ अवशिष्टस्यान्यत्रोपयोगश्रवणात् ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारमिति श्रूयते॥ यदि ब्राह्मणं न विंदेत
वल्मीकवपायामवनयेदिति च॥ शतातृण्णायां समवनयेदिति च॥ शतच्छिद्रा कुंभी शतातृण्णा तस्मान्नास्ति स्विष्टकृदादिकं॥ ॥ च
तुर्थाधिकरणमारचयति॥ ॥ रथंतरादिभिर्भिन्ना इंद्रास्तेषां न भिद्यते॥ पुरोडाशस्तत्र शेषकार्यं किं भिद्यते न वा भिद्यते कर्मणां
भेदाच्चोदकैः पृथगुक्तितः॥ शेषस्य सर्वतुल्यत्वात्तत्कार्यं सकृदिष्यतां॥ य इंद्रियकामो वीर्यकामः स्यात्तमेतया सर्वपृष्ठया या
जयेदिति॥ विहितायामिष्टौ षडिंद्रा एवं श्रूयंते॥ इंद्राय राथंतरायेंद्राय बार्हतायेंद्राय वैरूपायेंद्राय वैराजायेंद्राय शाक्वरायेंद्राय रैव
तायेति॥ तत्र स्वरूपेणैकोपींद्रः पृष्ठस्तोत्रेषु पठ्यमानानां षण्णां रथंतरादिसाम्नां संबंधेन विशेष्यमाणः षोढा भिद्यते॥ तासां
सर्वासामिंद्रदेवतानामेक एव पुरोडाशो विधीयते द्वादशकपालः पुरोडाशो भवति वैश्वदेवत्वायेति॥ तस्मिंश्च पुरोडाशे प्रोक्तदेवता
भ्यः पृथक्पृथक् प्रदानाय यद्दुभ्यः प्रदेशेभ्यो वदानं श्रूयते॥ समंतं पर्यवद्यतीति इति॥ तत्र देवताभेदेन प्रदानभेदेन च कर्मणां भेदे
सति चोदकैः पृथग्गतिदेशात्स्विष्टकृदिडादिशेषकार्यं षट्कृत्वः पृथक्कर्तव्यमिति चेत्मैवं॥ शेषस्यैकत्वेन तत्प्रतिपत्तेः पृथक्त्वासं

भयात्तस्मात्सकृदेवकार्यं॥ ॥ पंचमाधिकरणमारचयति॥ ॥ ऐंद्रवायवस्य शेषस्य सकृद्भक्षउतासकृत्॥ पूर्वन्यायात् सकृत्प्राप्तो द्विर्भ
क्षो वचनाद्भवेत्॥ ज्योतिष्टोमे योयमैंद्रवायवग्रहइष्यते॥ तत्र संस्कार्यस्य सोमस्यैकत्वात्सकृदेव शेषकार्यमितिचेन्नैवं॥ द्विरैंद्रवाय
वस्य भक्षयति॥ द्विर्ह्येतस्य वषट्कारोतीति वचनाद्द्विर्भक्षणं॥ ॥ षष्ठाधिकरणकमारचयति॥ ॥ सोमेषु भक्षोभक्षोवानभक्षो
यहहोमतः॥ अल्पोक्तेरस्ति शेषास्य भक्षो पूर्ववचो बलात्॥ सोमयागेषु शेषभक्षो नास्ति यज्ञहान् जुहोतीति कृत्स्न ग्रहेणाहुतिश्र
वणात् कुंभीष्विव शेषाभावादितिचेन्नैवं॥ अल्पं जुहोतीति विशेषवचनाच्छेषः सिध्यति॥ न द्भक्षणं त्वपूर्वार्थ प्रतिपादकवचनेभ्योव
गम्यते॥ आश्विनं भक्षयति द्विरैंद्रवायवस्य भक्षयति सदसि भक्षयंतीत्यादीनि वचनान्यपूर्वार्थं प्रतिपादयंति ततो भक्षविधानाद
स्ति सोमेषु भक्षः॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ किं प्रैतुहोतुश्चमसइत्यभक्षोथभक्षणं॥ अभक्षोनुक्तितो होतुश्चमसे
त्वाख्यया स्फुटः॥ ज्योतिष्टोमे श्रूयते प्रैतु होतुश्चमसः प्रब्रह्मणः प्रोद्गातृणां प्रयजमानस्य प्रयंतु सदस्यानामिति॥ तत्र वचनाभावा
दभक्षइतिचेदमेवं॥ समाख्यागतेच मसशब्दे भक्षणस्य प्रतीयमानत्वात्॥ चम्यते भक्ष्यंते सोमोस्मिन्पात्रविशेषइति हि तद्व्युत्प
त्तिस्तस्मादस्ति तद्भक्षणं॥ ॥ अष्टमाधिकरणकमारचयति॥ ॥ प्रोद्गातृणामितिह्येकउद्गाता भक्षयेत्युत॥ सर्वेपिकिंवास्कब्र
ह्मण्येनोनाः सामगायिनः सहितास्तेन तेवाद्यउद्गातृश्रोति तेखिलाः॥ बहुत्वाद्गानयोगेन तृतीयोरूपढिबाधितः॥ योगसामाख्य
यादंडिन्यायादंत्योत्रभाष्यगः॥ सदसिस्थित्यभावेन तृतीयोवार्तिकोदितः॥ पूर्वोदाहृतवाक्ये प्रोद्गातृणामित्यत्रैकस्यैवभक्षः
उद्गीथशब्दाभिधेयायाः सामभक्तेः कर्तागातरिउद्गातृप्रातिपदिकस्य रूढत्वादित्येकः पूर्वः पक्षः॥ उद्गातृणामित्यस्य बहुत्व
स्यैकस्मिन्नसंभवादुद्गात्रोपलक्षिताः षोडशर्त्विजः सर्वेपि भक्षयेयुरिति द्वितीयः पक्षः॥ उद्गीथप्रस्तावप्रतिहारान्सामभागानुद्गातृ
प्रस्तोतृप्रतिहर्तारः प्रयोगकाले गायंति उत्कर्षेण गायंतीति योगेनोद्गातारस्त्रयो भक्षयेयुरिति तृतीयः पक्षः॥ रूढिर्योगमपहर
तीति न्यायादेक एवोद्गाता तेन बहुवचनोपपत्तये प्रत्यासन्ना उपलक्ष्यंते॥ प्रत्यासत्तिश्च प्रस्तोतृप्रतिहर्त्रोरिव सुब्रह्मण्यस्याप्यस्ति॥
सामवेदाध्यायित्वात्सुब्रह्मण्यादिनामपि तदीयकर्मण्यप्यौद्गात्रसमाख्यायाः सत्वात्॥ तस्मात्सुब्रह्मण्येन सहिताश्चत्वारः सामगा
भक्षयेयुरित्ययमंत्यः पक्षो भाष्यकारस्याभिमतः वार्तिककारस्तु सदसो भक्षणस्थानत्वात्सुब्रह्मण्यस्य सदस्यप्रवेशात्तेन विरहि
ता अवशिष्टाः सामगाभक्षयंतीत्यमुमेव तृतीयं पक्षमंगीचकार॥ ॥ नवमाधिकरणकमारचयति॥ ॥ किंस्याच्चमसिनामेवहा
रियोजनभक्षणं॥ सर्वेषां वाग्रिमस्त्वेषां पूर्ववाक्येन संनिधेः॥ लिप्संते सर्व एवेति हारियोजनवाक्यतः ग्रावस्तुतोप्यस्ति भक्षस्त्वमसित्व

105 / 1945

मकारणं॥ हरिरसि हारियोजन इत्यनेन मंत्रेण गृह्यमाणो ग्रहो हारियोजनः॥ होतृब्रह्मादयश्चमसिनः यस्तु चतुर्णां होतॄणां म
ध्ये चतुर्थो ग्रावस्तुन्नामकोस्तिनासौ चमसी तत्र चमसिनामेव हारियोजनेभक्षणं कृतः॥ यथा चमसमन्यांश्चमसिनो भक्षय
ति॥ अथैतस्य हारियोजनस्य सर्व एव लिप्संत इत्यत्र पूर्ववाक्ये चमसिनां सन्निहितत्वेनोत्तरवाक्ये सर्वशब्देन तेषामेवाभिधात
व्यत्वात्॥ अतो नास्ति ग्रावस्तुतस्तत्र भक्षइति प्राप्तेब्रूमः॥ अथशब्देनैव करणेन च चमसिमात्रशंकामपोह्य वाक्येन विहित
स्य सर्वभक्षणस्य संन्निहितमात्रेण संकोचायोगादस्ति ग्रावस्तुतोपि भक्षस्तस्माच्चमसित्वं न भक्षणे कारणं॥ ॥ दशमाधिक
रणकमारचयति॥ ॥ आद्यभक्षो वषट्कर्तुर्विधिः प्राथम्य एव किं किंवा तद्धेतुर्भक्षेस्याद्वषट्कारनिमित्तके अप्राप्तेरग्निमोमैवं स
मासस्थित्यसंभवात्॥ विशिष्टस्य विधिस्तस्माद्वषट्कारोपि कारणं॥ वषट्कर्तुः प्रथमभक्षइत्येवं श्रूयते वषट्कर्ता होता तस्य भक्ष
णं समाख्ययाप्राप्तं॥ प्राथम्यं त्वप्राप्तमिति तदेवात्र विधीयतइतिचेन्नैवं॥ प्रथमभक्षइत्यस्य समस्तपदत्वेन योभक्षः॥ स प्रथमइत्ये
वं विच्छिद्यान्वेतुमयोग्यत्वात्प्राथम्यविशिष्टं भक्षणमत्र विधीयते॥ तस्मिन्भक्षे वषट्कारः कारणं॥ ॥ एकादशाधिकरणमारच
यति॥ ॥ आख्या वचो वषट्कारा एवं किं भक्षहेतवः॥ किंवाभिषवहोमौ च तन्नाद्यो सहक्रियादिशा॥ हविर्धाने भिषुत्याथ हुत्वा सदसि
भक्षयेत्॥ इतिश्रुतत्वतस्तौ च भक्षहेतू यथा त्वरः॥ प्रैतु होतुश्चमसइत्यत्र समाख्या भक्षहेतुः हारियोजनवाक्यं वषट्कर्तुः प्रथमभ
क्षइत्यत्र वषट्कार इत्येव मुक्तत्वात्त्रय एव भक्षहेतव इतिचेन्नैवं॥ हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यंचः॥ परेत्य सदसि
भक्षयंतीतिश्रूयते॥ उत्तरवेद्याः प्रतीचीने सदसः प्राचीने मंडपेभिषवः॥ उत्तरवेद्यां होमः सदसि भक्षणं तत्राभिषवहोमयोर्व्यव
धानांतरप्राप्तयोरविधेयतया तौ निमित्तत्वेनानूद्य भक्षणं विधीयते तस्मात्समाख्यादिवदेतयोरपि हेतुत्वमस्ति॥ ॥ द्वादशाधि
करणमारचयति॥ ॥ हेतुसंघे विकल्पः किं बाधो वाथ समुच्चयः॥ साम्याद्विकल्पो वाध्यंतां साधकाशाः समाख्यया॥ नैव
वाचनिकं बाध्यं भक्षणेत्र विभागशः॥ सिद्धे विकल्पो नो युक्तः स्वीकार्योतः समुच्चयः॥ प्रैतु होतुश्चमसः प्रब्रह्मण इत्यत्र चम
सिषु समाख्या भक्षणे हेतुः वषट्कर्तुः प्रथमभक्ष इत्यत्र वषट्कारो हेतुः हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा सदसि भक्षयंती
त्यत्राभिषवसहितो होमाध्वर्योर्भक्षहेतुस्तत्र चमसवषट्कारयोः संघो होतरि प्राप्तः चमसाभिषवहोमसंघोध्वर्यौ प्राप्तः॥ त
त्र हेतुद्वयस्य समानबलत्वाद्विकल्पे सत्यन्यतरनिमित्तकृतमेव भक्षणमित्याद्यः पक्षः वषट्कारादिहेतोश्च समेतरग्रहेषु सावका

शत्वान्निरवकाशत्वाच्चमसमाख्याया तद्बाधे सति च समेषु पाक्षिकमपि वषट्कारादिहेतुकं भक्षणं नास्तीति द्वितीयः पक्षः॥
वषट्कर्तुरित्यादिवाक्यस्य प्रबलत्वात्समाख्याया बाधो युक्तः निरवकाशोक्तो तयासामिप्रबलेति चेत॥ तर्हि प्रमाणद्वयेन पृथ
ग्भक्षणाभिहिते समुच्चयोभ्युपेयः न च व्रीहियववद्विकल्पस्तत्र पुरोडाशनिष्पादनस्य दृष्टप्रयोजनस्यैकत्वात॥ इह तु नि
यमादृष्टार्थं भक्षणं तच्चादृष्टं यथावचनं द्विविधं तस्मात्समुच्चयः॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥ एकपात्रे कि
मध्वर्युरद्यात्पूर्वं वमुत्तेरते॥ तद्धस्ते पात्रसंस्थानात्तस्य प्रथमभक्षणं॥ पाहि होतर्वनः पूर्व इति मंतरेण पूर्वता॥ वषट्कर्तु
स्तदुक्तेश्च न्यायबाध्यं वचो न हि॥ एकस्मिन्पात्रे बहूनां कश्चिद्विहितं भक्षणं तत्राध्वर्युः प्रथमं भक्षयेत् पात्रसंनिधानादिति
चेन्मैवं॥ लिंगवाक्याभ्यां होतुः प्रथमभक्षावगमात॥ होतर्वनः प्रथमः पाहीति ऋत्विजोध्वर्युसंबोध्यैवं प्रार्थयंते॥ यथाहो
तास्मत्तः पूर्वं भक्षयेति विद्वांत्यालिंगवान। तथात्वमिपि पाहीति तदेत होतुः प्रथमभक्षे लिंगं वाक्यं चेयमा
म्नातं वषट्कर्तुः प्रथमभक्ष इति तत्र विशिष्टविधानात्प्राथम्यमपि सिध्यति॥ तत्रैतद्वचनं पात्रसंनिधिरूपेण न्यायमात्रेण बा
धितुं शक्यं तस्माद्धोता प्रथमं भक्षयेत॥ ॥ चतुर्दशाधिकरणमारचयति॥ ॥ नानुज्ञापूर्वको भक्षस्तत्पूर्वो वा त्र लाघवात॥
आम्नानान्नुपहूतेन पेयत्यक्तितोंतिमः॥ अनुज्ञाभक्षयोर्द्वयोरनुष्ठितोंगो स्वात॥ भक्षमात्रमिति चेन्मैवं॥ तस्मात्सोमो नानुपहू
तेन पेय इति वचनेनानुज्ञाया आवश्यकत्वात॥ ॥ पंचदशाधिकरणमारचयति॥ ॥ किमनुज्ञा लौकिको त्स्या वैदिकी वा
यथा तथा॥ अविशेषादुपाह्वानमंत्रलिंगात्तु वैदिकी॥ उपहूत उपह्वयस्वेत्ययं मंत्रो लिंगेन मंत्रमनुज्ञायां विनियुंक्ते॥ तस्मा
द्वैदिको त्स्यात् तदनुज्ञानं॥ ॥ षोडशाधिकरणमारचयति॥ ॥ उपह्वयस्वोपहूत इत्यशेषाद्वयोर्भवेत॥ अनाज्ञानुज्ञापनयोर
थवा सोविभज्यते॥ विभागकारणाभावादशेषश्चेल्लिंगतः॥ उपह्वयेत्यनुज्ञाप्यानुज्ञाने तत्परः॥ उपहूत उपह्वयस्वेत्य
स्मिन्मंत्रे मध्यमपुरुषैकवचनांतो भागः॥ पश्चात्पठितो विस्पष्टसम।त्वात्प्रथमभाविन्यनुज्ञापने समर्थः॥ प्रथमैकव
नांतस्तु प्रथमपठितोप्युत्तरसमानत्वात्पश्चाद्भाविन्यामनुज्ञायां समर्थः॥ तस्माल्लिंगेन विभज्य विनियुज्यते॥ ॥ सप्तदशाधि
करणमारचयति॥ ॥ उपाह्वानं विशेषाणामुत स्यादेकपात्रिणां॥ अदृष्टहेतोराद्यस्याद्दृष्टाधिक्याद्वितोंतिमः॥ अनुज्ञाप
नस्यादृष्टंप्रयोजनं तच्च विभिन्नपात्रेष्वपि समानमिति चेन्मैवं॥ दृष्टप्रयोजनस्य सद्भावात्साधारणवस्तुनि कथं चिद्धा

107
1945

त्साधारणे वस्तुनि कथंचिद्भागाधिक्ये परा धो भवति॥ अतोन्यूनाधिकत्वपरिहारनिमित्तमनुज्ञापनमेकपात्रिणामेव॥ ॥
अष्टादशाधिकरणमारचयति॥ ॥ होतुर्याज्यापनीतौ किं न वषट्कारभक्षयोः॥ अपनीतिरुताप्यो नापनीतिर्विभेद
तः॥ यजमानेन यष्टव्यं नाविनेष्टिर्वषट्कृतिं॥ वषट्कारो याज्यया तः संहापेत्यदनं तथा॥ ज्योतिष्टोमे ऋतुयाजनामकेषु यागे
ष्वाम्नायते॥ यजमानस्य याज्या सोभिप्रेष्यति होतारं तद्यजेति स्वयं वा निषद्य यजतीति होत्रकांडे समाम्नाता याज्याः समाख्य
या होतुः प्राप्ताः तासु काश्चिद्याज्या होतुरपनीय यजमानस्य विधीयंते॥ ततो यजमानः स्वेच्छया होतारं वा प्रेष्यति॥ स्वयं वा या
ज्यां पठति॥ तत्र स्वपाठपक्षे याज्यैव होतुरपनीयते॥ न तु वषट्कारभक्षावपनीयेते॥ तयोर्याज्याया मनंतर्भावात॥ अतो हो
ता वषट्करोति भक्षयति चेति प्राप्ते ब्रूमः॥ स्वयं वा निषद्य यजतीति पक्षस्वीकाराद्यजमानेन यागः कर्तव्यः॥ स च यागो वषट्
कारमंतरेण न संभवति॥ याज्याया वषट्करोतीति तावद्विधानात॥ ननु यजमानो याज्यां पठतु होता वषट्करोतु इति चेन्मै
वं॥ अनयानं यजतीति याज्यावषट्कारनिमित्तो भक्षश्च होतुरपनीय यजमानेन निविश्यते॥ ॥ एकोनविंशाधिकरणमारच
यति॥ ॥ न्यग्रोधपिष्टं सोमस्य स्थाने क्षत्रियवैश्ययोः॥ भक्षमात्रे विकुर्यात सोमयागेपि वात्स्यायद्भक्षविषयं वाक्या
मुपक्रम्योपसंहृतं॥ भक्षं यच्छेदिति तत्तो विकारो भक्षमात्रयागः॥ फलाख्याचमसेना सोयजेतेति श्रुतत्वतः॥ इज्यायां च
विकारोस्ति यागार्थो भक्षसंस्कृतिः॥ ज्योतिष्टोमे श्रूयते॥ यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं विभक्षयिषेन्न्यग्रोधस्तिभि
नीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममिति स्तिभिन्यो मुकुलानि॥ तत्रोपक्रमोपसंहारयोर्भक्षविष
यत्वाद्भक्षमात्रे सोमः पिष्टेन विकृत इति चेन्मैवं॥ यदान्यांश्चमसानुज्जुह्वति अथैतस्य दर्भतरुणकेनोपहत्य जुहोतीति श्रुतं॥
तत्र फलचमसरूपेण यथा क्रपिष्टेन यागमंगीकृत्य दर्भतरुणकगुणो विधीयते॥ किंच दृष्टं च संस्कारो हि भक्षः स च यागमंत
रेणानुपपन्नस्तस्माद्यागविकारः॥ ॥ विंशाधिकरणमारचयति॥ ॥ राजसूये कश्चित्क्रतुश्चमसो दशभिर्जनैः॥ भक्ष्यः
किं तत्र राजन्या भक्षका ब्राह्मणा उत॥ आद्यो गानात्संख्येयैकजातेर्विप्राः शतं दश॥ चमसानध्वरित्वक्षत्या राजपात्रं च
विप्रगं॥ राजसूये दशपेयनामके यागे श्रूयते दशदश। कं चमसमनुप्रसर्पतीति तत्र यजमानस्य राजन्यस्य यश्चमसः॥
सोयं राजन्यैरेव दशभिर्भक्षणीयः कुतः दशेति संख्यया जात्येकत्वप्रतिभानात्तथापि दशपेयस्य ज्योतिष्टोमविकृतित्वात॥

प्राकृतंधर्मजातंचोदकेनप्राप्तं॥ प्रकृतौचयजमानचमसस्यभिन्नजातिभिर्भक्षणंनास्तीत्यत्रापितथैवप्राप्तं॥ तद्यत्वदशेतिः
विशेषोवक्तुंविधीयेत॥ तर्हिप्राकृतंभक्षकसंख्यामात्रंनिवर्ततांनत्वेकजातित्वंतस्माद्राजन्योयजमानोन्यैराजन्यैर्नवभिः
सहभक्षयेदितिप्राप्तेब्रूमः॥ प्रकृतितःप्राप्तेषुदशसुचमसेषुभक्षणीयानुप्रसर्प्यता॥ पुरुषाणांदशादशेतिवीप्सयाप्रति
चमसंदशसंख्यांविधायार्थसिद्धांशतसंख्यामनूद्यसंख्येयानांसर्वेषांब्राह्मण्यंविधीयतेब्राह्मणाःपिबंतीतियथासति
यजमानस्यापिराजन्यस्ययत्रभक्षोनास्तितत्रकुतोन्येराजन्याभक्षयेयुःतस्माद्ब्राह्मणाएवभक्षकाः॥ ॥ इतिश्रीमाधवीये
जैमिनिन्यायमालाविस्तरेतृतीयाध्यायस्यपंचमःपादः॥ ॥५॥ षष्ठपादेप्रथमाधिकरणं॥ प्रकृतौविकृतौवास्याद्यस्यप
र्णत्वसौविधिः॥ प्रकृतावेववातुल्याद्वचनादुभयोरसौ॥ जुहूमाश्रित्यपर्णत्वविधिःप्रकृतिमात्रगः॥ चोदकेनोभयप्राप्तेविकृतौ
विधिनात्रर्थकं॥ अनारभ्यश्रूयते॥ यस्यपर्णमयीजुहूर्भवतिनपापंश्लोकंशृणोतीति॥ तत्राव्यभिचरितक्रतुसंबंधवतीजुहूमा
श्रित्यतद्धेतुःपर्णवृक्षोवाक्येनविधीयते॥ याजुहूःसापर्णमयीतिवाक्यंचविकृतिप्रकृत्योस्तुल्यंप्रवर्तते॥ उभयत्राश्रयभूता
याःजुह्वाःसत्वात्॥ तस्मात्प्रकृतिविकृत्योरुभयोरप्ययंविधिःइतिप्राप्तेब्रूमः॥ किमयंविधिश्चविकृतौनोदकात्पूर्वंनिविशते
पश्चाद्वानाद्यःआश्रयभूतायाजुह्वाश्चोदकमंतरेणासंभवात्॥ द्वितीयेतुपर्णत्वमपिजुह्वासहैवचोदकेनातिदिश्यते॥ तत्र
पुनर्विधिर्वैयर्थ्यादयंविधिप्रकृतिमात्रगः॥ एवंयस्यखादिरस्रुवोभवतीत्युदाहरणीयं॥ ॥ द्वितीयाधिकरणमारचयति॥॥
सामधेनीःसप्तदशप्रकृतौविकृतावुत॥ पूर्ववत्प्रकृतौपांचदश्येनैतद्विकल्प्यतेविकृतौसाप्तदश्यंस्यात्प्रकृतौप्रक्रियाबलात्॥
पांचदश्यावरुद्धत्वादाकांक्षायानिवृत्तितः॥ अनारभ्यश्रूयते॥ सप्तदशसामिधेनीरनुब्रूयादितिप्रवोवाजाअभिद्यवइत्याद्याअ
ग्निसमिंधनार्थाऋचःसामिधेन्यस्तासांसप्तदश्यंपूर्वन्यायेनप्रकृतिगतं॥ यदिप्रकृतौपंचदशसामिधेनीरन्वाहेतिविधिस्यात्त
र्हिपांचदश्यसाप्तदश्येविकल्प्येतयामितिप्राप्तेब्रूमः॥ विकृतावेवसाप्तदश्यंनिविशते॥ प्रकृतौपांचदश्येनावरुद्धानांसामिधेनीनां श्रीः
संख्याकांक्षायाअभावात्॥ नचपांचदश्यसाप्तदश्यवाक्ययोःसमानबलत्वादवरोधाभावइतिशंकनीयंपांचदश्येप्रकरणानु
ग्रहस्याधिकत्वात्॥ तस्मान्मित्रविंदाध्वरकल्प्यादिर्विकृतौसप्तदशत्वमवतिष्ठतेनचात्रपूर्वन्यायोस्तिसाप्तदश्यास्यचोदकप्राप्त्य ५४
भावेनपुनर्विधानप्रदोषाभावात्॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ साप्तदश्यंतुवैश्यस्यविकृतौप्रकृतावुत॥ पूर्ववच्चे

109
1945

न्नसंकोचांनित्येनैमित्तिकोक्तितः॥ गोदोहनेनप्रणयेत्कामीत्येतदुदाहरत्॥ भाष्यकारस्तदप्युक्तन्यायस्यात्रसम
त्वतः॥ सप्तदशानुब्रूयाद्वैश्यस्येतिविहितंवैश्यनिमित्तंसाप्तदश्यंपूर्वन्यायेनविकृतिगतमिति॥ चेन्मैवं॥ नैमित्तिकेना
नेनप्रकृतिगतस्यनित्यपांचदश्यस्यवैश्यव्यतिरिक्तविषयतयासंकोचनीयत्वात्॥ नित्यंसामान्यरूपतयासावकाशं
त्वेनदुर्बलंनिमित्तिकंतुविशेषरूपत्वनिरवकाशत्वाभ्यांप्रबलंतस्माद्वैश्यनिमित्तकंसाप्तदश्यंप्रकृतावेवतिष्ठते॥ अत्र
भाष्यकारोन्यदुदाजहारचमसेनापःप्रणयेद्गोदोहनेनपशुकामस्येति॥ तत्रप्रकृतेश्चमसेनावरुद्धत्वाद्गोदोहनंवि
कृतावितिपूर्वपक्षः॥ कामनानिमित्तकेनगोदोहनेननित्यस्यचमसस्यनिष्कामविषयतयासंकोचनीयत्वात्प्रकृता
वेवगोदोहनमितिराद्धांतः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ आधानंपवमानादिरिष्टेरंगनवाभवेत्॥ अग्नि
नामिष्टिशेषत्वात्तद्द्वारास्यतदंगता॥ अनारभ्यविधानात्तुमांगंकस्यचिदाहितिः॥ अग्न्यर्थत्वात्तत्समेष्टिस्त्वग्नयस्त्वग्नि
होत्रगाः॥ इदमाम्नायते॥ अग्नयेपवमानायाष्टाकपालंनिर्वपेदग्नयेपावकायाग्नयेशुचयइतिवसंतेब्राह्मणोग्नि
मादधीतेतिच॥ तत्राप्रधानंपवमानादिष्टीनामंगंकुतः॥ दर्शपूर्णमासविकृतिषुपवमानादीष्टीषुचोदकप्राप्तानाहवनी
याद्यग्नीनामिष्ट्यंगत्वेसत्यग्निद्वारातत्संस्काररूपस्याधानस्यापितदंगतायाअनिवार्यत्वादितिचेन्मैवं॥ नह्येतदाधानं
कस्यचित्क्रतोःप्रकरणेपठितंकिंत्वनारभ्याधीतंअतोनकस्याप्येतदंगं॥ किंत्वाधानवदीष्टीनामप्यग्निसंस्कारार्थत्वा
त्परस्परनास्त्यंगांगिभावशंका॥ ननुपवमानेष्ट्यंगत्वाभवेऽग्निसंस्कारयैयर्थ्यादग्निद्वारातदंगत्वमुक्तमितिचेन्न॥ संस्कृ
तानामग्नीनामुत्तरक्रतुषुतत्तद्वाक्यैर्विनियोगावगमात्तस्मान्नाधानमंगं॥ ॥ पंचमाधिकरणमारचयति॥ ॥ आधा
नंकिंप्रकृत्यर्थंवह्निमात्रेणवायुतं॥ संस्कृताग्निप्रनाड्यैतत्पर्णवत्प्रकृतौस्थितं॥ लौकिकाकारमात्रत्वेविफलत्वात्क्रतौयु
तिः॥ पर्णस्याहवनीयादेःशास्त्रीयेस्तुस्वतंत्रता॥ अनारभ्याधीतंपर्णमयीत्वंयथाजुहूप्रनाड्याप्रकृतौनिविष्टंतथैवा
ग्निप्रनाड्यातत्संस्काररूपमाधानंप्रकृतौनिविशतइतिचेन्मैवं॥ वैषम्याद्द्विविधोहिजुह्वाआकारःलौकिकःशास्त्रीय
श्च॥ अरत्निमात्रदैर्घ्यंहंसमुखत्वन्यक्बिलत्वादिरूपोदृश्यमानोलौकिकःअपूर्वीयत्वाकारस्तुशास्त्रीयस्तयोरपूर्वीय
त्वंक्रतुप्रवेशमंतरेणनास्ति॥ तत्रयदिलौकिकाकारमात्रेपर्यवस्येत्तदापर्णमयीत्वंविफलंभवेत्॥ कर्णांतरेणापितदाकार

स्य सुसंपादत्वादतो पूर्वीयत्वाय पर्णता क्रतोप्रविष्टा आहवनीयादीनां त्वेक एव शास्त्रीयाकारः सर्वविधिबलादाधानेनैव जन्यते नान्यथा तस्मादाधानस्य क्रतुप्रवेशं निवैव शास्त्रीयाहवनीयाद्याकारसंपादनार्थत्वादग्निहोत्रेण तत्संयुज्यते तथासति वैषम्यात्प्रकृताव प्रविष्याग्नीनुत्पाद्य क्रतुवत्स्वातंत्र्येणावतिष्ठते॥ ततो लौकिकोपायसंपादितस्कवर्णव्रीह्यादिवदाधानसंपादितानां स्वतंत्राणामेवाहवनीयाद्यग्नीनां पश्चाद्वाक्यैः क्रतुषु विनियोगोस्तु॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ संस्कृते पवमानेष्ट्या वह्नौ सोष्टिर्नवेष्ट्यः॥ वह्नौ तत्संस्कृते कार्याश्चोदकस्यानुरोधतः॥ चोदकः पवमानेष्टीन् तां प्रापयितुं प्रभुः॥ अनंगत्वेष्ट्या सिद्धिस्याभिष्ट्यसदसंस्कृते॥ पवमानादीष्टिभिराहवनीयाद्यग्नयः संस्क्रियंते॥ संस्कृतेष्वग्निहोत्रदर्शपूर्णमासादिक्रतवः प्रवर्त्तंते तथासति विमताः पवमानेष्टयस्ताभिरिष्टिभिः संस्कृतेवह्नौ कर्तव्याः॥ इष्ट्यादितरेष्टिवत्॥ चोदको ह्येवं सत्यनुगृहीतो भवति॥ एताभिः संस्कृतेवह्नौ प्रकृत्यनुष्ठानादिति प्राप्ते ब्रूमः॥ यद्यपि पवमानेष्टेर्विकृतित्वस्तथापि चोदको न तस्यां पवमानेष्टौ पवमानेष्टिमतिदेष्टुं प्रभवति॥ विकृतौ प्रयाजादिवत्पवमानेष्टेरंगत्वाभावात्॥ किं चैतस्याः पवमानेष्टेः संस्कृताग्निसिध्यर्थं पवमानेष्ट्यंतरांगीकारे तत्रापि तथैवत्यनवस्थायामिष्टिरेवनसिद्ध्येत्॥ तस्मात्ताभिरिष्टिभिरसंस्कृते वह्नौ पवमानेष्टयः कर्तव्याः॥ ॥ सप्तमाधिकरणमारचयति॥ ॥अग्नीषोमीयसवनीयानूबंध्यपशुष्वमी॥ उपाकरणमुख्यास्तु धर्माः साधारणा नवा॥ ज्योतिष्टोमप्रकरणे पाठत्साधारणभंगी॥ पशुधर्मा ग्रहात्सोमयागेन स्युर्निरर्थकाः॥ अग्नीषोमीयधर्मत्वं तेषां स्थानात्प्रसिध्यति॥ द्वयोरितरयोः पश्वोः प्राप्यंते चोदकेन ते॥ अग्नीषोमीयः सवनीयोनूबंध्यश्चेति ते त्रयः पशवो ज्योतिष्टोमप्रकरणे समाम्नाताः पशुधर्माश्चोपाकरणपर्यग्निकरणादयः॥ तत्राम्नाताः॥ प्रजापतेर्जायमाना इमं पशुमित्याभ्यां ऋग्भ्यां रूपस्पर्शनमुपाकरणं॥ दर्भज्वालयाभिः प्रदक्षिणीकरणं पर्यग्निकरणं॥ तदेते धर्मास्त्रिष्वपि पशुषु साधारण्येन विधीयंते॥ त्रयाणामपि ज्योतिष्टोमप्रकरणपाठसाम्यात्॥ न तु ज्योतिष्टोमस्य प्रकरणे पठितानेतान्धर्मान्स एव ग्रहीष्यति न तु पशव इति चेत् न॥ तस्य सोमयागत्वात् सोमो अभिषवादीन् धर्मानाकांक्षति न तु यूपनियोजनविशसनादीन्॥ तस्माद्धर्मनिन्ययनर्थकाः संतोंगेषु निविशमाना अविशेषतस्त्रिष्वपि पशुष्ववतिष्ठंत इति प्राप्ते ब्रूमः॥ अस्त्यत्र विशेषः संनिधिलक्षणः सौत्यनामकादह्नः प्राचीन

111
1945

औपवसथ्यनामके ह्न्यग्नीषोमीयनिर्माणात्॥ ऊर्ध्वमेते धर्माः आम्नाताः अग्नीषोमीयस्यापि तदेव स्थानं सवनीयस्तु सौत्येहनि श्रूयते॥ आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं पशुमुपाकरोतीति॥ अनुबंध्यस्त्ववभृथांते समाम्नातः ततः संनिधिना ते धर्माः अग्नीषोमीये संबध्यंते सवनीयानूबंध्ययोस्तु चोदकात् अतिदिश्यंते॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ शाखाछेदादयो दोहे धर्माः सायं व्यवस्थिताः॥ प्रातश्च संति वा सायंस्थानात्तत्पूर्ववत्स्थिताः॥ आनर्थक्यप्रतिहतिः पूर्ववन्नेह विद्यते॥ बलिनोतः प्रकरणात्प्रातर्दोहेपि संति ते॥ दर्शपूर्णमासप्रकरणे पलाशशाखाछेदनं तया शाखया वत्सापाकरणमित्यादयो दोहधर्माः समाम्नाताः॥ दोहौ च द्वौ विद्येते॥ अमावास्यायां रात्रावेको दोहः प्रतिपदि प्रातरपरो दोहस्तत्र पूर्वन्यायेन प्रथमिके सायंदोहे प्रथमश्रुतास्ते धर्मा व्यवतिष्ठंत इति॥ चेन्नैवं॥ वैषम्यात्पूर्वत्र हि सोमे विशसनादिधर्माणामनन्वयात्प्रकरणामानर्थक्यप्रतिहतं॥ इह तु नास्त्यानर्थक्यप्रतिहतिस्ततः प्रकरणे न स्थानं बाधित्वा द्वयोर्दोहयोस्ते धर्मा अभ्युपेयाः॥ ॥ नवमाधिकरणमारचयति॥ ॥ ग्रहधर्माः सादनाद्याः प्रातः सवन एव ते॥ त्रिषु वानिश्चितस्थानादाद्यः पूर्ववदुत्तरः॥ ज्योतिष्टोमे प्रातः सवने संति॥ ऐंद्रवायवादयो ग्रहाः माध्यंदिनसवने मरुत्वतीयादयः तृतीयसवने आदित्यादयस्तत्र सादनसंमार्गादयो धर्माः प्रातः सवनीयग्रहसंनिधावाम्नायंते॥ उपोप्तेन्ये ग्रहाः साद्यंते उपोप्ते ध्रुव इति॥ दशापवित्रेण ग्रहं संमार्ष्टीति ध्रुवव्यतिरिक्तानां ग्रहाणामधस्तात् मृत्तिकोपवेशनं कृत्वा तत्र सादनं॥ ध्रुवस्य तु न तथा पूर्वाधिकरणे शाखाहरणादयः प्रधानयोर्दधिपयसोर्धर्माः समाम्नाताः॥ तच्च दधि पूर्वे सायंदोहमंतरेण न सिध्यतीति॥ तत्सिध्यर्थं केवलं सायंदोहतेन नु सायंदोहस्याधारणात्वेन धर्मैः संबंधः इह त्वेकस्मिन्नुदेशे पाठोस्तीति न स्थानं निश्चितमिह तु तस्मिन्निश्चितमिति प्रातः सवन एव ते धर्माः इति चेन्नैवं॥ सादनादीनां वाक्येन ग्रहधर्मत्वं प्रकरणेन ज्योतिष्टोमधर्मत्वं चावगम्यते तस्मिन्निश्चितमपि स्थानं वाक्यप्रकरणाभ्यां बाधित्वा त्रिषु सवनेषु सादनादयो वतिष्ठंते॥ ॥ दशमाधिकरणमारचयति॥ ॥ एकत्रैवोप सर्वत्र रशनावेष्टनादयः॥ अग्नीषोमीयपशौ संनिधेर्वैतेक्रमाल्लिंगादतोंतिमः॥ अग्नीषोमीयपशुसंनिधौ रशनाया यूपस्य वेष्टनं॥ रशनायास्त्रिवृत्त्वं दर्भमयत्वं चेत्यादयो धर्माः आम्नाताः॥ परिव्ययति त्रिवृद्रशनेति त्रिवृद्भवतीति दर्भमयी भवतीति च॥ तत्र ये यं रशनाये च येष्टनादयः ते सर्वे संनिधेर्वांतरप्रकरणाद्वाग्नीषोमीय एव स्युरिति चेन्नैवं॥ सवनीयपशावपि तत्सद्भावो लिंगादवगम्य

तेत्रिशतायूपंपरिवीयाग्नेयंसवनीयंपशुमुपाकरोतीतित्रिशतत्वपरिव्याणयोः सिद्धवदनुवादोलिंगं॥ किंचतृतीया
श्रुत्यावाक्येनचपरिव्याणस्ययूपधर्मतानुपशुधर्मतायूपश्चत्रयाणांपशूनांतंत्रमितिवक्ष्यतेतस्मात्सर्वेषुपशुषुते
धर्माः स्युः॥ ॥एकादशाधिकरणमाचरयति॥ ॥ग्रहधर्माअनारभ्योक्ताअंश्वदाभ्यद्वयेनहिविषयंतेवाप्रकरणाद्दाद्योवा
क्यादिहांतिमः॥ अनारभ्यद्वौग्रहौश्रुतौ अंशुंगृह्णातीतिच अदाभ्यंगृह्णातीतिचतयोः सादनसंमार्गादयोग्रहधर्माः नवि
द्यंते॥ कुतः अनारभ्याधीतेष्वैंद्रवायवादिष्वेवप्रकरणेनव्यवस्थापितत्वादितिचेन्मैवं॥ ग्रहाः साद्यंतइत्यादिवाक्येनग्रह
धर्मत्वावगमेतयोरपिग्रहयोरनिवार्यत्वात्॥ नचैंद्रवायवादयः प्रकरणिनः ज्योतिष्टोमोहिप्रकरणीतस्मात्संतितयोर्ध
र्माः॥ ॥द्वादशाधिकरणमारचयति॥ ॥अखंडादीष्टकाधर्माश्चित्रिण्यादिषुनोचिताः॥ संतिवावाक्यमप्यत्रानार
भ्योक्तंततोनते॥ प्रकृतापूर्वसंबंधात्सादृश्यादपिवाक्यतः अखंडत्वादयोप्यर्थचित्रिण्यादिषुसंतिते॥ अनारभ्यश्रूयते॥
चित्रिणीरुपदधातीति अग्निप्रकरणेचेष्टकानांधर्माश्रुताः॥ अखंडामकृष्णांकुर्यादितिपूर्वत्रांश्वदाभ्ययोरुत्पत्तिवाक्य
स्यनारभ्याधीतत्वेपिविनियोजकवाक्यंप्रकरणाधीतं॥ चित्रिण्यादिनामकानांत्विष्टकाविशेषाणांविनियोजकवाक्य
मनारभ्याधीतं॥ तच्चचिंत्यंतरेतांश्चित्रिणीर्विनियुंक्ते॥ अखंडत्वादिधर्मास्तुषण्णांचितीनांमध्येप्रथमचितावाम्नाताः॥
तस्मात्तेचित्रिण्यादिषुनोचिताइतिप्राप्तेब्रूमः॥ यद्यप्युत्पत्तिविनियोजकवाक्ययोरन्यतरस्यापिप्रकरणपाठोनास्ति॥
तथापियएवंविद्वानग्निंचिनुतइतिप्रकृतंयदेतदग्न्यपूर्वंतत्संबंधित्वेनैवचित्रिण्यादयोपिअप्रकरणपठितेनापिवा
क्येनविनियुज्यंते॥ अखंडत्वादयश्चाग्निसाधनभूतेष्टकाधर्माः नतुप्रथमचितिधर्मातस्मादग्निसाधनभूतासुचि
त्रिण्यादीष्टिकास्वपितेसंति॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥विधयोभिषवाद्यास्तुः फलाख्येचमसेनवा॥ नै
मित्तिकस्यनित्येनतुल्यत्वादस्तितद्विधिः नित्येकृतार्थाः संस्काराः पश्चाज्ज्ञाविनिमित्तजेनविधेयाः किंतुतत्रप्राप्तंतामा
तिदेशातः॥ न्यग्रोधकुंमुलद्रूपस्यफलस्यपिष्टंचम्यतेयत्रसोयंफलचमसः॥ सचनैमित्तिकः राजन्यवैश्योनिमित्तीकृत्य
विहितत्वात्सोमस्कृत्वनिः उपाधिंकमप्यनुपजीव्यैवनसोमेनयजेतेतिविहितत्वात्तस्यचनित्यस्यसोमस्ययथा॥ याग
साधनत्वंतथाफलचमसस्यापितदस्तितस्मात्सोममभिषुणोतिसोमंक्रीणातीत्यादयोयागद्रव्यसंस्कारविधयः सोम

113
1945

इवफलचमसेपिप्रवर्तेतइतिप्राप्तेब्रूमः॥ नित्याअभिषवादिसंस्काराः नित्यंसोमंसंस्कार्यंलब्ध्वाचरितार्थाः संतोनान्यंसंस्कार्य
मपेक्षते॥ फलचमसस्तुसोमविकारत्वापश्चाज्ज्ञायितत्वोनिरपेक्षाः संस्कारविधेयोनतत्रप्रवर्तंते॥ नचैतावतासंस्काराभावः॥
चोदकेनतत्सिद्धेः तस्मात्सोममात्रसंबंधिनोविधयः॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥नीवारादिप्रतिनिधेरतुल्योवाविधिः
समः पुरेवातुल्यतासाम्यमाकाराद्व्रीहितायतः॥ व्रीहिभिर्यजेतेतिविहितानांव्रीहीणामसंभवेनीवाराः प्रतिनिधित्वेनस्वीका
र्याइतिवक्ष्यतेपूर्वन्यायेनावघातादिविधयोव्रीहिषुकृतार्थाः पश्चाज्ज्ञाविनीनीवारादौनप्रवर्तंतइतिचेन्मैवं॥ व्रीहिशब्दोहि
जातिविशेषेणाकारविशेषेणचोपेतंद्रव्यमाचष्टेनीवारादिषुजातितोव्रीहिशब्दार्थत्वाभावेप्याकारेव्रीहिशब्दार्थत्वेनव्रीही
नवहंतीतिविधिः प्रवर्ततेयथाव्रीहिजातावेवसमीचीनानांव्रीहीणामभावेजलवद्व्याद्युपघातेनसारविकलेष्वपिविधिस्तथा
जातिविकलेष्वपिव्रीहीषुमुख्यैकदेशत्वरूपत्वाद्विधिरस्तु॥ ॥पंचदशाधिकरणमारचयति॥ ॥पूतिकाभिषवोतुल्यस्तुल्योवा
सोमतुल्यता॥ नास्तिनैमित्तिकत्वेनतुल्यः प्रतिनिधित्वतः॥ यदिसोमंनविंदेत्पूतीकानभिषुणुयादितिश्रूयते॥ तत्रसोमभा
वंनिमित्तीकृत्यपूतीकलताखंडानांविहितत्वात्फलचमसवन्नैमित्तिकत्वेनसोमाभिषवक्रयादिविधिः पूतिकेषुनतुल्यइतिचे
न्मैवं॥ नीवारवत्प्रतिनिधित्वात्॥ ननुप्रतिनिधित्वेपुरुषेणस्वयमेवोपादित्सितत्वाद्विधिर्नापेक्षितः॥ अतएवनीवारेषुनिनिधिर्न
श्रुतः इतिचेन्न॥ विधेर्नियमार्थत्वस्यषष्ठेवक्ष्यमाणत्वात्तस्मादधिवक्रयादिविधिः सोमपूतीकयोस्तुल्यः॥ ॥षोडशाधिक
रणमारचयति॥ ॥उक्थ्यादिषुसमोदीक्षणीयाद्यंगविधिर्नवा॥ एकप्रकरणत्वेनफलवत्वाच्चतुल्यता॥ उक्थ्यादयः काम
योगाद्धिकाराः प्रक्रियाततः॥ अग्निष्टोमात्मकेज्योतिष्टोममात्रेचतद्विधिः॥ ज्योतिष्टोमः स्वयमेकोपिसमाप्तिभेदाद्भिद्यते
॥ यज्ञायज्ञीयस्तोत्रेणसमाम्नातावग्निष्टोमइत्युच्यते॥ तस्मादपिस्तोत्रादूर्ध्वमुरव्यस्तोत्रेणसमाप्तावुक्थ्यइत्युच्यते॥ एवं
षोडश्यादयः तादृशस्यसप्तसंख्यावतोज्योतिष्टोमस्यप्रकरणेदीक्षणीयेष्टिप्रायणीयेष्ट्यादीनामंगानांविधिराम्नातः॥ सच
विधिर्ज्योतिष्टोमस्यप्रथमसंस्थाविशेषग्निष्टोमेयथाप्रवर्त्तस्तथैवोक्थ्यादिष्वपिप्रवर्तते॥ कुतः प्रकरणसंबंधस्यसमा
नत्वात्किंचयथाग्निष्टोमः॥ फलवत्वादंगविधिभिः संयुज्यतेएवमुक्थादयोपितेषांफलमेवमाम्नायते॥ पशुकामउक्थ्यंगृ
ह्णीयात्षोडशिनावीर्यकामस्तुवीत॥ अतिरात्रेणप्रजाकामंयाजयेत्॥ इतितस्मात्सप्तस्वपिसंस्थासुसमानोंगविधिरि
तिप्राप्तेब्रूमः॥ यदेतदुक्थ्यादीनांफलमुदाहृतंतत्तेषांविकारत्वंगमयतिकाम्योगुणः श्रूयमाणोनित्यमर्थंविकृत्यविश

तद्इतिन्यायाद्यथा गोदोहनगुणो नित्यंच मसस्साधनकमपां प्रणयनं विकृत्य निविशते॥ एवंउक्थ्यादयोनित्याग्नि
ष्टोमसंस्थां विकृत्य संस्थांतरत्वं गमयंतितत्तोग्निष्टोमस्य५ गुणविकारा उक्थ्यादय इतिन सर्वसाधारणं किंतुअग्नि
ष्टोमस्यैवासाधारणं॥ ननुज्योतिः ष्टोमेनयजेतेत्यक्तत्वात्॥ ज्योतिष्टोमस्येदं प्रकरणंनत्वग्निष्टोमसंस्थाया इतिचे
न्॥ बाढं॥ असोज्योतिष्टोमोनकदाप्यग्निष्टोमं व्यभिचरति॥ उक्थ्यादीनामप्यंतर्भावितग्निष्टोमकत्वात्॥ उक्थ्या
दीनांस्तु व्यभिचरतिविनापितैरग्निष्टोमदशायांज्योतिष्टोमत्वसंभवात्ततोग्निष्टोमसंस्थस्यज्योतिष्टोमस्येदं प्रकरणंस
त्तत्रैवदीक्षणीयाद्यंगविधिंनिवेशयति॥ उक्थ्यादिषुचोदकादंगान्यतिदिश्यंते॥ ॥ इतिश्रीमाधवीयेजैमिनिन्यायमा
लाविस्तरेतृतीयाध्यायस्यषष्ठःपादः॥ ॥सप्तमपदेप्रथमाधिकरणमारचयति॥ ॥ मुख्यांगतैववेद्यादेः प्रयाजाद्यं
गतापिवा॥ तद्वाक्यंप्रक्रियायुक्तं मुख्यांगत्वस्यबोधकं मुख्यांगतस्यापिवेद्यादेः प्रयाजादिषुचांगता॥ मुख्यार्थत्वात्प्र
याजादेः स्वापूर्वेव्यवधानतः॥ दर्शपूर्णमासयोः श्रूयते॥ वेद्यांहवींष्यासादयतिबर्हिषिहवींष्यासादयतीतितथा तद्धर्माः
श्रूयंतेवेदिंखनतिबर्हिर्लुनातीत्यादयः मुख्यानिहवींष्याग्नेयपुरोडाशादीनि॥ अमुख्यहवींषितुप्रयाजाद्यर्थानितत्र
स्वस्वधर्मसहितानिवेद्यादीनिप्रकरणबलान्मुख्यहविषामेवांगानि॥ वेद्यांहवींष्यासादयतीतिवाक्यात्सर्वहविरंगतेति
चेत्॥ न॥ प्रकरणेनवाक्यस्यसंकोचनीयत्वात्॥ यदिवाक्यंप्रकरणनिरपेक्षेणस्वतंत्रंस्यात्॥ तदासादनमात्रपर्यवसा
नेनयागाभावेवैयर्थ्यंस्यात्॥ सौमिकहविषामप्यतद्वेद्यासादनं॥ प्रसज्येततत्स्मान्मुख्यहविरंगंवेद्यादिकमिति प्राप्ते
ब्रूमः॥ अस्तुवैयर्थ्यातिप्रसंगपरिहारेणप्रकृतापूर्वसाधनभूतहविःषुवेद्यादेरंगत्वं प्रयाजादिहवींष्यपिस्वकीयावांतरा
पूर्वद्वारामुख्यापूर्वसाधनान्येवेतितदंगत्वमपिवेद्यादेःयुक्तं॥ एवंचसतिवाक्यस्याप्यंतसंकोचोनभविष्यति॥ ॥द्वि
तीयाधिकरणमारचयति॥ ॥ वपनाद्युपकारःकिंद्वयोर्मुख्यांगयोरुत॥ मुख्यएवद्वयोरस्तुकृत्स्नकर्तृगतत्वतः॥ यु
क्तः शास्त्रीयसंस्कारोमुख्यस्यफलभोगिनः॥ विनापिसंस्कृतिंदृष्टंकर्तृत्वंतत्रनास्तिसः॥ ज्योतिष्टोमेकेशश्मश्रुव
नपयोव्रतादयोयजमानसंस्काराः आम्नाताः॥ ग्रहैःसोमाहोमोज्योतिष्टोमेमुख्यः॥ अग्नीषोमीयपश्वादिकमंगंतत्रद्व
योर्मुख्यांगतयोरेतेवपनादयउपकुर्वंति॥ कुतः कर्तृधर्मत्वाद्यजमानोहिकर्तृतयावपनादिभिः संक्रियतेकर्तृत्वंयथा
मुख्यंप्रतितस्यविद्यतेतथांगंप्रत्यप्यस्ति॥ तस्मादुभयोरुपकारइतिचेन्नैवं॥ द्वौहियजमानस्याकारौक्रियाकर्तृत्वंफल

भोक्तृत्वंचेति॥ तयोरदृष्टः फलभोगः क्रियानिष्पत्तिश्चदृष्टातथासतिवपनादिकृतोपकारस्याप्यदृष्टत्वाद्भोक्तृशेषाः व 115/1945
पनादयः फलभोगसाधनेमुख्यएवपर्यवस्यंति॥ वपनादिसंस्काररहितैरप्यृत्विग्भिः कृषीबलादिभिश्चक्रियानिष्पाद्यमा
नादृश्यतेतनस्तत्रकर्तृत्वाकारेवपनादिकृतोदिउपकारोनास्ति॥ तस्माददृष्टफलभोगिनोस्ययजमानस्ययोयमदृष्टरूपः
शास्त्रीयः संस्कारः॥ सोयंमुख्येकर्मणियुक्तोनांगेषुनात्रपूर्ववद्वाक्यमस्तियेनपरंपरयाफलसाधनेष्वंगेषुवपनाद्युपका
रः शंक्येतप्रकरणंतुमुख्यस्यैवनत्वंगानांतस्मान्नतेषूपकारः॥ ॥तृतीयाधिकरणमारचयति॥ ॥मुख्यार्थासोमि
कीवेदिरुभयार्थोतमुख्यगा॥ चिकीर्षितत्वात्मुख्यस्यवेद्यांतत्कृतिसंभवात्॥ मुख्यपोष्कल्यहेतुत्वात्तदंगंचचिकीर्षि
तं॥ मुख्यवत्तेनतद्वेदिरंगेष्वप्युपकारिणीं दाक्षिकींवेदिमध्येतर्भाव्यप्राचीनवंशोमंडपोवस्थितः ततः पूर्वस्यांदिशिसदो
हविर्धानादीनांप्राप्तोयोभूभागविशेषस्तैः सदः प्रभृतिभिः सहसौमिकीवेदीरित्युच्यतेसेयंमुख्यस्यसोमस्यैवोपका
रंकरोति॥ नत्वमुख्यानामग्नीषोमीयाद्यंगानां॥ कुतः॥ मुख्यस्यचिकीर्षितत्वात्॥ नचांगान्यपिचिकीर्षितानीतिवाच्यं॥
किं॥ चिकीर्षास्यचवेदेनैवाभिहितत्वात्॥ एवंश्रूयतेषट्त्रिंशत्प्रक्रमाप्राची॥ चतुर्विंशतिरग्रेणत्रिंशज्जघनेनेयतिश
क्यामहइति॥ अस्यायमर्थः॥ श्रूयमाणेनानेनदैर्घ्यप्रमाणेनप्रमाणेनतिर्यक्प्रमाणद्वयेनचप्रमितेभूभागेफलहेतुंसोम
यागंकर्तुंभक्ष्यामहइतिनिश्चित्यतथैवकुर्यादिति॥ सेयंचिकीर्षामुख्यविषयाइयतिशक्ष्यामहइपरिमाणस्यनाकेश्चो
पन्यासात्॥ अंगानांतुपशूनामिष्टीनांचसदोहविर्धानामंडपनिरपेक्षाणांयथोक्तपरिमाणमंतरेणाप्यनुष्ठातुंशक्यत्वा
त्॥ सउपन्यासस्तत्रनिरर्थकः॥ सोमस्यतुअनुष्ठानंयथोक्तवेद्यांमेवसंभवतिनत्वन्यत्रतस्मात्सावेदिर्मुख्यस्यैवोपकरो
तीतिप्राप्तेब्रूमः॥ इयतिशक्ष्यामहइत्यत्रसांगप्रधानानुष्ठानेनशक्तिरुदाहृतादृशस्यैवफलप्रतिपुष्कलहेतुत्वात्॥ अतोमु
ख्यांगयोश्चिकीर्षायास्तुकल्प्यत्वाद्वेदिरुभयार्था॥ नचात्रवपनादिसाम्यंशंकनीयं॥ दृष्टोपयोगाभावस्यतत्रोक्तत्वात्॥
इहहविरासादनादिदृष्टउपयोगः सचमुख्यांगयोः समइत्युभयार्थत्वं॥ ॥चतुर्थाधिकरणमारचयति॥ ॥चतुर्होत्रा
पौर्णमासींमृशेदाज्यादिमर्शने॥ मंत्रोमुख्यउतांगेपिमुख्यतद्वाचिशब्दतः॥ शब्दस्यकर्मवाचित्वात्तत्रमर्शनेनज्जनात्॥
विभक्तिव्यत्ययेमंत्रोमुख्यांगहविषोर्द्वयोः॥ दर्शपूर्णमासयोः श्रूयते॥ चतुर्होत्रापौर्णमासीमभिमृशेत्पंचहोत्रामावा
स्यायामिति॥ पृथिवीहोतेत्यादिकोमंत्रश्चतुर्होतेत्यादिकोतस्मिन्मंत्रेयज्ञांगानांचतुर्णांश्रुतत्वाद्यथातस्यमंत्रस्याभि

मानित्वेनाकष्टतः कश्चित्पुरुषः प्रजापतिना चतुर्वारमभिमंत्रितः प्रत्युत्तरमुवाचेति सपुरुषः चतुर्ह्रूस्तदीय तान्नामंत्रोपि चतुर्हूतइत्यु
च्यते॥ पूज्यानां प्रत्यक्ष नामग्रहणमयुक्तमित्यभिप्रायेण हूतशब्दस्थाने होतृशब्दः पठ्यते॥ अयमर्थः॥ सर्वोपि नैत्तिरीयब्राह्मणे श्रूय
ते॥ आत्मन्नात्मन्नित्यामंत्रयत॥ तस्मै चतुर्थं हूतः प्रत्यशृणोत्॥ स चतुर्हूतोभवत॥ चतुर्हूतो ह वै नामैषः॥ तं वा एतं चतुर्हूतं संतं॥ चतु
र्होतेत्याचक्षते॥ परोक्षेण॥ परोक्षप्रिया इव हि देवा इति॥ अग्निहोतेत्यादिको मंत्रः पंचहोतात्रापि उक्तप्रकारो द्रष्टव्यः॥ अत्र योय
माज्यादिहविषामुपस्पर्शनार्थो मंत्रः असौ मुख्य एव हविषि निविशते पौर्णमास्यमावास्याशब्दयोर्मुख्यहविर्विषयत्वादिति प्राप्ते ब्रूमः॥
पौर्णमास्यमावास्याशब्दौ कर्मवाचिनौ॥ न तु हविर्वाचिनौ॥ न च कर्मणोरुपस्पर्शनं संभवति॥ अथ कालविवक्षायां विभक्तिव्यत्य
येन मत्तम्यार्थो व्याख्यायेत तदा कालसंबंधस्य मुख्यांगयोरुभयोस्तुल्यत्वादुभयविध हविः स्पर्शने उपस्पर्शनमंत्रो विनियुज्यते॥ ॥
पंचमाधिकरणमारचयति॥ ॥ दंडदीक्ष्या दक्षिणा तु शतं द्वादशाभिर्युतं॥ द्व्यर्थमुत मुख्यार्थं सोमस्योत्पत्तिसंभवात्॥ मुख्यांगद्वयं
मेवं पारंपर्यविडंबना॥ वचनस्यन युक्तातः प्रधानार्थमिदं स्थितं॥ ज्योतिष्टोमे दीक्षा दक्षिणा श्रूयते॥ दंडेन दीक्षयतीति॥ तस्य द्वादशश
तं दक्षिणेति च॥ तत्र दीक्षा मुख्यांगयोरुपकरोति तथा दक्षिणापि न च वाक्ये दीक्षा सोमस्य दक्षिणा सोमस्येति वाक्ये षष्ठ्या मुख्यसंबंध
एवावगम्यते॥ न त्वंगसंबंध इति दीक्षा दक्षिणे सोमेनैव साक्षात्संबध्येयातां स सोमः पुनरंगैः संबंध इति परंपरया दीक्षा दक्षिणयोरंगै
रपि संबंधोस्ति तस्मादुभयार्थं दीक्षादिकमिति प्राप्ते ब्रूमः॥ अव्यवहितसंबंध एव षष्ठ्या अभिधेयोर्थः॥ तदसंभवे तु परंपरासंबंधः
कथंचिदूह्यते॥ इह तु तत्संभवात्पारंपर्यमयुक्तं तस्मात्प्रधानार्थं दीक्षादिकं॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ अंतर्वेदि मिनोत्यर्द्धं यो
पांगमुत लक्ष्यते॥ देशो यूपांगभावेन वेदिभागोत्र चोद्यते॥ बहिर्वेद्यर्द्धमित्येतद्वाक्यं भिद्येत तद्विधौ॥ नीयमानस्य यूपस्य तावा
न्देशोत्र लक्ष्यते॥ अग्नीषोमीयपशौ यूपं मिनोतीति प्रकृत्य श्रूयते॥ अर्धमंतर्वेदि मिनोत्यर्धं बहिर्वेदीति यूपं स्थापयितुं कियद्दिस्ता
र्यानवटो पेक्षित इति॥ बुभुत्सायां तन्निर्णयाय यूपमूलस्य स्थौल्यमंगुल्यादिभिर्मातव्यं॥ तस्य च मीयमानस्य यूपस्य वेद्यंतरभा
गत्वेन विधीयत इति चेन्मैवं॥ यथा संस्कृतोभ्यंतरा भागोर्द्धमंतर्वेदीत्यनेन वाक्येन विधीयते तद्वदसंस्कृतोपि बहिर्भागो बहि
र्वेदीत्यनेन विधातव्यः॥ ततो वाक्यं भिद्येत॥ यदा तु वेदेरभ्यंतरबाह्यभागाभ्यामुपलक्षितो संस्कृतो लौकिको देशो मीयमानयूपाव
तो विधीयते॥ तदा नास्ति वाक्यभेद तस्माल्लौकिकदेश एवात्र यूपांगत्वेन विधीयते न तु संस्कृत वेदिभागः॥ ॥ सप्तमाधिकरण
मारचयति॥ ॥ हविर्धाने स्थितो ब्रूयात्सामिधेनीरिहांगता॥ हविर्धानस्य तात्स्वादेशोनेन लक्ष्यते॥ वाक्यात्स्यादंगतामेवं प्रकृत्या

श्री:
५८

पश्चिमोग्नितः॥ देशः प्राप्तोल्लाघवेनलक्षः शाकटसंनिधिः॥ ज्योतिष्टोमे श्रूयते॥ उत यत्सुन्वंति सामिधेनीस्तदन्वाहु
रिति हविर्द्धानमंडपगतयो दक्षिणोत्तरभागावस्थितयोर्हविर्धाननामकयोः शाकटयोर्मध्ये दक्षिणं शाकटमत्र यत्तच्छब्दा
भ्यामधीयते॥ तस्य समीपे सोमस्याभिषवः॥ उतेत्ययं शब्दोर्थशब्दार्थे वर्त्तते॥ अथ यस्मिन्हविर्धाने सोममभिषुण्वंति
तस्मिन्सामिधेनीरनुब्रूयुरित्यर्थः॥ इह दक्षिणस्य हविर्धानस्य सामिधेनीष्वंगत्वं प्रतीयते॥ न चात्र पूर्ववद्वाक्यभेददोषः
शंकितुं शक्यः॥ एकवाक्यतायाः स्पष्टं प्रतिभासादिति प्राप्ते ब्रूमः॥ सामिधेनीनामिष्ट्यंगतया दर्शपूर्णमासावत्र प्रकृतिः
प्रकृतौ चात्राहवनीयाग्नेः पश्चिमो देशः सामिधेनीनां स्थानं इहोत्तरवेदेराहवनीयत्वात्तदपेक्षया हविर्द्धानस्य पश्चिम
देशावस्थानात्स देशश्चोदकेन प्राप्त इति न देशस्य सामिधेन्यंगत्वं विधातव्यं॥ किंतु दक्षिणोत्तरहविर्धानसमीपदेशयो
रनियमेन प्राप्तो दक्षिणस्यैव हविर्धानस्य समीपदेश इति नियंतुं हविर्धानेन संनिधिर्लक्ष्यते॥ तथा सति नियममात्रवि
धानाल्लाघवं भवति त्वत्पक्षे त्वभिषवोपलक्षितस्य दक्षिणस्य हविर्धानस्यात्यंतमप्राप्तं सामिधेन्यंगत्वं विधीयत इति गौर
वं॥ तस्माद्देशलक्षणा॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ यजमानेन कर्तव्यं निखिलं त्यागएव वा॥ कर्तृगामि फल
श्रुत्या युज्यते सर्वकर्तृता॥ प्रयोजकपितृत्वमस्ति नो चेत्क्रयो वृथा॥ कार्यं तेन त्यागमात्रमृत्विजोन्यत्र कर्तृता॥ स्वर्गकामो
यजेतेति स्वर्गभोक्तुर्यागकर्तुश्च सामानाधिकरण्यादेकत्वं गम्यते॥ पाणिनिश्च स्वरितञितः कर्त्रभिप्राये क्रियाफल इ
ति सूत्रेण क्रियाफलस्य कर्तृगामित्वे सत्यात्मनेपदं विदधाति॥ अतः सांगकर्मानुष्ठानमंतरेण फलासंभवान्निखिलं यज
मानेन कर्तव्यमिति प्राप्ते ब्रूमः॥ निखिलानुष्ठानाभावेपि प्रयोजकतया यजमानस्य सर्वकर्तृत्वमस्ति षड्भिर्हलैः कर्षतीति
त्यत्र दर्शनात् यदि स्वयैव सर्वमनुष्ठीयेत॥ तदानीमृत्विजां परिक्रयो वृथा स्यात्॥ तस्माद्यजमानेन त्यागमात्रं कार्यं॥
अन्यत्र सांगप्रधानेक्रीतर्त्विजोनुष्ठानं तथा सति साक्षात्परंपरया च सर्वकर्तृत्वस्य यजमानेन संभवात् तस्य फलं
न विरुध्यते॥ ॥ नवमाधिकरणमारचयति॥ ॥ न क्रीतकर्तृसंख्याया नियमोप्यस्ति वा नहि॥ अविशेषाद्दस्तिया
वत्कार्यं तावंत एव ते॥ यजमानेन क्रीताः कर्तारः ऋत्विजस्तेषां संख्याविशेषो यद्यपि न श्रुतस्तथापि कार्यानुसारेण
सोवगंतव्यः ते च कार्यविशेषाः कर्तृसंयुक्ता एवं श्रूयंते॥ पुरोध्वर्युर्विभजति प्रतिप्रस्थाता मंथिनं जुहोति नेष्टापत्नी

117
1945

 मानित्येनात्मभूतः कश्चित्पुरुषः प्रजापतिना चतुर्थो रमभिमंत्रितः प्रत्यक्तरसुवाचेति स पुरुषः चतुर्द्धस्तदीय तान्नामं त्रोपि चतुर्द्धत इत्युक्
 ष्यते॥ पूज्यानां प्रत्यक्षनामग्रहणमयुक्तमित्यभिप्रायेणाद्धृतशब्दस्थाने होतृशब्दः पठ्यते॥ अयमर्थः॥ सर्वोपिनेत्तिरीयब्राह्मणेश्रूय
ते॥ आत्मन्नात्मन्नित्यामंत्रयत॥ तस्मैचतुर्थंद्धूतः प्रत्यशृणोत॥ सचतुर्द्धूतोभवत॥ चतुर्द्धूतो हवैनामैषः॥ तंवाएतं चतुर्द्धूतं संतं॥ चतु
र्होतेत्याचक्षते॥ परोक्षेण॥ परोक्षप्रियाइवहिवहिदेवाइति॥ अग्निर्होतेत्यादिको मंत्रः पंचहोता त्रात्राप्युक्तप्रकारो द्रष्टव्यः॥ अत्रयोप
मान्यादिहविषउपस्पर्शनार्थो मंत्रः असौमुख्यएव हविषिनिविशते पौर्णमास्यमावास्याशब्दयोमुख्यहविर्विषयत्वादिति प्राप्तेब्रूमः॥
पौर्णमास्यमावास्याशब्दौ कर्मवाचिनौ॥ नतुहविषोर्वाचिनौ॥ नचकर्मणोरूपस्पर्शनं संभवति॥ अथकालविवक्षायांविभक्तिव्यत्य
येनमसम्यार्थो व्याख्यायेत तदा कालसंबंधस्य गुरव्यांगयोरुभयोस्तुल्यत्वादुभयविधहविःस्पर्शने उपस्पन मंत्रो विनियुज्यते॥ ॥
पंचमाधिकरणमारचयति॥ ॥ दंडदीक्ष्यादक्षिणातुशतंद्वादशाभिर्युतं॥ द्वयार्थमुतमुख्यार्थं सोमस्युत्पत्तिसंभवात्॥ मुख्यांगद्वयगं
मिवंपारंपर्यविडंबना॥ वचनस्यनयुक्तातः प्रधानार्थमिदंस्थितं॥ ज्योतिष्टोमेदीक्षादक्षिणाश्रूयते॥ द्वेदनदीक्षयतीति॥ तस्यद्वादशश
तंदक्षिणेतिच॥ तत्रदीक्षामुख्यांगयोरुपकरोतितथादक्षिणापिनचवाक्ये दीक्षासोमस्यदक्षिणा सोमस्येति वा क्येषष्ठ्यामुख्यसंबंध
एवावगम्यते॥ नत्वंगसंबंध इति दीक्षादक्षिणे सोमेनैवसाक्षात्संबंध्येयातां ससोमः पुनरंगैः संबंध इति परंपरयादीक्षादक्षिणयोरंगे
ष्पि संबंधोस्ति तस्मादुभयार्थं दीक्षादिकमिति प्राप्तेब्रूमः॥ अव्यवहितसंबंध एव षष्ठ्या अभिधेयोर्थः॥ तदसंभवे तु परंपरासंबंधः
कथंचिद्गृह्यते॥ इहतु तत्संभवात्पारंपर्यं न युक्तं तस्मात्प्रधानार्थं दीक्षादिकं॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ अंतर्वेदिमिनोत्यर्द्धं यो
पांगमुतलक्ष्यते॥ देशो यूपांगभावेन वेदिभागोत्र चोद्यते॥ बहिर्वेद्यर्द्धमित्येतद्वाक्यमभिधत्त तद्विधौ॥ मीयमानस्ययूपस्यतावा
न्देशोत्रलक्ष्यते॥ अग्नीषोमीयपशौ यूपंमिनोतीति प्रकृत्यश्रूयते॥ अर्धमंतर्वेदिमिनोत्यर्धं बहिर्वेदीति यूपसंस्थापयितुं क्रियत्स्थि स्था
स्थानबटोपेक्षितइति॥ बुभुत्सायां तन्निर्णयाय यूपमूलस्य स्थैर्यत्त्वमंगुल्यादिभिर्मातव्यं॥ तस्यचमीयमानस्य यूपस्य वेद्यंतरभा
गत्वेन विधीयत इति चेन्मैवं॥ यथासंस्कृतोभ्यंतरभागोर्द्धमंतर्वेदीत्यनेन वाक्येन विधीयते तद्वदसंस्कृतो वेदिबहिर्भागो बहि
र्वेदीत्यनेन विधातव्यः॥ ततो वाक्यं भिद्येत॥ यदा तु वेदेरभ्यंतरबाह्यभागाभ्यामुपलक्षितो संस्कृतो लौकिको देशो मीयमानयूपांगि
त्वेन विधीयते॥ तदा नास्ति वाक्यभेदस्तस्माल्लौकिकदेशएवात्र यूपांगत्वेन विधीयते न तु संस्कृत वेदिभागः॥ ॥ सप्तमाधिकरण
मारचयति॥ ॥ हविर्धानेस्थितो ब्रूयात्सामिधेनीरिहांगता॥ हविर्धानस्य तास्वादेशो नेन लक्ष्यते॥ वाक्यात्स्यादंगतामैवं प्रकृत्या

117/1945

पश्चिमोग्नितः॥ देशः प्राप्तोलाघवेन लक्षः शकटसंनिधिः॥ ज्योतिष्टोमेश्रूयते॥ उतयत्सुन्वंति सामिधेनीस्तदन्वाहु
रिति हविर्द्धानमंडपगतयोर्दक्षिणोत्तरभागावस्थितयोर्हविर्धाननामकयोः शकटयोर्मध्ये दक्षिणं शकटमत्र यत्तच्छब्दा
भ्यामधीयते॥ तस्यसमीपे सोमस्याभिषवः॥ उतेत्ययं शब्दोर्थशब्दार्थे वर्त्तते॥ अथ यस्मिन्हविर्धाने सोममभिषुण्वंति
तस्मिन्सामिधेनीरनुब्रूयुरित्यर्थः॥ इह दक्षिणस्य हविर्धानस्य सामिधेनीष्वंगत्वं प्रतीयते॥ नचात्र पूर्ववद्वाक्यभेददोषः
शंकितुं शक्यः॥ एकवाक्यतायाः स्पष्टं प्रतिभासादिति प्राप्तेब्रूमः॥ सामिधेनीनामिष्ट्यंगतया दर्शपूर्णमासावत्र प्रकृतिः
प्रकृतौ चात्राहवनीयाग्नेः पश्चिमो देशः सामिधेनीनां स्थानं इहोत्तरवेदेराहवनीयत्वात्तदपेक्षयाहविर्द्धानस्य पश्चिम
देशावस्थानात्सदेशश्चोदकेन प्राप्त इति न देशस्य सामिधेन्यंगत्वं विधातव्यं॥ किंतु दक्षिणोत्तरहविर्धानसमीपदेशयो
रनियमेन प्राप्तो दक्षिणस्यैव हविर्धानस्य समीपदेश इति नियंतुं हविर्धानेन संनिधिर्लक्ष्यते॥ तथासति नियममात्रवि
धानाल्लाघवं भवति तत्पक्षेत्वभिषवोपलक्षितस्य दक्षिणस्य हविर्धानस्यात्यंतमप्राप्तं सामिधेन्यंगत्वं विधीयत इति गौर
वं॥ तस्माद्देशलक्षणा॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ यजमानेन कर्त्तव्यं निखिलं त्यागएव वा॥ कर्त्तृगामिफल
श्रुत्यायुज्यते सर्वकर्तृता॥ प्रयोजकेपि तत्त्वमस्ति नो चेत्क्रयो वृथा॥ कार्यं तेन त्यागमात्रमृत्विजोन्यत्र कर्तृता॥ स्वर्गकामो
यजेतेति स्वर्गभोक्तुर्यागकर्त्तुश्च सामानाधिकरण्यादेकत्वं गम्यते॥ पाणिनिश्च स्वरितञितः कर्त्रभिप्राये क्रियाफल इ
ति सूत्रेण क्रियाफलस्य कर्तृगामित्वे सत्यात्मनेपदं विदधाति॥ अतः सांगकर्तानुष्ठानमंतरेण फलासंभवान्निखिलं यज
मानेन कर्तव्यमिति प्राप्तेब्रूमः॥ निखिलानुष्ठानाभावेपि प्रयोजकतया यजमानस्य सर्वकर्तृत्वमस्ति षड्भिर्हलैः कर्षतीत्य
त्र दर्शनाद्यदि स्वयैव सर्वमनुष्ठीयेत॥ तदानीमृत्विजां परिक्रयो वृथा स्यात्॥ तस्माद्यजमानेन त्यागमात्रं कार्यं॥
अन्यत्र सांगप्रधाने क्रीतर्त्विजोनुष्ठानं तथासति साक्षात्परंपरया च सर्वकर्तृत्वस्य यजमानेन संभवात्तस्य फल
नविरुध्यते॥ ॥ नवमाधिकरणमारचयति॥ ॥ नक्रीतकर्तृसंख्याया नियमोप्यस्ति वा नहि॥ अविशेषादस्तियाव
त्कार्यं तावंत एव ते॥ यजमानेन क्रीताः कर्तारः ऋत्विजस्तेषां संख्याविशेषो यद्यपि न श्रुतस्तथापि कार्यानुसारेण
सोवगंतव्यः तेच कार्यविशेषाः कर्तृसंयुक्ता एवं श्रूयंते॥ पुरोध्वर्युर्विभजति प्रतिप्रस्थाता मंथिनं जुहोति नेष्टापत्नी

मुदानयति॥ उन्नेता चमसात् उन्नयति॥ प्रस्तोता प्रस्तौति॥ उद्गातोद्गायति॥ प्रतिहर्ता प्रतिहरति॥ सुब्रह्मण्यः सुब्र
ह्मण्यामाह्वयति होता प्रातरनुवाकमनुब्रूते मैत्रावरुणः प्रेष्यति॥ अछावाको यजति॥ ग्रावस्तुद्ग्रावस्तोत्रीयामन्वा
हेति एवं ब्राह्मण आह्वणाछंस्याग्नीध्रयोन्तृणां कर्मीण्यध्वदाहार्याणि तस्मान्नावंति कार्याणि तावंत ऋत्विजो वरीतव्याः
॥ ॥ दशमाधिकरणमारचयति॥ ॥ चमसाध्वर्यवो नान्य ऋत्विग्भ्योन्ये यथवाग्निमः॥ योगिक्यासंज्ञयामैषं पृथ्वा
तेभ्यो विभेदनात्॥ ज्योतिष्टोमे श्रूयते॥ चमसाध्वर्यून् वृणीत इति ये पूर्वत्र कार्यानुसारेणाध्वर्युप्रमुखा ऋत्विज उक्ता
स्तेभ्यो नव्यतिरिक्ताश्चमसाध्वर्यवः॥ कुतः॥ योगिकसंज्ञायात दभेदप्रतीतेः यथा देवदत्त एव पाचिक्रियायोगात्पाच
को भवति॥ तथाध्वर्युप्रमुखा एव चमसयोगाच्चमसाध्वर्यव इति चेन्मैवं॥ मध्यतः कारिणां चमसाध्वर्यवो होतृका
णां च मसाध्वर्यव इति षष्ठ्या भेदावभासान्मध्यमः॥ कारिणोध्वर्युहोत्रादयः॥ होतृका प्रति प्रस्थातृ मैत्रावरुणादयः॥
तस्मादृत्विग्भ्योन्ये॥ ॥ एकादशाधिकरणमारचयति॥ ॥ तान्वृणीतेति बहुता नास्ति वास्ति ग्रहैकत्ववत्॥ नेति चेन्ना
त्रवैषम्यादुत्पत्तौ बहुताश्रुतेः॥ चमसाध्वर्यून् वृणीत इति यद्बहुत्वं श्रुतं तन्नाविवक्षितं॥ ग्रहैकत्ववदुद्देश्यगतत्वादिति
चेन्मैवं॥ ग्रहवैषम्यात् ग्रहं संमार्ष्टीत्येतत् ग्रहणानोत्पत्तिवाक्यं॥ चमसाध्वर्यूणां चैतदेवोत्पत्तिवाक्यं॥ ततस्तेषां
उपादेयत्वात् तद्गतं बहुत्वं विवक्षितं॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ नेयन्नास्त्यस्ति वा तेषां नियामकवर्जनात्॥
चमसानां दशत्वेन चमसाध्वर्यवो दश॥ स्पष्टोर्थः॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥ तेभ्योन्यः शमिता न सो
वान्यः संज्ञा पृथक् कुतः॥ वरणाभावतो नान्यः संज्ञाभेदस्तु योगिकः॥ शमितार उपेतन यज्ञमित्यस्मिन्मंत्रे श्रुतायाः श
मितृसंज्ञायाः पृथक्त्वात् उक्तेभ्योन्यः शमितेति चेन्मैवं॥ पृथक्वरणाभावात् संज्ञाभेदस्तु पशुसंज्ञपनयोगादुपप
द्यते॥ यद्यप्ययं मंत्रोध्वर्युकांडे पठितः॥ तथाप्यध्वर्योः परावृत्तिश्रवणादध्वर्युपुरुषाः प्रतिप्रस्थातादयः शमिता
रः॥ अत एव श्रूयते॥ पराङावर्त्ततेध्वर्युः पशोः संज्ञप्यमानादिति॥ ॥ चतुर्दशाधिकरणमारचयति॥ ॥ अन्ये
स्युरुपगातार ऋत्विग्भ्यो न वा यथा॥ लोके त्रापि तथा मैवं नाध्वर्युरिति लिंगतः॥ यथा लोके मुख्येभ्यो गायकनायका
दिभ्योन्ये पार्श्वस्था उपगातारस्तथात्रापीति चेन्मैवं॥ यद्युक्तेभ्यः पुरुषेभ्य उपगातारोन्ये भवेयुस्तदानीमध्वर्योः प्रस

त्य भावान्नाध्वर्युरुपगायेतिदिं॥ प्रतिनिषेधोर्थनेकः स्यात्॥ तस्मादुक्तेष्वेव योगिकः संज्ञाभेदः॥ ॥ पंचदशाधिकरण
मारचयति॥ ॥ सोमविक्रय्यकएषु न वा वरणवर्जनात्॥ एकः ऋत्वर्थता नास्ति विक्रयस्येति भिद्यते॥ क्रय एव ज्योतिष्टो
मागत्वे न क्रतौ न तु विक्रयेन चाविहित मृत्विजः कुर्वंति॥ तस्मादन्यो विक्रेता॥ ॥ षोडशाधिकरणमारचयति॥ ॥ किमृ
त्विङ्गामसर्वेषु समानमुतकेषुचित्॥ ऋत्तौ यजमानमेतेषां तुल्यमित्यस्ति नामतत्॥ सौम्याध्वरस्याः सप्तस्युर्दश ब्राह्म
णादिसंख्यया॥ न सर्वेषां समं नाम केषांचिद्योगरूढितः॥ ऋत्विक्शब्दस्य प्रवृत्तिनिमित्तमृतौ यजनं॥ तच्च ब्रह्मादि
ष्विव चमसाध्वर्युष्वप्यस्ति॥ तस्मात्सर्वेषामृत्विजां समानमिति॥ चेन्मैवं॥ संख्याश्रुतिविरोधात्॥ सौम्यस्याध्वरस्य य
ज्ञक्रतोः सप्तदशर्त्विज इति हि श्रूयते॥ तस्माद्योगमनतिक्रम्य शास्त्रीयरूढिमप्याश्रित्य केषुचिदेव तन्नामेत्येव गंतव्यं॥
॥ ॥ सप्तदशाधिकरणमारचयति॥ संख्याता अपि ये केचित् नियता वा विशेषतः॥ आद्यो न दक्षिणादाने दीक्षायां च वि
शेषणात्॥ ये सप्तदश संख्यातास्ते ब्रह्मादिषु चमसाध्वर्युषु च ये केचिदिछया ग्रहीतव्याः विशेषस्याश्रवणादिति चेन्मैवं॥
दक्षिणावाक्ये दीक्षावाक्ये च विशेषश्रवणात्॥ ऋत्विग्भ्यो दक्षिणां ददातीत्युक्त्वा तद्विशेषः श्रूयते॥ अग्नीधे ददाति ब्र
ह्मणे ददातीत्यादिना दीक्षावाक्यं च सत्रप्रकरणे ये यजमानास्ते ऋत्विज इत्युक्त्वानंतरमेवमाम्नायते॥ अध्वर्युर्गृहपतिं
दीक्षयित्वा ब्रह्माणं दीक्षयति॥ तत उद्गातारं ततो होतारं ततस्तं प्रतिप्रस्थाता दीक्षयित्वार्द्धिनो दीक्षयति॥ ब्राह्मणाछंसि
नं ब्रह्मणः प्रस्तोतारं उद्गातो मैत्रावरुणं होतुस्ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयत्याग्नीध्रं ब्रह्मणः प्रतिहर्तारं उ
द्गातुरछावाकं होतुस्ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति पोतारं ब्रह्मणः सुब्रह्मण्यं उद्गातुः ग्रावस्तुतं
होतुस्ततस्तमन्यो ब्राह्मणो दीक्षयतीति॥ अस्यायमर्थः॥ अध्वर्युर्यजुर्वेदप्रोक्तं करोति तस्य पुरुषास्त्रयः प्रतिप्रस्थाता
नेष्टा नेता चेति एते चत्वारो दीक्षयितारः॥ ब्रह्मा वेदत्रयोक्तस्य प्रत्यवेक्षणं करोति तस्य पुरुषास्त्रयः ब्राह्मणाछंसी
अग्नीत् पोता चेति॥ उद्गाता उद्गानं करोति तस्य पुरुषास्त्रयः प्रस्तोता प्रतिहर्ता सुब्रह्मण्यश्चेति होता शंसनं करोती
ति॥ तस्य पुरुषास्त्रयो मैत्रावरुणाछावाको ग्रावस्तुच्चेति चतुर्षु वर्गेषु प्रथमास्ते दक्षिणां संपूर्णां प्राप्नुवंति ये द्विती
यास्ते तदर्धं प्राप्नुवंतीत्यर्द्धिनः तृतीयास्ते च तृतीयांशं प्राप्नुवंति इति तृतीयिनः ये चतुर्थास्ते चतुर्थमंशं प्राप्नुवंतीत्य

119
1945

पादिनस्तानेतानुक्रमेणससपुरुषः संस्करोतीति॥ अत्रदीक्षावाक्येनिर्दिष्टाअध्वर्युप्रभृतयऋत्विजः षोडशनतुचमसा
ध्वर्यवइतिनियमोद्रष्टव्यः॥ ॥अष्टादशाधिकरणमारचयति॥ ॥ सदस्ययजमानेवासाप्तदश्यंवृतत्वतः॥ सदस्येकुर्व
तेकिंचिन्नासौस्वामिनितत्वतः॥ अध्वर्युब्रह्मादिषुषोडशसुव्यवस्थितेषुसप्तदशसंख्यापूरकः कश्चिदृत्विगपेक्षितः सोत्र
सदस्योभविष्यतिसदस्यवस्थितःसदस्यः नचतस्यवरणाभावः केषांचिच्छाखायां तद्वरणस्याम्नातत्वात् ततः साप्तद
श्यंसदस्येपर्यवसितमितिचेन्नैवं॥असौसदस्यःकिंचिदपिनकरोतिसदस्यइदंकुर्यादितिविध्यभावात्॥ नचविना
क्रियामृत्विग्यजमाननिमित्तत्विक्शब्दस्तस्मिन्नवकल्प्यते यजमानस्तुत्यागंकरोतीतितस्मिन्नुपपद्यते॥ तस्मात्साप्तदश्यंय
जमानेनयुक्तं॥ ॥एकोनविंशाधिकरणमारचयति॥ ॥ नकार्यनियतंतेषांनियतंवाग्रिमोयतः॥ शङ्काः केनकिमित्य
त्रनियतिःस्यात्समाख्यया॥तेषामध्वर्युप्रभृतीनांकार्यंननियतंयतः सर्वेसर्वत्रशक्ताः प्रकरणंचसर्वसाधारणत्वान्न
नियामकमितिचेत्मैवं॥ समाख्यायानियामकत्वात् कस्मिन्कर्मण्याध्वर्यवमितिसमाख्यानात्कर्मोध्वर्युमेवमितरे
त्रापि॥ ॥विंशाधिकरणमारचयति॥ प्रकृत्यर्थोथसर्वार्थोवह्निराधोस्तुपर्णवत्॥ पर्णन्यायोतिदिष्टेस्यादुपदिष्टेनु
सर्वशः॥ यथायस्यपर्णमयीजुहूर्भवतिनपापंश्लोकंशृणोतीत्यसौपर्णविधिः प्रकृत्यर्थः॥ एवमाधानस्याप्यनारभ्या
धीतत्वादाहितआहवनीयाद्यग्निः प्रकृत्यर्थइतिचेन्नैवं॥ वैषम्यात्पर्णवाक्यात्क्रतुप्रवेशोजुहूद्वारं साजुहूः प्रकृतावे
वविहिताविकृतिषुसर्वत्रातिदिश्यते॥आहवनीयाद्यग्नेस्तुक्रतुप्रवेशोद्वारंहोमः सचकश्चित्प्रकृतावेवविहितःस
न्विकृतावदतिदिश्यते॥ तद्यथाप्रयाजनारिष्टादिहोमाः तादृशविषयेयदाहवनीयेजुहोतीतिवाक्येनाग्निः प्रकृतौ
वविधीयते॥ विकृतौतुहोमेनसहातिदिश्यते॥ तस्मान्नतत्रपर्णन्यायः यस्तुहोमोविकृतावुपदिश्यते॥ तद्यथासो
ग्रहण्यामिष्टावामनहोमः॥ तत्रद्वारभूतस्यहोमस्यविकृतावुपदिश्यमानतयाद्वारिणोपिप्रकृतावविकृतावपिवा
क्येनविधेर्वारयितुमशक्यत्वात्तस्मात्सर्वार्थोवह्निः॥ ॥एकविंशाधिकरणमारचयति॥ ॥ यन्मैत्रावरुणः प्रेष्य
त्यनुचाहेतिबाधनं॥ होत्रादिकसमाख्यायाःसौस्तौर्वत्रैवकुत्रचित्॥ आद्योस्तुवचनान्मैवंसाहित्योक्त्युपलंभनात्॥ प्रे
षानुवचनेयोत्रसहितेतत्रबाधनं॥अग्नीषोमीयपशौश्रूयतेमैत्रावरुणः प्रेष्यतिचानुचाहेति॥ तदेतद्वाक्यंप्रेषा

121
1995

नुवचनयोर्मैत्रावरुणकर्तृकतांविदधातितेनचवाक्येनसमाख्याबाध्यते॥ अग्नयेसमिध्यमानायानुब्रूहीयू
पायाज्यमानायानुब्रूहीत्यादिप्रेषाणामध्वर्युकर्तृकत्वदर्शनादाध्वर्यवाःप्रेषाइत्यस्तियाज्ञिकानांसमाख्या॥
तथाप्रवोवाजाअभिद्यवः॥ अंजंतित्वामध्वरेदेवयंतइत्याद्यनुवचनानांहोतृकर्तृत्वदर्शनादनुवचनानिहौत्रा
णीतियाज्ञिकसमाख्याप्रेषानुवचनेचद्विविधेव्यस्तेसमस्तेचपूर्वोदाहृतेव्यस्तेहोतायक्षदग्निंसमिधेत्याद्यनु
वचनमंत्रस्यांतेहोतर्यजेतिप्रेषआम्नातः॥ एतेप्रेषानुवचनेसमस्तेतेषुव्यवस्तसमस्तप्रेषानुवचनेषुसर्वत्रप्र
बलेनवाक्येनसमाख्यांबाधित्वाहोतृकर्तृकत्वमध्वर्युकर्तृकत्वंपरित्यज्यमैत्रावरुणकर्तृकत्वमेवाभ्युपेयमिति
प्राप्तेविधीयते॥ प्रेष्यतिचानुचाहेतिचकारद्वयेनप्रेषानुवचनयोःसमुच्चयोवाक्येस्मिन्नुपलभ्यते॥ ततःसमु
च्चियोतेरवमाख्याबाधनंव्यस्तयोस्तु॥ यथासमाख्यंहोत्रादिकर्तृकत्वमेवाभ्युपेयं॥ ॥द्वाविंशाधिकरणमार
चयति॥ ॥ चमसैश्चमसाध्वर्युर्जुहोत्यध्वर्युरेववासंज्ञा॥ विशेषादाद्योस्तुमैवमध्वर्युसंज्ञया॥ विशेषस्यान
पेक्षत्वात्तेनान्यस्याअपेक्षणात्॥ अध्वर्युर्जुहुयाच्छक्तेस्तदशक्तौपरोपिवा॥ चमसाध्वर्युरित्येवंविधसंज्ञाविशे
षाच्चमसाध्वर्यवएवचमसैर्जुहुयुरितिचेन्नैवं॥अध्वर्युसंज्ञयानिरपेक्षत्वेनप्रबलत्वात्॥ केवलाध्वर्युश्चचमसा
ध्वर्यूंचानुगतोध्वर्युशब्दः सामान्यरूपः चमशब्दस्तुचमसाध्वर्युष्वेवेतिविशेषरूपः तंचविशेषमनपेक्ष्यैवाध्व
र्युशब्दऋत्विक्संज्ञारूपेणवर्तितुंप्रभवतिचमशब्दस्तुसामान्यवाचिनमध्वर्युशब्दमपेक्ष्यैवपुरुषेषुसंज्ञाभवति॥
तथासत्याध्वर्यवोमइत्यनयानिरपेक्षयाप्रबलयासमाख्ययाध्वर्युरेवसत्यांशक्तौचमसैर्जुहुयात् यहहोमव्या
पृतत्वेनकदापिदशक्तौचमसाध्वर्यवोजुहुयुः॥ ॥ त्रयोविंशाधिकरणमारचयति॥ ॥ श्येनउद्गातृवेदोक्तोवाज
पेयोयजुष्यमू॥ उद्गाताध्वर्युणाकार्योयथाप्रकृतिवाग्रिमः॥ आख्याविशेषादाख्यायाः पूर्वभावीहिचोदकः॥
प्रकृताविवकर्तारस्तत्रधर्मव्यवस्थिताः श्येनयागः॥ सामवेदसमाम्नातइत्यत्रत्याः सर्वपदार्थाउद्गात्रानुष्ठेयाःब
हिष्पवमानाख्यएषादिस्तोत्रधिवोद्गात्सगाख्यायाः न्यूनेपिसत्वात्॥ तथायजुर्वेदेसमाम्नातोवाजपेयः सर्वोप्य
ध्वर्युणैवानुष्ठेयः॥ समाख्याविशेषादितिप्राप्तेब्रूमः॥ श्येनवाजपेयौहिज्योतिष्टोमविकारौतत्रचोदकस्तत्रत्यप्रा

र्थान् तैस्तैः पुरुषैरनुष्ठेयतयासमर्पयति॥ अंगेष्वितिदिष्टेषु पश्चात्सांगप्रधानानुष्ठापकस्य प्रयोगवचनस्य प्रवृत्तिः
प्रयोगवचनादीनानुसमाख्यात्यंतंजघन्या॥ ततः प्रबलचोदकवशात् प्रकृताविवनानाविधः कर्तारः स्वस्वधर्मेष्वय
तिष्ठंते॥ ॥ इतिश्रीमाधवीये जैमिनिन्यायमालाविस्तरे तृतीयाध्यायस्य सप्तमः पादः॥ ॥ अष्टमपादे प्रथमा
धिकरणमारचयति॥ ॥ दाक्षिणाख्या परिक्रीतिर्ऋत्विजस्वामिनोथवा॥ परिक्रयः समाख्यानादृत्विजः स्याद्यथे
तरत्॥ परिक्रयात्तु राध्वर्युहोत्रादीनामभावतः परिक्रयणकर्तृत्वं यजमानस्य नार्त्विजः॥ दक्षिणादानेन कर्मकाराः
परिक्रेतव्याः स्तत्र हविस्यागव्यतिरिक्तं सर्वमार्त्विज्यमितिनिर्णितंदक्षिणाच द्वादशशतरूपाध्वर्युर्वेदउद्गातृवेदे च
समाम्नाता॥ अन्वाहार्यंदक्षिणाध्वर्युवेदेततः समाख्यया परिक्रेतृत्वमृत्विजामिति चेन्मैवं॥ ऋत्विजांपरिक्रयणोत्तर
कालीनानां तत्कर्मकर्तृत्वासंभवेन यजमानस्यैव कर्तृत्वात्॥ ॥ द्वितीयाधिकरणमारचयति॥ इष्टकावरदानं किं
स्वामिनः स्यादुतर्त्विजः॥ स्वामिनः पूर्ववन्मैवमध्वर्योर्वचनादयं॥ यएतामिष्टकामुपदध्यात्स त्रीन्वरान्दध्यादि
त्युपधानुरध्वर्योर्गोत्रयोवरदानं वाचनिकं नह्यस्ति वचनस्यातिभारः॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ संस्का
रावपनाद्याः किमध्वर्योः स्वामिनोथवा॥ अध्वर्योस्तत्र शक्तत्वात्तद्वेदोक्तेश्च तस्यते॥ संस्कारैर्योग्यतां प्राप्य स्वकार्यंक
मृत्विजः॥ क्रीणात्यतः क्रियातेषां संस्क्रिया यजमानगा॥ आपउंदंतु जीवसइत्याद्याः संस्कारमंत्रास्तद्विधयश्चाध्वर्युवे
दसमाम्नाताः॥ केशश्मश्रुवपतेनखानिनिकृंततइतिश्रुतेश्चाध्वर्युर्वपनादौ तस्मादध्वर्योस्ते वपनादिसंस्काराइतिचे
न्मैवं॥ वपनादिसंस्कारा यजमानगतमालिन्यमपनीय यागयोग्यतामुत्पादयितुं क्रियंते॥ तथा च ब्राह्मणं॥ केशश्म
श्रु वपते मृता वा एषा त्वगमेध्या यत्केशश्मश्रु मृतामेव त्वचममेध्यामपहत्य यज्ञियो भूत्वा मेधमुपैतीति॥ नह्यध्वर्युव
पनेन यजमानगतामृतात्वगपैति॥ योग्यस्य हि कर्माधिकारे सति पश्चात्प्रयासरूपेषु व्यापारेषु स्वयमशक्तः सन्॥
कर्मकरानृत्विजः परिक्रीणाति॥ लोकेपि रोगिणः स्वामिनः औषधाद्यानयनएव भृत्याजीवितदानेन परिक्रीयते॥ न
तु तद्दोषधं भृत्यः सेवते। तस्मादितरक्रियाऋत्विजां॥ संस्कारास्तु यजमानस्य क्वचित्तु वचनादृत्विजामपि संस्कारोस्ति
॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ नाश्नातिद्व्यहमित्येतत्तपः कस्य तदुर्ययोः॥ दुःखत्वाद्गोत्वसंस्काराद्ध्वर्यो
र्युज्यतेतपः॥ फलांतरायपापस्यनाशकत्वेन संस्कृतिः॥ लिंगात्तपः स्वामिगामि संस्कारांतरवत्ततः॥ ज्योतिष्टोमेद्व्यहं

नाश्नाति त्र्यहं नाश्नातीत्यादिनोक्तं तपोध्वर्योर्युक्तं तस्य दुःखात्मकत्वेन परिक्रीतपुरुषैः कर्तुमुचितत्वात् दुःखत्वादेव फ
लभोक्तृसंस्कारत्वाभावाद्यजमानस्य न युक्तमिति चेन्मैवं॥ भाविनः स्वर्गरूपस्य फलस्य प्रतिबंधकं दुःखजननकं य
त्पापं तस्य नाशकत्वेन दुःखस्यापि तपसः स्वामिसंस्कारत्वसंभवात्॥ अस्मिन्नर्थे वाक्यशेषगतं लिंगं कल्पसूत्रकारे
णैवमुदाहृतं यथा वै दीक्षितः कृशो भवति॥ अथ मेध्यो भवति॥ यदास्मिन्नंतर्न किंचन भवत्यथ मेध्यो भवति॥ यदा
स्य कृष्णं चक्षुषोर्नश्यत्यथ मेध्यो भवति॥ यदास्य त्वचास्थिसंधीयतेथ मेध्यो भवति॥ पीवा दीक्षयते कृशो जयते॥
यदस्यांगानामीयते॥ जुहोत्येव तदिति विज्ञायत इति नहि दुःखरूपं तपो विना दुःखप्रदं पापं नश्यति॥ यथा लोके पा
टनमंतरेण विषव्रणानां नोपशांतिः॥ तद्वत्तस्माद्वपनादिसंस्कारवत्तपोपि यजमानस्यैव॥ ॥ पंचमाधिकरणमा
रचयति॥ ॥ हिरण्यमालितादास्तु संस्कारा वचनान्मताः॥ ऋत्विजां ते यथाख्यानं कर्तव्यानि लिखिलैरुत॥ आद्य
आख्यावसान्मैवं सर्वसन्निधिपाठतः॥ प्रतिमुख्यं गुणावृत्तेः कर्तव्यानि लैरखिलैरपि वाजपेये श्रूयते हिरण्यमालिनः॥
ऋत्विजः प्रचरंतीति श्येने श्रूयते लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरंतीति॥ यद्यपि हिरण्यमालि
त्वादीनां संस्कारत्वाद्यजमानविषयत्वं। पूर्वन्यायेन प्राप्तं तथापि वचनादयमृत्विक्संस्कारस्तत्र हिरण्यमालित्वंय
जुर्वेदोक्तत्वात्॥ अध्वर्यूणामेव लोहितोष्णीषादिकं सामवेदोक्तत्वादुद्गातॄणामेवेति समाख्यावशादभ्युपेयमिति चे
न्मैवं॥ हिरण्यमालिन ऋत्विजः प्रचरंतीति सर्वेषां ऋत्विजां सन्निधौ पठ्यमानो हिरण्यमालित्वसंस्कारः सन्निधिना
समाख्यां बाधित्वा सर्वैरृत्विग्भिः संबाध्यते॥ किंच संस्कार्यत्वादृत्विजां प्राधान्ये सति प्रतिप्रधानं गुणावृत्त्या सर्वेषा
मप्यृत्विजां हिरण्यमालित्वादिसंस्कारोभ्युपेतव्यः॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ वृष्टिकामी सदो नीचैर्मिनुया
दिति कामना॥ अध्वर्योः स्वामिनो वाद्यो वाक्यान्मातुस्तदुच्यते॥ परस्मैपदतोध्वर्युव्यापारस्य परार्थता॥ प्रतीताते
वाक्य बाधतपावत्स्वामिनोस्तु तत्॥ ज्योतिष्टोमे श्रूयते॥ यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचैः सदो मिनुया
दिति यथा पुरस्तात्पश्चाच्चावस्थितो हविर्धान प्राचीनवंशायुचौ॥ तथा सदो नोच्चं किंतु नीचैः कार्यमित्यर्थः॥ अत्र वृ
ष्टिकामनाध्वर्योर्युक्ता यः कामयेत स मिनुयादिति वाक्येन कामयितृमात्रोरेकत्वावगमान्मातृत्वं चाध्वर्योरित्यविवा

123
1945

दंतस्मात्तस्य कामयितेतिचेन्नैवं॥ मिनुयादिति परस्मैपदेनाध्वर्युव्यापारफलस्य परगामिता प्रतीयते॥ ततो दृष्टिलक्षण
फलस्य यजमानगामित्वात्परस्मैपदश्रुत्या वाक्यं बाधित्वा कामस्य यजमानकर्तृत्वं द्रष्टव्यं॥ यजमानस्य कामितां वृष्टि
पर्जन्यः संपादयत्विति यं योध्वर्युः कामयेत समीचीर्मिनुयादिति वाक्यं व्याख्येयं॥ एवंविदुद्गाता आत्मने वा यजमानाय
वा यं कामं कामयते तमागायतीत्युत्विजोपि काम इति चेत्॥ तर्हि तस्मिन्नुद्गीथोपासने वचनादृत्विजोपि फलमस्तु॥
॥ ॥सप्तमाधिकरणमारचयति॥ ॥आयुर्दा इति मंत्रोक्तिः कस्याध्वर्योः समाख्यया तद्वाध्ये लिंगतः स्वामिगा
मिता काम वन्मता॥ इदमाम्नायते॥ आयुर्दा अग्नेस्यायुर्मे देहीति तस्यैतस्य मंत्रस्य पाठोध्वर्योर्यजमानस्य वेत्ययं
संशयः॥ कस्येत्यनेन पदेन सूचितः॥ अग्निमंत्रे आयुर्मे देहीति फलस्य आत्मसंबंधः॥ प्रतीयते स च यजमानस्य
युक्तो नाध्वर्योः तस्मात्कामवन्मंत्रोपि याजमानः॥ ॥अष्टमाधिकरणमारचयति॥ ॥वाजस्येत्यमुं ब्रूयादेको द्वौ
वा कृतार्थतः॥ एकः कांडद्वये पाठादध्वर्युस्वामिनावुभौ॥ दर्शपूर्णमासयोर्वाजस्य मा प्रसवेनेत्ययं मंत्रोध्वर्युकांडे
यजमानकांडे चाम्नातः॥ तत्रैकेन पठिते सति मंत्रस्य चरितार्थत्वादितरस्तन्न पठेदिति चेन्नैवं॥ कांडांतरपाठवैय
र्थ्यप्रसंगात्॥ तस्मादुभाभ्यां पठनीयः॥ तयोः पठतोरायं भेदोस्ति अनेन मंत्रेण प्रकाशितमर्थं अनुष्ठास्यामी
त्यध्वर्युमनुते अत्र न प्रमदीष्यामीति यजमानः॥ ॥नवमाधिकरणमारचयति॥ ॥वाचयेत्स्वामिनं ज्ञाज्ञो वाच
नीयो तत्त्वा॥ अविशेषादुभौ नास्य स्वामित्वाद्वाचयेमुं दे॥ वाजपेये श्रूयते॥ कृप्रिर्यजमानं वाचयतीति॥ आयु
र्यज्ञेन कल्पतामित्यादयो मंत्राः कृप्तयः तत्र मंत्र तदर्थाभिज्ञमनभिज्ञं वोभाय विवाचयेत्॥ विद्वांसं वाचयेदित्ये
वं विशेषस्याश्रवणात्॥ अनभिज्ञं तं देवशिक्षमित्वा पिवाचयितुं शक्यत्वादिति चेन्नैवं॥ अध्ययनविधिबलादधी
तवेदस्यविदितवेदार्थस्यैव यजमानत्वात्॥ तस्मादभिज्ञमेव वाचयेत्॥ ॥दशमाधिकरणमारचयति॥ ॥वत्सं
चोपसृजेत्स द्वद्वःस्वां चाधिश्रयेदिति॥ द्वादशद्वंद्वकर्मैतत्स्वामिनो वेतरस्य वा॥ आद्यः पाठात्स्वामिकांडे तदर्थेन पे
रिक्रयात्॥ महाकांडोक्तितोप्यंत्योस्ति द्वंद्वतैवात्र कीर्त्यते॥ दर्शपूर्णमासयोर्याजमाने कांडे श्रूयते॥ द्वादश द्वंद्वा
नि दर्शपूर्णमासयोस्तानि संपाद्यानीत्यादि वत्सं चोपावसृजत्युखां चाधिश्रयत्यवहंति दृषदौ च समाहंतीत्यादि
तत्र पलाशशाखया वत्सापाकरणमेवं कर्मदोहेन संपादितं क्षीरं धारयितुं पिठरस्थापनमपरं कर्म॥ तदेतदुभय

मेकं द्वंद्वं॥ तथा व्रीहीणामवघातो दृषदुपलयोः पाषाणांतरेण समाघातइत्येतदुभयं द्वंद्वं॥ एवं द्वादशकर्मद्वंद्वान्यनुष्ठेया
न्याम्नातानि तेषां यजमाने कांडे पठितत्वात्समाख्यया यजमानेन तान्यनुष्ठेयानीति प्राप्ते ब्रूमः॥ यजमानस्य यानि कार्या
णि तान्यनुष्ठातुमेव परिक्रीता ऋत्विजः॥ किंच॥ यजुर्वेदे याजमानमिदं अवांतरकांडे माहाकांडं त्वाध्वर्यवमेव तत्रैते वत्सा
पाकरणादयो धर्मा आम्नाताः तस्मादध्वर्युरेवताननुतिष्ठेत्॥ याजमाने तु कांडे न तेषां अनुष्ठानप्रकारश्चोदितः॥ किंतु
परिगणनया द्वंद्वता संपादनमात्रमाम्नातं तेन यजमानस्तामानुपूर्वी॥ मनसि निधायाध्वर्योरनुष्ठानेन प्रमादराहित्यम
नुसंधातुं भवति तस्मादध्वर्योरेवानुष्ठानं॥ ॥एकादशाधिकरणमारमाचयति॥ ॥यो होताध्वर्युरेष स्यादित्याध्वर्य
वमादरन्॥ होत्रं कुर्यान्नवा त्यागहेत्वभावात्करोति नत॥ होतैको युगपत्कर्मद्वयं कर्तुं नहि प्रभुः॥ त्यजेच्चोदकतः प्राप्तं हौत्रं
वाचनिकार्थकृत्॥ अग्नीषोमीय पशौ परिवीतरसीत्यनेन यूप। परिव्याणरूपेणाध्वर्युर्यूपस्य रशनया परिव्याणं करो
ति॥ तदानीं क्रियमाणं तत्परिव्याणं होता युवा सुवासा इत्यनेन मंत्रेणानुवदति॥ तदेतदुभयं चोदकपरंपरया कुंडपायिनाम
यने प्राप्तं॥ तत्राध्वर्योर्होतुश्च समासः आम्नातः यो होता सोध्वर्युरिति होतारमनूद्याध्वर्युत्वविधानादध्वर्युकार्यं होत्रा
नुष्ठेयं॥ तत्परिवीरसीत्यनेन करणमंत्रेण होता यूपपरिव्याणं कुर्वंस्तदानीं स्वस्य चोदकतः प्राप्तं होत्रमपि होतानत्यजे
त्॥ नहि त्यागहेतुं कंचिन्निषेधं पश्यामस्तस्मात्क्रियमाणं तत्परिव्याणं युवा सुवासा इत्यनेन मंत्रेण होतानुवदेदिति प्राप्ते
ब्रूमः॥ द्वयोरध्वर्युहोत्रोरुचितं कर्मद्वयमेको होता युगपत्कर्तुं न शक्नोति॥ ततोन्यतरस्यावश्यंभाविनि त्यागे चोदकतः प्रा
प्तं हौत्रमेव त्यजेत्॥ आध्वर्यवं तु यो होता सोध्वर्युरित्यनेन प्रत्यक्षवचनेन प्रापितत्वादनुष्ठेयं॥ ॥द्वादशाधिकरणमा
रचयति॥ ॥प्रोक्षण्यासादनं कुर्यादध्वर्युरितरोथवा॥ आख्यायाद्यः सादयति प्रेषितोन्यो स्तु लिंगतः॥ दर्शपूर्णमास
योः प्रोक्षणीनां केन चित्पात्रेण वेद्यामासादनं श्रुतं तदेतद्यजुर्वेदोक्तत्वादाध्वर्यवमिति चेन्नैवं॥ प्रेषमंत्रविरोधप्रसंगात्
प्रोक्षणीरासादयेध्माबर्हिरुपसादय अग्नीदग्नीन्विहर बर्हिः स्तृणीहीत्यादिषु॥ अध्वर्यवेषु प्रेषमंत्रेषु श्रूयमाणमा
ग्नीध्रसंबोधनं मध्यमपुरुषश्चान्यतदनुष्ठाने सत्युपपद्यते तस्मान्नाध्वर्यवं॥ ॥त्रयोदशाधिकरणमारचयति॥
॥ ॥अग्नीन्प्रेष्येद्युताध्वर्युरग्नीदस्त्वविरोधतः॥ आख्याविरोधादध्वर्युप्रेषद्वारार्थलक्षतः॥ यथाप्रोक्षणीराग्नीध्र

125
1945

दं तस्मात्तस्यैव कामयेतेति चेन्नैवं॥ मिनुयादिति परस्मैपदेनाध्वर्युव्यापारफलस्य परगामिता प्रतीयते॥ ततो वृष्टिलक्षण
फलस्य यजमानगामित्वात्परस्मैपदश्रुत्या वाक्यं बाधित्वा कामस्य यजमानकर्तृत्वं द्रष्टव्यं॥ यजमानस्य कामितां वृष्टिं
पर्जन्यः संपादयत्वित्येवं योध्वर्युः कामयेत स मीचैर्मिनुयादिति वाक्यं व्याख्येयं॥ एवं विदुद्गाता त्मनेवा यजमानाय
वा यं कामं कामयते तमागायतीत्युत्विजोपि काम इति चेत्॥ तर्हि तस्मिन्नुद्गीथोपासने वचनादृत्विजोपि फलमस्तु॥
॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ आयुर्दा इति मंत्रोक्तिः कस्याध्वर्योः समाख्यया तद्वाधे लिंगतः स्वामिगा
मिता काम वन्मता॥ इदमाम्नायते॥ आयुर्दा अग्नेस्यायुर्मे देहीति तस्यैतस्य मंत्रस्य पाठोध्वर्योर्यजमानस्य वेत्ययं
संशयः॥ कस्येत्यनेन पदेन सूचितः॥ अस्मिन्मंत्र आयुर्मे देहीति फलस्य आत्मसंबंधः॥ प्रतीयते स च यजमानस्य
युक्तो नाध्वर्योः तस्मात्कामवन्मंत्रोपि याजमानः॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ वाजस्य मेत्यमुं ब्रूयादेको द्वौ
वा कृतार्थतः॥ एकः कांडद्वयपाठादध्वर्युस्वामिनावुभौ॥ दर्शपूर्णमासयोर्वाजस्य मा प्रसवेनेत्ययं मंत्रोध्वर्युकांडे
यजमानकांडे चाम्नातः॥ तत्रैकेन पठिते सति मंत्रस्य चरितार्थत्वादितरस्तन्न पठेदिति चेन्नैवं॥ कांडांतरपाठवैय
र्थ्यप्रसंगात्॥ तस्मादुभाभ्यां पठनीयः॥ तयोः पठतो राशय भेदोस्ति अनेन मंत्रेण प्रकाशितमर्थं अनुष्ठास्यामी
त्यध्वर्युर्मनुते अत्र न प्रमदीष्यामीति यजमानः॥ ॥ नवमाधिकरणमारचयति॥ ॥ वाचयेत्स्वामिनं शास्त्रज्ञो वाच
नीयो ज्ञ एव वा॥ अविशेषादुभौ ज्ञस्य स्वामित्वाद्वाचयेमुं॥ वाजपेये श्रूयते॥ ऋत्विग्यजमानं वाचयतीति॥ आयु
र्यज्ञेन कल्पतामित्यादयो मंत्राः कृप्तयः तत्र मंत्रतदर्थाभिज्ञमनभिज्ञं वोभावपि वाचयेत्॥ विद्वांसं वाचयेदित्ये
वं विशेषस्याश्रवणात्॥ अनभिज्ञं तदैव शिक्षयित्वा पि वाचयितुं शक्यत्वादिति चेन्नैवं॥ अध्ययनविधिबलादधी
तवेदस्य विदितवेदार्थस्यैव यजमानत्वात्॥ तस्मादभिज्ञमेव वाचयेत्॥ ॥ दशमाधिकरणमारचयति॥ ॥ वत्सं
चोपसृजेत्सद्दुःस्वं चाधिश्रयेदिति॥ द्वादशद्वंद्वकर्मैतत्स्वामिनो वेतरस्य वा॥ आद्यः पाठात्स्वामिकांडे तदर्थेन प
रिक्रयात्॥ महाकांडोक्तितोप्यंत्योक्तिर्द्वंद्वतैवात्र कीर्त्यते॥ दर्शपूर्णमासयोर्याजमाने कांडे श्रूयते॥ द्वादशद्वंद्वा
नि दर्शपूर्णमासयोस्तानि संपाद्यानीत्याहु र्वत्सं चोपावसृजत्युखां चाधिश्रयत्यव हंति दृषदौ च समाहंतीत्यादि
तत्र पलाशशाखया वत्सापाकरणमेवं कर्मद्वंद्वेन संपादितं क्षीरं धारयितुं पिठरस्थापनमपरं कर्म॥ तदेतदुभय

125
1945

मेकं द्वंद्वं॥ तथा व्रीहीणामवघातो दृषदुपलयोः पाषाणांतरेण समाघात इत्येतदुभयं द्वंद्वं॥ एवं द्वादशकर्मद्वंद्वान्यनुष्ठेया
न्याम्नातानि तेषां यजमानकांडे पठितत्वात्समाख्यया यजमानेन तान्यनुष्ठेयानीति प्राप्ते ब्रूमः॥ यजमानस्य यानि कार्या
णि तान्यनुष्ठातुमेव परिक्रीता ऋत्विजः॥ किंच॥ यजुर्वेदे याजमानमिदं अवांतरकांडे महाकांडत्वाध्वर्यवमेव तत्रैते वत्सा
पाकरणादयो धर्मा आम्नाताः तस्मादध्वर्युरेवताननुतिष्ठेत्॥ याजमाने तु कांडेन तेषां अनुष्ठानप्रकारश्चोदितः॥ किंतु
परिगणनया द्वंद्वता संपादनमात्रमाम्नातं तेन यजमानस्तामानुपूर्वीं॥ मनसि निधायाध्वर्योरनुष्ठानेन प्रमादराहित्यम
नुसंधातुं भवति तस्मादध्वर्योरेवानुष्ठानं॥ ॥ एकादशाधिकरणमारमाचयति॥ ॥ यो होताध्वर्युरेष स्यादित्याध्वर्य
वमादरन्॥ होत्रं कुर्यान्न वा त्यागहेत्वभावात्करोति तत्॥ होतैको युगपत्कर्मद्वयं कर्तुं नहि प्रभुः॥ त्यजेच्चोदकतः प्राप्तं हौत्रं
वाचनिकार्थकृत्॥ अग्नीषोमीय पशौ परिवीतरसीत्यनेन यूप। परिव्याणनूपेणाध्वर्युर्यूपस्य रशनया परिव्याणं करो
ति॥ तदानीं क्रियमाणं तत्परिव्याणं होता युवा सुवासा इत्यनेन मंत्रेणानुवदति॥ तदेतदुभयं चोदकपरंपरया कुंडपायिनाम
यने प्राप्तं॥ तत्राध्वर्योर्होतुश्च समासः आम्नातः यो होता सोध्वर्युरिति होतारमनूद्याध्वर्युत्वविधानादध्वर्युकार्यं होत्रा
नुष्ठेयं॥ तत्परिवीरसीत्यनेन करणमंत्रे। ण होता यूपपरिव्याणं कुर्वन् तदानीं स्वस्य चोदकतः प्राप्तं होत्रमपि होतानत्यजे
त्॥ नहि त्यागहेतुं कंचिन्निषेधं पश्यामस्तस्मात्क्रियमाणं तत्परिव्याणं युवा सुवासा इत्यनेन मंत्रेण होतानुवदेदिति प्राप्ते
ब्रूमः॥ द्वयोरध्वर्युहोत्रोरुचितं कर्मद्वयमेको होता युगपत्कर्तुं न शक्नोति॥ ततोन्यतरस्यावश्यंभाविनि त्यागे चोदकतः प्रा
प्तं होत्रमेव त्यजेत्॥ अध्वर्यवं तु यो होता सोध्वर्युरित्यनेन प्रत्यक्षवचनेन प्रापितत्वादनुष्ठेयं॥ ॥ द्वादशाधिकरणमा
रचयति॥ ॥ प्रोक्षण्यासादनं कुर्यादध्वर्युरितरोथवा॥ आख्यायाद्यः सादयति प्रेषितोन्यो स्फलिंगतः॥ दर्शपूर्णमास
योः प्रोक्षणीनां केनचित्पात्रेण वेद्यामासादनं श्रुतं तदेतद्यजुर्वेदोक्तत्वादाध्वर्यवमिति चेन्नैवं॥ प्रेषमंत्रविरोधप्रसंगात्
प्रोक्षणीरासादय इध्माबर्हिरुपसादय अग्नीदग्नीन्विहर बर्हिस्तृणीहि इत्यादिषु॥ अध्वर्युवेषु प्रेषमंत्रेषु श्रूयमाणमा
ग्नीध्रसंबोधनं मध्यमपुरुषाश्चान्यितदनुष्ठाने सत्युपपद्यते तस्मान्नाध्वर्यवं॥ ॥ त्रयोदशाधिकरणमारचयति॥
॥ ॥ अग्नीन्प्रेष्य इत्ताध्वर्युरग्नीदस्त्वविरोधतः॥ आख्याविरोधादध्वर्युः प्रेषद्वारार्थकृद्यतः॥ यथा प्रोक्षणीराग्नीध्र

ध्र आसादयतितथाप्रैषमंत्रमाप्याग्नीध्र एवपठतुविरोधाभावादितिचेन्नैवं॥ आध्वर्यवसमाख्यायाः पूर्वोदाहृतसंबंध
नमध्यमध्यमपुरुषयोश्चविरोधात॥ नचप्रोक्षण्यासादनादीनामध्वर्युकर्त्तृकत्वाभावेपिसमाख्याविरोधस्तदवस्थइति
वाच्यं॥ प्रैषद्वाराप्रयोजककर्तृत्वेपितदविरोधात्तस्मादध्वर्योरेवप्रैषमंत्रः॥ ॥ चतुर्दशाधिकरणमारचयति॥ ॥ ममा
ग्नइतिकस्यात्रफलंलिंगेनवक्तृतं॥ श्रुत्यास्वामिनिनक्रीतेलिंगंतत्रापचर्यतां॥ ममाग्नेवर्चोविहवेष्वस्त्वित्यत्रमाहवनी
यस्याधानेकरणभूतामंत्रोध्वर्युणापठ्यते॥ विशिष्टंहवनेयेषांमग्नीनांतेविहवास्तेषुवर्चस्तेनसोपलक्षितंयत्फलंत
न्ममास्त्वित्यनेनलिंगेनमंत्रंउच्चारयितुरध्वर्योस्तत्फलमितिचेन्नैवं॥ दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्यात्मनेपद
श्रुत्यासांगप्रधानफलस्ययजमानस्यगामित्वंप्रतीयतेनचपरिक्रीतस्याध्वर्योर्दक्षिणातिरिक्तफलसंबंधोन्याय्यः॥
तस्माच्छ्रुतिन्यायाभ्यांविरुद्धंतल्लिंगंयजमानपरत्वेनोपचरणीयं॥ मदीययजमानस्यतद्वर्चोस्त्वितिह्युपचारः॥ तस्माद्य
जमानेनपाठ्येष्वायुर्दाअग्नेस्यायुर्मेहीत्यादिषुक्रियमाणानुवादिषुप्रत्यगाशीर्मंत्रेषुश्रुतंफलंयथायजमानंतथैवाध्व
र्युणापाठ्येषुकरणमंत्रेषुश्रुतमपिफलंयजमानमेव॥ ॥ पंचदशाधिकरणमारचयति॥ ॥ मामासंताप्तमित्ये
तत्कास्मिन्स्वामिनीतिपूर्ववत॥ अध्वर्यावस्मत्त्वेनस्वामिकर्मोपयोगतः॥ दर्शपूर्णमासयोराघारहोमार्थमाज्यपू
र्णौस्त्रुक्स्त्रुचौगृहीत्वानाभिसमीपेहस्तेनधारयति॥ तत्रायंकरणमंत्रोध्वर्युणापठ्यते अग्नाविष्णुमावामवक्रमि
षंविजिहाथांमामासंताप्तंलोकंमेलोककृतौकृणुतमिति॥ भोःस्त्रुक्स्त्रुवरूपावग्नाविष्णूयुवांनाभिदेशेधारयन्नह
मध्वर्युर्मावक्रमिषंयुवयोरतिक्रमंनकृतवान॥ युवांचमत्तोवियुक्तौभवंतौततोमांदेहधारिणंयासंतापस्तं मद्देहेसंत
पंत्वरादिरूपंमाकुरुतंस्थानकृतौयुवामाघारहोमायममस्थानंकुरुतमित्यर्थः॥ तत्रपूर्वोक्तवर्चोन्यायेनसंताप
भावोपियजमानस्यैवनत्वध्वर्योरितिचेन्नैवं॥ अध्वर्यावसंतप्तेसत्यविघ्नेनस्वस्वामिनः कर्मसमाप्त्येततस्माद
ध्वर्युगतोपिसंतापाभावोयजमानस्यैफलमितिनात्रमुख्यस्योपचारः॥ ॥ षोडशाधिकरणमारचयति॥ ॥
भद्रंतन्नोसहेत्यनेनकस्मिन्स्वामिनीतियुज्यतेद्वित्वाश्रुत्याद्वयोरेतदध्वर्युयजमानयोः॥ ज्योतिष्टोमेहविर्धानमंडपे
सोमाभिषवाधारयोःफलकयोरधस्ताच्चतसृष्वाग्नेयादिविदिक्षुचत्वारउपरवनामकागर्त्ताअरत्निमात्रखाता
अधोभागेपरस्परंमिलिताऊर्ध्वभागेपरस्परंप्रादेशमात्रव्यवहितावर्त्तंतेतेषेकस्मिन्नुपरवेयजमानोदक्षिणहस्तं

प्रसारयति॥ तथैवाध्वर्युरन्यस्मिन्स्वहस्तंप्रसार्यअधस्तात॥ यजमानहस्तंगृह्णाति॥ तदायजमानः किमत्रेत्यनेनमंत्रे
णफलंपृच्छति॥ अध्वर्युश्चभद्रमित्यनेनमंत्रेणोत्तरंब्रूते॥ ततोयजमानस्तन्नोसहेत्यनेनमंत्रेणतत्फलंस्वकीयत्वेनस्वी
करोति॥ तस्माद्यजमानस्यैतदितिचेन्नैवं॥ नाविल्यनेनद्विवचनेनसहेत्यनेनचोभयगामितयैवस्वीकारात॥ ॥ सप्तद
शाधिकरणमारचयति॥ ॥ धर्माणांप्रकृतिस्थानांविकृतावविशेषतः॥ प्राप्तिर्विशेषतोवाद्योविशेषस्यानिरूपणात॥
प्रकृतौकार्यकृद्धर्माविकृतौस्युर्नचेतरे॥ यूपावटास्तृतिःकार्यनहिप्राकृतबर्हिषः॥ दर्शपूर्णमासयोर्वेदीधर्माबर्हिर्धर्माह
विरासादनायोगप्रधानार्थाइतिपूर्वत्रनिर्णीतंतेचधर्माविकृतावतिदिश्यमानानियामकाभावात्सर्वेप्यतिदिश्यंतामितिप्राप्ते
ब्रूमः॥ कार्यमत्रनियामकंप्रकृतौहिहविरासादनंवेदिकार्यंतच्चविकृतावपिप्राप्यमाणंस्वसिद्धयेखननादिवेदिधर्मान
प्रापयतियूपावटास्तरणरूपंतुकार्यंनप्रकृतावस्तिदर्शपूर्णमासयोःयूपावटाभावात॥ तच्चास्तरणकार्यंविकृतौविधी
यमानमप्यप्राकृतकार्यतयाप्राकृतांल्लवनादीन्बर्हिःसंस्कारान्नप्रापयतितस्मात्प्रकृतिगताःकार्यकृद्धर्माएवंविकृ
तौप्राप्यंते॥ ॥ अष्टादशाधिकरणमारचयति॥ ॥ यद्बर्हिस्तत्पवित्रार्थंनोवाद्यस्तस्यसंभवात॥ संस्कृतंस्तरणेक्षीणं
पवित्रंत्वन्यतोभवेत॥ दर्शपूर्णमासयोराम्नायतेसमावप्रच्छिन्नाग्रौदर्भौप्रादेशमात्रौपवित्रेकरोतीति॥ तत्रयदेतद्वेदि
स्तरणार्थंलवनसंस्कृतंबर्हिस्तेनपवित्रसंभवादास्तरणवत्पवित्रमपिबर्हिषःकार्यमपिचेन्नैवं॥ आस्तरणएवसंस्कृ
तस्यसर्वस्यबर्हिषउपक्षीयमाणत्वात॥ नहिवेदिंस्तृणातीतिविहितस्यस्तरणस्यकस्माद्बर्हिरेकदेशसंकोचोयुक्तः॥
तस्माद्यथायूपावटमसंस्कृतेनबर्हिषास्तृणातीतितथापवित्रनिष्पत्तिरपिशाखीयलवनादिसंस्काररहितैःपरि
भोजनीयनामकैर्दर्भैःसंपादनीया॥ ॥ एकोनविंशाधिकरणमारचयति॥ ॥ पुरोडाशस्यशकलमेद्रवायवपात्रके॥
अवदध्यात्पुरोडाशोनवोथसवनीयकः॥ सिद्धस्ययजमानार्थत्वान्नवंसंपाद्यतत्क्रिया॥ सवनीयेनतत्कार्यंसंस्कार्य
त्वाद्धितीयया॥ ज्योतिष्टोमेश्रूयतेपुरोडाशशकलमैंद्रवायवस्यपात्रेनिदधातीति॥ तत्रसवनीयपुरोडाशशकलंयद्य
पिनिष्पन्नंतथापितस्ययजमानार्थत्वेनसंस्कृतबर्हिर्वदुपक्षयान्नूतनंकंचित्पुरोडाशंसंपाद्यतदीयशकलेनैंद्रवाय
वपात्रप्रक्षेपप्रक्रियाकर्तव्येतिचेन्नैवं॥ सवनीयपुरोडाशशकलेनैवतन्निधानंकर्त्तव्यंकुतःसंस्कार्यत्वात्शकलंनिद

127
1945

धातीतिद्वितीयया संस्कार्यत्वं गम्यते दृष्टशिष्टस्य हि प्रतिपत्तिरूपः संस्कारः न चात्र कृत्स्नयजनार्थमवदानस्येयत्तया
पुरोडाशस्यागस्य शेषितत्वात्॥ यथा पूर्वसिद्धपुरोडाशान्नाकलं तथा धाना आश्विनपात्रे पयस्यां मैत्रावरुणस्य पात्रे इ
त्यत्रापि पूर्वशेषस्यैव प्रक्षेपः॥ ॥ विंशाधिकरणमारचयति॥ ॥ काम्याउपांशु यष्टव्याः किं तदंगप्रधानयोः॥ प्रधा
न एव वा नात्र विशेषोक्तिरतो द्वयोः॥ मुख्यानामेव काम्यत्वात्तेष्वेव परिचोदना॥ अंगानामतथाभावादुपांशुत्वं प्रधान
गं॥ इदमाम्नायते यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु यष्टव्या इति॥ अथर्ववेदोक्तकर्मवद्यज्ञेषु काम्या इष्टयो गोप्या
स्तस्मात्तासामुपांशुत्वं युक्तमित्यर्थः॥ यथा वेदिधर्माणां बर्हिर्धर्माणां चांगप्रधानयोः समानो विधिः॥ ततोपांशु
त्वपि नह्यत्र। कश्चिद्विशेष आम्नात इति चेन्नैवं॥ काम्यत्वस्यैवात्र विशेषनियामकत्वात्॥ न ह्यंगानां काम्यत्वमस्ति
करणोपकारसंपादकानां तेषां फले साक्षात्संबंधाभावात्॥ साक्षात्फलसाधनं प्रधानमेवोपांशुत्वं अंगेषु तद्दे
नुसारेण ध्वनिविशेषः॥ ॥ एकविंशाधिकरणमारचयति॥ ॥ नवनीतं श्येन आज्यं मुख्यं गे वास्तु मुख्यगं॥ विधे
यमाज्यमप्राप्तं हृतिरुक्तं नवनीतकं॥ मुख्यः सोमविकारांगे चोदकप्राप्तमाज्यकं॥ अनूद्य इति संस्थानं नवनीतगुणो
विधिः॥ श्येने श्रूयते दतिनवनीतमाज्यं भवतीतीदं तौ चिरं संगृहीतं नवनीतं यस्याज्यस्य प्रकृतिद्रव्यं तदेतदीदृशमाज्यं
मानांतरेण पूर्वमप्राप्तत्वात्प्रधानकर्मणि विधेयमिति चेन्नैवं॥ प्रधानस्य श्येनस्य सोमयागविकारत्वेनाज्यापेक्षाया
अभावात्॥ अंगेष्विष्टिविशेषेषु चोदकप्राप्तस्याज्यस्य प्रकृतिद्रव्यत्वेन यथोक्तनवनीतगुणो विधीयते॥ ॥ द्वाविंशा
धिकरणमारचयति॥ ॥ क्रत्याकालगतांगेषु गुणः सर्वेषु चोदितः॥ आद्यो वैशेषिकांगत्वाद्वाक्यात्सर्वांगसंगतिः॥
योयं श्येनस्यांगेषु दृतिनवनीतत्वगुणो विहितः॥ सोयं क्रत्याकालीनेष्वेव सवनीयपशुतत्पुरोडाशरूपेष्वंगेषु न तु का
लांतरवर्तिदीक्षणीयाद्यंगेषु विमतो गुणः क्रत्याकालीनांगमात्रगतः॥ श्येनवैशेषिकत्वात्पशुसाहित्यवत्॥ तथा
सह पशूनालभते। इति विहितं पशुसाहित्यं श्येन एव विशेषत्वेनोच्यमानं क्रत्याकालीनेष्वेव सवनीयपशुष्ववस्थितं त
था नवनीतमपीति प्राप्ते ब्रूमः॥ यदाज्यं तद्दृतिनवनीतमिति वाक्येन सर्वांगगताज्यविषयत्वप्रतीतावनुमानं कालात्य
यापदिष्टं॥ तस्मात्सर्वेष्वंगेषु तत्र नवनीतं॥ ॥ त्रयोविंशाधिकरणमारचयति॥ ॥ शाट्यायने पुरोडाशास्तर
सा इति मांसता॥ सर्वत्र सवनीयेषु वा सर्वत्र नवनीतवत्॥ तरसाः सवनीयाः स्युरिति सन्निधिस्मृतेः॥ पुरोडाशस्य मांस

श्रीः
६४

129
1945

त्वं तेष्वेवातो नियम्यते॥ षट्त्रिंशात्संवत्सरेष्वनुष्ठेयं शाक्तानामयनं तत्र श्रूयते॥ संस्थिते संस्थितेहनि गृहपतिर्मृगयां याति स यान्
मृगान्हंति तेषां तरसाः सवनीयाः पुरोडाशा भवंतीति॥ तत्र यथा नवनीतं सर्वेष्वंगेषु निविष्टं तथा मांसत्वमपि सर्वेषु पुरो
डाशेषु निविशत इति चेन्नैवं॥ तदा हि ये पुरोडाशास्ते तरसा इति वचनव्यक्तौ व्यवहितान्वयः स्यात्॥ तरसशब्दपुरोडाशश
ब्दयोर्मध्ये सवनीयशब्देनाव्यवधानादिह तु तरसाः सवनीया इत्यनयोः सन्निधिः श्रूयते॥ तथा सति ये सवनीयास्ते तर
सा इत्यनेन संनिध्यनुगृहीतेन वाक्येन मांसत्वं सवनीयपुरोडाशेष्वेव नियम्यते॥ ॥ इतिश्री माधवीये जैमिनिन्यायमा
लाविस्तरे तृतीयाध्यायस्याष्टमः पादः समाप्तमगमत्॥ ८॥ ॥ शेषशेषित्वसिद्धौ किं प्रयोज्यं किं प्रयोजकं॥ इत्यपेक्षा
द्याद्प्रक्तिश्चतुर्थे तत्प्रयुक्तये॥ अनेन तृतीयचतुर्थयोरध्याययोः पूर्वोत्तरभावः उपपादितः॥ ॥ चतुर्थाध्यायस्य प्रथ
मपादे प्रथमाधिकरणमारचयति॥ ॥ चिंता न कार्या कार्या वा क्रत्वर्थपुरुषार्थयोः॥ अफलत्वान्न कर्तव्या प्रयुक्तौ क्रि
यतामियं॥ क्वचिदेतद्विचारेण क्वचित्फलविधेर्वशात् क्वचित्साक्षादिदध्याये प्रयुक्तिर्बहुधोच्यते॥ क्रत्वर्थोयं पुरुषार्थो
यमिति विवेकस्य प्रयोजनं किमपि न पश्यामः॥ तस्मात्कामदंतविचारवदयं विचार उपेक्षणीय इति चेत्। मैवं॥ तेन विचारे
ण प्रयुक्तेर्ज्ञातुं शक्यत्वात्साक्षाद्वा परंपरया वा प्रयुक्तिनिर्णयोपयुक्तं सर्वमिह चिंतनीयं॥ ॥ द्वितीयाधिकरणमारचय
ति॥ ॥ क्रत्वर्थादेर्नास्ति वास्ति लक्ष्यं नाख्यनिरूपणात्॥ कर्तव्यस्तदर्थोसाविति तस्यानिरूपणं॥ क्रतावनुष्ठेयः क्रत्वर्थ
इत्युक्ते गोदोहनादावतिव्याप्तिः॥ पुरुषेणार्थ्यमानः पुरुषार्थ इत्युक्ते प्रयाजादीनामप्यनुष्ठेयतया पुरुषेणार्थ्यमान
त्वादतिव्याप्तिः॥ तस्मात्तयोरदुष्टलक्षणं दुर्निरूपमिति चेत्। मैवं॥ क्रतुस्वरूपपोषकत्वायैव यो विधीयते स क्रत्वर्थः॥
प्रयाजादयस्तादृशाः॥ नहि प्रयाजादिभिः पुरुषस्य कश्चित्प्रीतिविशेष उत्पद्यते॥ येनैते पुरुषार्था भवेयुः दर्शपूर्णमा
सक्रतुः स्वतैः प्रयाजादिभिः फलजननसामर्थ्यलक्षणं पोषकत्वं प्राप्नोति॥ ततस्मात् क्रत्वर्थाः पुरुषप्रीतये विधी
यमानः पुरुषार्थः॥ यथा दर्शपूर्णमासादयो गोदोहनादयश्च तादृशाः॥ नहि दर्शपूर्णमासाभ्यां कस्यचित्क्रतोः पोषक
त्वं भवति तयोरेव क्रतुत्वात्॥ नापि गोदोहनं क्रत्वर्थं तदभावेपि चमसेन क्रतुपोषकत्वसिद्धेः॥ तस्मात्सुनिरूपं तदुभ
यलक्षणं॥ ॥ द्वितीयवर्णकमारचयति॥ ॥ फलं विधेयं नो वा द्याभावान्नांशत्वतोन्यवत्॥ नभाव्यांशो विधेयः स्याद्रा

गान्तत्र प्रवर्तनात्॥ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति॥ स्वर्गः फलत्वेन श्रूयते॥ तत्रा विमतं फलं विधेयं॥ भावनां
शास्त्रात्करणवदितिकर्तव्यतावश्चेति चेन्नैवं॥ अप्रवृत्तप्रवर्तनं हि विधानं फले तु पुरुषः॥ सोदर्यज्ञानं स्वयं गाराद्देव प्रव
र्तत इति व्यर्थस्तत्र स्तत्रविधिः॥ ॥ तृतीयवर्णकमारचयति॥ ॥ गोदोहनं द्वयार्थं स्यान्न भावानाद्वयार्थता॥ अन्यथापि क्र
तोः सिद्धेः केवलं पुरुषायतत्॥ दर्शपूर्णमासयोः श्रूयते॥ चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्येति तत्र गोदोहनस्य
क्रत्वर्थत्वं पुरुषार्थत्वं चेत्याकारद्वयमस्ति॥ पशुफलजननेन पुरुषप्रीतिर्भवति॥ अपां प्रणयनेन क्रतुपेः क्लृप्त्यमपिभा
तीति चेत्। मैवं॥ गोदोहनमंतरेण फलासिद्धेर्भवतु पुरुषार्थत्वं क्रतुस्तदभावेपि च समसेन सिद्ध्यतीति न क्रत्वर्थता॥ ॥
चतुर्थवर्णकमारचयति॥ ॥ द्रव्यार्जनं स्यात्क्रत्वर्थं पुमर्थं वा क्रतावि दं नियतत्वात्पुमर्थत्वं दृष्टं क्रत्वर्थतार्थिकी॥
ब्राह्मणस्य द्रव्यार्जने प्रतिग्रहयाजनाध्यापनान्येव नियतानि॥ तत्र तत्र श्रुतानि राजन्यस्य जयादिकं॥ वैश्यस्य कृष्यादिकं॥
शूद्रस्य सेवादिकं॥ तच्चैयन्देतद्रव्यसंपादनं तदेतत्क्रत्वर्थं कुतः अर्जनोपायानां नियतत्वात्॥ पुरुषप्रीतेस्तु येन केनापि
द्रव्येण सिद्धत्वादर्जनोपायनियमस्तत्र निरर्थकः॥ क्रतौ तु नियमापूर्वं परमापूर्वोपयोगीति सार्थको नियम इति प्राप्ते ब्रूमः॥ द्र
व्यार्जने रागः प्रवर्तको दृष्ट इति न विधिरपेक्ष्यते॥ फलं च कृष्ण्यादिरूपं दृष्टमेव॥ अत एव स्मर्यते॥ षण्णां तु कर्मणामस्य
त्रीणि कर्माणि जीविका॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति॥ क्रत्वर्थे जीवनाभावाक्रतुरेव न सिध्यति॥ पुरुषा
र्थतायां त्वैहिकप्रीतिकारिभोजनादिवत्क्रतो रामुष्मीकप्रीतिकारितया पुरुषकार्येषु तद्भावात्क्रत्वर्थताप्यार्थिकी तिसि
ध्यति॥ उपायनियमस्तूपायांतरेषु प्रत्यवायविवक्षयोपपद्यते॥ तस्माद्द्रव्यार्जनं पुरुषार्थं॥ ॥ तृतीयाधिकरणमारचय
ति॥ ॥ नेक्षेतोद्यंतमादित्यं क्रत्वर्थं तं नवाग्निमः॥ फलस्याकलनीयत्वात्क्रतौ प्राप्तं निषिध्यते॥ व्रतोक्त्या पर्युदासत्वे संक
ल्पो नीक्षणे व्रतः॥ न क्रत्वं गममानत्वात्पुमर्थः पापहायने॥ अनारभ्य श्रूयते॥ नेक्षेतोद्यंतमादित्यं नास्तं यंतं कदाचनेति
अत्र नञ्पदमभिधारत्या प्रतिषेधं ब्रूते॥ न तु पर्युदासं प्रतिषेधश्च प्राप्तिपूर्वकः॥ प्राप्तिश्च वैदिकस्य निषेधस्य वैदिकी
प्रत्यासन्ना तथा सती क्रतौ यत्रादित्येक्षणं विहितं तत्रायं निषेध उदयास्तमयोद्देशेन प्रवर्तते॥ एवं च सति फलं न कल्पनीयं
॥ पर्युदासमाश्रित्य पुरुषार्थत्वांगीकारे विकारः सिद्ध्येत फलं कल्पनीयं स्यात्॥ तस्मात्क्रत्वार्थो निषेध इति प्राप्ते ब्रूमः॥ तस्य
व्रतमित्युपक्रम्य नेक्षेतोद्यंतमित्याम्नातत्वादनीक्षणरूपं किंचिदनुष्ठेयं॥ तच्च पर्युदासत्वे सत्येव कल्प्यते ईक्षणस्याभावः॥

श्रीः
६५

131
1945

प्रतिषेधपक्षे नञर्थः॥ पर्युदासपक्षे त्वीक्षणादितरः संकल्पो नञ्यदेन लक्ष्यते॥ स च संकल्पोत्रानुष्ठेयव्रतत्वेन विधीयते॥
यद्यपीक्षणादितरे बहवो व्यापारानुष्ठानयोग्याः संति॥ तथापि कायिकवाचिकव्यापारविशेषस्याप्रतीयमानत्वान्मान
सव्यापारस्यावर्जनीयत्वाच्च संकल्प एव परिशिष्यते॥ संकल्पनीयश्चार्थः॥ प्रत्यासत्त्या धात्वर्थनिषेधः तथा सत्युद्यं
तमस्तं यंतमादित्यं नेक्षिष्य इत्येवंरूपः संकल्पोत्रानुष्ठेयत्वेन विधीयते॥ न च तस्य संकल्पस्य क्रत्वं गत्वं॥ तद्बोधकश्रुति
लिंगादिप्रमाणाभावात्॥ न च पुरुषार्थत्वेपि प्रमाणाभावः॥ एतावता हैनसा युक्तो भवतीत्यनेन वाक्येनेक्षितुः पुरुषस्य
प्रत्यवायसंबंधमुपस्थैन्येतत्प्रत्यवायनिवारणफलकस्यानीक्षणसंकल्पस्य विधानेन पुरुषार्थत्वावगमात्क्रत्वंगत्वविव
क्षायां तु क्रतुवैकल्यरूपो विपक्षबाध उपन्यस्येत॥ तस्मादनीक्षणसंकल्पादीनि प्रजापतिव्रतानि पुरुषार्थानि॥ ॥ चतु
र्थाधिकरणमारचयति॥ ॥ दशयज्ञायुधानीति हविष्ट्वेन विधिर्नवा॥ आद्योऽप्राप्तः पुरोडाशे समुच्चयविकल्पते॥ साधी
मुपत्तिविशिष्टेन विकल्पादिर्न युज्यते॥ स्फ्येन चोद्धंतीति यत्प्राप्तं तदत्रानूद्य संस्तवः॥ दर्शपूर्णमासयोः स्फ्यश्च कपालानि चे
त्याद्यनुक्रम्यैतानि वै दश यज्ञायुधानीत्याम्नातं॥ तानि चात्र हविष्ट्वेन विधीयंते॥ कुतः मानांतरैरप्राप्तत्वेनापूर्वार्थत्वात्॥
यदि तत्र पुरोडाशो हविर्भवेत्॥ तदा तेन सहैतेषां समुच्चयो विकल्पो वास्त्विति प्राप्ते ब्रूमः॥ आग्नेयोष्टाकपाल इत्युत्पत्तिविशि
ष्टेन पुरोडाशेन सह पश्चाच्छिष्टानामायुधानां विकल्पः समुच्चयो वा न संभवति॥ आयुधत्वं यज्ञसाधनत्वं तच्च स्फ्येन चोद्धं
तीति कपालेषु श्रपयतीत्यादिशास्त्रसिद्धमेवात्रानूद्य यज्ञायुधानि संभरतीत्येष संभरणविधिस्तूयते॥ तस्मान्नास्ति ह
विष्ट्वं॥ ॥ पंचमाधिकरणमारचयति॥ ॥ पशुरालभ्य इत्यत्र पशोरैक्यं यजनांगता॥ नास्त्यस्ति वाद्यः स्वपदे श्रुत्या पशुं
गतां गते॥ आद्योस्य प्रत्ययो पात्त आसंन्नतरकारके॥ योगः क्लृप्तौ पशौ चेति क्रमे यागांगतोचिता॥ अग्नीषोमीयं पशु
मालभेतेत्यत्र पशोरेकत्वं यजनांगं न भवति॥ तस्य श्रुत्या पशुसंबंधावगमात्॥ पशुमित्येतस्मिन्नेव पदे पशुतदेकत्वयोः
श्रवणात्पदांतरनैरपेक्ष्येण परस्परसंबंधोवगम्यते॥ यागस्त्वालभेतेत्यनेन पदांतरेणोपात्तः॥ तत्र वाक्येन संबंधावग
तिः॥ वाक्याच्च श्रुतिर्बलीयसी॥ तत एकत्वास्य यागांगत्वाभावाद्द्वाभ्यां बहुभिर्वा यागोनुष्ठातुं शक्यत इति प्राप्ते ब्रूमः॥ प
शुमिति पदं यद्यप्येकं तथापि प्रकृत्या पशुर्निर्दिष्टः प्रत्ययेन कारकत्वमेकत्वं चेत्युभयं निर्दिष्टं। तत एकत्वस्यासन्नतरे कार

के प्रथमं संबंधो भवति॥ कारकत्वं नाम क्रियाहेतुत्वं॥ तथा सति कारकद्वारा क्रियाया अपि संबंधः प्रत्ययेनैवावगतः॥ क्रिया
विशेषश्च संनिहितपदांतरोपात्तो याग इति॥ यजनांगत्वमेकत्वस्य सिद्ध्यति॥ तच्चैकत्वं स्वयममूर्त्ततया यागक्रियां निष्पाद
यितुमसमर्थं सत्तत्र समर्थं पुरोडाशद्रव्यं पश्वादवच्छिनत्ति॥ तत एकत्वस्य यागांगत्वान्न द्वाभ्यां त्रिभिर्वा यागसिद्धिः॥ एवमनु
ह्यो युनक्ति वसंताय कपिंजलानालभते इत्यत्र द्वित्वबहुत्वयोर्विवक्षितत्वं॥ द्रष्टव्यं॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ नपुं
लिंगविवक्षोत विवक्षानुपयोगतः॥ आद्यानुष्ठित्यपक्षत्वात्संख्यावत्तद्विवक्ष्यतां॥ पशुमालभेतेत्यत्र पशुपदे पुल्लिंगमवि
वक्षितं॥ कुतः शब्दार्थविचारे अनुष्ठानविचारे च तदुपयोगादर्शनात्॥ अलिंगेपि वृक्षपदार्थे पुल्लिंगो वृक्षशब्दः प्रयुज्यते॥
तथा पुंव्यक्तावपि स्त्रीलिंगो मक्षिकाशब्दः प्रयुक्तः ततो न लिंगस्य शब्दार्थत्वेन विवक्षास्ति॥ अनुष्ठानमपि पुंव्यक्तिस्त्री
व्यक्त्योः समानं एकत्वावच्छिन्नपशुत्वे वैषम्याभावात्॥ तस्मादविवक्षितं लिंगमिति प्राप्ते ब्रूमः॥ यथा पशुत्वजातिः यथा
वा तदेकत्वं शब्दार्थः वृद्धव्यवहारेन्वयव्यतिरेकाभ्यामन्यथासिद्धाभ्यां लिंगस्यापि कुतः शब्दार्थता न स्यात् वृक्षमक्षिका
शब्दयोस्तु न वयमर्थतः साधुतां ब्रूमः॥ किंत्वभियुक्तप्रयोगमात्रबलेन साधुत्वं न चानुष्ठानसाम्यं पुंपशौ विशेषसद्भावात्॥
वाक्यं आप्यायतामित्यादिभिर्मंत्रैस्तत्तदवयवस्याप्यायनकाले मेढ्रं त आप्यायतामिति मंत्रेण तदवयवस्याप्यायनश्रवणा
त्॥ तस्मादेकत्ववत् पुल्लिंगमपि विवक्षितं॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ स्विष्टकृत्संस्कृतौ क्षीणा उतापूर्वोपयोग्य
पि॥ प्रयोजनैक्यमेकस्मिन्युक्तं कर्मण्यतः क्षयः॥ मंत्रेण देवसंस्कारः प्रक्षेपाद्द्रव्यसंस्कृतिः॥ त्यागादपूर्वमुत्पन्नं प्रधाना
पूर्वगं च तत्॥ योयं स्विष्टकृद्यागः सोयमुपयुक्तहविःसंस्कार इत्यविवादं तत्र संस्कारस्य दृष्टप्रयोजनत्वेनावश्यंभावे
सति तावतैवोपक्षीणः स्विष्टकृद्यागो नापूर्वस्योपकरोति॥ न ह्येकस्मिन्कर्मणि प्रयोजनद्वयं युक्तमिति प्राप्ते ब्रूमः॥ क
र्मण एकत्वेप्यंशभेदात्प्रयोजनभेदो न विरुध्यते॥ मंत्रपाठो द्रव्यप्रक्षेपो देवतोद्देशेन त्यागश्चेति त्रयोंऽशाः॥ तत्र त्यागे
न परमापूर्वोपयुक्तमवांतरापूर्वमुत्पद्यते तस्मात्स्विष्टकृदुभयार्थः॥ एवमंत्यप्रयाजपशुपुरोडाशावप्युदाहार्यौ॥ ॥ श्रीः
अष्टमाधिकरणमारचयति॥ ॥ शेषत्वमुपरि ग्रंथे चिंतनीयमुतेतरत्॥ तस्याज्ञानान्न तस्यात्र प्रयुक्त्याख्यफलेर ६६
णात्॥ वक्ष्यमाणेष्वधिकरणेषु शेषत्वमेव चिंताविषयः॥ यथातीतेष्वधिकरणेषु क्रतुशेषोयं पुरुषशेषोयमिति चिं

133/1945

तं। तद्वत्॥ कुतः उपरितनग्रंथे तत्र तत्र पर्णादीनां शेषत्वविचारस्य भासमानत्वादिति चेत्। मैवं॥ शेषत्वस्य यत्प्रयुक्तिरू
पं फलं तद्द्वैव प्राधान्येन विचार्यते॥ शेषत्वं तु तदुपयोगित्वेन तद्विचारः प्रधानभूतः॥ ॥ नवमाधिकरणमारचयति॥ ॥
आमिक्षा वाजिनं चास्याद्दध्यानीतेः प्रयोजकं॥ उतामिक्षैव सामर्थ्यं द्वयोस्तुल्यं ततोग्रिमः॥ आमिक्षा पय एवात्र तच्छब्दान्मं
त्रतो रसात्॥ प्रयोजिकैका प्राधान्यादनुनिष्पादि वाजिनं॥ इदमाम्नायते॥ तप्ते पयसि दध्यानयति॥ सा वैश्वदेव्यामिक्षा
वाजिभ्यो वाजिनमिति॥ तत्र पयसि दधिप्रक्षेपादामिक्षा॥ द्रव्यं यथा निष्पद्यते॥ तथा वाजिनद्रव्यमपीति दध्यानयनस्य ज
नकत्वसामर्थ्यमुभयद्रव्यविषयं तुल्यमेव॥ तस्मादुभयमपि प्रयोजकमिति प्राप्ते ब्रूमः॥ न द्रव्यांतरमामिक्षा किंतु पय एवे
॥ तच्छब्दादिभिरवगम्यते॥ यस्मिन्पयसि दधिप्रक्षेपः सामिक्षेति तच्छब्देन पयः परामृश्यते॥ आमिक्षायागस्य पुरोनुवा
क्यायामेवमाम्नातं॥ यजुषां वृत्र्यं पय इति पयोरसश्च मधुर आमिक्षायामनुवर्तते॥ न तु वाजिने। ततः प्राधान्येन पयसो
घनीभावावस्थां नयितुं दध्यानीतमित्यामिक्षैव प्रयोजिका॥ अनुनिष्पाद्येव वाजिनं न तु प्रयोजकं॥ ॥ दशमाधिकर
णमारचयति॥ ॥ सोमक्रयण्यानयने पदकर्म प्रयोजकं॥ न वा द्योक्षांजनस्यापि क्रयवत्संनिकर्षतः॥ तृतीयया क्रयार्थ
गोस्तद्द्वारा नयनस्य च॥ तादर्थ्यान्न प्रयुक्तं तन्न प्रयोजकता पदे॥ ज्योतिष्टोमे सोमक्रय आम्नायते॥ एकहायन्या क्रीणा
तीति सेयमेकहायनी गौर्यदा सोमं क्रेतुमानीयते॥ तदाध्वर्युस्तस्याः पृष्ठतोनुगच्छतीति तदप्याम्नातं॥ षट्पदान्यनुनि
मतीति ततः सप्तमे पदे हिरण्यं निधाय हुत्वा तत्पदगतं रजो गृह्णीयात्॥ एतदपि श्रूयते॥ सप्तमं पदमध्वर्युरंजलिना गृ
ह्णातीति तदेतद्रजः संगृह्य हविर्धानयोः शकटयो रक्षे तेन रजसा युक्तमंजनं प्रक्षिपेत्॥ एतदपि श्रुतं॥ यज्ञं वा एतत्सं
भरंति यत्सोमक्रयण्यै पदमिति प्रस्तुत्य यर्हि हविर्धाने प्राची प्रवर्तयेयुस्तर्हि तेनाक्षमुपांज्यादिति॥ तत्र यथा क्रयः
संनिकृष्टः तथैव पदकर्माप्यक्षांजनं संनिकृष्टं॥ अथोच्येत दध्यानयनमामिक्षया यथा संयुक्तं॥ न तथाक्षांजनं
सोमक्रयण्यानयनेन संयुक्तमिति तन्न क्रयेपि तदसंयोगस्य तुल्यत्वात्॥ अथासंयुक्तोप्रयोगवानयनेन निष्पद्ये
त तर्ह्यक्षांजनमपि तेन निष्पद्यत इति समानत्वात्क्रयवत्पदकर्मापि सोमक्रयण्यानयनस्य प्रयोजकमिति प्राप्ते ब्रूमः॥

एकहायन्या क्रीणातीतीत्थं तृतीयाश्रुत्या गोः क्रयार्थतामभ्यते॥ गोद्वारा तदानयनमपि क्रियार्थमेवेति क्रय एवानयने प्र
योजकः॥ न च पदार्थकर्मार्थत्वं गोर्वा तदानयनस्य वा कश्चिच्छ्रुतं॥ तस्मात्तदप्रयोजकं॥ ॥ एकादशाधिकरणमारचयति
॥ ॥ श्रपणं तुषवापश्च कपालस्य प्रयोजको॥ उत श्रपणमेवाद्यो वापार्थत्वात्तृतीयया॥ पुरोडाशं कपालेति नाम्नास्याश्रपण
र्थता॥ प्रयुक्तिश्च प्रयुक्तिर्नोतस्य वापे प्रसंजनं॥ कपालेषु श्रपयतीति श्रपणं पुरोडाशस्य श्रुतं॥ तथा पुरोडाशं कपाले न तु
षानुपवपतीति कपालेतुषधारणं श्रुतं॥ येते तुषाः कपाला रक्षसां भागोसीति मंत्रेण नैर्ऋत्यां दिश्यवरुह्यापनीयाः॥ तत्र
श्रपणं यथा कपालसंपादनस्य प्रयोजकं तथा तुषवापोपि प्रयोजकः॥ एकहायन्येतित्वं तृतीययाथ क्रयार्थत्वं तथा कपाले
नेतित्वं तृतीयया कपालस्य तुषवापार्थत्वावगमादिति चेत्। मैवं॥ नात्र कपालमात्रस्य तुषोपवापसाधनत्वं श्रुतं॥ किं तर्हि यत्क
पालं पुरोडाशश्रपणायोपात्तमासादितं च तस्य साधनत्वं॥ एतच्च पुरोडाशकपाले नेति सविशेषणनाम्ना तद्विधानादवगम्यते
॥ तथा सति प्रथमं श्रपणेन कपालं प्रयुज्यते॥ न च प्रयुक्तस्य पुनस्तुषावापेन प्रयुक्तिः संभवति॥ तस्माच्छ्रपणेनैव प्रयुक्तं क
पालं तुषोपवापेपि प्रसंगात्सिद्ध्यतीदृशमेवांगत्वं तृतीयाश्रुत्या बोध्यते॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ हृदादिः श
रुदादिश्च पश्वालंभप्रयोजकः॥ हृदादिरेव वाद्योस्य प्रकृतत्वेन साम्यतः॥ हविषा यागशेषत्वात् हृदादेर्हविरात्मनः प्रयोजक
त्वं तस्यैव नेतरस्यात्तथात्वतः॥ अग्नीषोमीयपशौ श्रुतं हृदयस्याग्रेवद्यत्यथ जिह्वाया अथ वक्षस इति तथा दपि श्रुतं॥
शरुत्सं प्रविद्ध्या लोहितं निरस्यतीति। तत्र हृदयादीनां शरुदादीनां च प्रकरणपाठसाम्यात्पशुसाध्यत्वसाम्याच्च हृदयादि
वच्छरुदादिकमपि पश्वालंभस्य प्रयोजकमिति चेन्नैवं॥ पशुयागो हि हविःसाध्यः हविष्ट्वं चातुं योग्यत्वाद्धृदयादीनामेव न त्व
योग्ययोः शरुल्लोहितयोः॥ तस्माद्धृदयादिरेव प्रयोजकः शरुत्सं प्रवेल्लोहितनिरसनं चेत्येतदुभयं शेषप्रतिपत्तिमात्रं॥ ॥ श्रीः
त्रयोदशाधिकरणमारचयति॥ ॥ प्रयोजकः स्विष्टकृत्किं पुरोडाशोत्तरार्द्धयोः॥ यद्वाप्रयुक्तोपजीवास्यादाद्यः स्वस्य सिद्धये॥ ६७
उत्तरार्द्धेति शब्दस्य प्रकृताकांक्षणे सति॥ अग्न्याद्यर्थं पुरोडाशमुपजीव्यैष वर्ततां॥ दर्शपूर्णमासयोः श्रूयते॥ उत्तरार्द्धात्स्विष्टकृ
ते समवद्यतीति सोयं स्विष्टकृद्यागः कस्यचिन्नूतनस्य पुरोडाशस्य तदुत्तरार्धस्य प्रयोजकः तदुभयाभावे स्वसिद्ध्यभावा
दिति चेन्मैवं॥ उत्तरस्यार्द्धादित्यादीनां श्वेशब्दे सर्वनामत्वाङ्गाङ्गवाचित्वाच्च प्रकृतं कंचिदंगिनमाकांक्षतः अग्न्यादिदेवतार्थः

135
194

पुरोडाशः प्रकृतो भागवांश्च तस्मात्तमेवोपजीव्य स्विष्टकृद्यागः प्रवर्त्तते न त्वन्यस्य प्रयोजकः॥ ॥ चतुर्दशाधिकरणमार
चयति॥ ॥ अभिघार्यं प्रयाजानां शेषेण हविरत्र किं॥ शेषधारणतत्पात्रे कार्ये नो वाभिघारणं॥ नान्यथा तेन ते कार्ये नाका
र्यप्रतिपत्तितः॥ प्राजापत्यवपायाश्च न कोप्यर्थोभिघारणात्॥ प्रकृतौ श्रुतं॥ प्रयाजशेषेण हवींष्यभिघारयतीति॥ तदेतद्वि
कृतावतिदिष्टं विकृतयश्च वाजपेयगताः पशवः इतरे तु ते च द्विविधाः ऋतुपशवः प्राजापत्याः पशवश्चेति आग्नेयं पशुमाल
भत इत्यादिना विहिताः ऋतुपशवः इतरे तु सप्तदश प्राजापत्यान्पशूनालभत इति विहिताः एते चोभयविधाः पशवः प्रातःस
वने सहैवोपक्रम्यंते॥ ततः सर्वेषामर्थे सकृदेव प्रयाजा अनुष्ठीयंते॥ तत्र ऋतुपशूनां प्रातःसवन एवालब्धव्यत्वात्तदीयहवि
षां प्रयाजशेषेणाभिघारणं निर्विघ्नमेव सिद्ध्यति॥ प्राजापत्यपशूनां तु पर्यग्निकरणपर्यंतमेव तदानीमनुष्ठानं॥ आलंभ
स्तु माध्यंदिने सवने तत्कालविशेषस्य ब्रह्मसाम्न्यालभत इति विधानात्॥ तेषां च प्राजापत्यादीनां हविषामभिघारणार्थं प्रा
तःकालीनः प्रयाजशेषो धारयितव्यः॥ न चात्र जुह्वा तद्धारणं संभवति ऋतुपश्वनुष्ठाने जुह्वा व्यापृतत्वात्॥ अतः पात्रांतरं
संपाद्य तस्मिन्नयं शेषो धारयितव्यः॥ अन्यथा तेउभे न कर्तव्ये प्राजापत्यहविषां प्रयाजशेषेणाभिघारणासिद्धेः॥ तस्मात्छेषधार
णतत्पात्रे संपादनीये इति प्राप्ते ब्रूमः॥ ते उभे न कर्तव्ये कुतः॥ अभिघारणं शेषस्य शेषप्रतिपत्तिरूपत्वेन हविःसंस्कारकत्वाभा
वात्॥ न हि दृष्टे प्रतिपादने सत्यदृष्टार्थः संस्कारो युक्तः दृष्टं च जुह्वा रिक्तीकरणं अन्यथा प्रयाजशेषोपेतायां जुह्वामाज्य
भागार्थं तया गृह्यमाणं संकीर्येत ततो रिक्तीकरणरूपप्रतिपत्त्यर्थमेव प्रकृतौ शेषेणाभिघारणं॥ अस्तु वा तत्र हविःसंस्कारो
पि॥ तथा प्राजापत्यवपाया अभिघारणं व्यर्थं रूक्षत्वनिवारणाय ह्यभिघार्यते॥ न च प्राजापत्यवपाया रूक्षतास्ति॥ ब्रह्मसाम्नै
व तद्रूक्षतायाः निवारितत्वात्॥ अत एव श्रूयते॥ शम्यावा एता र्हि वपा यद्धानभिघृता ब्रह्म वै ब्रह्मसाम यद्ब्रह्मसाम्न्यालभते
भते नाशम्या स्तेनाभिघृता इति शम्या रूक्षा इत्यर्थः॥ तस्माच्छेषधारणा तत्पात्रे न कर्तव्ये॥ ॥ पंचदशाधिकरणमा
रचयति॥ ॥ चतुर्थस्य प्रयाजस्य होमायोपभृतं घृतं॥ जुह्वामानयतीत्योपभृतं नैषा प्रयोजयेत्॥ प्रयाजयेद्धुतानी
तिः प्रयाजाद्यखिलार्थता॥ श्रुतोपभृत आज्येनोजोहवनविकल्पनात्॥ न प्रजकतामेयंत्रितयार्थं तु जोहवं॥ अतिहाय

इड इत्युक्तेश्चतुर्थे सा प्रयोजयेत॥ दर्शपूर्णमासयोः श्रूयते॥ अतिहाय्येडो बर्हिः समानयते॥ जुह्वामौपभृतमिति॥ अस्या
यमर्थः॥ पंचानां प्रयाजानां मध्ये तृतीयः प्रयाज इड् शब्देन बहुवचनांतेनाभिधीयते॥ तं तृतीयं प्रयाजमतिक्रम्य
बर्हिर्नामकं चतुर्थं प्रयाजं होतुं उपभृत्संज्ञकायां स्रुचि स्थितं घृतं जुह्वामानेतव्यमिति॥ तदेतदानयनमुपभृत्याज्य
ग्रहणस्य न प्रयोजकं॥ तथा हि जुहूपभृत् ध्रुवासु तिसृषु स्रुक्ष्वाज्यग्रहणप्रकारस्तद्विनियोगश्चैवमाम्नायते॥ च
तुर्जुह्वां गृह्णाति॥ अष्टावुपभृति चतुर्ध्रुवायां यज्जुह्वां गृह्णाति॥ प्रयाजेभ्यस्तद्यदुपभृति प्रयाजानूयाजेभ्यस्तेसं
र्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति॥ तत्र जौहवं केवलप्रयाजार्थं औपभृतं तु प्रयाजानूयाजार्थमिति प्र
याजेषु जौहवमौपभृतं च उभयं विकल्प्यते॥ तथा सति यदा जौहवेन प्रयाजा इज्यंते तदानीमौपभृतस्यानयनमेव नास्ति
॥ कुतः आनयनस्य प्रयोजकत्व। यदा त्वौपभृतेन प्रयाजहोमः तदानीमौपभृतस्यार्द्धं पंच प्रयाजार्थं इतरदनुयाजार्थं
तयोः प्रयाजसाधनमर्द्धं प्रथमप्रयाजकाल एव जुह्वामानीतमिति न तस्य चतुर्थं प्रयाजं प्रति समानयनं विधीयते।
यत्त्वनूयाजार्थमितरदर्धमुपभृत्यवशिष्टं तन्मध्ये किंचिच्चतुर्थप्रयाजं प्रति समानेतव्यं यत्त्वनूयाजैरेव प्रयुक्तमिति
न तस्यानयनं प्रयोजकमिति प्राप्ते ब्रूमः॥ यज्जौहवं तत्प्रयाजार्थं त्रितयार्थं तत्त्वौपभृतं तद्यवशिष्टं प्रयाजवद्द्व्यार्थमनुयाजा
र्थं चेत्येवं वाक्यद्वयस्य व्यवस्थायां संभवंत्यामष्टदोषग्रस्तो विकल्पो नाश्रयितुं शक्यः॥ यदा जौहविः स्वीकारः तदानी
मौपभृतवाक्यस्य प्राप्तप्रामाण्यं परित्यज्येत॥ अप्राप्तमप्रामाण्यं स्वीक्रियेत॥ पुनरपि कदाचिदौपभृतस्वीकारे त्यक्तं
प्रामाण्यं स्वीक्रियेत॥ स्वीकृतमप्रामाण्यं त्यज्येतेत्यौपभृतवाक्ये चत्वारो दोषाः जौहववाक्येऽप्येवं चत्वार इत्यष्टौ दोषाः
॥ यथा तु व्यवस्था चातिहाय्येड इति वाक्यादध्यवसीयते॥ तथा सत्यौपभृतस्यानुयाजा यथा प्रयोजकाः॥ तथैव चतुर्थ
पंचमप्रयाजनिष्पादकमानयनमपि प्रयोजकमेव॥ ॥ षोडशाधिकरणमारचयति॥ ॥ जुहूपभृद्ध्रुवास्वाज्यं स
र्वार्थं वा व्यवस्थितिः॥ सर्वार्थमविशेषात्स्यात्प्रयाजार्थं हि जौहवं॥ प्रयाजानूयाजहेतुः स्यादौपभृतमाज्यकं ध्रौवम
न्यार्थमित्येषा व्यवचनैर्मता॥ चतुर्जुह्वां गृह्णातीत्यादिषु ग्रहवाक्येष्वेतदर्थमिति विशेषनियामकस्याश्रवणात्
त्रयगतमाज्यं सर्वार्थमिति चेन्नैवं॥ यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदित्यादिभिर्वाक्यैर्व्यवस्थावगमात॥ ॥ सप्त

137
1945

दशाधिकरणमारचयति॥ ॥ अष्टावुपभृतीत्यत्र किमष्टैकग्रहे विधिः॥ चतुर्द्वयग्रहे वाद्यः स्यादष्टश्रुतिमुख्यतः॥
चतुर्गृहीतं होमांगं फलवत्वान्न बाध्यते॥ चतुर्द्वित्वं लक्ष्यते तेन सहानीत्यर्थमष्टता ग्रहणवाक्ये चतुर्जुह्वां गृह्णातीत्य
त्र यथा चतुः संख्याविशिष्टमेकं हविर्ग्रहणं विवक्षितं॥ तथैवाष्टावुपभृतीत्यत्राप्यष्टसंख्याविशिष्टमेकं हविर्ग्रहणं वि
धातव्यं॥ तथा सत्यष्टश्रुतेर्मुख्यत्वभावात॥ अष्टसंख्यावयवभूतयोर्द्वयोः श्चतुःसंख्ययोर्विधाने सत्यष्टशब्दस्याव
वलक्षणा प्रसज्येतेति प्राप्ते ब्रूमः॥ प्रसज्यतां नाम लक्षणा॥ मुख्यार्थस्वीकारे होमवाक्यविरोधापत्तेः चतुर्गृहीतं जुहोति
त्यनारभ्यश्रुतं वाक्यं होममंत्रोद्देशेन चतुर्गृहीतं विदधाति॥ यद्यप्येतत्सर्वहोमविषयतया सामान्यरूपं औपभृतं तु प्रया
जानूयाजविषयतया विशेषरूपं तथापि होमस्य फलत्वेन प्राधान्यात॥ अष्टग्रहणस्य होमार्थत्वेनोपसर्जनत्वात्प्रधानानुसा
रेण चतुर्गृहीतमेव युक्तं॥ तदुपसर्जनानुसारेणाष्टगृहीतं॥ तस्मादुपभृति चतुर्गृहीतद्वयं विधीयते॥ तत्रैकं चतुर्गृहीतं
हविश्चतुर्थपंचमप्रयाजार्थं अपरं तु अनूयाजार्थं नन्वेवं तर्हि चतुर्गृहीतस्यैव हविर्द्वयाच्चतुरुपभृतीत्येव विधातव्यं न त्वष्टा
वुपभृतीति विधिर्युक्त इति चेत्नैवं॥ तथा सत्यनुयाजार्थं द्वितीयं चतुर्गृहीतं न सिद्ध्येत॥ अथ तदपि वाक्यांतरेण विधी
यते तदानीमुपभृतः प्रथमेन चतुर्गृहीतेन वरुद्धत्वाद्द्वितीयस्मै पात्रांतरमन्विष्येत यद्यपभृतीत्येव द्वितीयमपि चतुर्गृही
तं विधीयते तदा चतुर्गृहीतद्वयस्य पृथगेवानुष्ठानादुपभृत्येक प्रयत्नेनानयनं न सिद्ध्येत॥ अत उभयस्य सहोपभृत्या
नयनार्थमष्टावुपभृतीत्युच्यते॥ तस्मात्साहित्यार्थमष्टशब्दप्रयोगेपि हविर्द्वसिद्धद्वे चतुर्गृहीते अत्र विधीयते॥ ॥
इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे चतुर्थाध्यायस्य प्रथमः पादः॥ ॥ द्वितीयपादे प्रथमाधिकरणमारच
यति॥ ॥ स्वरुं कुरुत इत्यत्र स्वरुर्यूपात॥ पृथक्छिदां प्रयोजयेन वाद्योस्त्वविशिष्टस्य विधानतः॥ आद्यस्य यूपखं
डस्य स्वरूपत्वात्त्वविशेषणे॥ विहिते लाघवं तस्मादनुष्पन्न एव सः॥ अग्नीषोमीयपशौ श्रूयते॥ यूपस्य स्वरुं करोतीति
तत्र यूपाय यच्छेदनस्य प्रयोजकः॥ तथा स्वरुं रपि छेदनं प्रयोजयति॥ कुतः करोतीत्यनेनाविशिष्टविधिप्रतीतेः॥ करोति

धातोर्हि भावना मुख्यार्थः॥ तत्र यूपशब्दोपलक्षितः॥ स्वादिराद्दिर्वृक्षः करणं छेदनादिरितिकर्तव्यता छिन्नेन वृक्षेण स्व
रुत्पादनीय इति विशिष्टविधिः उत्पन्नस्य स्वरोर्विनियोग एवमाम्नातः स्वरुणा पशुमनक्तीति तस्मात्स्वरुः छेदनस्य प्र
योजक इति प्राप्ते ब्रूमः॥ छिद्यमानस्य यूपस्य प्रथमः पतितः शकलः स स्वरुरिति स्वरुत्वनाममात्रविधौ लाघवाद्यूपवत्
स्वरुर्न छेदनस्य प्रयोजकः॥ किंतु यूपप्रयुक्ते छेदने स्वयमनुनिष्पद्यते॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ प्राची
माहरतीत्यत्र दिक् शाखा वस्तु दिक्श्रुतिः॥ आहार्यत्वं दिशो नास्ति शाखा तेनोपलक्ष्यते॥ दर्शपूर्णमासयोर्यत्पलाश
शाखया वत्सानपाकरोतीति पलाशशाखा प्रकृत्य श्रूयते॥ स प्राचीमाहरेद्देवलोकमभिजयेदिति॥ तत्र प्राचीशब्दस्य
दिग्वाचित्वाद्दिश आहरणं विधीयत इति चेन्मैवं॥ अशक्यत्वात्॥ अतो वृक्षस्य प्राची शाखात्रोपलक्ष्यते॥ तथा सति प्रश
स्तानुग्रहो भवति॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ शाखां छित्वोपवेषं च मूले कुर्वीत शाखया॥ नुदेद्वत्सान्कपाला
निरूढापयेदुपवेषतः॥ द्वयं प्रयोजकं छित्तेर्वत्सापाकृतिरेव वा॥ आद्योग्रमूलयोरत्र विभज्य विनियोगतः॥ उपवेषं करो
तीति येयं पलाशशाखा॥ साकांक्षोन्यार्थमूलतः पूर्यते तेनानुनिष्पादी स तस्मादुच्यते ति सः॥ दर्शपूर्णमासयोः श्रूयते॥
मूलतः शाखां परिवास्योपवेषं करोतीति॥ येयं पलाशशाखा यां छित्वा वृक्षादाहृता॥ तां पुनः छित्वा मूलभागः प्राद
शपरिमित उपवेषः कार्यः॥ तयोरग्रमूलयोः शाखाभागयोः पृथग्विनियोग आम्नातः शाखया वत्सानपाकरोति॥
उपवेषेण कपालान्युपदधातीति॥ तदिदं कार्यद्वयं वृक्षछेदनसमाहृतया शाखया निष्पद्यते॥ तस्मादुभयमपि छे
दनाहरणादेः प्रयोजकमिति प्राप्ते ब्रूमः॥ चेन्मैवं॥ उपवेषं करोति इत्युक्ते केन द्रव्येणेत्याकांक्षायां मूलेनेति वक्तव्यं॥ पु
नरपि कस्य मूलमित्याकांक्षायां वत्सापाकरणार्थं छिन्नायाः पलाशशाखाया मूलमित्याकांक्षा पूरणीया॥ तस्माच्छेद
ने वत्सापाकरणमेव प्रयोजकं॥ उपवेषस्त्वनुनिष्पादी॥ नन्वाद्यछेदने तथास्तु द्वितीयछेदनस्योपवेषः प्रयोजकः परि
वासमसंपन्ने न मूलेनोपवेषकर्तव्यताविधानात्॥ अन्यथा परिवास्योपवेषं करोतीति समानकर्तृकत्वपूर्वकालत्वा

139
1945

चिनोल्यप्रत्ययस्यानुपपत्तेरिति चेन्मैवं॥ परिवारणस्योपवेषस्य संबंधो वाक्येन प्रतीयते॥ शाखासंबंधस्तु शाखामिति
द्वितीयाश्रुत्या पूर्वछिन्नाया अपि शाखायाः पुनर्मूलोपादानकछेदोपेक्षितः॥ अन्यथा समूलां शाखामाहरेत्तेनाद्यस्य
वत्सापाकरणं दुःशकं स्यात्॥ अत एव मूलत इत्यपादाने पंचमी श्रूयते॥ तथा सति प्रथमछेदनापादानभूतो वृक्षो
संस्कृतत्वाद्यथा द्वितीयछेदनापादानभूतमूलमपि लौकिककाष्ठमवश्यमंगारेषु कपालोपधाने कस्यचित्काष्ठस्या
× लौकिकस्तथा × पादानमर्थात्प्राप्तं॥ तदेवात्रोपवेषं करोतीत्यनूद्यते॥ शाखां परिवास्य परित्यक्ते मूले संनिहिते
सति कपालोपधानार्थं काष्ठांतरान्वेषणप्रयासो न कर्तव्य इति वाक्यार्थः॥ एवं सति दोहनरहितायां पौर्णमास्यां वत्सा
पाकरणार्थायाः शाखाया अभावादुपवेषार्थं शाखाछेदो न कर्तव्यः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ प्रस्तरं
शाखया साकं प्रहरेत्प्रहृतिस्त्वियं॥ शाखाया अर्थकर्मत्वं प्रतिपत्तिरुतोचिता॥ प्रहृतिः प्रस्तरस्यागः शाखायाः साह
चर्यतः॥ तथात्वादर्थकर्मत्वे हृतिः शाखां प्रयोजयेत्॥ हरतिर्यागवाची नो प्रतिपत्तिस्ततो भवेत्॥ पौर्णमास्यां ततो
नैव हृतिः शाखां प्रयोजयेत्॥ दर्शपूर्णमासयोः श्रूयते॥ सह शाखया प्रस्तरं प्रहरतीति॥ तत्र शाखाप्रहरणमर्थ
कर्मकुतः प्रहृतिशब्देन यागस्याभिधानात्॥ एतच्च सूक्तवाकेन प्रस्तरं प्रहरतीत्येतद्वाक्यमुदाहृत्य विचारितं॥ प्र
स्तरणस्य प्रहरो याग एवेति तत्साहचर्याच्छाखाप्रहरणमपि याग एवेत्यर्थकर्म स्यात्॥ अर्थाय क्रतुसाकल्यप्रयोजनाय
क्रियमाणमर्थकर्म ततः प्रहरणेन पौर्णमास्यामपि पलाशशाखा प्रयुज्यत इति प्राप्ते ब्रूमः॥ सूक्तवाकेन प्रस्तरं प्र
हरतीत्यत्र हरतिधातोर्यागवाचित्वं न्योक्तं॥ किंतु मांत्रवर्णिकदेवतामुपलभ्य द्रव्यदेवताभ्यां यागः कल्पितः॥ शा
खाप्रहरणे तु नास्ति देवता॥ ततो यागस्य कल्पयितुमशक्यत्वाद्धरतिधातुरत्र स्ववाच्यार्थं परित्यागमेवाचष्टे॥ त
था सति वत्सापाकरण उपयुक्तायाः पलाशशाखायाः उपयोगांतराभावाद्यागदेशोयकाशलाभाय यत्र क्वाप्यव
श्यं परित्यागे प्राप्ते शास्त्रेणाहवनीय एव त्यागो नियम्यते॥ तेन च शास्त्रीयत्यागेन शाखायाः प्रतिपत्तिर्भवति॥ प्र
तिपत्तिर्नाम संस्कारस्वरूपो दृष्टोर्थः राज्ञा चर्वितस्य तांबूलस्य सौवर्णपतद्ग्रहे प्रक्षेपस्तद्वत्॥ ततः प्रहरणं प्रतिपत्तिकर्म

तथा तदभावेपि क्रतुवैकल्याभावात् पौर्णमास्यां स्वसिद्धिहेतुभूतां शाखां न प्रयोजयति॥ ॥ पंचमाधिकरणमारच
यति॥ ॥ प्रणीताभिस्तु संयौति वेद्यां निनयतीति किं॥ अपां द्वे प्रापके कैवाहविः संयवनं तथा॥ अपः प्रणयतीत्युक्तेः
सामत्वादुभयार्थता॥ श्रुत्या संयवनार्थस्तान्निनीतेः प्रतिपत्तिता॥ दर्शपूर्णमासयोः श्रूयते॥ अपः प्रयणीतीति चम
सेन पात्रेण प्रणीतानां तासामपां प्रयोजनद्वयं श्रूयते॥ प्रणीताभिर्हवींषि संयौतीति अंतर्वेदि प्रणीता निनयतीति च॥
हवींषि पुरोडाशार्थानि पिष्टानि॥ तत्र हविः संयवनं वेद्यां निनयनं चेत्येतदुभयमपां प्रणयनस्य प्रयोजकं॥ कुतः॥ अपः
प्रणयतीत्यस्य प्रणयनोपत्तिवाक्यस्योभयत्र समानत्वात्॥ न ह्यस्मिन्वाक्ये संयवनस्य कश्चिद्विशेषसंबंधः प्रतीय
तइति चेन्मैवं॥ विनियोगवाक्ये प्रणीताभिरिति तृतीयाश्रुत्या संयवनसाधनत्वावगमात् संयवनमेव प्रयोजकं॥
निनयनवाक्ये तु प्रणीताइत्यनया द्वितीयया संस्कार्यत्वावगमान्निनयनं प्रतिपत्तिरूपः संस्कारइति न प्रणयनस्य
प्रयोजकं॥ ॥षष्ठाधिकरणमारचयति॥ ॥ मैत्रावरुणके दंडदानस्य प्रतिपत्तिता॥ उतार्थकर्मता द्योस्त धारणे
कृतकृत्यतः॥ युक्तोपयुक्तसंस्कारादुपयोक्ष्यत्व संस्क्रिया॥ स्थित्वा प्रैषानुवचने दंडापेक्ष्यार्थकर्मता॥ ज्योतिष्टोमे
श्रूयते॥ क्रीते सोमे मैत्रावरुणाय दंडं प्रयच्छतीति॥ तदेतद्दंडदानं प्रतिपत्तिकर्म॥ कुतः दंडस्य यजमानधारणेन कृत
कृत्यत्वात्॥ यजमानो ह्यध्वर्युणा दीक्षासिध्यर्थं दत्तं दंडं आसोमाक्रयाद्धारयति॥ अतएवाम्नातं॥ दंडेन दीक्षयतीति
यद्दीक्षितं दंडं प्रयच्छतीति च॥ तस्मादुपयुक्तस्य दंडस्य दानं प्रतिपत्तिरिति चेन्मैवं॥ दंडे भविष्यदुपयोगस्यापि सं
द्भावात्॥ यदा मैत्रावरुणः स्थित्वा प्रैषाननुवदति तदानीमवलंबनाय दंडोपेक्षितः॥ अतएवाम्नातं॥ दंडी प्रैषा
नन्वाहेति॥ तथा सति प्रतिपत्तिकर्मत्वपादुपयुक्तसंस्कारादर्थकर्मरूप उपयोक्ष्यमाणसंस्कारः प्रशस्तः॥ उप
योजयितुमेव हि सर्वत्र संस्कारस्य प्रवृत्तिः उपयुक्ते तु प्रतिपत्तिरूपस्य संस्कारस्याक्षरमात्रपर्यवसायित्वेन का
र्यपर्यवसानाभावादप्रशस्तत्वं॥ तस्मान्मैत्रावरुणसंस्कारायद्दंडदानमनर्थकर्म॥ तथा सति रूढपशावसत्यपि
दीक्षिते दंडसंपादनस्य तद्दानं प्रयोजकं॥ ॥सप्तमाधिकरणमारचयति॥ ॥ चात्वाले कृष्णशृंगस्य प्रासोयः

141
1945

सोर्थकर्म वा॥ प्रतिपत्तिः सार्थकत्वादाद्योत्योस्तु प्रयोगतः॥ ज्योतिष्टोमे श्रूयते॥ नीतासु दक्षिणासु चात्वाले कृष्णविषाणां
प्रास्यतीति॥ यजमानेन दत्तादक्षिणा ऋत्विग्भिर्यदा नीतास्तदा यजमानस्वहस्ते धृतं कृष्णमृगस्य शृंगं चात्वालनामके गर्ते
परित्यजेत॥ सोयं परित्यागोर्थकर्म कुतः सप्रयोजनत्वात्॥ प्रतिपत्तितया अपूर्वाभावेन निरर्थकं स्यात्॥ अतो पूर्वलाभाया
र्थकर्मत्वमिति चेन्मैवं॥ कृष्णविषाणया कंडूयत इति तृतीयाश्रुत्या यजमानशिरःकंडूतावुपयुक्तस्य विषाणस्य प्रतिपत्त्य
पेक्षत्वात्॥ न च प्रतिपत्तावत्यंतमपूर्वाभावः चात्वाल एव प्रासनमित्येवंविधस्य नियमस्य वैधत्वेन प्रासनक्रियाप्रयुक्ता
पूर्वाभावेपि नियमापूर्वसद्भावात्तस्मात्प्रासनं प्रतिपत्तिकर्म॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ पात्रस्यावभृथे सोमलि
प्तस्य नयनं किं॥ साधनं प्रतिपत्तिर्वा यंतितेनेत्यतः श्रुतेः॥ तो प्रासाधनता मैवं पुरोडाशाहविष्ठूतः॥ पात्रस्य तत्संबंधात्प्रसे
पः प्रतिपत्तये॥ ज्योतिष्टोमे श्रूयते॥ चतुर्गृहीतं वा एतदभूद्यज्ञस्य यदृजीषं यद्ग्रावाणो यदौदुंबरी यदधीषवणफलके तस्माद्य
त्किंचित्सोमलिप्तं द्रव्यं तेनावभृथं यंतीति निष्पीडितस्य सोमस्य नीरसो भाग ऋजीषं तदेतदृजीषग्रावादिकं सोमाभिष
वादौ सोमेन लिप्यते॥ तस्मात्सोमलिप्तस्य सर्वस्य द्रव्यस्यावभृथसाधनत्वमभ्युपेयं॥ कुतः॥ तेनावभृथं यंतीति तृतीया
श्रुत्यावभृथसाधनत्वावगमात्॥ तस्मात्सोमलिप्तं द्रव्यमवभृथे हविष्टूनयेन्नीतइति चेन्मैवं॥ वारुणेनैककपालेनावभृथ
मवयंतीत्यनेनोत्पत्तिवाक्यशिष्ट पुरोडाशहविषावरुद्धेवभृथे सोमलिप्तस्य पात्रस्य हविष्टून संबंधासंभवात्॥ तथा सत्यव
भृथशब्देन तदीयं देशं लक्षयित्वा तस्मिन्देशे सोमलिप्तपात्रस्य नयनं मंत्रविधीयते॥ तच्च नयनं प्रतिपत्तये भवति पात्र
स्य पूर्वमुपयुक्तत्वात्॥ तस्मादेतत्प्रतिकर्म॥ ॥नवमाधिकरणमारचयति॥ ॥ सोमेयजेतदेशादेरनुवादोथवा वि
धिः॥ प्रयोगानुपपत्त्यैव प्राप्तत्वादनुवादतः॥ सोमेवाविषमेवेत्ति पाक्षिकत्वनिवृत्तये॥ अप्राप्तांशानुपातेन नियमो
त्र विधीयते॥ इदमाम्नायते॥ दर्शपूर्णमासाभ्यां यजेत प्राचीनप्रवणे वैश्वदेवेन यजेत॥ पौर्णमास्यां पौर्णमास्या यजेत॥
अमावास्यायाममावास्यया यजेत॥ पशुबंधस्य यज्ञक्रतोः षड्ऋत्विजः दर्शपूर्णमासयोर्यज्ञक्रतोश्चत्वार ऋत्विजः॥
चातुर्मास्यानां यज्ञक्रतूनां पंचर्त्विजः॥ अग्निहोत्रस्य यज्ञक्रतोरेक ऋत्विक्॥ सौम्यध्वरस्य यज्ञक्रतोः सप्तदशर्त्विजः॥
सोमेन यजेतेति॥ क्रतुशब्दो मानसउपासनेपि वर्तते॥ स क्रतुं कुर्वीत मनोमयः प्राणशरीरइत्यत्र क्रतुशब्देन ध्यानविधाना

त॥ तद्व्याप्तत्वेयज्ञक्तोरितिविशिष्यते॥ तत्रदेशकालकर्तृद्रव्याणि नविधीयंते॥ किंत्वनूद्यंते॥ कुतः प्राप्तत्वात॥ नहिदे
शादिभिर्विना प्रयोगः संभवति॥ अतोर्थापत्त्यातत्प्राप्तिरितिचेन्मैवं॥ अर्थापत्त्या पाक्षिकीसमदेशादप्राप्तिः॥ विषमदेशा
दीनामपिसंभवात॥ ततोयस्मिन्पक्षेप्राप्तिर्नास्तितस्मिन्पक्षेसमदेशादयोविधीयंते॥ ॥दशमाधिकरणमारचयति॥ ॥
श्वेतालंभेनुवादोवाश्वैत्यस्यविधिरग्रिमः॥ द्रव्यद्वारेणतत्प्राप्तेः पूर्ववत्तन्नियम्यते॥ इदमाम्नायते॥ वायव्यंश्वेतमालभेत
भूतिकामइति॥ तत्रश्वैत्यगुणस्यद्रव्यनिरपेक्षस्यक्रियान्वयाभावात॥ द्रव्यसहितस्यतदन्वयद्रव्यविधिनैवावर्जनीय
त्वात्तत्प्राप्तेरनुवादः श्वेतस्येतिचेन्मैवं॥ पूर्वन्यायेनपाक्षिकत्वनिरत्तयेनियमविधित्वांगीकारात॥ ॥एकादशाधि
करणमारचयति॥ ॥अवघातेविनियमोदेशादाविवतेनसः॥ प्रधानेनप्रयुक्तः स्यात्संबंधः प्रक्रियोक्तितः॥ यथादे
शकालकर्तृद्रव्याणांपक्षप्राप्तोनियमोविहितः॥ एवमवघातोपितंदुलनिष्पत्त्यर्थंलोकतः प्राप्तोपिपाक्षिकनखविदल
नादिव्यावृत्तयेनियम्यते॥ सतिचावघातस्यविधौप्रधानेनाग्नेयादियागेनासौप्रयुज्यते॥ नचात्रसंबंधाभावादप्रयुक्ति
रितिवाच्यं॥ प्रधानयागप्रकरणपठितत्वेनसंबंधसिद्धेः॥ तस्मादवघातादयोविधीयंते॥ प्रधानेनप्रयुज्यंते॥ ॥द्वा
दशाधिकरणमारचयति॥ ॥अनिरूप्यानिरूप्यावायागहोमददातयः त्यागादाद्योयजिस्त्यागः प्रक्षेपोहोमइष्यते॥
आकांक्षायागशब्दस्यत्यागेनैवनिवर्तते॥ यागस्योपरिहोमस्यविधेः क्षेपावसानता॥ स्वीयंद्रव्यंपरित्यज्यपरकीयं
यथाभवेत॥ तथासंपादनंदानंत्यागेष्वेषाभियंभिदा॥ इदमाम्नायते॥ सोमेनयजेत अग्निहोत्रंजुहोतिहिरण्यमात्रेया
यददातीति॥ तत्रयागहोमदानशब्दानामर्थाननिरूपयितुंशक्यंते॥ त्रिष्वपिद्रव्यत्यागस्यसद्भावात॥ ततोविधेया

नामर्थानांप्रधानभूतानामनिर्णयादितरत्रविध्यनुवादविवेकः॥ पूर्वोक्तोव्यर्थइतिचेन्मैवं॥ देवतामुद्दिश्यद्रव्यत्यागो
यागः॥ त्यक्तस्यवह्नौप्रक्षेपोहोमः स्वकीयद्रव्यस्यस्वत्वनिवृत्तिपूर्वकंपरस्वत्वापादनंदानमितिस्फुटनिरूपणात्तेप
दार्थाः॥ दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेति॥ विहितस्ययागस्योपरिचतुरवत्तंजुहोतीति॥ होमस्यविधानात्या
गमात्रात्मकोयागः॥ प्रक्षेपाधिकोहोमइत्यवगम्यते॥ यत्रतुयजत्यादिपदंनश्रुतं॥ किंत्वाग्नेयोष्टाकपालइत्य
तावदेवश्रुतं॥ तत्राप्युद्देश्यायादेवतायास्तज्जनीयस्यचश्रुतत्वादुद्देश्ययागरूपोयागोर्थसिद्धः॥ तस्मात्प्रधान

143
1945

विधेयानांयागादीनांस्फुटनिरूपत्वाद्विधिविवेकोनव्यर्थः॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥यदातिथ्याबर्हिरेतदुप
सत्स्वतिदेशनंसाधारण्यविधिर्वाद्यस्तदीयस्योपसंहृतेः॥ बर्हिश्रुत्यैकताभानान्नातिदेशस्यलक्षणा॥ आतिथ्योपस
द्भ्यश्चबर्हिरेतत्प्रयुज्यते॥ ज्योतिष्टोमेश्रूयते॥ यदातिथ्यायाबर्हिस्तदुपसदांतमग्नीषोमीयस्यचेति॥ क्रीतंसोमंशकटेनस्था
प्यप्राचीनवंशंप्रत्यानयनेभिमुखोयायाभिष्टिर्निर्वपतिसेयमातिथ्या॥ ततऊर्ध्वंत्रिषुदिनेष्वनुष्ठीयमानाउपसदः॥ औ
पवसथ्येदिनेनुष्ठेयोग्नीषोमीयः॥ तत्रातिथ्येष्टौविहितंयद्बर्हिस्तद्यदितस्याद्दृष्टेराछिद्योपसत्सुविधीयेततदानीमा
तिथ्यायांविधानमनर्थकंस्यात॥ यदिचतत्रोपयुक्तमितरत्रविधीयेतविनियुक्तविनियोगरूपोविरोधः स्यात॥ तस्मादा
तिथ्याबर्हिषोयेधर्माः आश्ववालत्वादयस्तेधर्माः उपसत्सूपसंक्रियतंइत्येतिदेशपरंवाक्यमितिप्राप्तेब्रूमः॥ बर्हिःशब्द
स्यधर्मातिदेशत्वेलक्षणाप्रसज्येतश्रुत्यातुबर्हिष आतिथ्योपसदग्नीषोमीयेष्वेकत्वंप्रतिभाति॥ अतःसाधारण्यमत्र
विधेयं॥ आतिथ्यार्थंयत्बर्हिरुपादीयतेतन्नकेवलमातिथ्यार्थं॥ किंतूपसदर्थमग्नीषोमीयार्थंचोपादेयमितिवि
धिवाक्यस्यार्थः॥ तस्मादातिथ्योपसदाग्नीषोमीयास्त्रयोप्यस्यबर्हिषःप्रयोजकाः॥ ॥इतिश्रीमाधवीयेजैमिनि
न्यायमालाविस्तरेचतुर्थाध्यायस्यद्वितीयःपादः॥ ॥तृतीयपादेप्रथमाधिकरणमारचयति॥ ॥जुह्वाः पर्णमयीत्वे
नापापश्रुतिरंजनात॥ वैरिद्दग्वर्जनंवर्मप्रयाजैः पुरुषार्थकं॥ क्रत्वेवाग्निमोभानात्फलस्यनाहिसाध्यता॥ विभातिक्र
त्वेवतस्मादर्थवादः फलंभवेत॥ इदमाम्नायते॥ यस्यपर्णमयीजुहूर्भवति॥ नापापंश्लोकंशृणोतियदाङ्क्तेचक्षुरेव
भ्रातृव्यस्यवृंक्ते यत्प्रयाजानुयाजाइज्यंतेवर्मैवतद्यज्ञायक्रियते॥ वर्मयजमानायभ्रातृव्याभिभूत्याइति॥ तत्रयज्जुह्वाः
प्रकृतिभूतंपर्णद्रव्यंयद्वांजनेनचक्षुषः संस्कारः यच्चप्रयाजानुयाजरूपंकर्मतत्त्रितयंपुरुषार्थत्वेनविधीयते॥ कु
तः पापश्लोकश्रवणादिराहित्यादेः पुरुषसंबंधिफलस्यप्रतिभानादितिचेन्मैवं॥ फलंहिसाध्यंभवति॥ नचात्रसा
ध्यताप्रतिभासतेनशृणोतिवृंक्तेवर्मक्रियतइतिवर्तमानत्वनिर्देशात॥ अतः क्रत्वर्थाएतेविधेयाः॥ तत्रपर्णमयी
त्वस्यानारभ्याधीतस्यापिवाक्येनक्रतुसंबंधः संस्कारकर्मणोस्तुप्रकरणे नक्रत्वर्थानांतुक्रतुमिष्यादनव्यतिरे
केणफलाकांक्षायाअभावाद्वर्तमाननिर्देशस्यविपरिणामंकृत्वापिफलंकल्पयितुंनशक्यं॥ तस्मात्फलवच

श्चमहेतुः पापश्लोकश्रवणराहित्यादिरर्थवादः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥मृन्मयेप्रणयेत्कामीनित्येष्वितदुतेतर
त॥ आकांक्षासन्निधिश्चास्तिस्तस्मान्नित्येपिमृन्मयं॥ कामार्थत्वादयोग्यत्वंसामान्यविहितेनच॥ आकांक्षायानिवृत्तत्वाव
नित्यार्थमितिरद्भवेत्॥ अपः प्रणयतीति प्रकृत्यश्रूयते॥ मृन्मयेनप्रतिष्ठाकामस्यप्रणयेदिति॥ तत्रापांप्रणयनस्यनित्य
प्रयोगेपिमृन्मयपात्रमेवसाधनं॥ कुतःक्रियेपिपात्रस्याकांक्षितत्वात॥ नचलोकसिद्धंकिंचित्पात्रमुपादीयतइतिवाच्यं॥ श्रो
तेकर्मण्यत्यंतमश्रुतात्श्रुतस्यसन्निहितत्वादितिप्राप्तेब्रूमः॥ कामार्थमृन्मयमान्मातं॥ तच्चसतिकामेयोग्यं॥ नहिपाक्षिकंका
मंनिमित्तीकृत्यप्रवृत्तंनित्यस्ययोग्यंभवति॥ पात्राकांक्षातुसामान्यतोविहितेननिवर्तते॥ अपःप्रणयतीतीहिपात्रविशेषम
नुपलस्यविहितंतच्चान्यथानुपपन्नंतत्पात्रंकिंचित्सामान्येनकल्पयति॥ तस्मान्नित्यकर्मद्वाराद्वारानित्यप्रयोगेतत्काम्यंमृ
न्मयंनान्वेतिकिंत्वितरपात्रंयत्किंचित्सामान्येनकल्पयतिदुपादेयंचमसेनापः प्रणयेदितिनित्येपात्रंविधीयतइतिचेतत्
हिलत्वाचिंतास्त॥ ॥तृतीयाधिकरणमारचयति॥ ॥दध्नात्विंद्रियकामस्यनित्येन्यदुततद्धाति॥ अन्यस्यात्पूर्ववन्नैवं
संयोगस्यपृथक्कृतः॥ अग्निहोत्रेश्रूयते॥ दध्नेद्रियकामस्यजुहुयादिति॥ तत्रदध्नः काम्यत्वान्नित्येग्निहोत्रेपूर्वन्यायेनतद्
धिनप्रयोक्तव्यं॥ किंत्वन्यदेवकिंचिद्द्रव्यमितिचेन्नैवं॥ दध्नाजुहोतीत्यस्मिन्वाक्यांतरेकामसंयोगमनुपन्यस्यनित्यहोमसं
योगेनदधिविधानात॥ तस्मादेकस्यापिदध्नोवाक्यद्वयेननित्यत्वेकाम्यत्वंचाविरुद्धंएवमग्नीषोमीयपशौखादिरेदश्रा
तिरवादिरंवीर्यकामस्ययूपंकुर्वीतेत्युदाहरणीयं॥ ॥चतुर्थाधिकरणमारचयति॥ ॥पयोव्रतंब्राह्मणस्यपुंसेतत्क्रत
वेथवा॥ पुंयोगादग्निमोमैवंनैष्फल्यात्क्रतुशेषता॥ ज्योतिष्टोमेदीक्षितस्यात्रभोजनाभावेव्रतमाम्नायते॥ पयोव्रतंब्राह्मण
स्ययवागूराजन्यस्यामिक्षावैश्यस्येति॥ तत्रब्राह्मणादिपुरुषसंयोगादेतद्व्रतंपुरुषार्थमितिचेत्।मैवं॥ इंद्रियवीर्यादिव
त्फलस्यात्रानुक्तत्वात॥ क्रतुशेषत्वंतुप्रकरणादवगम्यते॥ ब्राह्मणादिपुरुषाद्रव्यविशेषव्यवस्थार्थेनिमित्तत्वेनोपन्य
स्यते॥ ॥पंचमाधिकरणमारचयति॥ ॥नैवास्तिविश्वजिद्यागेफलमस्त्युतनाश्रुतेः॥ भाव्यापेक्षाद्विधेः कल्प्यंफलं
पुंसः प्रवृत्तये॥ इदमाम्नायते॥ विश्वजितायजेतेति॥ तत्रफलस्याश्रुतत्वान्नास्तिविश्वजिद्यागेफलमितिचेन्नैवं॥ फल
स्यकल्पनीयत्वात॥ विश्वजिन्नाम्नायागेनकुर्यादित्युक्ताभावनाभाव्यमपेक्षतेकिंकुर्यादित्याकांक्षायाअनिवृत्तेः अतो
वाक्यपूरणायकिंचित्फलमवश्यमध्याहर्तव्यं॥ अध्याहृतेचतत्कामिनः पुरुषस्यात्रप्रवृत्त्यायागानुष्ठानंसिध्यति॥ अन्य

थानिरधिकारित्वादननुष्ठानेविधिर्निरर्थकस्यात्॥ तस्मात्फलंकल्पनीयं॥ ॥षष्ठाधिकरणमारचयति॥ ॥सर्वफलमुतैकं
स्यात्सर्वमस्त्वविशेषतः॥ एकेनतन्निराकांक्षमतोनेकंनकल्प्यते॥ तस्मिन्विश्वजितिपशुपुत्रवीर्येंद्रियादिकं॥ सर्वफलत्वेनकल्प
नीयं॥ कुतःएतदेवास्यफलमित्यत्रविशेषहेतोरभावादितिचेन्नैवं॥ लाघवस्यैवविशेषहेतुत्वात॥ ॥सप्तमाधिकरणमारचय
ति॥ ५ एकंयत्किंचिदथवानियतंननियामकं॥ तस्मादाद्यः सर्वपुंसामिष्टत्वात्स्वर्गएवतत्॥ विश्वजितिकल्प्यमानंयदेकंफलं
तदिदमेवेतिनियामकंनास्ति॥ तस्मादिच्छयाकेनचित्कस्मिंश्चित्फलेकल्प्यमानेर्थात्सर्वफलत्वेगौरवमेवस्यादितिचेन्नैवं॥ स्व
र्गस्यपश्वादिफलवदुःखमिश्रितत्वाभावात॥ निरतिशयसुखत्वाच्च सर्वपुरुषाणामिष्टत्वात्स्वर्गएवविश्वजितःफलं॥ ॥अष्टमा
धिकरणमारचयति॥ ॥स्वर्गायवाप्रतिष्ठायैरात्रिसत्रमिहाग्रिमः॥ पूर्ववत्स्यात्प्रतिष्ठात्रश्रुतानेनाश्रुतात्द्वरं॥ सत्रकांडेश्रूयते
॥ प्रतितिष्ठंतिहवाएतेयएतारात्रिरुपयंतीतिब्रह्मवर्चसिनोन्नादाभवंति॥ यएताउपयंतीतिच॥ द्वादशाहादूर्ध्वभाविनस्त्र
योदशरात्रचतुर्दशरात्रादयः सर्वसत्रविशेषास्त्रयोदशसंख्याकारात्रयोयस्मिन्सत्रविशेषेसोयंत्रयोदशरात्रइतिसमुदाय
प्राधान्येनैकवचनांततयाप्रायेणनिर्दिशोभवति॥ क्वचित्तुसमुदायिनांरात्रिविशेषाणांप्रत्येकंप्राधान्यमभ्युपेत्यैकएवसत्रविशेषो
बहुवचनांतेनरात्रिशब्देनाम्नायते॥ तद्यथातएताविंशतिंरात्रिरुपयन्नितिताद्दशरात्रिसत्रेविश्वजिन्न्यायेनस्वर्गःफलत्वेन
कल्पनीयइतिप्राप्तेब्रूमः॥ अस्यरात्रिसत्रविधेस्तावकेर्थवादेप्रतिष्ठाश्रुतानकल्पनीया॥ ॥नवमाधिकरणमारचयति॥ ॥
श्रुताश्रुतेश्रुतंवैकंसौर्येसर्वप्रवृत्तये॥ आद्योमैवंश्रुतेनैवफलाकांक्षानिवर्तनात॥ सौर्यंचरुंनिर्वपेद्ब्रह्मवर्चसकामइत्यत्रब्र
ह्मवर्चसंश्रुतफलं॥ स्वर्गोश्रुतफलंतदुभयमभ्युपेयं॥ तथासतिस्वर्गकामस्यसर्वैरपेक्ष्यमाणत्वात्सर्वेषांतत्रप्रवृत्तिर्लभ्येतेति
चेत्।मैवं॥ श्रुतेनब्रह्मवर्चसफलेनैवनिराकांक्षोविधिवाक्येविश्वजिन्न्यायेनस्वर्गफलकल्पनायाअसंभवात॥ तस्माच्छ्रुतमेव
फलं॥ ॥दशमाधिकरणमारचयति॥ ॥दर्शादिः सर्वकामेभ्योनुवादोवाफलविधिः॥ अंगोपांगोदितःकामोविध्यभावादनूद्य
ते॥ उत्पत्तिचोदनासिद्धे आश्रित्यविधिभावने॥ फलसंयोगबाधेनभवेदेषफलेविधिः॥ इदमाम्नायते॥ एकस्मैवाअन्याइष्टयःका
मायाह्रियंतेसर्वेभ्योदर्शपूर्णमासाविति॥ एकस्मैवाअन्येयज्ञक्रतवःकामायाह्रियंतेसर्वेभ्योज्योतिष्टोमइति॥ तत्रसर्वेभ्यइत्य
नेनवाक्येनदर्शपूर्णमासयोर्नफलविधिःविधायकस्यलिङादेर्भावनावाचिनआख्यातस्यचाभावात॥ अनुवादस्तुभविष्यति
सर्वकामानांप्राप्तत्वात॥ नदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिविधानात्स्वर्गएवप्राप्तोनतुमोंकांतरमितिवाच्यं॥ अंगोपांगका

अ॰ क॰ माला॰ मानामपि प्राप्तत्वात्तामिधेन्यो दर्शपूर्णमासयोरंगं॥ तत्र कामाः श्रूयंते॥ एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्य चतुर्विंशतिमनुब्रूया
६३ द्ब्रह्मवर्चसकामस्येति॥ तथा सांनाय्ययागस्य दोहनमंगं तत्साधनं॥ वत्सापाकरणमुपांगं तत्र पलाशशाखाहरणे काम आम्नातः॥
यं कामयेत पशुमान्स्यादिति बहुपर्णां तस्मै बहुशाखामाहरेत्पशुमंतमेवैनं करोतीति॥ त एते सर्वे कामा अनूद्यंत इति प्राप्ते ब्रूमः॥ मा
भूतामस्मिन्वाक्ये विधिभावेन तथाप्युत्पत्तिवाक्यसिद्धं तं आश्रित्य तादर्थ्यवाचिन्या चतुर्थ्या फलसंयोगो बोध्यते॥ दध्ना॥ तस्मादेष
फलविधिः॥ ॥एकादशाधिकरणमारचयति॥ ॥ज्योतिष्टोमस्य सर्वार्थः सर्वे सकृदनुष्ठितेः॥ दद्यात्पृथक्प्रयोगाद्वा सकृत
स्याविशेषतः॥ एकैकस्यान पेक्षस्य फलस्यैष हि साधनं॥ चोदितं तेन कामास्ते पर्यायेण भवंत्यमी॥ यथा दर्शपूर्णमासौ सर्वकामा
र्थौ तथा ज्योतिष्टोमस्य सर्वकामार्थ इति पूर्वाधिकरणेनैव सिद्धं॥ तत्रोत्तरयत्र कामा नैमित्तिकाः ज्योतिष्टोमादिस्वरूपं निमित्तं च स
र्वेषु कामेष्व विशिष्टं॥ नहि निमित्तसाधारण्ये सति नैमित्तिकानां पर्यायो भवति॥ वह्निसामीप्ये सति दाहप्रकाशयोः पर्यायादर्श
नात्॥ तस्माज्ज्योतिष्टोमे सकृदनुष्ठिते सत्येकं फलं यथा निष्पद्यते तथा फलांतराणामपि वारयितुमशक्यत्वाद्युगपत्सर्वफलसिद्धि
रिति प्राप्ते ब्रूमः॥ नात्र ज्योतिष्टोमं निमित्तीकृत्य कामा विधीयंते कामानामननुष्ठेयत्वात् किं तर्हि पुरुषस्य स्वत एव प्राप्तान्॥ कामानु
द्दिश्य तत्साधनत्वेनैष ज्योतिष्टोमो विधीयते॥ यद्यपि सर्वेभ्यः कामेभ्य इति स्वर्गपश्वादिफलानामेकेनैव शब्देनोद्दिश्यमानत्वात्सा
हित्यं प्रतिभाति तथापि न तदस्ति उद्देश्यगतत्वेन साहित्यस्याविवक्षितत्वात्॥ न च शब्दतः साहित्यनियमाभावेप्येककर्मफलत्वाद
र्थतः साहित्यमिति वाच्यं॥ स्वर्गपश्वादीनां परस्परनिरपेक्षाणामेव फलत्वात्। तस्मादेकैकस्य फलस्य साधनत्वेन कर्म चोद्यते॥ अ
त एव सर्वेभ्य इति निर्देशोपपत्तिः॥ अन्यथा साहित्यनियमान्मिलितमिदमेकमेव फलं संपन्नमिति सर्वशब्दो नोपपद्येत॥ तस्माद्य
दा यत्फलं काम्यते॥ तदा तत्सिद्धये ज्योतिष्टोमः प्रयोक्तव्यः॥ एकमपि सहस्त्यादिफलं यदा यदा काम्यते तदा तदा कारीरीष्टिः पुनः श्री
पुनः प्रसज्यते॥ किमु वक्तव्यं फलभेदे प्रयोगभेद इति तस्मात्प्रतिफलं पृथक्प्रयोगः॥ ॥द्वादशाधिकरणमारचयति॥ ॥चित्रया ६३
पश्वादिर्वामुष्मिन्नैवस्कं नियमोथवा॥ आद्यः स्वर्गेण तुल्यत्वाद्देहस्योत्पादकत्वतः॥ चित्रोत्पत्तौ तु नियमोनश्रुतो नापि कल्पकः॥ पुत्र
वृत्त्यादिनापि ते प्रतिबंधे भवेत्फलं॥ काम्यकर्माण्येवं श्रूयंते॥ चित्रया यजेत पशुकामः ऐंद्रमेकादशकपालं निर्वपेत् प्रजाकामः
ति तत्र यथा स्वर्गफलस्यामुष्मिकत्वं नियतं॥ एवं पश्वादिफलस्यापि॥ यदि स्वर्गहेतुर्ज्योतिष्टोमो देहांतरस्योत्पादकः तर्हि चित्रा
दिरपि तथास्त्विति चेत्। मैवं॥ वैषम्यात् अस्मिन्देहे स्वर्गस्य भोक्तुमशक्यत्वाद् अश्रुताप्यन्यदेहोत्पत्तिरर्थापत्त्या कल्प्यते॥ चित्रया

147/1941

त्वन्यदेहोवश्यमुत्पद्यत इति नियमो न श्रुतः॥ नापि किंचित्तस्य कल्पकमस्ति॥ अनेनापि देहेन पश्वादिफलस्य भोक्तुं शक्यत्वा
त्॥ अस्मिन्देहे प्रतिग्रहादिदृष्टोपायमंतरेण पश्वाद्यलाभाद्दैर्घ्यं चित्रादिफलमामुष्मिकमेवेति चेत्॥ प्रतिग्रहादेः प्रतिबंधनि
वृत्तावुपयुक्तत्वात्॥ तस्मादसति प्रतिबंधे फलमैहिकं सति त्वामुष्मिकं॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥इष्ट्वा तु वाज
पेयेन बृहस्पतिसवं यजेत्॥ कालप्रबोधये द्वाक्यमुतांगत्वस्य बोधकं॥ क्त्वाश्रुत्या भाति कालोत्रमेवमंगत्वबोधनं॥ श्रुतेर्मुख्यं
प्रक्रियाचेत्तथा सत्यनुगृह्यते॥ इदमाम्नायते॥ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत॥ अग्निं चित्वा सौत्रामण्या यजेतेति॥ तत्रेष्ट्वे
ति क्त्वाप्रत्ययो वाजपेयस्य पूर्वकालीनतां ब्रूते॥ तस्माद्वाक्यमिदं कालोपदेशार्थमिति प्राप्ते ब्रूमः॥ बृहस्पतिसवस्य वाजपेयांग
त्वबोधनमेव क्त्वाश्रुतेर्मुख्योर्थः॥ समानकर्तृकयोः पूर्वकाल इति सूत्रेण क्रियाद्वयस्यैककर्तृकतायां तद्विधानात्॥ यद्यपि सूत्रे
पूर्वकाल इत्युक्तं तथापि तन्न तन्नियतं॥ मुखं व्यादाय स्वपितीत्यत्र कालैक्येपि प्रयोगात्॥ वाजपेयप्रकरणमप्यंगत्वेन गृह्यते
अन्यथात्वप्रकृते बृहस्पतिसवे कालविधानात्प्रकरणं बाध्येत॥ अंगत्वे कर्मांतरत्वेन प्रसिद्धबृहस्पतिसवत्वाभावात्। तच्छब्दोनु
पपन्न इति चेत् न॥ यासाग्निहोत्रन्यायेन तद्धर्मातिदेशार्थत्वात्॥ तस्माद्वाक्यमिदमंगत्वबोधकं॥ अग्निं चित्वेत्यत्राप्येवं योज
नीयं॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥संस्थाप्य पौर्णमासीं तामनु वैमृधईरितः॥ द्वयोरंगमुतैकस्य द्वयोः स्यात्प्रक्रियाव
शात्॥ उत्पत्तिवाक्यतः पूर्णमाससंयोगभासनात्॥ तस्यैवांगं न दर्शस्य प्रक्रिया वाक्यबाधिता॥ दर्शपूर्णमासप्रकरणे श्रूयते॥ सं
स्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति॥ तत्रेयं वैमृधेष्टिः प्रकरणबलात्प्रयाजादिवद्दर्शपूर्णमासयोरुभयोरप्यंगमिति चेत्। न॥
वाक्यस्य प्रबलत्वात्॥ न च संस्थाप्येति पौर्णमास्याः समाप्त्यभिधानात्तदंगत्वमयुक्तमिति वाच्यं॥ दर्शसाधारणांगसमाप्त्यभि
प्रायेण तदुपपत्तेः॥ तस्मादुत्पत्तिवाक्यादेककर्तृकत्ववाचि क्त्वाप्रत्ययाच्च पूर्णमासस्यैवांगं॥ ॥पंचदशाधिकरणमारच
यति॥ ॥किमाग्निमारुतादूर्ध्वमनुयाजैश्चरेदिति॥ अंगं कालोथवांगं स्यादिति पारार्थ्यमन्यथा॥ पुराग्निमारुतस्यास्य ज्ञाता
सोमार्थता तथा॥ अनुयाजाश्च पश्वर्थाः संयोगः कालसिद्धये॥ ज्योतिष्टोमे श्रूयते॥ आग्निमारुतादूर्ध्वमनुयाजैश्चरंतीति॥ आ
ग्निमारुतं नाम किंचिच्छस्त्रं॥ अनुयाजा देवं बर्हिरित्यादिभिः पाशुकहौत्रकांडपठितैरेकादशभिर्मंत्रैः साध्या होमाः तेषां चाग्निमारु
तशस्त्रस्यानुयाजा अंगमित्येवमंगांगिभावबोधनाय संयोगः यद्यनुयाजानामयं कालोपदेशः स्यात्॥ तदानीमाग्निमारुता
न्यासस्य त्वार्थो न कश्चिदित्यं तत्पारार्थ्यं स्यात्॥ तस्माद्बृहस्पतिसववद्वैमृधवच्चानुयाजा अंगमिति प्राप्ते ब्रूमः॥ इतरस्तत्र श

स्त्रवदाग्निमारुतशास्त्रस्य होमांगत्वं पूर्वमेवावगतं॥ अग्नीषोमीयविकृतौ सवनीयपशावतिदेशात्‌ प्राप्तानामेकादशानाम
नुयाजानामपि प्रयाजवत्पश्वंगत्वमवगतं॥ ततः परस्परमंगांगिभावासंभवात्कालोपदेशार्थोयं संयोगः॥ ॥षोडशाधिकर
णमारचयति॥ ॥किं दर्शपूर्णमासाभ्यामिष्ट्वा सोमस्य यागकः॥ अंगांगिभावः कालो वाद्यपरार्थ्याय चांगता॥ दर्शादिलक्षि
तकाले सोमयागो विधीयते॥ स्वतंत्रफलत्वेन न युक्तांगांगिता तयोः॥ इदमाम्नायते॥ दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते
ति॥ तत्रभयोराग्निमारुतानुयाजवदन्याधीनत्वाभावाद्दर्शपूर्णमासोक्तेः पारार्थ्यपरिहाराय सोमस्य दर्शपूर्णमासांगत्वबो
धकोयं संयोग इति चेन्नैवं॥ स्वतंत्रफलवतः सोमस्यांगत्वासंभवात्फलवत्संनिधावफलं तदंगं भवतीति न्यायात्‌॥ न चात्र बृह
स्पतिसवन्यायेन सोमधर्मकफलं कर्मांतरं विधीयत इति शक्यं वक्तुं॥ सोमशब्दस्य बृहस्पतिशब्दवन्नामत्वाभावेन धर्मातिदेश
कत्वाभावात्‌॥ क्त्वाप्रत्ययस्य सत्यप्यंगांगिभावकर्तैक्यमात्रेणोपपद्यते॥ तस्माद्दर्शपूर्णमासशब्दस्य परार्थ्यमभ्युपेत्यापि तल्ल
क्ष्य उपलक्षितउत्तरकाले सोमविधिरयं॥ एतदेवाभिप्रेत्य रथवत्तूपकमाम्नायते॥ एष वै देवरथो यद्दर्शपूर्णमासौ यो दर्शपूर्णमासा
विष्ट्वा सोमेन यजते रथस्पष्टएवावसाने वरे देवानामवस्यतीति॥ अवसाने निश्चिते वरे मार्गे यथा रथेन क्षणे मार्गं गंतुः कंटकपाषा
णादिराहित्येन सुखं भवति॥ तथा प्रथमं दर्शपूर्णमासाविष्ट्वा तत उत्तरकाले तद्दिष्टविकृतिषु सोमांगभूतदीक्षणीयप्रायणीयादि
षु धर्मानुष्ठानं सुकरं भवतीत्यर्थः॥ तस्मात्कालार्थः संयोगः॥ ॥सप्तदशाधिकरणमारचयति॥ ॥वैश्वानरस्य पूतत्वं पितुः
पुत्रस्य वाग्निमः॥ कर्तुरेव फलं युक्तं कर्तृत्वं पितुरेव हि॥ जातेयस्मिन्निष्टिमेतां निर्वपत्तस्य पूतता॥ तच्चेप्सितं पितुस्तेन पितात्र
प्रवर्तते॥ काम्येष्टिकांडे वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इति प्रकृत्य श्रूयते॥ यस्मिन्जात एतामिष्टिं निर्वपति॥ स पूत ए
व तेजस्व्यन्नाद इंद्रियावी पशुमान्भवतीति॥ तत्र पितुः प्रबुद्धस्य कर्तृत्वं न तु मुग्धस्य पुत्रस्य॥ ततोनुष्ठानफलयोर्वैयधिक
रण्यपरिहाराय पितुरेव पूतत्वादिफलमिति चेत्‌। मैवं॥ यस्मिन्जाते निर्वपति स पूत इति वाक्येन फलस्य पुत्रसंबंधावगमा
त्‌॥ न चात्र निष्फलस्य पितुरप्रवृत्तिरिति वाच्यं॥ पुत्रनिष्ठपूतत्वादेरीप्सितत्वेन स्वफलबुद्ध्या प्रवृत्तिसंभवात्‌॥ तस्मात्पुत्रस्य
पूतत्वादिकं॥ ॥अष्टादशाधिकरणमारचयति॥ ॥जन्मांतरमेवेष्टिर्जातकर्मणि वा कृते॥ निमित्तानंतरं कार्यं नैमित्तिक
मतोग्रिमः॥ जातकर्मण्यनिवृत्ते स्तनप्राशनदर्शनात्‌॥ प्रागेवेष्टौ कुमारस्य विपत्तेरूर्ध्वमस्तु सा॥ पुत्रजन्मतो वैश्वानरेष्टिनि
मित्तत्वान्नैमित्तिकस्य कालविलंबायोगात्‌॥ जन्मांतरमेवेष्टिरिति चेत्‌। मैवं॥ स्तनप्राशनांतात्वज्जातककर्मानंतरं विहितं य
दिजातकर्मणः प्रागेव वैश्वानरेष्टिर्निरूप्येत॥ तदा स्तनप्राशनस्यात्यंतविलंबात्पुत्रो विपद्येत तथा सति पूतत्वादिकमिष्टिफलं

149
1945

कस्य स्यात्‌॥ तस्मान्न जन्मांतरं किंतु जातकर्मण ऊर्ध्वं सेष्टिः॥ ॥एकोनविंशाधिकरणमारचयति॥ ॥जातकर्मानंतरं स्या
दाशौचेपगतेथवा॥ निमित्तसंनिधेराद्यः कर्तृशुद्ध्यर्थमुत्तरः॥ यद्यपि जातकर्मानंतरमेव तदनुष्ठानं निमित्तभूतजन्मसंनि
हितं भवति॥ तथाप्यशौचिना पितानुष्ठीयमानमंगविकलं भवेत्‌॥ जातकर्मणि तु विपत्तिपरिहाराय तात्कालिकी शुद्धिः॥ शास्त्रे
णैव दर्शिता॥ ततो मुख्यसंनिधेरवश्यंबोधितत्वाच्छुद्धिलक्षणांगवैकल्यं वारयितुमाशौचादूर्ध्वमिष्टिं कुर्यात्‌॥ ॥विंशाधिक
रणमारचयति॥ ॥अग्निं चित्वा यजेत सौत्रामण्यत्यंगेष्टिरीदृशी॥ अंगिकाले स्वकाले वा स्यादाद्योन्त्यांगवन्मतः॥ निवृत्ते च
यनादौ तु कर्मांतरविधानतः स्वकाले चोदकप्राप्ते तदनुष्ठानमास्थितं॥ अग्निं चित्वा सौत्रामण्या यजेत वाजपेयेनेष्ट्वा बृह
स्पतिसवेन यजेतेत्यत्र सौत्रामणीबृहस्पतिसवयोरंगत्वं पूर्वमुक्तं॥ तच्चांगमंगिकालेंगिना सह प्रयोक्तव्यं॥ इतरेषामंगानां त
था प्रयुज्यमानत्वादिति चेन्नैवं॥ क्त्वाप्रत्ययेन पूर्वकालवाचिनांगे चयनादौ निर्वृत्ते सति पश्चात्कर्मांतरत्वेन सौत्रामण्यादे
र्विहितत्वात्‌॥ यद्यंगिना सहैकप्रयोगः स्यात्‌॥ तदा क्त्वाप्रत्ययप्रापितः पूर्वोत्तरकालविभागो बाध्येत॥ न हि अंगिना सह प्रयोक्तव्या
नामुखासंभरणादीनां च यनेनिर्वृत्ते पश्चाद्विधानं श्रुतं॥ ततः पृथक्प्रयोगवत्त्वेभाविनि सति स्वस्व चोदकप्रापिते काले तदनुष्ठा
नं युक्तं॥ सौत्रामण्या इष्टिविकृतित्वात्पर्वकालश्चोदकप्राप्तः॥ चयनेन सहैकप्रयोगे तु पर्वण्युखासंभरणादिविधानादन्यस्मि
न्दिने सौत्रामणी प्रसज्येत॥ तथा बृहस्पतिसवस्य ज्योतिष्टोमविकृतित्वाद्वसंतकालश्चोदकप्राप्तः॥ वाजपेयेन सह प्रयोगैक्ये
शरदि वाजपेयस्य विहितत्वाद्बृहस्पतिसवोपि शरदि प्रसज्येत॥ तस्मादिति दिष्टपर्वणि वसंते च तदनुष्ठानं॥ ननु सर्वत्रांगापूर्वैः
प्रधानापूर्वं जनयितव्यं॥ इह तु पूर्वकालीनेन सांगप्रधानानुष्ठानेन फलापूर्वस्य निष्पन्नत्वादुत्तरकालीनमंगमनिरर्थकमिति
चेत्‌॥ न॥ तस्यैवापूर्वस्यानेनांगेन प्राबल्यदशायाः कल्पनीयत्वात्‌॥ तस्मान्नांगिनः काले नुष्ठानं किंतु स्वकाल इति स्थितं॥
॥ ॥इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे चतुर्थाध्यायस्य तृतीयः पादः॥ ॥चतुर्थपादे प्रथमाधिकरणमारच
यति॥ ॥राजसूये नुमत्यादि देवनादि च ते उभे॥ मुख्ये उतैकमुख्यत्वं स्यादाद्यः प्रक्रियैक्यतः॥ यागानां राजसूयत्वा
दंगित्वं फलवत्त्वतः॥ देवनाद्यफलं यत्तदंगं फलवतो यजेः॥ राजसूयप्रकरणे यागरूपा अनुमत्यादयो बहवः श्रुताः॥ अनु
मत्यै पुरोडाशमष्टाकपालं निर्वपति॥ नैर्ऋतमेककपालं आदित्यं चरुं निर्वपति॥ आग्नावैष्णवमेकादशकपालमित्याद
यः॥ तथैवादृष्टयस्तथापत्रा वापि श्रुताः॥ आदित्यां मल्हां गर्भिणीमालभेत मारुतीं पृश्निं पष्ठौहीमश्विभ्यामित्यादि॥ मल्हा

अ० क० मा०
६५

मथिला गलस्तनयुक्तेत्यर्थः॥ तस्या अदितिर्देवता॥ पृश्निरल्पतनुः॥ तस्या मरुतो देवता॥ यावता वयसा वर्षत्रयरूपेण पृष्ठे भा
रं वोढुं शक्तिर्भवति॥ तावद्वयस्का पष्ठौही॥ तस्या अश्विनौ देवता॥ एवमभिषेचनीयदशपेयादयः सोमयागाः श्रुताः॥ तथा वल्मी
क।वपायां होम इत्यादयो दर्विहोमाः श्रुताः॥ यथेतद्दृष्टिपशुसोमदर्विहोमश्चतुर्विधा यागरूपाः॥ एवमयागरूपा अपि दे
वनादयः श्रुताः॥ पष्ठौहीं दीव्यति अक्षैर्दीव्यति राजन्यं जिनाति शौनःशेपमाख्यापयत इत्यादयः॥ तत्र यागा यथा मुख्याः
तथा देवनादीनामपि मुख्यत्वं युक्तं प्रकरणपाठस्योभयत्र समानत्वादिति प्राप्ते ब्रूमः॥ राजा स्वाराज्यकामो राजसूयेन य
जेत॥ तत्राख्यातवाच्यायां भावनायां धात्वर्थो यागः करणं॥ राजसूयशब्दश्चाप्रसिद्धार्थत्वाद्यागसमानाधिकरण्येन
तन्नामधेयं भवति॥ तथा सति राजसूयेन यागेन स्वाराज्यं भावयेदिति॥ वाक्यार्थपर्यवसानदनुमत्यादीनां यागानामेव
फलवत्त्वादंगित्वं तत्संनिधौ श्रूयमाणमफलं देवनादिकं यागांगं॥ ॥द्वितीयाधिकरणमारचयति॥ ॥एकस्यैवाभि
षेच्यस्य तदंगं निखिलस्य वा॥ राजसूयस्यापकर्षादाद्यः प्रक्रिययोत्तरः॥ यद्देवनादिकमंगमित्युक्तं॥ तदेतदभिषेच
नीयस्य सोमयागस्यैवांगं कुतः अपकर्षात्॥ यद्यप्यभिषेचनीयविधेरूर्ध्वं तत्संनिधौ देवनादयः समाम्नाताः॥ तथाप्यभि
षेचनीयमध्ये ते अपकृष्यंते॥ माहेंद्रस्य स्तोत्रं प्रत्यभिषिच्यत इति वा॥ क्येन राज्ञो यजमानस्याभिषेको माध्यंदिनसवने स्तो
त्रकाले परुष्यते॥ तस्मिन्नपकृष्टे सति ततः पूर्वमाम्नातानां देवनादीनामर्थसिद्धोपकर्षः॥ ततो माहेंद्रस्तोत्रादर्वागभि
षेचनीयप्रयोगांतःप्रातित्वाद्देवनादिकमभिषेचनीयस्यैवांगमिति प्राप्ते ब्रूमः॥ किं तदंगत्वे संनिधिः प्रमाणं॥ किं वा प्रयो
गपारिकल्पितमवांतरप्रकरणं॥ उभयथापि प्रत्यक्षस्य महाप्रकरणस्य प्रबलत्वाद्देवनादिकं राजसूयस्यांगं॥ राजसूयशब्द
श्चानुमत्यादीन्सर्वान्यागानभिधत्ते॥ तस्मात्सर्वेषामेव तदंगं॥ अनुष्ठानं तु राजसूयमध्ये क्वचिदपेक्षितमिति वचनबला
दभिषेचनीयगतमाहेंद्रस्तोत्रकाले तदनुष्ठीयते॥ ॥तृतीयाधिकरणमारचयति॥ ॥किं पुरस्तादुपसदां सौम्येन प्र
चरेदिति॥ अंगांगिभावः कालो वा वाक्यादाद्यः प्रतीयते॥ पुरस्तादिति कालोऽत्र भाति कालविधिस्ततः॥ नांगं कस्यापि सौम्या
दि प्रधानमितरेष्टिवत्॥ राजसूये संसृछदवाख्यानि आग्नेयाष्टाकपालादीनि दश हवींष्याम्नातानि तेष्वष्टमनवमदशमा
नि सौम्यत्वाष्ट्रवैष्णवानि तद्विषयमिदं वाक्यमाम्नायते॥ पुरस्तादुपसदां सौम्येन प्रचरंति अंतरा त्वाष्ट्रेण उपरिष्टाद्वैष्ण
वेनेति॥ योयं सौ राजसूये दशपेयो नाम यागस्तस्मिन्नतिदिष्टानामुपसदामादिमध्यावसानेषु सौम्यादीनां त्रयाणामनु

श्रीः
६५

151/1945

ष्ठानमनेन वाक्येन चोद्यते॥ ततो वाक्यात्सौम्यादीन्युपसदामंगानीति प्राप्ते ब्रूमः॥ उपसदामिति षष्ठ्याः कालवाचिना पुरस्ता
दिति शब्देनान्वयात्॥ सौम्यादीनां कालविशेषसंबंधपरमिदं वाक्यं न त्वंगांगिभावपरं ततो न कस्याप्यंगं सौम्यादिकं किं त्वनुम
त्यादिवत्प्रधानं॥ ॥चतुर्थाधिकरणमारचयति॥ ॥मुख्यतामनहोमस्य सांग्रहण्यंगताथवा॥ मुख्यत्वमविरुद्धत्वात्फला
यस्यात्तदंगता॥ काम्येष्टिकांडे श्रूयते॥ वैश्वदेवीं ग्रहणीं निर्वपेद्ग्रामकाम इति॥ तत्रामनहोमाः श्रुताः आमनमस्यामनस्य
देवा इति तिस्र आहुतीर्जुहोतीति॥ त एत आमनहोमाः सांग्रहण्येष्ट्या सह समप्रधानभूताः नहि तेषां मुख्यत्वे कश्चिद्विरोधो
स्ति॥ दृष्टश्चाग्नेयादिष्वनुमत्यादिषु च बहूनां मुख्यत्वमिति चेन्मैवं॥ दर्शपूर्णमासाभ्यां स्वर्गकाम इति वाक्येन स्वाराज्यकामो
राजसूयेनेति वाक्येन च यथा बहूनां फलसंबंधावगमः॥ तथामनहोमानां फलसंबंधाभावे सति प्राधान्यायोगात्सांग्रह
णीं निर्वपेद्ग्रामकाम इति वाक्यं तु सांग्रहण्या एव फलसंबंधं बोधयति न त्वामनहोमानां॥ तस्मात्फलवत्याः सांग्रहण्याः सं
निधावाम्नाता अफला आमनहोमास्तदंगं॥ ॥पंचमाधिकरणमारचयति॥ ॥नित्यनैमित्तिकत्वे वा नित्यत्वैव दधिग्रहे॥
देवांतरायाज्ज्येष्ठ्याच्च स्यादस्योभयरूपता॥ निमित्तत्वद्योति नोत्र यदिशब्दादयो न हि॥ अतोस्य न निमित्तत्वं केवला नित्यतो
चिता॥ ज्योतिष्टोमे श्रूयते॥ यो वै कां चिदध्वर्युर्यजमानश्च देवतामंतरितस्तस्या आवृश्चेत यत्प्राजापत्यं दधिग्रहं गृह्णाति शा
मयत्यैवेनामिति॥ सोयं दधिग्रहो नित्यो नैमित्तिकश्चेत्युभयात्मकः॥ कुतः॥ आकारद्वयसाधकसद्भावात्॥ देवतांतरायेण
तद्देवताद्देवताक्षोभमुपन्यस्य ग्रहणशमनाभिधानाद्देवतांतरायो निमित्तं ग्रहो नैमित्तिक इति प्रतिभाति॥ तथा ज्येष्ठत्वमाम्ना
तं॥ ज्येष्ठो वा एष ग्रहाणामिति॥ ज्येष्ठत्वं नाम प्रशस्तत्वं तच्च नित्यत्वे सत्युपपद्यते॥ नैमित्तिकस्य पाक्षिकत्वादप्रशस्तत्वं॥ तस्मा
द्धेतुद्वयबलादुभयात्मक इति चेन्मैवं॥ देवतांतरायस्य निमित्तत्वाभावात्॥ निमित्तत्वे यदिशब्द उपबध्येत सप्तमी वा श्रूये
त यच्छब्दो वांतरायकर्त्रोरध्वर्युयजमानयोः सामानाधिकरण्येन प्रयुज्येते॥ यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान्
ग्रहान्गृह्णीयात्॥ भिन्नं जुहोति यो वै संवत्सरमुख्यमभृत्वाग्निं चिनुत इत्यादिषु संप्रतिपन्ननिमित्तेषु तद्दर्शनात्तस्मात्केव
लनित्यत्वमेव दधिग्रहस्योक्तं देवताक्षोभतत्समाधानोपन्यासो विधेयदधिग्रहस्तुतये इत्यर्थवादः॥ ॥षष्ठाधिकर
णमारचयति॥ ॥नित्यो नैमित्तिको वा स्याद्यागो वैश्वानरश्चितौ॥ नित्यः पुरेव यच्छब्दाद्विरोधाच्च पश्चिमः॥ अ
ग्निचयने श्रूयते॥ यो वै संवत्सरमुख्यमभृत्वाग्निं चिनुते यथा सामि गर्भो विपद्यते॥ तादृगेव तादृगेव तदार्तिमार्छेद्वैश्वान

रंद्वादशकपालं पुरस्तान्निर्वपेदिति॥ उखाधिकरः॥ तामुखां युंजानः प्रथमं मनः इत्यादिप्रपाठकाम्नातैर्मंत्रैः संपाद्यतस्यामुखा
यामग्निं निधाय षड्यामे द्वादशयामे वा शिक्येतामुखामवरुह्याप्यतच्छिक्यस्य कंठे बध्वातमुख्यमग्निं संवत्सरं भृत्वा पश्चादिष्ट
काभिरग्निश्चेतव्यः॥ अभरणे तु पूर्णगर्भपातवद्विनाशः स्यात्॥ ततो वैश्वानरेष्टिश्चयनात्प्रागेव कुर्यादित्यर्थः॥ अत्राप्यंतराय
वाक्यवदभरणवाक्यस्यार्थवादत्वात्॥ नित्या वैश्वानरेष्टिरिति चेत् मैवं॥ यः पुमान् भृत्वाग्निं चिनुते स निर्वपेदिति कर्तृसमाना
धिकृतयच्छब्दबलादभरणस्यैवानिमित्तत्वेन नैमित्तिकभावावभासात्॥ किंच दधिग्रहस्य नित्यस्य पाक्षिकत्ववत् पंचनैमित्तिकत्वं विरुद्धं॥
इह तु नित्यत्वे प्रमाणाभावादेव नैमित्तिकत्वमित्यविरोधः॥ ॥सप्तमाधिकरणमारचयति॥ ॥ नित्या षष्ठी चितिर्नो वा पंचा
पेक्षत्वतोग्रिमः॥ अपरं क्वाप्रतिष्ठानिमित्तीकृतितोंतिमः॥ अग्नौ श्रूयते॥ योग्निं चित्वा न प्रतितिष्ठति पंच पूर्वाश्चितयो भवं
तीत्यथ षष्ठीं चितिं चिनुत प्रतितिष्ठत्या इति॥ गलेन रुद्धव्याममात्रे भूप्रदेशे नानाविधाभिरिष्टकाभिः पश्याकारेण स्थलं निष्पाद्य
ते॥ सेयं चितिस्ताद्दशाः पंचचितयः पूर्वाः क्रियंते ततः षष्ठी चितिः तत्र षण्णां पूरणी षष्ठीति व्युत्पत्तेः पूर्वाः पंचचितीरपेक्षते अ
न्यथा षट्संख्यापूरकत्वासंभवात्॥ तस्मादेकप्रयोगनियमादितरचितिवन्नित्येति चेन्मैवं॥ अग्निं चित्वेति पूर्वाधिरेव पंच
भिश्चितिभिर्नित्यस्याग्निचयनस्य समाप्तौ सत्यां पश्चाद्योत्र न प्रतितिष्ठत्स षष्ठीं चिनुतइति कर्तृसमानाधिकृतेन यच्छब्देना
प्रतिष्ठां नैमित्तीकृत्य विधानात् षष्ठी नैमित्तिकी ततः पंचचितिकाम्नो नित्योग्निः नैमित्तिकस्त्वेकचितिकइतिन प्रयोगैक्यं॥ पूरण
प्रत्ययस्त्वभिधानापेक्षयोपपद्यते पूर्वाः पंचचितयोभिहिताः॥ अथाभिधास्यमानां षष्ठीं चितिं चिनुतइति वचनव्यक्तिः॥ ॥
अष्टमाधिकरणमारचयति॥ ॥ क्रत्वंगं स्यान्नवा पिंडपितृयज्ञः क्रतोर्हिमः॥ अमावास्यायामिति तेमैवं तत्कालोक्तेः पुमर्थता॥ इ
दमाम्नायते॥ अमावास्यायामपराह्णे पितृयज्ञेन चरंतीति॥ तत्रामावास्याशब्दवाच्ये कर्मणि विधीयमानत्वादयं पिंडपितृ
यज्ञः क्रत्वंगमिति॥ चेत् मैवं॥ अमावास्याशब्दस्य कालवाचित्वात्कर्मणि त्वयं शब्दो लाक्षणिकः॥ न च वाक्येन क्रत्वंगत्वा
भावेपि प्रकरणेन तद्भवेदिति वाच्यं॥ तस्यानारभ्याधीतत्वात्॥ तस्मादयं पुरुषार्थः॥ ॥ नवमाधिकरणमारचयति॥ ॥ श्रीः ६
रज्जुर्द्वितीया पश्वर्था यूपार्था वान्वयात्पशौ॥ पश्वर्था त्रिवृता यूपं परिवीतयतीति यूपगा॥ ज्योतिष्टोमे श्रूयते॥ आश्विनं ग्रहं
गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति॥ तत्र सवनीयपशोरग्नीषोमीयविकृतित्वाच्चोदकप्राप्तं
यूपपरिव्याणं कालोपलक्षणार्थमनूद्य परिव्याणोत्तरकाले त्रिवृद्रशनोपलक्षितपशोरुपाकरणं विधीयते॥ ततोत्र रशना

153/1945

याः पश्वन्वयात्पशुबंधनेन पशोरितस्ततोपक्रमणनिवारणद्वारा दृष्टार्थलाभाच्च पश्वर्था रशनेति चेत् मैवं॥ त्रिवृतेति तृतीयया
यूपमिति द्वितीयया चशेषशेषिभावावगमाद्व्यवहितान्वयलाभाच्च रशना यूपार्था कालस्त्वाश्विनं ग्रहं गृहीत्वेत्यनेनैवोपलक्षितः
पशुनपक्रमणवधार्थं दाढ्यमपि दृष्टमेव प्रयोजनं॥ न च परिव्याणेन दाढ्यं चोदकादेव सिद्धमिति वाच्यं॥ तस्मिन्नसिद्धे सति पुनर्वि
धानादेव द्वितीयया रशनया परिव्याणांतरांगीकारात्॥ तस्मादयं द्वितीया रशना यूपार्था॥ ॥ दशमाधिकरणमारचयति॥ ॥
स्वरुर्यूपपशोर्वांगं यूपस्येत्युक्तितोग्रिमः॥ स्वरुणा पशुमंज्यादित्युक्तेः॥ पश्वंगसास्फुटा॥ अग्नीषोमीयपशौ श्रूयते॥ रूपस्य
स्वरुं करोति॥ स्वरुणा पशुमनक्तीति॥ तत्र स्वरोर्यूपसंबंधाभिधानाद्यूपांगत्वमिति चेन्मैवं स्वरुणा पशुमिति तृतीयया द्वितीयया
चांगांगिभावावगतेः संबंध सामान्यवाचिन्याः॥ षष्ठी यूपीयच्छेदनजन्यत्वाभिप्रायेणापि नेतुं शक्यत्वात्॥ तस्मात्स्वरुः पश्वंगं॥
॥ ॥ एकादशाधिकरणमारचयति॥ ॥ आघारादेश्च मुख्यत्वं नवाग्रेयादिवत्तुतत्॥ षण्मुख्यानामतः सिद्धाः शेषा अन्ये त्वंगसं
स्मृतेः॥ दर्शपूर्णमासयोराघाराज्यभागप्रयाजानुयाजादयः कालसंयोगमंतरेणाम्नाताः आग्नेयादयः षड्यागाः कालसंयो
गेन चोदिताः॥ तत्राग्नेयादीनां यथाप्राधान्यमंगीकृतं तथैवाघारादीनामप्यंगीकर्तव्यं॥ यथा राजसूये परस्परविलक्षणामिष्टिपशुसोमानां
बहूनां समप्राधान्यं तद्वदेकप्रकरणपाठस्योभयत्रापि समानः॥ तस्मादाघारादीनामग्नेयादीनां च समप्राधान्यमिति प्राप्ते ब्रूमः॥ राजा
स्वाराज्यकामो राजसूयेन यजेतेत्यत्र राजसूयशब्दो राजसंबंधात्प्रवर्तमानो राजकर्तृकाणामेकप्रकरणपठितानां सर्वेषां यागानां नाम
धेयं भवति॥ दर्शपूर्णमासशब्दौ तु कालवाचिनौ सतौ कालसंयोगेन विहितानामाग्नेयादीनां षण्णां यागानां नामधेयत्वं प्रतिपद्येते॥
ततो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्येन तन्नामधेयवशादाग्नेयादयः षडेव यागाः फलसंबंधित्वेन प्रतीयमाना [illegible]ख्याः॥
अन्ये त्वाज्यभागाघारादयस्तन्नामरहिता निष्फला आग्नेयादीनां शेषाः॥ एवं सत्यंगत्वेन स्मृतिरुपपद्यते॥ चक्षुषी वा एते यज्ञस्य
यदाज्यभागावित्याज्यभागौ यज्ञशरीरस्यांगिनोंगत्वेन स्तूयेते यत्प्रयाजानुयाजा इत्यंते वर्म वा यतद्यज्ञाय क्रियतइति यज्ञशरीरो
पकारिकवचनत्वेन प्रयाजानुयाजास्तूयंते॥ एवमाघारादिषूदाहार्यं॥ एतच्चसति तादृश्ये संभवति॥ तस्मादाघारादीनां नास्ति मुख्य
त्वं॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ मुख्यानवा दीक्षणीयामुख्या स्यात्सोमसाम्यतः॥ ज्योतिष्टोमस्य स्तोमाः स्युरिति सैव
मेव मुख्यता॥ ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्य प्रकरणे ऐंद्रवायवग्रहादयः सोमयागा दीक्षणीयादीष्टयोग्नीषोमीया
दिपशवश्चाम्नाताः॥ तत्राग्नेयादिपक्षपातिदर्शपूर्णमासनामवज्ज्योतिष्टोमनाम्नः॥ सोमपक्षपातेहेत्वभावेन राजसूयनाम

वत्प्रकृतसर्वयागसाधारणत्वात्सोमसमानां दीक्षणीयादीनामप्यस्तिमुख्यत्वमितिचेन्मैवं॥ सोमयागपक्षपातेहेतुसद्भावात् ज्यो
तींषिस्तोमाअस्य यज्ञस्य सोयं ज्योतिष्टोम इतिहितद्व्युत्पत्तिः॥ अतएवब्राह्मणेत्रिवृत्पंचदशः एतानिवाव तानिज्योतींषियएतस्य
स्तोमा इतिस्तोमानांज्योतिष्ट्वं यज्ञप्रकाशत्वं नचपृथः पञ्चावोवात्रिवृदादिस्तोमयुक्ताः प्रतिभासंते॥ तस्माज्ज्योतिष्टोमनाम्नासोमया
गानामेवफलसंबंधावगमात्॥ अफलादृष्टिपञ्चावो नमुख्यादृतिसोमयागानामेवप्राधान्यं॥ ॥ इतिश्रीमाधवीयेजैमिनिन्याय
मालाविस्तरेचतुर्थाध्यायस्यचतुर्थः पादः॥ ॥ द्वितीयादित्रयेप्रोक्तं भेदशेषप्रयुक्तिभिः॥ अनुष्ठेयमनुष्ठानक्रमः पंचमईर्यते
॥ अनेनचतुर्थपंचमयोरध्याययोः पौर्वापर्यंनिरूपितं॥ द्वितीयाध्यायेकर्मभेदनिरूपणात्पृथगनुष्ठेयत्वमवगतं॥ तृतीयाध्या
येशेषशेषित्वनिरूपणान्निवेशनः संगमन इतिमंत्रेणवत्सकपस्थानमनुष्ठेयं॥ नत्विंद्रोपस्थानमित्याद्यनुष्ठेयव्यवस्थावगता॥
चतुर्थाध्यायेप्रयुक्तिनिरोपणादनुष्ठेयमेवं निश्चीयते॥ पलाशशाखाछेदनस्यवत्सापाकरणमेवप्रयोजकं॥ तुंनप्रस्तरेणस
हप्रहृतिः प्रयोजिका॥ तथासतिपौर्णमास्यांवत्सापाकरणाभावेसत्यप्रयोजकप्रहृत्यर्थशाखाछेदनंनकर्तव्यमिति॥ एवंत्रिभि
रध्यायैरनुष्ठेयस्वरूपेनिश्चितेसत्यनुष्ठानक्रमस्याकांक्षितत्वात्पंचमाध्यायेसोभिधीयते॥ ॥ पंचमाध्यायस्यप्रथमपादेप्रथमा
धिकरणप्रथमवर्णकमारचयति॥ ॥ पदार्थानांक्रमोनैवनियतोयनियम्यते॥ अमानत्वादनियतिर्निपतिर्वेदमानतः॥ यएतेनु
ष्ठेयाः पदार्था गृहपतिब्रह्मोद्गातृहोतृदीक्षादयः॥ तेषांपदार्थानांनास्तिक्रमनियमः॥ क्रमबोधकस्यप्रमाणस्याभावादितिचे
न्मैवं॥ पदार्थेषुतदनुष्ठानेचयथावेदः प्रमाणं॥ तथैवक्रमेपिवेदः प्रमाणं॥ तस्मात्क्रमस्यनियतत्वात्क्रमनिरूपकः पंचमाध्या
यआरंभणीयः॥ ॥ द्वितीयवर्णकमारचयति॥ ॥ नविधेयोविधेयोवाक्रमोनैवाक्रियात्वतः॥ क्रियाविशेषणत्वेनद्रव्यवद्यु
ज्यतेविधिः॥ यद्यपिक्रमस्यक्रियास्वाभावात्स्वरूपेणनविधियोग्यता॥ तथापियथादध्नाजुहोतीत्यादावक्रियारूपंदधि
द्रव्यंक्रियाविशेषणंसद्विधीयते॥ दधिसाधनकंहोमंकुर्यादितिएवमनेनक्रमेणकर्तव्यमितिक्रियाविशेषणतयाक्रमोवि
धीयतां॥ ॥ तृतीयवर्णकमारचयति॥ ॥ दीक्षयित्वागृहपतिंब्रह्माणंदीक्षयेदिति॥ क्रमः पाठाद्विधेयोवापाठाद्दीक्षा
विधिःश्रुतेः॥ द्वादशाहस्यसत्रत्वात्सर्वेषांयाजमान्यः॥ चोदकेनैवदीक्षायाः प्राप्तेः क्रमविधिर्मतः॥ अध्वर्युर्गृहपतिंदीक्ष
यित्वाब्राह्मणंदीक्षयति॥ ततउद्गातारंततोहोतारमिति॥ तत्रगृहपत्यादिदीक्षाणामनुक्रमः पाठादवगम्यते॥ विधेयत्वं
तुगृहपत्यादिदीक्षाणामेव॥ कुतः दीक्षयेदितिश्रुत्यातद्ध्यवगमात्॥ नहिश्रोतस्यविधेयस्यसंभवेसतिवाक्यार्थरूपः क्रमो श्रीः ६१

विधातुमुचितः तस्मान्नविधेयइतिप्राप्तेब्रूमः॥ द्वादशाहेसत्रेयेऋत्विजस्तेयजमाना इति॥ ब्रह्मादीनांसर्वेषामृत्विजांयजमानत्वे
सतिचोदकप्राप्तादीक्षानविधातव्या॥ ततोदीक्षामनूद्यास्यातेनक्रमोविधीयते॥ यद्यप्यत्रक्रमस्यवाचकः शब्दोनास्तितथा
पिवाक्येनकतीयते॥ सचप्रतीयमानः क्रमोमानांतरेणकर्तव्यतयाप्राप्त्यसत्त्वादिहविधीयते॥ ननुएकस्यकर्तुर्युगपदनेक
पदार्थानुष्ठानान्यथानुपपत्त्याक्रमस्यकर्तव्यतापिप्राप्स्यैवेतिचेतान। विशेषस्याप्राप्तत्वात्उत्क्रमेणाप्यनुष्ठातुंशक्यत्वात्॥
तस्माद्वाक्यावगतंक्रमविशेषंनियतुमयंविधिः॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ अग्निहोत्रंजुहोतीतियवागूंपचती
तिच॥ क्रमः पाठाद्दर्शितोवापाठात्सर्वत्रदर्शनात्॥ होमद्रव्यसमुत्पत्त्यैपूर्वंपाकोवगम्यते॥ यवाग्वेतिश्रुताहोमद्रव्यतातोर्थतः
क्रमः॥ गृहपत्यादिदीक्षासुपाठक्रमस्यैवादृतत्वादिहापिहोमपाकयोः पाठात्प्राप्तः क्रमः आदरणीयइतिचेन्मैवं॥ द्रव्यमंत
रेणहोमासंभवात्॥ द्रव्यनिष्पत्त्यैपाकस्यैवप्राथमिकत्वावश्यंभावात्॥ होमद्रव्यत्वंचयवाग्वाग्निहोत्रंजुहोतीतितृतीययाव
गम्यते॥ तस्मात्पाठक्रमंबाधित्वार्थतः क्रमोत्राप्युपगंतव्यः॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ स्याद्वसंतादिमंत्राणां
क्रमोनोवान्यवद्भवेत्॥ शाखांतरेव्यत्ययेननक्रमोयनियतोत्रहि॥ दर्शपूर्णमासयोर्याजमानेकांडेप्रयाजानुमंत्रणमंत्राः
आम्नाताः॥ वसंतमृतूनांप्रीणामि ग्रीष्ममृतूनांप्रीणामीत्यादयः॥ तेषांनियतः क्रमोभ्युपगंतव्यः॥ कुतः अन्येषुआग्नेयोपांशु
याजाद्यनुमंत्रणमंत्रेषुनियतक्रमदर्शनेनात्रापिक्रमनियमस्यबुद्धिस्थत्वादितिचेन्मैवं॥ अत्रनियामकाभावात्॥ नताव
दत्रपाठोनियामकः वसंतग्रीष्मवर्षाशरद्धेमंतमंत्राणामनेनक्रमेणतैत्तिरीयशाखायांपठितानांशाखांतरेव्यत्ययेनपाठदर्शना
त्॥ नाप्यत्रयवागूपाकवदर्थोनियामकः॥ वसंतमंत्रेणयस्यकस्यचित्प्रयाजस्यानुमंत्रणेप्यनुपपत्त्यभावात्॥ नाप्यत्रलिंगं
नियामकं॥ वसंतमंत्रेणसमिद्यागेकाविषयस्यविशेषसामर्थ्यस्यादर्शनात्॥ तस्मादत्रनास्तिनियतः क्रमः॥ ॥ चतुर्थाधिक
रणमारचयति॥ ॥ प्रयाजेषुक्रमोनास्तिविद्यतेवानविद्यते॥ श्रुत्यर्थाभावतोमैवंक्रमः पाठान्नियम्यतां॥ समिधोयजति॥
तनूनपातंयजतीत्यादिषुप्रयाजेषुनियतः क्रमोनास्तिकुतः॥ क्रमः प्रापकप्रमाणाभावात्॥ यथागृहपत्यादिदीक्षानुवादेना
स्याततश्रुतावाक्याक्रमोविहितः तथाक्रमविधायिकाश्रुतिर्नास्ति॥ यजतीत्याख्यातेनसमिद्यागादिपदार्थानामन्यतोप्रा
प्तानांविधानात्॥ यथाचदीक्षयित्वेतिक्त्वाश्रुतिः ततउद्गातारमितिपंचमीश्रुतिर्वातादृश्यपिनात्रश्रुतिरुपलभ्यते॥ नच॥
पाकहोमयोरिवार्थतः क्रमोवक्तुंशक्यः समिद्यागमंतरेणापितनूनपाद्यागस्यकर्तुंशक्यत्वात्तस्मान्नास्त्यत्रक्रमनियमः

155
1945

इतिचेन्नैवं॥ वाक्यपाठेन प्रतीतस्य क्रमस्य बाधाभावेनाभ्युपेयत्वात्॥ तस्मादस्ति क्रमनियमः॥ ॥ पंचमाधिकरणमारचयति॥ ॥
उपाकृतानां किं सप्तदशानां यूपसंबंधने॥ क्रमो नास्त्यस्ति वा नास्ति नियामकविवर्जनात्॥ आद्यसंस्कृत्यनुष्ठानं यत्क्रमेण सत्त्वहि॥
क्रमोन्यत्र प्रवृत्तिस्तु क्रमस्यात्र नियामिका॥ वाजपेये सप्तदश प्राजापत्यान्पशूनालभत इति विहितानां पशूनामुपाकरणनियोजना
दयः॥ संस्काराः कर्तव्याः॥ तत्रेदं वीप्सावुपक्रमे इदं तेच समाप्तिरिति नियमकारिणः शास्त्रस्याभावादैच्छिकेन क्रमेण पाकारणनू
पः प्रथमं संस्कारोनुष्ठितः उपाकृतानां यूपे नियोजनं संस्कारांतं कर्तव्यं॥ तदानीमीदृशः प्रथमं नियोक्तव्य इति क्रमनियमकारिणां
त्यर्थपाठानामभावान्नास्ति क्रमनियम इति चेन्नैवं॥ उपाकरणेयः क्रमः स्वीकृतः तस्यैव नियोजनादिसंस्कारेषु स्वीकर्तव्यात्॥ श्रुत्य ६नि
र्थपाठाइव प्रथमप्रवृत्तिरपि क्रमं नियंतुमर्हति॥ प्रवृत्त्या बुद्धिस्थस्य क्रमस्य त्यागकारणाभावात्॥ प्रावृत्तिकक्रमस्वीकारे प्रथमपशा
वुपाकरणनियोजनयोः प्रथमद्वितीयसंस्कारयोर्मध्ये पश्वंतरेनुष्ठितेः षोडशभिरेवोपाकरणपदार्थैर्व्यवधानं भवति॥ तच्च व्यवधा
नं सप्तदशेति विधिबलादभ्यनुज्ञातं॥ प्रवृत्तिकं क्रमं परित्यज्य पश्वंतराणां पूर्वं नियोजनं कृत्वा पश्चात्प्रथमपशोर्यदि नियोजनं क्रि
येत॥ तस्माद्द्वात्रिंशद्भिः पदार्थैर्व्यवधानं स्यात्॥ तत्तु नाभ्यनुज्ञातं॥ तस्मात्प्रवृत्त्या क्रमो नियम्यते॥ ॥ षष्ठाधिकरणमारचयति॥
॥ ॥ प्राथम्यमग्नीषोमीये साद्यस्क्राख्ये कृताबुत॥ सवनीयेग्निमोयस्मात्प्रकृतौ तदवेक्षितं॥ आश्विनग्रहसामीप्यं सवनीयप
शोस्थितिः॥ नियतेतत्क्रमे स्थानात्क्लिष्टयोः प्रकृतानयः॥ साद्यस्क्रनामकः कश्चिद्यागः तत्र चश्रूयते॥ सह पशूनालभत इति॥ प्रकृ
तावग्निषोमीयपशुरौपवसथ्ये पूर्वदिन आलभ्यते सवनीयपशुः सुत्यादिने प्रातः सवने आश्विनग्रहादूर्ध्वमालभ्यते॥ अनुबंध्यपशुर
वभृथादूर्ध्वमालभ्यते॥ इह तु त्रयोपि पशवः सहालब्धव्याः सोयं सहालंभः सुत्यादिन आश्विनग्रहादूर्ध्वं सवनीयस्थाने भवतीत्ये
तदवश्यमभ्युपेयं॥ तथा सति प्रधानसोमप्रत्यासत्तिलाभात्॥ तेषु त्रिषु पशुष्वग्नीषोमीयस्य प्रथममुपाकरणं॥ कुतः प्रकृतौ
तत्प्राथम्यस्यावेक्षितत्वादिति चेन्नैवं॥ सवनीयो हि स्वस्थान एव वर्तते॥ आश्विनग्रहसामीप्यस्य सवनीयस्थानत्वात्॥ आश्वि श्रीः
ने ग्रहीते सति सवनीयत्वबुद्धिस्थो भवति॥ प्रकृतौ तदानंतर्यस्य क्लृप्तत्वात्॥ ततः सवनीयस्य प्राथम्ये स्थानान्निश्चिते सति स्था ७८
नभ्रष्टयोरग्नीषोमीयानुबंध्ययोः प्रकृताविव पूर्वोत्तरभावो द्रष्टव्यः॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ स्त्रीपुंसधर्मकौ
सारस्वतौ तद्धर्मगः॥ क्रमः॥ नास्त्यस्ति वात्र नास्त्येवतन्नियामकवर्जनात्॥ याज्यानुवाक्यापाठेन स्त्री प्राथम्यं हि मुख्ययोः॥
मुख्यार्थत्वेन धर्माणां स्यान्मुख्यक्रमतः क्रमः॥ चित्रायागे सप्तानां हविषां मध्ये चतुर्थपंचमे इत्थमाम्नायते सारस्वतौ भवतः

153/1995

एतद्वै दैव्यं मिथुनमिति सरस्वती च सरस्वांश्चेति विगृह्य समासे कृते पुमान्स्त्रियेति सूत्रेणैकशेषात्सारस्वताविति भवति तौ देवते
ययोर्यागयोस्तौ सारस्वतौ यागौ॥ एतच्च मिथुनमिति वाक्यशेषादवगम्यते॥ तयोर्यागयोर्निर्वापादयो धर्माश्चोदकः प्राप्ताः॥
तत्र स्त्रीदेवत्यस्य स्त्रीयागस्य वा प्रथमं निर्वापः कार्यः कुतः॥ श्रुत्यर्थपाठप्रवृत्तिस्थानानामन्यतमस्य नियामकस्याभावादिति प्राप्ते ब्रूमः
॥ होत्रकांडे स्त्रीदेवतायाः पूर्वं याज्यानुवाक्ये समाम्नाते॥ प्रणो देवी सरस्वतीति॥ पश्चात्पुंदेवतायाः पीपिवांसं सरस्वत इति॥ अने
न याज्यानुवाक्याक्रमेण मुख्ययोरीदृशयोर्यागयोर्मध्ये स्त्रीयागस्य प्राथम्यमवगम्यते॥ तथा धर्माणां मुख्ययागार्थत्वान्मुख्यक्रमेणै
व क्रमे नियते सति स्त्रीयागस्यैव प्रथमं निर्वापः कार्यः॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ उपांशुयाज्यत्वे पूर्वमग्नीषोमीय
कियता॥ धर्मानुष्ठान आद्योस्तु मुख्ययोस्तादृशक्रमात्॥ युक्तमौषधधर्माणां प्राथम्यं पूर्वपाठतः॥ पाठक्रमस्य विलंबादाज्यधर्मा
स्तु पश्चिमाः॥ दर्शपूर्णमासयोरुपांशुयाजोग्नीषोमश्चेत्येतदुभयं पौर्णमास्यामाम्नातं॥ तत्रोपांशुयाजस्याज्यं द्रव्यं॥ आज्यधर्मा
उत्पवनचतुर्गृहीतत्वादयः॥ अग्नीषोमीयस्य पुरोडाशो द्रव्यं॥ तस्य धर्मा निर्वापावघातादयः॥ तत्र मुख्यौ यागावुपांशुयाजाग्नीषो
मीयौ पूर्वोत्तरभाविनौ॥ तथा सति पूर्वन्यायेन धर्मक्रमस्य मुख्यक्रमाधीनत्वात्॥ आज्यधर्माणामनुष्ठाने प्राथम्यमिति प्राप्ते
ब्रूमः॥ औषधधर्मा निर्वापादयः पूर्वमाम्नाताः पश्चादाज्यधर्माः तत्र मुख्यक्रमप्रयुक्तमाज्यधर्माणां प्राथम्यं बाधित्वा पाठक्रमा
नुसारेणौषधधर्मा एव प्रथममनुष्ठेयाः पाठक्रमो हि वैदिकैः शब्दैः सहसा प्रतीयते॥ मुख्यक्रमानुसारी तु क्रम उपपत्त्या कल्पि
तः॥ तस्मादग्नीषोमीयपुरोडाशार्थेभ्यः औषधधर्मेभ्य ऊर्ध्वमाज्यधर्मा अनुष्ठेयाः॥ ॥ नवमाधिकरणमारचयति॥
॥ ॥ अग्नीषोमीय आग्नेयात्पूर्वो नो वास्तु पूर्वता॥ ब्राह्मणक्रमतो मैवं मंत्रक्रमबलित्वतः॥ स्मृतिक्रमादनुष्ठानं मंत्राणास्मा
रकत्वतः॥ प्राबल्यं ब्राह्मणस्यास्ति विधिनापि पकृतार्थता॥ अग्नीषोमीययागस्तैत्तिरीयब्राह्मणे पंचमप्रपाठके द्वितीया
नुवाके समाम्नातः॥ ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदिति॥ आग्नेययागस्तु षष्ठप्रपाठके तृतीया
नुवाके समाम्नातः॥ यदाग्नेयोष्टाकपालोमावास्यायां च पौर्णमास्यां चाच्युतो भवतीति॥ तत्रानुष्ठानस्य ब्राह्मणोक्तक्रमाधि
ध्यधीनत्वादग्नीषोमीयस्य प्रथममनुष्ठानमिति प्राप्ते ब्रूमः॥ मंत्रकांडे पूर्वपठिता आग्नेयमंत्रास्तथाहि होत्रकांडे आ
ज्यभागमंत्रानुवाकात् उत्तरस्मिन्ननुवाके प्रथममग्निर्मूर्धेत्यादिके आग्नेय्यौ याज्यानुवाक्ये आम्नायेते॥ ततः प्रजप

तेन खंदेनानीत्यादिके प्राजापत्येन तेनोग्नीषोमा सवेदा सोत्यादिके अग्नीषोमीये॥ अध्वर्यवकांडेर्ऽप्यग्नये जुष्टं निर्वपाम्यग्नी
षोमाभ्यामित्याग्नेयः॥ याजमानकांडेप्यग्नेरहंदेवयज्ययान्नादो भूयासमित्याम्नाय पश्चादग्नीषोमयोरहंदेवयज्ययावृत्रहा भूया
समित्याम्नायते॥ मंत्रक्रमश्च प्रबलः मंत्रैः स्मृत्वा पश्चादनुष्ठेयत्वात्॥ ब्राह्मणत्वं प्राप्तपदार्थविधिनाचरितार्थमतोनुष्ठानस्मार
णायवात्पन्नान् मंत्रान्बाधितुं नालमिति मंत्रक्रमेणाग्नेयस्यैव प्रथमानुष्ठानं॥ ॥ दशमाधिकरणमारचयति॥ ॥ सारस्वताज्य
पूर्वत्वं बार्हस्पत्यचरावुत॥ धर्माणामाज्यनिष्ठानां प्राथम्यमुपदेशतः॥ सक्रमाणां पदार्थानां चोदकप्रापितत्वतः॥ प्राथम्यमंतरं
गत्वादाग्नेयविकृतौ चरौ॥ अध्वरकल्पाविधायामिष्टौ हविस्त्रयं श्रूयते॥ आग्नावैष्णवमेकादशकपालं निर्वपेत्॥ अभिचरन्सर
स्वत्याज्यभागास्याद्बार्हस्पत्यश्चरुरिति॥ अत्र सारस्वतस्य ये धर्मास्त एव पूर्वमनुष्ठेयाः॥ कुतः सारस्वतयागस्य बार्हस्पत्यात्पू
र्वमुपदिष्टत्वात् मुख्यक्रमेण हि धर्मिणां क्रमो युक्त इति प्राप्ते ब्रूमः॥ न तावदत्रोत्पन्नधर्मा औपधधर्माश्चोपदिश्यंते किंतु चोदकेन प्रा
प्यंते॥ चोदकश्च सक्रमानेव पदार्थानतिदिशति॥ प्रकृतौ च धर्माणां प्रथममनुष्ठेयत्वादिहापि बार्हस्पत्यचरुधर्मा एव प्रथमनुष्ठेयाः॥
किंचाग्नेयस्य प्रथमभाविनो विकृतिर्बार्हस्पत्यचरुरूपा॥ उपांशुयाजस्य पश्चाद्भाविनो विकृतिः सारस्वतं आज्यं॥ अतोंतरंगत्वाच्चरुधर्मा ए
व पूर्वभाविनः॥ ॥ एकादशाधिकरणमारचयति॥ ॥ साकमेधगतयाज्यास्त्र्यहस्युः सद्य एव वा॥ प्रातरादेः इयोरङ्गाः सत्वात्त्र्यहं
तावद्यहे॥ सांगमुख्यानुरोधेन प्रातरादिर्विधानतः॥ श्रौतं सद्यस्त्वमन्यत्तु चोदकात्तेन दुर्बलं॥ चातुर्मास्येषु साकमेधनामके तृती
ये पर्वणि श्रूयते॥ अग्नयेनीकवते प्रातरष्टाकपालं निर्वपन्मरुद्भ्यः सांतपनेभ्यो मध्यंदिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे
सायमोदनमिति॥ ता एतास्तिस्र इष्टयो द्व्यहकालीनाः यथा प्रकृतौ पर्वण्युपवसथे चाधानादिकं प्रतिपद्यिष्टिरिति द्व्यहकालीनत्वं न
हत॥ ननु प्रातर्मध्यंदिनसायंशब्दैरेकस्मिन्नेवाह्नि त्रयः काला इत्विमृणामिष्टीनां विहिताः॥ तन्न॥ इयोरप्यङ्गाः प्रातरादिकाल
सद्भावात्त्र्यहेष्वेव प्रातरादिकालेषु स्वकीयेषु ताम्ताम् उपक्रमः परेद्युः प्रातरादिषु ताः समापनीयाः तेनोद्व्यहकालीनत्वमिति प्रा
प्ते ब्रूमः॥ अत्राग्नयेनीकवते प्रातरष्टाकपालं निर्वपदिति सांगं प्रधानं प्रातःकालीनतया विधीयते शब्दश्च स्वत एकमेव प्रातःका
लमभिधापर्यवस्यति॥ प्रातरग्निहोत्रमित्यादौ तद्दर्शनात्॥ तस्मात्सांगस्य प्रधानस्यैकस्मिन्नेव प्रातःकाले विधानात्सद्यस्काली
नत्वं श्रौतं॥ चोदकेन त्वन्वाधानाद्यंगं पूर्वेद्युः प्रातः प्रधानं परेद्युः प्रातरिति कल्प्यते॥ उपदेशश्च चोदकात् बलीयान्॥ तस्मादेकाह

श्री:
७९

159
1995

कालीना इष्टयः॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ प्रयाजेष्वपकर्षोनुयाजेषूत्कर्ष इत्यमृ॥ श्रुतमात्रे तदंगेषु तदाद्येषु चवाग्रि
मः॥ अन्येषां मुख्यकालत्वान्नैवं व्युत्क्रमसंकितः॥ प्रयाजांतेष्वनूयाजादिके चैतौ समूहके॥ अग्नीषोमीयपशौ प्रयाजानामपकर्षः॥
श्रूयते॥ निर्मंतं पशौ प्रयजंतीति॥ प्रकृतौ हविष्यासादिते पश्चात्प्रयाजा इज्यंते इहापि पशुसंज्ञपनादूर्ध्वं हविष्यासादिते पश्चादेव
प्रयाजाश्चोदकेन प्राप्ताः॥ ते चात्र वचनाज्जीवत्येव पशावपकृष्यंते॥ तथा सवनीयपशावनुयाजानामुत्कर्षः श्रूयते॥ आग्नि
मारुतादूर्ध्वमनुयाजैश्चरंतीति तत्र प्रयाजमात्रस्यापकर्षः स्यात्॥ अनुप्रयाजमात्रस्य चोत्कर्षः॥ तावुभावश्रुत्यनुसारेण तथै
वांगीकर्तव्यौ॥ यदि प्रयाजांतस्यांगस्यापकर्षः स्यात्तदा प्रयाजेभ्यः पूर्वभाविनामाघारसामिधेन्यादीनां ततोप्यपकर्षादपंतव्य
वादितानां प्रधानकालीनत्वं न स्यात्प्रयाजमात्रत्वपकृष्टे सत्याघारादीनां मुख्यकालीनत्वं न लुप्यते॥ एवमनुयाजमात्रउत्कृष्टे तत
ऊर्ध्वभाविनां सूक्तवाकशंयुवाकादीनामनुत्कर्षात्प्रधानसंनिधिर्न विनश्यति॥ तस्मात्प्रयाजमात्रस्यापकर्षोनुयाजमात्रस्योत्कर्ष
इति प्राप्ते ब्रूमः॥ प्रकृतौ पदार्थानुक्रमस्य क्लृप्तत्वात्सक्रमाणामेव पदार्थानां चोदकेनातिदेशाद्व्युत्क्रमे सति पूर्वेण पदार्थेनोत्तरपदार्थ
स्य बद्धावनुपस्थापितत्वादनुष्ठानमेव लुप्यते॥ तस्मात्प्रयाजांतस्यांगसमूहस्यापकर्षः॥ अनुयाजादेरंगसमूहस्योत्कर्षः॥ ॥त्र
योदशाधिकरणमारचयति॥ ॥ सावनेष्वेष्टिकानां किं सौमिकेभ्योनपूर्वता॥ पूर्वता वा नियमो नास्ति तद्द्वि दुर्वर्जनात्॥ प्रतिप्रस्था
तृकर्तृत्वे ह्यध्वर्योरपि कर्तृता॥ प्रोक्षणाद्याः पुरा पश्चात्सौमिकाः स्युः प्रवृत्तितः॥ सोमप्रातरनुष्ठेयानुवाकः पठितस्ततः प्रचर
णीहोमादयः पठिताः ततः सवनीयादयः॥ ते च चोदकागतनिर्वापादियुक्ताः॥ ततो बहिष्पवमानस्तोत्र पठितं॥ तत्राध्वर्युर्होत्रे
प्रातरनुवाकं प्रपंदत्वात्तदानीमेव प्रतिप्रस्थातारमैयं प्रेष्यति प्रतिप्रस्थातः सवनीयान्निर्वपस्वेति॥ ततः प्रचरणीहोमादिभ्य
ऊर्ध्वं प्राप्तोपि सवनीयपुरोडाशनिर्वापः पूर्वस्मिन्नेव प्रातरनुवाककाले प्रैषवशादपकृष्टः सवनीयपुरोडाशानामलंकारप्रैषो
त्कर्षएवमाम्नातः॥ बहिष्पवमाने स्तुत आहाग्नीदग्नीन्विहर बर्हिस्तृणीहि पुरोडाशानलंकुरु इति प्रैषोत्कर्ष एवमा[illegible]ति॥ एवं
स्थिते सति प्रकृतावत्र भाविनोलंकरणपूर्वभाविनः प्रोक्षणादयो ये पदार्थास्ते च चोदकप्राप्ताः॥ तेषां निर्वापवदपकर्षस्यालंक
रणवदुत्कर्षस्य चानुक्तत्वादुभयोर्मध्यकालएवानुष्ठानं प्राप्तं॥ तथा सति प्रचरणी[illegible]होमादिभिर्व्यवधानातैः सौमिकपदार्थैः
सह प्रोक्षणादिपदार्थानामैष्टिकानामेककालत्वेनानुष्ठानप्रवृत्तौ पर्यकलहे सति नियामकाभावादैच्छिकः क्रम इति प्राप्ते ब्रूमः॥

प्रातरनुवाकप्रहरणीहोमयोः सौमिकयोः पाठप्राप्तमनुक्रमं विलङ्घ्य प्रपविधिबलादैष्टिकोनिर्वापः प्रवृत्तः॥ तेन च निर्वापे
ण तदनंतरभावि प्रोक्षणादिकं बुद्धावुपस्थाप्यते॥ न तु सौमिकं प्रचरणीहोमादिकं तदा तु केनचिदुपस्थाप्यते॥ न तु निर्वापः॥ प्र
तिप्रस्थातृकर्तृकप्रोक्षणादिकमध्वर्युकर्तृकं इति न निर्वापः प्रोक्षणाद्युपस्थापक इति चेत्॥ प्रयोजकत्वेन निर्वापध्वर्योरपि
कर्तृकत्वात्॥ तस्मादैष्टिकाः प्रोक्षणाद्याः पूर्वमनुष्ठेयाः पश्चात्सौमिकाः प्रचरणीहोमादयः॥ ॥ चतुर्दशाधिकरणमारचय
ति॥ ॥ यूपच्छेदापकर्षः किं तदंतेष्वत एव वा॥ प्रयाजवत्तदंतत्वान्नयन्तेचापकृष्यताम्॥ अग्नीषोमप्रणयनं सौमिकं पाशुकी
छिदा॥ प्रयाजाद्यारवेषम्या कृतमात्रापकर्षणं॥ ज्योतिष्टोमे वैसर्जनहोमादूर्ध्वं प्राचीनवंशगतो वह्निराग्नीध्रीये प्रणेतव्यः
सोमश्च प्राचीनवंशे पूर्वमवस्थापित इदानीं हविर्धाने प्रणेतव्यः तयोरुभयोः प्रणयनादूर्ध्वं यूपच्छेद आम्नातः॥ तदेतत्सर्वं सुत्या
दिनात्प्राचीन औपवसथ्यदिने प्राप्तं॥ तत्र यूपच्छेदादिन त्र्यात्पूर्वस्मिन्दीक्षाकाले प्रकृष्टः दीक्षासु यूपं छिनत्तीति तद्विधाना
तस्मिन्नपकृष्टे प्रयाजन्यायेन तदंतांगसमूहस्यापकर्षणात्प्रणयनमप्यपकृष्यतामिति प्राप्ते ब्रूमः॥ प्रयाजादावाधारादीना
मेकप्रधानं प्रत्यंगत्वेनैकप्रयोगांतःपातित्वादवश्यंभावी परस्परक्रम इति॥ प्रयाजापकर्षे तदंतांगसमूहापकर्षो युक्तः॥ इह तु प्र
णयनं सोमयागांगं यूपच्छेदस्त्वग्नीषोमीयपश्वंगमिति प्रणयनछेदनयोर्नान्योन्यं क्रमोपेक्षितः॥ तस्माच्छ्रुतस्य यूपच्छेदमात्रस्या
पकर्षः॥ ॥ पंचदशाधिकरणमारचयति॥ ॥ सवनीये पिष्टलेपफलीकरणहोमकौ॥ उत्कृष्टव्यौ न वाद्यः स्यादनुयाजोत्तर
त्वतः॥ पश्वर्थाः स्युरनूयाजाः पुरोडाशागतौ इमौ॥ उभौ हेमौ प्रयोगस्य भेदान्नोत्कर्षमर्हतः॥ सवनीयपुरोडाशे पिष्टलेपफलीकर
णहोमौ चोदकेन प्राप्तौ॥ दृषदुपलादिसंश्लिष्टायः पिष्टलेपः तमुद्धृत्य जुह्वां च नु गृहीत आज्ये प्रक्षिप्य दक्षिणाग्नौ जुहोतीति॥
फलीकरणशब्देन तंडुलकरणा उच्यंते॥ तानपि तथा जुहोति। तावेतौ होमौ प्रकृतिवदिहापि अनुयाजोत्तरकालीनौ॥ ते चानुयाजा
अग्निमारुतादूर्ध्वमुत्कृष्टाः इत्युक्तत्वात्तदिव तौ होमावुत्कृष्टव्याविति प्राप्ते ब्रूमः॥ उत्कृष्यमाणा एते अनुयाजाः पश्वर्थाः न तु पु
रोडाशार्थाः पुरोडाशप्रसंगसिद्धेः वक्ष्यमाणत्वात्॥ उक्तहोमौ तु पुरोडाशार्थौ॥ न च तयोः प्रसंगसिद्धिः पशोरपि इष्टाद्यभावेन तद्धो
मासंभवात्॥ एवं च सत्युक्तप्रणयनवद्धोमयोः प्रयोगभेदान्नास्त्यनुयाजैः सहोत्कर्षः॥ ॥ षोडशाधिकरणमारचयति॥
॥ ॥ पुरोडाशाभिवासांतस्यापकर्षोऽस्ति दर्शके॥ न वाद्योस्त्वपकृष्टायां वेदौ वैगुण्यहानये॥ अभिवासात्परा वेदिरिति तत्क्रमबाधतः॥

श्री:
९०

161/1945

प्रागेव विहिता दर्शे वेदिर्नातोपकर्षणं॥ दर्शपूर्णमासयोः पुरोडाशस्य कपालेषु श्रपितस्याच्छादनमाम्नातं॥ भस्मनाभिवासयतीति॥ तत
ऊर्ध्वं वेदिराम्नाता॥ तेनैव क्रमेण पौर्णमासी यागं प्रतिपद्यनुष्ठानं कृतं॥ दर्शयागे तु वेदेरपकर्ष आम्नातः॥ पूर्वेद्युरमावास्यायां वेदिं क
रोतीति॥ तत्र वेदेः पूर्वभाविनोभिवासनांतस्यांगसमूहस्यापकर्षः॥ कर्तव्यः॥ अन्यथा वैगुण्यप्रसंगादिति प्राप्ते ब्रूमः॥ यदि दर्शः
पौर्णमासीविकारः स्यात्तदा पौर्णमास्यां क्लृप्तः क्रमोऽतिदिश्येत॥ न त्वसौ विकार इति कश्चित्क्रमोऽत्र स्यात्तेनान्वेयः॥ क्रमो न्वयनं
च सर्वेषु पदार्थेषु आम्नायपश्चात्पाठादिभिः संपद्यते॥ वेदिपदार्थश्चाभिवासनादूर्ध्वं दर्शपूर्णमाससाधारण्येन नाम्नातः॥ विशे
षतस्तु दर्शयागे पूर्वेद्युराम्नायते॥ तथा सत्यभिवासनवेद्योः क्रमबोधात्प्रागेव दार्शिके वेदेः पूर्वदिनसंबंधावगमात्तदेव तस्याः स्था
नमिति वेदेरपि नास्त्यपकर्षः॥ तत्र कुतोभिवासनांतस्यांगसमूहस्यापकर्षः॥ ॥ सप्तदशाधिकरणमारचयति॥ ॥ दै
वात्प्राप्तनी सायं प्राप्ता चेदग्निहोत्रकं॥ उत्कर्षेति न वोत्कर्षः पौर्वापर्यस्य भावतः॥ भिन्नप्रयोगशाप्तत्वादग्निहोत्रं स्वकालके॥ इष्टिम
ध्येपि कुर्यादथ यागशेषः समाप्यतां॥ चातुर्मास्येषु साकमेधनाम पर्वणि सांतपनीष्टिः श्रूयते॥ मरुद्भ्यः सांतपनेभ्यो मध्यंदिने चरुमि
ति॥ तां चेष्टिं समाप्य सायंकालेग्निहोत्रं हूयते॥ यदि कदाचिद्दैविकान्मानुषाद्वा प्रतिबंधात्सेष्टिः सायमुपक्रांता॥ तदा सेष्टिरग्निहो
त्रस्योत्कर्षमापादयति॥ कुतः इष्ट्यग्निहोत्रयोः पौर्वापर्यसद्भावेनेष्टिं समाप्यैवाग्निहोत्रस्यानुष्ठेयत्वादिति प्राप्ते ब्रूमः॥ प्रयोगभेदा
त्तानयोः शास्त्रीयः कश्चित्क्रमोस्ति॥ सांतपनी तु स्वकालाद्भ्रष्टा॥ अग्निहोत्रस्यापि तद्भ्रंशो माभूदितीष्टिमध्येप्यग्निहोत्रं स्वका
लेनुष्ठाय पश्चादिष्टिशेषः समापनीयः॥ ॥ अष्टादशाधिकरणमारचयति॥ ॥ उक्थ्यात्पूर्वं षोडशिनोत्कृष्येतोत्कृष्यते अथवा॥
स्तोत्रकालायनोत्कर्षः पूर्ववत्षोडशी ग्रहः॥ ग्रहं परांचमुक्थेभ्य इत्यंगांगित्वभासनात्॥ सस्तोत्रग्रह उत्कृष्टे स्तोत्रकालः प्रबाध्य
तां॥ ज्योतिष्टोमे षोडशिग्रहं प्रकृत्य श्रूयते॥ तं पराचमुक्थेभ्यो निगृह्णातीति तृतीयसवने सूर्यास्तमयात्प्रागेवोक्थग्रहास्त
यो गृह्यंते॥ तेभ्यः परस्तादयं षोडशी विहितः॥ यदि कदाचिद्वा उक्थग्रहा अस्तमयादूर्ध्वमुत्कृष्येरन् तदा तत ऊर्ध्वं विहित
स्य षोडशिग्रहस्य नास्त्युत्कर्षः॥ पूर्वन्यायेन कालस्यानुसरणीयत्वात्॥ कालो ह्येवमाम्नातः॥ समयाध्युषिते सूर्ये षोडशिनः
स्तोत्रमुपाकरोतीति समयोस्तमयः तं प्राप्ते सूर्ये स्तोत्रप्रारंभकालः सोयमुत्कर्षे सति बाध्येत तच्चायुक्तं॥ पूर्वत्राग्निहोत्रस्य
स्वकालमबाधनुमेवेष्टिमध्येनुष्ठानांगीकारादिति प्राप्ते ब्रूमः॥ परांचमिति शब्देनोक्थेभ्य उत्तरकालः षोडशिग्रहांगत्वेन

विधीयते॥ ततो मुख्यखग्रहस्य कालमबाधितुमुपसर्जनस्यस्तोत्रस्य कालं बाधित्वा सस्तोत्रो ग्रह उत्कृष्टव्यः॥ ॥ इतिश्री
माधवीये जैमिनिन्यायमालाविस्तरे पंचमाध्यायस्य प्रथमः पादः॥ ॥ द्वितीयपादे प्रथमाधिकरणमारचयति॥ ॥ वाजपेये
किमेकैकपशोः कर्मसमापनं॥ सर्वेषुवैकैकधर्मा आद्यः साहित्यसिद्धये॥ वचनात्पशुसाहित्यं प्रयोगेणास्यानुकल्प्यते॥ धर्मसा
हित्यमेतच्चासिद्धांतेपि न हीयते॥ वाजपेये सप्तदश प्राजापत्येषु पशुष्वेकैकस्मिन्पशावुपाकरणनियोजनादिसंस्काराः सर्वे समा
पनीयाः तथा सति सांगं प्रधानं कर्तव्यमिति प्रयोगवचनेनावगतं धर्माणां साहित्यं प्रसिध्यति चोदकोपि धर्मसाहित्यं प्रापयति॥
प्रकृतौ वपाकरणनियोजनादीनां साहित्यदर्शनात॥ तस्मादत्र कांडानुसमयो न तु पदार्थानुसमय इति प्राप्ते ब्रूमः॥ सप्त
दश प्राजापत्यान्पशूनालभत इति वचनात्पशुसाहित्यमवगतं तच्च प्रलंबं प्रत्यक्षेण पशूनित्यनेनैकशब्देन प्रापितत्वात॥
धर्मसाहित्यं न प्रत्यक्षशब्देन प्रापितं किंतु प्रयोगवचनेन परिकल्प्यते॥ यद्येकस्मिन्प्रयोगे धर्मसाहित्यं न स्यात॥ कदाक
तिपयधर्मविकल्पेन सांगप्राधानानुष्ठानविधिर्नोपपद्येतेत्यर्थापत्तिः॥ चोदकेनापि विकृतो धर्मसाहित्यवचनमनुमीयते॥ त
दुभयं प्रत्यक्षात्पशुसाहित्यवचनाद्दुर्बलं॥ तस्माद्वैश्वदेवीं कृत्वा प्राजापत्यैश्चरंतीति अनेन प्रत्यक्षवचनेनावगतं पशुसाहि
त्यमबाधितुं सर्वेषु पशुष्वेकैक उपाकरणादिधर्मः कर्तव्य इत्येकं पदार्थानुसमयोभ्युपेतव्यो न तु कांडानुसमयः॥ अस्मिन्न
विपक्षे प्रयोगवचनचोदकाभ्यामवगतं॥ धर्मसाहित्यं न विरुध्यते॥ एकस्मिन्नेव प्रयोगे कृत्स्नधर्माणामनुष्ठितत्वात॥
॥ ॥द्वितीयाधिकरणमारचयति॥ ॥ प्रग्रहेतु बहुष्वेषु पूर्वन्यायोस्ति वा न वा अस्ति तत्साम्यतो मैवं पुरोडाशस्य शेषतः॥ या
वतोश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदित्यत्र शतसंख्यादियुक्तबहुष्वश्वप्रतिग्रहेषु बहुपुरोडाशप्रदाहृत
प्रत्यक्षवचनेन साहित्यं प्राप्तं॥ तत्र पूर्वन्यायेन सर्वेषु पुरोडाशेष्वेकैकोधिश्रयणादिधर्मोनुष्ठेय इति चेन्मैवं॥ तप्तेषु कपा
लेषु क्रमेण पुरोडाशानधिश्रित्य यावता कालेन प्रथमपुरोडाशो द्वितीयसंस्कारं कर्तुमागच्छति॥ तावता सन्नःकोपावतित
स्मादेकैकस्मिन्पुरोडाशे कृत्स्नधर्मसमापनमित्येवं कांडानुसमयोभ्युपेतव्यः॥ ॥ तृतीयाधिकरणमारचयति॥ ॥
निर्वापेतु किमेकैकमुष्टेरन्यंगतानवा॥ अस्त्येकैकप्रतिष्ठानात्कपालादिषु तत्समं॥ चतुरोनिर्वपेन्मुष्टीनिति निर्वापसंभ
वात॥ एकैकमुष्टेरंशत्वात्पदार्थत्वं चतुष्टये॥ दर्शपूर्णमासयोराग्नेयाग्नीषोमीयनिर्वापयोः श्रूयते॥ चतुरो मुष्टीन्निर्वपती

163/1945

ति॥ तत्रैकैको मुष्टिर्मुष्ट्यंतरनैरपेक्ष्येण प्रतिष्ठतीत्येकैकस्य मुष्टेर्निर्वापांगभूतपदार्थत्वमस्ति॥ ततो द्वयोर्निर्वापयोः
क्रमेणैकं मुष्टिं निरूप्य ततो द्वितीयमुष्टिरित्येवंविधः पदार्थानुसमयः कर्तव्यः एवं कपालोपधानादिषु योजनीयं॥ द्वयोः
पुरोडाशयोः रर्थक्रमेणैककपालमुपधाय पश्चाद्द्वितीयमुभयत्र क्रमेणोपधेयं इति प्राप्ते ब्रूमः॥ यदि पदार्थत्वं तर्हि किं
स्यात॥ तर्ह्येकस्य मुष्टेस्तदस्तु॥ इह त्वेकविधिगम्य एकः पदार्थः विधिश्चतुःसंख्याविशिष्टानेव मुष्टीन्विदधातीति॥ मु
ष्टिचतुष्टयमेकः पदार्थः॥ एकमुष्टिस्तु तदंशो न तु संपूर्णपदार्थः॥ एवमाग्नेयपुरोडाशे कपालाष्टकोपधानमेकः पदार्थः
॥ अग्नीषोमीये त्वेकादशकपालोपधानं॥ एवं सर्वत्रैकविधिविहितस्यैव पदार्थत्वान्नांशानामनुसमयोस्ति॥ ॥ चतुर्था
धिकरणमारचयति॥ ॥ अवदाने तु समयो होमांते वावदानके॥ पदार्थत्वं विधेयत्वात्तेनानुसमयस्ततः॥ अवद्यतिः प्र
दानांतो वदानस्य तदर्थतः॥ अतोनुसमयस्तत्र होमांतान्न तु केवलात॥ दर्शपूर्णमासयोर्द्विर्हविषोवद्यतीत्येकेन विधिना
विहितत्वाद्द्वित्वसंख्याविशिष्टमवदानमेकः पदार्थः॥ ततस्तेनावदानमात्रेणानुसमयः कार्यः॥ आग्नेयस्य द्विरवदानं कृ
त्वा तद्धोमात्प्रागेवाग्नीषोमीयस्य द्विरवदानमिति प्राप्ते ब्रूमः॥ अवदानं होमपर्यंतमेकः पदार्थः॥ होमस्यावदानमंतरेणा
नुपपत्तेर्होमविधिनैवाक्षिप्तं होमार्थमवदानं॥ अत एव चतुरवत्तं जुहोतीत्येकेन विधिना सावदानक एको होमपदार्थो विहि
तः॥ उपस्तरणाभिघारणाभ्यां सह यच्च चतुरवत्तं तस्मिन्हविर्विषयमवदानद्वित्वं विधातुं द्विर्हविषोवद्यतीत्युच्यते॥ ततो होमां
तस्यावदानस्यैकपदार्थत्वादाग्नेयमवदाय हुत्वा पश्चादग्नीषोमीयावदानमित्यनुसमयः॥ ॥ पंचमाधिकरणमारचय
ति॥ ॥ यूपांजनादिरेकैकः सर्वेष्वानुसमीयते॥ एकैकः पूर्ववन्मैवं वचनात्कांडसंगतेः॥ ज्योतिष्टोमेग्नीषोमीयपशोर्यूपस्य
घृतेनांजनमुच्छ्रयणमवटस्य पर्यूहणं यूपमूलस्य परिदृंहणं मध्ये रशनया परिव्याणमित्येते पदार्था आम्नातास्ते चैकयूपप
क्षे तथैव कर्तव्याः॥ एकयूपस्य च विकल्पः श्रूयते॥ एकयूपो वैकादशिनी वा अन्ये यांयज्ञानां यूपा भवंति॥ एकविंशिन्यश्व
मेधस्येति॥ तत्र यद्रूपपुयूपेष्वंजनादिरेकैकः पदार्थः प्राजापत्यपशूपाकरणादिवदनुसमेतव्य इति प्राप्ते ब्रूमः॥ अंजनादिप
रिव्याणांतं यजमानो यूपं नावसृजेदिति वचनेन यजमानस्य यूपत्यागनिषेधोंजनादिकांडस्यानुसमये सत्युपपद्यते॥ तस्मा
न्नात्र पदार्थानुसमयः॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ किं दैवाद्यवदानेषु कांडानुसमयोथवा॥ एकानुसमयोस्त्वा

ध्यः प्रकृतौ तस्य दर्शनात्॥ पश्वैक्यात्प्रकृतौ सोस्तु विकृतौ तद्द्वहुत्वतः॥ सजातीयपदार्थानुसमयो नंतरत्वतः॥ अग्नीषोमीयपशौ श्रूयते॥ तदेवान्यवदाय नतावत्येव होतव्यं सोविष्टकृतान्यवद्यति सौविष्टकृतान्यवदायतावत्येव होतव्यं ऐडान्यवद्यतीति॥ तत्र प्रधाने देवतार्थानि स्विष्टकृदर्थानि इडाभक्षणार्थानि चेति त्रिविधान्यवदानानि तानि चैतेनैव क्रमेणानुष्ठीयंते॥ प्राजापत्येषु सप्तदशसु पशुषु तानि चोदकप्राप्तानि॥ तत्रैतेषां त्रिविधानामवदानानां कांडं एकैकस्मिन्नवयवेंऽगानुसमेतव्यं॥ तथासति रूपप्रतिसादृश्यलाभादिति प्राप्ते ब्रूमः॥ प्रकृतौ पश्वेकत्वेन पदार्थानुसमयप्रासक्त्यसंभावात् कांडानुष्ठानं॥ इह तु पदार्थानुसमयो युज्यते॥ दैवावदानरूपमेकं पदार्थं सर्वेषु पशुषु संपाद्य पश्चात्सौविष्टकृतावदानं तच्च सर्वेषु कृत्वा पश्चादैडावदानं एवं च सति पाकरणादिष्विव पशूनां साहित्यमबाधितं भवति॥ ततः पश्चानंतर्यात् सजातीयादैवावदानरूपोयः पदार्थः स एव च सर्वेषु पशुष्वनुसमेतव्यः॥ ॥सप्तमाधिकरणमारचयति॥ ॥ नानाबीजेषु नानात्वमुलूखलतुंगे कता॥ अजीनास्तरणादीनां भिन्नत्वात्स्यादनेकता॥ स्तरणादौ तं दुलांते पदार्थे स्यादनुक्रमात्॥ उलूखलैक्यं नीवारश्यामाकादिष्ववस्थितं॥ राजसूये नानाबीजेष्टिराम्नाता॥ अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणां सोमाय वनस्पतये श्यामाकं चरुमित्यादिः॥ तत्रैतेषां बीजानामवघाताय अजिनास्तरणादयश्चोदकेनातिदिष्टाः कृष्णाजिनास्तरणमुपर्युलूखलस्थापनं तत्र बीजावापोवघातः शूर्पेण परावपनं कणेभ्यस्तंडुलानां विवेचनं च॥ तच्चैते कृष्णाजिनास्तरणादयः पृथक् विधिभिर्विहितत्वात्॥ भिन्नाः पदार्थाः॥ ततो नानाबीजेषु कृष्णाजिनास्तरणमनुसमेतव्यं॥ तथासति यावत्यो बीजजातयः तावंति कृष्णाजिनानि तद्वदुलूखलस्याप्यनेकत्वमिति प्राप्ते ब्रूमः॥ व्रीहीनवहंतीति विहितोवघात एकः पदार्थः स च कृष्णाजिनास्तरणादितंडुलनिस्पत्त्यवसानः तं च पदार्थं कृष्णव्रीहिष्वनुष्ठाय श्यामाकेषु स एव पदार्थोनुष्ठेयः॥ तथासत्यनुक्रमेणैकमेवोलूखलं॥ सर्वेषु बीजेष्वन्वेतुं शक्नोति॥ तत उलूखलकृष्णाजिनादीनां नास्त्यनेकत्वं॥ ॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ प्रयाजानुयाजसिध्ये पात्रैक्यमुत भिन्नता॥ एकोपभृद्द्वयार्थेदृष्टातो विकृतौ तथा॥ विकृतौ पात्रभेदोस्तु शुद्धाज्यपृषदाज्ययोः॥ एकपात्रेग्रहाशक्तेर्द्रव्यैक्यं प्रकृतौ द्वयोः॥ अग्नीषोमीयपशौ प्रयाजानुयाजसाधनं द्रव्यं धारयितुमेकमेव पात्रं कर्तव्यं॥ कुतः प्रकृतावुभयार्थस्याज्यस्यैकस्यैवोपभृता धृतत्वेन विकृतावपि तदतिदेशादिति प्राप्ते ब्रूमः॥ प्रकृतिवत्केवलेनाज्येन प्रयाजा इज्यंते॥ अनुयाजास्तु पृषदाज्येन यष्टव्याः पृषदाज्येनानुयाजान्यजतीति तद्विधानात्॥ पृषदा

165
1945

ज्यं नाम दधिमिश्रमाज्यं॥ न हि शुद्धमिश्रयोरेकेन पात्रेण साधारणं संभवति॥ तस्मादत्र पृथक् पात्रं॥ ॥नवमाधिकरणमारचयति॥ ॥नक्षत्रेष्टयुपहोमाः किं नारिष्टेभ्यः पुरा न वा॥ प्रत्यक्षपाठान्मुख्यस्य सामीप्याया तु पूर्वता॥ प्राकृतप्रथमो वा भो वैकृते चरमस्ततः॥ नारिष्टहोमाः पूर्वं स्युरुपहोमास्तु पृष्ठतः॥ अग्न्यादिदेवतायुक्तानां कृत्तिकादिनक्षत्राणामिष्टयः काम्या विहिताः॥ आग्नेयं कृत्तिकाभ्यः पुरोडाशमष्टाकपालमित्यादयः॥ तत्र प्रधानहोमाः अग्निर्नः पातु कृत्तिका इत्यादियाज्यानुवाक्या पुरःसरं हूयंते॥ तत्रोपहोमा एवमाम्नाताः॥ सोत्र जुहोति अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा अंबायै स्वाहा दुलायै स्वाहेति॥ नारिष्टहोमाश्च चोदकेन प्राप्ताः दर्शपूर्णमासयोरवं तेन वोयज्ञ यज्ञिया इत्यादिभिर्मंत्रैराज्याहुतयो नारिष्टहोमाः एतेभ्यो नारिष्टहोमेभ्यः पूर्वमुपहोमाः कर्तव्याः॥ कुतः अष्टाकपालं निर्वपेत्सोत्र जुहोतीति॥ प्रत्यक्षपाठेन मुख्यसामीप्यमुपहोमानां प्रतीयते॥ तच्चातिदिष्टैर्नारिष्टहोमैर्व्यवधानेन बाध्येत॥ तस्मादुपहोमानां पूर्वत्वमिति प्राप्ते ब्रूमः॥ नक्षत्रेष्टिरूपा विकृतिर्विधीयमाना स्वोपकारकमंगजातमपेक्षते॥ तदा चोदकः प्राकृतं नारिष्टहोमादिकमंगं बोधयति प्रत्यक्षवाक्यं तु वैकृतमुपहोमादिकं तयोर्मध्ये कृतोपकारतया नारिष्टहोमाद्यंगत्वं सहसा बुध्यते॥ उपहोमाद्यंगता नूपकारे कल्पिते पश्चाद्बुध्यते॥ ततः प्रधानप्रत्यापन्नारिष्टहोमाः पूर्वमनुष्ठेयाः उपहोमाः पश्चादनुष्ठेयाः॥ ॥दशमाधिकरणमारचयति॥ ॥अभिषेच्य प्राकृतांगसमाप्तौ देवनादि किं॥ मध्ये वा पूर्ववत्सर्वसमाप्तौ देवनादयः॥ अभिषेको पकृष्टोस्मात्पूर्वं प्रत्यक्षपाठतः॥ देवनाद्यास्ततो मध्ये माहेंद्रस्तोत्रतः पुरा॥ राजसूये सोमयागस्याभिषेचनीयस्य संनिधौ विदेवनशौनःशेपोपाख्यानाभिषेकाः क्रमेणाम्नाताः॥ तत्राभिषेचनीये चोदकप्राप्तमंगजातं नारिष्टन्यायेन प्रथमं समाप्य पश्चाद्विदेवनादयः कार्या इति प्राप्ते ब्रूमः॥ माहेंद्रस्तोत्रं प्रत्यभिषिच्यत इति वाक्येन तस्य सोमयागस्य मध्ये अभिषेको पकृष्टः॥ अभिषेकात्पूर्वभाविर्त्वं विदेवनादीनां प्रत्यक्षपाठप्राप्तं॥ ततो माहेंद्रस्तोत्रादपि पूर्वस्मिन्काले प्रयाजाद्यारवद्विदेवनादीनामपकर्षः॥ कर्तव्यः॥ ॥एकादशाधिकरणमारचयति॥ ॥चयने दीक्षणीयादि सावित्राद्यथवा पुरा॥ प्राकृतत्वादिहाद्यस्यादंत्यः प्रत्यक्षपाठतः॥ अग्निचयने सावित्राणि जुहोतीति सावित्रहोम आम्नातः॥ महता प्रबंधेनोखासंभरणादिकमाम्नाय पश्चादाग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इत्यादिना दीक्षणीयादिकमाम्नातं॥ तत्र दीक्षणीयादिकं प्रकृतौ कृतोपकारतया शीघ्रं बुध्यमानत्वात्सावि

चहोमादिभ्यः पूर्वमनुष्ठेयमिति चेन्मैवं॥ प्रत्यक्षपाठेन क्रमावगमात्॥ चोदकप्राप्तस्यापि दीक्षणीयादेरग्निकांडे सावित्रादिभ्य ऊर्ध्वपु
नः पाठात्सावित्रादिष्वनुष्ठितेषु पश्चादनुष्ठानं कार्यं॥ ॥द्वादशाधिकरणमारचयति॥ ॥चयने रुक्मधृत्यादिः पुरोनस्यात्मसंस्कृतिः॥
पाठादाद्योंतिमः कॢप्तक्रमात्याठस्य नक्षतिः॥ अग्निचयने दीक्षणीयादेरूर्ध्वं रुक्मधारणमाम्नातं॥ कंठेधृतः सन्नुरसिलंबमानः
सौवर्णआभरणविशेषो रुक्मशब्दार्थः॥ उखास्थितोग्निः शिक्येवस्थापितः कंठेधार्यमाण उरःप्रदेशं यथानदहति तथाव्यवधान
कत्वेन तद्धारणं॥ तैत्तिरीयब्राह्मणं॥ रुक्ममंतरं प्रतिमुंचते मृतमेव मृत्योरंतर्धत्ते इति॥ यजमानसंस्काराश्च पावनादयः प्रकृतौदीक्ष
णीयानंतरभाविन इहचोदकेन प्राप्ताः तेभ्यः पूर्वमेव रुक्मप्रतिमोकः कार्यः॥ तस्य प्रत्यक्षपाठात्सावित्रादिषु तस्याहृतत्वादि
ति चेन्मैवं॥ यजमानसंस्काराणां दीक्षणीयानंतर्यं प्रकृतौ कॢप्तं॥ रुक्मस्य तु पाठेन तत्कल्पनीयं॥ तस्मात्संस्काराः पूर्वभाविनः न
च सावित्रदृष्टांतो युक्तः दीक्षणीयायाइव संस्काराणां रुक्मप्रतिमोकादूर्ध्वं पुनःपाठाभावात्॥ न च दीक्षणीयानंतर्यबाधिते रुक्मप्र
तिमोकपाठवैयर्थ्यं स्वरूपबोधनेन चरितार्थत्वात्॥ ततो रुक्मप्रतिमोकः पश्चात्कार्य्यः॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमा
लाविस्तरे पंचमाध्यायस्य द्वितीयः पादः॥ ॥तृतीयपादे प्रथमाधिकरणमारचयति॥ ॥एकादशप्रयाजाः किं प्रत्येकं स्यादु
तान्यथा॥ संख्यावृद्धिरिहाद्योस्तु प्रतिमुख्यं गुणायतः॥ प्रत्येकं समुदायेवास्वरूपेण नसिद्ध्यतीति संख्यावृद्धिः प्रयोगानुसारतया
संभविष्यति॥ अग्नीषोमीयपशौ श्रूयते॥ एकादशप्रयाजान्यजतीति॥ तत्र चोदकप्राप्तेषु पंचसु प्रयाजेष्वेकैकस्य प्रयाजस्यैव
मेकादशत्वसंख्यायुक्तः॥ कुतः प्रयाजानुद्दिश्य संख्यागुणे विहिते सति प्रधानं गुणस्याभ्युपेयत्वादिति प्राप्ते ब्रूमः॥ नह्येकैकस्य प्र
याजस्य स्वरूपमात्रमुपजीव्य यमेकादशत्वसंख्या संपादयितुं शक्या॥ नापि पंचप्रयाजसमुदायस्वरूपसास्ति॥ तस्मात्प्रयोगद्वारा
संपादनीया॥ प्रयोगस्याचावर्तयितुमशक्यत्वात्पंचप्रयाजान्द्विरावर्त्य पुनरपि चरमप्रयाजे सकृदावर्तिते सत्येकादशत्वसंख्या संप
द्यते॥ ॥द्वितीयाधिकरणमारचयति॥ ॥आवृत्तिरुपसत्स्वेषां संघस्यैकैकगाथवा॥ त्रिरध्यायं पठेत्यादाविव स्यात्समुदाय
गा॥ ॥प्रथमामध्यमांत्येति प्राकृतक्रमसिद्धये॥ एकैकस्याद्विरभ्यासे षट्संख्यापि प्रसिद्ध्यति॥ अग्नौ श्रूयते षडुपसद इति॥ त
त्र चोदकप्राप्तानां तिसृणामुपसदां पूर्वन्यायेनावृत्या षट्संख्या संपादनीया॥ साचावृत्तिर्दंडकलितवत्समुदायस्य युक्ता॥ यथा दं
डेन भूप्रदेशं संमिमानः पुरुष आमूलाग्रं कृत्स्नं दंडं पुनः पुनः पातयति॥ न तु दंडस्य प्रत्यवयवं पृथगावृत्तिं करोति॥ यथा त्रिवारं श्रीः ८३

167/1945

रुद्राध्यायं जपतीत्यत्र कृत्स्न एवाध्याय आवर्त्यते॥ न त्वध्यायैकदेशा एकैकानुवाकः पृथगावृत्तिः पद्यते॥ तथा सति सृणामुपसदां
समुदाय आवर्तनीय इति चेन्मैवं॥ प्राकृतक्रमबाधप्रसंगात्॥ प्रकृतौ हि दीक्षानंतरभाविनि दिनेद्वातव्या प्रथमोपसत्तन॥ ततऊर्ध्वं दिने द्वि
तीया ततऊर्ध्वं दिने तृतीया॥ ता एताः सकृदनुष्ठाय पुनरुपरितनदिने नुष्ठीयमानायाः प्रथमायाः प्रथमात्वमुपेति चतुर्थीत्वमाया
ति॥ तस्मात्प्राकृतक्रमसिद्ध्ये प्रथमां दिनद्वयेभ्यस्यततो द्वितीयां द्विरभ्यस्येदित्येवं स्वस्थानविरुद्ध्या तासामावृत्तिः कार्या॥ न चा
ध्यायदृष्टांतो युक्तः॥ अनुवाकस्य समुदायस्यैवाध्यायत्वादध्यायस्यैव चावृत्तिविधानात्॥ न त्विह समुदायस्योपसत्वमस्ति॥ तस्मा
त्प्रत्येकमुपसदावर्तनीया॥ अनेनन्यायेन प्रयाजानामेकादशत्वसिद्ध्ये स्वस्थानविवृत्या मुत्तमः प्रयाजस्त्रिरभ्यसनीयः॥ ॥
तृतीयाधिकरणमारचयति॥ ॥सामिधेन्येकविंशत्यामागंतोर्मध्यतः स्थितिः अंतेवामध्यतो धाय्याशब्दितानां तथेक्षणात्॥ इ
ध्यमानेद्वत्यास्ता मध्ये धाय्याविधानतः॥ आगंतूनामधाय्यानां निवेशोंतेहि युज्यते॥ दर्शपूर्णमासयोः सामिधेनीषु श्रूयते॥
एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येति॥ तत्र पठिताः सामिधेन्य ऋच एकादशैव॥ त्रिः प्रथमामन्वाह त्रिरुत्तमामिति विधाना
दावृत्त्या पंचदश संपद्यंते॥ अवशिष्टानां षण्णामृचां ऋग्वेदिनां चतुःषष्टिपठितानामागमेन संख्यापूरणं वक्ष्यते॥ तस्य चागंतो
र्मंत्रस्यस्यास्य सामिधेनीनां सामिधेनीनां श्रूयमाणानां मध्ये निवेशो युक्तः॥ कुतः धाय्याशब्दोदितानामागंतूनां मंत्राणां मध्ये निवे
शदर्शनामिति चेत् मैवं॥ धाय्यानां मध्यंदेशस्य विहितत्वात्॥ इयं वै समिध्यमानवती असौ समिद्धवती यदंतरा तद्धाय्या इति हि श्रूयते॥ प
ठितास्वेकादशसु सामिधेनीषु समिध्यमानो अध्वर इत्यसावृगष्टमी समिद्धो अग्न आहुतेत्यसौ नवमी तयोर्मध्ये धाय्यानां स्थानं धा
य्यात्वं च न सर्वेषामागंतुमंत्राणां किंतु केषांचिदेव॥ पृथुपाजवत्यौ धाय्ये इत्यादि विशेषविधानात्पृथुपाजा अमर्त्य इत्यादिकमृग्द्वयं
इत्यर्थः॥ ये नं धाय्यानामिवेतरेषामागंतूनां मंत्राणां पठितसामिधेनीक्रमविच्छेदेन मध्ये निवेशनाय किंचित्प्रमाणमस्ति॥ तस्मा
दागंतूनामंते निवेशः॥ ॥स्तोमवृद्धौ किमगंतोर्मध्येंतेवास्तु मध्यतः॥ द्वादशाहवदन्यत्र मध्यानुक्तेर्न मध्यमः॥ इदमाम्नाय
ते॥ एकविंशेनातिरात्रेण प्रजाकामं याजयेत्त्रिणवेनौजस्कामं त्रयस्त्रिंशेन प्रतिष्ठाकाममिति॥ तत्र प्रकृतौ बहिष्पवमानस्तो
त्रे त्रयस्तृचा भवंतीति उपास्मैगायतानर इत्यादिरेकः दविद्युतत्या रुचेत्यादि द्वितीयः॥ पवमानस्येत्यादिस्तृतीयः॥ ते षु तृ
चेषु पृथग्ध्यैगानेन त्रिरुत्॥ स्तोमो भवति न त्वत्र पंचदशसप्तदशस्तोमादीनामिवावृत्तिगानमस्ति॥ स च बहिष्पवमानो विकृत

वतिरात्रे चोदकेन प्राप्तः॥ तत्र त्रिवृत्स्तोमं बाधितुमेकविंशादिस्तोमा विहिताः॥ बहिष्पवमान आवृत्तगानाभावात्त्रिषु तृचेष्वपठि
ताभिर्नवभिर्ऋग्भिरेकविंशस्तोमपूरणाभावात्॥ तत्पूरणाय चत्वारस्तृचा आगमयितव्याः॥ त्रिणवस्तोमपूरणाय षट्तृचास्त्र
यस्त्रिंशस्तोमपूरणायाष्टौ तृचाः॥ ऋगागमने चोपरिष्टाद्वक्ष्यते तेषां चागन्तूनां मन्त्राणां प्राकृतबहिष्पवमानमध्ये निवेशः का
र्यः॥ कुतः द्वादशाहे तद्दर्शनादिति प्राप्ते ब्रूमः॥ द्वादशाहे हि वचनमेवमाम्नायते॥ स्तोत्रियानुरूपौ तृचौ भवतः ऋषभ एवं त
स्तृचा भवन्ति तत्र च उत्तमः पर्यास इति॥ अयमर्थः॥ प्रकृतानां बहिष्पवमानगतानां त्रयाणां तृचानां स्तोत्रियोऽनुरूपः प
र्यासश्चेति त्रीणि नामानि॥ अत्र चोदकागतयोरनुरूपपर्यासयोस्तृचयोर्मध्ये ऋषभषण्ढछन्दोयुक्तास्तृचाः कर्तव्याः इति॥
न चैवमतिरात्रे मध्ये निवेशनाय वचनमस्ति॥ तस्मात्क्लृप्तक्रममबाधितुमागन्तूनामन्ते निवेशः॥ ॥ पंचमाधिकरणमारच
यति॥ ॥ आर्भवे साम्न आगन्तोरन्ते मध्येऽथवाग्रिमः॥ पूर्ववत्त्रीणि यज्ञस्येत्युक्त्या मध्ये निवेशनं॥ पूर्वोदाहृतेऽतिरात्रे मा
ध्यंदिनार्भवपवमानयोश्चोदकप्राप्तौ पंचदशसप्तदशस्तोमौ बाधितुमेकविंशादिविष्टुस्तोमो वचनादनुष्ठीयते॥ न
च बहिष्पवमानवदृगागमनं न भवति॥ किंतु सामागमनं स्तोमपूरणमिति दशमे वक्ष्यते॥ तस्य चागन्तोः साम्नः पूर्वो
क्तानामृचामिवान्ते निवेशात्पठितानां मध्ये तत्साम चरमे तृचे गातव्यमिति प्राप्ते ब्रूमः॥ त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्य
नुष्टुप् चात्र ह्येवावपन्त्यत एवोद्वपन्तीति हि विशेष आम्नायते॥ अयमर्थः॥ स्तोमस्य विवृद्धये साम्न आवापः क्रियते कस्ता वचो
द्वापः तावुभावावापोद्वापौ गायत्र्यादिच्छन्दसान्यत्रेति॥ उद्धाते ज्ञातमेतत्स इत्येव माध्यंदिनपवमानस्याद्यस्तृचः स्यादिध्ये
त्येष आर्भवपवमानस्य तावुभौ गायत्रीछन्दस्कौ तत्रावापः न तु त्रिष्टुब्जगतीछन्दस्कयोरन्ययोस्तृचयोः सामावपनीयं॥ ॥
षष्ठाधिकरणमारचयति॥ ॥ अदाभ्यग्रहचित्रिण्यावंगे किं सवने चितौ॥ यागेऽग्नौ वात्र दृष्टत्वादाद्य आवर्त्यतां ततः॥ याग
ग्न्योः फलवत्त्वे नानारभ्योक्तेस्त्वदंगके॥ सवने सवने तस्मान्नैवावृत्तिश्चितौ चितौ॥ अनारभ्य श्रूयते॥ योऽदाभ्यं गृहीत्वा सोमा
य यजत इति चित्रिणीरुपदधातीति च॥ तत्र च ग्रहाणां सवननिष्पादकत्वं प्रत्यक्षेण दृष्टं॥ अदाभ्यग्रहस्यापि सवननि
ष्पादकत्वात्सवनांगत्वे सति प्रतिसवनमदाभ्य आवर्तनीयः॥ तथेष्टकाभिश्चितिनिष्पत्तिदर्शनाच्चित्रिणीनामिष्टका
नां चित्यंगत्वे सति प्रतिचयनं चित्रिणीनामावृत्तिरिति प्राप्ते ब्रूमः॥ सोमयागः फलवान्न तु सवनं तथैवाग्निः फलोपेतो श्रीः ८४

169
1945

न तु चितिः॥ तत्रानारभ्याधीतस्य वाक्यात्संबद्धफलवत्त्वेनैव युक्त इति॥ सवनचयने प्रत्यनंगत्वात्॥ नास्ति तयोरावृत्तिः॥ ॥ सप्तमा
धिकरणमारचयति॥ ॥ चित्रिण्यादेरुत्तमायामुपधानं पुराथवा॥ अव्यवायादुत्तमायां मध्यमायां तु वाक्यतः॥ उत्तमायां पंच
म्यां चितौ चित्रिण्यादेरनारभ्याधीताया इष्टकाया उपधानं युक्तं॥ तथा सति प्रकरणाधीतानां क्लृप्तक्रमाणामिष्टकानां परस्परव्य
वधानं न प्रसज्येतेति चेन्मैवं॥ यां कामयेत ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावितिवाक्येनानारभ्याधीतेन ब्राह्म
णेन विहितानामिष्टकानां मध्यमचितौ निवेशः॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ लोकंपृणात ऊर्ध्वं स्याच्चित्रिण्युत ततः पुरा
बादरायणदृष्ट्योर्ध्वं पूरणोक्तेस्ततः पुरा॥ चित्रिणीरुपदधाति वज्रिणीरुपदधाति भूतेष्टका उपदधातीति विहितं चित्रिण्यादिकं
मध्यमायां चितौ॥ लोकंपृणाभिधाया इष्टकाया ऊर्ध्वमुपधेयं॥ कुतः बादरायणेन तथा दृष्टत्वात्॥ अन्ते तु बादरायण इति सूत्रे
ण बादरायणस्य मतमुपन्यस्तं॥ स ह्यागन्तूनामन्ते निवेशमाह॥ लोकंपृणा च प्रकरणपठितानामिष्टकानां तत्र स्यादूर्ध्वं चित्रि
ण्यादिकमिति प्राप्ते ब्रूमः॥ लोकंपृणाच्छिद्रं पृणत्यूनेन मन्त्रेणोपधीयमानेष्टका लोकंपृणा तस्याः कर्मण्यूनत्वादिदोषपरिहा
रेण संपूर्त्तिहेतुत्वं मन्त्रलिङ्गादवगम्यते॥ ब्राह्मणेऽप्येवमाम्नातं॥ यदेवास्योनं यच्छिद्रं तदनया परिपूरयतीति॥ लोकंपृणाच्छिद्रं पृ
णाति यद्यतस्या इष्टकाया ऊर्ध्वं चित्रिण्यादय उपधीयेरन्॥ तदानीं चित्रिण्यादिगत ऊनत्वच्छिद्रत्वे न पूर्येयातां॥ तस्माल्लोकंपृ
णातः पूर्वं चित्रिण्याद्युपधानं॥ ॥ नवमाधिकरणमारचयति॥ ॥ आहिते पवमानेष्टिसंस्कृते वाग्निहोत्रकं॥ आधानेना
ग्निनिष्पत्तेस्तन्मात्रे कर्म संभवेत्॥ आधानस्यानपेक्षस्य नाग्न्युत्पादकता मता॥ समुच्चितस्य हेतुत्वात्कर्म स्यादिष्टिसंस्कृते॥
अग्न्याधानादूर्ध्वं विलंब्य पवमानेष्टयः क्रियन्ते द्वादशसु रात्रीष्वनुनिर्वपेदिति दूरकालाविधानात्ताभ्यः पुरा द्वादशस्वदिनेषु
अग्निहोत्रमनुष्ठेयं॥ आधानमात्रेणाहवनीयाद्यग्नेर्निष्पन्नत्वादिति प्राप्ते ब्रूमः॥ आधाने पवमानेष्टिनिरपेक्षेण नाहवनी
याद्यग्निरुत्पद्यते॥ अन्यथा पवमानेष्टीनां वैयर्थ्यप्रसंगात्॥ न च विकल्पः आधानमुपजीव्य तस्मादुत्तरकाले विधानात्॥ तत
इष्टिभिः समुच्चित्यैवाधानमग्न्युत्पादकमिति इष्टिभिः संस्कृते वह्नौ पश्चादग्निहोत्रानुष्ठानं॥ ॥ दशमाधिकरणमार
चयति॥ ॥ न धावेद्दधतीत्यादिश्चितौ सत्यां कृता उत॥ आद्यश्चित्तेर्निमित्तत्वान्न कृतावग्निचित्त्वतः॥ इदमाम्नायते॥
अग्निचिद्वर्षति न धावेन्न स्त्रियमुपेयादिति॥ तान्येतान्यग्निचिद्व्रतानि चितेष्वन्नायां सत्यां तदाप्रभृति वर्तन्ते॥ ननु चि

अ॰ कार॰ माला॰

८५

तेन्नोक्तत्वनुष्ठानं प्रतीक्षंते॥ कुतः अग्निचेत्यदेचयनस्य निमित्तत्वेनोपन्यासात्॥ नहिसतिनिमित्ते नैमित्तिकस्य विलंबोयुक्तइति
प्राप्ते ब्रूमः॥ कृतावुपयोक्तुमग्निः चयनेन संस्क्रियते॥ न चानिष्पन्ने क्रतौ चयन संस्कारः॥ सफलो भवति॥ तस्मात्क्रतौ निष्पन्ने
सति पश्चाच्चयनसाफल्यादयं पुरुषोग्निं चितवानित्यमुमर्थमर्हतीति क्रत्वंते तानि व्रतानि॥ ॥एकादशाधिकरणमारचयति॥ ॥
इष्टिदंडादिभिर्दीक्षा किंवेष्ट्यैवोक्तितोग्निमः॥ युक्तः संस्कारइत्येवदंडादेर्व्यंजकत्वतः॥ज्योतिष्टोमेश्रूयते॥आग्नावैष्णवमेकाद
शकपालं निर्वपेद्दीक्षिष्यमाण इति॥ अन्यदपिश्रुतं॥ दंडेन दीक्षयति मेखलयादीक्षयति॥ कृष्णाजिनेन दीक्षयति॥ तत्रेष्टिवद्
दंडादीनामपि साधनत्वाभिधानात्॥ सर्वैरयं दीक्ष्यत इति चेन्मैवं॥ इष्टेः क्रियारूपत्वात्संस्कारहेतुत्वं युक्तं॥ दंडादयस्तु द्रव्यरूपा
न पुरुषं संस्कर्तुं प्रभवंति॥ न चैतावता दंडादिवैयर्थ्यं दीक्षितोयमीत्यभिव्यक्तिरूपस्य दृष्टप्रयोजनस्य सद्भावात्॥ तस्मादिष्ट्यैव
दीक्षासिद्ध्यति॥ ॥द्वादशाधिकरणमारचयति॥ ॥काम्यनैमित्तिकाः कार्या यथापाठं नवाग्निमः॥ पाठस्य क्रमहेतुत्वान्न
प्रयोगैक्यं कुतः॥ काम्ययागाः श्रूयंते॥ ऐंद्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः तथा नैमित्तिकयागाश्च तस्मिन्कांड आ
म्नाताः॥ आग्नेयं पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपातयेदित्या
दयः॥ तत्र पाठः क्रमहेतुरिति प्रयाजोदाहरणेन वर्णितत्वाद्यथापाठमेते यागाः क्रमेण कर्तव्या इति चेन्मैवं॥ एकप्रयोगत्वा
येन परस्परकांक्षाया अभावात्॥ तस्मात्कामो वा निमित्तं वा यदोत्पद्यते॥ तदा तन्नोचितो यागः कर्तव्यः॥ ॥त्रयोदशाधिकर
णमारचयति॥ ॥एतेनेष्ट्वा सर्वसंस्थ उक्तोग्निष्टोमएववा॥ अशेषात्सर्वसंस्थो ज्योतिष्टोमेत्र वर्ण्यते॥ अग्निष्टोमप्रक्रियातत्र
स्य प्रथमयज्ञतः तेन ध्यान्येन यष्टव्यं संस्था आगंतवो परः॥ ज्योतिष्टोमे श्रूयते॥ एषवाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य
एतेनानिष्ट्वाथान्येन यजेत गर्तपत्यमेव तज्जीयते॥ वा प्रमीयत इति॥ अभागर्ते पतितमुच्छिष्टपत्रावल्यादिकं पुनर्नक्वा श्रीः
प्युपयुज्यते केवलं जीर्यते॥ तथा प्रथमतोनुष्ठितं यज्ञांतरं न फलोपयुक्तं यजमानश्च तेनापराधेनापमृत्युभाग्भवतीत्यर्थः॥ ८५
अग्निष्टोमोत्यग्निष्टोमउक्थ्यः षोडश्यतिरात्रोप्तोर्यामो वाजपेयश्चेति ज्योतिष्टोमस्य सप्त संस्थाभेदाः॥ तत्र संस्थाविशे
षमनुपन्यस्य ज्योतिष्टोम इत्येव प्रकृतत्वादेतेनानिष्ट्वेत्येतच्छब्दात्सर्वसंस्थापेतो ज्योतिष्टोमः॥ परामृश्यते सप्तसंस्थाभ
नुष्ठायपश्चाद्यज्ञांतरमनुष्ठेयमिति प्राप्ते ब्रूमः॥ ज्योतिष्टोमस्याग्निष्टोमसंस्थैव नैजंरूपं अग्निष्टोमत्वेनास्य नित्यत्वात्॥

171
1945

अत एव प्रकरणमेतदग्निष्टोमस्येत्येतच्छब्देन स एव परामृश्यते॥ अत्यग्निष्टोमादिसंस्थानां काम्यत्वेनित्यत्वात्॥ नित्यज्योति
ष्टोमस्वरूपत्वमयुक्तमिति संस्था आगंतुकाकारविशेषाः॥ तस्मादग्निष्टोमस्यैव प्रथमयज्ञत्वात्तेनेष्ट्वा यज्ञांतरमनुष्ठातुं युज्य
ते॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥अन्येनेत्यत्र संस्थानामुक्तिः सर्वस्य वाग्रिमः॥ संनिधेस्तद्विकारस्य सर्वस्योक्तिर्हि
वाक्यतः॥ पूर्वोदाहृत एव वाक्ये योयमन्येनेत्यन्यशब्दः सोग्निष्टोमेन सजातीयानत्यग्निष्टोमादिसंस्थाभेदानेव परामृशति
तेषामेव बुद्धौ सन्निहितत्वादिति चेत् मैवं॥ यज्ञानां प्रथमो यज्ञ इत्यनेन वाक्येन सर्वयज्ञप्रतियोगिकस्य प्राथम्यस्योपन्या
सात्॥ बुद्धौ संनिहिता अशेषयज्ञाः अन्यशब्देनोच्यंते तस्मादग्निष्टोमादयः संस्थाभेदा एकाहाहीनसत्ररूपाश्च सोमविकृति
रूपाः सर्वे यागा अग्निष्टोमात्प्रागनुष्ठेयाः॥ सोमविकृतीनामेवायं नियमो न त्विष्टिपशूनामित्यस्मिन्नर्थे लिंगमिदमाम्नायते॥ प्र
जापतिर्वा अग्निष्टोमः स उत्तरानेकाहानसृजत तेस्रष्टा अब्रुवन्वयं स्वेनात्मना मभवाम इति तेभ्यः स्वातंत्र्यं प्रायच्छत्ततः प्राभवन्निति
॥तस्मात्सोमविकृतिष्वेवायं नियमः॥ ॥पंचदशाधिकरणमारचयति॥ ॥एकस्तोमेन्यशब्दस्याद्ध द्वि स्तोमेपि वाग्रिमः॥ त्रि
वृदन्येत्यर्थवादाद्धान्यमात्रस्य संभवात्॥ अत्र पूर्वोदाहृतोन्येनेत्ययमन्यशब्दः एकस्तोमके क्रतौ वर्तते॥ कुतः अर्थवादे तदवग
मात्॥ यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति यः पंचदशः स तं यः सप्तदशः॥ स तं य एकविंशः स तमिति ह्यर्थवादः॥
अस्यायमर्थः॥ त्रिवृदादयश्चत्वारस्तोमा अग्निष्टोमे विद्यंते॥ तेषु त्रिवृत्स्तोमो विकृतिरूपं यं यज्ञं प्राप्नोति स त्रिवृत्स्तोमस्तं यज्ञं
दीपयति प्रकाशयति सर्वतो व्याप्नोतीति स्तोमांतरस्याप्रवेशाय त्रिवृत एव सर्वस्मिन्यज्ञस्वरूपे व्याप्तावयमेकस्तोमकः क्रतु
र्भवति॥ एवं पंचदशादिस्तोमव्याप्तिर्योजनीया॥ तथा सत्यर्थवादादेकस्तोमानामेव बुद्धिस्थत्वात्त एवान्यशब्देनोच्यंते॥ एक
स्तोमकाश्च षट्शताधिकसहस्रेण आम्नाताः॥ त्रिवृदग्निष्टोमो भवति॥ पंचदश उक्थ्यो भवतीत्यादयः॥ तस्माद्द्विस्तोमेन्यश ८५
ब्द इति प्राप्ते ब्रूमः॥ स तं दीपयतीत्यत्र प्रकाशकत्वमुच्यते॥ तच्च व्याप्तिमंतरेण संबंधमात्रादप्युपपद्यते॥ तस्मादग्निष्टोम
प्रतियोगिनया बहुस्तोमकस्तोमसाधारण्येन श्रूयमाणस्यान्यशब्दस्य संकोचहेत्वभावात्सर्वविषयोयमन्यशब्दः॥
॥ ॥इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे पंचमाध्यायस्य तृतीयः पादः॥ ॥चतुर्थपादे प्रथमाधिकरण
मारचयति॥ ॥अश्विनो दशमः पाको यवाग्वा पाक्षिकः क्रमः॥ नियतो वाग्रिमः पाठः क्रत्वर्थानां समत्वतः॥ पाठ

अ० कर० माला०

८६

त्क्रमः कल्पनीयः प्रत्यक्षः स्तु श्रुतेः क्रमः श्रुतिर्नशक्ति मुल्लंघ्य श्रुत्यर्थौ प्रबलौ ततः ज्योतिष्टोम ऐंद्रवायवादिग्रहे ष्वाश्विनग्रहस्तृतीय
स्थाने पठितः ॥ तस्य च दशब्दमस्थानत्वं वाचकेनैव शब्देनाम्नायते॥ आश्विनो दशमो गृह्यत इति तत्क्रमबोधकौ श्रुतिपाठौ स
मबलौ॥ तथाग्निहोत्रहोमादूर्ध्वं यवागूपाकः पठितः स चार्थवशात्पूर्वं प्राप्तः॥ तत्रार्थपाठौ समबलौ॥ तस्मादुभयत्रैच्छिकः क्रम
इति प्राप्ते ब्रूमः॥ पाठो हि न क्रमस्याभिधायकः॥ किंत्वन्यथानुपपत्त्या क्रमं कल्पयति॥ दशम इत्येषा श्रुतिस्तु साक्षादेव क्रम
मभिधत्ते॥ ततः पाठादपि श्रुतिः प्रबला॥ तथा पाठः क्रमं कल्पयन्वस्तुसामर्थ्यमनुसृत्यैव कल्पयति॥ असमर्थं च यवाग्वाः पू
र्वमग्निहोत्रं निष्पत्तुं द्रव्यमंतरेण होमासंभवात्॥ तस्मात्पाठो नवस्तुसामर्थ्यलक्षणमर्थमुपजीव्य तत्प्रवृत्तः स्वार्थस्य पाठात्प्राबल्ये
॥ तथा सति श्रुत्यर्थौ पाठं बाधित्वा क्रमं नियच्छतः॥ ॥ द्वितीयकर्णकमारचयति॥ ॥ अवदानादि सान्नाय्ये पूर्वमाग्नेयकं अथ
वा॥ धर्मप्रवृत्तिक्रमतः सान्नाय्यपूर्वतोचिता॥ प्रदानं पूर्वमाग्नेयेवदानं च तथोचितं॥ अंगानां मुख्यतंत्रत्वान्मुख्यक्रमब
लिष्ठतः॥ दर्शपूर्णमासयोः सान्नाय्यधर्मा वत्सापाकरणदोहनादयः प्रथममाम्नाताः॥ पुरोडाशधर्मा निर्वापावघातादयः प
श्चादाम्नाताः॥ तेनैव पाठक्रमेण धर्मानुष्ठानं प्रवृत्तं ततः प्रावृत्तिकक्रमेणावदानमपि सान्नाय्ये पूर्वमेव कर्तव्यमिति प्राप्ते
ब्रूमः॥ याज्यानुवाक्यादिमंत्रबलादाग्नेयपूर्वं प्रदानमित्युक्तं॥ तच्च प्रदानं फलप्रत्यासत्त्या मुख्यं अवदानं तु तदंगं॥ तथा
सति मुख्यस्य क्रममनुसृत्यावदानमप्याग्नेयपूर्वं कर्तव्यं॥ मुख्यक्रमो हि प्रावृत्तिकक्रमात्प्रबलः प्रावृत्तिके हि क्रमे सान्नाय्ये
पूर्वमवदानमभिघारणमासादनं च कृत्वा प्रदानमकृत्वैवाग्नेयेवदानादीनि कर्तव्यानि॥ तथा सति सान्नाय्ये तु च्छितान्यव
दानादीन्यंगानि मुख्यात्प्रदानाद्विप्रकृष्यंते॥ मुख्यक्रमाश्रयणे त्वाग्नेये प्रथममवदानादि प्रदानांतं कृत्वा पश्चात्सान्नाय्ये
तदनुष्ठीयते॥ तत्र नास्त्यंगांगिविप्रकर्षः॥ नन्ववदानादिप्रदानांतमेकः पदार्थ इत्युक्तं तत्र कुतः क्रमविचारः॥ एवं तर्हि
कृत्वाचिंतास्तु॥ अथवा च्छिद्रकृदवदानादिविषये चिंतास्तु॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ दर्शादीष्ट्या सोमया
गः क्रमोयं नियतो न वा॥ उक्तेराधानसोमस्याधानानंतरताश्रुतेः॥ दर्शपूर्णमासाविष्ट्वा सोमेन यजेतेति क्त्वाप्रत्ययेना
वगम्यमानः क्रमो नियत इति चेन्नैवं॥ सोमेन यक्ष्यमाणोग्नीनादधीतेत्याधानानंतरतायाअपि श्रवणात्तस्मादिष्टिसो
मयोः पौर्वापर्यं न नियतं॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ विप्रस्य सोमपूर्वत्वं नियतं चानयाग्निमः॥ उत्कर्षतो

श्रीः

८६

173
1945

मैवमग्नीषोमीयस्यैव तत्कुतः इष्टिपूर्वत्वं सोमपूर्वत्वं च विकल्पितमिति यदुक्तं॥ तत्र ब्राह्मणस्य सोमपूर्वत्वमेव नियतं कुतः
उत्कर्षश्रवणात्॥ आग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वाग्नीषोमीयो भवति॥ यदेवादः पौर्णमासं हविस्तत्तर्ह्यनुनिर्वपेत
र्हि स उभयदेवतो भवतीति॥ अस्यायमर्थः॥ प्रजापतेर्मुखादग्निर्ब्राह्मणश्चेत्युभावुत्पन्नौ ततो ब्राह्मणस्याग्निरेक एव देव
तेत्याग्नेय एव ब्राह्मणो न तु सोम्यः सोमस्य तद्देवत्वाभावात्॥ यदासौ ब्राह्मणः सोमेन यजते तदासौ सोम्यस्य देवतेत्यग्नीषो
मीयो भवति॥ तस्याग्नीषोमीयस्य ब्राह्मणस्यानुरूपं पौर्णमासमग्नीषोमीयपुरोडाशरूपं हविः सोमादूर्ध्वमनुनिर्वपे
त्तदासौ ब्राह्मणो देवताद्वयसंबंधी भवतीति॥ यद्यप्यत्र कर्मांतरं किंचिद्विधीयत इति कश्चिन्मन्यते॥ तथापि पौर्णमासं
हविरिति विस्पष्टप्रत्यभिज्ञानान्न कर्मांतरं॥ किंतु दर्शपूर्णमासयोः सोमादूर्ध्वमुत्कर्षः॥ तस्माद्विप्रस्य सोमपूर्वत्वमेव
नियतमिति प्राप्ते ब्रूमः॥ नात्र दर्शशब्दः पूर्णमासशब्दो वा कश्चिद्यागवाची श्रूयते॥ पौर्णमासमित्येष तद्धितांतो हविर्वि
शेषणत्वेनोपन्यस्यते॥ तच्च हविरग्नीषोमीयपुरोडाशरूपमिति देवताद्वयेन संस्तवादवगम्यते॥ तस्मादेकस्यैव हविष उत
त्कर्षो न तु कृत्स्नयोर्दर्शपूर्णमासयोः॥ तथा सति ब्राह्मणस्यैकस्मिन्नेवाग्नीषोमीयपुरोडाशे सोमपूर्वत्वनियमः॥ इतरत्र
क्षत्रियवैश्ययोरिवास्याषीष्टिपूर्वत्वसोमपूर्वत्वे विकल्प्येते॥ ॥ पंचमाधिकरणमारचयति॥ ॥ नक्षत्रे नित्याहितेः कालो
बाध्यः सोमस्य वाग्निमः॥ अंगसाम्यात्पुरेवास्य बाधः सोमीयबाधनं॥ इदमाम्नायते॥ सोमेन यक्ष्यमाणोग्नीनादधीत
न नक्षत्रमाद्रियेत न नक्षत्रमिति॥ ऋच्छतिधातुर्दर्शनार्थे वर्तते कृत्तिकानक्षत्रं वा न परीक्षेतेत्यर्थः॥ अनेन निषेधेनाधानस्य विहितः
कालो बाध्यते न तु सोमस्य विहितः कालः॥ वसंते ब्राह्मणोग्नीनादधीत॥ कृत्तिकास्वग्निमादधीतेत्यादिना वसंतादृतवः कृ
त्तिकादिनक्षत्राणि चाधानकालत्वेन विधीयंते॥ सोमस्यापि वसंते वसंते ज्योतिषा यजेतेत्यृतुर्विहितः पुण्यनक्षत्रमपि
शास्त्रांतरेण प्राप्तं॥ तत्र यद्यप्याधानं न सोमस्यांगं तथाप्यंगभूताग्निसंस्कारत्वादंगतुल्यमेवेति तदीय एव कालो बाधनी
य इति चेन्नैवं॥ पूर्वमेव तत्कालस्य बाधितत्वात्॥ यदेवैनं यज्ञ उपनमेदथादधीतेति॥ सोमयागादिचिकीर्षा कालमाधान
स्यापदिशता वाक्येन वसंतकृत्तिकादिकालो बाधितः॥ तस्मात्तु नक्षत्रप्रतीक्षानिषेधेन सोमकाल एव बाध्यते॥ ॥
षष्ठाधिकरणमारचयति॥ ॥ आज्यं चोत्कृष्यते नो वा तस्याग्नीषोमयोगतः॥ आद्यः प्रजापतिं विष्णुं वाय छंदः कि तो
तिमः॥ अग्नीषोमीयस्य पुरोडाशस्य सोमादूर्ध्वमुत्कर्ष इत्युक्तं॥ तद्वदुपांशुयाजार्थं यदाज्यं तस्य उत्कर्षः कार्यः अग्नीषोम

संबंधस्य समानत्वादिति चेन्मैवं॥ विघ्नुप्रज्ञापत्योरपि विकल्पितदेवत्वेन यष्टुं शक्यत्वात्॥ तस्मान्नाज्यस्योत्कर्षः॥ ॥सप्तमाधिकरण
मारचयति॥ ॥ द्व्यहकालाः किमैंद्राग्नाद्याः सद्यस्कालगा उत॥ आद्यः प्रकृतिवन्मैवं विकृत्यक्तिविशेषतः॥ ऐंद्राग्नमेकादशकपा
लं निर्वपेत्प्रजाकामः सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यादयो द्व्यहकालाः॥ कुतः प्रकृतौ तद्दर्शनात्॥ पर्वण्यग्न्यन्वाधानम
मिध्मस्य बर्हिषश्च संपादनं रीति॥ प्रतिपदीष्टिरिति द्व्यहकालत्वं प्रकृतौ दृष्टं तथैव विकृतावपि युक्तमिति चेन्मैवं॥ एकाहका
लस्य वाचनिकत्वात्॥ यदृच्छाय परुना सोमेन आग्रयणेन वा यक्ष्यमाणः सोमावास्यायां पौर्णमास्यां वा यजेतेति वचना चोदकप्रा
प्तं द्व्यहकालत्वं बाध्यते॥ ॥अष्टमाधिकरणमारचयति॥ ॥आमिक्षादेरनियतिः स्यात्सोमादूर्ध्वमेव वा॥ अविशेषादग्निषो
त्वांनासोमेतिविशेषतः॥ वैश्वदेव्यामिक्षेत्यादिः सान्नाय्यविकारः अग्नीषोमीयमेकादशकपालं ब्रह्मवर्चसकाम इत्यादिर
ग्नीषोमीयपुरोडाशविकारः॥ तस्याभयस्य सोमात्प्रागूर्ध्वं वा यथेष्टमनुष्ठानं कुतः विशेषनियमकस्याभावादिति चेन्मैवं॥
नासोमयाजी संनयेदिति निषेधेन सान्नाय्यं सोमादूर्ध्वमुत्कृष्यते॥ अग्नीषोमीयपुरोडाशस्योत्कर्षः पूर्वमेव दर्शितः॥ तस्मात्त
द्विकारयोरप्युत्कर्षो युक्तः॥ ॥नवमाधिकरणमारचयति॥ ॥एकाहानामनियमो दर्शादेरूर्ध्वमेव वा॥ सोमवत्प्रथमो म
यमनुक्तेः स्यान्नदूर्ध्वता॥ गवायजेतेत्यादिना मेकाः सामविकारा एकाहा आम्नाताः॥ तेषामपि सोमवदिष्टिपूर्वत्वं विकल्पि
तमिति चेन्मैवं॥ सोमस्य पूर्वत्वं वचनेन साक्षान्नोक्तं॥ किंतु सोमेन यक्ष्यमाणोग्नीनादधीतेत्याधानानंतर्याभिधाने सत्यर्था
दिष्टः पूर्वं सोमानुष्ठानं संपद्यते॥ तस्मादनुक्तं पूर्वभावित्वं चोदकानातिदिशति॥ अर्थसिद्धमप्यतिदिश्यतामिति चेत्। न॥
इह संभवात्सकृदेवत्वाधानं तथा सति तदानंतर्यं प्रकृतावुपक्षीणं॥ नह्येकस्याधानस्य भिन्नकालीनयोः प्रकृतिविकृत्योः
संबंधः संभवति॥ तस्मादिष्युत्तरकालीनत्वं सोमस्य निवारयितुं समर्थस्याधानानंतर्यस्य विरोधे तनतिदेशाद्दर्शपूर्णमा
साविष्ट्वा सोमेन यजेतेत्युक्तस्योत्तरकालीनत्वस्यातिदेशाच्छेष्टेरूर्ध्वमेव गवादिविकृतयो नुष्ठेयाः॥ ॥इति श्रीमन्माधवी
ये जैमिनिन्यायमालाविस्तरे पंचमाध्यायस्य चतुर्थः पादः॥ ॥अनुष्ठानक्रमः सर्वः पंचमे सम्यन्निरूपितः॥ कोनुष्ठातेत्यपे
क्षायामधिकारोत्र वर्ण्यते॥ अनेन पंचमषष्ठयोरध्याययोः पूर्वोत्तरभाव उपपादितः॥ ॥षष्ठमाध्यायस्य प्रथमपादे प्र
थमाधिकरणमारचयति॥ ॥कर्माधिकारः कर्तुर्नो विं वास्ति न पदश्रुतेः॥ धात्वर्थत्वेभाव्यताभानात्फलभोगविवर्जनात्
बलीयस्त्वाद्विधिश्रुत्यावरुद्धभावनात्र च॥ भाव्यः स्वर्गः पुमर्थत्वात्कर्मयोगाच्च सोस्त्यतः॥ दर्शपूर्णमासाभ्यां स्वर्गकामो

175/1945

यजेतेति श्रूयते॥ तत्र यागक्रियानिष्पादकत्वं कर्तृत्वं फलभोक्तृतया स्वामित्वमधिकारः॥ नादृशोधिकारो यागकर्तुर्नास्ति॥ कुतः
फलभोगाभावात्॥ तथाहि यजेतेत्यत्राख्यातेन भावनाभिधीयते॥ तस्यां च धात्वर्थो भाव्यः एकपदोपात्तत्वात्॥ स्वर्गस्तु पदां
तरोपात्तत्वाद्वाक्येन भाव्यतयान्वेतव्यः॥ तच्च वाक्यमेकपदमेकया श्रुत्या बाध्यते॥ स्वर्गस्य भाव्यत्वाभावे सति गुणत्वमभ्युप
यं॥ स्वर्गस्य शब्दोनात्र सुखवाची॥ किंतु सुखसाधने चंदनादिद्रव्ये भूते॥ लोके तथा व्यवहारात्॥ तच्च कामयितुं योग्यं॥ तेन द्र
व्येण विना यागानिष्पत्तेः॥ तस्मादस्मिन्वाक्ये फलानभिधानेन तद्भोगाभावात्॥ कर्तुर्यागकर्तृत्वमेव न त्वधिकार इत्यधिका
रलक्षणं नारब्धव्यमिति प्राप्ते ब्रूमः॥ यजेतेत्यत्र प्रत्ययस्य केवलमाख्यातरूपत्वमेवेति न मंतव्यं॥ किंतु लिङ्प्रत्ययत्वेन विधि
रूपत्वमप्यस्ति॥ तत्राख्यातत्वाकारेण भावनामाचष्टे विधित्वाकारेण पुरुषं प्रवर्तयति॥ पुरुषश्च स्वाभिमतं फलमंतरेण न प्र
वर्तत इति तदपेक्षितं स्वर्गमेव भाव्यतया विधिरूपादत्ते॥ स्वर्गशब्दश्चोत्कृष्टसुखे रूढः॥ द्रव्ये तु लाक्षणिकः॥ तस्मात्सुखस्य
भाव्यत्वं विधिश्रुत्या सिद्धं॥ धात्वर्थस्य तु भाव्यत्वमेकेन पदेन प्रतीयमानमपि न प्रत्ययेनावगम्यते॥ किंतु प्रकृत्या॥ तथा सति
स्वर्गभाव्यत्वं भावनायाः प्रत्यासन्नेनैकेनैव विधिरूपेणाख्यातप्रत्ययेनावगमात्॥ कर्मयोगादपि स्वर्गस्यैव भाव्यत्वं॥ तस्मा
त्फलभोगसंभवेन कर्तुरधिकारोस्तीति अधिकारलक्षणमारब्धव्यं॥ ॥द्वितीयाधिकरणमारचयति॥ ॥अंधादेश्चास्त्यसौ नो
वा स्वर्गेच्छुत्वास्ति विद्यते॥ प्रधानोक्त्यनुसारेण यथाशक्त्यंगवर्णनं॥ नैवाज्यावेक्षणादीनां पुरुषं प्रति चोदना॥ क्रतुं प्रति विधि
स्तस्मान्नाशक्तस्याधिकारिता॥ अंधः पंगुर्बधिरो मूको गवाश्वादयस्तिर्यंच इत्यादीनां चेतनत्वेन निरतिशयसुखरूपस्वर्गका
मना संभवति॥ अथोच्येत॥ केषुचिदंगेषु शक्तिर्नास्ति॥ तथाह्यंधोनाज्यमवेक्षितुं क्षमः पंगुर्विष्णुक्रमेष्वशक्तः बधिरो नाध्व
र्युप्रोक्तं शृणोति॥ ततः कृतीवाचयतीति विहितस्यानुष्ठानं न सिध्येत॥ मूको नु मंत्रणादावशक्तः॥ तिर्यंचो बहुष्वशक्ता इति॥
तन्न॥ शक्यांगानामनुष्ठेयत्वात्॥ स्वर्गकामो यजेतेत्यनेन प्रधानवाक्येन सर्वाधिकारः प्रतीयते॥ स चाज्यावेक्षणाद्यंगवाक्या
नुसारेण न संकोचयितुं युक्तः किंतु प्रधानानुसारेणांगानुष्ठानमेव संकोचयितुं युक्तं॥ तस्मादंधादेरप्यधिकार इति प्राप्ते ब्रूमः॥
यदाज्यावेक्षणादयः पुरुषार्थतया विधीयेरन्॥ तदा तल्लोपे पिनक्रतोर्वैकल्यं॥ इह तु क्रत्वंगतया ते विहिता इति तल्लोपे क्रतु
रेव न निष्पद्यते॥ तस्मादशक्तस्य नास्त्यधिकारः॥ ॥तृतीयाधिकरणमारचयति॥ ॥स्त्रिया नास्त्यस्ति वा नो पुंल्लिंग
नतदीक्षणीत्यत्र यतो लिंगं संख्यावन्नाविवक्षितं॥ अस्त्युद्देश्यगतत्वेन संख्यया सदृशत्वतः॥ टाब्विभक्तिविकारादेरर्थो

स्त्यप्रकृतेर्नतु॥ स्वर्गकामो यजेतेति पुल्लिंगशब्देनाधिकारिणोभिधानात्सोधिकारः स्त्रिया नास्ति॥ न च ग्रहैकत्ववल्लिंगमविवक्षित
मिति वाच्यं॥ एकत्ववल्लिंगस्य प्रत्ययार्थत्वाभावात॥ प्रकृत्यर्थत्वात्तु ग्रहवद्विवक्षितं पुल्लिंगमिति प्राप्ते ब्रूमः॥ अस्ति स्त्रियाः कर्मा
धिकारः॥ कुतः पुल्लिंगस्याविवक्षितत्वात॥ न ह्येकत्वस्य प्रत्ययार्थत्वमविवक्षायां निमित्तं किंतूद्देश्यगतत्वं॥ इहापि यः स्वर्गका
मः स यजेतेति वचनव्यक्तौ पुल्लिंगस्योद्देश्यगतत्वेनैकत्ववत्संख्यया सदृशत्वान्नास्ति विवक्षितत्वं॥ न च प्रकृत्यर्थो लिंगं किंतु स्त्री
लिंगं ताव टाबादिभिः स्त्री प्रत्ययैरभिधीयते॥ पुल्लिंगं तु दक्षा नित्यस्मिन् द्वितीया बहुवचने विभक्तिविकारेण नकारादेशलक्ष
णेनाभिव्यज्यते॥ तस्माल्लिंगस्य प्रकृत्यर्थत्वाभावादुद्देश्यगतत्वेनाविवक्षितत्वाच्च स्त्रिया अस्त्यधिकारः॥ ॥ चतुर्थाधिकर
णमारचयति॥ ॥ दंपतिभ्यां पृथक्कार्मं सहवाख्यानसंख्यायाः॥ पृथक् स्वमवैगुण्यात्कैत्र्यं दैवतैक्यवत॥ यजेतेत्याख्या
तप्रत्ययागतायाः संख्याया उद्देश्यगतत्वाभावेन विवक्षायामवारयितुमशक्यत्वादेककर्तृत्वात्पत्नीदंपतिभ्यां पृथगेव कर्मानुष्ठेय
मिति चेत मैवं वैगुण्यप्रसंगात॥ कर्मणि तत्र तत्र पत्न्यवेक्षणं यजमानवेक्षणं चेत्युभयमप्याम्नातं तत्र यजमानप्रयोगे पत्न्य
वेक्षणं लुप्येत॥ पत्नीप्रयोगे च यजमानावेक्षणं लुप्यत इत्यवैगुण्याद्वयोः सहाधिकारः॥ न च यजेतेत्येकत्वं विरुद्धं॥ अ
ग्नीषोमौ देवते इत्यत्र यथा व्यासक्तयोर्देवतात्वाद्दैवतैक्यं तथा दंपत्योरेकमेव कर्तृत्वमित्यंगीकारात॥ तस्माद्दंपत्योः सहाधिका
रः॥ ॥ पंचमाधिकरणमारचयति॥ ॥ पुंसोरेकस्य वाधानं वसानाविति तो द्वयोः॥ नैव क्षौमविधिर्द्वित्वं दंपत्योरेकता ततः
॥ आधाने श्रूयते॥ क्षौमे वसानावग्नी आदधीयाताम् इति॥ तत्र वसानाविति पुल्लिंगद्विवचनादुभयोः पुंसोराधानेधिकार इ
ति चेन्मैवं॥ क्षौमस्याप्राप्तस्य विधेयत्वात्पुंद्वित्वस्यापि विधाने वाक्यभेदान्न तद्विधीयते॥ किंतु दंपत्योः सहाधिकारेण प्रा
प्तं द्वित्वमनूद्यते। पतिश्च पत्नी चेति विगृह्य पतिशब्दस्यैकशेषात्पुंलिंगद्विवचनमविरुद्धं तस्मादाधानेधिकारिणः पुंस
एकत्वमेव॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ उपस्थानादि दंपत्योः कृत पुंसो द्वयोरिदं॥ यजमानत्वसाम्येन विद्वत्वात्पुं
स एव तत॥ अगन्म स्वः स्वरित्यनेन मंत्रेणाग्नेयं मित्र महस्त्वा इमं मंत्रैश्च कर्तव्यमादित्यविषयमुपस्थानं॥ आदिशब्देन वसंत
मृतुं प्रीणामीत्यादिना विहितमनुमंत्रणादि तत्सर्वं दंपतिभ्यामुभाभ्यां कर्तव्यं॥ कुतः यजमानत्वस्योभयोः समानत्वात॥ ततो
याजमानत्वसमाख्यया यथा पुंसानुष्ठीयते॥ तथा स्त्रियापीति चेन्न मैवं॥ अध्ययनरहितत्वात्स्त्रिया तदनुष्ठातुमशक्य
त्वात॥ तस्मात्पुंस एवोपस्थानादिकं॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ शूद्रोपियष्टा नो वा स्यात् वेधाध्ययनेवानुपदे

श्रीः
९८

इष्टमुखाद्यस्य कृतुर्वित्वेन स्मृता॥ त्रिवर्णैर्वेदविद्भिः कृतार्था विधयः क्रतोः॥ नाक्षिपंति चतुर्थस्य विद्यांतद्धस्तता कुतः॥ लिखितपाठा
दिना तात्कालिकाचार्योपदेशेन वा शूद्रस्याप्यनुष्ठानहेतुभूतविद्यासंभवाच्छूद्रोपि यागाधिकारीति चेन्मैवं॥ क्रतुविधिवैयर्थ्यपरि
हाराय हि शूद्रस्याविहितापि विद्या कल्प्यते। क्रतुविधयश्च त्रैवर्णिकानुष्ठानेनैव चरितार्थाः संतो न शूद्रस्य विद्यां कल्पयंति॥ त्रैवर्णि
कानां तु विद्या न कल्पनीया॥ अध्ययनविधिनैव विहितत्वात॥ तस्मान्न शूद्रस्य यागाधिकारः॥ ॥ अष्टमाधिकरणमारचयति॥ ॥
धन्येव कर्तान्योपि धन्येव विधिसार्थ्यतः॥ अन्योपि कुरुते द्रव्यमाक्षिप्य द्रुतिवक्रतुः॥ यथा विद्याधिकारहेतुस्तथा धनमपीति ध
निन एव यागाधिकारः॥ तावता विधीनां सार्थकत्वाद्विध्यन्यथानुपपत्त्या दरिद्रस्य धनार्जनमाक्षेप्तुमशक्यं॥ तस्माच्छूद्रवद्दरिद्रो
पि न कर्मण्यधिकारीति चेन्मैवं॥ धनिकस्यापि धनार्जनं न यागविधिभिराक्षिप्तं॥ भोजनादिभिर्धनकार्यैरेव तस्याक्षिप्तत्वात॥ अ
त एव विद्याया अध्ययनविधिरिव धनार्जनस्य न कोपि विधिरस्ति॥ याजनादि विधय उपायनियमार्था इति ह्युक्तं॥ तस्माद्भोजना
दिवत्क्रतोरपि धनकार्यत्वेन धनार्जनापेक्षत्वाद्दरिद्रोपि धनार्जनं कृत्वा क्रतावधिकरोति॥ ॥ नवमाधिकरणमारचयति॥ ॥ अंग
हीनो न कुरुते कर्ता वा नाक्षमत्वतः॥ समाधायांगवैकल्यं करोति द्रव्यहीनवत॥ कश्चिदक्षिरोगेणाज्यमवेक्षितुमसमर्थः॥ अन्यो वा
तरोगेण स्वाधीनपादो विष्णुक्रमेष्वसमर्थः॥ अतो नांगहीनः कर्माधिकारीति चेन्मैवं॥ धनहीनो यथा धनं संपाद्याधिकरोति त
था विकलांगोप्यौषधादिना वैकल्यं समाधायाधिकरोतु॥ ॥ दशमाधिकरणमारचयति॥ ॥ असमाधेयवैकल्ये कथं काम्य
धकर्तृता नित्ये पुत्राहिताग्निश्चेद्यथाशक्ति करोति हि॥ कथमिति अनेन संशयः सूचितः॥ वैकल्यस्य समाधातुमशक्यत्वेनाक्ष
मत्वादत्यंतमनधिकारः एवेति चेन्मैवं॥ काम्ये ह्यंगवैकल्ये फलासिद्धेर्मास्तु तत्राधिकारः॥ नित्यानां त्वाहिताग्निना त्यक्तुमशक्य
त्वादीषदंगलोपं सोढ्वापि नित्येष्वधिकरोति॥ ॥ एकादशाधिकरणमारचयति॥ ॥ विधिर्वरण एकादावपि स्यात्त्रित्व एव वा॥
अविरोधात्पक्ष आद्यो वाक्यसेदाय तूत्तरः॥ दर्शपूर्णमासयोरार्षेयं वृणीत इति विधायेदमाम्नातं॥ एकं वृणीते द्वौ वृणीते त्रीन्
वृणीते न चतुरो वृणीते न पंचातिवृणीत इति॥ ऋषिर्गोत्रप्रवर्तकः कश्यपभरद्वाजादिः तस्य संबंधः आर्षेयः तं वृणीते कथ
यति। उच्चारयति॥ कश्यपगोत्रोहं भरद्वाजगोत्रोहमिति तदुच्चारणं॥ एकमार्षेयमुच्चारयतित्युदाहृतं द्वावार्षेयावुच्चारय
ति॥ उपमन्युवसिष्ठगोत्रोहमित्यादि त्रीनार्षेयानुच्चारयति॥ आंगिरसबार्हस्पत्यभारद्वाजगोत्रोहमित्यादि चतुर आर्षेयान्नो

177
1945

च्चारयेत्॥ पंचार्षेयानतिक्रम्य षडादीनार्षेयान्नैवोच्चारयेदित्यर्थः॥ तत्रैकार्षेयद्व्यार्षेयवाक्येषु विशेषादर्शनादेकं वृणीतइत्यादय
स्त्रयोपि विधयइतिचेन्नैवं॥ वाक्यभेदप्रसंगात्॥ तत्परिहाराय त्रीन्वृणीतइत्यस्यैव विधित्वमस्तु॥ एकं वृणीते द्वौ वृणीतइत्येतदु
भयमवयुत्यानुवादेन स्तावकं॥ एकवरणद्विवरणे अप्रशस्ते अपि यदा कर्तव्ये॥ तदा त्रिवरणस्य प्रशस्तस्य कर्तव्यत्वं किमु वक्तव्य
मिति स्तुतिः॥ चतुर्निषेधपंचातिक्रमनिषेधाभ्यामपि त्रित्वमेव स्तूयते॥ नचतयोर्निषेधो विधातव्यः॥ प्रसक्त्यभावादेव दत्तप्र
वृत्तेः चतुरादयोत्यंतविलंबकारित्वाद प्रशस्ताः॥ त्रित्वं तु न तथेति प्रशस्तं तस्मात्कर्मण्यधिकुर्वन्यजमानस्त्रीचेवोच्चारयेत्॥ नत्व
धूनं नाप्यधिकमिति तात्पर्यार्थः॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ विप्रादिरेव रथकृदन्यो वाद्यो स्तु योगतः॥ रूढेर्वर्णांतरं
तस्याधाने वर्षतुरुच्यते॥ आधाने श्रूयते वर्षासु रथकार आदधीतेति॥ तत्र रथं करोतीति व्युत्पत्त्या त्रैवर्णिको रथकारइति चेन्नैवं॥
संकीर्णजातिविशेषे रूढत्वात्॥ वैश्यायां क्षत्रियादुत्पन्नो माहिष्यः॥ शूद्रायां वैश्यादुत्पन्ना करणी तस्यां करण्यां माहिष्यादुत्पन्नो र
थकारः॥ तथा च याज्ञवल्क्यः॥ माहिष्येण करण्यां तु रथकारः प्रजायतइति॥ तस्य च रथकारस्याधानकालो वर्षर्तुः॥ ॥ त्रयो
दशाधिकरणमारचयति॥ ॥ द्विजः स्थपतिरन्यो वाद्विजः षष्ठीसमासतः॥ कर्मधारयमुख्यत्वान्निषादो रौद्रयागकृत्॥ वास्तम
ये रौद्रं चरुं निर्वपेदिति प्रकृत्य श्रूयते एतया निषादस्थपतिं याजयेदिति॥ वास्तु शब्दः किंचित्प्रकृतिद्रव्यविशेषमाह॥ एतस्यामिष्ट
वधिकारी स्थपतिशब्दस्त्रैवर्णिकः॥ कुतः॥ निषादानामधिपतिरिति षष्ठीसमासस्य त्रैवर्णिके संभवात्॥ तस्याचाधीतवेदत्वेन वि
द्यासंभवाच्चेति चेन्नैवं॥ निषादश्चासौ स्थपतिश्चेति कर्मधारयसमासस्य मुख्यत्वात्॥ षष्ठीसमासे तु संकीर्णजातिविशेषवाचि
ना निषादशब्देन तत्संबंधः उपलक्ष्येत॥ न त्वयं कर्मधारये दोषोस्तितत्स्तात्कालिकाचार्योपदेशादिना विद्यां संपाद्य धनिको नि
षादो रौद्रयागं कुर्वीत॥ ॥ इति श्रीवीरजैमिनिन्यायमालाविस्तरे षष्ठाध्यायस्य प्रथमः पादः॥ ॥ द्वितीयपादे प्रथमाधिकर
णमारचयति॥ ॥ सत्रे फलांशाः प्रत्येकं सर्वं वाद्याः समूहके॥ कर्तृत्वादंत्य एकैकस्यापि तत्वाद्बहुत्वतः॥ इदमाम्नायते॥ ऋद्धिका
माः सत्रमासीरन्निति॥ तत्र सत्रे बहूनां समुदायस्य कर्तृत्वमवगतं॥ सप्तदशावराः सत्रमासीरन्निति श्रवणात्कर्तृत्वेन समुदाय
स्यैव फलित्वात्पुरुषाणां प्रत्येकं फलांशाः एव नतु सर्वफलमेकैकस्यापि समुदायांतःपातिनः कर्तृत्वसद्भावात्॥ अन्यथा समु
दायस्यैकत्वेन सत्रमासीरन्निति श्रुतं कर्तृबहुत्वं नोपपद्येत॥ तस्मादेकैकस्य कर्तुः सर्वफलसद्भावात्सर्वफलकामिनामेवाधि

179
1945

कारो न त्वंशफलकामिनां॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ दर्शे कर्त्रैक्यनियमो नास्त्युतास्ति न कामिति॥ उद्देश्ये ग्रहवत्संख्या
प्रतो नैव विवक्षिता॥ आख्यातोपात्तसंख्या त्वविधेयस्य विशेषणं॥ विवक्षिता ततः सत्यत्र कर्त्रैक्यं विनियम्यते॥ दर्शपूर्णमासा
भ्यां स्वर्गकामो यजेतेत्यत्र स्वर्गकाम उद्देश्यः॥ तद्गतं चैकत्वं ग्रहैकत्ववदविवक्षितं॥ तस्मादेको द्वौ बहवो वा दर्शपूर्णमासयोरधि
कारिण इति प्राप्ते ब्रूमः॥ माभूत्स्वर्गकामपदगतस्यैकत्वस्य विवक्षा यजेतेत्याख्यातंगतं तु यदेकत्वं तद्विधेयस्य विशेषणं वि
धेया तु क्रिया॥ सा च स्वसिद्ध्यै कारकांतरवत्कर्तारमप्याक्षिपतीति क्रियाद्वारा कर्तापि विधेयः॥ अतो विधेयकर्तृगता
यमेकत्वसंख्या साविवक्षितेति कर्तुरेकत्वं नियम्यते॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ असमाप्यं समाप्यं वा काम्यं का
मनिवर्तिते॥ आद्यः प्रयोजनाभावादंत्या निंदादिसंश्रयात्॥ चित्रया यजेत पशुकामः॥ कारीर्या वृष्टिकामो यजेतेत्यादिषु का
मप्रेरितेन पुरुषेण काम्यकर्मोपक्रांतं॥ तस्य च समाप्तेः प्रागेव केनापि निमित्तेन तत्फलप्राप्तौ दोषदर्शनेन वा कामो निवर्तेत तदा क
र्मानुष्ठाने प्रयोजनाभावात्॥ न समापनीयमिति चेन्नैवं॥ प्रक्रांतस्य कर्मणोसमाप्तौ निंदाप्रायश्चित्तयोः श्रवणात्॥ देवता
भ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते। त्रैधातवीयेन यजेतेति तदुभयं श्रुतं॥ तस्मात्समापनीयं॥ ॥ चतुर्थाधिकर
णमारचयति॥ ॥ समाप्यमसमाप्यं वा लौकिकं शास्त्रकल्पनात्॥ आद्यो नो गृहकृष्यादौ शास्त्रकल्पकवर्जनात्॥ रथगृहनि
र्माणादिरूपं यल्लौकिकं कर्म तदपि तत्सकस्मृता युक्तमिति वेदमूलकल्पनाच्चित्रायागादिवन्निवृत्तेपि कामे समापनीयमेवेति
चेन्नैवं॥ रथादेरमणीयत्वस्य दृष्टप्रयोजनस्यान्वयव्यतिरेकाभ्यामेव सिद्ध्युपायावगमात्॥ तत्र ऊहापोहकुशलपुरुषोत्प्रेक्षा
मूला तत्स्मृतिर्न वेदं कल्पयितुं प्रभवति॥ तस्मादवश्यं समापनीयमिति नास्ति नियमः॥ ॥ पंचमाधिकरणमारचयति॥ ॥
पर्युदासो निषेधो वा नाद्याद्गृंजनमित्यसौ॥ नञ्धात्वोरन्वयादाद्यः कल्प्यं संकल्पतः फलं॥ पदान्वयात्तु नञ्विध्योर्निषेधो
नर्थहानये संकल्पे लक्षणाप्राप्तिर्नैव काम्यविधिस्ततः॥ अनारभ्य श्रूयते॥ न कलंजं भक्षयेन्न लशुनं न गृंजनमिति॥ तत्र
न भक्षयेदिति संन्निधिवशान्नञ्धात्वोरन्वये सत्यभक्षणमिति पर्युदासः संपद्यते॥ तथा सति नेक्षेतोद्यंतमादित्यमित्यादा
विव संकल्पो विधेयः॥ तस्य चाभक्षणसंकल्पस्य विश्वजिन्न्यायेन स्वर्गः फलत्वेन कल्पनीय इति चेन्नैवं॥ पदैकदेशस्य धा
तोः पदांतरेणान्वेतुमयोग्यत्वाद्विधायकपदस्य नञ्पदेनान्वये सति रागप्राप्तां भक्षणप्रवृत्तिमनूद्य निषेधस्य विधेयत्वात्॥

अ० क० मा०

९०

न च निषेधो व्यर्थः नरकपातनिवारकत्वात्॥ एवं च सत्यश्रुतं न किमपि कल्पनीयं॥ त्वत्पक्षे पत्यश्रुतः संकल्पकल्पनीय इतितद
र्थेर्थिमि(?)णशब्दे लक्षणाश्रयितव्या॥ तस्मात्स्वर्गकामिनो नात्राधिकारः॥ किंतु नरकाद्भीतस्याधिकारः॥ षष्ठाधिकरणमारचयति
॥ ॥ प्राङ्मुखत्वादिनियम उपनीतेपुराप्युत ऊर्ध्वं मंत्राग्न्यसाध्यत्वादाद्यो त्योस्तु तथा स्मृतेः॥ प्राङ्मुखो न्नानि भुंजीत गुरुरनु
गंतव्योभिवादयितव्यश्च वृद्धः प्रत्युत्थेयः समंतव्यश्चेत्यादिस्मार्तनियम उपनयनात्प्रागप्यनुसर्तव्यः तस्य नियमस्य वैदिके मं
त्रेणाहवनीयाद्यग्निभिर्वा साध्यत्वं नास्तीति प्रागपि तत्संभवादिति चेत् मैवं॥ श्रौतस्याध्ययनादिनियमस्योपनयनानंतरभावि
वेदमूलस्मृतिप्राप्तनियमस्याप्युत्तरस्मिन्नेव काले युक्तत्वात्॥ अत एव स्मर्यते॥ उपनयनादिर्नियम इति॥ प्रागुपनयनात्कामः
चारवादभक्षा इति च॥ तस्मादुपनयनात्पूर्वं नास्ति नियमः॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ यावज्जीवेति सातत्यं स्वका
लेवानिमित्ततः॥ कालांगलोपादाद्यः स्याद्वैधात्या गतोंतिमः॥ इदमाम्नायते॥ यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्श
पूर्णमासाभ्यां यजेतेति॥ तत्र जीवनस्य निमित्तत्वेनोपन्यासात्सति निमित्ते नैमित्तिकस्यावश्यंभावाज्जीवतोनुष्ठानसातत्यम
त्र वर्ण्यते॥ ननु सायंप्रातः कालावग्निहोत्रांगत्वेन चोदितौ॥ अमावास्या पौर्णमासी कालौ दर्शपूर्णमासयोः तथा सत्यंगलो
पः सातत्ये प्रसज्येत नायं दोषः॥ प्रधानलोपाद्वरमंगलोप इति न्यायात्॥ तस्मात्सातत्यमिति प्राप्ते ब्रूमः॥ यद्यपि सायंप्रातरा
दिकालोंगं तथाप्यनुपादेयत्वात् प्रयाजादिवद्विधेयो न भवति॥ किंतु तस्मिन्काले स्वतः प्राप्ते सति कर्मानुष्ठेयतया विधीय
ते॥ तस्य च कालस्य जीवनरूपनिमित्तसंकोचकत्वेनैवान्वयः॥ तथा सत्युक्तकालविशिष्टमेव जीवनं निमित्तं॥ तस्मिन्निमि
त्ते जीवनरूपाविशेषांशो यथानवेधोनापितत्र कुंत्रावयः तथा विशेषणांशः कालोप्यविधेयोन त्यक्तुं शक्यश्च तस्माद्वैध
स्य त्यागासंभवान्न सातत्यं॥ किंतु स्वकालेनुष्ठानं॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ सकृत्स्यादथवावृत्तिर्दर्शादेः शा
स्त्रसार्थता॥ सकृत्स्यात्काल संयुक्तजीवनावृत्तितोंतिमः॥ दर्शपूर्णमासादीनां सकृदेवानुष्ठानं॥ तावता विधिशास्त्रस्य
चरितार्थत्वादिति चेन्मैवं॥ कालविशिष्टजीवननिमित्तस्यावृत्तौ नैमित्तिकस्याप्यावर्तनीयत्वात्॥ तस्मादावृत्तिः॥ ॥ नव
माधिकरणमारचयति॥ ॥ कुंभौ सकृद्भेदहोमो सकृद्वा कृतुसिद्धितः सकृन्निमित्तभेदस्यावृत्तौ होमो सकृद्भवेत्॥ दर्शपूर्ण
मासयोः कुंभ्यादिपात्रभेदमाज्यादिस्कंदनं च निमित्तीकृत्य होम आम्नायते॥ भिन्ने जुहोति स्कन्ने जुहोतीति सायं होमः सकृ

श्री:
९०

त्कार्यः॥ तावतैव क्रतूपकारसिद्धेरिति चेन्मैवं॥ भेदस्य स्कंदनस्य वा निमित्तस्यावृत्तौ होमस्याप्यावर्तनीयत्वात्॥ तस्मान्नास्ति स
कृत्वनियमः॥ ॥ दशमाधिकरणमारचयति॥ ॥ यथाकाम्यमुतावृत्तिर्गुरोरनुगमादिषु॥ स्यादाद्यः प्रीतिहेतुत्वान्नियमाद्दृष्ट
तोंतिमः॥ गुरुरनुगंतव्योभिवाद्यश्चेति विहितेषु गुरुप्रीतिरूपस्य दृष्टस्यैव प्रयोजनत्वात्॥ प्रीत्यनुसारेणानुगमनादिकं सकृदस
कृद्वा स्वेच्छया कर्तव्यमिति चेन्मैवं दृष्टार्थेष्वपि विहितेषु नियमादृष्टसंभवाद्यदा यदा गुरुगमनादिनिमित्तं संपद्यते॥ तदा तदानुग
मनादीन्यनुष्ठेयानि॥ ॥ एकादशाधिकरणमारचयति॥ ॥ सोमाधीति प्रजं काम्यं नित्यं वा कामतोग्रिमः॥ वीप्सानुष्ठेयवि
ज्ञानलोपात्तं नित्यमिष्यते॥ इदमाम्नायते॥ सोमेन यजेत स्वाध्यायमधीयीत प्रजामुत्पादयेदिति॥ तत्र सोमः काम्यः ज्योति
ष्टोमेन स्वर्गकामो यजेतेति कामसंयोगेनाम्नातत्वात्॥ अध्ययनप्रजोत्पादनयोरपि विश्वजिन्न्यायेन स्वर्गफलत्वेन कल्पितस
ति कामियोगोपि कल्प्यते॥ तस्मादिदं त्रयं काम्यमिति चेन्मैवं॥ वीप्सादिना नित्यत्वसिद्धेः वसंते वसंते ज्योतिषा यजेतेति वीप्सा
प्रतिवसंतं निमित्तीकृत्य सोमयागं विधत्ते॥ अध्ययनस्य तु नः स्वर्गः फलं दृष्टप्रयोजनस्यानुष्ठेयविज्ञानस्य संभवात्॥ तत्र क्र
त्वनुष्ठानस्य नित्यत्वात्तद्धेतोरध्ययनस्यापि नित्यत्वमनिवार्यं॥ अनुत्पाद्य सुतं न लोकं गच्छतीति स्मृते [illegible] लौकिकसिद्ध्यर्थ
मुत्पादनस्यापि नित्यत्वं॥ ॥ अनेनैवाभिप्रायेणेदमाम्नातं॥ ॥ यजमानो वै ब्राह्मणस्त्रिभिरृणवा जायते॥ ब्रह्मचर्येणर्षि
भ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासीति अत्र च ब्राह्मणग्रहणमितरयोरप्युपलक्ष
णार्थं सोमादिविधिषु विशेषस्याश्रवणात्॥ तस्मात्सोमादिकं नित्यं॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे ष
ष्ठाध्यायस्य द्वितीयः पादः॥ ॥ तृतीयपादे प्रथमाधिकरणमारचयति॥ ॥ नित्ये सर्वांगसंहारः शक्त्या वाद्यः फलित्वतः॥
॥ शक्त्यात्यागासंभवेन निमित्ते जीवने स्थिते॥ यावज्जीवमग्निहोत्रं जुहोतीत्यादौ नित्ये कर्मणि सर्वाण्यंगान्युपसंहृत्य तद्विशि
ष्ट एव प्रयोगः कर्तव्यः कुतः॥ भावनांशस्य कथंभावस्य समुच्चितैः सर्वैरंगैः परिपूरणेन सर्वांगोपेतस्यैव प्रधानस्य फल
वत्त्वादिति चेत् मैवं॥ अग्निहोत्रदर्शपूर्णमासादिशब्दवाच्यं प्रधानं तस्य च स्ववाक्यगतजीवननिमित्तेनान्वयात्सति जी
वने प्रधानकर्मत्यक्तुमशक्यं॥ ततो वाक्यांतरावगतेष्वंगेषु अशक्यं किंचिदंगं परित्यज्यापि शक्यैरंगैरुपेतं प्रधानं कर्मा
नुष्ठेयं॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ काम्ये शक्त्याथ सर्वांगं शक्त्यालोपस्य संभवात्॥ मैवं लोके निष्फलत्वा

181
1945

शब्दमंगलं नेष्यते॥ प्रधानानुष्ठितौ यद्वज्जीवनस्य निमित्तता॥ काम्यस्य न तथा तस्मात्काम्यस्यांगं हि शक्यते॥ यथा नित्ये
ग्निहोत्रादिकर्मस्व शक्यमंगपरित्यक्तुं॥ तथा काम्येष्वपि ऐंद्राग्न सौर्यादिषु अशक्यांगलोपसंभवात्॥ शक्यांगोपेतमनुष्ठे
यमिति चेन्नैवं॥ अंगलोपे काम्यमानफलानुत्पत्तेः सर्वांगोपेतमेव हि प्रधानं फलसाधनत्वे विहितं॥ तत्र प्रधानस्य त्यागे य
था नास्ति फलं तथांगत्यागेपि॥ फलसाधनत्वं हि शास्त्रैकसमधिगम्यं॥ ततो यद्यावदंगं वा अप्रधानं वा शब्देपात्तं तस्य लोपे
साधनत्वं॥ नास्ति॥ नहि गमनसाधनस्य रथस्य चक्राद्यंगेषु अन्यतमस्य वैकल्ये गमनसाध नत्वं दृष्टं॥ तस्माद्यदा सर्वांगोपसंहारः
कर्तुं शक्यते॥ तदेव काम्यमनुष्ठेयं॥ न च नित्येप्येवमस्त्विति शंकनीयं जीवनं निमित्तीकृत्य तद्विधानात्॥ यथा गृहदाहं निमित्तीकृत्य
विहिता क्षामवतीष्टिर्वैकल्येन कर्तव्या॥ यथा बालोके निमित्तभूतायां बुभुक्षायां सत्यां भोजनमवश्यं कर्तव्यं॥ तथा जीवने सति कर्मावश्यम
नुष्ठेयं॥ न च जीवनवत्फलकामनाया अपि निमित्तत्वं शंकनीयं॥ सत्यामपि कामनायां कर्मणो वश्यंभावाभावात्॥ नहि कामिनः कामा
ननुष्ठाने प्रत्यवायः श्रूयते॥ शास्त्रीयप्रत्यवायाभावेपि फलानुत्पत्तिलक्षणो बाधोस्त्येव॥ यथा बुभुक्षोरभोजने राजदंडाभावेपि पि
क्षाम तूपावा धोस्ति तद्वदिति चेन्नैवं॥ तर्हि यथा फलं सिध्यति॥ यथा कामिना प्रयतितव्यं॥ फलं च शब्दावगतसर्वांगोपसंहारमंतरेण
न सिध्यतीत्युक्तं॥ नित्ये तु न फलसाधनत्वेन विधिः किंतु जीवननिमित्तसंयोगेन॥ तथा सत्यंगवैकल्येपि निमित्तेनैमित्तिकसंयोगश्च
श्रुत्यभिमतो नापैति॥ ततो विकलांगमपि कर्तव्यमेव॥ अत एव नित्यस्याकरणे प्रत्यवायप्रायश्चित्ते शास्त्रेषु वगम्यते॥ काम्ये त्वं
गवैकल्ये शास्त्राभिमतफलसाधनत्वाभावाद्विकलांगं न प्रयोक्तव्यं॥ अत एव तत्त्यागेपि प्रत्यवायप्रायश्चित्ते न स्तः॥ तस्मात्काम्यं क
स्नांगोपेतं कर्तुं यदा शक्नुयात्तदा कुर्यात॥ नित्यं तु यथा शक्नुयात्तथा कुर्यात॥ एतदेवाभिप्रेत्योक्तं॥ तदेव याद्दृक्कीदृक्कुच होतव्य
मिति॥ तस्मान्नित्यस्यांगवैकल्येपि काम्येष्वंगलोपासमाधेः शक्यः॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ नीवारादिद्रव्यभेदात्क
र्मान्यत्वस्यान्नेदेवं वा॥ द्रव्यं कर्मेक्यतः पूर्वस्तत्र षड्ढदतीति मः॥ दर्शपूर्णमासयोः व्रीहिसंभवे नीवारादिस्वीक्रियते तदा कर्मांत
रं तदित्यभ्युपेयं॥ कुतः द्रव्यकर्मणोरेकत्वात् द्रव्यं हि कर्मणः स्वरूपं ततो द्रव्यांतरत्वे कर्मांतरत्वमनिवार्यमिति चेत्॥ मैवं॥ द्र
द्रव्यकर्मणोरीषद्दृष्ट्यापि भावात्॥ द्रव्यमाश्रयः कर्माश्रितं॥ आश्रयाश्रितयोर्भेदाभेदावभ्युपगम्य तादात्म्यसंबंधो वर्ण्यते॥
तस्माद्द्रव्यभेदेपि न कर्म भिद्यते॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ नीवारादिद्रव्यभेदात्कर्मान्यत्वस्यां॥ ॥ द्रव्यप्रतिनि
धिर्नास्ति विद्यते वा न विद्यते॥ मानाभावादस्ति कर्मचोदनाक्षेपिकायतः॥ नित्यकाम्ययोः कर्मणोः श्रुतस्य व्रीह्यादिद्रव्य

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

183/1945

स्यापारे द्रव्यांतरं प्रतिनिधित्वेन क्वापि न विहितं॥ अतो मानाभावान्नास्ति प्रतिनिधिरिति चेत्। मैवं॥ कर्मचोदना हि द्रव्यमंत
रेणानुपपन्नाद्द्रव्यसामान्यमाक्षिपति॥ तत्र व्रीहिशास्त्रं नियामकं तच्चासंभवाद्यदा न प्रवर्तते तदा माभून्नियमः॥ तथापि सा
न्याक्षेपस्य वारयितुमशक्यत्वात्॥ तत्सामान्यं कश्चिद्विशेषे पर्यवस्यतीति प्रमाणसद्भावादस्ति प्रतिनिधिः॥ ततो द्रव्यांतरे
णापि तत्कर्मानुष्ठातव्यमेव॥ न तु श्रुतद्रव्याभावात्कर्मलोपः॥ ॥ पंचमाधिकरणमारचयति॥ ॥ देवाग्निमंत्रप्रोक्षणादाव
स्ति प्रतिनिधिर्न वा पुरवास्तीह यन्मुख्यकार्यं तन्नेति नास्त्यसौ॥ आग्नेयोष्टाकपालः सौर्यं चरुमित्यादावुक्ता अग्निसूर्यादयो
देवाः आहवनीयादयोग्नयः॥ बर्हिर्देवसदनं दामीत्यादयो मंत्राः प्रोक्षणादयः क्रियाः एतेषां देवादीनामपचारे द्रव्यवत्प्र
तिनिधिरस्तीति चेन्नैवं कार्यसिध्यभावात्॥ पुरोडाशनिष्पादने कार्यं॥ व्रीह्यपचारेपि नीवारेण सिध्यति देवादिकार्यं तु
नान्येन सिध्यति॥ न ह्याग्नेययागो विष्णुना निष्पाद्यते॥ नाप्याहवनीयकार्यो होमो संस्कृतेन वह्निना सिध्यति॥ नापि ब
र्हिर्देवसदनमित्येतन्मंत्रसाध्यमर्थप्रकाशनमन्येन मंत्रेण सिध्यति॥ नापि प्रोक्षणकार्यमदृष्टमविहितेनान्यार्थविहितेन वा
क्रियांतरेण सिध्यति॥ तस्मान्नास्ति देवादीनां प्रतिनिधिः॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ माषाद्याः प्रतिनिध्यर्हा न वा
यस्तद्वारणात्॥ नार्हा अयज्ञियत्वोक्तेरर्थात्सृद्धिनिवारणात्॥ मौद्गं चरुं निर्वपेच्छ्रीकाम इत्यत्र मुद्गाभावे माषाद्याः प्रतिनिधित्व
मर्हंति॥ कुतः मुद्गकार्यचरुनिष्पादने समर्थत्वान्नीवारकस्य प्रतिषेधस्य वचनस्याभावाच्चेति चेन्नैवं॥ अयज्ञिया वै माषावर
टकाः कोद्रवाः इतिमाषादिधान्ययायाज्ञियत्ववचनस्य तन्निषेधपर्यवसानात्॥ तस्मान्नार्हा माषाद्याः॥ ॥ सप्तमाधिकरणमा
रचयति॥ ॥ स्वामिनोस्ति प्रतिनिधिर्न वा द्रव्यवदस्ति सः न मृते प्रेरकाभावात् जीवनेप्यफलित्वतः॥ यथा यागसाधनद्रव्यस्य
प्रतिनिधिः तथा क्रतुर्यजमानस्यापि प्रतिनिधिरस्त्विति चेत्। मैवं॥ किं यजमाने मृते सति प्रतिनिधिरन्विष्यते किं वा कार्यांतर
व्यापृते॥ नाद्यः॥ असंभवात्। अन्यस्मिन्नुपचरिते यजमानः प्रतिनिधिं गृह्णाति यजमाने प्रचरिते कोन्यः प्रतिनिधिं गृह्णीया
त्॥ कोवाध्वर्युप्रभृतीन्प्रेरयेत्। न द्वितीयः॥ यजमानकार्यस्य फलिस्यान्यस्मिन्नसंभवात्॥ संभवे वा तस्यैव स्वामित्वेन
प्रतिनिधित्वाभावात्॥ तस्मान्नास्ति यजमानस्य प्रतिनिधिः॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ मृते सत्रिनान्यः स्यात्
स्याद्धानात्रापि पूर्ववत्॥ स्यादस्वाम्येपि कर्त्रैशो सात्तदन्यस्यासिद्धये॥ सत्रिषु बहुषु यजमानेषु कस्मिन्मृते प्रतिनिधिर्नास्ति॥

अ० क० मा०
९३

पूर्वाधिकरणे यजमानप्रतिनिधेर्निराकृतत्वादिति चेन्मैवं॥ मंत्र्यंतरेण तत्सिद्धेः सत्रिणां हि कार्यद्वयं फलभोक्तृत्वं याग
कर्तृत्वं च॥ तत्र प्रतिनिधेः फलित्वाभावेपि कर्तृत्वं संभवति॥ कर्त्रैक्यकार्ये कर्तृत्वं प्रतिनिधिमंतरेण सप्तदशत्वाभावात्॥ षोड
शैव कार्याणि निष्पाद्येरन्॥ एकं कार्यं लुप्येत॥ तस्माद्यजमानस्य प्रतिनिध्यभावेप्यृत्विजः प्रतिनिधिसद्भावात्पुरुषां
तरं प्रतिनिधापयितव्यं॥ ॥ नवमाधिकरणमारचयति॥ ॥ सत्वाम्यप्युपकर्तैव स्वामी तस्तान गत्वतः॥ अनारब्धुः फ
लाभावादस्वामी कर्तृमात्रता॥ यः सत्रिणः प्रतिनिधिः तस्य यजमानस्थाने स्वीकृतत्वेन यजमानत्वमप्यस्तीति चेत् मै
वं॥ आरभ्य समाप्तिपर्यंतमनुतिष्ठतः फलं युक्तं॥ प्रतिनिधिस्तु नारब्धवान्॥ अतः फलाभावाद्यजमानत्वं नास्ति॥ किंतु
कर्तृत्वमात्रमेव॥ मृतस्य तु समाप्त्यभावेपि फलमाम्नायते॥ यो दीक्षितानां प्रमीयेतापि तस्य फलमिति॥ ॥ दशमाधि
करणमारचयति॥ ॥ नास्य स्युः फलि संस्काराः कार्या वा नाफलित्वतः॥ अन्येषां साप्तदश्यार्थमफलिन्यपि ते मताः॥
सत्रे यो यं प्रतिनिधिस्तस्य फलित्वाभावात्फलयोग्यताहेतवो वपनादिसंस्कारा न कर्तव्या इति चेत् मैवं॥ अस्य फलाभा
वेप्यस्मिन्नसंस्कृते सत्यन्येषां यत्साप्तदश्यं तत्संस्कृतेषु सप्तदशसु संस्थितं भवति॥ ततः सप्तदशावराः सत्रमासीरन्निति
एतच्छास्त्रमनुगृहीतं भवति॥ अन्यथा संस्कृताः षोडशैवेति। तच्छास्त्रं बाध्येत॥ यदि बहूनां यजमानानामलाभादव
रा अल्पसंख्या यजमानाः स्युस्तदापि सप्तदशापेक्षिताः। न तु ततोप्यल्पसंख्या इत्यर्थः॥ तस्मादफलिन्यपि तस्मिन्संस्का
राः कर्तव्याः॥ ॥ एकादशाधिकरणमारचयति॥ ॥ किंचित्प्रतिनिधेयं स्याद्धु तत्तुल्यमुताग्रिमः॥ आक्षेपान्न सदृ
श्य मुख्यांशानुगमो यतः॥ श्रुतव्रीह्यपचारे नीवारप्रियंग्वादिकं किंचित् द्रव्यं प्रतिनिधातव्यं॥ प्रधानविधानासामान्य
तो द्रव्यमात्रस्याक्षिप्तत्वादिति चेत् मैवं॥ व्रीहिभिर्यजेतेत्यत्र न जातिः पुरोडाशं निष्पादयति॥ किंतु व्रीहित्वजात्युपलक्षिता
अंशा एव तं निष्पादका इत्यंशानां मुख्यद्रव्यत्वं ते चावयवाः सदृशे नीवारादौ बहवोनुगच्छंति॥ भूयोवयवसामान्यं सादृश्य
मितित्युप गमात्॥ तस्मादत्यंतसदृशमेव प्रतिनिधेयं॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ यवाः प्रतिनिधेयाः किं व्री
ह्यर्थं तत्त्वमाहुत॥ मुख्यलाभादग्रिमो वा व्रीहिपक्षे यवाविधेः॥ व्रीहीणामसंभवे यवानां प्रतिनिधित्वं युक्तं॥ यवैर्यजेतेति
विहितत्वेन मुख्यद्रव्यलाभादिति चेन्मैवं॥ व्रीहियवयोर्विकल्पितत्वेन व्रीहिपक्षे यवविध्यभावात्॥ तस्मात्सदृशमेव प्रति
निधातव्यं॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥ सोमाभावे तु पूतीकविधिः प्रतिनिधावुत॥ नियमावचनादाद्यो लाघ

श्री:
९३

वान्नियम्यते॥ यदि सोमं न विंदेत् पूतीकानभिषुणुयादिति लिङ्प्रत्ययस्य विधिवाचित्वादिदं वाक्यं पूतीकालतास्वंडानां विधायकमि
ति चेत् मैवं॥ सदृशतया प्रतिनिधित्वेन प्राप्तेषु पूतीकादिद्रव्येषु नियममात्रविधौ लाघवात्तस्मात्पूतीकद्रव्यं नियम्यते॥ ॥ चतुर्दशाधिक
रणमारचयति॥ ॥ प्रतिनिध्यपचारे तु तेन मुख्येन वा समं प्रक्रांतत्वादग्रिमोत्यः श्रुतांशसमलाभतः॥ सत्रेत्रवत्तः पुरुषो ब्रह्मा वेद
त्रयमधीतवान्॥ तस्मिन्मृते तादृशस्याभावात्॥ स्वशाखामात्राध्यायी प्रतिनिधापितः तेन च प्रयोगः प्रक्रांतः तस्मिन्नप्यपचरिते पुनः
पुरुषांतरान्वेषणायां लब्धोपि त्रिवेदी न तु मुपेक्ष्य प्रतिनिधिना समं स्वशाखामात्राध्यायिनं गृह्णीयात्॥ एकवेदाध्यायिकर्तृकप्रयोगस्य
प्रक्रांतत्वादिति चेन्मैवं॥ अध्वर्युद्गातृहोतृणां प्रयोगेषु प्रसक्तं वैकल्यं समनुसंधातुं ब्रह्मणो वेदत्रयाध्ययनमपेक्षितं॥ अतो मुख्येन स
दृशं त्रिवेदिनमेव गृह्णीयात्तथा सति त्रिवेदिब्रह्मप्रतिपादकश्रुत्यभिमतैर्बहुभिरंशैर्मुख्यसादृश्यं लभ्येत॥ तस्मान्मुख्येन सदृशस्य ग्रह
णं न तु प्रतिनिधिना सदृशस्य॥ ॥ पंचदशाधिकरणमारचयति॥ ॥ पूतिकस्यापचारे स्यात्तेन सोमेन वा समं॥ आद्यः श्रुतांश
सादृश्यात्पूतीकाविधितोंतिमः यदा सोमप्रतिनिधेः पूतिकस्यापचारः स्यात्तदा तेन पूतिकेन सदृशं द्रव्यांतरमुपादेयं॥ पूतीकान
मभिषुणुयादिति श्रुतेः पूतीकांशैः सादृश्यस्य लाभादिति चेत् मैवं॥ नास्ति पूतीकानां विधिः किंतु नियमार्थं तद्वचनमित्युक्तं॥ ततः
श्रुतस्य सोमस्य समांशलाभाय सोमसमं द्रव्यांतरमुपादेयं॥ ॥ षोडशाधिकरणमारचयति॥ ॥ प्रतिनिध्युद्यमे मुख्यलाभे ग्राह्यं तु
किं द्वयोः॥ संकल्पेन प्रतिनिधिर्मुख्यं शास्त्रार्थलाभतः॥ यदा मुख्यात् व्रीहिन लब्ध्वा नीवारैः संकल्पः कृतः तदा कथंचिद्व्रीहिलाभे
पि संकल्पभ्रंशो माभूदिति नीवारा एवोपादेया इति चेन्मैवं॥ मुख्यशास्त्रार्थलाभेन संकल्पबाधत्वात् व्रीहय एव कर्तव्याः॥ ॥ सप्तदशा
धिकरणमारचयति॥ ॥ अमुख्ये संस्कृते मुख्यलाभे किं ग्राह्यमेतयोः॥ अमुख्यस्तक्षणाद्यूपः खादिरस्तक्षणात्पुनः॥ यदा यू
पार्थं खदिरमलब्ध्वा कदरे तक्षणादिसंस्कृते सति पश्चान्मुख्यः खदिरो यदि पशुनियोजनात्प्रागेव लभ्येत तदा तक्षणादिसंस्कृतः प्र
तिनिधिः कदर एव ग्राह्यः॥ असंस्कृतात्संस्कृतस्य प्रशस्तत्वादिति चेन्मैवं॥ मुख्ये खदिरे लब्धे पुनस्तक्षणादिसंस्कारः कर्तव्यः॥ तथा
सति संस्कृतस्य मुख्यस्य लाभात्प्रतिनिधिः संस्कृतोपि परित्याज्यः॥ ॥ अष्टादशाधिकरणमारचयति॥ ॥ पश्चान्नियुक्ते खदिर
लाभे कार्यं पुनर्न वा॥ साद्गुण्याय पुनः कार्यं मुख्यावृत्तिर्गुणान्न हि॥ यदा संस्कृते प्रतिनिधौ पशुर्नियुज्यते॥ तदा तूर्ध्वं खदिरो य
दि लभ्येत तदापि पूर्वन्यायेन मुख्यलाभात् साद्गुण्याय मुख्ये यूपे पुनर्नियोजनं कार्यमिति चेत् मैवं॥ गुणस्पृतो यूपः॥ पशुनियोजनं प्र

185
1945

अ० क२० माला०
९३

धार्ननहि गुणानुसारेण प्रधानस्यावृत्तिर्युक्ता॥ तस्मान्नियोजनं पुनर्न कार्यं॥ ॥ एकोनविंशाधिकरणमारचयति॥ ॥ अमुख्यमुख्य
संस्कारयोग्ययोग्यत्वदानुकिं॥ आद्योबहुगुणालोपान्नमुख्यायास्तलोपनं॥ अमुख्यः कदरः स्थूलत्वात् तक्षणादिसंस्कारयोग्यः मुः
ख्यस्तु खदिरः सूक्ष्मत्वादयोग्यः तदा तक्षणादिबहुगुणलोपो माभूदिति प्रतिनिधिरेवादरणीय इति चेत् मैवं॥ मुख्यसिद्धये गुणलो
पस्य मोढुंशक्यत्वात्॥ तस्मात्कृशोपि मुख्य एवोपादेयः॥ ॥ विंशाधिकरणमारचयति॥ ॥ नियोजनेप्ययोग्यश्चेत् खदिरः किं
तदा भवेत्॥ मुख्यत्वेन मत्वस्यात्तेहु यथ्थ्यं नहीतरः॥ यदात्यंतकृशात्तक्षणादिरहितोपि खदिरो नियोजनेप्ययोग्यस्तदापि मुख्य
त्वात् खदिर एवोपादेय इति चेत् मैवं॥ उपात्तस्य प्रयोजनाभावान्नियोजनयोग्यः प्रतिनिधिरेव ग्राह्यः॥ ॥ एकविंशाधिकरणमारचय
ति॥ ॥ शेषकार्येप्यपूर्णाश्चेद्व्रीहयः किंतदेतरत्॥ व्रीहयो वा सर्वसिद्ध्यै नीवारादिकमिष्यते॥ पुरोडाशतया व्रीहेः प्रधानत्वादलोप्य
ता॥ शेषकार्याणि लुप्यंतां मुख्ये वैगुण्यतो वरं स्विष्टकृदिडाप्राशित्रभक्षणादीनि शेषकार्याणि तेष्वपर्याप्ताः प्रधानमात्रपर्याप्ता व्रीह
यो यदा लभ्यंते॥ तदानीं सर्वकार्यसिद्ध्यै व्रीहिभ्य इतरन्नीवारादिकमुपादेयमिति चेत् मैवं॥ व्रीहयः पुरोडाशतया प्रधानयागस्य
निष्पादका इति अतः प्रधानस्य वैगुण्ये यद्व्याभावे शेषकार्याणि न लोपमर्हंति॥ तस्मादल्पा अपि व्रीहय एवोपादेयाः॥ ॥ इति श्री
माधवीये जैमिनिन्यायमालाविस्तरे षष्ठाध्यायस्य तृतीयः पादः॥ ॥ चतुर्थपादे प्रथममधिकरणमारचयति॥ ॥ अवत्तनाशतः शे
षात्पुरोडाशादवद्यति॥ यजेदाज्येन वाद्योत्र मध्यपूर्वार्धसंभवात्॥ कृत्स्नस्य मध्यपूर्वार्द्धे यशोवस्थेन ते ततः॥ हविर्नाशादाज्यविधिः
कृतरां सर्वनाशने॥ दर्शपूर्णमासयोः पुरोडाशावदानं श्रूयते॥ मध्यादवद्यति॥ पूर्वार्धादवद्यतीति। तत्रावद्यवत्तं नश्येत॥ तदानीमव
शिष्टात्पुरोडाशात्पुनरप्यवदातव्यं॥ कुतः॥ अवदानापादानयोर्मध्यपूर्वार्द्धयोः शिष्टेपि संभवादिति चेत्॥ मैवं॥ कृत्स्नपुरोडाशग
ते मध्यपूर्वार्धे अपादानत्वेन श्रूयेत॥ नत्ववशिष्टभागगते मध्यपूर्वार्द्धे ततो मुख्यस्य हविषो नाशादाज्यं प्रतिनिध्यापयष्टव्यं अतए
व श्रूयते॥ यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वाज्येन ता देवताः परिसंख्याय यजेतेति॥ तत्र सर्वशब्दस्य निमित्तविशेष
णत्वेनाविवक्षितत्वान्नाशमात्रे सर्वत्राज्यस्य विधिः॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ इडाद्यर्थस्य नाशेन्यः शेषाद्ग्राह्योनवा
ग्रिमः॥ शेषसत्वान्न शोषान्यप्रतिप्रत्यवरोधनात्॥ इडाभक्षणार्थं प्राशित्रभक्षणार्थं वा चात्तं यदि नश्येत॥ तदा शेषस्य सद्भावा
त्॥ तस्माच्छेषात्पुनरवदेयमिति चेत् मैवं॥ तस्य शेषस्यान्यथा प्रतिपत्त्याशंयुवाककालीनभक्षणरूपया वरुद्धत्वात्॥ तस्मादव
दत्तनाशेद्रव्याभावादिडादिकं लुप्यते॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ शेषभक्षाः किमन्येषामृत्विजां वान्यभक्षणं॥ इडायां

श्रीः
९३

187
1945

परिसंख्यानात्स्वाम्य प्राप्तोक्तितोंतिमः॥ दर्शपूर्णमासयोर्थे प्राशित्रादिशेषभक्षास्तेषां भक्षणमृत्विग्भ्योन्यैः कर्तव्यं॥ कुतः ऋत्विजां प
रिसंख्यातत्वात्॥ ऋत्विजां कर्मकरत्वादेव भक्षप्राप्तौ सत्यां पुनरप्येवमाम्नायते॥ यजमानपंचमा इडां भक्षयंतीति॥ तदेतत्पुनराम्ना
नं परिसंख्यार्थं यजमानसहिता ऋत्विजः प्राशित्रादिकं न भक्षयेयुरित्यर्थः॥ तस्मादृत्विग्भ्योन्येषां प्राशित्रादिभक्षणमिति चेत् मैवं॥
यजमानस्य कर्मकरत्वाभावेन पूर्वमप्राप्तं भक्षणमनेन विधीयते॥ तस्मादपरिसंख्यातत्वादृत्विजामेव प्राशित्रादिभक्षणं॥ ॥ चतु
र्थाधिकरणमारचयति॥ ॥ कपालभेदने होमो भग्नेघृष्टे पृथग्योर्भयोः॥ आद्योभेदस्य संगत्वात्संस्कार्यत्वेन मध्यमः॥ संस्कृतावनि
मित्तत्वान्नित्यानित्यविरोधनं॥ निमित्ततासमाभंगेद्घर्षवातोद्वयोर्हुतिः॥ दर्शपूर्णमासयोः कपालं प्रकृत्य श्रूयते॥ भिन्ने जुहोती
ति॥ तत्र भेदशब्दस्य भंगवाचित्वात्कपालभंगे सोयं होम इत्येकः पक्षः होमस्य संस्काररूपत्वादत्यंतभंगे संस्कार्याभावात्संघर्षमा
त्रजन्यस्यैषद्भंगस्यापि भेदशब्दार्थत्वात्कपाले घृष्टे सत्ययं होम इति द्वितीयः पक्षः॥ संस्कारपक्षे भिन्नशब्दस्य संस्कार्यप्रतिपादने
नोपक्षयान्निमित्तप्रतिपादकत्वं न स्यात्॥ तथा सति होमस्य नैमित्तिकत्वाभावे नित्यत्वं वक्तव्यं॥ कपालभेदस्य कादाचित्कत्वात्
संस्कार्यमनित्यमिति नित्यानित्यसंयोगविरोधः प्राप्नोति॥ ततो भिन्नशब्दो निमित्तप्रतिपादकः॥ निमित्तत्वं च भंगसंघर्षयोः
समानं॥ तस्मादुभयोरपि निमित्तयोर्नैमित्तिको होमः कर्तव्य इति राद्धांतः॥ ॥ पंचममधिकरणमारचयति॥ ॥ क्षामेयोगाद्व
योः सर्वदाहेवापूर्वबद्धयोः॥ अंशदाहस्यानित्यत्वात्सर्वदाहे पुनर्यजिः॥ दर्शपूर्णमासयोः श्रूयते॥ अथ यस्य पुरोडाशौ क्षायतस्तं य
ज्ञं वरुणो गृह्णाति॥ यदा तद्धविः संतिष्ठेताथ स तदेव हविर्निर्वपेत्॥ यज्ञो हि यज्ञस्य प्रायश्चित्तिरिति॥ अस्यायमर्थः॥ यस्य यज्ञस्य
पुरोडाशावाग्नेयाग्नीषोमीयौ क्षायतोत्यंतदाहेन मषीभवतस्तं यज्ञं वरुणो गृह्णाति न त्वयं यज्ञो यजमानाय फलं प्रयच्छति॥ यदि ता
दृशहविष्को यज्ञ आसमाप्तेरनुष्ठीयते तदा तत्प्रत्यवायपरिहाराय पुनस्तदेव हविर्निरूप्य यज्ञमनुतिष्ठेदिति॥ तत्र पुरोडाशक्षामे सति
याग नामविहितः॥ स पूर्वोक्तभेदन्यायेनाल्पदाहसर्वदाहयोर्द्वयोरपि कर्तव्य इति चेत् मैवं॥ तप्तेषु कपालेषु पुरोडाशमवरुह्याप्य
ंगारैरधिवासने कृते सति सूक्ष्मो दहेशोस्य वर्जयितुमशक्यत्वेन नित्यत्वात्पुनर्यागस्यांशदाहो निमित्तं न भवति॥ सर्वदाहस्तु कदाचि
त्कत्वान्निमित्तमिति तत्रैवेयं प्रायश्चित्तरूपेष्टिः॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ आर्तौ पंचशरावो यः सदोहद्वयसंक्षये॥ एक
नाशेपि वाद्योस्तु हविर्द्वयमयोक्तितः॥ हविरार्त्युक्तिमात्रेण निमित्तं पर्यवस्यति॥ उभयोस्त्वपि वक्षायामेकनाशेप्यसौ भवेत्॥

दर्शपूर्णमासयोर्द्विर्होमप्रकृत्यश्रूयते॥ यस्योभयंहविरार्त्तिमार्छेदैंद्रं पंचशरावमोदनंनिर्वपेदिति॥ सोयंयागोदोहद्वयक्षयंनि
मित्तीकृत्यानुष्ठेयोनत्वेकदोहक्षयं॥ कुतः उभयशब्दस्य श्रुतत्वात॥ आर्तिशब्दस्यविशेषणत्वेनश्रूयमाणोहविःशब्दोयथावि
वक्षितार्थस्तथाहविःशब्दविशेषणस्योभयशब्दस्यापिविवक्षितार्थत्वादुभयहविरार्त्तिरेवनिमित्तमितिचेत मैवं॥ आर्तिमात्रो
पन्यासेसाकांक्षत्वान्निमित्तंनपर्यवस्यतीतिहविःशब्दार्थोविवक्षितव्यः॥तावतैवनिमित्तस्यपर्यवसितत्वादुभयशब्दार्थोन
विवक्षितः॥हविरार्त्तिमात्रस्यनिमित्तत्वेसतिसायंदोहप्रातर्दोहात्योरुभयोर्निमित्तत्वंसिद्धमेवाशोभयशब्देनानूद्यते॥ तस्मादे
कनाशेद्वयनाशेप्यसावोदनोनिर्वपणीयः॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ अभिषुत्यततोहुत्वाखादेरेकैकहेतुतां॥सं
हत्यावानिमित्तत्वेकोसाहित्याविधितोग्निमः॥ होमाभिषवकर्त्ता असत्रांगत्वेनचोद्यते॥निमित्ततार्थिकीतस्मात्साहित्यंहेतुर्गमतं॥ज्यो
तिष्टोमेश्रूयते॥ हविर्धानेग्रावभिरभिषुत्याहवनीयेहुत्वाप्रत्यंचः परेत्यसदसिभक्षान्भक्षयंतीति॥ तत्राभिषवहोमयोरेकैकत्वम
क्षहेतुः॥ कुतः साहित्यश्रस्याविधेयात॥ अभिषवहोमावत्रनिमित्तत्वेनोच्येते॥ तत्रसाहित्यविधौवाक्यंभिद्येत॥अभिषवहोमौभक्ष
णहेतोचसहितावित्येवंतद्भेदः॥ तस्मात्साहित्यस्याविधेयत्वादभिषवहोमयोः प्रत्येकंलक्षणनिमित्तत्वमितिप्राप्तेब्रूमः॥ नात्रनिमि
त्तहेतोचसहितावित्येवंतद्भेदः॥ किंतु होमाभिषवयोः कर्त्तृभक्षणंप्रत्यंगत्वेनपूर्वमप्राप्तत्वाद्विधीयते॥ तथासत्यभिषवहोमयोर्यन्निमित्तत्वंप्रती
तमुत्यन्यस्यते॥ किंतुहोमाभिषवयोः कर्त्तृभक्षणंप्रत्यंगत्वेनप्रतीयमानंविवक्षितमितिसंहतयोरेवतयोर्निमित्तत्वं॥ ॥अष्टमाधिकरण
यते॥ तदर्थिकमितिवावेयमेददोषात्तथावासाहित्यंप्रतीयमानंविवक्षितमिति ॥द्वावेववद्योर्द्वित्वोपिभक्षणात्पंचशरावकत॥द्वयोरुत्पादकत्वेनपुनरा
मारचयति॥ ॥एकोपिवाह्यनुगमः पुनराधेयकारणं॥द्वावेववद्योर्द्वित्वोपिभक्षणात्पंचशरावकत॥ द्वयोरुत्पादकत्वेनपुनरा
धेयचोदना॥ नैकस्यातोह्यनुगमोहेतुः सूर्योदयादिगः॥ अग्निहोत्रेश्रूयते॥ यस्योभावग्नीअनुगतावभिनिम्लोचेयातांस्र
येयचोदना॥ नैकस्यातोह्यनुगमोहेतुः सूर्योदयादिगः॥ आहवनीयगार्हपत्यावुभावग्नीअनुगतौनष्टौयदास्यतः॥ तदासूर्यस्यास्त
र्वोदाभ्युदियात्पुनराधेयंतस्यप्रायश्चित्तिरिति॥ आहवनीयगार्हपत्यावुभावग्नीअनुगतौनष्टौयदास्यतः॥तदासूर्यस्यास्त
मयउदयोवायदिस्यात्तदापुनराधेयंकर्तव्यमित्यर्थः॥ तत्रयथापंचशरावावाक्येनिमित्तविशेषणभूतउभयशब्दार्थोनवि
वक्षितः तथानिमित्तस्यवह्न्यनुगमस्यविशेषणंद्वित्वमुपेक्षणीयं॥ ततएकस्याप्यनुगमस्यनिमित्तत्वमस्तीतिचेन्नैवं॥ अ
ग्नीआदधीतेतिद्वित्वविशिष्टयोरग्न्युत्पादनायपुनराधेयंचोदितं॥ नत्वेकस्योत्पादनाय नह्येकस्मिन्ननुगतेद्वयोरुत्पाद

श्रीः ९४

189/1945

नंसंभवति॥ तस्मान्नैमित्तिकद्वित्वोपपत्तयेनिमित्तयोरपिवह्न्यनुगमयोर्द्वित्वंविवक्षितव्यं॥ तस्मादस्तमयकालेउदयकालेवा
वह्निद्वयनाशः पुनराधेयहेतुः॥ ॥ नवमाधिकरणमारचयति॥ ॥ द्रव्यप्रतिनिधिः पंचशरावोभिन्नकर्मवा॥ दोहद्वयात्ति
तोदर्शद्रव्यंस्यादीप्सितत्वतः॥ प्राप्तेकर्मणिनैकेनविधिनाद्रव्यदेवते॥ शक्येविधातुंताभ्यांतुविशिष्टंकर्मचोद्यते॥ योयंपं
चशरावओदनः पूर्वमुदाहृतः॥ नासौकर्मांतररूपः किंतु पूर्वस्मिन्नेवकर्मणिदोहद्रव्यरूपेद्रव्येपचरितेसतितत्प्रतिनिधिद्र
व्यत्वेनायंविधीयते॥ कुतः दर्शयागेद्रव्यस्यापेक्षितत्वादितिचेन्नैवं॥ ऐंद्रं पंचशरावदितिद्रव्यदेवतयोः प्रतीतेकर्मांतरवि
धेर्वारयितुमशक्यत्वात॥ यदिपूर्वस्मिन्नेवकर्मण्यमर्थविधीयेत॥ तदाकर्मणः प्राप्तत्वादुभयोर्द्रव्यदेवतयोर्विधौवाक्यंभि
द्येत॥ तस्माद्द्रव्यदेवताभ्यांविशिष्टंकर्मांतरंविधीयते॥ ॥ दशमाधिकरणमारचयति॥ ॥ दर्शप्रत्याम्नायएतदंगंवाहवि
रार्त्तितः॥ दर्शयागेनिवृत्तेस्यप्रत्याम्नायतयाविधिः॥ पूर्वद्रव्यविनाशेपिद्रव्यांतरस्यान्यस्यसंभवात॥ अनिवृत्तेस्तदंगंस्याद्दा
र्न्निवैगुण्यहानये॥ पंचशरावद्रव्यकमिंद्रदेवताकं यत्कर्मांतरंकथितं॥ तदेतद्दर्शयागस्यप्रतिनिधित्वेनविधीयते॥ कुतः
॥उभयहविरार्त्यादर्शयागस्यनिवृत्तत्वादितिचेत मैवं॥ पूर्वयोर्दधिपयसोर्नाशेपिपयोंतरेणदध्यंतरेणचदर्शानुष्ठीय
मानेहविरार्त्तिकृतंवैगुण्यंपरिहरन्नयंपंचशरावयागोदर्शयागस्यांगंसंभवति॥ ॥ एकादशाधिकरणमारचयति॥ ॥
सत्रायागुरुतेयोयंयजेद्विश्वजितेत्यसौ॥ यः कोप्युत प्रवृत्तस्यादर्थेप्रत्तोथवाग्निमः॥ अविशेषात्प्रवृत्तस्य सत्रांगंहितत्
थाभवेत॥ निमित्तेकोरप्रवृत्तः प्रायश्चित्तंचरेदिदं॥ इदमाम्नायते॥ यः सत्रायागुरुतेसविश्वजितायजेतेति॥ आगुरुते
संकल्पयति॥ तत्र सत्रंसंकल्प्यकश्चिदनुष्ठातुंप्रवृत्तः॥ अपरोनप्रवृत्तस्तयोरुभयोर्मध्येयः कोपिविश्वजितायजेतप्र
वृत्तएवयजेतेतिविशेषस्याश्रवणात॥ एवमप्रवृत्तएवयजेतेत्यपिविशेषोनश्रूयते॥ तस्मादुभयोरन्यतरइत्याद्यःपक्षः
सत्रेप्रवृत्तस्यविश्वजिदनुष्ठानेसत्रांगत्वंविश्वजितोगम्यते॥ तस्मात्प्रवृत्तएवविश्वजितंकुर्यादितिद्वितीयःपक्षः॥ यःस
त्रायागुरतइतिनिमित्तत्वेनोपन्यासात्संकल्प्ययदिसत्रंनानुतिष्ठेत्तदाप्रायश्चित्तार्थंविश्वजिद्यागंकुर्यादितिराद्धांतः॥
॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ वत्सेदर्शोसवत्सस्यवत्समात्रस्य।वाविधिः॥ व्रतकालंलक्षयेद्वावत्सयुक्तेव

तेविधिः॥ भातिरागाद्भुतप्राप्तेर्वत्समात्रं विधीयते॥ अतस्माकरणं वत्सः कालेगास्तदपाकृतेः॥ दर्शपूर्णमासयोः श्रूयते॥ ब
र्हिषा पौर्णमासे व्रतमुपैति वत्सैरमावास्यायामिति॥ व्रतं भोजनं॥ अत एवाम्नायते॥ अमाषममांसंबद्धसर्पिष्कं व्रतयती
ति॥ तदेतद्भुतं वत्ससंयुक्तमत्र विधीयते॥ कुतः वत्सैरिति तृतीयया साहित्यस्य प्रतिभानादित्येकः पक्षः॥ रागत एव प्राप्तत्वा
द्भुतं न विधातव्यं किंतु वत्समात्रं विधेयमिति द्वितीयः पक्षः॥ नहि वत्सः पाण्यादिवद्भुतस्य करणं ततो न तस्य विधिः॥ किं
तु वत्सानामपाकरणेन कालः उपलक्ष्यते॥ तस्मिन्काले व्रतमुपेयात्॥ एवं पूर्णमासे बर्हिः संपादनकाले व्रतमुपेयात्॥
॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥ सान्नाय्यिनः सकालस्स्यादितरस्यापि वा भ्रमः॥ वत्ससत्वाल्लक्ष्यकालो ह्यन्य
स्याप्यसत्तोंतिमः॥ यस्य सान्नाय्यमस्ति तस्यैवायं व्रतकालः कुतः॥ लक्ष्यकस्य वत्सापाकरणस्य सद्भावात्॥ यस्त्वमावा
स्यायां सान्नाय्येन करोति किंत्वैन्द्राग्नपुरोडाशं करोति॥ न तस्य वत्सापाकरणमस्ति॥ नापि पौर्णमास्यायां तद्विद्यते॥
तस्मात्सान्नायिन एवस कालइतिचेत्। मैवं॥ वत्सापाकरणाभावेपि तदुपलक्षितकालस्य विद्यमानत्वात्॥ तस्मात्सर्वस्या
पि स कालः॥ ॥ चतुर्दशाधिकरणमारचयति॥ ॥ प्रस्तरं शाखयायुक्तं हरेच्छाखा विधीयते॥ कालो वा प्रतिपत्त्यर्थः प्र
हृत्यार्थोपलक्ष्यते॥ आद्यो गत्वा विधेर्मानात्प्रतिपत्तिः प्रपेक्षते॥ शाखोपयुक्तानेनात्यः प्रस्तरे प्रतिपादनात्॥ दर्शपूर्णमा
सयोराम्नायते॥ सहशाखया प्रस्तरं प्रहरतीति॥ तत्र प्रहरणं प्रति शाखाया अंगत्वेन विधिर्भासते॥ सत्यंगत्वे शाखया
विना प्रस्तरप्रहरणस्य वैगुण्यप्रसंगात्॥ सान्नाय्यरहितेनापि शाखासंपादनीयेति चेत्॥ मैवं॥ शाखा वत्सापाक
रणादावुपयुक्ता तस्याः पुनरंगत्वविधिर्न संभवति॥ विनियुक्तविनियोगस्यान्याय्यत्वात्॥ तस्माच्छाखाप्रतिपत्ति
मपेक्षत इति तत्प्रतिपत्त्यर्थः॥ कालः प्रस्तरप्रहरणेनोपलक्ष्यते॥ तथासति यदा प्रस्तरं प्रहरति॥ तदा शाखामपि विधि
मानां प्रहरेत्॥ ननु सान्नाय्यरहितेन संपादनीया॥ ॥ इति माधवीये जैमिनिन्यायमालाविस्तरे षष्ठाध्यायस्य चतु
र्थः पादः॥ ॥ पंचमपादे प्रथमाधिकरणमारचयति॥ ॥ इष्टिरभ्युदये दर्शात्कर्मान्यदुत देवताः॥ पूर्वास्त्याज्याः वि
शिष्टस्य विधानादन्यकर्मता॥ प्रकृतप्रत्यभिज्ञानान्न कर्मान्तरचोदना॥ देवताः प्राकृतास्त्यक्त्वा द्रव्यमन्यास्य उच्यते॥ श्री ९५

191
1945

दर्शपूर्णमासयोः श्रूयते॥ यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदेति त्रेधा तंडुलान्विभजेद्ये मध्यमास्स्युस्तानग्नये दात्रे पुरोडा
शमष्टाकपालं कुर्यात्॥ ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं ये णिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति॥ अयमर्थः॥ दर्श
भ्रांत्या चतुर्दश्यां केनचिद्धविर्निरुप्तं भवति॥ ततः प्रत्यूषे पूर्वस्यां दिशि चंद्रमा अभ्युदेति॥ तदानिरुप्तास्तंडुलास्त्रेधा विभक्त
व्याः॥ अखंडिताईषत्खंडिताअतिसूक्ष्माकणाश्चेति त्रैविध्यं॥ तेत्रिविधा दात्रादिगुणविशिष्टेभ्योग्न्यादिदेवेभ्य इति॥ तत्रेदं
प्रकांताद्दर्शकर्मणोन्यत्कर्म। कुतः॥ कालापराधप्रायश्चित्तार्थं द्रव्यदेवतादिविशिष्टस्य कर्मणो विधीयमानत्वात्॥ ततइदं
प्रायश्चित्तं कृत्वा परेद्युर्दर्शकर्मानुष्ठेयमिति प्राप्ते ब्रूमः॥ हविर्निरुप्तमिति प्रक्रांतं यद्दर्शकर्म तत्परित्यज्य कर्मांतरविधिकल्प
ने प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येयातां॥ अतस्तस्मिन्नेव प्रकृते कर्मणि निरुप्तस्य हविषः पूर्वदेवताभ्यो दर्शसंबंधिनीभ्योप
नयोत्र विधीयते॥ तंडुलोपलक्षितं यद्दधिदधिव्रीहिरूपं च पूर्वेद्युर्निरुप्तं तद्धविः पूर्वदेवताभ्योग्नींद्राभ्यां विभजेदिति दे
वताहविषोः परस्परविभागोत्र विधीयते॥ न तु तंडुलानां स्थविष्ठमध्यमाणिष्ठरूपस्त्रिविधो विभागो विधीयते॥ तस्य प्रा
प्तत्वात् ये मध्यमाः स्युरित्यादिविनियोगभेदादर्थप्राप्तः स विभागः॥ ततः पूर्वदेवतास्त्यक्त्वा दातृत्वादिगुणयुक्ताग्न्याद्या
दिदेवताभ्यः पूर्वनिरुप्तं हविः प्रदातव्यं॥ ननु प्रतिपदि प्रातर्निर्वापकालो न तु दर्शः॥ तथा सति दर्शभ्रांत्यापि चतुर्दश्यां निर्वा
पाभावान्निर्वापादूर्ध्वं चंद्रोदयो न प्राप्नोति॥ नैष दोषः॥ दध्नो द्व्यहकालीनत्वेनार्थसिद्धे पूर्वेद्युर्दोहनात्तंचनेः॥ तदभिप्रायेण
निरुप्तमित्युच्यते॥ यद्वा व्रीहिनिर्वापोपि पूर्वेद्युर्विकल्पितः॥ तथा च श्रूयते॥ यदि बिभीयाद्दभिमोदेष्यतीति॥ महारात्रे हवीं
षि निर्वपेदिति॥ अयमर्थः॥ भ्रांत्या प्रमाणेन वा दर्शोयमिति निश्चितवतः चंद्रोभ्युदेष्यतीति भीतिर्नास्ति तदा तस्मिन्नेव दिने
महारात्रे सर्वाणि निर्वपेदिति॥ अतो निरुप्तस्यैव हविषस्तस्मिन्नेव कर्मणि कालव्यत्यासं निमित्तीकृत्य देवतांतरसंयोगरू
पः प्रयोगप्रकारभेद उपदिश्यते॥ ततो दर्शस्यैवायं नैमित्तिकः प्रयोगो न तु दर्शलोपप्रायश्चित्तमिति नैमित्तिकं दर्शप्रयोग
मनुष्ठाय पश्चात्स्वकाले नित्यो विदर्शप्रयोगोनुष्ठातव्यः॥ ॥ द्वितीयकरणमारचयति॥ ॥ देवत्यागस्तथोपांशावश्रुते
देवतांतरे॥ यागत्वोपांशुसत्वात्कृत्वा चिंतयिष्यते॥ पूर्वोदाहृते वाक्ये यथापुरोडाशे सान्नाये च हविषि पूर्वदेवतात्यागस्त

थे वापांशुयाजहविष्याज्यपूर्वदेवतान्त्यक्त्वा प्रयोगांतरं कर्तव्यमिति चेन्मैवं॥ पुरोडाशसान्नाय्ययोरिवाज्यदेवतांतरस्या
श्रवणात्॥ तस्मात्पूर्वदेवतायास्त्यक्तत्वात्॥ अन्यदेवताया अश्रवणाच्च निर्देवत उपांशुयाजो लुप्यते॥ ननूपांशुयागस्य दर्शे
प्रसक्तिरेव नास्ति॥ तत्र कुतो देवतापनयो लोपश्चेति चेत॥ एवं तर्हि किंकृत्वा चिंतास्तु॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ऊर्ध्व
चंद्रोदये सष्टिर्निर्वापात्पूर्वमप्युत उक्ते राद्धांतिमः पक्षो निरुप्तत्वाविवक्षया॥ सा पूर्वोक्ताभ्युदयेष्टिर्हविर्निर्वापादूर्ध्वं चंद्रोदये स
ति कर्तव्या न निरुप्तं हविरभ्युदेतीत्युक्तत्वादिति चेन्मैवं हविरभ्युदयस्य निमित्तत्वे तद्विशेषणस्य निर्वापस्याविवक्षितत्वात्॥ अन्य
था वाक्यदोषापत्तेः यस्य हविरभ्युदेति तच्च हविर्यदि निरुप्तमित्येवं वाक्यभेदः॥ तस्मान्निर्वापात्प्रागपि चंद्रोदये सत्यां विहितका
लेकर्मोपक्रममात्रेणेष्टिः कर्तव्या॥ ॥चतुर्थाधिकरणमारचयति॥ ॥प्राकृ प्राकृतीभ्यो निर्वापो वैकृतीभ्योथवाग्रिमः॥
तंडुलोक्तेर्वैकृतीभ्यो हविर्मात्रोपलक्षणात्॥ निर्वापात्प्राग्यदा चंद्रोदयस्तदा चंद्रोदयादूर्ध्वं क्रियमाणो निर्वापः प्राकृतीभ्यो देव
ताभ्यो युक्तः॥ कुतः तंडुलानिति वाक्ये न तंडुलाभावादूर्ध्वं प्राकृतदेवतापनयश्रवणात्॥ निर्वापस्तु व्रीहीणामेवेति तस्मि
न्काले प्राकृताग्न्यादिदेवतानामपनीतत्वादिति प्राप्ते ब्रूमः॥ वैकृतीभ्यो दातृत्वादिगुणयुक्ताभ्योग्न्यादिदेवताभ्यो निर्वापः कर्तव्यः
॥ कुतः तंडुलशब्देन हविर्मात्रस्योपलक्षणात्॥ तु॥ अन्यथा दधिपयसोरतंडुलत्वेन देवतापनयो न स्यात्॥ हविर्मात्रविव
क्षायां तु व्रीहीणामपि हविष्ट्वेन प्राकृतदेवतासंबंधमपनीय देवतांतरसंबंधस्य कर्तुं युक्तत्वात्॥ वैकृतीर्निर्वपेत्॥ ॥
पंचमाधिकरणमारचयति॥ ॥ प्राकृतीभ्योऽस्य निर्वापेऽभ्युदये शिष्टतंडुलान्॥ प्राकृतीभ्यो वैकृतीभ्यस्तूष्णीं निर्वपे
दिह॥ प्राकृतीभ्यः प्रवर्तत्वाद्वैकृतीभ्यो निमित्ततः शिष्टांशस्यापदार्थत्वादसंयोगादिहांतिमः॥ यदा प्राकृतीभ्यो मुष्टि
मात्रे निरुप्ते सति चंद्रोऽभ्युदेति तदा मुष्टिचयरूपोऽवशिष्टांशः प्राकृतीभ्य एव निर्वप्तव्यः॥ कुतः प्राकृतीनां प्रवृत्तत्वा श्रीः
द्वैकृतीभ्यः पक्षः चंद्रोदयनिमित्ते सति नैमित्तिकस्य पूर्वदेवतापनयनस्यावश्यंभावाद्वैकृतीभ्योवशिष्टांशनिर्वाप इति द्वि ९६
तीयः पक्षः॥ अस्तु प्राकृतदेवतापनयो निमित्ताधीनः अन्यदेवतासंयोगस्त्वंशस्य न संभवति॥ अन्याश्च देवताः प्रा
कृतदेवतानेनिवेशनीयाः प्राकृतदेवतानां च निर्वापपदार्थेन संयोगः कृत्स्नेन तु पदार्थांशेन तत्स्तत्स्थानपतितानां

193
1945

वैकृतीनां च नांशसंयोगो युक्त इत्यस्यांशस्य प्राकृतीभ्योऽपनीतत्वाद्वैकृतीभिरसंयोगाच्च तूष्णीमेव निर्वाप इति राद्धांतः॥ ॥ष
ष्ठाधिकरणमारचयति॥ ॥सेष्टिः सान्नायिनो वा स्यादन्यस्यापि दधिश्रुतेः॥ नान्यस्येत्यग्निमोत्यः स्याद्देवमात्रविधानतः॥ न
हि सान्नाय्यरहितस्य दधिपयसी विद्येते तदभावे च दधीति चरुः श्रृते चरुमिति विधिर्न संगच्छेत॥ तस्मात्सान्नाय्यिन एव सा पूर्वोक्ता
भ्युदयेष्टिरिति चेन्मैवं॥ अप्राप्ता देवता एवात्र विधीयंते॥ दधिपयसोरपि विधाने वाक्यं भिद्येत॥ ततस्तंडुलवत्प्राप्तयोर्दधिश्रृ
तयोरनूद्यतयाविध्यभावादुदके चरुश्रपणसंभवाच्च सान्नायिवदन्यस्यापि सेष्टिरस्ति॥ ॥ सप्तमाधिकरणमारचयति॥
॥ ॥ सत्राय दीक्षितानां चेत्साम्युत्थानाभिवांछनं॥ यजेद्विश्वजिता क्रीते राजन्यत्र तु राधिवा॥ आद्यः सोमविभागोक्तेः क्रीते
तदसंभवात्॥ अर्थप्राप्तविभागस्यानुवादाद्दर्मिमो भवेत्॥ इदमाम्नायते॥ यदि सत्राय दीक्षितानां साम्युत्तिष्ठासेत्सोमं प्रविभ
ज्य विश्वजिता यजेतेति॥ सत्रिणां मध्येयः कोपि सत्रैकदेशमनुष्ठाय सत्रं परित्यज्य यदि गंतुमिच्छेत् तदा स्वकीयं सोमं विभज्यते
न विश्वजिद्यागं कुर्यादित्यर्थः॥ तदेतद्विश्वजिदनुष्ठानं सोमे क्रीते सति पश्चादुत्तिष्ठासायां भवति। न तु पूर्वं। कुतः उच्यमानस्य
सोमविभागस्य सोमक्रयात्पूर्वमसंभवादिति चेन्मैवं॥ नात्र सोमविभागो यत्नेन विधीयते किंतु क्रीतराजकस्य द्रव्यांतरविभा
गवद्भागप्राप्तोऽनूद्यते॥ सोमग्रहणं तु प्रदर्शनार्थं। तस्मादुत्तिष्ठासामीनिमित्तीकृत्य विश्वजिन्मात्रस्य विधानात्सोमक्रयात्प्रा
गप्युत्तिष्ठासोर्विश्वजिद्भवति॥ ॥अष्टादशाधिकरणमारचयति॥ ॥ज्योतिष्टोमे द्वादशास्युर्दीक्षा एका दयोथवा॥ स्याद्व
तैर्वननादाद्यः प्रत्यक्षश्रुतितोंतिमः॥ ज्योतिष्टोमप्रकरणे दीक्षापक्षाः श्रूयंते॥ तान् कल्पसूत्रकार उदाजहार॥ एका दीक्षा ति
स्र उपसदः पंचमी प्रसुतस्तिस्रो वा दीक्षास्तिस्र उपसदः सप्तमीप्रसुतश्चतस्रो वा दीक्षास्तिस्र उपसदोऽष्टमीं प्रसुत इति तथा
न्यदपि श्रुतं॥ द्वादश दीक्षा इति दीक्षयेष्ट्या संपन्नः संस्कारो दीक्षा॥ सा चैकस्मिन्दिनेऽनुष्ठानादेका भवति॥ तदूर्ध्वं त्रिषु दिने
षूपसन्नामका होमाः पंचमे दिने सोमयागः॥ एवं त्रिषु चतुर्षु द्वादशसु वा दिनेषु दीक्षा धर्मा यादिंग्यमादयोऽनुवर्तनीया इ
त्यर्थः॥ तत्र ज्योतिष्टोमे द्वादशदीक्षापक्ष उपादेयः॥ कुतः॥ द्वादशरात्रीर्दीक्षितो भृतिं वन्वीतेति श्रवणात्॥ यज्ञार्थयाञ्च
या द्रव्यसंपादनं भृतीवननं॥ तच्च निर्वर्तयत्संयोगोन द्वादशत्वपक्षोपि नित्यः॥ एकादिपक्षाणां तु विकृतिषूत्कर्ष इति भाष्य

अ० क० माला० कारस्यमतं। तदेतत्पूर्वपक्षीकृत्यवार्तिककारेणैवंसिद्धांतः कृतः। दीक्षितोऽन्नंविन्दीतेत्येतावदेवतत्रविधीयते।
द्वादशाहत्वंतुस्तुतिप्रदर्शनार्थं। एवंचमतिप्रत्यक्षश्रुतिसिद्धाएकादिदीक्षापक्षाअबाधिताभविष्यंति। तस्मात्स
९१ र्वपक्षाज्योतिष्टोमेविकल्पिताः॥ ॥नवमाधिकरणमारचयंति॥ ॥द्वादशाहेकिमेकादिविकल्पोद्वादशैववाभा
यःप्रकृतिवल्लक्षणातिदेशिकानामुक्तिर्नोनियमः। द्वादशाहस्यज्योतिष्टोमविकृतित्वादेकादिदीक्षाद्वादशाहेविकल्पिता
इतिचेत्। मैवं। अग्नीधनएवदीक्षाभिरितिश्रुतस्यदीक्षाबहुत्वस्यवाक्यशेषेणद्वादशसंख्यायांपर्यवसानात्।
तथाहिषट्संख्याकानिद्विकानिश्रूयंते। द्वाभ्यांलोमावद्यंतिद्वाभ्यांत्वचंद्वाभ्यामसृक्द्वाभ्यांमांसंद्वाभ्यामस्थिद्वाभ्या
मज्जानमिति। तथासतिदीक्षाणांद्वादशत्वमंतरेणषड्द्वित्वसंख्यानपूर्यते। तस्माद्द्वादशाहेद्वादशैवदीक्षानिय
ताः। दशमाधिकरणमारचयंति॥ ॥गवामयनउक्तानुयाकाचित्पूर्णिमाथवा। चैत्रीमाघ्युतकाचित्स्यादवि
शेषाप्रशंसया। चैत्रीस्यात्क्रयएकाष्टकायामित्यपवर्णितं। माघकृष्णाष्टमीत्वेकाष्टकामाघपूर्णिमा। गवामय
नेश्रूयते। चतुरहेपुरस्तात्पौर्णमास्यैदीक्षेरन्। तेषामेकाष्टकायांक्रयःसंपद्यतइति। पूर्णमास्याःपूर्वस्मिंश्च
तुरहेदीक्षेरन्। एकादश्यांदीक्षामारभेत। तथासतिपौर्णमास्याउपरितनेसप्तमीदिनेद्वादशदीक्षाःपूर्यंतेत
दुपरितन्यामष्टम्यांसोमक्रयइत्यर्थः। तत्रविशेषस्यानुक्तत्वाद्याकाचित्पूर्णिमेत्येकःपक्षः। चित्रापूर्णमा श्री
सेदीक्षेरन्मुखंवाएतत्संवत्सरस्ययच्चित्रापूर्णमासइतिप्रशस्यमानतयाचैत्रीपूर्णमासीतिद्वितीयःपक्षः। ९१
याज्ञिकसमाख्यायामाघकृष्णाष्टम्याएकाष्टकत्वात्तत्रसोमक्रयसंपत्तयेमाघ्याःपौर्णमास्याःपूर्वमेका
दश्यांदीक्षारब्धव्या॥ ॥एकादशाधिकरणमारचयति॥ ॥कुतोऽप्यवभृथोत्कर्षेकुर्यादग्निहोत्रकं। नवाथो

195
1945

प्रतिसिद्धत्वान्नैवंदीक्षानुवर्तनात्। ज्योतिष्टोमेदीक्षोपक्रमदिनमारभ्यपंचमेसप्तमेऽष्टमेवादिनेसुत्याभवतितस्मिन्सु
त्यादिनेत्रिषुसवनेष्ववभृथःकर्तव्यः। तस्मिन्कृतेदीक्षानियमानिवर्तंते। तथासतिकदाचिद्दैवान्मानुषाद्वाविघ्नादवभृ
थस्यकेषुचिद्दिनेषूत्कर्षोभवति। तेषुदिनेषुदीक्षितनियमानसंति। कुतःनियमावधेरवभृथकालस्यकृत्स्नस्यातिक्रां
तत्वात्। तेचनियमाएवमाम्नायंते। दीक्षितोनददातिनपचतिनजुहोतीति। एतेषांनियमानामभावेप्रागप्यवभृ
थाद्दानहोमादयःकार्याइतिप्राप्तेब्रूमः। दीक्षोन्मोचनस्यावभृथःसाधनं। नतुतत्कालः। अतोवभृथकालेतिक्रांते
पियावदवभृथंदीक्षानुवर्ततइत्यवभृथोत्कर्षेदीक्षितधर्माणांनिषेधानामप्युत्कर्षाद्दानहोमादयस्तेषुदिनेषुन
कार्याः॥ ॥द्वादशाधिकरणमारचयति॥ ॥दीक्षानुवर्तितोकर्तव्यःप्रतिहोमोनवाग्निमः। पुंदोषात्तथाप्य
स्यदीक्षायांशास्त्रवारणात्। अवभृथोत्कर्षेदीक्षानुवृत्तोयावत्सुदिनेषुअग्निहोत्रंनहुतं। तावत्कालीनापराधप
रिहारायप्रतिहोमःकर्तव्यः। यथासायंकालीनेप्रातःकालीनेवाहोमेपुरुषापराधादतिपतितेकालांतरेप्रति
होमःक्रियतेनद्वत्। अस्तिह्यत्रपुरुषापराधः अवभृथोत्कर्षस्यतत्कृतत्वात्। नखल्ववभृथोत्कर्षःशास्त्रेणवि
हितः। तस्मात्प्रतिहोमःकार्यइतिप्राप्तेब्रूमः। भवत्ववभृथोत्कर्षोऽपराधकृतः तथादीक्षायामनुवृत्तायांदीक्षि
तोनददातीत्यादिशास्त्रेणैवहोमोनिवारितइतिनास्तिहोमकर्तव्यता। सायंकालीनादिहोमस्यकर्तुकर्त
व्यस्यैवसतोकरणात्प्रतिहोमःप्राप्नोतीतिवैषम्यं॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥देवादुदवसानीयो
त्कर्षेहोमेकृतिर्नवा। कृतिर्दीक्षोन्मोचनात्तोपुनराधेयसंमितेः। कृतेवभृथेपश्चादुदवसानीयेष्टिर्विहिता।
सायदिकेनापिनिमित्तेनोत्कृष्टातदानीमवभृथेनदीक्षायाउन्मुक्तत्वादीक्षितोनददातीत्यादिनिषेधाभावा

अ० कर० माला० ९८

श्री ९८

197/1945

होमः कर्तव्यः तदकरणे च प्रतिहोमः कार्य इति चेत् मैवं ॥ एतया पुनराधेयसंमितये त्यग्निहोत्रं जुहुयादिति वचनेनोदवसा
नीयायामाहुतायां पश्चादग्निहोत्राधिकारप्रतिपादनात् ॥ अतस्तदुत्कर्षे अग्निहोत्रं प्रतिहोमं न वा कुर्यात् ॥ ॥ चतुर्दशाधिकर
णमारचयति ॥ ॥ कृत्वाचिंताक्रमो नो च प्रतिहोमोतिपातितः ॥ क्रमोस्त्वग्निष्टोमकृद्दोसायं षोडशीनीतरः ॥ अवभृथोदवसा
नीयोत्कर्षे होमः कर्तव्यतां तदकरणे प्रतिहोमं वाभ्युपेत्य कृत्वाचिंता क्रियते ॥ अवभृथोदवसानीययोरिष्ट्योरनुष्ठीतयोः स
तोः पूर्वमतिपन्नानां होमानां प्रतिहोमा युगपद्भवः प्राप्तास्तेषु नियामकाभावान्नास्ति नियतः क्रम इति पूर्वपक्षः ॥ अतिपा
तक्रमस्य बुद्धिस्थत्वात् अन्यकारणाभावात्प्रतिहोमेष्वपि स एव क्रम इति राद्धांतः ॥ तत्राग्निष्टोमस्य सूर्यास्तमयात्प्रागेव समाप्त
त्वात्सायंहोमः प्रथममतिपद्यते ॥ षोडशिनस्तु रात्रौ समाप्तेः प्रातर्होमः प्रथममतिपद्यते ॥ तस्मादनेनैव क्रमेण प्रतिहोमं कु
र्यात् ॥ ॥ पंचदशाधिकरणमारचयति ॥ ॥ भिन्ने होमो यत्र तत्र मत्कृते वा निमित्ततः ॥ सर्वत्र स्यात्फलितत्वाय प्रकृते नैकवा
क्यता ॥ दर्शपूर्णमासयोः श्रूयते ॥ भिन्ने जुहोति स्कन्ने जुहोतीति ॥ तत्र पात्रभेदद्रव्यस्कंदनयोर्होमनिमित्तत्वात्कृत्वंतरपुलो
कव्यवहारे वा यत्र यत्र निमित्तं संपद्यते ॥ तत्र सर्वत्र होतव्यमिति चेत् मैवं ॥ फलकल्पनाप्रसंगात् ॥ प्रकृतेन तु दर्शपूर्णमासक
र्मणा सहैकवाक्यतायां तत्फलेनैव फलवत्त्वं सिद्ध्यति ॥ तस्माद्दर्शपूर्णमासयोरुक्तनिमित्तेन क्रियमाणो होमस्तदंगं ॥ न
तु गृहदाहादिष्विव स्वतंत्रं कर्म ॥ ॥ षोडशाधिकरणमारचयति ॥ ॥ व्यापन्नमप्सु किं तस्यादनिश्चयमहो कुतः ॥ आर्यैरभोज्यं के
शकीटदूषितं तत्प्रसिद्धितः ॥ इदमाम्नायते ॥ व्यापन्नमप्सु हरतीति ॥ तत्र व्यापन्नशब्दस्यार्थो निश्चेतुमशक्यः शक्यो वेति सं
शयः ॥ निश्चायकस्य हेतोरभावादशक्य इति चेत् मैवं ॥ केशकीटादिभिर्दूषितं यद्दवाज्यैरभोज्यं तदेवात्र प्रसिद्धिबलाद्व्या
पन्नमिति निश्चेतुं शक्यते ॥ ॥ सप्तदशाधिकरणमारचयति ॥ ॥ उद्गातुः प्रतिहर्तुश्च सहापच्छेदनेस्ति न ॥ प्रायश्चि
त्तमुतास्त्यत्र ॥ न निमित्तविघाततः ॥ एकैकस्य विच्छेदकर्तृत्वान्न विहन्यते ॥ कालमात्रं तु तत्रैकं प्रायश्चित्तमतो भवेत् ॥
ज्योतिष्टोमे श्रूयते ॥ यद्युद्गाता पच्छिद्येत अदक्षिणो यज्ञः संस्थाप्याथान्यो आहर्तव्यस्तत्र तद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्याद्यदि प्र
तिहर्ता पच्छिद्येत सर्ववेदसं दद्यादिति ॥ अस्यायमर्थः ॥ प्रातःसवने बहिष्पवमाने स्तोष्यमाणा ऋत्विजः शालाया बहिः प्रस
र्पंति ॥ तदानीमेकस्य पृष्ठतोन्य इत्येवं पिपीलिकावत्सर्वैरन्येकारभ्य गंतव्यं ॥ तत्र पुरतो गंतुः कच्छं गृहीत्वैव पृष्ठतोन्यो गच्छेत् ॥

एवं सति यदि प्रमादादुद्गाता गृहीतं कच्छं मुंचेत्तदा दक्षिणामदत्वा प्रक्रांतोयं यज्ञः समापनीयः तं समाप्य पुनरपि स यज्ञः प्रयोक्तव्य
स्तस्मिन्प्रयोगे पूर्वं यद्दित्सितं द्रव्यं तद्दद्यात् ॥ यदा प्रतिहर्ता मुंचेत्तदा तस्मिन्नेव प्रयोगे सर्ववेदसं दद्यादिति ॥ तत्र यद्युद्गातृप्रतिहर्तारौ
युगपन्मुंचेतां तदानीमुक्तं ॥ प्रायश्चित्तनिमित्तं विहन्येत एककर्तृको ह्यपच्छेदो निमित्तत्वेन श्रुतः ॥ अयं तूभयकर्तृकत्वान्नैकेन
व्यपदेष्टुं शक्यते ॥ तस्माच्छ्रूयमाणस्य निमित्तस्याविदितत्वान्नास्ति प्रायश्चित्तमिति प्राप्ते ब्रूमः ॥ द्वौ ह्यत्रापच्छेदौ ॥ तयोरेकैकस्यैकैः
क एव कर्तेति निमित्तस्य नास्ति विघातः ॥ कालमात्रैक्यादेकापच्छेद भ्रांतिः ॥ तस्मान्निमित्तविघाताभावादस्ति प्रायश्चित्तं ॥ अ
ष्टादशाधिकरणमारचयति ॥ ॥ समुच्चयोथ विकल्पो वा प्रायश्चित्तद्वये ग्रिमः ॥ अदक्षिणत्वं पूर्वस्मिन्प्रयोगेन्यत्तु पश्चिमे ॥ प्र
योग पश्चिमे नास्ति निमित्तं तेन तद्द्वयं ॥ प्राप्तमेकप्रयोगे तो विरुद्धत्वाद्विकल्प्यते ॥ अदक्षिणत्वं सर्वस्वदानं चेति यत्प्रायश्चित्त
द्वयं निमित्तभेदेन श्रुतं ॥ तस्मिन्निमित्तद्वयसंनिपाते समुच्चेतव्यं ॥ यद्यदक्षिणत्वसर्वस्वदानयोरन्योन्यविरोधस्तर्हि प्रयोग
भेदेन व्यवस्थापनीयं ॥ अपच्छेदयुक्ते प्रथमप्रयोगे दक्षिणा न दातव्या उत्तरप्रयोगे सर्वस्वं दातव्यं ॥ सत्यपि प्रयोगभेदे कर्मण ए
कत्वात्समुच्चय इति प्राप्ते ब्रूमः ॥ न ह्युत्तरप्रयोगे पच्छेदो विद्यते ॥ न चासति निमित्ते प्रायश्चित्तं युक्तं ॥ तस्मात्प्रथमप्रयोग ए
व निमित्तद्वयवशात्प्रायश्चित्तद्वयं प्राप्तं ॥ तच्चान्योन्यविरुद्धत्वाद्विकल्प्यते ॥ ॥ एकोनविंशाधिकरणमारचयति ॥ ॥ अप
च्छेदक्रमे पूर्वः प्रबलः स्यादुत्तरोत्तरः ॥ असंजातविरोधेन पूर्वेणोत्तरबाधनं ॥ निरपेक्षोत्तरज्ञानं जायते पूर्वबाधया ॥ न बाधकांत
रं तस्यातेन प्रबलमुत्तरं ॥ उद्गातृप्रतिहर्तृकृतयोरपच्छेदयोर्यौगपद्ये समानबलत्वादस्तु प्रायश्चित्तयोर्विकल्पः यदा तु क्रमेणा
पच्छेदः स्यात्तदानीमसंजातविरोधित्वेन पूर्वस्य प्रबलत्वाच्छ्रुतिलिंगादिविषयोत्तरस्य प्रवृत्तिर्निरुध्यत इति चेत् मैवं ॥ श्रुतिलिं
गादावुत्तरस्य पूर्वसापेक्षत्वात्पूर्वेण विरोधे सत्युत्तरस्योत्पत्तिरेव नास्ति ॥ इह तु ज्ञानद्वयमन्योन्यनिरपेक्षं वाक्यद्वयादुत्पद्यत
इति नास्त्युत्पत्तिप्रतिबंधः उत्पद्यमानं चोत्तरज्ञानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते ॥ ननु निरपेक्षत्वस्य समानत्वात्पूर्वज्ञा
नमेवोत्तरस्य बाधकमस्त्विति चेत् न ॥ पूर्वज्ञानोत्पत्तिदशायामविद्यमानस्योत्तरज्ञानस्य बाध्यत्वायोगात् ॥ उत्तरकाले तु स्व
यं बाधितं पूर्वज्ञानं कथमुत्तरस्य बाधकं भवेत् ॥ न चान्यत्किंचिदुत्तरस्य बाधकं पश्यामः ॥ तस्मादुत्तरकालीनापच्छेदनिमि

अ० क० माला नंप्रायश्चित्तमनुष्ठेयं॥ विंशाधिकरणमारचयति॥ ॥उद्गातुः पश्चिमच्छेदे पुनर्यागस्य दक्षिणा। शतंद्वादशवायुक्तं
११ स्यादिवा सर्ववेदसं। तद्यथाध्वर्युरादित्सु रिसकत्केः शतनदक्षिणा। प्रतिहर्तुः पुराच्छेदात्सर्ववेदसबाधिनं। शतदानं
पूर्वयागे सर्ववेदसं दित्सता। प्रामेत्सूर्ध्वप्रयोगे तद्दातव्यं सर्ववेदसं। यथकउद्गातापश्चादपच्छियेत तेनदानस्यापच्छेदस्य
प्रवर्तकत्वात् न्निमित्तं प्रायश्चित्तमनुष्ठेयं। नत्वप्रायश्चित्तमीदृशं प्रथमप्रयोगे दक्षिणाहरितमनुष्ठ्य द्वितीयप्रयोगे
पूर्वंदित्सितादक्षिणादातव्येति। पूर्वंच गवां द्वादशशताधिकंशतंदित्सितंतनस्यज्योतिष्टोमे दक्षिणारूपेणविहितत्वात्॥
तस्मादुत्तरप्रयोगे द्वादशशतं देयमिति प्राप्ते ब्रूमः॥ ॥प्रतिहर्तुः प्रथमप्रयोगेऽपच्छेदे सतितन्निमित्तकं सर्वस्वदानरूपं प्रा
यश्चित्तं प्रथमप्रयोगे प्राप्तं तेनचक्रतुस्वभावप्रयुक्तस्य द्वादशशतस्य बाधात्सर्वस्वं दित्सितं। नचोद्गात्रपच्छेदेन पश्चाभा
विनासर्वस्वदित्साप्रबाध्यत इतिवाकनियं। बाधकस्य दक्षिणांतरस्य तत्रानुक्तत्वात् यदित्सितं तदुत्तरप्रयोगे देयमित्येता
वदेवतत्रोच्यते। नदित्सितं सर्वस्वमित्युक्तं। अनउत्तरकालिनोद्गात्रपच्छेदनिमित्तेपि पुनः प्रयोगे पूर्वकालीनप्रतिहर्त्रप
च्छेदप्रयुक्तं सर्वस्वमेवदातव्यं॥ ॥एकविंशाधिकरणमारचयति॥ अहर्गणे यद्युद्गातुश्छेद आवर्त्यतां गणः। किंवायत्र
दिने छेदस्तदेवावर्त्यतां दिनं। गणावृत्तिः प्रयोगैक्यात् प्रयोगोवांतरः पृथक्। तेनाहरेकमावर्त्यमनंगत्वान्नहीनरत्। द्वाद
शाहाद्यहर्गणे यदि कस्मिंश्चिदहन्युद्गातापच्छियेत तदा तमहर्गणं दक्षिणारहितं समाप्य पुनरपि गण आवर्त्तनीयः। तत्र पू श्री
र्वंदित्सितां दक्षिणां दातव्या कुतः गणप्रयोगस्यैकत्वादिति प्राप्ते ब्रूमः। महाप्रयोगस्यैकत्वेप्यवांतरप्रयोगस्य भिन्नत्वात् तद्द ११
तेनैकमेवाहरावर्त्तनीयं। नत्वन्येषामह्नामेतदंगत्वमस्तितनः एकस्याह्न आवृत्तावितरावृत्तिप्रसंगोनास्ति। तस्मादेकस्यै
वाह्न आवृत्तिः॥ ॥इतिमाधवीये जैमिनिन्यायमालाविस्तरे षष्ठाध्यायस्य पंचमः पादः॥ ॥षष्ठपादे प्रथमाधिकर
णमारचयति। भिन्नप्रयाजादिकल्पा अपिसत्रेऽधिकारिणः तुल्यकल्पा एववायोवसिष्ठादिविधानतः नराशंसाय

199
1945

गनाधायस्वामित्वोद्देशपूर्वकं॥ नराशंसविधौसन्निकर्षात्साद्गुण्यतोंतिमः॥ प्रयाजेषु पुरुषभेदेनानुष्ठानप्रकारोभिधीयते॥ राजन्यव
सिष्ठानां नराशंसोद्वितीयः प्रयाजः तनूनपादन्येषां॥ तत्रवसिष्ठाश्चवध्यश्वशुनककाण्वकश्यपसंस्कृतिगोत्रोत्पन्नाश्चनराशं
सप्रयाजवंतः ये चान्येतनूनपात्प्रयाजवंतः तएते भिन्नकल्पा अपिमिलित्वा सप्तदशावराः सत्रेऽधिकारिणः स्युः॥ कुतः। नराशं
समुद्दिश्य तगेदत्वेन वसिष्ठादिविधानात्॥ तथासति सत्रिणां मध्ये केषांचिद्वसिष्ठादिगोत्रत्वेपि तदंगत्वं सिद्ध्यतीति प्राप्ते ब्रू
मः॥ वसिष्ठादीन्यजमानानुद्दिश्य नराशंसोविधीयते॥ तथासति विधायपदगतस्य विधेयत्वात्संनिकर्षे वसिष्ठादिविधौतुप
दांतरोपात्तत्वाद्विप्रकर्षः॥ अतोवसिष्ठाद्युद्देशेन नराशंसविधानराशंसानुष्ठाने वसिष्ठादीनां साद्गुण्यं इतरेतु वैगुण्यं॥ तनू
नपादानुष्ठाने तु वैपरीत्यं॥ सर्वथाभिन्नकल्पानां सर्वेषां साद्गुण्यं नसिद्ध्यति॥ अतः साद्गुण्याय तुल्यकल्पा एवाधिकारिणः
॥ ॥द्वितीयाधिकरणमारचयति॥ ॥सायुज्यकामे यजनानेन राजपुरोहितौ॥ राज्ञः पुरोहितौ राज्ञोस्तौवा राजात्मकावुत॥
द्वयोर्द्वंद्वसमासोवा तुल्यत्वाय याग्निमोद्वयोः॥ सिध्येद्द्वितीयो राज्ञोक्तिः सार्थत्वाय तृतीयकः॥ अव्याहत्यै चतुर्थः स्याद्वचना
द्भिन्नकल्पता॥ तनूनपान्नराशंसोविकल्प्येते समत्वतः॥ कुलायज्ञं प्रकृत्य श्रूयते॥ एतेनराजपुरोहितौ सायुज्यकामौ यजेया
तामिति॥ तत्रराज्ञः पुरोहितस्य कल्पभिन्नप्रयाजकल्पत्वात्तुल्यकल्पत्वाय पुरोहितयोरधिकारो वाच्यः॥ तथासति राज्ञः
पुरोहितावितिषष्ठीसमास इति आद्यः पक्षः॥ पुरोहितं वृणीत इत्युपादेयगतस्यैकत्वस्याविवक्षितत्वाद्राजद्वयमंतरेण पु
रोहितद्वयासंभवाद्राजपुरोहितश्चेत्यस्मिन्नर्थे कृते षष्ठी तत्पुरुषत्वा उभयोराज्ञोः पुरोहितावितिद्वितीयः पक्षः॥ अराज्ञः पुरोहि
ताभावाद्व्यावर्त्याभावेन राजपदं व्यर्थं ततोराजानौ तौ पुरोहितौ चेति कर्मधारयसमास इति तृतीयः पक्षः॥ राजत्वपुरोहि
तत्वधर्मौ भिन्नजातिवर्त्तिनावेकस्मिन्व्याहतौ॥ तस्माद्राजाच पुरोहितश्चेति द्वंद्वसमास इति चतुर्थः पक्षः परिशिष्यते॥ त
त्रवचनबलाद्भिन्नकल्पयोरपि सहाधिकारः उभयोः समप्रधानत्वान्नराशंसतनूनपातोर्विकल्प्येते॥ ॥तृतीयाधि
करणमारचयति॥ ॥सत्रेवर्णत्रयस्यातविप्रस्यैवाथिवोच्यत॥ त्रयस्यमेयं स्वामित्वे विप्राणामृत्विजांयतः॥ ऋद्धिका
माः सत्रमासीरन्नित्यत्रविप्रा इतिविशेषोनश्रूयते॥ तस्माद्वर्णत्रयस्य सत्राधिकार इतिचेत् मैवं। विप्राणामेवार्त्विज्यप्राप्ति

द्वादशावस्यंते॥ ऋत्विक्कार्येयजमानाः सत्रेसमाम्नाताः॥ येयजमानास्तऋत्विजइति॥ तस्माद्विप्राणामेवसत्रं॥ ॥ चतुर्थाधिकरण
मारचयति॥ ॥ विप्रस्यसत्रं सर्वस्यवासिष्ठस्यैववाभवेत्॥ वैश्वामित्रस्यैववाद्य ऋद्धौ छलेन मध्यमः॥ ब्रह्मत्वायत्वावासिष्ठब्रह्मता
स्तोमभागनः॥ विश्वामित्रसमानानामेवहोतृत्वसिद्धये॥ ऋद्धिकामस्यसत्रंविहितंब्राह्मणश्चसर्वोऋद्धिंवाञ्छति॥ तस्माद्विप्रस्यसर्व
स्यसत्राधिकाइत्याद्यः पक्षः॥ वासिष्ठोब्रह्माभवतीतिवचनादवसिष्ठस्यब्रह्मत्वासंभवाद्ब्रह्मत्वायवसिष्ठस्याधिकारोवान्यः॥ त
थासतिभिन्नकल्पत्ववारणायतत्तुल्यकल्पाएवाधिक्रियंतेइतिद्वितीयः पक्षः॥ रश्मिरसिक्षयायत्वेत्यादयोमंत्राः स्तोमभागाः तान
धीयानः स्वयमेवासिष्ठोपिब्रह्मतामर्हतिस्तोमभागप्रशंसारूपेर्थवादेयएवकश्चित्सोमभागानधीयीतसएववासिष्ठइत्यर्थवादःवा
सिष्ठोब्रह्मेति पठितत्वात्॥ तस्माद्वैश्वामित्रोहोतेतिविहितस्यहोतृत्वंसिद्धयेवैश्वामित्रस्यतत्समानकल्पानांचाधिकारोनान्येषां
॥ ॥ पंचमाधिकरणमारचयति॥ ॥ अनाधातुश्चतत्किंवाधातुरवाग्निमायमः॥ एकस्याग्निषुतत्सिद्धिर्नस्वाग्निष्वात्मनेपदात्॥ त
त्सत्रमग्न्याधानरहितस्यापिसंभवति॥ कुतः सत्रिणांमध्येकस्यचिदाहिताग्नित्वेतदीयेष्वग्निषुतेसहप्रवृत्तेरनाहिताग्निभिरपितस्य
सत्रस्यसाधयितुंशक्यत्वादितिचेत् मैवं॥ आदधीतेत्यात्मनेपदमाधानफलस्यकर्तृगामितांदर्शयति॥ तत्फलंचाग्नीनांकर्मयोग्य
ता॥ ततोयेनाहिताग्नयस्तस्यैवकर्मयोग्यतानान्यस्य॥ किंचसोमविकृतीनामिष्टिपूर्वत्वंनिर्णीतं॥ इष्टिश्चाधानपूर्विका॥ तस्मादा
धातुरेवसत्राधिकारः॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ जुह्वादयोयस्यकस्यकार्याः साधारणाउत॥ अविरोधादग्निमांत्येमृ
तदाहविरोधतः॥ सत्रिणांमध्येकस्यकस्यचित्संबंधिभिर्जुह्वादिपात्रैः सत्रंप्रयोक्तव्यंकुतः॥ अग्निविरोधात्। अन्यदीयेष्वग्नि
ष्वात्मनेपदंयथाविरुध्यते॥ नैवमत्रविरोधः कश्चिदुपलभ्यइतिप्राप्तेब्रूमः॥ यस्यजुह्वादयः सचेत्सत्रमध्येम्रियतेतदामृतेनसहजु
ह्वादयोदह्यंते॥ आहिताग्निमग्निभिर्दहंतियज्ञपात्रैश्चदक्षिणहस्तेजुहूमासादयतीत्यादिवचनेस्तदवगमात्॥ पात्रदाहेचावशि
ष्टः सत्रप्रयोगोविगुणः स्यात्॥ तस्मात्साधारणाजुह्वादयः सत्रेसंपादनीयाः॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ सामिधेनीसा
प्तदश्यंवैकृतंवैश्यगाम्युत॥ वर्णत्रयस्ययाद्योस्तवैश्यकर्तृर्विधानतः॥ प्रकृतेपांचदश्यस्यबाधकंवैश्यईरितं॥ विकृतौत्रयगंवा श्रीः
स्यंत्रयोतोत्राधिकारिणः॥ अध्वरकल्पादिविशिष्टविकृतिषुश्रूयते॥ सप्तदशसामिधेनीरनुब्रूयादितितदेतत्सामिधेनीसाप्त १००
दश्यंवैश्यस्यभवितुमर्हति॥ कुतः प्रकृतौसप्तदशानुब्रूयाद्वैश्यस्येतिवाक्येनसाप्तदश्यांगभूतंकर्तृतयावैश्यस्यविहितत्वात्॥

तस्मात्साप्तदश्यद्वारावैश्यएवाध्वरकल्पादिष्वधिक्रियतइतिप्राप्तेब्रूमः॥ प्रकृतौपंचदशसामिधेनीरन्वाहेतिवर्णत्रयसाधार
ण्येनपांचदश्यंविधायवैश्यंनिमित्तीकृत्यपांचदश्यबाधकतयासाप्तदश्यंविहितं॥ ततः साप्तदश्यवाक्यस्यप्रकृतावेवान्व
यसंभवान्नविकृतिष्वुत्कर्षः॥ यत्तुविकृतिगतंसाप्तदश्यवाक्यंतत्वर्णत्रयसाधारणं॥ तस्मादध्वरकल्पादौवर्णत्रयस्याधिकारः
॥ ॥ इतिश्रीमाधवीयेजैमिनिन्यायमालाविस्तरेषष्ठाध्यायस्यषष्ठः पादः॥ ॥ सप्तमपादे प्रथमाधिकरणमारचयति॥
सर्वस्वदानेपित्रादावपितद्धनएववा॥ स्वत्वादाद्यः पितृत्वादावत्यागाद्धनएवतत्॥ इदमामनंतिविश्वजितिसर्वस्वंददातीति
॥ तत्रधनइवपित्रादीष्वात्मीयत्वस्यसमानत्वादस्तिपित्रादीनामपितद्दानमितिप्राप्तेब्रूमः॥ आत्मसंबंधत्यागपूर्वकंपर
संबंधापादनंदानमित्युच्यते॥ नहीदीयमानेपितरिस्वकीयपितृत्वत्यागः परकीयपितृत्वापादनंसंभवति॥ किंचस्वश
ब्दस्यात्माज्ञातिरात्मीयंधनंचेतिचत्वारोर्थाः तेष्वेकस्मिन्प्रयोगेएकएवार्थोवाच्यः प्रकृतौगवादिधनस्यदक्षिणात्वादिहापि
धनवाचित्वंयुक्तं॥ तस्माद्धनस्यैवदानं॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ देयानवामहाभूमिः स्वत्वाद्राजाददातुतां॥ पा
लनस्यैवराज्यत्वान्नस्वंभूर्दीयतेनसा॥ यदासार्वभौमोराजाविश्वजिदादौसर्वस्वंददाति॥ तदागोपथराजमार्गजलाशयान्वि
तामहाभूमिस्तेनदातव्या॥ कुतः भूमेस्तदीयधनत्वात्राजासर्वस्येष्टेब्राह्मणवर्जमितिस्मृतेरितिप्राप्तेब्रूमः॥ दुष्टशिक्षाशिष्ट
परिपालनाभ्यांराज्ञईशितृत्वंस्मृत्यभिप्रेतमितिनराज्ञोभूमिर्धनं॥ किंतुतस्यांभूमौस्वकर्मफलंभुंजानानांसर्वेषांप्राणिनांसाधार
णंधनं॥ अतोसाधारणखंडस्यसत्यपिदानेमहाभूमेर्दानंनास्ति॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ दानंकेसरिणोनोवाविहि
तप्रतिषेधतः विकल्पः पर्युदासोयंयाजामहनीतितः॥ नकेसरिणोददातीतिविश्वजितिश्रूयते॥ तत्रसर्वस्वदानविधानात्केसरि
दाननिषेधाच्चाश्वदानंविकल्पितमितिप्राप्तेब्रूमः॥ नायंप्रतिषेधः किंतुपर्युदासः॥ तत्प्रकारश्चदशमस्याष्टमेपादेयेयजामहमं
त्रोदाहरणेनव्युत्पादयिष्यते॥ ततस्तेनन्यायेनाश्वपर्युदासेसत्यश्वव्यतिरिक्तंसर्वस्वंदेयमितिविधिनिषेधयोरेकवाक्यत्वलाभा
न्नाश्वस्यवाशिकमपिदानं॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ अर्जयित्वापिकिंसर्वंदेयंयद्वायदस्तितत्॥ सर्वोद्देशाविधेराद्यो
नप्राप्तेसर्वताविधेः॥ पूर्वोक्तेसर्वस्वदानेसर्वमुद्दिश्यदानंविधीयतेपुरुषेणभोग्यंशय्यासनादिकंयत्सर्वंतद्दातव्यमिति॥ तस्मा
दविद्यमानंसर्वमर्जयित्वापिदेयमितिचेत्॥ मैवं॥ चोदकप्राप्तंदानमुद्दिश्यसर्वस्वविधानात्सर्वशब्दस्यप्रसिद्धवाचित्वात्॥

201
1945

 विद्यमानविषयः॥ तस्माद्यदस्ति तद्देयं॥ ॥ पंचमाधिकरणमारचयति॥ ॥ धर्मार्थसेवकः शूद्रो देयो नो वा सद्यस्ववत्।
 देयो स्वत्वात्पराधीनत्वाभावाच्च न दीयते॥ यस्तत्र शूद्रो विहितं स्वधर्ममेव गंतुं सेवते सोपि सर्वस्वमध्यपातित्वाच्छूद्रो दासवद्दे
य इति चेत् मैवं॥ जीवितायद्यदानेन तस्मिन्सेवके स्वत्वाभावात्स्वेच्छाचारित्वेन परस्वत्वापादनाभावात्संभवाच्च न देयः॥
॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ भूतं भाविलदेयं स्यात्कालेवस्थितमेव वा॥ आद्यः सर्वः श्रौतेरंत्योः संभवादन्ययोस्त
दा॥ विश्वजिन्मया कर्तव्य इत्यध्यवसायादूर्ध्वं दक्षिणादानात्पूर्वं यत्स्वं नभोग्यसंचितं चतद्भूतं यच्च दक्षिणाकालादूर्ध्वंम
विष्यत्येवेति निश्चितं तद्भावि तदुभयमपि सर्वशब्दार्थत्वाद्दातव्यमिति चेत् मैवं॥ भूतस्य विनाशसंभवाद्भाविन स्तदानीम
प्राप्तत्वादविद्यमानस्वदानायोगाच्च दक्षिणाकालेवस्थितमेव सर्वस्वं देयं॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ दक्षि
णा क्रतुभक्तार्थं त्रयं देयमुते ष्यते॥ शिष्टत्ववादक्षिणार्थमेवाद्यः सर्वशब्दतः॥ क्रतुशेषस्तदा बाध्यः प्रधानत्वादबाध
नात्॥ मध्योंत्यो दक्षिणार्थस्यानुवादात्सर्वताविधिः प्रकृतौ॥ कर्मारंभ एव यजमानेनात्मीयं धनं चेयेन बलात्त्रिधा
व स्थापितं इदं मे भक्तार्थमिदं मे क्रत्वर्थमिदं मे दक्षिणार्थमिति तदेतत्त्रयमपि दक्षिणार्थत्वाद्दातव्यमित्येकः पक्षः॥ दक्षि
णाह्नि माध्यंदिनसवने दीयते॥ ततऊर्ध्वं तृतीयसवनमारभ्योदवसानीयांतः क्रतुभागोवशिष्टः स च द्रव्याभावाद्बाध्ये
त॥ न चांगभूतया दक्षिणया प्रधानस्य क्रतोर्बाधो युक्तः॥ ततस्तदबाधनाय क्रत्वर्थं भागं न्यवस्थाप्यावशिष्टं सर्वं देयमि
ति द्वितीयः पक्षः॥ यद्दक्षिणात्वेन विधीयते॥ तत्सर्वमित्यनूद्य विधानाद्दक्षिणार्थ एव भागो दातव्य इति राद्धांतः॥ ॥ अष्ट
माधिकरणमारचयति॥ ॥ विश्वजित्यष्टरात्रादौ किं शातं द्वादशाधिकं॥ सर्वं वाद्यश्चोदकोक्तेरंत्यो नामातिदेशतः॥ ए
तद्भाष्यवार्तिकेतु सप्ताहानुजिघृक्षया॥ आद्यसिद्धांतितः प्राप्तिमात्रत्वेनेदमीरितं॥ इदमाम्नायते॥ अथैतस्याष्टरात्रस्य
विश्वजिदभिजितौ एकाहावभितः उभयतो ज्योतिर्मध्ये षडहः पशुकामो ह्येतेन यजेतेति॥ ज्योतिर्गौरायुरिति त्रिभिर्नाम
भिरभिधेयानां त्रयाणां यागानामारोहावरोहाभ्यामुभयतो ज्योतिः षडहो भवति॥ सोयं मध्ये प्रयोक्तव्य आदौ विश्वजि

दंते भिजिदित्यर्थः। तत्राहर्गणस्य द्वादशाहविकृतित्वाद्द्वादशाहस्य च ज्योतिष्टोमविकृतित्वाच्चोदकपरंपरया द्वाद
शशतदक्षिणाष्टरात्रे प्राप्ता ततः प्रथमस्याह्नो विश्वजितोपि सैव दक्षिणेति प्राप्ते ब्रूमः। स्वतंत्र एकाहो विश्वजिन्
तस्य नाम्नातदीया धर्माः प्रथमेहनि विश्वजित्यतिदिश्यंते। तस्मात्सर्वस्वं देयं तदेतद्भाष्यकारस्य मतं। वार्तिककार
स्तु द्वादशशतमित्येव सिद्धांतितवान्। विश्वजिदपि तिस्रिषु सत्तस्वहः स्वचोदकप्राप्तं द्वादशशतदक्षिणामबाधि
त्वा द्वादशात्वमिति वक्तुं शक्यं। अहर्गणस्यैकैव दक्षिणेति दशमे वक्ष्यमाणत्वात्। सूत्रकारस्तु नामातिदेशस्य प्राबल्य
प्राप्तिमात्रं सुत्सादितवानिति द्रष्टव्यं। नवमाधिकरणमारचयति। न्यूनेप्युक्तशतात्किं स्यात्सर्वताधिक एव वा। संभ
वादग्निमांत्यस्यादानत्वे सर्ववर्णनात्। यदेतद्द्वादशशतं प्रकृतितो विश्वजित्प्राप्तं। तस्मान्न्यूनं कस्यचिद्धनं तस्मिन्नपि
सोमेह्नि द्वादशशतं विधाय पश्चादुक्तं। यद्येतावतानानमेयुरपि सर्वस्वेनेति। तत्राधिकस्यैव सर्वत्वादिहापि तदेवयु
क्तं। न च चोदकप्राप्तमपि पाक्षिकत्वपरिहारायेह नियम्यते। तस्माद्धत्विजां वशीकाराया धिकस्यैव सर्वतां द्रष्टव्यम्॥ ॥
दशमाधिकरणमारचयति॥ ॥ देयैकाषड्शतं चापरिमितं त्विति वारयेत्। एकादिकां पूर्वसंख्यां यद्वा संख्यांतरं वि
धिः। न प्रयोगान्निषेधस्याप्युक्तत्वामानशून्यता। रूपावकुत्वंनेकापिनिषेधोन्यविधिस्ततः। आधाने श्रूयते। ए
का देया षड्देया द्वादश देया श्वतुर्विंशतिर्देयाः। शतं देयं सहस्रं देयमपरिमितं देयमिति। तत्रापरिमितशब्द
गत्वेन नन्वदेन परिमाणं निषिध्यते। तथ सत्यपरिमितशब्दसुक्तस्य देयद्रव्यस्य परिमाणशून्यता प्रतीयत इ
त्येकादिकाः। पूर्ववाक्योक्ता गवां संख्या निवार्यत इति प्राप्ते ब्रूमः। अपरिमितशब्दस्य रूपो बकुत्वमर्थः॥
यथैव प्रयोगवकुल्यात्। ततो नैकादिपक्षा निवार्यंते। किंतु। संख्यांतरं विधीयते। एकादशाधिकरणमारचयति॥ 203/1945

अर्वागपिबहुत्वंतत्सहस्रादूर्ध्वमेववा॥ संभवादग्निमोंत्यस्यात्सहस्रानंतरोक्तितः॥ अपरिमितशब्देनयद्बहुत्वंविधीयते॥ त
त्सहस्रादर्वागपिभवति॥ कुतः॥ द्विशतत्रिशतादौबहुत्वसंभवादितिचेन्मैवं॥ एकादिपक्षेषूत्तरोत्तराभिवृद्धिदर्शनेनात्रापिसह
स्रपक्षमुपन्यस्यपश्चादभिधीयमानंबहुत्वंसहस्रादूर्ध्वंपर्यवस्यति॥ ॥द्वादशाधिकरणमारचयति॥ ॥माषानेवपचेतेत्येत
द्वाष्टिर्षिवाखिलेषुउक्तेविधिश्वतौपक्षौकृतौचिंतार्थवादतः॥ इदमाम्नायते॥ इतिहस्माहबर्कुर्वार्ष्णिर्माषानेवमह्यंपचतवा
एतेषांहविर्गृह्णतीति॥ तत्रवार्ष्णिरित्युक्त्वावृष्णिगोत्रणामेवायंमाषपाकविधिरितिचेत॥ मैवं॥ वृष्णिगोत्रोत्पन्नेनबर्कुना
म्नामाषपाकस्यसंबंधोनात्रविधीयते॥ किंतुमाषपाकमात्रं॥ बर्कुसंबंधस्तुस्तावकत्वेनोपन्यस्यते॥ तस्मात्सर्वेषांमाषपाका
धिकारः॥ तावेतौपूर्वोत्तरपक्षौचिंतेहत्वायोपन्यस्तौ॥ परमार्थतस्तुमाषपाकवाक्यमर्थवादः॥ तस्मादारण्यमेवाश्नीयादित्यनेन
दर्शपूर्णमासयोरारण्याशनविधिनासहस्तावकत्वेनान्वयात॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥सहस्रसंवत्सरंसत्रंगंधर्वा
देर्नृणामुत्तरसानयेनसिद्धानांकुलकल्पाथवाक्तितः॥ तदायुर्वाथसार्द्धद्विशतानामुतमासगान्द्वत्सरोक्तिरुतद्वादशरात्रिषुदि
नेषुवा॥ आद्योदीर्घायुषःसत्वात्नृणामेवाग्निसंभवेद्वितीयोस्तुरसस्यायुरहेतुत्वात्तृतीयकः॥ कृत्स्नकर्तुःफलित्वस्तुयोग्या
संभवेसतिपंचमस्तुचतुर्विंशत्युत्तमाःसत्रिणोयदि॥ षष्ठोस्तुयोमाःषट्षसंवत्सरइतीरणात॥ सहस्रमासानाधानादूर्ध्वंचेद
स्तुसप्तमः॥ वत्सरंप्रतिमाद्वादशरात्रयइतिश्रुतः॥ नरात्रिषब्दशब्दस्त्रप्रतिमायाविशेषणात॥ स्वारस्यात्त्रिवृदाद्युक्तेरष्ट
मःपक्षइष्यते॥ त्रिवृदादिपदेस्तोमविशिष्टमहरुच्यते॥ नाहःसंख्यस्ततोहःस्तोगोणीसंवत्सराधीभि॥ तस्माद्विश्वसृजांसत्रंस
हस्रदिनमिष्यतां॥ इदमाम्नायते॥ पंचपंचाशतस्त्रिवृतःसंवत्सराःपंचपंचाशतःपंचदशाःपंचपंचाशतःसप्तदशाःपंच
पंचाशतएकविंशाःविश्वसृजाःसहस्रसंवत्सरमिति॥ तत्रसहस्रसंवत्सरसत्रेगंधार्वादीनामेवाधिकारः॥ तेषांदीर्घायुष्ट्वांस
द्भावात॥ इत्याद्यःपक्षः वसंतेब्राह्मणोग्नीमादधीतेत्यादिविधानान्मनुष्याणामेवाहवनीयाद्यग्नयःसंभवतिनान्येषांगंधर्वा
दीनामितिचेत॥ तर्हिरसायनेनसिद्धानांदीर्घायुषांमनुष्याणामधिकारइत्यस्तुद्वितीयःपक्षः॥ रसस्यारोग्यपुष्ट्यादिज
नकत्वमेवनत्वायुर्हेतुत्वमितिचेत॥ तर्ह्येकस्मिन्कुलेसमुत्पन्नानांपितृपौत्रादीनांबहूनांसहस्रायुःसंभवात॥ कुलाधिका
रइति॥ तृतीयःपक्षोस्तु॥ कृत्स्नकर्तुःफलंभवति॥ नचापितृपुत्रादिष्वेकोपिकृत्स्नंकरोति॥ तस्मान्नास्तिफलमितिचेत॥
नर्हिसत्रविधायकवचनेबलात्सत्रिणांदीर्घायुर्भविष्यतीतिचतुर्थःपक्षोस्तु॥ नह्यस्यसोर्थःसंभवतितद्वाचकपदाभावात॥

205/1965

नचकल्पयितुंशक्यते॥ संभावितायुष्काणामपिसत्रांतरेषुप्रवृत्तानांदैवात्म्रियमाणानांततत्सत्रविधिबलादायुर्वृद्ध्यदर्शनादितिचे
त॥ तर्हिपंचपंचाशतइत्यस्यशब्दस्यपुरुषपरत्वमंगीकृत्यसार्द्धद्विशतानांपुरुषाणामधिकारेभिहितेवत्सरचतुष्टयेनसत्रस्यस
हस्रसंवत्सरत्वंसंपद्यते॥ इतिपंचमपक्षोस्तु॥ चतुर्विंशतिपरमाःसत्रमासीरन्नितिवचनादभ्याधिकानानसत्राधिकारइतिचेत
॥ तर्हियोमासःसंवत्सरःइतिवचनातसंवत्सरशब्दस्यमासपरत्वेसतिसहस्रमासंसत्रमित्येषषष्ठःपक्षोस्तु॥ अष्टमेवत्सरउप
नीतोद्वादशवर्षाणिवेदमधीत्यविंशतिवयस्कोविवाहंकृत्वाजातपुत्रोग्निमादधीततस्मादाधानादूर्ध्वमस्यायुषिनसंतिसहस्रं
मासाइतिचेततर्हिसंवत्सरप्रतिमावैद्वादशरात्रयइतिवचनात्संवत्सरशब्दोद्वादशरात्रिपरःतथासतिरात्रीणांद्वादशसहस्रा
णिसंपद्यंते॥ तास्तुचरात्रिषुषस्युत्तरशतत्रयदिवसरूपसंवत्सरत्वेनगण्यमानास्तत्रयस्त्रिंशत्संवत्सरेभ्यऊर्ध्वंमासचतुष्टयं
भवति॥ तावत्परिमितंचायुराधानादूर्ध्वमपिसंभवतीतिसप्तमःपक्षोस्तुसंवत्सरप्रतिमावैद्वादशरात्रयइत्यस्मिन्वाक्येसंवत्स
रशब्दोनरात्रिपरःकिंतुतेनशब्देनप्रतिमाविशेष्यते॥ तस्मान्नसप्तमःपक्षोइतियुक्तंचेत॥ एवंतर्हिसंवत्सरशब्दोपिदिनपरइ
त्यष्टमःपक्षोस्तु॥ तथासतित्रिवृतःसंवत्सराइत्यादिवाक्यानांस्वारस्यंभवतित्रिवृत्पंचदशाःसप्तदशाएकविंशाइत्येतेशब्दा
स्तोमवाचकाःसंतःस्तोमयुक्तएकैकस्मिन्नहनियागरूपेलक्षणयावर्तंतेसत्रेषुतथाविधप्रयोगबाहुल्यात॥ नत्वहःसंख्येक
चिदपित्रिवृदादिशब्दाःप्रयुक्ताः तैश्वशब्दैःसामानाधिकरण्यात्संवत्सरशब्दःस्वावयवभूतेहनिलक्षणयावर्तते॥ त्रिवृतः
संवत्सराइत्युक्तेत्रिवृत्स्तोमकयागयुक्तान्यहानीत्युक्तंभवति॥ तस्माद्विश्वसृजामृषीणामिदंसत्रंसहस्रदिनमितिराद्धांतः॥ ॥

इतिश्रीमाधवीयेजैमिनिन्यायमालाविस्तरेषष्ठाध्यायस्यसप्तमःपादः॥ ॥अष्टमपादेप्रथमाधिकरणमारचयति
चतुर्होत्राख्यमंत्रेणहोमःसाग्नेरुताभयोः अनग्निकेविधिर्वाद्योहोमत्वात्क्रतुहोमवत॥ उभयोःपुरुषार्थत्वात्तृतीयावचनात्तु
तव॥ अनाहिताग्नेरेषावाइत्यग्नौलौकिकेकृतिः॥ इदमाम्नायते॥ प्रजाकामंचतुर्होत्रायाजयेदितिपृथिवीहोताद्यौरध्वर्युरि
त्यादिकोमंत्रश्वतुर्होतातेनप्रजाकामंयाजयेत॥ सोयंहोमआहिताग्निनाकर्त्तव्यः॥ अग्निहोत्रादिक्रतुहोमेषुतथात्वदर्शना
दित्येकःपक्षः॥ अनारभ्याधीतत्वेनक्रतुप्रवेशाभावातपुरुषार्थतयाविहितोहोमःआहिताग्नेरनाहिताग्नेश्वसाधारण

तिद्वितीयः पक्षः॥ आहिताग्नेरयंहोमविधिरिति तृतीयः पक्षोयुक्तः॥ कुतः॥ वचनबलात्तत्रुवचनमेवमाम्नातं॥ एषावाअनाहिताः
ग्निरिष्टियंचतुर्होतारइति॥ तस्यचाहवनीयाद्यभावाल्लौकिकेग्नौतद्धोमः॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ यस्तूपनयने
होमोवैदिकेवाग्नौलौकिके॥ वह्नौपूर्ववदत्राकेरभावाद्वैदिकेस्तुसः॥ आधानेविदुषोविद्यानुपनीतस्यनास्त्यसः॥ असंभवोवैदि
काग्नेर्होमोग्नौलौकिकेनतः॥ यथापूर्वत्राहिताग्नेर्होमविधायकंवाक्यमस्ति॥ तथोपनयनहोमस्यलौकिकाग्निविधायकवच
नाभावादाहवनीयेसहोमइति चेतमैवं॥ विद्वानेवह्याधानेधिकारी॥ नचानुपनीतस्यविद्यास्तिनतआहवनीयासंभवाल्लौ
किकेग्नावुपनयनहोमःकर्तव्यः॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ स्थपतीष्टिर्वैदिकेग्नौलौकिकेवाद्यआक्षिपेत्॥ आधा
नमिष्टिरंत्यःस्यादवैधेनाग्न्यसंस्कृतेः॥ यएतयानिषादस्थपतिंयाजयेदितिविहितयाइष्ट्यावादकप्राप्तेष्वाहवनीयादिषुकर्त
व्यत्वादाधानमंतरेणाहवनीयाभावात्॥ आधानमाक्षिप्याहितेतस्मिन्वैदिकेग्नावियमिष्टिरितिचेत्।मैवं॥ अत्रैवर्णिकत्वाद
विहितेनाधानेनाग्निसंस्कारासिद्धेः॥ तस्माल्लौकिकेग्नावसेष्टिः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ अवकीर्णिःपशुःकुत्र
विप्राद्याधानसंभवात्॥ वैदिकेलौकिकब्रह्मचारिण्याधानवर्जनात्॥ इदमाम्नायते॥ योब्रह्मचर्यवकिरेत्सगर्दभंपशुमाल
भेतेति॥ तत्रावकीर्णिनोविप्रादेस्त्रैवर्णिकस्याधानसंभवात्॥ वैदिकेग्नावयंपशुरितिचेत्मैवं॥ जायापतीअग्नीमादधीयाता
मित्युक्तत्वाद्ब्रह्मचारिणआधानाभावात्॥ तस्माल्लौकिकेग्नौसपशुःकार्यः॥ ॥ पंचमाधिकरणमारचयति॥ ॥ चौलादि
सर्वदापुण्याहादौवात्राविशेषतः॥ आद्योंत्यःशुक्लपक्षादौदिवानास्मृतितोविधिः॥ चौलोपनयनादीनांवैदिकानांकर्मणांति
थ्यादिविशेषस्याश्रवणात्॥ सर्वदातदनुष्ठानंयुक्तमितिचेत्।मैवं॥ शुक्लपक्षोत्तरायणपुण्यदिनादीनांस्मृतिषुविहितत्वात्॥
॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ याञ्चाक्रयावभावेस्तोविद्यमानेपिवाग्निमः॥ द्रव्यार्थत्वादपूर्वार्थंकुर्यात्तोद्रव्यवान श्रीः
पिज्योतिष्टोमेधनभिक्षासमाम्नाता॥ द्वादशरात्रीर्दीक्षितोभृतींवन्वीतेतिसामक्रयश्चाम्नातः॥ अरुणयापिंगाक्ष्याक्रीणाती
ति॥ तदुभयाम्नातंधनसोमयोर्द्रव्ययोर्लाभार्थमितिद्रव्यभावेतदनुष्ठेयमितिचेत्।मैवं॥ इतरांगवदेतदुभयंक्रत्वंगत्वयानित्य १०३
वदाम्नातं॥ तथासतियदिद्रव्याभावेवन्वीतक्रीणातीतिचेतिपाक्षिकत्वंकल्प्यते॥ तदानित्यवच्छ्रवणमुपरुध्येत॥ तस्मात्सत्य
पिद्रव्येतदुभयमदृष्टार्थंकर्तव्यं॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ अन्याभावेप्यभावेपिपयोभक्षादयोग्निमः॥ निमि

207
1945

त्तेसत्यनुष्ठानान्नियमादृष्टतोंतिमः॥ ज्योतिष्टोमेश्रूयते॥ पयोब्राह्मणस्यव्रतमिति॥ तदेतदसत्यन्यस्मिन्भक्षेकर्तव्यं॥ कुतःअ
न्याभावस्यनिमित्तत्वान्निमित्तेसतिनैमित्तिकस्यानुष्ठेयत्वादितिचेत्मैवं॥ नह्यत्रान्याभावोनिमित्तत्वेनश्रुतः॥ तस्मात्सत्यप्यन्यस्मि
न्भक्षेनियमादृष्टायपयएवव्रतयेत्॥ एवमन्यत्रापिद्रष्टव्यं॥ अग्नीदग्नीन्विहरेतिप्रैषार्थेपूर्वमेवाग्नीध्रेणबुद्धेपिदर्शपूर्णमासयोः
सप्रैषःकर्तव्यः॥ वाजपेयेसत्यपिवासोंतरेदर्भमयंपरिधापयतीतिविहितमनुष्ठेयं॥ पशोर्यत्वपशुर्मायुमकृतेतिमंत्रेणसंज्ञप्तहोमोवि
हितःसचमारणवेलायामकृतेपिपशुनाशब्देकर्तव्यः॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ अजीर्णिसंभवेकार्यंव्रतंनोवाग्निमो
विधेःरोगोत्पत्त्याप्रधानस्यविरोधान्नपयोव्रतं॥ ज्योतिष्टोमेश्रूयते॥ माध्यंदिनेपररात्रेव्रतंव्रतयतीति॥ तत्रयस्याजीर्णिसंभाविता
॥ तेनापिविहितत्वात्॥ पयोव्रतयितव्यमेवेतिचेत्।मैवं॥ प्रधानानुष्ठानेविघ्नप्रसंगात्॥ तस्मात्तथाविधवेलायांपयोवर्जयेत्॥ ॥
नवमाधिकरणमारचयति॥ ॥ अग्नीषोमीयकःकोपिछागएवोतचोदिते॥ अविशेषेणकोपिस्याच्छागोमंत्रेविशेषणात्॥ ज्योति
ष्टोमेश्रूयते॥ अग्नीषोमीयंपशुमालभेतेति॥ तत्रविहितेपशौविशेषस्याश्रवणाद्यःकोपिपशुराब्धव्यइतिचेन्मैवं॥ छागस्यवपाया
मेदसोनुब्रूहीतिमंत्रविशेषितत्वात्॥ तस्माच्छागएवालब्धव्यः॥ शाखांतरेविधावेवाग्नीषोमीयश्छागइत्येवंविशेषःश्रुतइतिचेत्॥
तत्त्वेपाकृत्वाचिंतास्तु॥ ॥ इतिश्रीमाधवीयेजैमिनिन्यायमालाविस्तरेषष्ठाध्यायस्यअष्टमःपादः॥ ॥ सप्तमाध्यायः॥ ॥
प्रमाणाद्यधिकारांतैःषड्भिचारैर्निरूपिते॥ उपदेशातिदेशोथतस्मापेक्षोनिरूप्यते॥ अनेनषष्ठसप्तमयोरध्याययोःपूर्वोत्तरभावउप
पादितः तथाहियत्रापेक्षितस्यार्थजातस्यप्रतिपादकोग्रंथसंदर्भः॥ पव्यतेसउपदेशःअतिदेशस्तुपूर्वाचार्यैर्दर्शितः॥ अन्यत्रैवप्रती
तायाःकृत्स्नाया धर्मसंततेःअन्यत्रकार्यतःप्राप्तिरतिदेशोभिधीयतइति॥ प्राकृतात्कर्मणोयस्मात्तत्समानेषुकर्मसु॥ धर्मप्रदेशोयेन
स्यात्सोतिदेशइतिस्मृतः॥ इतिचतत्रोपदेशःषड्भिःरध्यायैर्विचारितः॥ ततःषष्ठाध्यायस्योपदेशविचारित्वात्पूर्वभावित्वंसप्तमाध्या
यस्यातिदेशविचारत्वादुत्तरभावित्वं॥ ॥ सप्तमाध्यायस्यप्रथमपादेप्रथमाधिकरणमारचयति॥ सर्वार्थप्रकृतार्थावाप्रयाजाद्युपदे
शनं॥ नव्यन्वयेनसर्वार्थ्यान्नातिदेशोविचार्यतां॥ अंगप्रधानयोर्मुख्यापूर्वभेदसमन्वयात्॥ प्रकृतार्थंततःकार्यमतिदेशविचारणं
दर्शपूर्णमासप्रकरणेप्रयाजादयउपदिष्टाःज्योतिष्टोमप्रकरणेदीक्षणीयादयःतएतेसर्वेधर्माःसर्वयागार्थत्वेनोपदिश्यंते॥ कुतः

अ० कर० माला०
१०४

यज्यन्वयात्॥ यागः करणंप्रयाजादयइतिकर्तव्यताइत्येतत्तावदविवादं॥ तत्रयदिप्रयाजादयोयागवदपूर्वेणान्वितास्युः॥ तदानीमपूर्वनि
ष्पादकत्वमुभयत्रसमानमितिकृत्वाकरणोपकरणत्वलक्षणंसर्वसंमतमवांतरवैषम्यंबाध्येत॥ किंचावघातपेषणादीनांयागनिष्पादकत्वेन
यज्यन्वयोदृष्टः॥ तद्वदंगत्वसमान्यात्प्रयाजादीनामपियज्यन्वयोयुक्तः यजिधातुश्चदर्शपूर्णमासज्योतिष्टोमसौर्यश्येनादिषुसर्वेष्ववि
शेषेणनुगतंयागमात्रंब्रूते॥ तथासतिसौर्यश्येनादिष्वप्युपदेशेनैवकृत्स्नधर्मप्राप्तेरतिदेशविचारोनकर्तव्यमितिप्राप्तेब्रूमः॥ अपूर्वंहि
मुख्यंफलवत्वात्॥ यजिर्नमुख्यः फलरहितत्वात्॥ फलवतिमुख्येप्रयाजविधानंयुक्तं॥ अतः करणेतिकर्तव्यतयोरुभयोरपूर्वेणप्रथमम
न्वयः॥ पश्चात्तुपरस्परंगुणप्रधानभावेनान्वयः॥ तथासत्यपूर्वभेदस्यद्वितीयाध्यायनिरूपितत्वादपूर्वविशेषेणतत्करणभूतयजिविशे
षेणचान्विताः प्रयाजादिधर्मायस्मिन्प्रकरणेआम्नाताः तेतत्रैवव्यवतिष्ठंते॥ सत्येवंप्रकरणमर्थवद्भवति॥ सर्वेषांधर्माणांसर्वत्रप्राप्तौ
प्रकरणमनर्थकंस्यात्॥ तस्मात्सौर्यश्येनादिप्रकरणेधर्मोपदेशाभावाद्धर्माकांक्षांपूरयितुमतिदेशविचारः कर्तव्यः॥ ॥ द्वितीयाधिकरण
मारचयति॥ ॥ इषौसमानमितरच्छ्येनेनेत्यनुवादकं॥ श्येनवैशेषिकाणांवातिदेशोत्रानुवादकं॥ ज्योतिष्टोमविकारत्वात्धर्माश्चोदका
समाः॥ श्येनेष्वारितरत्वोक्तिरिषुवैशेषिकंप्रति॥ इषुवैशेषिकादुक्तादितरच्छ्येनगंस्मरेत्॥ वैशेषिकंलोहितोष्णीषादितेनातिदिश्यते॥ इषु
नामकः श्येननामकश्चद्वावेकाहौज्योतिष्टोमविकारौतयोरुभयोर्ज्योतिष्टोमधर्माश्चोदकेनप्राप्ताः॥ तेचोभयत्रसमानाः तच्चसमानत्व
मिषुप्रकरणेनेनवाक्येनानूद्यतेसमानमितरच्छ्येनेनेति॥ नन्वत्रेतरशब्दोक्तिरनुपपन्नातत्प्रतियोगिनः कस्यचिदनिर्दिष्टत्वादितिचेत्॥
न॥ पूर्ववाक्यविहितस्यविशेषधर्मस्यप्रतियोगित्वात्॥ इषौयोवैशेषिकोधर्मोविहितः॥ तंपरित्यज्येतरश्चोदकप्राप्तंसर्वंश्येनेनसमान
मित्यर्थः॥ तस्मादनुवादकमिदंवाक्यमितिप्राप्तेब्रूमः॥ इतरशब्दः प्रतियोगिसजातीयंब्रूते॥ तद्यथादेवदत्तएकएवाधीयतेनेतरः कश्चि
दित्युक्तेऽध्ययनप्रसक्तिमान्यदत्तादिर्माणवकः प्रतीयतेनतुगवाश्वघटपटादिः॥ एवमत्रापीषुवैशेषिकस्यपूर्ववाक्योक्तस्यप्रतियो
गित्वात्तत्सजातीयंश्येनगतंलोहितोष्णीषादिरूपंवैशेषिकं॥ धर्मजातमितरशब्देनप्रतिभाति॥ तच्चप्रकृतावभावान्नचोदकेनप्राप्तं
तस्मादिषावनुष्ठेयत्वेनातिदिश्यते॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ वैश्वदेवब्राह्मणस्यातिदेशोवादमात्रगः॥ सर्वादांगविधि
स्तावाहविर्विध्यन्वयात्॥ अर्थवादैकनिष्ठोसौमेकमंगविधेरपि॥ समानः सोन्वयोगानांविधिरप्यतिदिश्यतां॥ चातुर्मास्येषुवैश्वदेव

श्रीः
१०४

209
1945

वरुणप्रघाससाकमेधशुनासीरीयनामकानिचत्वारिपर्वाणितत्रवैश्वदेवेष्टौहवींषिविहितानि॥ आग्नेयमष्टाकपालंनिर्वपतिसौम्यंच
रुंनिर्वसावित्रंद्वादशाकपालंसारस्वतंचरुंपौष्णंमारुतंसप्तकपालंवैश्वदेवीमामिक्षांद्यावापृथिव्यमेककपालमिति॥ तेषांहविषांब्राह्म
णेर्थवादः आम्नातः॥ वार्तघ्नानिवाएतानिहवींषीतिअंगविधयोपितत्राम्नाताः॥ त्रेधासंनद्धंबर्हिस्त्रेधासन्नद्धइध्मः नवप्रयाजाद
ह्यंतेनवानुयाजाइति॥ एवंस्थितेवरुणप्रघासादिषुपूर्वोक्तान्याग्नेयादीनिपंचहवींषिविधायतदीयंपूर्वोदाहृतंब्राह्मणमेतेषुपंचस्वति
दिश्यति॥ एतद्ब्राह्मणान्येवपंचहवींषिविधायतदेयद्ब्राह्मणानीतराणीति॥ तत्रार्थवादमात्रस्यातिदेशोन्याय्यः॥ तस्यहविर्विधि
भिः सहस्तुत्यस्तावकरूपेणान्वयसंभवादंगविधीनांतदसंभवादितिचेन्मैवं॥ उपकार्योपकारकभावेनहविषामंगानांचान्वयात्॥ त
स्मादर्थवादसहितानामंगविधिनामतिदेशः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ श्रुतमेककपालस्थब्राह्मणस्यापिदेशनंतत्पूर्ववत्तथैं
द्राग्नएतद्ब्राह्मणइत्यपि॥ एककपालब्राह्मणंवैश्वदेववरुणप्रघासेषुचपठितं॥ ऐंद्राग्नब्राह्मणंतुवरुणप्रघासेष्वेवाम्नातं॥ एवंस्थिते
साकमेधेषुविहितयोरेककपालैंद्राग्नयोर्ब्राह्मणातिदेशआम्नायते॥ एतद्ब्राह्मणऐंद्राग्नएतद्ब्राह्मणएककपालोयद्ब्राह्मणइतरस्त्वइत
रस्येति॥ तत्रोभयत्रपूर्वन्यायेनार्थवादसहितांगविधिः कांडस्यसर्वस्यातिदेशः॥ पूर्वन्यायस्यविषयव्याप्तयेवक्ष्यमाणोदाहरणस्मारणा
यवीजकथनं॥ ॥ पंचमाधिकरणमारचयति॥ ॥ किंवैश्वदेविकादेककपालादतिदेशनं॥ साकमेधेषुवरुणप्रघासस्थादुताग्निमः॥
प्रकृतावर्थबाहुल्यादंतिमः सन्निधानतः॥ ऐंद्राग्नसाहचर्याच्चसार्थत्वमधिकंततः॥ वैश्वदेवेद्यावापृथिव्यएककपालः वरुणप्रघासेषु
कायएककपालः तयोः पृथक्ब्राह्मणमाम्नातंसाकमेधेषुवैश्वकर्मणएककपालः॥ तस्मिन्वैश्वदेविकैककपालब्राह्मणमतिदेष्टव्यं॥
कुतः प्रकृतित्वेनतस्मिन्नुपदिश्यमानधर्मबाहुल्यात्॥ वारुणप्रघासिकस्यतद्विकृतित्वादल्पाएवधर्मविशेषउपदिष्टाः ग्रामीमथ्याहिरण्म
य्योवास्कचोभवंतीत्यादयः॥ तत्रबह्वनुग्रहोन्याय्यइतिप्राप्तेब्रूमः॥ वारुणप्रघासिकब्राह्मणस्यप्रत्यासन्नत्वात्तस्यैवातिदेशोयुक्तः॥
ऐंद्राग्नब्राह्मणंचतत्रत्यमेवातिदिश्यते॥ वैश्वदेवेतदभावात्॥ तत्साहचर्यादिदमपितत्रत्यमेव॥ ननुप्रकृतिभूताद्वैश्वदेविकेककपाला
देववारुणप्रघासिकेऽपसाकमेधीयेपिचोदकेनधर्मातिदेशसिद्धौब्राह्मणादिदेशवाक्यमिदंव्यर्थमितिचेत्। न॥ हिरण्मयत्वाद्यधिक
धर्मातिदेशायापेक्षितत्वात्॥ तस्माद्वारुणप्रघासिकैककपालब्राह्मणस्यैवात्रातिदेशोगुलः॥ ॥ इतिश्रीमाधवीयेजैमिनिन्यायमाला

विस्तरे सप्तमाध्यायस्य प्रथमः पादः॥ ॥ द्वितीयपादे विद्यमानं केमेमधिकरणमारचयति॥ ॥ आदिति शंयंविनिश्चेतुं कवतीषु रथं
तरं॥ गायतीत्यृगानयुक्ता शब्दार्थो गानवेवं वा॥ इति चिंता गानयुक्तात्वमित्येस्यृक्प्रसिद्धिता लाघवादतिदेशास्य योगात्वाच्चांतिमो भवे
त॥ इदमाम्नायते॥ कवतीषु रथंतरं गायतीति कयानश्चित्र आभुवदित्याद्यास्तिस्रः ऋचः कवत्यः॥ तास्तु वामदेव्यं सामाध्ययनसमः
प्राप्तं तद्बाधितुं रथंतरं सामतास्वतिदश्यते॥ तत्रातिदेश्यस्वरूपं निश्चितं रथंतरशब्दार्थश्चिंत्यते॥ गानविशेषयुक्ताभित्वाशूरनोनु
मइतियमृग्रथंतरमित्युच्यते॥ अध्येतृप्रसिद्धितः॥ रथंतरगीयतामिति केनचिदुक्ता अध्येतारस्वरस्तोभविशेषयुक्तामित्वेत्यृचं पठं
ति न तु स्वरस्तोभमात्रं॥ तस्माद्गानविशिष्टाया ऋचो रथंतरशब्दार्थत्वमिति प्राप्ते ब्रूमः॥ स्वरादिविशेषानुपूर्वीमात्ररूपमृगक्षरव्यति
रिक्तं यद्गानं तदेव रथंतरशब्दस्यार्थः॥ कुतः लाघवात्॥ किंच॥ कवतीष्वृक्षु गानमिति दृष्टं योग्यं न चृच स्वद्योग्यतास्ति॥ कयानो भित्वेत्य
नयोर्ऋचोर्युगपदाधाराधेयभावेन पठितुमशक्यत्वात्॥ तस्माद्गानविशेष एव रथंतरादिशब्दार्थः॥ ॥ इति श्रीमाधवीये जैमिनिन्याय
मालाविस्तरे सप्तमाध्यायस्य द्वितीयः पादः॥ ॥ तृतीयपादे प्रथमाधिकरणमारचयति॥ ॥ मासंजुहोत्यग्निहोत्रमिति नामाग्निहोत्रतः
नित्यान्मासाग्निहोत्रे स्मिन्धर्माणां नातिदेशकं॥ उतातिदेशकं नैव द्वयोर्नाम्नः समत्वतः॥ अग्नये होत्रमित्यस्य नित्ये संपादितत्वतः॥ त
त्र मुख्यं ततोन्यत्र गौणत्वस्य प्रसिद्धये॥ नित्याग्निहोत्रगतान्धर्मांस्तन्नामातिदिशेदिह कुंडपायिनामयने श्रूयते मासमग्निहोत्रं जुहोतीति
तत्राग्निहोत्रमित्येतन्नाम नित्याग्निहोत्रादस्मिन्मासाग्निहोत्रे धर्मानतिदेष्टुं नार्हति कुतस्तस्य नाम्न उभयोरग्निहोत्रयोर्मुख्यवृत्त्यास
मानत्वादिति प्राप्ते ब्रूमः अग्नये होत्रं यस्मिन्कर्मणि तदग्निहोत्रमित्येवमवयवार्थो नित्याग्निहोत्रे संपाद्यते नामधेयत्वं प्रथमाध्याये निर्णितं
अतस्तत्रैवायं शब्दो मुख्यः नत्वोभयत्र मुख्यत्वं संभवति अनेकार्थस्यान्याय्यत्वात् मुख्यत्वासंभवेन मासाग्निहोत्रे गुणयोगाद्वृत्तिर्तु नि
त्याग्निहोत्रं गुणानतिदिशति॥ द्वितीयाधिकरणमारचयति गवामयन आद्यह्नि प्रायणीयेति नामयत् तद्वादशाहिकादह्नो धर्मानति
दिशेन्नवा पूर्वन्यायेनातिदेशो मैवं प्रथमं तावद्द्वयोः अह्नोस्तुल्यतिमुख्यत्वसमं नातिदिशेदतः द्वादशाहप्रथमस्याह्नः प्रायणीयमि
तिनामतथा गवामयनेपि तत्राग्निहोत्रनामन्यायेनातिदेशाद्वृत्तिश्चेतमेवं प्रायणीयशब्दप्रवृत्तिनिमित्तस्य प्राथम्यस्य द्वयोस्तुल्यत्वेनो
भयत्र मुख्यत्वेप्यनेकार्थत्वप्रसंगाभावात् प्रारभ्यायति गच्छति प्रवर्तते कर्मानेनेति प्रायणीयं अतो नैतन्नामधर्मानतिदिशति तृतीया

211
1945

धिकरणमारचयति॥ ॥ विश्वजित्सर्वपृष्ठः किमनुवादो रथंतरं॥ बृहन्नावा समुच्चेयं यद्वा षाडहिकानि षट्॥ अतिदेश्यानि तत्राद्यो माहें
द्रादिचतुष्टये॥ पृष्ठशब्दाच्चोदनेन सर्वेषामिह संभवात्॥ समुच्चयो वा विधेयः सर्वत्वं बह्वपेक्षया॥ नतु द्वयोरतः षण्णां पृष्ठानामति
देशनं॥ विश्वजित्सर्वपृष्ठो भवतीति श्रूयते॥ तत्र सर्वपृष्ठशब्दोनुवादः॥ कुतः प्राप्तत्वात्॥ तथाहि ज्योतिष्टोमे माध्यंदिनपवमा
नानंतरभावीनि माहेंद्रादीनि चत्वारि स्तोत्राणि संति॥ अभित्वा शूर नोनुमः कयानश्चित्र आभुवत्॥ तं वो दस्ममृतीषहं॥ तरोभिर्वो
विदद्वसुरित्येषु चतुर्षु सूक्तेषु तानि स्तोत्राणि सप्तदशस्तोममपामापाद्य गीयंते॥ एकस्मिन्सूक्ते विद्यमानानां तिसृणामृचां॥
ब्राह्मणोक्तविधानेन सप्तदशधाभ्यासः॥ सप्तदशस्तोमः॥ माहेंद्रादिषु स्तोत्रेषु पृष्ठशब्दः श्रूयते॥ सप्तदशानि पृष्ठानीति॥
तानि चत्वारि पृष्ठानि विश्वजिति चोदकप्राप्तत्वात्सर्वपृष्ठशब्देनानूद्यंत इत्येकः पक्षः॥ रथंतरपृष्ठबृहत्पृष्ठयोर्ज्योतिष्टोमे वि
कल्पितयोरिहापि चोदकेन विकल्पप्राप्तौ सर्वशब्देन समुच्चयो विधीयते॥ तथा सत्यनुवादत्वं वैयर्थ्यं न भवतीति द्वितीयः प
क्षः॥ सर्वत्वं बहुषु मुख्यं न तु द्वयोः॥ तस्मादनेन सर्वपृष्ठशब्देन षट्संख्याकानि पृष्ठान्यतिदिश्यंते षडहे प्रतिदिनमेकैकं पृष्ठं
विहितं॥ तानि च षट्पृष्ठानि रथंतरबृहद्वैरूपवैराज्यशाक्वररैवतसामभिर्निष्पाद्यानि यद्यपि च विश्वजित् एकाहत्वाज्ज्योतिष्टो
मविकृतित्वमेव न तु षडहविकृतित्वं तथापि सर्वपृष्ठोक्तिबलात्तानि षट्पृष्ठान्यतिदिश्यंते॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥
निष्कासेन तुषैश्चावभृथं यंतीत्यनूद्यते॥ नीरोत्सेकः कर्मणो वा विधिः सौमिकधर्मणः॥ यो दर्शपूर्णमासाभ्यां वारुण्यां चोदकागतः॥ व्युत्सेको
नूद्यतामप्येवं कर्मणि पुनः श्रूयते॥ वारुण्या निष्कासेन तुषैश्चावभृथं यंतीति निष्कासविधित्सया अपां व्युत्सेकोवभृथशब्देन आमिक्षायागे
चोदकप्राप्तोनूद्यते॥ अस्ति हि व्युत्सेकस्यावभृथत्वं॥ एवं वेद दर्शपूर्णमासयोरवभृथ इति श्रुतत्वादिति प्राप्ते ब्रूमः॥ सौमिके कर्मण्यव
भृथशब्दो मुख्यः तस्य शब्दस्य रूढिदादेवाद्वैधया क्रियासमानाधिकरण्येन नामधेयत्वात्तत्रैव वैदिकप्रयोगबाहुल्याच्च॥ व्युत्सेक
त्वपसंबंधादुपचर्यते॥ नहि सौमिके कर्मणीव व्युत्सेके वभृथभावनावं शास्त्रयवतीं पश्यामः॥ येन तत्र मुख्यत्वमाशंक्यते॥ तस्मात्सौमि
ककर्मवाचिनमवभृथशब्दं वरुणप्रयासप्रकरणे प्रयुंजानः आम्नायो मासाग्निहोत्रन्यायेन सौमिकधर्मानतिदिशन् कर्मांतरं तद्धर्म
युक्तं विधत्ते॥ न च विपर्ययेणात्रैव मुख्यो वभृथोस्त्विति शंकनीयं॥ अपेक्षितस्य धर्मकलापस्यात्राभावात्॥ तस्मात्सौमिकधर्मोपेत

कर्मान्तरविधिः॥ ॥ पंचमाधिकरणमारचयति॥ ॥ तत्र द्रव्यं पुरोडाशस्तुषनिष्कावृत॥ प्राप्तावभृथशब्देन पुरोडाशोतिदेशातः तुषनिष्कास
योरत्र साक्षाच्छ्रुतपदशतः॥ अतिदेशप्रापितपुरोडाशस्य बाधनं तत्र पूर्वोक्तकर्मान्तरधर्मातिदेशकेनावभृथशब्देन पुरोडाशातिदेश्यते
अतिदेशश्चोपदेशाद्दुर्बलः॥ तस्मात्तुषनिष्कासाभ्यां पुरोडाशो बाध्यते॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ वैश्वदेवत्रिकपालवैश्व
वान्नवकपालतः॥ धर्मातिदेशः स्यान्नो वा विद्यते तत्राग्निहोत्रवत्॥ श्रुत्यावैश्वदेवशब्दोयं देवतायाः विधायकः॥ न गौणवृत्तिमा
श्रित्य धर्मानतिदिशत्यतः॥ आतिथ्येष्टौ वैश्वदेवो नवकपालो विहितः॥ तत्र श्रुतो वैश्वदेवशब्दो राजसूयगते वैश्वदेवत्रिकपाले प्रयुज्यमा
नोग्निहोत्रशब्दवत् नवकपालधर्मानतिदिशतीति पूर्वः पक्षः॥ विश्वेदेवतास्येति विग्रहे विहिततद्धितप्रत्ययो देवतामभिधत्ते न तु धर्मान्॥
तस्मान्नातिदिशति॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ निर्मथ्येनेष्टकपाले बर्हिषावटसंस्कृतौ॥ अतिदेशो न वाद्योस्तु धर्मार्थत
न्नपूर्ववत्॥ अग्नीषोमीयपशौ धर्मवान्निर्मथ्योग्निराम्नातः स च निर्मथ्यशब्दोग्निचयन इष्टकापाके प्रयुक्तः निर्मथ्येनेष्टकाः प
चंतीति॥ तथा दर्शपूर्णमासयोः सधर्मकं बर्हिराम्नातं॥ स च बर्हिःशब्दः पशौ प्रयुक्तः बर्हिषा यूपावटमवस्तृणातीति तयोस्तत्र धर्म
सिध्यर्थमतिदेश इति चेत्।न। पूर्वोक्तवैश्वदेवशब्दवन्मुख्यया वृत्त्या विधिसंपत्तेधर्मलक्षणकत्वायोगात्॥ अग्निमंथनस्य बर्हिर्लवनस्य
च लोकसिद्धत्वे न शास्त्रीयधर्माभावेपि लौकिकधर्मरूपमयं निष्पद्यते॥ तस्मान्नास्त्यतिदेशः॥ ॥ अष्टमाधिकरणमारचयति॥ ॥
सौमिकं प्राकृतं वा स्याद्द्वयोः प्रणयनं कृतं॥ आद्यो प्राप्तत्वतो मैवमनामत्वेन वादगीः चातुर्मास्येषु श्रूयते॥ द्वयोः प्रणयंति तस्माद्द्वाभ्यां
यंतीति॥ तत्र सौमिकं वत्स धर्मकमग्निप्रणयनं॥ तदेव ग्रहीतव्यं॥ कुतः॥ सोमस्य चातुर्मास्यप्रकृतित्वाभावेन तदीयप्रणयनस्यात्र चो
दकाद प्राप्तस्य विध्यर्हत्वात्॥ दर्शपूर्णमासगतं त्वग्निप्रणयनं चोदकप्राप्तत्वादविधेयं॥ तस्मात्सौमिकस्य धर्मा अत्र प्रणयनशब्देनाति
दिश्यंत इति प्राप्ते ब्रूमः॥ नायं प्रणयनशब्दः सौमिकस्य प्रणयनकर्मणो नामधेयं॥ किंतु निर्मथ्यबर्हिरादिशब्दवल्लौकिक एव॥ ततो न ध
र्मातिदेशः यदि प्राकृतप्रणयनस्य प्राप्तत्वाद्विधिवैयर्थ्यं तर्ह्यर्थवादसंबंधाय तद्वाक्यमस्तु॥ ॥ नवमाधिकरणमारचयति॥ ॥ आ
द्यंतयोर्मध्ययोर्वापि वर्णोस्त्वप्रसंजकात्॥ आद्यंतयोरुत्तरगत्या मध्ययोः पर्वणो भवेत्॥ तस्माद्द्वाभ्यां यंतीत्यनेनार्थवादेन संबंधाय
पुनर्विधिनायत्प्राकृतमग्निप्रणयनं चोदकप्राप्तमपि श्रूयत इत्युक्तं तद्वैश्वदेवशुनासीरीययोराद्यंतयोः पर्वणोर्भवितुमर्हति॥ कुतः॥

213
1945

प्रसंजकात्॥ तथा हि नैवैश्वदेव उत्तरवेदिमुपवपंति न शुनासीरीय इत्युत्तरवेदिप्रतिषेधस्तयोः पर्वणोरुत्तरवेदिं प्रसंजयति॥ अप्रसक्तस्य प्रतिषे
धायोगात्॥ उत्तरवेदिश्चाग्निप्रणयनार्था॥ तस्मादुत्तरवेदिप्रसक्तिद्वारेणाद्यंतयोरिदमग्निप्रणयनमिति प्राप्ते ब्रूमः॥ उत्तरवाऽएतौ यज्ञस्य यत्
वरुणप्रघासः साकमेधश्चेति गमनसाधनमुरुत्वं मध्यमयोः पर्वणोरुपन्यस्तं॥ तत्संनिधौ द्वयोः प्रणयंतीति चोदकप्राप्तमग्निप्रणयनं अर्थ
वादार्थं पुनर्विधाय द्वाभ्यां यंतीति अर्थवादेनोरुत्वकल्पनयुक्ताभ्यां गमनमुपन्यस्यते॥ तस्मान्मध्यमयोस्तत्प्रणयनं॥ किमर्थं तर्हि चोदकप्राप्त
मग्निप्रणयनं मध्यमयोः कीर्त्यते इति चेत् उत्तरवेद्यामग्निनिधानगुणविधानार्थं॥ न चात्रोत्तरवेद्यभावात्प्रणनाभाव इति शंकनीयं॥ उपात्र
वपंतीत्यनेनारभ्यश्रुतेन वाक्येनोत्तरवेद्युपवापस्य विहितत्वात्॥ स चोत्तरवेदिराद्यंतयोः पर्वणोर्निषेधान्मध्यमयोर्व्यवतिष्ठते॥ तस्यामु
त्तरवेद्यां प्रणीतोग्निर्निधीयते॥ एतदर्थमेव हितार्थवादं पुनर्निधानं॥ उक्तमधिकरणद्वयमेकीकृत्य वार्त्तिककारेण योभिहितो निर्णयस्तं दर्श
यति॥ अनामत्वाच्च वैयर्थ्यात्सौमिकं प्राकृतं न च॥ अपूर्वं त्वप्रणयनं यागारवांतरसमोक्तितः॥ हवनीयाद्द्वावग्नी प्रणयत इति शारवांतरे मध्य
मयोर्नूतनं प्रणयनं विहितं तेन समानवचनत्वादत्राप्यपूर्वं प्रणयनं विधीयते॥ ॥ दशमाधिकरणमारचयति॥ ॥ न विकारो विकारो वास्व
रसामादयोर्नाह्ना॥ वैश्वदेवन्यायतो मैवमनन्यगतिलिंगितः॥ गवामयने द्वयोर्मासषट्कयोर्मध्ये वर्तमानं विषुवन्नामकं प्रधानभूतमेकमहर्वि
द्यते॥ तच्च दिवाकीर्त्यं तस्मात्प्राचीनास्त्रयः स्वरसामनामकाः अहर्विशेषाः तथोपरिष्टादपि त्रयः स्वरसामानः तदेतदभिप्रत्य श्रूयते॥ अभि
तो दिवाकीर्त्यं त्रयः स्वरसामान इति॥ तेषु च ग्रहसांतत्यसप्तदशस्तोमादयो धर्मा विहिताः॥ अन्यत्र त्वेवं श्रूयते॥ एष्यः षडहो द्वौ स्वरसामा
नाविति॥ तावता वहर्विशेषौ पूर्वोक्तानां स्वरसाम्नां न विकारो॥ कुतः॥ वैश्वदेवसमानत्वात्॥ यथा वैश्वदेवशब्दो देवतारूपगुणविधानेन मुख्यवृ
त्तित्वान्न धर्मानतिदिशति॥ तथा सामविशेषगुणरूपगुणविधायकः स्वरसामशब्द इति प्राप्ते ब्रूमः॥ अनन्यगतिकलिंगवशात्स्वरसामानौ
विकारौ भवतः॥ तथा हि षडहो द्वौ स्वरसामानावित्येवं योयमष्टाहउपन्यस्तः॥ तत्र षडहस्त्वहःक्रमेण त्रिवृत्पंचदशः सप्तदश एकविंश
स्त्रिणवस्त्रयस्त्रिंश इत्येवं स्तोमषट्कं चोदकेन प्राप्तं॥ एवं स्थिते तृतीयषष्ठदिवसगतयोः सप्तदशत्रयस्त्रिंशयोर्व्यत्यासं विधाय सप्तमा
ष्टमयोरह्नोः सप्तदशस्तोमं सिद्धवत्कृत्वा त्रिपुच्छरमेषहः स सप्तदशस्तोमेनेरंतर्यमर्थवादेनानुवदति॥ यत्तृतीयं सप्तदशमहस्तत्त्रयस्त्रिं
शरूपं नामभिपर्यो हरंतीति वाल्याम विधिः॥ त्रयाणां सप्तदशानामन्वानतायाइत्यर्थवादः॥ तत्र यद्यंतयोरह्नोः सप्तदशस्तोमस्वरसाम
शब्दोतिदिशेत्॥ तदानंतर्यमुपपद्येत न त्वन्यथा॥ तस्मान्न वैश्वदेवन्यायेन गुणविधिः किंतु धर्माणामतिदेशकः॥ ॥ एकादशाधिकरण
मारचयति॥ ॥ वासो नसीवानतक्षणातिदेशः कृतेन वा॥ आद्यः क्रियानिमित्तत्वाज्जातिवाचित्वतोंतिमः॥ वासो ददातीत्यनोददातीति

श्रूयते॥ तत्र यथा यूपशब्दस्य शास्त्रीयच्छेदनतक्षणादिक्रियाप्रवृत्तिनिमित्तं तथा वासःशब्दस्य लौकिकी कुविंदकर्तृका तंतुवानक्रिया॥ अनःशब्दस्य वर्द्धकि
कर्तृकादारुतक्षणक्रिया॥ तस्माद्वासोनःशब्दयोः क्रियानिमित्तकत्वाद्वा न तक्षणे कारयितव्यतदुभयं तद्वाच्यमिति चेत्।न॥ गवाश्वादिशब्दवज्जातिवाचित्वा
त्॥ पाचकादिशब्दानां क्रियामुपलभ्य प्रयुज्यमानत्वात्क्रियैव निमित्तं वासःशाकटादिषु क्रियामनुपलभ्यापि जातिमुपलभ्य शब्दं प्रयुंजते तस्माद्वासोनःशब्देन
क्रियामतिदिशति॥ ॥द्वादशाधिकरणमारचयति॥ ॥ वैदिको लौकिको वाग्निर्निधेयसंस्कृतत्वात्॥ आधानादिमायसंस्कारो जात्यवत्त्वेन लौकिकः॥ गर्ग
त्रिरात्रे आज्यदोहसामानि प्रस्तुत्य श्रूयते॥ अग्निमुपनिधाय स्तुवीतेति॥ तत्रोपनिधेयोग्निर्वैदिकः स्यात्॥ कुतः॥ आधानादिसंस्कारस्य प्रयोजनाकांक्षि
तया समस्तवैदिककर्मविशेषत्वादिति प्राप्ते ब्रूमः॥ आहवनीये जुहोति गार्हपत्ये हवींषि श्रपयतीत्यादिभिर्होमादिभिः संस्काराकांक्षा निवर्तिता॥ ततो ना
हवनीयादिशब्दवदग्निशब्दः संस्कारनिमित्तः किंतु वासःशब्दवज्जातिवाची॥ तथा सति लौकिकत्वान्नाधानादिसंस्कारमपेक्षते लौकिककार्यक्षिप्रे वाह
नकार्ये चाप्यग्निर्लौकिकः शेषभावं भजते तस्य सर्वकार्यसमर्थत्वात्॥ तत्राग्निशब्दो जातिमात्रमुपस्थापयेत लौकिकवह्निमात्रेण चरितार्थो विनाहवनी
यादिसंस्कारवाचकं विशेषणं न वैदिकस्योपस्थापको भवति॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥ संस्कारस्यादुपशयेन वा यूपोक्तितोग्निसः॥ अस्वा
नियोजनाभावात्स्वच्छेदनयूपता॥ यूपैकादशिन्यां श्रूयते॥ उपशयो यूपो भवतीति॥ एकादशयूपानां समूहः एकादशिनी॥ तत्र दक्षिणतो वर्त्म पितृकादशो
स्ति यूपउपशयः॥ तथा च श्रूयते॥ यद्दक्षिणत उपशय इति॥ तस्मिन्नुपशये परिव्याणादिको यूपसंस्कारोस्ति॥ संस्कारनिमित्तकस्य यूपशब्दस्य तत्र प्रयुक्त
त्वादिति चेत्।न॥ संस्कारप्रयोजनस्यात्राभावात्॥ पशुं नियोक्तुं यूपः संस्क्रियते॥ स्वाने यो वत्तनमितरेषु दशसु यूपेष्वस्मिन्नेकादश उपशये तथा च
तैत्तिरीयब्राह्मणं॥ सर्वे वा अन्ये यूपाः पशुमंतोथोपशय एव पशुरिति॥ परिव्याणादिसंस्काराभावेपि मंत्रच्छेदनादयः केचिद्धर्मास्तत्र वाचनिका विद्य
ते॥ तावता ल्पेन साद्दृश्येन गौणी तत्र यूपोक्तिः॥ तस्मान्न यूपशब्दो धर्मानतिदिशति॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥ पृष्ठेरूपस्थितोस्तोत्रधर्माः सं
ति न वाग्निमः॥ अग्निहोत्रं न याज्ञमंत्रोक्तेरात्मनेपदात्॥ अग्निचयने श्रूयते॥ पृष्ठैरुपतिष्ठत इति पृष्ठशब्दो ज्योतिष्टोमे माध्यंदिनसवनगतस्तो
त्रकर्मणां नामधेयमिति प्रथमाध्याये निर्णीतं॥ सोग्निचयनगतोपस्थानकर्मणि प्रयुज्यमानोग्निहोत्रशब्दन्यायेन पृष्ठस्तोत्रधर्मानुपस्थाने तिदिशति
ति चेत्।मैवं॥ अत्र पृष्ठशब्दस्य मंत्रपरत्वेन कर्मपरत्वाभावात्॥ मासमग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दो जुहोतिधातुना समानाधिकृत्यः कर्मपरः
अत्र तूपान्मंत्रकरणं इत्येतत्पाणिनीयं मंत्रमुपशब्दयुक्तातिष्ठतेश्चातोरात्मनेपदं विदधत्तृतीयांतस्य पृष्ठशब्दस्य मंत्रात्मककरणपरतां दर्शयति
यद्यपि स्तोत्रकर्मवाची पृष्ठशब्दस्तथापि तत्साधनभूतान्रथंतरादिसामोपेतानभित्वा शूर इत्यादिमंत्रानुपलक्षयति॥ न च लक्षणाश्रयणमेव दोषः इति
वाच्यं॥ तत्पुरस्प्या श्रयणीयत्वात्किंच तत्पक्षे यथा नित्याग्निहोत्रवाचिनाग्निहोत्रशब्देन तद्धर्मानुपलक्ष्यते तथा धर्मतत्कर्मासाग्निहोत्रात्मकं
कर्मांतरं लक्ष्यते॥ तथात्रापि तद्वाचिनाग्निहोत्रशब्देन तद्धर्मोपलक्षणद्वारेणोपस्थानरूपकर्मो लक्षणीय इति प्रकल्प्यते॥ तस्मात्पृष्ठशब्देन स्तो

त्रधर्मानातिदिशति॥ ॥इति श्रीमाधवीये सप्तमाध्यायस्य तृतीयः पादः॥ ॥चतुर्थपादे प्रथमाधिकरणमारचयति॥ ॥ सौर्ये चरौ न धर्माः स्युः स्युर्वा मानविवर्जनात्॥ नस्युः
स्युः करणयोगोपस्तेनां श्रुतिलिंगादीनामभावादिति चेन्मैवं॥ विमतो यागउपकरणापेक्षः करणत्वात्॥ लौकिकवैदिकभोजनदर्शपूर्णमासवदित्यनुमानेन तत्प्रापणात्॥ ॥द्विती
याधि०॥ ॥विध्यंतोपेक्षितस्स्त्र लौकिको वाथ वैदिकः॥ आद्यो निर्बंधराहित्याद्दत्याधीसन्निकर्षतः॥ तत्रसौर्यचरावपेक्षितः प्रधानविधेः शेषांगकपोलः॥ स्थालीपाकादिगतो
लौकिकोपहीतव्यः॥ कुतः भनिवद्धत्वात्॥ वैदिकस्य प्रकरणान्न कर्मविशेषनिबद्धः सन्नतीतनियोजयितुं शक्य इति चेत्।मैवं॥ वैदिके करणे वैदिको विध्यंतस्य बुद्धिसन्निकर्षो यथा
प्रकरणेन कश्चिन्निबद्धः तथा चोदकेनान्यत्रापि निबध्यते॥ किंच प्रयाजेप्रयाजे कृष्णलं जुहोतीति सौर्ययागविधिशेषकृष्णलहोमविधानाय सिद्धवत्प्रयाजोनूद्यते॥ तच्चवैदिके
तिकर्तव्यतायां लिंगं तस्माद्वैदिको ग्राह्यः॥ ॥तृतीयाधि०॥ ॥गवामयनिकं ज्योतिरादौ किं द्वादशाहिकं॥ एकाहिकीवानुमानाद्द्योत्यो नामबाधनात्॥ गवामयने ज्योति
र्गौरायुरिति ज्योतिरादिनामकास्त्रयो यागा विहिताः॥ तेषु द्वादशाहीकीर्तिकर्तव्यतायुक्ताः कुतः॥ अनुमितवाक्येन तत्प्रापणात्॥ गवामयनं द्वादशाहविकृतिरिति वक्ष्यते॥ अ
तस्तत्संबंधित्वलिंगेन तदीयधर्मप्रापकश्चोदको नुमीयत इति प्राप्ते ब्रूमः॥ संति ज्योतिरादिनामकास्त्रय एकाहाः तदीयधर्मा गवामयनिकेषु ज्योतिरादिषु ज्योतिरादिभिस्त्रिभि
र्नामभिः प्राप्ताः नामचानुमानिकाच्चोदकात्प्रबलं प्रत्यक्षश्रुतत्वात्॥ अतश्चोदकस्य बाधितत्वादेतेष्वेकाहिकीर्तिकर्तव्यता ग्राह्या॥ ॥इति श्रीमाधवी० सप्तमाध्याय
स्य चतुर्थः पादः॥ समाप्तश्चाध्यायः॥ ॥सामान्येनातिदेशोत्रानुमानात्सन्निरूपितः॥ विशेषेणातिदेशोयः सोष्टमेत्रनिरूप्यते॥ अनेन सप्तमाष्टमयोरध्याययोः पूर्वोत्तर
भावउपपादितः सप्तमस्य चतुर्थपादे प्रथमाधिकरणेनानुमानिकवाक्यकृतोतिदेशोस्तीति सत्तामात्रं निरूपितं॥ अष्टमे तु तद्विशेषा निरूप्यंते॥ ॥अष्टमस्य प्रथमपादे प्रथ
माधि०॥ ॥कस्माच्चिदतिदिश्यंते नियतकर्मणोथवा॥ अविशेषादादिमोंत्यः शास्त्रार्थस्य व्यवस्थितेः॥ विहितेतिकर्तव्यतारहिते सौर्यादौ कर्मणि तद्युक्तात्यतः कुतश्चित्कर्म
णो धर्मा अतिदिश्यंते॥ कुतः नियामकस्याविशेषस्याभावात्॥ अतोविशेषचिंता न कार्येति चेन्मैवं॥ शास्त्रार्थव्यवस्थाया नियामकत्वात्॥ तस्मान्नियतादेकस्मात्कर्मणो
धर्मातिदेशः॥ तेन विशेषचिंता कर्तव्या॥ ॥द्वितीयाधि०॥ ॥तद्धितांत्यादि लिंगं किं न विशेषनियामकं॥ भवेद्वानस्यनादत्वाद्वचच्छब्दप्रवेशतः॥ दर्शपूर्णमासयोराग्ने
यमष्टाकपालं निर्वपतीति अत्र तद्धितांत्यादेवतानिर्देशएकदेवतायोगित्वमौषधद्रव्यकत्वं निर्वाप इत्येतान्याग्नेययागसंबंधितया श्रूयमाणत्वादाग्नेयलिंगानि॥
सौर्यं चरुं निर्वपेदित्यत्रापि तान्युपलभ्यंते तेन तत्राग्नेयधर्मातिदेशं नियंतुं सामर्थ्यमस्ति कुतः॥ तेषामशब्दरूपत्वेन शब्दैकसमधिगम्येर्थे प्रामाण्याभावादि
ति प्राप्ते ब्रूमः॥ लिंगस्याश्रितोपकारसहितमेव सौर्ययागं तच्छब्दो विधाति॥ तथा सति प्रणाड्या लिंगगस्य शब्दे प्रवेशादाग्नेयवत्सौर्यो नुष्ठेय इत्येतादृशं चोदक
वाक्यं अनुमापयता लिंगेन धर्मविशेषा नियम्यंते॥ ॥तृतीयाधि०॥ ॥प्रथमाधिकर०॥ ॥ विध्यंतरेष्टिकः सोमस्यात्नोवास्यात्प्रवृत्तितः॥ उपदिष्टैर्नैरपेक्ष्या
द्विध्यंतोनैष्टिको न हि॥ ऐष्टिको विध्यंतः प्रयाजादिः॥ स च सोमांगभूते दीक्षणीयादौ प्रवृत्तत्वात्सोमेप्यनिवार्य इति चेन्मैवं॥ प्रत्यक्षोपदिष्टैः रभिषवाद्यंगक
पेक्षा सोमस्य निराकांक्षत्वात्तस्मान्नैष्टिको विध्यंतः॥ ॥द्वितीयवर्ण०॥ ॥ इष्ट्यग्निहोत्रसोमानां मूलप्रकृतिता न हि॥ अस्ति वा नो लौकिकत्वादियत्तानवधा
रणात्॥ लोकवत्सा न पात्या गडुकासि हृद्यश्रुतेः॥ इयत्ताया निश्चितत्वान्मूलप्रकृतिता त्रिषु॥ अलौकिकत्वेनेतावद्भिरंगैः संपूर्णउपकार इति निश्चेतुमश

215
1945

[stamp]

अ० कर० माला०
१०८

स्यन्तादिस्थादीनांनास्तिमूलप्रकृतित्वमितिचेतमेवं॥ लौकिकसदृशत्वात॥ यथालोकेभुजिक्रियायामोदनः करणं॥ तस्यसंनिपत्योपकारिणः शाकसूपादयः॥ आरादुपकारिणः
पीठप्रदीपादयः॥ तथाभावनायांयागः करणं॥ अवघातादयःसंनिपातिनः प्रयाजादयआरादुपकारिणः॥ अतोनात्यंतमलौकिकत्वं॥ इयतातुलौकिकत्वयाप्रत्यक्षेणानिश्चीयते॥
तथाश्रुतः श्रुत्यानिश्चीयते॥ तस्मादिष्ट्यग्निहोत्रसोमानांमूलप्रकृतित्वमस्ति॥ ॥चतुर्थाधि०॥ ॥ऐंद्राग्नोदासोमिकःस्यादेष्टिकोवाहयोरिह॥ संभवादाष्टिकोत्यात्रस्यात्कपा
लादिलिंगतः॥ ऐंद्राग्नमेकादशकपालंनिर्वपेत्प्रजाकामइत्यादोसोमिकेष्टिकयोर्विध्यंतयोरन्यतरइच्छयाग्राह्यः॥ कुतः॥ उभयत्रविध्यंतसंभवेनातिदेशमर्हत्वादितिचेन्न॥
कपालनिर्वापादिभिर्लिंगविशेषैरेष्टिकस्यैवोचितत्वात॥ ॥पंचमाधि०॥ ॥नपशावेष्टिकःस्याद्धानकपालाद्यभावत॥ स्याद्धकद्रव्यदेवत्वप्रयाजस्रुच्यसाम्यतः॥ अग्नी
षोमीयपशावेष्टिकोविध्यंतोनास्ति॥ कुतः पूर्ववदत्रनिर्वापकपालादिलिंगाभावादितिचेतमेवं॥ आग्नेयमष्टाकपालमित्यत्रोत्पत्तिवाक्येयथाद्रव्यदेवतेव्यक्तेतथाग्नी
षोमीयंपशुमित्यत्रापिनतुसोमेनयजेतेत्यत्रदेवतायाअव्यक्तत्वं॥ तदेतद्धकद्रव्यदेवत्वमेकंलिंगं॥ एकादशप्रयाजान्यजतीतिप्रयाजवत्वंद्वितीयं॥ स्रुच्यमाघारयेद्ध
षोमीयंपशुमित्य...
द्वापशुमनक्तीत्याघारांजनोलिंगांतरं॥ आलंभोलिंगांतरं॥ इष्टावपीपामालभतइतिदर्शनात॥ तस्मादस्तिपशावैष्टिकः॥ ॥षष्ठाधिकर०॥ ॥सवनीयादिकेदा
र्शिकःपशुः॥ सवनीयानुबंध्यनिरूढादिपशुषुदर्शपूर्णमाससंबंधीविध्यंतः॥ दर्शस्यप्रकृतित्वात
ग्नीदक्षावाप्रकृतित्वतः॥ आद्योंत्योलिंगतोन्यत्रविकृतिः प्रकृतिर्भवेत॥ सवनीयानुबंध्यनिरूढादिपशुषुदर्शपूर्णमाससंबंधीविध्यंतः॥ दर्शस्यप्रकृतित्वात
नदक्षाग्नीषोमीयपशुविध्यंतः॥ दीक्षितेनानुष्ठेयेषुपशुविध्यंतेषुप्रथमभावित्वात॥ तस्यचाग्नीषोमीयस्येष्टिविकृतित्वान्नप्रकृतित्वमस्ति॥ अतोनतस्यवि
ध्यंतोतिदेशार्हइतिप्राप्तेब्रूमः॥ आलंभोग्नीषोमीयपशोर्लिंगं॥ तच्चसवनीयादिष्वस्ति॥ तथाप्रातःसवनादिषुवपादिप्रचारोपरंलिंगं॥ इष्टिप्रतिविकृतेरप्यन्य
त्रसवनीयादौप्रकृतित्वंनविरुध्यते॥ तस्मादग्नीषोमीयपशोर्विध्यंतंसवनीयादिषुपशुष्वतिदिशेत॥ ॥सप्तमाधि०॥ ॥स्यादेकादशिनेदेक्षात्सौत्याद्वायोस्तुपूर्ववत॥
त्वानाद्वयस्यौत्यत्वविशेषाल्लिंगतोंतिमः॥ एकादशिनाः पशवएवमाम्नायंते॥ आग्नेयःकृष्णग्रीवःसारस्वतीमेषीबभ्रुःसौम्यः पौष्णः श्यामः शितिपृष्ठोबार्हस्पत्यः
शिल्पोवैश्वदेवऐंद्रोवरुणोमारुतः कल्माषऐंद्राग्नः संहितोधोरामःसवित्रोवारुणः कृष्णएकशितिपादित्यत्वइति॥ यद्यप्यश्वमेधप्रकरणएतेपठिताः॥ तथाप्यत्याति
शमप्रकरणेप्यनेविधीयंते॥ तत्रैवप्रवाग्नेयेनवापयतिमिथुनंसारस्वत्याकरोतिरेतःसौम्येनदधातिप्रजनयतिपौष्णेनेत्यादिनातेष्वेकादशिनेषुदेक्षादग्नीषोमी
याद्विध्यंतस्यातिदेशःस्यात॥ कुतः अग्नीषोमीयस्यपशुप्रकृतित्वेनपूर्वाधिकरणनिर्णीतत्वादितिचेतमेवं॥ सौत्यगतविशेषदर्शनात॥ सत्याकालेभवः सौत्यः
सवनीयः पशुः॥ तत्रचोदकप्राप्तास्त्रानिकावाचनिकीद्वितीयाएतच्चतृतीयेनिर्णीतं॥ तदेतद्रशनाद्वयमग्नीषोमीयपशावसंभवात्सवनीयस्यविशेषलिंगमेकं
सत्याकालीनत्वंद्वितीयं॥ तेचद्वेलिंगेएकादशिनेषुदृश्यते॥ तत्रेदमाम्नायते॥ द्वेरशनेआदायद्वाभ्यांद्वाभ्यांरशनाभ्यामेकैकंयूपंपरिव्ययतीतिसत्याकाल
कीनत्वंचतेष्वस्ति॥ ततः सौत्यात्धर्मातिदेशः॥ ॥अष्टमाधिक०॥ ॥ललामादिगणेदेक्षादेकादशिनतोथवा॥ आद्योविशेषराहित्यान्त्यगणत्वविशेष
तः॥ कांम्यपशुकांडेपशुगणः श्रूयते॥ वसंतेललामांस्त्रीन्वृषभानालभेतेति॥ तत्ररशनाद्वयादिविशेषलिंगाभावाद्देक्षादग्नीषोमीयाद्धर्मातिदेशइति
चेन्न॥ गणत्वेनविशेषलिंगेनैकादशिनेभ्योतिदेशात॥ एकादशिनानांपशुगणप्रकृतित्वंलिंगादवगम्यते॥ तथाहिसौत्रामण्यांपशुगणंप्रकृत्यैवमाम्नाय श्रीः
१०८

ते॥ यत्रिषुयूपेष्वालभेतबर्हिष्ठोग्न्यादींद्रवंवीर्यंदधात॥ भ्रातृव्यमस्मैजनयेदेकयूपआलभेत इति॥ यद्यत्राग्नीषोमीयप्रकृतिः स्यात्तदाचोदकादेकस्यैवयूप
स्यप्राप्तत्वेनयूपत्रयप्रसक्त्यभावात्तदुपन्यासेनदोषाभिधानंपुनरेकयूपविधानंचव्यर्थंस्यात॥ एकादशिनानांप्रकृतित्वेतुप्रतिपशुपृथकयूपातिदेशेनप्रसक्ति
सद्भावात॥ तदुपपद्यते तस्मात्पशुगणेष्वेकादशिनेभ्योतिदेशः॥ ॥नवमाधि०॥ ॥इष्टेः सोमस्यवाधर्माविश्वजित्प्रमुखेष्विह॥ अविशेषादेष्टिकाः स्युः सोम
स्याव्यक्तिसाम्यतः॥ विश्वजितायजेत अभिजितायजेतद्वादशाहेनयजेतेत्यादिषुनियामकाभावादिष्टिसोमयोरन्यतरस्यधर्मोइच्छयाग्रहीतव्याइतिचेन्नमैवं॥
अव्यक्तित्वलिंगेनसोमस्यस्यात॥ उत्पत्तिवाक्येदेवतानभिधानमव्यक्तिः॥ तस्मात्सोमस्यधर्मानतिदिशेत॥ ॥दशमाधि०॥ ॥अहर्गणेषुसोमस्यद्वादशा
हस्यवाग्निमः॥ सोम पूर्वहिविनसंघादिविशेषैरंतिमोभवेत॥ द्विरात्रमारभ्यशतरात्रपर्यंतपुगवामयनेचपूर्ववदव्यक्तिलिंगेनसोमस्यधर्मोइतिचेत॥ न॥ विशेषलिंगसद्भावात॥ द्वा
दशाहपदांतर्गतोहः शब्दः षष्टिघटिकात्मकदिनपरः द्विरात्रादिपदांतर्गतोरात्रिशब्दश्चदृशः एतदेकंविशेषलिंगमहः संघोद्वितीयं द्वादशदीक्षास्तृतीयं तच्चगवामयनेविद्यते॥ त
त्रह्यभीधतएवदीक्षाभिरित्यत्रदीक्षासुग्मानिषडुपन्यस्तानिद्वाभ्यांलोमावद्यतिद्वाभ्यांत्वचंद्वाभ्यामसृद्भ्यांमांसंद्वाभ्यांमस्थिद्वाभ्यांमज्जानमिति॥ तस्माद्दहर्गणेषुद्वादशाह
स्यधर्माः॥ ॥एकादशाधि०॥ ॥द्वादशाहस्यगव्यस्यवादित्यानांमयनेकितायने॥ पुरेवाद्योगव्यधर्माः वत्सरत्वादिलिंगतः आदित्यानामयनंतपस्विनामयनमित्यादिष्वहर्गणत्वादि
लिंगेनद्वादशाहस्यधर्माइतिचेत॥ न॥ गव्यलिंगस्यविशेषस्यसत्वात॥ गवांसंबंधिगव्यंगवामयनमितियावत॥ तस्यधर्माएतेषुग्राह्याः॥ कुतः॥ संवत्सरसत्रत्वसामान्यात॥ ष
ष्ठ्युत्तरशतत्र्यदिवससाध्यानिसमसद्भावात्पत्नयउपगायंतीत्येतस्यगवामयनगतमाहाव्रतिकधर्मस्यदर्शनाच्चतस्माद्गव्यस्यधर्माः॥ ॥द्वादशाधि०॥ ॥साद्यस्क्रेसोमिकः
पूर्वधर्मोघाव्यक्तभावतः॥ सौमिकः स्यादेकनामिकधर्मैस्तुत्वतोंतिमः॥ साद्यस्क्राइत्येवनामकाएकसंघवर्तिनोबहवोयागाः श्रुताः तथासाद्यस्क्रइतितस्मिन्साद्यस्कसंघेप्रथमःसा
द्यस्कोधर्मसंयुक्त आम्नातः एवंसहस्रेषुपितधर्मरहितेद्वितीयादिकेसाद्यस्केसाहस्रेचाव्यक्तत्वसाम्यात्सौमिकोधर्मइतिचेत॥ मैवं॥ एकनामत्वैकसंघवर्तित्वाभ्यांविशेषलिंगा
भ्यांप्रथमसाद्यस्कप्रथमसाहस्रधर्मस्यैवोचितत्वात॥ द्वितीयसाद्यस्कादिष्वतिदेशः॥ ॥त्रयोदशाधि०॥ ॥फलंचनियमः कर्तासंघः सौर्येनवाग्निमः॥ प्रयाजवन्नविध्या
दिविध्यंतत्वविभेदतः॥ इष्टिफलादयश्चत्वारः संति॥ फलंस्वर्गः नियमोयावज्जीवकर्तृत्वं॥ कर्तास्वर्गकामः संघआग्नेयादीनांषण्णांसाहित्यं॥ तएतेचत्वारः सौर्येप्रयाजा
दिवदतिदेष्टव्याइतिचेत॥ न॥ वैषम्यात॥ प्रयाजादिराकांक्षितविध्यंतत्वादितिदिश्यते॥ विध्यादिस्त्वनाकांक्षितः सौर्यंचरुंनिर्वपेदितिमुख्यविधेः प्रत्यक्षश्रवणात॥ अन्य
थाविध्यंतेपिकस्यत्वंकांक्षावर्ण्यततस्मात्प्रधानकर्मणोनाकांक्षितस्यविहिताप्रवृत्तेः तत्संबंधाः फलादयोप्यनाकांक्षितत्वान्नातिदिश्यंते॥ ॥चतुर्दशाधि०॥ ॥
गोदोहनादेरस्तिनोवातिदेशःप्रणयनाश्रयात॥ अनंगत्वादपेक्षाया अभावान्नातिदिश्यते॥ चमसेनापः प्रणयेत गोदोहनेनपशुकामस्येतिदर्शपूर्णमासयोः श्रुतंगो
दोहनंसौर्येप्यतिदेष्टव्यं॥ कुतः॥ तदाश्रयस्यप्रणयनस्यसद्भावादितिचेत॥ मैवं॥ क्रत्वंगतयाचमसएवप्रणयनसाधनमपेक्षितंनत्वनंगंपुरुषार्थंगोदोहनं॥ अतः
फलनियमादिवन्नातिदेशः॥ ॥पंचदशाधिक०॥ ॥स्वर्गादयंत्र्यवरुणाप्यंविकल्प्यंवाव्यवस्थितिः॥ प्रकृतविवनोतत्रतस्याशाब्दत्ववर्जनात॥ दर्शपूर्णमास 213
194

वोर्हविषांस्पर्शेनद्वयंव्यवच्छिन्नमंत्रद्वयसाध्यमाम्नातं॥ चतुर्होत्रापौर्णमासीमभिमृशेत्पंचहोत्रामावास्यामिति॥ पृथिवीहोतेत्यादिमंत्रश्चतुर्होता॥ अग्निर्होतेत्यादिमंत्रः पंचहोता॥ तदेतदुभयंसौर्यादौचोदकप्राप्तं सत्कालभेदेनानुष्ठानद्वयेव्यवस्थापनीयं॥ कुतः प्रकृतौपौर्णमास्यमावास्ययोः कालयोर्भेदेनव्यवस्थितत्वादितिचेत्। न॥ प्रकृतौव्यवस्थाया आर्थिकत्वात्॥ शब्दस्यैवांगत्वेनातिदेशार्हत्वात्॥ तस्मादुभयंविकृताविच्छयाविकल्प्यते॥ ॥षोडशा०॥ ॥ षड्रूपकस्याप्युताग्नेयस्यैवसौर्यमग्रिमोयतः॥ अविशेषानदैवत्यादोषधद्रव्यकत्वतः॥ दर्शपूर्णमासगतेषुषड्यागेषुयस्यकस्यापिविध्यंतःसौर्येकर्तव्यः॥ अस्यैवेतिविशेषनियामकस्याभावादितिचेत्। न॥ देवतैक्यस्यनियामकत्वात्॥ ननुसौर्यशब्दगततद्धितप्रत्ययविग्रहस्यसूर्यादितिद्विवचनेनापिकर्तुंशक्यत्वाद्दैवतैक्यमनिश्चितमितिचेत्। न॥ विधिशेषार्थवादोक्तावमुमेवादित्यमित्येकवचनेनतद्व्यपदेशादाग्नेयार्थवादेपिसाग्नेयैकवतेत्येकवचनेनव्यपदिष्टः अतआग्नेयस्यैवविध्यंतोनत्वग्नीषोमीयेंद्राग्नयोः यद्यप्यैंद्रयोर्दधिपयसोः प्राजापत्यउपांशुयाजेपिदैवतैक्यमस्तितथाप्योषधद्रव्यकत्वमाग्नेयेविशेष्यते॥ तस्मात्तस्यैवविध्यंतः॥ ॥ सप्तदशाधि०॥ ॥ देवाबलीहविर्वैंद्रं पुरोडाशेऽग्रिमोयतः॥ देवामुख्यांतरंगंतद्धविःकर्मण्यतोबलि॥ ऐंद्राग्नमेकादशकपालंनिर्वपेदित्यत्रदेवतासाम्येनसान्नायधर्मः प्राप्नोतिहविः॥ सामान्येनपुरोडाशधर्मः॥ तत्रदेवोबलीकुतः मुख्यत्वात्॥ तच्चप्राथमिकेनपदेनोच्यमानत्वात्प्रातिपदिकाप्रत्ययस्यार्थः॥ अतोमुख्यत्वाद्देवतासामान्यंप्रबलमितिप्राप्तेब्रूमः॥ त्यज्यमानतयात्यागरूपेकर्मणिहविः प्रत्यासन्नं॥ देवतातुमनसैवोद्दिश्यमानत्वात्॥ यागक्रियायाबहिरंगंयत्तुमुख्यत्वंतत्शब्दोपाधिकं॥ नतुस्वाभाविकं॥ तस्मात्स्वाभाविकेनांतरंगत्वेनहविःसामान्यप्रबलत्वात्पुरोडाशधर्मः कर्तव्यः॥ एवमाग्नेयपयइत्यत्रसान्नायधर्मोद्रष्टव्यः॥ ॥अष्टादशाधिकरणमारचयति॥ ॥कृष्णलेषुघृतस्योतव्रीहेस्तेजोयुतेर्भवेत्॥ घृतस्यैमैवंवैशद्याच्चरुशब्दयुतेस्तथा॥ प्राजापत्यंघृतेचरुंनिर्वपेच्छतकृष्णलमित्यत्रकृष्णलेषूपांशुयाजद्रव्यस्यघृतस्यधर्माः कर्तव्याः॥ कृष्णलाख्यसुवर्णस्यचतेजस्वित्वसाम्यादितिचेत्। मैवं॥ सुवर्णशकलव्रीह्योर्वैशद्यसाम्यात्॥ नहिघृतस्यप्रबलकाठिन्यविरलत्वादिरूपंवैशद्यमस्ति॥ चरुशब्दश्चौषधद्रव्यविषयः कृष्णलेषुप्रयुज्यमानऔषधधर्मान्प्रापयति॥ तस्माद्व्रीहिधर्माः कर्तव्याः॥ ॥एकोनविंशाधिकरणमारचयति॥ ॥क्षीरस्याज्यस्यवानीरेमधुन्यप्यग्रिमोयतः॥ द्रवत्वंनघृतेप्यस्यसत्वाद्वर्णाच्चसंभवात्॥ चित्रायागेश्रूयते॥ दधिमधुघृतमापोधानाःसंदुलातत्संसृष्टंप्राजापत्यमिति॥ तत्रमधुन्युदकेनद्रव्यत्वेनसामान्येनसान्नाय्यगतस्यपयसोधर्माइतिचेत्। न॥ घृतेप्यग्निसंपर्केणद्रवत्वसंभावादशुक्लवर्णत्वादाज्यधर्माणामुत्पवनादीनांसंभवात्पयोधर्माणांदोहनादीनामसंभवाच्चोपांशुयागतस्याज्यस्यधर्माः कर्तव्याः॥

219
1945

॥ ॥इतिश्रीमाधवीयेजैमिनिन्यायमालाविस्तरेअष्टमाध्यायस्यप्रथमः पादः समाप्तः॥ ८ ॥श्रीकृष्णार्पणमस्तु॥ ॥ द्वितीयपादेप्रथमाधिकरणमारचयति॥ ॥स्फ्यवाजिनयोः सोमस्येष्टेर्वासोमशब्दतः॥ आद्योमैवंहविः साम्यात्सोमशब्दः प्रशंसये॥ सोत्रामण्यांस्फ्यग्रहाः॥ श्रुताः आश्विनंगृह्णातीत्यादिनाचातुर्मास्येषुवाजिनयागः श्रुतः वाजिभ्योवाजिभ्योवाजिनमिति॥ तत्रोभयत्रसोमविध्यंतः कार्यः कुतः सोमोवैवाजिनंस्फ्यासोमइतिवाजिनेस्फ्यायांचसोमशब्दश्चाग्निहोत्रशब्दवद्वर्तमानतिदिशतीतिचेत् मैवं॥ ऐष्टिकहविः साम्यात् औषधविकृताःस्फ्या सान्नाय्यविकृतंवाजिनंतस्मादैष्टिकोविध्यंतः॥ सोमशब्दस्त्वर्थवादगतत्वान्नाग्निहोत्रादिनामवदितिशाकः॥ यदिवाजिनस्यप्रतिपत्तिकर्मत्वान्नास्तिधर्मापेक्षा॥ तर्हितस्मिन्नंशेवाकृत्वाचिंतास्तु॥ ॥द्वितीयाधिकरणमारचयति॥ ॥पुरोडाशस्यसान्नाय्यस्यवाधर्मःपशोयतः॥ दैवैक्यमाद्यस्तस्मान्नोहविर्जन्मादिसाम्यतः॥ अग्नीषोमीयपशावग्नीषोमीयपुरोडाशस्यधर्मःकार्यः कुतः दैवतैक्यादितिचेत् मैवं॥ सान्नाय्यंपशोरुत्पन्नंपाशुकरपिपशोरुत्पन्नः॥ अपणार्थमुखासान्नायपशवोः समाहविः साम्यंचबलीयइत्युक्तं॥ तस्मात्सान्नाय्यस्यधर्मः॥ ॥तृतीयाधिकरणमारचयति॥ ॥दध्नोत्रपयसोवाद्योघनत्वस्यसमत्वतः॥ इंद्रत्वासत्तिकालेभ्योधर्मः स्यात्पयसः॥ पशौ॥ सान्नाय्यधर्मवत्यस्मिन्पशोघनत्वेनदध्नोधर्माइतिचेत् मैवं॥ द्रवतिगच्छतीतिद्रवत्वंपशावस्तिपयसिस्वतद्विद्यते॥ प्रत्यासन्नंचपयः साक्षात्पशुप्रभवत्वात्॥ दधितुपयसाव्यवहितं॥ एकाहकालीनंचपशुपयसीद्व्यहकालीनंदधितस्मात्पयसोधर्मः कार्यः॥ ॥चतुर्थाधिकरणमारचयति॥ ॥द्वयोर्दध्नोथपयसआमिक्षायांद्विजत्वतः॥ द्वयोर्दध्नोघनत्वेनप्राधान्यात्पयसोभवेत्॥ तप्तेपयसिदध्यानयति॥ सावैश्वदेव्यामिक्षेतिश्रुतायामामिक्षायांसान्नाय्यगतयोर्दधिपयसोर्द्वयोःधर्मः कार्यः कुतः॥ आमिक्षायाउभयजन्यत्वादित्येकः पक्षः॥ घनत्वस्यसाम्यस्याधिक्याद्दधिधर्मइतिद्वितीयः पक्षः॥ पयस्यामिक्षामुत्पादयितुंसहकारित्वेनदध्यानीयते॥ ततः पयसएवमुख्यकारणत्वात्तद्धर्मएवन्याय्यः॥ ॥पंचमाधिकरणमारचयति॥ ॥अहीनसत्रयोर्द्वादशाहांतावव्यवच्छिन्नोव्यवच्छिन्नोवाविशेषादाद्योंत्यः स्वस्वलिंगतः॥ प्रायणीयोतिरात्रः पृष्ठ्यः षडहः त्रयश्छंदोमाः॥ अविवाक्यमहः उदयनीयोतिरात्रइत्येवमहर्गणोद्वादशाहः सचयाज्ञिकप्रसिद्ध्याद्विविधः सत्रमहीनश्चेति॥ संज्ञाव्यवस्थयाद्वयोर्धर्मा आम्नाताः॥ एकाद्वौबहवोवाहीनेनयजेरन्नदीक्षितायाजयेयुर्गृहपतिंसप्तदशाः स्वयमृत्विजोब्राह्मणाः सत्रमुपेयुरि

त्यादयः ततोऽह्नि विधो द्वादशाहस्य विध्यंतो द्वादशाहश्चाहर्गणानां प्रकृतिरित्युक्तं॥ अहर्गणाश्च द्विविधाः त्रिरात्रादय एकादश
रात्रांताः अहीनाः त्रयोदशरात्रादीनि च सत्राणि॥ तत्राहीनसत्रयो द्वादशाहविध्यंतावव्यवस्थया प्राप्नुतः॥ कुतः॥ व्यवस्थापक
विशेषाभावादिति चेत्॥ मैवं॥ तत्र लिंगस्य व्यवस्थापकत्वात्॥ आसीरन्नुपेयुरिति चोदनाद्वयं॥ यजमानबहुत्वनियत ऋत्वि
ग्यजमानैक्यं च सत्रलिंगं यजति चोदनायजमानबहुत्वविकल्प ऋत्विग्यजमानभेदश्चाहीनलिंगं॥ एतच्च दशमाध्याये एवं
विचारयिष्यते॥ अहीनसत्रयोर्लक्षणभेदो नास्त्यस्ति वा न हि॥ आवृत्तिसाम्यादाद्यस्य यज्यासिभ्यां तयोर्भिदेति॥ एतच्च लिंगद्वयं
द्वादशाहे श्रूयते॥ द्वादशाहेन प्रजाकामं याजयेदिति द्वादशाह मृद्धिकामा उपेयुरिति द्वादशाहं मृद्धिकामा आसीरन्निति चाह्निरात्रा
दिषु यजति चोदनैवाह्निरात्रेण यजेत त्रिरात्रेण यजेतेत्यादि त्रयोदशरात्रादिषु सत्रलिंगमेव त्रयोदशरात्र मृद्धिकामा उपेयुरिति च
तुर्दशरात्रं प्रतिष्ठाकामा आसीरन्निति च। तस्माद्यथालिंगं धर्मव्यवस्था॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ किं पंचदशरात्रस्य
कुंडपाय्ययनस्य च॥ अहीनत्वं सत्रता वातिरात्रैकत्वतोऽग्निमः॥ उपायलिंगतः सत्रे प्रबलं विधिवाक्यगं सत्रांतरेभ्यो हीनत्वलिंगे
नैतत्प्रशस्यते॥ पंचदशरात्रं विधः ऐवं त्रिवृदग्निष्टुदग्निष्टोमः त्रिशो दशरात्र उदयनीयोऽतिरात्र इति॥ कुंडपायिनामयनस्या
पक्रमे मासाग्निहोत्रमवसाने दशरात्रो महाव्रतमुदयनीयोऽतिरात्र इति॥ तयोरुभयोरादावतिरात्रो नास्ति॥ अंते तु विद्यते तदिदम
न्यतरतोऽतिरात्रत्वमहीनलिंगं संप्रतिपन्नाहीनेषु तद्दर्शनात्॥ श्रुतिश्च भवति॥ यद्यन्यतरतोऽतिरात्रस्तेनाहीन इति॥ तस्मात्सत्रलिं
गस्याभलिंमतोऽतिरात्रत्वस्याभावादहीनलिंगसद्भावाच्च तयोरहीनत्वमिति चेत् मैवं॥ उपायिचोदनारूपस्य सत्रलिंगस्य दर्शनात्॥
यत्रेयज्ञेयं काममिच्छंति तत एनं पंचदशरात्र मुपेयुरिति॥ कुंडपायिनामयिने पिवृतिकामा उपेयुरिति इदं च लिंगं विधिवाक्यगतत्वा
त्प्रबलं॥ या तु पंचदशरात्रे सत्रलिंगाख्यातिरुदाहृता तया सत्रांतरेभ्योऽधिकत्वेन प्रशस्यते॥ इतराणि केवल सत्राण्येव॥ पंचदश
रात्रस्तु स्वरूपेण सत्ररूपोऽप्यंत्यातिरात्रलिंगेनाहीन इत्यपि व्यवहारमर्हतीति॥ तस्मात्सत्रे एते उभे तयोः सत्रधर्मा नेवातिदिश्य श्रीः
ते॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे अष्टमस्याध्यायस्य द्वितीयः पादः॥ ॥ तृतीयपादे प्रथमाधिकरण ११०
मारचयति॥ ॥ आग्नावैष्णव आग्नेयः विकृतिः शुचिदेवकः॥ अग्नीषोमीयविकृतिरथवा व्यत्ययोर्द्वयोः प्रथमत्वद्वित्वती
यत्वसाम्यादाद्योंऽतिमो भवेत्॥ द्विदेवत्वैकदेयत्वसाम्यस्य श्रुतिमत्वतः॥ हविर्गणः कश्चिच्छ्रूयते॥ आग्नावैष्णवमेकादशकपा

221/1965

लं निर्वपेत्सरस्वत्यै चरुं बार्हस्पत्यं चरुमिति गणांतरं चैवमाम्नायते॥ अग्नये पवमाना याग्नये पावकाग्नये शुचये अष्टाकपालमि
ति॥ तत्राग्नावैष्णवस्य प्रथमस्थानत्वादाग्नेयविकृतित्वं युक्तं॥ शुचिदेवकस्य द्वितीयस्थानत्वादग्नीषोमीयविकृतित्वमिति चेत्॥
न॥ द्विदेवत्वादिसाम्यस्य श्रूयमाणत्वेनार्थसिद्धस्थानतो बलीयस्त्वात्॥ तस्मादाग्नावैष्णवोऽग्नीषोमीयविकृतिः शुचिदेक आ
ग्नेयविकृतिः॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ त्रिवृत्स्तु स्वहः स्यादिमस्य द्वादशाहस्य वाग्रिमः॥ शाब्दत्रिवृतोऽत्यः स्यादहः सं
ख्यानुसारतः॥ जनकसप्तदशरात्रे श्रूयते॥ चत्वारि त्रिवृत्यहाग्निष्टोममुख्यानीति॥ तत्र त्रिवृत्स्तोमविशिष्टं यत्प्रथममहस्तस्य
विध्यंत उत्तरेषु त्रिष्वहःसु कर्तव्यः पूर्वन्यायेन शाब्दस्य त्रिवृत्सामान्यस्य विघ्नमानत्वादिति चेत् मैवं॥ तदानीमेकस्याह्नः चोचसु
रावृत्या चत्वार्यहानि न सिद्ध्येयुः॥ किं चाग्निष्टोममुख्यानीत्याद्यस्यैकस्यैवाग्निष्टोमत्वं विधीयते॥ त्वत्पक्षे तूत्तरेषामपि त्रयाणाम
ग्निष्टोमत्वान्मुख्यशब्दो नोपपद्यते॥ ततो द्वादशाहस्य विध्यंतो ग्राह्यः॥ द्वादशाहे पृष्ठ्ये षडहे त्रिवृत्पंचदशः सप्तदश एकविंशात्येइ
तेषां चतुर्णामह्नां परस्परविलक्षणानां संघत्वयोग्यानां विध्यंते स्वीकृते सति नोक्तदोषद्वयं॥ न तु पंचदशादीनां त्रिवृत्त्वमयुक्तमि
ति चेत् न॥ वचनेन स्तोममात्रबाधात्॥ तद्व्यतिरिक्तस्तु विध्यंतोऽतिदेष्टव्यः॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ चत्वारः षडहा द्वादशा
हस्य षडस्य वा॥ चतुर्विंशति संघार्थमाद्योंऽत्य षडहः श्रुतेः॥ षड्विंशरात्रे श्रूयते॥ षडहा भवंति चत्वारो भवतीति तत्राहसंज्ञकानां सोमया
गानां संख्याविशेषः षडहपदांतर्गतेन षट्शब्देनाभिधीयते॥ सा च षट्संख्या पुनः चतुःसंख्यया विशिष्यमाणा चतुर्विंशति संख्या
कानामह्नां संघे पर्यवस्यति॥ अहःसंघस्य च प्रकृतिर्द्वादशाहः॥ अतस्तल्लिंगस्य संघत्वस्य दर्शनात्॥ तस्यैव विध्यंतः प्रवर्तते॥ यदि
सकृत्प्रवृत्त्या चतुर्विंशति संख्या न पूर्यते तर्हि यावत्पूर्तिः सौम्यस्यतामिति प्राप्ते ब्रूमः॥ षड्भिरहोभिर्निष्पाद्यः कर्मविशेषः षडहवा
च्यः तेच कर्मविशेषाश्चत्वारः स्तथा सति च तुर्विंशति संघोनात्र शाब्दः ततः शाब्दस्य षडह नामकर्मस्य विशेषस्य विध्यंतो न्याय्यः
यदि विलक्षणाः षडहाश्चत्वारो न स्युः तर्ह्येक एव चतुरभ्यस्यतां तत्पक्षेऽपि द्वादशाहोऽभ्यस्यते तस्मात्षडहत्वविशेषलिंगात्तस्यैव
विध्यंतः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ शतोक्थ्य ज्योतिषो ह्यद्वादशाहस्य नामतः॥ आद्यः समाप्तिनामेत तत्संघत्वाद्द्वि
तिमो भवेत्॥ शतोक्थ्यं भवति शतातिरात्रं भवति पंचाग्निष्टोमः पंचोक्थ्य इत्यादयः श्रूयंते॥ ते षु ज्योतिष्टोमस्य विध्यंतः कार्यः॥
कुतः उक्थ्यं षोडश्यतिरात्रोक्थ्याग्निष्टोम इत्यादीनां ज्योतिष्टोमनामत्वादिति चेत् मैवं॥ उक्थ्यादीनि स्तोत्राणि॥ तथा सति यस्य

कर्मणः समाप्तिर्येन स्तोत्रेण क्रियते तस्मिन्कर्मणि संस्थानिमित्तक उक्थ्यादिशब्दो वर्तते॥ ततो द्वादशाहगते व्यूहः स्वक्थ्यादिनाम
संभवात्संघत्वलिंगेन द्वादशाहस्य विध्यंतो भवति तत्राद्यंतौ प्रायणीयोदयनीयौ वर्जयित्वा मध्यवर्तिनो दशरात्रस्य विध्यंतो द्वि
रात्रादिविकृतिप्रतिदेष्टव्य इति दशमाध्याये वक्ष्यते॥ तथा सत्यत्र दशरात्रीशेदशरूत्वोभ्यस्यमानः प्रत्यहमुक्थ्यस्तोत्रेण समा
प्यमानः शतोक्थ्य इत्यनामता मापाद्यते॥ एवमितरत्रापि योज्यं॥ ॥पंचमाधिकरणमारचयति॥ ॥ शतोक्थ्यादौ स्तोत्रेण समा
प्यमानुवृद्धिर्गणादेकाहतोथवा॥ आद्यो गणविकारत्वादंत्योत्र स्तोत्रजन्मतः॥ पूर्वोदाहृते शतोक्थ्ये शतातिरात्रे च स्तोत्रद्वष्टिरपि द्वि
ष्यंदिनसवने माध्यंदिनः पवमान एकं स्तोत्रं चत्वारि पृष्ठस्तोत्राणि॥ तृतीयसवने आर्भवः पवमान एकं स्तोत्रं यज्ञायज्ञीयसामसा
ध्यमग्निष्टोमस्तोत्रम परं तेन स्तोत्रेणायं प्रतिरूपो यज्ञः संतिष्ठते तद्विकृतिषु प्रथमायामग्निष्टोमस्तस्मादूर्ध्वं त्रीण्युक्थ्यस्तोत्राणि भव
ति॥ तैः साविकृतिः संतिष्ठते ततोप्यूर्ध्वं षोडशेन स्तोत्रेणान्यायाकृतिः संतिष्ठते॥ एवंविकृत्यंतरेषु द्रष्टव्यं॥ तस्मात्समाप्तिनिमि
त्तान्यग्निष्टोमोक्थ्यषोडश्यतिरात्रादिनामानि॥ एतदेवोपजीव्य पूर्वाधिकरणे द्वादशाहगतानामक्थ्यादिनामसंभवात्तदी
दशरात्रविध्यंतः शतोक्थ्यादावतिदिष्टः॥ तस्य च दशरात्रस्याद्यंतौ द्वावग्निष्टोमौ॥ तथा सति दशकृत्वस्तदाभ्यासे विंशतिरति
ग्निष्टोमाः संपद्यंते॥ तेषामुक्थ्यत्वं संपादयितुं प्रत्यग्निष्टोममुक्थ्यनामकं॥ स्तोत्रं वर्धनीयं॥ अन्यथा शतोक्थ्यत्वं न स्यात्॥ किं
त्वशीत्युक्थ्यत्वमेव स्यात्॥ एवं सत्यतिरात्रेपि प्रत्यहमतिरात्रत्वप्रयोजकं स्तोत्रं वर्धनीयं॥ तत्र गणत्वेन द्वादशाहविकारत्वात्त
दीयस्तोत्रातिदेशादिति॥ प्राप्ते ब्रूमः॥ उक्थ्यादिस्तोत्राण्येकाहज्योतिष्टोम उत्पन्नानि॥ तस्मादेकाहाद्यथा द्वादशाहे तिदिश्यंते॥
तथा सतोक्थ्यैकाहादेवातिदिश्यतां॥ अन्यथाभिक्षुकोभिक्षुकाल्लिप्सत इति न्यायापत्तेः॥ यत्वतिदेशपरंपरा तत्र तत्रो
दाहृता॥ तत्र सर्वत्र प्रबलं लिंगमुपन्यस्तं॥ इह तु गणत्वमहर्गतं न तु स्तोत्रगतं॥ तस्माद्द्वादशाहीयस्तोत्रगतान्विशेषानुपेक्ष्य
तद्विशेषरहितानि स्तोत्राणि ज्योतिष्टोमादतिदेष्टव्यानि॥ ॥षष्ठाधिकरणमारचयति॥ ॥अहर्गायत्रमित्यत्र स्यात्स्तो
त्रचोभवा॥ आद्यः सन्ध्यात्क्रितोमेवं गद्यादौ तत्प्रसंगतः॥ ॥ वाजपेयेन बृहस्पतिसवने यजेतेति श्रुतं॥ तत्रेदमपरमाम्ना
तं॥ गायत्रमेतदहर्भवतीति॥ ॥ तस्मिन्नेकाहे बृहस्पतिसवन रूपे प्रकृतिभूताज्ज्योतिष्टोमान्नानाछंदांसि त्रिष्टुबादीन्यतिदिश्य

223
1745

नि॥ तेष्वधिकाक्षराणि विलोप्य चतुर्विंशत्यक्षराणि विलोप्य च तुर्विंशत्यक्षराणि परिशेष्य गायत्रीत्वं संपादनीयं॥ कुतः॥
चतुर्विंशत्यक्षरा गायत्रीत्यक्षरसंख्यायास्तच्छब्दप्रवृत्तित्वश्रवणादिति चेन्मैवं॥ अतिप्रसंगात्॥ कविभिर्निमित्ते गद्येत त्रि
ष्टुब्जीवाभाषास्क्च तथाक्षरसंख्यया गायत्रीत्वं केन वार्येत तस्माद्गायत्र्यामुत्पन्नास्क्चतुर्विंशत्यक्षरास्त्वृक्षु वर्तमान
कश्चिद्दृग्वांतरजातिविशेषस्तत्प्रवृत्तिनिमित्तं तस्मात्तासामृचामागमः कर्तव्यः॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमाला
विस्तरे अष्टमाध्यायस्य तृतीयः पादः॥ ॥ चतुर्थपादे प्रथमाधिकरणमारचयति॥ ॥ दर्विहोमे गुणो नाम वा गुणो दधि
होमवत्॥ गुणासंभवतो लोकवेदयोर्नाम तद्भवेत्॥ इदमाम्नायते यदेकया जुह्वा दर्विहोमं कुर्यादिति॥ तत्र दर्व्या होमो दर्वि
होम इति॥ तृतीयासमासे सति दध्ना जुहोतीत्यादाविव होमानुवादेन गुणविधित्वसंभवाद्दर्व्याख्यो गुणो विधीयत इति चेत्
मैवं॥ नानवल्लोकेसिद्धस्थालीपाकादिहोमे दर्विगुणो विधातुं शक्यः॥ किं लौकशिष्टाचारादेव तत्र साधानप्राप्तेः॥ नापि वे
दसिद्धाग्निहोत्रनारिष्टादिहोमे तत्र विहितजुह्वादिबाधप्रसंगात्॥ तस्माद्दर्विहोम इति कर्मनामधेयं॥ ॥ द्वितीयाधिक
रणमारचयति॥ ॥ लौकिकस्यात सर्वस्य नामाद्योबघ्ध्वाक्यतः॥ निमित्तसाम्याद्वेदेपि तदुक्तेः सर्वनामतत्॥ अंबष्ठा
नां दर्विहोमको ब्राह्मणा इति स्मृतावंबष्ठस्वामिके स्मार्ते होमे तत्प्रयोगाल्लौकिकस्यैव होमस्य तन्नामेति चेत्॥ न॥ दर्व्या
मादो दर्विहोम इति प्रवृत्तिनिमित्तस्य लौकिकवैदिकयोः॥ समानत्वाद्दर्विहोमं कुर्यादिति श्रुत्युक्ते वैदिकहोमनामलिंगत
च॥ सर्वस्य होमस्यैतन्नाम॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ यजतेरपि नाम स्याज्जुहोतेरेव वाग्रिमः॥ अविशेषे
ण मुख्यत्वाज्जुहोतेर्लक्षणान्यथा॥ तन्नाम जुहोतिचोदनानां यजतिचोदनानां चाभवितुमर्हति॥ कुतः विशेषाश्रवणादि
ति चेत्॥ मैवं॥ जुहोतिचोदनास्क्होमशब्दस्य मुख्यत्वात्॥ यजतिचोदनानां तन्नामत्वे लक्षणात्॥ तस्माज्जुहोतिचोदना
नामेव नाम॥ ॥चतुर्थाधिकरणमारचयति॥ ॥ दर्विहोमसोमधर्माअपूर्वत्वमुताग्निमः॥ अव्यक्तेर्यज्यभावाच्चस्या
द्वात्स्यादपूर्वता॥ जयाभ्याताननारिष्टादिषु दर्विहोमेषु उत्पत्तिवाक्ये देवताया अश्रवणादव्यक्तलिंगेन सोमधर्माः॥
कर्तव्या इति चेत् मैवं॥ सोमेऽकृतस्य यजतिलिंगस्यात्राभावात्॥ किंच पृथिव्यै स्वाहांतरिक्षाय स्वाहेति दर्विहोममंत्रेषु
स्वाहाकार आम्नातः॥ स च सोमविध्यंतातिदेशविरुध्येत तेन स्वाहाकारविरोधिनो वषट्कारस्य प्राप्यमाणत्वात्॥ किं

कर्मणः समाप्तिर्येन स्तोत्रेण क्रियते तस्मिन्कर्मणि संस्थानिमित्तक उक्थ्यादिशब्दो वर्तते॥ ततो द्वादशाहगते व्यूहः स्वउक्थ्यादिनाम
संभवात्संघत्वलिंगेन द्वादशाहस्य विध्यंतो भवति तत्राद्यंतौ प्रायणीयोदयनीयौ अ वर्जयित्वा मध्यवर्त्तिनो दशरात्रस्य विध्यंतो द्वि
रात्रादिविकृतिप्रतिदेष्टव्य इति दशमाध्याये वक्ष्यते॥ तथा सत्यत्र दशरात्रैकदेशरूपत्वोभ्यस्यमानः प्रत्यहमुक्थ्यस्तोत्रेण समा
प्यमानः शतोक्थ्यनामतामापद्यते एवमितरत्रापि योज्यं॥ ॥पंचमाधिकरणमारचयति॥ ॥ शतोक्थ्यादौ स्तोत्रेण समा
प्यमानोवृद्धिर्गणादेकाहतोथवा॥ आद्योगणविकारत्वादंत्योत्र स्तोत्रजन्मतः॥ पूर्वोदाहृते शतोक्थ्ये शतातिरात्रे च स्तोत्रवृद्धिरपेक्षि
तैकाहेता॥ तथाहि ज्योतिष्टोमः प्रथमसंस्था॥ तत्र द्वादशस्तोत्राणि प्रातःसवने बहिष्पवमानस्तोत्रमेकं चत्वार्याज्यस्तोत्राणि मा
ध्यंदिनसवने माध्यंदिनः पवमान एकं स्तोत्रं चत्वारि पृष्ठस्तोत्राणि॥ तृतीयसवने आर्भवः पवमान एकं स्तोत्रं यज्ञायज्ञीयसामस
ध्वमग्निष्टोमस्तोत्रमपरं तेन स्तोत्रेणायं प्रतिरूपो यज्ञः संतिष्ठते तद्विकृतिषु प्रथमायामग्निष्टोमस्त्रेताद्दूर्ध्वं त्रीण्युक्थ्यस्तोत्राणि भव
ति॥ तैः साविकृतिः संतिष्ठते ततो प्यूर्ध्वं षोडशेन स्तोत्रेणान्याया कृतिः संतिष्ठते॥ एवं विकृत्यंतरेषु द्रष्टव्यं॥ तस्मात्समाप्तिनिमि
त्तान्यग्निष्टोमोक्थ्यषोडश्यतिरात्रादिनामानि॥ एतदेवोपजीव्य पूर्वाधिकरणे द्वादशाहगतानामग्न्युक्थ्यादिनाम संस्थानदी
दशरात्रविध्यंतः शतोक्थ्यादावतिदिष्टः॥ तस्य च दशरात्रस्याद्यंतौ द्वावग्निष्टोमौ॥ तथा सति देशकृत्वस्तदभ्यासे विंशतिरतिर
ग्निष्टोमाः संपद्यंते॥ तेषामुक्थ्यत्वं संपादयितुं प्रत्यग्निष्टोममुक्थ्यनामकं॥ स्तोत्रं वर्धनीयं॥ अन्यथा शतोक्थ्यत्वं न स्यात्॥ कि
त्वशीत्युक्थ्यत्वमेव स्यात्॥ एवं सत्यतिरात्रेपि प्रत्यहमतिरात्रत्व प्रयोजकं स्तोत्रं वर्धनीयं॥ तत्र गणत्वेन द्वादशाहविकारत्वा
दीयस्तोत्रातिदेश इति॥ प्राप्ते ब्रूमः॥ उक्थ्यादिस्तोत्राण्येकाहज्योतिष्टोमउत्पन्नानि॥ तस्मादेकाहाद्यथा द्वादशाहेतिदिश्यंते॥
तथा सतोक्थ्येप्येकाहादेवातिदिश्यतां॥ अन्यथा भिक्षुकोभिक्षकाल्लिप्सत इति न्याय आपतेत्॥ आत्वतिदेशपरंपरा तत्र तत्रो
दाहृता॥ तत्र सर्वत्र प्रबलं लिंगमुपन्यस्तं॥ इह तु गणत्वमहर्गतं न तु स्तोत्रगतं॥ तस्माद्द्वादशाहीयस्तोत्रगतान्विशेषाननुपेक्ष्य
तद्विशेषरहितानि स्तोत्राणि ज्योतिष्टोमादतिदेष्टव्यानि॥ ॥षष्ठाधिकरणमारचयति॥ ॥अहर्गायत्रमित्यत्र स्वफलो
क्तेचोथवा॥ आद्यः सख्योक्तितोमैवं गद्यादौ तत्प्रसंगतः॥ ॥ वाजपेयेन ष्ट्वा बृहस्पतिसवेन यजेतेति श्रुतं॥ तत्रेदमपरमाम्ना
तं॥ गायत्रमेतदहर्भवतीति॥ ॥ तस्मिन्नेकाहे बृहस्पतिसवनरूपे प्रकृतिभूतज्योतिष्टोमाम्नानाच्छंदांसि त्रिष्टुबादीन्यतिदिष्टा

223
1945

नि॥ तेष्वधिकाक्षराणि विलोप्य चतुर्विंशत्यक्षराणि विलोप्य चतुर्विंशत्यक्षराणि परिशेष्य गायत्रीत्वं संपादनीयं॥ कुतः॥
चतुर्विंशत्यक्षरा गायत्रीत्यक्षरसंख्यायास्तच्छब्द प्रवृत्तित्वश्रवणादिति चेन्मैवं॥ अतिप्रसंगात्॥ कविभिर्निमित्ते गद्येत त्र
द्विशीयभाषारूचतयाक्षरसंख्ययागायत्रीत्वं केन वार्येत तस्माद्व्यशात्याप्युत्पन्नाऋच चतुर्विंशत्यक्षरास्वृक्षु वर्त्तमान
कश्चिद्गवांतरजातिविशेषस्तत्प्रवृत्तिनिमित्तं तस्मात्तासामृचामागमः कर्त्तव्यः॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमाला
विस्तरे अष्टमाध्यायस्य तृतीयः पादः॥ ॥ चतुर्थपादे प्रथमाधिकरणमारचयति॥ ॥ दर्विहोमे गुणो नाम वा गुणो दर्वि
होम वत्॥ गुणासंभवतो लोकवेदयोर्नाम तद्भवेत्॥ इदमाम्नायते यदेकया जुह्वा दर्विहोमं कुर्यादिति॥ तत्र दर्व्या होमो दर्वि
होम इति॥ तृतीयासमासे सति दध्ना जुहोतीत्यादाविव होमानुवादेन गुणविधिर्त्वसंभवाद्दर्व्याख्यो गुणो विधीयत इति चेन्
मैवं॥ नान वल्लोकेसिद्धे स्थाली पाकादिहोमे दर्विगुणो विधातुं शक्यः॥ किं लौकिकशिष्टाचारादेव तत्र साधान प्राप्तेः॥ नापिवे
दसिद्धाग्निहोत्र नारिष्टादिहोमे तत्र विहित जुह्वादिबाधप्रसंगात्॥ तस्माद्दर्विहोम इति कर्मनामधेयं॥ ॥ द्वितीयाधिक
रणमारचयति॥ ॥ लौकिकस्यातन सर्वस्य नामाद्योवष्ठ्वाक्यतः॥ निमित्तसाम्याद्वेदेपि तदुक्तेः सर्वनामतत्॥ अंबष्ठा
नां दर्विहोमको ब्राह्मणा इति स्मृतावंबष्ठस्वामिके स्मार्तहोमे तत्प्रयोगात् लौकिकस्यैव होमस्य तन्नामेति चेन्॥ न॥ दर्व्या
मादो दर्विहोम इति प्रवृत्तिनिमित्तस्य लौकिकवैदिकयोः॥ समानत्वाद्दर्विहोमं कुर्यादिति श्रुत्युक्ते वैदिकहोम नामलिंगत
च॥ सर्वस्य होमस्यैतन्नाम॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ यजतेरपि नामस्याज्जुहोतेरेव वाग्रिमः॥ अविशेषे
णामुख्यत्वाज्जुहोते र्लक्षणान्यथा॥ तन्नाम जुहोतिचोदनानां यजतिचोदनानां चाभवितुमर्हति॥ कुतः विशेषाश्रवणादि
ति चेन्॥ मैवं॥ जुहोति चोदनास्थहोमशब्दस्य मुख्यत्वात्॥ यजतिचोदनानां तन्नामत्वे लक्षणात्॥ तस्माज्जुहोति चोदना
नामेव नाम॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ दर्विहोमे सोमधर्मा अपूर्वत्वमुताग्निमः॥ अव्यक्तेर्यज्यभावाच्चस्वा
हात्स्यादपूर्वता॥ जयाभ्यातानराष्ट्रभृत्सु दर्विहोमेषु उत्पत्तिवाक्ये देवताया अश्रवणादव्यक्तलिंगेन सोमधर्माः॥
कर्तव्या इति चेन्मैवं॥ सोमेश्रुतस्य यजतिलिंगस्यात्राभावात्॥ किंच पृथिव्यै स्वाहांतरिक्षाय स्वाहेति दर्विहोममंत्रेषु
स्वाहाकार आम्नातः॥ स च सोमविध्यंतातिदेशविरुध्येत तेन स्वाहाकारविरोधिनो वषट्कारस्याप्राप्यमाणत्वात्॥ किं

चो दाहृतै मंत्रगतश्च तुर्थ्यंतैः यदेदें बतासमार्पणान्नास्त्यव्यक्तत्वं तस्माद्विहीमानाम पूर्वकर्मत्वान्नास्ति तत्र
कस्यापि विध्यंतस्यातिदेशः॥ ॥ इति श्री माधवीये जैमिन्यो नियमालाविस्तरे अष्टमाध्यायस्य चतुर्थः पादः॥ ॥
समाप्तश्चाध्यायः॥ ॥ अतिदेशोष्टमेध्याये समाप्तो नवमे पुनः॥ ॥अतिदिष्टपदार्थानामूहानूहविचारणा॥ अ
ष्टमनवमयोरध्याययोः अनेन पूर्वोत्तरभावउपजीव्योपजीवकरूपेणोपन्यस्तः॥ मंत्रसामसंस्कारेष्वतिदिष्टप
दार्थेषु यत्रास्त्यूहो यत्र च नास्ति॥ तदुभयमत्र विचार्यते॥ ऊहस्य लक्षणमेवमाहुः॥ प्राकृतरुछानापतिपदार्था
तरकार्यतः॥ ऊहः प्रयोगो विकृत उह्यमानतयोदित इति॥ ॥ नवमाध्यायस्य प्रथमपादे प्रथमकरणमारचयति
॥ ॥ इष्ट्यग्निहोत्रसोमानां धर्माः किं यजयेथवा॥ अपूर्वाय त्रनिर्णीतिः स्मार्यते सप्तमोदिता॥ सप्तमस्याद्याधिक
रणेवघातादीनां धर्माणां यज्यन्वयं निराकृत्यापूर्वान्वयो निर्णीतिः॥ सएवात्रोहारंभोपयोगित्वेन स्मार्यते॥ यदिय
ज्यर्थाः स्युस्तदा सर्वत्रोपदिश्यंते॥ नत्वेतिदेशः क्वाप्यस्ति ततोतिदिष्टपदार्थविषयऊहो नाशक्येत। अपूर्वार्थत्वेतु
प्रकरणनियमितत्वादश्रुतधर्मके ष्वतिदेशाद्रूह आरंभणीयः॥ ॥ द्वितीयवर्णकमारचयति॥ ॥ अवघाते व्री
हिरूपं विवक्ष्येत नवाश्रुतेः॥ आद्यः साधनतामात्रमवर्ज्यत्वाद्विवक्ष्यते॥ व्रीहीनवहंतीत्युत्तव्रीहीणां स्वरूपं श्रूयमा
णत्वाद्विवक्षितं॥ तथा सति नैवारश्चरुर्भवतीति यत्रनीवाराणां प्रयोगस्तत्रऊहः॥ न॥ यदा व्रीहिः स्वेवनियतोवघातो
व्रीहिनिवृत्तौ निवर्तेत॥ तदा कुतऊहावसर इति प्रासिद्धुमः॥ व्रीहिस्वरूपविवक्षायामपि व्रीहिगतापूर्वसाधनत्वाका
रोनवर्जयितुं शक्यः॥ अन्यथावघातवैयर्थ्यापत्तेः॥ ततो पूर्वसाधनत्वाकारो वश्यं विवक्षितव्यः॥ तत्र व्रीहिरूपस्यापि
विवक्षायां गौरवं स्यात्॥ तदविवक्षायां तु नीवाराणामपि विहितत्वेनापूर्वसाधनत्वाकारसद्भावादवघातविषयत्वेनोहः सि श्रीः ३
द्धाति॥ ॥ तृतीयवर्णकमारचयति॥ ॥ नापूर्वस्यानिमित्तत्वमस्तिवा नप्रयोक्तृतः॥ अस्तिशाब्द प्रयोक्तृत्वमार्थिकीतु ११२
निमित्तता॥ अवघातप्रयाजाद्यनुष्ठाननिमित्तत्वमपूर्वस्य नास्ति॥ कुतः॥ अपूर्वस्य प्रयोजकत्वात्॥ निमित्तत्वप्रयोज
कत्वयोः सिद्धसाध्यरूपेण विरुद्धत्वात्॥ यस्मिन्विद्यमाने क्रियानिमित्तं यस्य सिद्ध्यर्थं क्रियते तत्प्रयोजकं वर्णिता चापू
र्वस्य सप्तमाधिकरणनिर्णय स्मरणेन प्रयोजकता॥ ततो यजतेर्निमित्तत्वं वक्तव्यं॥ तथा सति यजति व्रीह्यादिस्वरू

पस्यापि निमित्तत्वेन तदभावे सत्यवघाताभावान्नीवाराद्यूहो नास्तीति प्राप्तेब्रूमः॥ अपूर्वस्य शाब्दं प्रयोजकत्वं सप्तमे वर्णितं॥
इह त्वार्थिकी निमित्तता वर्ण्यते यद्यरूपेण साध्यमपूर्वं तथापि मनसि विपरिवर्तमानत्वाकारणसिद्धत्वमप्यस्ति अतो यजेर्निमि
त्तत्वाभावान्न तद्दृष्टांतेन व्रीहिस्वरूपस्यानिमित्तत्वान्नीवाराद्यूहः संभवति॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ मुसला
भ्युक्षणं हंत्यै स्यादपूर्वार्थवोक्तितः॥ आद्यः प्रकरणादंत्योव्यर्थं तत्स्यादिहान्यथा॥ प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहंती
ति श्रूयते॥ तत्र प्रोक्षणमुलूखलमुसलद्रव्यद्वाराहंत्यर्थं॥ कुतः वाक्येन तच्छेषत्व प्रतीतेरिति चेत्॥ मैवं॥ प्रकरणेनापूर्वशेष
त्वावगमात्॥ नच वाक्यं प्रकरणाद्बलीय इति वाच्यं अपूर्वशेषत्वाभावे वैयर्थ्यप्रसंगात्॥ पूर्वपक्षे यत्रावघातस्तत्रैव प्रोक्षणं
तथा सति नैऋतचरौ कृष्णानां व्रीहीणां नखनिर्भिन्नानामितिश्रुते पुनखेषु प्रोक्षणं नोह्यते॥ सिद्धांते त्वपूर्वस्य प्रयोजकत्वाद
स्ति तत्रोहः॥ ॥ द्वितीयवर्णकमारचयति॥ ॥ मंत्रादिकमपूर्वाय परायावांतरस्य वा॥ फलोद्योनेः समंक्लृप्तेतेक्षणातु विनिश्चयते
॥ ॥ ज्योतिष्टोमे श्रूयते॥ यावत्यावाचाकामयेत॥ तावत्यादीक्षणीयामनुब्रूयान्मंद्रं प्रायणीयायां मंद्रतरमातिथ्यायामुपां
श्रूपसत्सु उच्चैरग्नीषोमीय इति॥ अत्रइह नेरूचाव च भावः परमापूर्वप्रयुक्तः॥ तस्य फलवत्वादिति चेत् मैवं॥ अवांतरापूर्वेपि स
मानं फलवत्वं परमापूर्वजननद्वारेण फलसंबंधात् समासेच फलमेयत्वे सन्निकृष्टलक्षणया निर्णयः॥ तथाहि दीक्षणीयादि श
ब्दा अंगकर्मवाचिनः॥ नच मंद्रत्वादिधर्माणां कर्मस्वरूपं प्रयोजकं॥ परम अपूर्वप्रयुक्ते निर्णीतत्वात्॥ ततो दीक्षणीयादि
शब्दैरपूर्वं लक्षणीयं॥ तत्र स्ववाक्यगतमवांतरापूर्वं सन्निकृष्टं तद्द्वारकं परमापूर्वं विप्रकृष्टं॥ तस्मादवांतरापूर्वप्रयुक्ता एते
धर्माः॥ अश्वमेधगतत्रैधातवीयायामूहाभावः फलं॥ तथाहि अश्वमेधे समाम्नायते॥ त्रैधातवीयादीक्षणीया भवतीति
॥ यदि परमापूर्वप्रयुक्तः स्यात्॥ ततस्तस्योपकारविशेषोनिर्बंधन इति तत्कार्यापन्नायां त्रैधातवीयायां भविष्यति॥ अथा
ग्नावैष्णवापूर्वप्रयुक्तः तदा त्रैधातवीयायां तदपूर्वं न भवति किंत्वदैन्यवेति नास्त्यूहः॥ ॥ तृतीयाधिकरणमारचयति॥
॥ ॥ अगन्मादेः स्वर्गदेवौ हेतूयद्वात्र चोदितं॥ आद्यो लिंगान्मैवमंगस्यापूर्वाकांक्षितत्वतः॥ दर्शपूर्णमासयोर्मंत्रौ श्रुतौ॥
अगन्मसुवरित्येकः अग्नेरहमुज्जितिमनूज्जेषमित्यपरः तयोरुभयोः स्वर्गदेवौ क्रमेण प्रयोजकौ॥ कुतः॥ तल्लिंगदर्श

225
1945

नात्॥ तथासति सोर्यं चरुंनिर्वपेद्ब्रह्मवर्चसकाम इत्यत्र स्वर्गाग्न्योरभावान्नास्त्यूह इति प्राप्ते ब्रूमः॥ चोदितं यदपूर्वं तस्यै
व फलवत्वेनानुष्ठेयत्वेनेतिकर्तव्यताकांक्षायुक्तात् तौ मंत्रयोरपूर्वप्रयोजकं॥ तथासति विकृतावग्न्यभ्रूर्ब्रह्मवर्चसं सूर्यस्या
हमुज्जितिमनूज्जेषं इत्येवं मंत्रयोरस्त्यूहः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ देवः प्रयोजको पूर्वं वाद्यास्य फलदत्वतः॥
न विधेये गुणाद्येषा पूर्वस्य फललितोचिता॥ आग्नेयोष्टाकपाल इत्यादिसर्वेषु कर्मसु धर्माणामग्न्यादिर्देवः प्रयोजकः॥
कुतः यागेन पूजितायादेवतायाः फलप्रदत्वात्॥ संभवति हि फलप्रदत्वं मंत्रार्थवादादिभ्यो विग्रहादिपंचकावगमात्॥
विग्रहो हविः स्वीकारस्तद्भोजनं तृप्तिः प्रसादश्चेत्येतच्चेतनस्योचितं पंचकं॥ सहस्राक्षो गोत्रभिद्वज्रबाहुरिति विग्रहः॥
अग्निरिदं हविरजुषतेति हविः स्वीकारः॥ अद्धीदिंद्र प्रस्थितेमा हवींषि इति हविर्भोजनं॥ तृप्त एवैनमिंद्रः प्रयोजपशुभिः
तर्पयतीति तृप्तिप्रसादौ॥ ततः सेवितराजादिवत्पूजितदेवतायाः फलप्रदत्वेन प्राधान्यात्सैव धर्माणां प्रयोजिका॥ तथा
सति यत्र सोर्यादावग्निर्नास्ति॥ तत्राग्निदेवतायां नियता धर्मा एवतावन्नातिदिश्यंते कुतस्तत्रोहस्य प्राप्तिरिति पूर्वः प
क्षः॥ किं देवतायाः फलप्रदत्वलक्षणं प्राधान्यं शब्दादापाद्यते॥ वस्तुसमर्थ्याद्वा नाद्यः स्वर्गकामो यजेतेति॥ शब्देनाभि
धेयस्य फलप्रदत्वावगमात्॥ द्रव्यदेवते तु सिद्धत्वेन विध्यनर्हे॥ तत्र यथा द्रव्यस्य विधेयं प्रति गुणत्वं तथा देवताया
अपि यदि यागस्य कालांतरभाविफलं प्रति व्यवहितत्वं॥ तर्हि तत्साधनभूतदेवतातातोपि व्यवहिता का तर्हि फलस्य ग
तिः॥ अपूर्वमिति वदामः॥ तच्च श्रुत्याश्रुतार्थापत्त्या वा प्रतीयमानत्वाच्छाब्दमिति तस्य फलप्रदत्वमुचितं॥ नापि व
स्तुसामर्थ्याद्देवस्य फलप्रदत्वं॥ विग्रहादिपंचकप्रतिपादकयोर्मंत्रार्थवादयोः स्वार्थे तत्पर्याभावात्॥ अन्य
था वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहेत्यादिमंत्रेष्वपि देवत्वं विग्रहादिपंचकयुक्तं कल्प्येत॥ तच्च
प्रत्यक्षविरुद्धं॥ ततो न राजादिवत्फलप्रदत्वं॥ किंच विग्रहादिमद्देवतावाद्यपि न बिना कर्मणा फलमभ्युपगच्छ
ति॥ ततः प्राप्ताप्राप्तविवेकेनोभयवादिसिद्धस्य यागस्यैव फलप्रदत्वमस्तु॥ किंच मातापितृगुर्वादिशुश्रूषायां
विनापि देवतां फलप्रदत्वमुभयवादिसिद्धं॥ तस्मात्फलप्रदमपूर्वमेव धर्माणां प्रयोजकं॥ तथा सत्यग्न्यादिदे

श्री
११३

227
1945

वताभावेप्यपूर्वप्रयुक्तधर्माणामतिदेशात्तृप्तिस्तत्रोहस्यावकाशः॥ ॥ पंचमाधिकरणमारचयति॥ ॥ व्रीह्या
दयः प्रयोक्तारो पूर्वं वा प्रोक्षणादिषु वाक्यश्रुतिभ्यामाद्यः स्याच्चोदिताकांक्षयांतिमः॥ व्रीहीन्प्रोक्षतीत्यत्र
वाक्ये न द्वितीयाश्रुत्या च प्रोक्षणे व्रीहिस्वरूपं प्रयोजकमिति चेत् मैवं॥ फलवत्वेन कर्तव्यतया चोदितस्या
पूर्वस्येतिकर्तव्यतायामाकांक्षा भवति॥ व्रीहिस्वरूपं तु सिद्धत्वान्न कर्तव्यतया चोद्यते॥ किंतु गुणत्वेन॥ ततो द्र
व्यस्वरूपस्य नेतिकर्तव्यताकांक्षा॥ तस्माद्वाक्यश्रुती उपेक्ष्य प्रकरणादपूर्वस्य प्रयोजकत्वमेष्टव्यं॥ न चापू
र्वप्रयुक्तेस्त्रुवादौ प्रोक्षणस्यातिप्रसंगः प्रकृतापूर्वीय प्रहविराकारस्याविवक्षितत्वात्॥ सप्तमस्य प्रथमाधिक
रणे संनिपत्योपकरणोरारादुपकारिणां च सामान्येनापूर्वप्रयुक्तत्वमिति देशारंभसिद्धये वर्णितं॥ तदेवात्रा
पि प्रथमाधिकरणस्य प्रथमवर्णक उदाहारंभसिद्ध्ये स्मारितं॥ द्वितीयवर्णके पुनः संनिपत्योपकारिणां विशेषा
कारेण साधितं॥ पुनरपि द्वाव्यां यद्द्वितीयाधिकरणस्य प्रथमवर्णके उहारंभे स्मारितं तृतीयं पंचमाधिकरणयोश्च
क्रमेण वाक्यं लिंगं श्रुतिश्चोपजीव्य प्रवृत्तास्त्रयः पूर्वपक्षा निराकृताः अतो न पुनरुक्तिभ्रमः कर्तव्यः॥ ॥ षष्ठा
धिकरणमारचयति॥ ॥ प्राचीनोपांशुता पूर्वं परमेवांतरेथवा॥ यज्ञयोगाद्दादिमोंत्योदेशबंधश्रुतत्वतः॥ ज्यो
तिष्टोमे श्रूयते॥ तस्माद्वा एषा यज्ञस्य तस्माद्यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरंतीति अत्रोपांशुता
परमापूर्वसंबद्धा परमापूर्वप्रयुक्तेत्यर्थः कुतः शाकुनिग्राहगतिकन्यायेन यज्ञसंबंधावगमात्॥ तथाहि यज्ञ
स्य संबंधि यत्किंचिदग्नीषोमीयात्प्राचीनमारादुपकारकं प्रधानहविःसंस्कारकं च तस्य सर्वस्योपांशुत्वं वि
धीयते॥ यज्ञो नाम परमापूर्वं तस्य यज्ञस्य साध्यत्वात्॥ येयमुपांशुत्वानुष्ठितिः एषा तस्य राच्छन्नगतिः यथा शकु
निं जिघृक्षतः प्रच्छन्नागतिर्भवति शनैः पदन्यासो दृष्टिप्रणिधानमशब्दकरणं चेति तत्सर्वं शाकुनिग्रहणायत
थैवानुष्ठातुरुपांशुत्वानुष्ठानं छद्मगतिरूपमनुष्ठानसाध्याय यज्ञशब्दनिर्दिष्टाय परमापूर्वाय सति च प
रमापूर्वप्रयुक्तत्वे कुंडपायिनामयनेत्यग्नीषोमीयपशोः प्राचीनेपूपांशुत्वस्यादिति प्राप्ते ब्रूमः॥ अवांतरा

पूर्वप्रयुक्तमुपांशुत्वं॥कुतः देशसंबंधेनश्रुतत्वात्॥अग्नीषोमीयात्प्राचीनंयत्किंचिदितिमर्यादादेशलक्षितायां
पदार्थास्तिश्रूयमाणेनवाक्येनोपांशुत्वसंबंधाः प्रतीयंते॥ यज्ञसंबंधस्तुनवाक्येनश्रूयते॥ यज्ञस्यत्सरेत्यन्वयप्रती
तेः नहियज्ञस्ययत्किंचित्प्राचीनमित्यन्वयः संभवति॥ तस्मादित्यनेनपदेनव्यवधानात्॥ तस्मान्मर्यादावच्छिन्नप
दार्थजन्यावांतरापूर्वप्रयुक्तमुपांशुत्वं॥ यज्ञस्यत्सरेत्यनेनार्थवादेनावांतरापूर्वप्रयुक्तमेवोपांशुत्वंप्रशस्यते॥
एवंसत्युदाहृताहाभावः फलं॥ यत्तुद्वितीयाधिकरणस्यद्वितीयवर्णकेग्नीषोमीयात्प्राचीनदीक्षणीयादेस्वरां
तरमुक्तं॥ तद्दीक्षणीयादिसंयोगात्तत्रत्यप्रधानविषयं॥ इदंतूपांशुत्वमंगविषयमितिनविरोधः॥ ॥सप्तमाधि
करणमारचयति॥ ॥प्रणीतावाग्यमेपक्षौयोजनीयोपुरेवतौ॥पुराहविष्कृदाह्वानाधितत्रापूर्वकारितः॥दर्श
पूर्णमासयोः श्रूयते॥ यद्दैनिहविष्यंतावर्द्धयुजमानौवाचंयच्छतइति॥ तत्रप्रणीतासंबंधिनिवाङ्नियमेयज्ञसंयो
गात्परमापूर्वप्रयोजकमितिपूर्वः पक्षः॥ यत्तशब्दस्यतन्निष्यंतावित्यनेनान्वयोनतुवागपमः॥ ततोनपरमा
पूर्वप्रयोजकं॥ तथासतिहविष्कृदाह्वानेवाग्विसर्गस्यविहितत्वात्ततः पुरायेप्रोक्षणादिपदार्थाः॥ तेष्वन्वितस्तत्र
त्येनावांतरापूर्वेणप्रयुज्यते॥ ॥अष्टमाधिकरणमारचयति॥ ॥विकर्षप्रोक्षणेकार्येप्रतीष्टकमुतैकधा॥आद्यो
वयवत्वसत्वेनमेवंभूदेशासत्वतः॥ इष्टकाभिरग्निंचिनुतइतिश्रुतं॥ तत्रेदमाम्नायते॥ मंडूकेनाग्निंविकर्षति॥वेत
सशाखयावकाभिश्चाग्निंविकर्षति॥ हिरण्यशकलसहस्रेणाग्निंप्रोक्षति॥ दध्नामधुमिश्रेणाग्निंप्रोक्षणीति
ति॥ शाखाग्रेमंडूकंबध्वातेनविकर्षतीत्यर्थः॥ तेनचकर्षणप्रोक्षणेप्रतीष्टकंकर्तव्ये॥ कुतः चिताभ्यइष्टका
भ्यः पृथगग्निशब्दार्थस्यकस्यचिदवयविद्रव्यस्याभावात्॥ इतिचेन्मैवं॥ उपहिताभिरिष्टकाभिः संयुक्तप्रदे
शस्यावयविद्रव्यत्वात्॥ तस्यचाग्न्याकारत्वेनाग्निशब्दार्थत्वस्मादग्नेरेकत्वात्॥ सकृदेवविकर्षणप्रोक्षणेकु
र्यात्॥ ॥नवमाधिकरणमारचयति॥ ॥पात्नीसंयाजसंस्थाकिंसर्वेष्वंत्येतरेषुवा॥ अविशेषादाद्यिमोंतो
संस्थितत्वोक्तिलिंगतः॥यद्वादशाहेश्रूयते॥ पत्नीसंयाजांतान्यहानिसंतिष्ठंतइति॥ द्वादशसंख्याकेषुसर्वेष्वहः

229
1945

सुपत्नीसंयाजांतंकर्मानुष्ठायावशिष्टंहारियोजनादिकं॥ त्याज्यंकुतः एतावत्पत्नीसंयाजैःसमाप्तिर्नेतरेष्वितिविशेषनि
याममकाभावादितिचेन्मैवं॥असंस्थितत्ववाक्योक्तलिंगेनप्रागुत्तमादह्नोयानीतराण्यहानितेषुपत्नीसंयाजांतत्वंव्यव
तिष्ठते॥ तथाहि पत्नीसंयाजान्यहानिसंतिष्ठंतइत्यस्यविधेः शेषएवआम्नायते॥ नबर्हीरनुमहइति॥ असंस्थितोहित
हिमज्ञइति॥ तत्रपत्नीसंयाजैः सर्वेषामह्नांसमाप्तावसंस्थितत्वंव्याहन्येत॥ तस्मात्संतिष्ठंतइतिशब्देनसमाप्तिवचनः॥
किंतर्हिसत्येवंतदहः संबंधिकर्तव्यशेषव्यापारोपरमात्रंब्रूते॥ अयंचकर्तव्यशेषश्चपरमेहन्यनुष्ठातव्यः॥ तथासतिद्वा
दशानामह्नांविहितः सहप्रयोगोनुगृहीतोभवति॥ तथाहिद्वादशहोत्रानयजेतेतिसहप्रयोगोविहितः अतएवदीक्षेपप
दादिकंतंत्रेणानुष्ठीयते॥ तत्रप्रथममहः पत्नीसंयाजांतमनुष्ठामहारियोजनादिकंबर्हिः प्रकरणोंतंकर्तव्यत्वेनवस्था
प्यद्वितीयमहः प्रक्रमेत॥ एवमुत्तरत्रापि॥ तत्रसर्वत्रावशिष्टंकर्तव्यमुत्तमेहन्यनुष्ठातव्यं॥ तथासत्युपक्रमैक्यवत्॥ उप
संहारस्याप्येकत्वात्विहितः सहप्रयोगः सिध्यति॥ एकैकस्याह्नः पत्नीसंयाजैः समाप्तौभिन्नाः प्रयोगाः प्रसज्येरन्॥ द
सुदशमस्याह्नोमानसग्रहेणसमापनंतद्वाचनिकं॥ तस्मादुत्तरव्यतिरिक्तानांएवाह्नांपत्नीसंयाजानंतरंव्यापारोपरमः॥
॥ ॥दशमाधिकरणमारचयति॥ ॥त्रिरनूक्तिर्ऋचांधर्मः स्थानधर्मोथवाग्निमः॥स्त्रीलिंगत्वात्नतस्याप्रातिपदिक
प्रबलत्वतः॥दर्शपूर्णमासयोः सामिधेनीः प्रकृत्यश्रूयते॥त्रिः प्रथममान्वाहेति॥ सेयंत्रिरभ्यासः॥आदौपठितस्यप्र
वोवाजाइतिऋक्विशेषधस्यधर्मः कुतः प्रथमामित्यस्यस्त्रीलिंगत्वात्॥ ऋक्परत्वोपयत्तेरितिचेत्॥ नैतद्युक्तंस्त्रीलिं
गवाचिनः टाप्प्रत्ययादपिपूर्वपठितस्यस्थानवाचिनः प्रथमेत्यस्यप्रातिपदिकस्यप्रबलत्वात्॥ अतोविकृतिष्वन्यस्या
अप्यृचः प्रथमस्थानेपठितायास्त्रीरभ्यासः कर्तव्यः॥स्थानांतरेपठितायाः प्रवोवाजाइत्यस्याअप्यृचोनास्त्यभ्यासः॥
एकादशाधिकरणेवृत्तिकारमतमारचयति॥ ॥प्रतिप्रयोगमारंभयजिरस्तिनवास्त्यसौ॥अंगत्वेनतत्सर्वधर्मआधा
नतद्भवेत्॥ आग्नावैष्णवमेकादशकपालंनिर्वपेद्दर्शपूर्णमासावारप्स्यमानइतिविहितेयमारंभणीयेष्टिर्दर्शपूर्णमास
योर्यावज्जीवंमयादर्शोत्यमानयोः प्रतिप्रयोगमावर्तनीयाकुतः प्रयाजादिवदंगत्वादितिचेत्॥ नैतद्युक्तंकुतः सर्वप्रयोगसाधा
रणत्वात्॥ यावज्जीवंमयादर्शपूर्णमासौकर्तव्यावित्यध्यवसाय आरंभः सचैकएवतेनचारंभेणप्रयुक्तयामिष्टिस्तस्मात्

नाव र्तनीयौः यथाधानंसर्वक्रतुसाधारणत्वात् सकृदेव कर्त्तव्यं॥ तद्वदाधानस्यसकृदाधीनस्यनुष्ठानमेकादशस्यतृतीयेप
देवक्ष्यते॥ स्वकीयंमतमारचयति॥ अन्वाधानांगमारंभोयद्वा पुरुषसंस्कृतिः॥ फलवत्वादादिमोत्यः पुंयोगान्न पृथक्‌फलं॥
दर्शपूर्णमासयोरन्वाधानस्य प्रथमपदार्थत्वेनारंभरूपत्वादारंभप्रयुक्तेयमिष्टिरन्वाधानस्यांगं तथासति यागफलेनैव फ
लवतीस्यात्॥ कत्संस्कारपक्षे पृथक्‌फलंकल्प्येति॥ तस्मात्प्रतिप्रयोगमन्वाधानानौ वेतदंगभूतेयंमिष्टिरावर्त्तनीयेतिप्र
सेब्रूमः॥ आरंभोनामपुरुषस्य प्रथमप्रवृत्तिर्नत्वन्वाधानपदार्थः॥ अतोनान्वाधानांकिंगत्वारभ्यमीनोनिर्वपेदितिपुरुषसंयो
गात्तत्संस्कारोयं॥ नचफलकल्पनाप्रसंगः कृतारंभस्य पुरुषस्य प्रयोगपरिगृहीतत्वेन पृथक्‌फलाकांक्षायाअभावात्॥
नन्वेमपितत्प्रयोगमारभ्यमानस्यसंस्कारायावृत्तिःस्यात्॥मैवं॥ प्रयोगमारभ्यमानइत्यश्रुतत्वात्॥ दर्शपूर्णमासावार
भ्यमानइतिश्रूयते॥ तयोश्चैकएवारंभः तस्मात्स्यावृत्तिः॥ ॥द्वादशाधिकरणमारचयति॥ ॥सवितृरव्याद्यूहमीशंनवा
र्थः संगतत्त्वतः॥ वूहोनाविकृतस्यैवनिर्वापान्वयसंभवात्॥ दर्शपूर्णमासयोर्निर्वापमंत्रः श्रूयते॥ देवस्यत्वासवितुः प्रसवे
श्विनोर्बाहुभ्यां पूष्णाहस्ताभ्यामग्नयेजुष्टंनिर्वपामीति॥ तत्रसवित्रश्विपूषशब्दाः कर्मणिसंगतंदेवतारूपमर्थमभिधातुंम
र्हंति तथासतिदृष्टप्रयोजनलाभात्॥ अग्निश्चकर्मसंमवेतादेवता॥ ततः कयाचिदपिव्युत्पत्त्यासवित्रादिशब्दैरग्निरभिधी
यतां॥ अथोच्येत॥ अग्निशब्देनैवास्यैरभिधानात्पुनरस्तदभिधानंव्यर्थं॥ किंचदेवतांतरे पुरूढास्तेशब्दानाग्निमभिदध्युरि
ति॥ एवंतर्हि तास्तिस्रोदेवता अग्निनासहकर्मणिविकल्प्यंतां॥ ततः प्रकृतस्यमंत्रस्यविकृतिष्वतिदेशेसति सवित्रादिशब्द
स्थानेतत्तद्देवतावाचकशब्दवूहनीयइतिप्राप्तेब्रूमः॥ नात्रोहः कर्तव्यः कुतः अविकृतस्यैवमित्रस्यनिर्वापशेषत्वेनान्वयसं
भवात्॥ नहिप्रकृतावग्निनासह सवित्रादिदेवतानांविकल्पः वाक्यभेदादिदोषप्रसंगात्॥ तस्मान्नास्त्यूहः॥ ॥त्रयोदशा
धिकरणेप्रथमवर्णकमारचयति॥ ॥तत्राग्निशब्दोनाह्यस्यादूह्योवास्तावकत्वतः॥ सावित्रादिवदाद्योनोसमवेतार्थव
र्णनात्॥ तस्मिन्पूर्वोदाहृतएवमंत्रे अग्नयेजुष्टमित्ययमग्निशब्दोविकृतिषुनोहनीयः॥ कुतः देवांतरवाच्विसवित्रादिशब्द
दग्निशब्दस्याप्यत्रनिर्वापः स्तावकत्वेनपाठादितिप्राप्तेब्रूमः॥ नन्वत्रजुष्टशब्दोसमवेतार्थः निर्वापात्पूर्वंजुष्टत्वाभावा
त्॥ तद्योगादग्निशब्दोपितथास्यादितिचेन्मैवं॥ जुष्टंयथाभवतितथानिर्वपामीतिक्रियाविशेषणत्वेनभविष्यज्जोष

श्रीः ६
११५

णपरत्वेसति॥ समवेतार्थत्वात्॥ तस्मात्सौर्येयागेसूर्यायजुष्टंनिर्वपामीत्येवमूहनीयं॥ ॥द्वितीयवर्णकमारचयति॥
॥ ॥नोह्यऊह्योथवाधान्यशब्दोनासंगतोक्तितः॥ ऊह्योलक्षणयार्थस्यगोपानस्येवसंगतः॥ दृषदिपेषणायुतंडुलावा
पमंत्रोविहितः॥ धान्यमसिधिनुहिदेवानिति सोयं॥ धान्यशब्दोसमवेतमर्थंब्रूते॥ निस्तुषाणांतंडुलानांधान्यशब्दार्थत्वा
भावात्॥ ततः सावित्रादिशब्दवत्नोहनीयइतिचेन्मैवं॥ लक्षणावृत्त्याधान्यशब्दस्यतंडुलरूपेर्थेसमवेतार्थत्वात्॥ यथा
गावः पीयंतइत्यत्रमुख्यवृत्त्यभावेपिनासमवेतार्थत्वंलोकावर्णयंतिकिंतुपयोलक्षयित्वार्थंसमवेतमेवप्रतियंतितद्वत्॥
तस्माद्गवामयनेषड्विंशत्संवत्सरेधान्यशब्दऊहनीयः॥ तत्रह्येवमाम्नायते॥ संस्थितेसंस्थितेहतिगृहपतिमृगयांया
तिसतत्रयान्मृगान्हंतितेषांतरसमयाः सवनीयाः पुरोडाशाभवंतीति॥ तत्रदृदिपेषणायमांसमावपन्मासमसिधिनुहिदेवा
नित्येवंमंत्रमूहेत्॥ नचधान्यशब्दवल्लाक्षणिकोमृगशब्दऊहेप्रयोक्तव्यइतिवाच्यं॥ लक्षणावृत्तेः प्रकृतावार्थिकत्वेनाति
देशानर्हत्वात्॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥ऊह्योयज्ञपतिर्नोवावृद्ध्यर्थोत्साहतोग्रिमः॥ प्रत्यक्षोक्त्याकृत्स्न
मंत्रइतिंडार्थोनोहमंततः॥ दर्शपूर्णमासयोरिडोपह्वानमंत्रेवाक्यमेतदाम्नायते॥ देव्याअध्वर्यवउपहूताउपहूतामनु
ष्यायज्ञइदंयज्ञमवान्येचयज्ञपतिंवर्धानिति॥ यद्देव्याअध्वर्यवोयज्ञवैमेतियेचमनुष्यायज्ञपतिंवर्धयंतितेसर्वेप्यत्रोदा
हृताइत्यर्थः॥ अस्मिन्वाक्येयज्ञपतिशब्दोयज्ञपतेरिष्टिवृद्धिकथनेनोत्साहजननेनसमवेतार्थः प्रतीयते॥ ततइडोपह्वानमं
त्रात्पृथक्कृत्याभिवृद्ध्यर्थेजपेमंत्रवाक्यमिदंलिंगेनविनियुज्यतां॥ तथासतिसत्रेयज्ञपतीनांबहुत्वाबहुवचनांतया
शब्दऊहनीयइतिप्राप्तेब्रूमः॥ प्रत्यक्षश्रुत्याकृत्स्नोमंत्रइडोपाह्वानेविनियुक्तः॥ एकवाक्यत्वंचकृत्स्नेमंत्रउपलभ्यते
॥ प्रकरणंचदमिडायाः ततः श्रुतिवाक्यप्रकरणैः विरोधात् नलिंगविनियोगः॥ संभवति॥ तदभावेचयज्ञपतिवृद्धि
प्रतिपादकमवांतरवाक्यमिडाप्रतिपादकेनमहावाक्येनसहैकवाक्यतामापन्नमिडांप्रशंसति॥ प्रशंसाचैकवचनांतेनापि
यज्ञपतिशब्देनसिद्ध्यतीति॥ नास्तिसत्रेतदूहः॥ ॥पंचदशाधिकरणमारचयति॥ ॥यजमानोनोहितव्यऊह्योयान
हिपूर्ववत्॥ मंत्रः फलप्रधानोतऊह्यः सर्वफलित्वतः॥ दर्शपूर्णमासयोः सूक्तवाकेनप्रस्तरंप्रहरतीतिप्रहरणेकरणत्वे
नविनियुक्तेसूक्तवाकमंत्रेवाक्यमेतदाम्नायते॥ अयंयजमानआयुराशास्तइति॥ तत्रपूर्वोक्तयज्ञपतिशब्दवत्सत्रेषु

231
1945

यजमानशब्दो नोहितव्य इति चेदमैवं॥ वैषम्यात्॥ तथाहि सर्वत्र प्रकरणमंत्रो द्विविधः क्रियाप्रकाशकः फलप्रकाशकश्चेति॥
पूर्वोदाहृतो मंत्र इडोपह्वानमंत्रः नृपेषु सर्वस्मिन्नपि तदेवभासात्॥ इडोपहूता उपहूतेडा उपो अस्माँ इडा ह्वयतामिडोपहूता इत्यादि
रिवात् तद्वाक्ये उपह्वानक्रियाया एव प्राधान्यावभासात्॥ तन्मध्यपतितत्वेऽयमेव यज्ञपतिं वर्धयेति वृद्धिफलं गमयतीति न तस्य स्वा
र्थो विवक्षितः॥ सूक्तवाकमंत्रस्तु फलमेव प्रकाशयति न तु प्रहरणक्रियां॥ इदं द्यावापृथिवी भद्रमभूदित्यस्मिन्ननुवाके सूक्तवा
कमंत्रे सर्वस्मिन्फलावभासात्॥ अयं यजमान आयुराशास्ते सुप्रजास्त्वमाशास्ते उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते
दिव्यं धामाशास्त इत्यादिभिः सर्वैरप्यवांतरवाक्यैः फलस्यैवावभासनात्॥ तस्माद्विवक्षितं फलं फलिनश्च सर्वेषु सर्वे यजमानाः
ततः सर्वेषां फलसिद्ध्यै यजमानशब्दो बहुवचनांतत्वेन सत्रेषु ऊहनीयः॥ ॥ षोडशाधिकरणे प्रथमाधिकवर्णकमारचयति॥
॥ ॥ हरिवच्छब्द ऊह्यः स्यान्नो वेंद्रे समवायतः॥ ऊह्योऽमैवं स्तावकत्वादसतास्कूर्ति संभवात्॥ ज्योतिष्टोमे सुब्रह्मण्याह्वानार्थे नि
गदे पठ्यते॥ इंद्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेन गौरावस्कंदिन्नहल्यायै जारेति सोऽयं निगदो विकृतावग्निषु(त्)
दके नातिदिष्टः॥ तत्राग्नेयी सुब्रह्मण्या भवतीत्यग्निसंबंधविधानादिंद्रपदं परित्यज्याग्न आगच्छेत्यूहः कृतः तस्मिन्निगदे यानींद्र
पदस्य विशेषणानि हरिव इत्यादि संबुध्यंतपदानि॥ तान्यप्यूहनीयानीति तावत्प्राप्तं॥ कुतः इंद्र एव नियमेन समवेतस्यार्थस्याभि
धानात्॥ अग्नौ तस्याभावात्॥ स चार्थस्तत्तत्संबुध्यंतपदमनूद्य व्याचक्षाणेन ब्राह्मणेन स्पष्टीकृतः॥ तथा च श्रूयते हरिव आग
च्छेति पूर्वपक्षापरपक्षौ वा॥ इंद्रस्य हरी ताभ्यां ह्येष सर्वं हरतीति मेधातिथेर्मेषेति मेधातिथिं ह काण्वायनं मेषो भूत्वा जहार॥ वृ
णा६ षणश्वस्य मेनकानाम दुहिता बभूव तामिंद्रश्चकमे गौरावस्कंदिन्निति गौरमृगो भूत्वा राजान्नं पिबतीति॥ एतस्यार्थस्येंद्र एवान्वि
तस्याग्नावसंभवात्॥ तत्परित्यागेनाग्नेरुचितानि कानिचिद्विशेषणान्यूहनीयानीति प्राप्ते ब्रूमः॥ इंद्रशब्दस्य कर्मसमवेतदेव
ताप्रकाशकत्वान्न स्तावकत्वमित्यस्ति तस्योहः॥ हरिवदादिशब्दा ब्राह्मणव्याख्यातगुणाभिधानद्वारेणेंद्रं स्तुवंति स्तुतिश्च वि श्रीः ६७ ११६
द्यमानगुणवद्विद्यमानेनापि गुणेन कर्तुं शक्यते॥ तस्मादग्निस्तुतिसंभवान्नास्त्यूहः॥ ॥ द्वितीयवर्णकमारचयति॥ ॥
ऊह्यं तस्यै शृंगे नो वा भाविवृत्त्या समन्वयात्॥ एकहायन्यां ऊहो नोहः साम्याद्द्वयोः स्मृतिः॥ ज्योतिष्टोमे एकहायन्या मंत्र एवमाम्ना
यते॥ इयं गौः सोमक्रयणी तया ते क्रीणामि तस्यै शृंगे तस्यै शस्तस्यै दधि तस्यै मस्तु॥ तस्या आतंचनं तस्यै नवनीतं तस्यै घृतं त

स्या आमिक्षा तस्यै वाजिनमिति तस्याद्यस्के त्वेवमाम्नातं त्रिवत्सः॥ सांड इति तस्मिन्सांडे पूर्वोक्तमंत्रश्चोदके नातिदिष्टः॥ तस्मिन्मं
त्रे पूर्वभागस्य समवेतार्थत्वादयं सांडः सोमक्रयणस्तेन क्रीणामीत्येवमूहो भवति तथैव तस्यै शृंगमित्याद्युत्तरभागेऽप्यस्त्यूहः॥ यद्य
प्येकहायन्यां शृंगादिकं न संभवति॥ तथापि त्रिचतुरवर्षोत्तरकाले भविष्यति सांडेऽपि कस्यांचिद्गवि वत्सोत्पादनेन क्षीरादिनिर्मा
ततस्तस्मिन्नपि समवेतार्थ उत्तरभाग ऊहनीयः॥ तथा सति तस्मै शृंगमित्येवं पुल्लिंगतया पठनीयमिति प्राप्ते ब्रूमः॥ एकहायन्याम
पि मुख्यतया वृत्त्या समवेतार्थत्वाभावेन स्मृतित्वात् सांडेऽपि स्मृतित्वान्नास्त्यूहः॥ ॥ सप्तदशाधिकरणमारचयति॥ ॥ दैव्या इत्यस्मि
न्मेष्यां नो वा स्मादिति पश्नक्तितः॥ अस्ति मैवं पश्वनुक्तेः पुंव्यक्तिश्च विवक्षया॥ अध्रिगुनामा दैव्याः शमितार इति प्रैषमंत्रो होत्रे पाशु
के पठ्यते॥ दैव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्या इत्यादिः॥ अतिरात्रे सवनीयः पशुरेवमाम्नायते॥ सारस्व
तीं मेष्यातिरात्र इति॥ तस्यां मेष्यामप्युदाहृतो मंत्रोऽस्ति॥ कुतः पशुधर्मविधेः सर्वपशुसाधारणत्वेनाग्नीषोमीयपशाविव मे
ष्यां संभवात्॥ ननु तस्मिन्मंत्रे आस्मा अग्निं भरतेति पुल्लिंगं चतुर्थ्यंतं पदं श्रुतं॥ तच्च न मेष्यां युक्तमिति चेत्॥ मैवं॥ अस्मै पशावि
त्युक्त्या प्रातिपदिकार्थस्य जातिमात्रस्य विवक्षितत्वादिति प्राप्ते ब्रूमः॥ पशुशब्दस्तावन्न मंत्रे पठितः तथा सति प्रयुक्त इदंशब्दः
पुरोवर्तिनीं व्यक्तिमाचष्टे व्यक्तिविशेषश्चाग्नीषोमीये पुमात्मक इति श्रूयमाणश्चतुर्थ्येकवचनाद्योत्यं लिंगमपि विवक्षितं॥ त
स्मान्न मेष्यामस्त्ययं मंत्रः॥ ननु पशुधर्मा अग्नीषोमीय एवोपदिष्टाः प्रकरणान्न तं नियच्छतीति तृतीयेऽभिहितं॥ अष्टमे त्वग्नी
षोमीयपशुः सवनीयादिपशूनां प्रकृतिरित्युक्तं॥ ततो मेष्यामयं मंत्रश्चोदकप्राप्तः पुल्लिंगं चोहनीयमिति चेत्॥ एवं तर्हि कृत्वा
चिंतास्तु॥ ॥ अष्टादशाधिकरणमारचयति॥ ॥ इरा गिरा विकल्पः स्यादुतैरेवाविशेषतः॥ आद्योऽमैवं बाधपूर्वमिराया वि
हितत्वतः॥ ज्योतिष्टोमे श्रूयते॥ यज्ञायज्ञीयेन स्तुवीतेति॥ यज्ञायज्ञेत्यनेन शब्देन युक्तायामृच्युत्पन्नं साम यज्ञायज्ञीयं॥ त
स्यामृचि गिराशब्दः पठ्यते॥ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षस इति॥ तत्र साम गायोनिगानमधीयानः संज्ञेव गणका
रेण गायंती गायिरा गिरा इति ब्राह्मणे तु गकारलोपपूर्वकमाकारयकारादिकं गानं विधीयते ऐरं कृत्वोद्गेयमिति गिराशब्दे
गकारलोपादिराशब्दो भवति॥ इरायाः संबंधि गानमैरं तादृशं कृत्वा प्रयोगकाले उद्गानं कर्तव्यमित्यर्थः॥ तत्र योनिगानब्रा
ह्मणयोः समानबलत्वेन विशेषाभावाद्विकल्पेन प्रयोक्तव्यमिति प्राप्ते ब्रूमः॥ न गिरा गिरेति ब्रूयाद्यदि रागिरेति ब्रूयादात्मान

233
1945

मेवतदुंद्गातागिरोदिति गकारसहितगानेबाधकमुक्ता गकाररहितमिरापदं गेयत्वेनविधीयते॥ तत्पदादेरिकारस्य गानाथ
माकारोयकारइकारश्चेति त्रीन्वर्णान्प्रयुंजते ततआयीरायीरेत्येवगातव्यं॥ ॥एकोनविंशाधिकरणमारचयति॥ ॥इरा
पदंनगेयंस्याद्गेयंवागीत्यनुक्तितः॥ न गेयंगीयमानस्यस्थानेपातात्प्रगीयते॥ ब्राह्मणेनविहितइराशब्दोनगातव्यः॥ कुतः॥
इरमितिशब्देनगीतेरनुक्तत्वात्॥ पाणिनीयेनविमुक्तत्वादिभ्योणितिसूत्रेणराशब्दादश्प्रत्ययोमत्वर्थीयोविहितः॥ तथा
सतीशब्दोराशपतंहत्वेत्येतावानेवार्थोभवति॥ यदिप्रगीतेराशब्दसंबंधस्तद्धितेनविवक्ष्येततदानीमाकारोयकारईकारोरेप्र
आकारश्चेत्येतैः पंचभिर्वर्णैर्निष्पन्नमायिरायीरूपंगीयमानेराशब्दप्रातिपदिकंभवतितादृशात्प्रातिपदिकात्पाणिनीयेनतद्
वाछइतिसूत्रेणप्रत्ययांतरेसत्यपीरायंकृत्वेतिब्राह्मणपाठोभवेत्॥ तस्मान्नगेयमितिप्राप्तेब्रूमः॥ गीयमानस्यगिराप
दस्यस्थानइरापदंविधीयतइतिपदमात्रस्यबाधः॥ गानंतुनबाध्यतेकिंचविमुक्तादिसूत्रेणात्प्रत्ययोपिपूर्वस्मान्मतो
छः सूक्तसाम्नोरितिसूत्रात्तामानुवृत्तेरैरंसाम्नेत्यर्थोभवति॥ सामत्वंचगीतिसाध्यं॥ यदातुतस्यविकारइत्यस्मिन्नर्थेप
प्रत्ययः॥ तदानीमिरायाविकारइतिविग्रहेयथोक्तंगानंलभ्यते॥ तस्माद्गातव्यं॥ ॥ इतिश्रीमाधवीयेजैमिनिन्यायमा
लाविस्तरेनवमाध्यायस्यप्रथमः पादः॥ ॥ द्वितीयपादस्यप्रथमाधिकरणेप्रथमवर्णकमारचयति॥ ॥ सामोक्ति
र्बृहदादौकुद्युक्तिगीतायामृचिकेवले॥ गानेवागानएवेतिस्मार्यतेसप्तमोदितं॥ सामान्यवाचीसामशब्दोविषयवाचिनोबृह
द्रथंतरादिशब्दाश्चगानमात्रेवर्त्तंते॥ नतुगानविशिष्टायामृचीत्ययंनियमः॥ सप्तमस्यद्वितीयपादेसिद्धः सोत्रवक्ष्यमा
णविचारोपयोगितयास्मार्यते॥ ॥द्वितीयवर्णकमारचयति॥ ॥ ऊहग्रंथोपौरुषेयः पौरुषेयोथवान्तिमः॥ वेदसामस
मानत्वाद्विधिसार्थत्वतोंतिमः॥ यस्मिन्ग्रंथेसामगास्तृचेऋचेसामैकेकंगायंति॥ सोयमूहग्रंथोनित्योनतुपुरुषेणनिर्मि
तः॥ कुतः अनध्यायवर्जनेनकर्तुरस्मरणेनाध्यापकानांवेदत्वप्रसिद्ध्याचवेदसामनामकयोनिग्रंथसदृशत्वादितिचेन्मै
वं॥ अपौरुषेयत्वेविधिवयर्थ्यप्रसंगात्॥ यद्योन्यांतदुत्तरयोर्गायतीतिविधीयते॥ अयमर्थः॥ अपौरुषेयत्वेनसंप्रतिप
न्नेवेदसामनामकेग्रंथेकयानश्चित्रआभुवदित्येतस्यांयोन्यामेकस्यामृचियद्वामदेव्यनामकंसामोपदिष्टं॥ तदेवोत्तरयो
र्ऋचोःकस्त्वासत्योमदानामभीषुणः सखीनामित्यनयोर्द्वितीयः तृतीययोर्गातव्यमित्ययंविधिरूहग्रंथस्यवेदत्वेव्यर्थः स्या

235
1245

न्वेदसामवेदध्ययनादेवतत्सिद्धेः उपरितनऋग्द्वयेसामोहस्यपौरुषेयत्वेपिसामस्वरूपस्यतदाधारभूतानांतिसृणा
मृचांचवेदत्वादनध्यायावर्जनीयाः॥ कर्तुरस्मरणंजीर्णकूपारामादिष्वचिरकालव्यवधानादुपपन्नं अस्मरणमूले
वाध्यापकानांवेदत्वप्रसिद्धिः॥ यथाबह्वृचाअध्यापकामहाव्रतप्रयोगप्रतिपादकमाश्वलायननिर्मितंकल्पसूत्र
मरण्येधीयानाः पंचमारण्यकमितिवेदत्वेनव्यवहरंतितद्वत्॥ नचतस्यापिवेदत्वमस्त्वितिवाच्यं॥ प्रथमारण्यकेन
पुनरुक्तत्वात्॥ अर्थवादराहित्येनब्राह्मणसादृश्याभावाच्च॥ तस्मात्पंचमारण्यकवदूहः पौरुषेयः॥ पौरुषेयस्यच
न्यायमूलत्वाद्यत्रवक्ष्यमाणन्यायविरोधस्तदप्रमाणं॥ ॥द्वितीयाधिकरणमारचयति॥ ॥ सामर्चिप्रतिमुख्यंउ
स्याद्गुणोवाबाह्यपाठतः॥ मुख्यम्भ्येमसितुंपाठोगुणोगीतास्वरैस्तुतेः रथंतरंगायतीत्यादौयज्ञांगंविहितंतदेवसा
मशब्दार्थइतिप्रतिपादितं॥ स्मारितंचतदेतज्ज्ञानमृचंप्रतिप्रधानकर्मस्यात्॥ कुतः यागप्रयोगाद्बहिरध्ययनकालेपिप
ठ्यमानत्वात्॥ गुणकर्मत्वेतुव्रीहिप्रोक्षणादिवद्यागप्रयोगमध्यएवगानमनुष्ठीयेत ततोबहिर्गानस्यविश्वजिदादि
वत्फलंकल्पनीयं॥ मध्यकालीनगानंतुप्रयाजादिवदारादुपकारकं॥ तस्मान्मुख्यमेतन्नतुगुणकर्मेतिप्राप्तेब्रूमः॥
नतावद्बहिः पाठःप्रधानकर्मत्वंकल्पयितुंशक्नोति भूमिरथिकशाक्तिन्यायेनप्रयोगपाठवायगानाध्ययनोपप
त्तेः॥ यथाभूमिरथिकोभूमौरथमालिख्याभ्यासंकरोति॥ यथावाछात्रः रुक्षेष्ट्याप्रयोगपाठवंसंपादयतितद्वत्॥
नापिगुणकर्मत्वेप्रयोगाभावात्प्रधानकर्मत्वमितिवाच्यं॥ गानेनसंस्कृतैर्ऋगक्षरैः स्तुतिसंभवात्॥ आज्यैस्तुवतेपृ
ष्ठैः स्तुवतइतिस्तुतिविधानात्॥ तस्मादृगक्षराणांस्वरविशिष्टत्वाकाराभिव्यक्तिर्दृष्टंप्रयोजनमित्यदृष्टस्याकल्प
नीयत्वात्सामगानंसंस्कारकर्म॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ अंशैः सामर्क्षुकृत्स्नंवाप्रत्यृचंतिसृभिः
कृतैः॥ अंशैर्मैवंस्तुतेरंशैरसिद्धेः प्रत्यृचंभवेत्॥ एवंसमानृचेक्रियतेस्तोत्रियामितिश्रूयते॥ तत्रमेधाविभक्तेषुसा
मांशेष्वेकैकांशएकैकस्यामृचिगातव्यः एकस्यसाम्नस्तिसृभिर्ऋग्भिर्निष्पादनस्यश्रवणादितिचेन्मैवं॥ स्तोत्रीयमि
तिस्तुतिनिष्पादकत्वंकृत्स्नस्यसाम्नोविधीयते॥ ननुसामांशानांस्तुतिर्नामगुणकथनपरमेकंवाक्यंतच्चवाक्यमे
कस्यामृचिसंपूर्णंततः कृत्स्नेनसाम्नातद्वाक्यंसंस्कार्यमितिप्रत्यृचंसामाभ्यसनीयं॥ तथासतिद्वितीयतृतीययोर्ऋ

अ० कर० माला चोस्तस्यैव साम्ना आवर्तमानतया सामांतरत्वाभावादत्र्कयनिष्पाद्यत्वमप्यविरुद्धं॥ तस्मात्प्रत्यृचं रुक्त्वं साम समाप
११८ नीयं॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ तिस्र यक्ष्य दितं साम विषमा रुक्समा रुक् वा॥ यथेलानियमादंत्यः शारले
शापनुत्तये॥ विषमछंदस्का रुक्समछंदस्का सुवातिस्र स्त्र्यक्रस्विछया साम गातव्यं॥ इछमेवेति नियामकस्य कस्यचि
दभावादिति चेत्॥ मैवं॥ शारलेशाप्रसंगस्यनियामकत्वात् शारोहिंसालेशोल्पत्वं॥ भृहिंसायालिशा अल्पीभावे॥ इत्येतद्धा
तुद्वयदर्शनात्॥ यद्यधिकछंदस्कायांयोनावुत्पन्नं साम न्यूनछंदस्कयो रुत्तरयो गीयेत॥ तदा साम्नोल्पत्वादवशिष्टऋ
ग्भागः सामरहितः स्यात्॥ तस्मात्समानछंदस्कास्वेव गेयं॥ ॥ पंचमाधिकरणमारचयति॥ ॥ छंदरुक्योरुत्तराक्त
याबीगीतेरिहोहनं अविशेषाद्विकल्पः स्याद्धत्यः संज्ञाबलित्वतः॥ सामगानामृक्पाठाय द्वौ ग्रंथौ विद्येते छंद उत्तरा चेति
॥ तत्र छंदो नामके ग्रंथे नानाभिधाना साम्नां योनिभूता एवत्तं त्र छंदो ग्रंथापेक्षया मासांतरयोर्योनित्वे रथंतरस्य स्वयो
न्युत्तरे पठिन्भवतः॥ उत्तराग्रंथापेक्षयात्वच गते द्वितीयतृतीये सयोन्युत्तरे भवतः॥ ऋचः पठिताः॥ उत्तराग्रंथे त्वचात्म
कानि पठितानि सूक्तानि॥ एकस्मिंस्तृचे छंदोगतायोनि ऋक् प्रथमाइतरे द्वे उत्तरे॥ एवं स्थिते सति रथंतरमुत्तरयोर्गाय
ति॥ यद्योन्यांतदुत्तरयो गायतीत त्र द्विविधे उत्तरे संभावितेरथंतरस्य छंदो ग्रंथे भित्वा शूररोतीयमृग्योनित्वेन पठिता
तस्या उपरित्वामिद्धि हवामहदुत्वादयो बृहदादि साम्नां योनयः पठिताः उत्तराग्रंथे त्वभित्वा शूररेति सूक्ते तस्याऋचर्
र्ध्वं नत्वावां अन्यदित्येषा साम्नः कस्यापि योनिभूता पठिता तत्र छंदो ग्रंथापेक्षया मासांतरयोर्योनिरेत्वे थंतरस्य स्वयो
न्युत्तरे पठिन्भवतः॥ उत्तराग्रंथापेक्षयात्वचगते द्वितीयतृतीये सयोन्युत्तरे भवतः॥ तत्र तृतीये स्वयोन्युत्तरे भवतः॥
तत्र विशेषनियामकाभावात् ययोः कयोश्चिदुत्तरयोर्गानमितिचेत्॥ मैवं॥ उत्तरेति संज्ञा सहसाबुध्दिरूढा भवति प्रति थीः ७
योगिनिरपेक्षत्वात्॥ पूर्वपठितां योनिमृचमपेक्ष्य यदुत्तरात्वं तद्विलंबेन प्रतीयमानत्वाद्दुर्बलं॥ ईदृशा मेवोत्तरत्वं छं ११८
दसि पठितयोः स्वयोन्यंतरभाविन्योः समांतरयोन्याद्वयोर्ऋचोः तृचत्वयोस्तु द्वितीयस्तृतीययोरुत्तरात्वं संज्ञया वर्त
ते॥ अतस्तयोरेव गानं॥ एवं सति पूर्वाधिकरणनिर्णीतं समास्वेव गानमनुग्रहीतं भवति किंच तृचात्मके पुसूक्तेषु या
प्रथमा योनिभूता तं नाम्ना छंदोग्रंथस्य योनिग्रंथ इत्य व्यापकसमाख्या॥ इतरस्य तु तृचं संघरूपस्य ग्रंथस्याप

237
1945

रितनयोर्ऋचोर्नामधेये नोत्तरेति समाख्या स एव ग्रंथः॥ कर्मांगसमर्पकं प्रकरणं पंचदश सप्तदशादि स्तोमानां तृचेष्व
वोपन्नं॥ तस्मादुत्तराग्रंथस्थयोः तृचगतयोर्द्वितीयतृतीययोरयमूहः॥ ॥ द्वितीयवर्णकमारचयति॥ ॥ त्रैशोकेतिजगत्यो
द्वे आनेयंगीत यथवा॥ बृहत्यावाद्विमः सम्यानोत्तरात्वश्रुतेर्बलात्॥ द्वादशाहे चतुर्थेहनि त्रैशोकनामकं साम विहितं॥ तच्च
विश्वाः पृतनाइत्येतस्यामृधि जगत्यामुत्पन्नं तस्मिंश्च तृचे तस्या योने रुत्तरे द्वे बृहत्यौ नेभिंनमंतीत्यादिके आम्नायते॥ तत्र
बृहत्या उपेक्ष्यतयोः स्थाने द्वे उत्पत्तिसिद्धे अतिजगत्यावानीयतां रुक्तिसृषु गेयं तथा सति समास्क्रगानं पूर्वत्रनिर्णीतमनुगृह्य
ते॥ अतिजगतीषु सक्रुवंतीति श्रूयमाणमतिजगतीबहुत्वमन्यथा नोपपद्यतेति चेत्॥ मैवं॥ उत्तरयोर्गायतीत्युक्तस्य संज्ञा
रूपस्योत्तराशब्दस्याधीयमानयोर्बृहत्योर्मुख्यत्वात्॥ श्रुतिश्च बहुत्वलिंगात्समास्क्रगानमिति न्यायाच्च बलीयसी यदेतद
तिजगतीबहुत्वं तद्बृहत्योः स्वीकारेप्युपपद्यते॥ एकविंशस्तोमस्यात्र विहितत्वेन तत्सिद्धये प्रथमाया अतिजगत्याः सप्तकृत्व
आवर्तनीयत्वात्॥ तस्मात्त्रैशोकं साम बृहत्योरूहनीयं॥ ॥ षष्ठाधिकरणे प्रथमवर्णकमारचयति॥ ॥ रथंतरे ककुप् प्राह्या
प्रथ्यावाच्यार्थवत्यतः॥ पुनर्यदा प्रसिद्ध्यादेरंत्योर्थोत्यत्रवीक्ष्यतां॥ इदमाम्नायते॥ नवै बृहद्रथंतरमेकछंदो यत्तयोः पू
र्वा बृहती ककुभावुत्तरे इति॥ अयमर्थः॥ बृहद्रथंतरं तदेतत्साम द्वयमितरसामवेदकछंदस्कं न भवति॥ यस्मात्कारणात्तयो
बृहद्रथंतरसाम्नोराश्रयभूता ऋक् पूर्वा बृहती छंदस्का उत्तरे तु द्वे ऋचौ ककुप् छंदस्के॥ इतरेषां वामदेव्यादि साम्नामाश्रयत्
वेचति स्त्र ऋच एकश्छंदस्का उत्तराग्रंथे आम्नाताः सरसलेशपरिहाराय समास्क्रगायेदिति न्यायेन निर्णीताच॥ इह तु वाच
निकं विषमश्छंदस्कास्क्रगानमिति॥ तत्र रथंतरस्याश्रयतया तृचो नोत्तराग्रंथे समाम्नातः किंतर्हि प्रगाथस्तदाश्रयत्वे
नाम्नातः स च द्वाभ्यामृग्भ्यां निष्पन्नत्वान्नतृचो भवति॥ तयोश्च द्वयोर्ऋचोरभित्वा शूरेत्येषा प्रथमा सा च बृहती॥ न
त्वावां अन्योदिव्यरात्येषा द्वितीया सा च पंक्तिछंदस्का॥ तथा सति तां पंक्तिमपनीय तस्याः स्थाने दाशात यी गते द्वे उत्पत्ति
ककुभावृचौ गृहीतव्यौ॥ ॥ कुतः॥ अर्थबलात्॥ उदाहृते न ककुभाउत्तरे इति वाक्ये रथंतरसाम्न आश्रयत्वेन ककुभौ
विनियुज्यमानत्वात् ककुबुत्पत्तिरर्थवती भवति॥ अन्यथा वैयर्थ्यं स्यात्॥ किंचाम्नातायाः एकस्याः पंक्तेः स्वीकारे स
तृचो द्वयोरेवलाभादेकं साम तृचे क्रियते स्तोत्रीयमिति न वचनं विरुध्येत॥ तस्माद्रथंतरसाम्नि द्वे ककुभावुत्तरे गृहीत

थे॥ अयमेवन्यायो बृहत्साम्न्यपि योजनीय इति प्राचेन्नूमः॥ आम्नातयोर्बृहतीपंक्त्योरेव ककुप्प्रथनीया॥ तथाहि॥
अभि त्वा शूर नोनुम इत्येषा बृहती प्रथमा स्तोत्रीया तस्यामविकृतायामेव रथंतरं गातव्यं॥ ततस्तस्यामृचि चतुर्थं पादं पुनरुपा
दायोत्तरस्याः पंक्तेः पूर्वार्द्धेन सग्रहथनीयं॥ सेयमष्टाविंशत्यक्षरा त्रिपादा द्वितीया स्तोत्रीया साचैका ककुप्संपद्यते॥
अनेन प्रग्रथप्रकरणेद्वयोर्ऋचोराम्नातयो× तस्यां ककुभि चरमं पादं पंक्तेरुत्तरार्द्धेन संहत्य ग्रथ्यतीत्येया स्तोत्रीया कर्तव्या
साच द्वितीया ककुप्संपद्यते× स्तृचनिष्पत्तेर्नास्त्येकवचनविरोधः॥ अस्मिंश्च ग्रथने पुनः पदेति श्रौतो क्ति र्लिगं॥
तथाच श्रूयते॥ एषा वै प्रतिष्ठिता बृहती या पुनः पदा तद्यत्पदं पुनरारभेते तस्माद्वत्सो मातरमभिहिंकरोतीति॥ अयमर्थः॥
या बृहती पुनः पदा भवति॥ सैषा प्रतिष्ठिता स्थिरा भवति पदेश्चतुर्थः पादः सहितऋगंतरसंपादनाय पुनः पठ्यते॥ ततः सा
बृहती पुनः पदा सेयमृग्माता तस्याः पादो वत्सः तथा सति यस्मादत्र चतुर्थं पादमृक्माता पुनरारभते॥ तस्माल्लोके वत्सो मा
तरमभिलक्ष्य हिमिति शब्दं करोतीति न केवलं लिंगानि मात्रेण प्रग्रथनं किंतु छंदोगानां प्रसिद्धापि तेष्वेवं स्मरंति॥ काकु
भः प्रगाथ इति किंच प्रगाथशब्दार्थपर्यालोचनेनापि ग्रथनं गम्यते॥ प्रकर्षेण गानं यत्र स प्रगाथः प्रकर्षो नामाम्नाताद्दृ
क्पाठादाधिक्यं तच्च पूर्वोक्तरीत्या पादाभ्यासपुरःसरमृगंतरसंपादनेनोपजायते॥ तस्मान्नोत्पत्तिककुभो ग्रहीतव्ये किं
तर्हि प्रग्रथने नद्वे उत्तरे ककुभौ संपाद्य तास्वपि स्तृषु रथंतरं गातव्यं॥ तथा बृहदपि॥ एवं सति पंक्तेः पाठः सार्थो भवति
नचैकं ककुप्त्वेनैवेयर्थ्यमिति शंकनीयं॥ वाचस्तोमे तदुपयोगात्॥ तस्मान्न कापि प्रग्रथने नुपपत्तिः॥ ॥ द्वितीयव
र्णकमारचयति॥ ॥ यौधाजये रौरवे च बृहत्योराग मोथवा॥ ग्रथनं पूर्ववत्पक्षौ षष्ठिर्लिंगमिहोच्यते॥ इदमाम्नायते॥
रौरवयौधाजये बार्हते तृचे भवत इति॥ अयमर्थः॥ रौरवनामकं किंचित्साम तथा यौधाजयनामकमपरं तयोर्द्वयोः सा
म्नोर्बृहती छंदस्कस्तृच आश्रय इति उत्तराग्रंथे तु तस्य सामद्वयस्याश्रय एकः प्रगाथ आम्नातः तस्मिंश्च प्रगाथे पुना श्रीः॥
नः सोमेत्यसावृथेक् प्रथमा साच बृहती॥ दुहान ऊधर्दिव्यमित्यसावृक् द्वितीया सातु विष्टारपंक्तिः तामेतां विष्टारपंक्ति ११८
मपनीय तस्याः स्थाने उत्पत्तिः बृहत्योर्द्वे ऋचावानेतव्ये इति पूर्वः पक्षः॥ बृहतीविष्टारपंक्त्योः प्रग्रथनविशेषणद्वे बृह
त्यावुत्तरे संपादनीये इति राद्धांतः॥ तत्रोभयत्र युक्तिः पूर्वन्यायेन द्रष्टव्या लिंगं त्वेवमाम्नायते॥ षष्टिस्त्रिष्टुभो माध्यंदि
नं सवनमिति॥ अयमर्थः॥ रौरवयौधाजयनामके सामनी माध्यंदिनसवने गीयेते तस्मिंश्च सवने त्रिष्टुप्छंदस्का ऋचः

239
1945

षष्टिर्भवंतीति॥ सेयं षष्टिसंख्या ग्रथनपक्ष उपपद्यते॥ तथाहि माध्यंदिनसवने पवमानस्य पृष्ठस्तोत्राणि चत्वारि पव
माने त्रीणि सूक्तानि॥ उच्चा ते जातमित्येकं सूक्तं॥ तत्र गायत्र्यस्तिस्र ऋचः॥ पुनानः सोमेति द्वितीयं सूक्तं॥ तच्च प्रगाथरूपं
तत्र पूर्वा बृहती॥ उत्तरा विष्टारपंक्तिः प्रतु द्रवमिति तृतीयं सूक्तं॥ तत्र त्रिष्टुभस्तिस्रः पृष्ठस्तोत्रे ष्वभि त्वा शूरेति प्रगा
थरूपं प्रथमं सूक्तं॥ तत्र पूर्वा बृहती उत्तरा पंक्तिः कया नश्चित्र इति द्वितीयं॥ तत्र तिस्रो गायत्र्यः॥ तं वो दस्ममृचीषहमि
ति तृतीयं॥ प्रगाथरूपं तत्र बृहतीपंक्त्योः न रो भिर्वो विदद्वसुमिति प्रगाथरूपं चतुर्थं तत्रापि बृहतीपंक्त्यो एवमस्मिन्सव
ने सप्त सूक्तानि तेषु नव सामानि गेयानि॥ प्रथमे सूक्ते गायत्रसामहीयवं चेति द्वे सामनी द्वितीये रौरवं यौधाजयं च तृती
ये औशनं॥ चतुर्थे रथंतरं॥ पंचमे वामदेव्यं॥ षष्ठे नौधसं॥ सप्तमे कालेयं॥ तत्र प्रथमसूक्तस्य सामद्वयनिष्पत्तये द्विरा
वृत्ता वाश्रयभूता ऋचः षड्गायत्र्यो भवंति॥ पंचमसूक्तगता वामदेव्यसामाश्रयभूतास्तिस्र ऋचः सप्तदशस्तोमसिद्ध्यर्थ
मावर्त्यमानाः सप्तदश गायत्र्य इत्येवं मिलित्वा त्रयोविंशति गायत्र्यः षष्ठे सूक्ते बृहतीपंक्त्योः प्रग्रथनेन बार्हतस्तृचो भव
ति॥ तथा सप्तमेपि॥ तत्रोभयत्र सप्तदशस्तोमे सति चतुस्त्रिंशद्बृहत्यो भवंति॥ चतुर्थसूक्ते रथंतरसामार्थं पूर्ववर्णकोक्तनी
त्या प्रग्रथने सति द्वे ककुभावुत्तरे भवतः॥ प्रथमा तु स्वतः सिद्धा बृहती॥ तत्र सप्तदशस्तोमे कृते सति पंचभ्यो द्वादश ककुभ
श्च संपद्यंते॥ तस्य च स्तोमविधायकं ब्राह्मणमेवमाम्नायते॥ पंचभ्यो हिंकरोति स तिसृभिः स एकया स एकया पंचभ्यो
हिंकरोति॥ स एकया स तिसृभिः स एकया स पंचभ्यो हिंकरोति स एकया स तिसृभिः स तिसृभिरिति॥ अयमर्थः॥ एका स्व
तः सिद्धा बृहती प्रग्रथिते द्वे ककुभावित्येवंविधस्तिसृभिः पर्याये रावर्तनीयाः प्रथमे पर्याये त्रिर्बृहती गातव्या सकृ
त्सकृत्ककुभौ द्वितीये पर्याये सकृद्बृहती त्रिवारमनंतरा ककुप् सकृदंत्या ककुप् तृतीये सकृद्बृहती त्रिस्त्रिः ककुभाविति
हिंकरोति हिंकारोपलक्षितं गानं कुर्यादित्यर्थः॥ तदेवं तृतीयसूक्तव्यतिरिक्तेषु षट्सूक्तेषु त्रयोविंशति गायत्र्यः पंच
चत्वारिंशद्बृहत्यो द्वादश ककुभः संपन्नाः॥ तत्र ककुबष्टाविंशत्यक्षरा॥ तस्यां षोडशाक्षरे गायत्रीपादद्वये वर्जिते चतु
श्चत्वारिंशदष्टाक्षरा त्रिष्टुप् संपद्यते॥ अनया दिशा द्वादशानां ककुभां त्रिष्टुप्त्वं संपादयितुं चतुर्विंशति गायत्रीपादा यो
जनीयास्तथा सत्यष्टौ गायत्र्यो गताः पंचदश गायत्र्यो वशिष्यंते॥ तासां पंचचत्वारिंशत्पादाः॥ ताश्च नावशीषु बृहतीषु

संयोज्यत्रिष्टुभः संपादनीयाः पंचचत्वारिंशात्कप्रनिष्पन्नाद्वादशात्तृतीयसूक्तेस्वतः सिद्धास्तिस्त्रइत्येवं प्रग्रथनपक्षेपष्ठीः
स्त्रिष्टुभउत्तराग्रंथेसमाम्नाताएवलभ्यंतेउत्पत्तिबृहत्यानयनेतुप्रकरणाम्नातानांतावतीनामलाभात्प्रकृतहाना प्रकृत
प्रक्रियेप्रसज्येयातांतस्मात्त्रिष्टुभः षष्टिरित्येतद्बृहतीप्रग्रथनस्यलिंगं प्रग्रथनप्रकारस्त्वभिधीयते॥ पुनानः सोमेते
तस्योबृहत्याश्चतुर्थपादंपुनरुपादायद्विरभ्यस्यउंधद्विव्यमित्येतस्याविष्टारपंक्तेः पूर्वार्द्धेनसंयोजयेत्॥ साबृहतीभ
वति॥ तदायंचतुर्थपादंद्विरभ्यसोत्तरार्द्धेनयोजयेत्॥ सापिबृहतीभवति॥ तस्मात्योधाजयरोरवयोर्बृहत्योउत्तरेग्रंथनी
ये॥ एवंनोधसकालेययोरपिद्रष्टव्यं॥ ॥ तृतीयवर्णकमारचयति॥ ॥ श्यावाश्वांधीगवेनुवानेयाग्रथ्यतेथवा॥
पुरेवलिंगंजगतीचतुर्विंशतकीर्तना॥ इदमाम्नायते॥ पंचछंदाआवापआर्भवः॥ पवमानः सप्तसामगायत्रसंहितेगा
यत्रेतृचेभवतः श्यावाश्वांधीगवेआनुष्टुभेतृचेभवतः॥ उष्णिहिशार्ककुभिपौष्कलंकावमंत्यंजगतीष्विति॥ अयमर्थः॥
अस्तितृतीयसवनेपवमानआर्भवसंज्ञकः॥ तस्मिन्पंचसूक्तानिसप्तसामानि॥ स्वादिष्ठयामदिष्ठयेत्येकंसूक्तं॥ तस्मिन्
यत्र्यस्तिस्त्रऋचः तासुगायत्रंसंहितंचेतिद्वेसामनी॥ पुरोजितीवोअंधसइतिसूक्तांतरं॥ तत्रैकानुष्टुप्उत्तरेद्वेगाय
त्र्यौतासुश्यावाश्वमांधीगावंचेतिद्वेसामनी॥ इंद्रमच्छसुताइत्यपरंसूक्तंतस्मिन्नुष्णिहस्तिस्त्रः॥ तासुशार्कंसामपवस्व
मधुमत्तमइतिप्रगाथः॥ तस्मिन्पूर्वाककुप्उत्तरापंक्तिः॥ तत्रपौष्कलंसामअभिप्रियाणिपवतेचनोहितइत्यनयोः॥
सूक्तयोः यद्यपिद्वेद्वेछंदसीतथापिसामसुगानंनिष्पादयितुंप्रग्रथनेकृतेसत्येकैकमेवछंदः संपद्यते॥ ततोगायत्र्य
नुष्टुबुष्णिक्ककुप्जगतीभिः पंचछंदाः पवमानेस्मिन्सवनआवपनीयइति॥ तत्रपुरोजितीवइत्यस्मिन्सूक्तेश्यावा
श्वमांधीगवंचसमासुगातुमुत्तरेगायत्र्यावाम्नातेपरित्यज्यद्वेउत्पत्त्येनुष्टुभावानेतव्येइतिपूर्वः पक्षः॥ चतुर्थपा
दंपुनरुपादायद्वेअनुष्टुभौग्रथनीयेइतिराद्धांतः॥ तत्रोभयत्रपूर्ववर्णकद्वयन्यायेनयुक्तिः द्रष्टव्या लिंगत्वेवमा
म्नायते॥ चतुर्विंशतिर्जगत्यस्तृतीयसवनएकाचककुबितिसेयंसंख्याप्रग्रथनउपपद्यते॥ तथाहिगायत्रसंहित
योः साम्नोराश्रयेगायत्रेतृचेद्विरभ्यस्तेसतिपड्गायत्र्योभवंति॥ चतुर्विंशत्यक्षरागायत्री॥ अष्टाचत्वारिंशदक्षराज
गती॥ ततः पड्भिर्गायत्रीभिस्तिस्त्रोजगत्योभवंतिश्यावाश्वांधीगवयोराश्रयभूताः प्रग्रथिताद्विरभ्यस्ताः षड्नुष्टु
भोभवंतिमिलित्वासप्तजगत्यः संपन्नाः सफलस्यपौष्कलस्यचसामांतरवत्तृचेगानंनकर्त्तव्यं॥ किंत्वेकैकस्यामृचि

श्री१२
१२०

नतुनोवगम्यते॥ उष्णिहिककुभीतिसप्तम्येकवचनांताभ्यांविशेषविधानात्॥ तत्राष्टाविंशत्यक्षरायोरुष्णिक्ककुभोरेकाज
गतीगायत्रीपदश्चसंपद्यते॥ ककुभिमध्यमः पादोद्वादशाक्षरः उष्णिहिचपरपादइतितयोर्भेदः कावयस्याकावयस्याश्र
यभूताः स्वतः सिद्धास्तिस्रोजगत्यः इतिमिलित्वापवमानेस्मिन्नेकादशजगत्योभवंति॥ गायत्रीपादश्चातिरिच्यते॥ आर्भ
वपवमानवत्तृतीयसवनेयज्ञायज्ञीयस्तोत्रमेकमस्ति॥ तस्याश्रयोयज्ञायज्ञावोअग्नयइत्यसौप्रगाथः॥ तत्रपूर्वाबृह
तीउत्तराविष्टारपंक्तिः तयोः प्रग्रथनेनककुभावुत्तरेकर्तव्ये॥ तत्रैकविंशस्तोमः तस्याविधायिकाविष्टुतिरेवमाम्नातेय
सप्तभ्योहिंकरोतिसतिसृभिः सतिसृभिः सएकयासप्तभ्योहिंकरोतिसएकयासतिसृभिः सतिसृभिः सप्तभ्योहिंकरोतिस
तिसृभिः॥ सएकयासतिसृभिरिति॥ अयमर्थः॥ प्रथमायांबृहत्यांस्त्रिमुपर्यायेषुक्रमेणात्रिवारमेकवारंपुनस्त्रिवार
मितिसप्तबृहत्यः॥ मध्यमायाः ककुभः॥ प्रथमद्वितीययोः त्रिस्त्रिः पाठः अंत्येसकृत्उत्तमायाः ककुभः आदौसकृद्द्वितीय
तृतीययोस्त्रिस्त्रिभिरित्येवंचतुर्दशककुभः तासुककुप्सुद्वादशाक्षरंमध्यमपादाश्चचतुर्दशतेषुसप्तपादाः सप्तसुबृहती
षुयोजनीयाः ततः सप्तजगत्योभवंति॥ अवशिष्टाष्टाक्षराः ककुभामादिपादाअंत्यपादाश्चमिलित्वाष्टाविंशतिः तेषु
पड्भिः पादैरेकाजगतीत्यनेनक्रमेणचतुर्विंशतिपादैश्चतस्रोजगत्योभवंति॥ येतुद्वादशाक्षराः सप्तपदाः पूर्वमवशिष्टाः ते
षुपवमानशेषाष्टाक्षरः पादोयोजनीयः ककुभांशेषष्वष्टाक्षरेषुचतुर्षुपादेषुयानिचत्वार्यक्षराणितान्यतउद्धृत्यपूर्वत्रयो
जनीयानितेद्वेजगत्यौभवतः तदेवंयज्ञायज्ञीयस्तोत्रेत्रयोदशजगत्यः पूर्वोक्ताः पवमानगताएकादशेतिचतुर्विंशतिजगत्यः
चतुरक्षरवर्जिताश्चत्वारोष्टाक्षरपादामिलित्वाककुबेकाभवति॥ अनेनलिंगेनश्यावाश्वमांधीगवंचेतिग्रथितेतृचेगातव्ये॥
नतुतत्रोत्पत्त्यनुष्टवानयनमितिस्थितं॥ ॥ चतुर्थवर्णकमारचयति॥ ॥ चतुःशतेप्रग्रथनमृचः पादस्यवाग्रिमः॥ तृ
चेमुख्यत्वतोमेवमृगन्यत्वस्यवर्णनात्॥ गवामयनेश्रसामविहितंअभीवर्त्तोब्रह्मसामभवतीतितत्प्रकृत्यश्रूयते॥ चतु
शतमैंद्राबार्हताः प्रगाथाइतिचतुरुत्तरशतसंख्याकाइंद्रदेवताकाबृहतीछंदस्काः प्रगाथाऋग्द्वयात्मकाः तेष्वेकप्रगाथ
गतेद्वेऋचौद्वितीयप्रगाथगतामेकामृचंचप्रग्रथ्यतृचेभीवर्त्तनामकंसामगातव्यं॥ तथासत्याम्नातामविकृतानामेवति
सृणामृचांलाभात्तृचस्यमुख्यत्वंभवति॥ पूर्वोक्तरीत्यापादप्रग्रथनेतुविकृतत्वादमुख्यस्तृचः स्यादितिप्राप्तेब्रूमः॥ अन्या

241
1945

अन्याऋचोभवंतितदेवसामेतच्चामन्यत्वमत्रवर्ण्यते॥ नच्चपादप्रग्रथनेसंभवतिऋगप्रग्रथनेतुयेयमृक्पूर्वस्यतच्चस्यां
त्यासैवोत्तरस्याद्येत्यन्यत्वमृचोनस्यात॥ तस्मात्पादस्यप्रग्रथनं॥ ॥ सप्तमाधिकरणकमारचयति॥ ॥समुच्चयाविकल्पा
वाविभिन्नागीतिहेतवः॥आद्यः प्रयोगग्रहणादर्थकत्वाद्विकल्पनं॥ छांदोग्यतलवकारादिशाखाभेदेषुविलक्षणागीतिहेत
वोक्षरविकारादयआम्नायंते॥ तेसर्वेकर्मानुष्ठानेसमुच्चेतव्याः॥ कुतः प्रयोगवचनेनसर्वेषांपरिगृहीत्वात॥ मैवं॥ एकैकशा
खोक्तैरेवाक्षरविकारादिभिरध्ययनकालइवगीतिस्वरूपनिष्पत्तेस्तन्निष्पत्तिलक्षणस्यप्रयोजनस्यैकत्वात्प्रयोगवचनपरि
गृहीताअपिव्रीहियववद्बृहद्रथंतरवच्चविकल्प्यंते॥ ॥अष्टमाधिकरणमारचयति॥ ॥ऋक्सामाभ्यांविकल्पेनस्तुतिःस
म्नैवबाम्रिमः॥ पुरवंमेवमृग्भिदासासप्राशस्त्यदर्शनात॥ कचित्कर्मविशेषेश्रूयते॥ ऋचास्तुवतेसाम्नास्तुवतइति॥ तत्रपूर्वन्या
येनविकल्प्यइतिचेत।मैवं॥ ऋग्भिदासामप्रशंसयोर्वाक्यशेषेवगमात॥ यदृचास्तुवतेस्तदसुराअन्ववायंन्यत्साम्नास्तुवतेतदासु
राअनान्ववायंन्यएवंविद्वान्साम्नास्तुवीतेत्यृचंनिंदित्वासामप्रशस्यलिङ्प्रत्ययेनसमविहितंतस्मात्साम्नैवस्तोतव्यं॥ ॥द्विती
यवर्णकमारचयति॥ ॥ गानस्यनियमोनोतविद्यतेवद्भूपस्थितो॥नाम्नातद्वयतोस्येषप्रकृतिलाघ्वोरपि॥ कचित्कर्मवि
शेषश्रूयते॥अयंसहस्रमानवइत्येतयाहवनीयमुपतिष्ठतइति॥ असावृगप्रगीतासंहितायंथेसमाम्नाताप्रगीतामामग्रंथेत
तोवक्तरूपस्थानेतस्यामृचिगानंननियतेकिंतुविकल्पितमितिप्राप्तेब्रूमः॥ अस्त्येवनियमोगाने॥ कुतः सामवेदेगानस्यैवप्र
कृतत्वात॥ ऋचांसंहितापाठोत्रगानायैवनत्वाधारमंतरेणगातुंशक्यते॥ अथोच्यते॥ अयंसहस्रमित्यृक्प्रतीकपूर्वकेणवा
क्येनोपस्थानविधानाद्वाक्यस्यप्रकरणत्वात्प्रबलाद्दर्चैवोपस्थानमिति॥तन्न। प्रकृतप्रगीतवाचिन्याएतयेतिसर्वनामश्रु
तेः प्रबलतरत्वात॥ तस्मात्प्रगीतयोपस्थानं॥ ॥ तृतीयवर्णकमारचयति॥ ॥त्रैस्वर्यादिसमुच्चेयंविकल्प्यंतोनएववा अ०१२
प्रयोगादर्थतोद्वेनोवचनात्स्मृतिकल्पितात॥ अग्निर्मूर्धेत्यादियाज्यापुरोनुवाक्यादयोमंत्राः सामप्रसंगाद्विचार्यंतेतेचक १२१
स्यांचिच्छाखायांत्रैस्वर्येणाधीयंते॥ कैश्चिच्चातुस्वर्येषाउदात्तानुदात्तस्वरितेभ्योव्यतिरिक्तश्चतुर्थस्वरएकश्रुतिः॥ तौ
चाध्यापकाः प्रचयइत्याचक्षते॥तत्रप्रयोगवचनस्यसर्वांगोपसंहारित्वात्समुच्चयस्त्रैस्वर्यादीनामित्येकः पक्षः॥अध्य
यननिवृत्तिलक्षणस्यप्रयोजनस्यैकत्वाद्विकल्पइतिद्वितीयः पक्षः॥नैतौद्वौपक्षौयुक्तौएकश्रुतेर्व्याकरणस्मृतौविहित
त्वात॥ तथाचपाणिनीयंसूत्रं॥ यज्ञकर्मण्यजपन्यूंखसामस्विति॥ अग्निंमूर्धामिसूर्यमित्यादयोमंत्राःयजमानेनैवजे

243
1945

प्यंतेन्यूंखाः प्रणवाः॥सामानिरथंतरादीनि॥एतेभ्योजपादिभ्योव्यतिरिक्तानांमंत्राणांयज्ञकर्मण्येकश्रुतिर्भवति॥अनया
चस्मृत्यानुमितंवेदवाक्यमेततत्तानोयज्ञकर्मणीति॥तानइत्येकश्रुतेः॥पूर्वाचार्यसंज्ञा॥ नचैकश्रुतित्वेस्वराध्ययनंव्यर्थमि
तिवाच्यं॥ स्वरविशेषेणबहुव्रीहितत्पुरुषसमासादिनिश्चयेसत्यर्थविशेषस्यावबोद्धुंशक्यत्वात॥ जपादिषुतुयथाध्ययनं
स्वरः प्रोक्तव्यः॥ ॥नवमाधिकरणमारचयति॥ ॥आयीभावोयोनिवशादुत्तरावर्णलोथवा॥ गीत्यर्थत्वादादिमोंत्योवर्णाभि
व्यंजकत्वतः॥ यद्योन्यांतदुत्तरयोर्गायतीतिश्रूयते॥ तत्रकयानश्चित्रआभुवदित्यसाऋग्योनिः तस्यामृचिकयेत्यक्षरद्वयमा
द्योभागः॥नश्चित्रआभुवदित्यक्षरषट्कंद्वितीयोभागः॥ तस्मिन्भागेद्वितीयाक्षरेवकारस्योपरितनमिकारंविलोप्यतस्यस्थान
आयीभावमाम्नायगीतिर्निष्पादिताकस्त्वासत्योमदानामित्यनंतरभाविन्युत्तरा॥ तस्यांयोनिन्यायेनचतुर्थाक्षरेतकारस्योप
रितनंयकारमोकारंचविलोप्यतयोः स्थानआयीभावः कर्तव्यः॥अभीषुणइत्यासावपरोत्तरा॥ तस्यामपिचतुर्थाक्षरेणकारस्यो
परितनमस्कारंलोपयित्वातस्यस्थानआयीभावःकार्यः॥अन्यथागीतिनाशप्रसंगादितिप्राप्तेब्रूमः॥ नात्रयोनोवर्णांतरस्या
गमः॥ कुतः॥ किंतर्हिविद्यमानएवचकारस्योपरितनइकारः सामप्रसिद्धयाप्रक्रिययादृढः सन्नैकारोभवति॥ तस्यसंध्यक्ष
रत्वादकारः पूर्वभागः॥ईकारउत्तरभागः तौउभौविश्लेषेणगीयमानवायीभावंप्रतिपद्यते॥ तथाचसामगाआहुः॥ स्हंता
लव्यमायीभवति॥ तथासत्युत्तरयोश्चतुर्थाक्षरेणाश्रितालव्यइकारइत्यायीभावोनकर्तव्यः॥ अभीषुणः सखीनामवितांजरितॄ
णामित्येतस्यामुत्तरायांद्वादशाक्षरगतस्वरेकस्योपरितनइकारः पूर्ववदायीभवति॥ सोयमायीभावउकारीत्यावर्णाभिव्यंजक
त्वादुत्तरागतवर्णवशेनकर्तव्यः॥ गीत्यर्थताभावेनयोनिक्रमेतेनविनापिनगीतिर्विनश्यति॥ ॥दशमाधिकरणमारचयति॥
॥ ॥स्तोभानोतप्रदिश्यंतेनागीतित्वेनवर्णवत॥ स्वरादिवत्प्रदिश्यंतेगीतिकालोपयोगतः॥ वामदेव्यसाम्नोयोनोद्वयोरद्व
योर्मध्येउकारद्वयेनहोशब्देनहायीशब्देनचनिष्पन्नस्तोभएवाम्नातः॥ ओहायीतिसोयंस्तोभोनोत्तरयोरतिदिश्यते।कुतः
अगीतित्वात॥ यद्योन्यांतदुत्तरयोर्गायतीतिगीतिमात्रमतिदिश्यते॥ तत्रप्रथमायाऋचोवर्णायथानातिदिश्यंतेतथास्तो
भाअपीतिप्राप्तेब्रूमः॥ स्वसवर्णविश्लेषाविरामइत्येतेगीत्युपयोगित्वात॥ यथातिदिश्यंते॥ तथास्तोभाअपिगीतिकाले
परिच्छेदकत्वादतिदिश्यंते॥ ॥एकादशाधिकरणमारचयति॥ ॥स्तोभस्यलक्षणंनास्तिकिंवास्तिनविवर्णित॥अधि

स्यमप्यतिव्याप्तं विशिष्टं लक्षणं भवेत्॥ नतावद्विवर्णत्वं तल्लक्षणं वर्णविकारस्याविपरीतवर्णत्वेन स्तोभत्वप्रसंगात्॥ अग्न आयाहीत्यस्यामृचि आकारस्य स्थाने ओकारं कृत्वा गायंति ओयाहि॥ अधिको वर्णः स्तोभ इत्युक्ते सत्याभासेति व्याप्तिः॥ पिबा सोममिंद्र मंदतु त्वेत्येतस्यामृचि दतु त्वेत्यक्षरत्रयं गानकाले त्रिरभ्यस्तं अतो विकाराभ्यासयोरतिव्याप्तिर्नास्ति लक्षणमिति चेत्॥ मैवं॥ अधिकत्वे सत्यविलक्षणवर्णः स्तोभ इति विशिष्टस्य तल्लक्षणत्वात्॥ लोकेपि सस्मायां विप्रलंभकेनोच्यमानं रूपं तात्पर्यानन्वीतं कालक्षेपमात्रहेतुं शब्दराशिं स्तोभ इत्याचक्षते॥ तस्मादस्ति लक्षणं॥ ॥ द्वादशाधिकरणमारचयति॥ ॥ नस्युः स्युर्वात्र नीवीवाराश्रीहिस्थाने मितेनहि विकारतद्धितान्तेस्कः प्रोक्षणादिरतो भवेत्॥ माध्यान्नानरवषृतत्व परिधीरापदे स्यपि॥ ये धर्माः षडहादीनां ते कार्या स्थानपाततः॥ अथ संस्कारोहः॥ वाजपेये नैवारश्चरुः श्रुतः तत्र नीवाराणां व्रीहिस्थानपाते प्रमाणभावात्॥ व्रीहिधर्माः॥ प्रोक्षणावघातादयो नीवारेषु न कर्तव्या इति चेत्। मैवं॥ नैवार इत्यस्याविकारार्थतद्धितस्य व्रीहिस्थानीयत्वे प्रमाणत्वात्॥ यथा व्रीहयस्तंडुलद्वारेण हविर्निष्पादनसाधनं तथा नीवारा अपि तस्मात्संति प्रोक्षणादयः॥ अयं न्यायो मध्यान्नानादौ योजनीयः॥ संस्थिते पृष्ठ्ये षडहे मध्वाश्नाये घृतं वेत्यत्र षडहधर्मा व्रतनियमादिधर्मा मधुत्राने कर्तव्यः॥ राजसूये नैऋतं चरुं नखावपूतानामित्यत्रोलूखलमुसलयोर्धर्माः प्रोक्षणं नखेषु कर्तव्यं॥ ॥ चातुर्मास्येषु परिधौ पशुं नियुंजीतेत्यत्र यूपधर्माः॥ पशुं नियोजनं विस्पष्टमेव परिधौ श्रुतं॥ ज्योतिष्टोमे ऐरं कृत्वोद्गेयमित्यत्र गिरापदधर्मे आयीभावादिरिरापदे कर्तव्यः॥ ॥ त्रयोदशाधिकरणमारचयति॥ ॥ न यूपधर्माः परिधौ संति वान्यार्थकत्वतः॥ नाविरोधार्दजनाद्याः स्युर्नियोजनसाधने॥ चातुर्मास्येषु यूपकार्ये पशुनियोजनं स्थविष्ठमध्यमपरिधावाम्नायते॥ परिधौ पशुं नियुंजीतेति तत्र नियोजनकार्येण परिधेर्यूपस्थानीयत्वेपि न यूपधर्मास्तक्षणादयोऽञ्जनादयश्च तत्र युक्ताः। कुतः॥ अग्निपरिधानार्थं मध्यमपरिधेरितरपरिधिवदुत्पन्नत्वादिति चेत्॥ बाढं॥ मत्यार्थमुत्पन्नस्यापि वचनान्नियोजनत्वसाधनत्वमस्ति॥ यूपोपि पशुनियोजनार्थं संस्क्रियते॥ ततो नियोजनसाधने परिधावुक्ताः संस्काराः ननु परिधिस्तक्षसहितः शयानश्च तत्र तक्षणोच्छ्रयौ यूपधर्मौ विरुध्येते॥ एवं तर्हि तौ माभूतां॥ अविरुद्धास्त्वंजनादयः कर्तव्याः तथा सति संस्कारनिमित्तस्य यूपशब्दस्य परिधावपि मुख्यत्वाद्यूपायाज्यमानायानुब्रूहीत्यस्मिन्प्रैषमंत्रे परिधये ज्यमानायेत्येवमूहो न कर्तव्यः॥ ॥ चतुर्दशाधिकरणमारचयति॥ ॥ शृतदध्नोः प्रणीतानां न धर्माः संति वानहि॥ अपाकार्थत्वतः संति पाकहेतुत्वसाम्यतः॥ अभ्युदयेष्ट्यां शृते चरुं दधनि चरुमिति शृतदधनी आम्नायते॥ तयोः प्र

श्रीः१२
१२२

245
1945

णीताधर्मा न कर्तव्याः हविः श्रवणार्थमुत्पन्न उत्पवनादिधर्मसंस्कृताः आपः प्रणीताः दधिपयसी तु अपणार्थं नोत्पन्ने॥ किंतु हविः शब्देन प्रदानार्थमुत्पन्ने ततः सामीप्याभावान्नोत्पवनादयो धर्मास्तयोरिति चेत्। मैवं॥ अन्यार्थमुत्पन्नयोरपि दधिपयसोरत्र चंद्रोदयं निमित्तीकृत्य चरुश्रपणहेतुत्वं वाचनिकं॥ ततः समानत्वात्तद्धर्माः संति॥ ॥ पंचदशाधिकरणमारचयति॥ ॥ बृहद्रथंतरधर्मैः संकीर्णा वाव्यवस्थिताः॥ पृष्ठ्येक्यात्संकरो भिन्ननिर्देशादेर्व्यवस्थितिः॥ ज्योतिष्टोमे विकल्पितं॥ पृष्ठस्तोत्रं विहितं बृहत्पृष्ठं भवति रथंतरं पृष्ठं भवतीति॥ तत्रोभयत्र धर्माः श्रुताः॥ बृहतीप्रस्तूयमाने समुद्रं मनसा ध्यायेत्॥ रथंतरे संस्तूयमाने संमीलयादित्यादयः ते धर्मा यत्र संकीर्येरन्। कुतः॥ पृष्ठसिद्धिलक्षणस्य कार्यस्यैकत्वादिति चेत्। न निर्देशभेदात्॥ सोकं वैलक्षण्येन बृहदिति रथंतरमिति च द्वौ निर्देशौ नोपपद्येयातां किं चोभयधर्मसाहित्यं विरुद्धं॥ उच्चैर्गेयं बलवद्गेयमिति बृहद्धर्मः नोच्चैर्गेयं न बलवद्गेयमिति रथंतरधर्मः॥ तस्मादुभयोर्धर्माः व्यवतिष्ठंते॥ ॥ षोडशाधिकरणमारचयति॥ ॥ तयोर्धर्माः समुच्चेयानवा एव रथंतरं॥ द्विस्थानत्वाद्बाध्य आद्यो विरोधाद्वार्त्तिकेंतिमः॥ वैश्यस्तोमे कएव रथंतरं पृष्ठं भवतीति श्रूयते॥ तत्र कएव रथंतराख्यसाम्नः प्राकृतयोः पृष्ठस्तोत्रसाधनयोर्बृहद्रथंतरयोरुभयोः स्थाने पतितत्वादुभयसंबंधिधर्माः समुच्चेतव्याः ये तु विरुद्धा धर्मा उच्चैर्गेयं नोच्चैर्गेयमित्यादयः ते विकल्प्यंतां॥ समुद्रध्याननिमीलनादीनां विरोधाभावात्प्रकृताविव निर्देशभेदस्यात्राभावाच्च समुच्चय इति भाष्यकारस्य मतं॥ विकल्पितयोर्बृहद्रथयोः स्थाने पतितत्वाद्विरुद्धधर्मस्वारस्याच्च विकल्प एव युक्तो न तु समुच्चय इति वार्तिककारस्य मतं॥ तत्रोभयत्र तन्मतविपरीतः पूर्वः पक्ष उन्नेयः॥ ॥ सप्तदशाधिकरणमारचयति॥ ॥ द्विसामवेद्ययोर्धर्मसांकार्यं वाव्यवस्थितिः॥ पृष्ठैक्यात्संकरो मैवं धर्माणां सामगत्वतः॥ गोसवे उभे कुर्यादित्याम्नातो गोसवादौ बृहद्रथंतरसामद्वयसाध्यं पृष्ठस्तोत्रं विहितं॥ तत्र पृष्ठस्तोत्रस्यैकत्वेन धर्मव्यवस्थाया असंभवाद्बृहत्युभयधर्माः कर्तव्याः॥ रथंतरेप्युभयधर्मा इत्येवं सांकर्यमिति चेत् मैवं॥ न ह्येते पृष्ठस्तोत्रप्रयुक्ता धर्माः किंतु सामप्रयुक्ताः ततः साम्नो भेदाद्धर्माः व्यवतिष्ठंते॥ ॥ अष्टादशाधिकरणमारचयति॥ ॥ सौर्यादौ पार्वणो होमौ स्तां न वा कालदेवकौ॥ स्तः सद्यो देवकौ संघातविकारत्वान्नतत्र तौ॥ दर्शपूर्णमासयोः श्रूयते॥ स्रुवेण पार्वणौ जुहोतीति॥ तत्र पर्वशब्दः कालविशेषवाची॥ ततः कालदेवकौ तौ होमावाराडुपकारकतया प्रयाजादिवत्सौर्यादिविकृति

अ० क० मा० ष्वतिदिश्यत इति चेत् । मैवं ॥ पर्वशब्दस्याग्नेयादित्रिकसंघपरत्वात् ॥ दानार्थवाचिनः ॥ पृणातेर्धातोर्निष्पन्नोयं पर्वश
१२३ ब्दः स च प्रीयते दीयते तस्मिन्नित्यधिकरणव्युत्पत्त्या कालमाचष्टे ॥ भावव्युत्पत्त्या क्रियापरः सन् प्रकरणवशादाग्नेया
दिकमंत्रयसंघमाह ॥ तथा च मंत्रवर्णोप्यनुगृहीतो भवति ॥ ऋषभं वाजिनं वयं पूर्णमासं यजामह इत्येको मंत्रः ॥ अमावा
स्या सुभगा सुसेवा धेनुरिव भूय आप्यायमानेत्यपरो मंत्रः ॥ तत्राग्नीषोमीयवत्कमंत्रयसंघस्य व्यासक्तदेवतात्वं ॥ न च संघ
स्य विकृतिः सौर्यादिः किं त्वाग्नेयस्यैव ॥ ततः संघार्थयोर्होमयोर्नास्ति सौर्यादौ प्राप्तिः ॥ ॥ एकोनविंशाधिकरणमारच
यति ॥ संकीर्णोऽसंघ्याहोमौ नवा प्रकरणादुभौ ॥ संकीर्णावुपकार्यस्य भेदादेतौ व्यवस्थितौ ॥ दर्शपूर्णमासप्रकरणे पठित
त्वाद्यथा जादिवद्दर्शेपि होमद्वयं कर्तव्यं ॥ पूर्णमासेपि तथेति चेन्मैवं ॥ उपकार्ययोः संघयोः व्यवस्थितत्वेनोपकारकयोरपि
व्यवस्थाया युक्तत्वात् ॥ ॥ विंशाधिकरणमारचयति ॥ ॥ देवता यज्ययोर्वास्युः प्रयाजे समिदादयः ॥ विष्ण्वादिवद्देवतात्वं
न चतुर्थ्याद्यभावतः ॥ दर्शपूर्णमासयोः प्रयाजपंचकमाम्नातं ॥ समिधो यजतीत्यादिना ॥ तत्र यथा विष्णुं यजति वरुणं
यजतीत्यादौ द्वितीयानिर्दिष्टा विष्ण्वादयो देवताः तथा समिदादीनां देवतात्वं ॥ तयोर्यागो देवताः संस्क्रियत इति दृष्टार्थत्वला
भ इति चेन्मैवं ॥ सर्वत्र चतुर्थ्या तद्धितेन वा देवता निर्दिश्यते ॥ तद्यथा यदग्नये सायं जुहुयात् ॥ आग्नेयोऽष्टाकपाल इति न चा
त्र समिदादिषु चतुर्थी तद्धितो विद्यते ॥ तादर्थ्यप्रतीतौ देवता भवति ॥ न च द्वितीयया तादर्थ्यं प्रतीयते ॥ किंत्वीप्सिततमत्वं ॥ तच्च
कर्मनामत्वेनोपपद्यते ॥ अग्निहोत्रं जुहोतीत्यादौ तद्दर्शनात् ॥ यथा पाकं पचतीत्युक्ते पचिक्रियायाः कर्तव्यता प्रतीयते ॥ तथा
समिधो यजतीत्युक्ते समिद्यागः कर्तव्य इत्यर्थो भवति ॥ विष्णुं यजतीत्यादौ तादर्थ्यमुपचर्यते ॥ प्रयाजमंत्रेषु समिधो अग्न
आज्यस्य व्यंत्वित्यादिषु समिदादिशब्दैर्बहुवचनैकवचनांतैर्देवता निर्दिष्टाः तद्देवनिमित्तीकृत्य तादृशैरेव शब्दैरिह यागा
अभिधीयंते ॥ समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति तस्मान्नात्र देवतासंस्कारविधिः ॥ श्रीः
किंतु यागाः केवला विधीयंते ॥ ते पांच श्रुत्यादिभिः कार्यविशेषानवगमात् प्रकरणेनारादुपकारकत्वं पंचमप्रयाजस्य
तु वक्ष्यमाणाज्यभागादिदेवतासंस्कारकत्वं दशमेऽभिधास्यते ॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे नवमा १२३
ध्यायस्य द्वितीयः पादः ॥ ॥ तृतीयपादस्य प्रथमाधिकरणमारचयति ॥ ॥ अग्निव्रीह्यादयो नोह्या ऊह्या वा नाहि चोद
नात् ॥ विवक्षादेव हविषो दृष्टत्वादूह्यतेतमः ॥ प्रकृतावग्नये जुष्टं निर्वपामीति देवताविषयो मंत्र आम्नातः ॥ व्रीहीणां मे

धः सुमनस्यमान इति द्रव्यविषयः ॥ विकृतिषु सूर्याय जुष्टं निर्वपामि ॥ नीवाराणां मेधः सुमनस्यमान इत्येवमूहेन कर्तव्यः ॥ 247/1545
कुतः चोदकेन यथावस्थितस्यैव मंत्रपाठस्यातिदिष्टत्वादिति चेन्मैवं ॥ प्रकृतौ देवताहविर्लक्षणयोरेव विवक्षा ॥ तथा स
ति तत्प्रकाशनरूपस्य दृष्टप्रयोजनस्य लाभात् ॥ अग्निव्रीहिशब्दाविवक्षायामदृष्टार्थो मंत्रपाठः प्रसज्येत ॥ तस्मात्सूर्य
नीवारलक्षणार्थप्रकाशनायोहः कर्तव्यः ॥ ॥ द्वितीयाधिकरणमारचयति ॥ ॥ हरितोक्तिः पौंडरीके न त्याज्या त्यज्यतेऽ
थवा ॥ नादृष्टार्थत्वतो मैवं गुणिद्रव्यस्य भासनात् ॥ मोर्द्धं चरुं निर्वपेच्छ्रियै श्रीकाम इत्यत्र पौंडरीकाणि बर्हींषि भवंतीति श्रुतं ॥
तत्र स्तरणमंत्रश्चोदकप्राप्तः ॥ दर्भैस्तृणीत हरितैरिति तत्र पूर्वन्यायेन दर्भशब्दस्थाने पुंडरीकशब्दः प्रयोक्तव्यः ॥ हरितश
ब्दस्तु प्रकृतौ नापूर्वीयद्रव्यवाचीति तत्रासमवेतार्थत्वाद्विकृतावप्यदृष्टार्थमनूहेन प्रयोक्तव्य इति चेन्मैवं ॥ गुणद्वारा गुणिद्रव्यप्रका
शने सति दृष्टार्थत्वलाभेन समवेतार्थत्वात् ॥ तस्मात्पुंडरीकैस्तृणीत रक्तैरित्यूहनीयं ॥ ॥ तृतीयाधिकरणमारचयति ॥ ॥ यू
पस्पर्शे वैदिके वा लौकिके मंत्रकीर्तनं ॥ आद्यः प्रकरणान्नैवं लौकिके प्रतिषेधतः ॥ ज्योतिष्टोमेग्नीषोमीयपशुप्रकरणे यूपस्पर्श
स्य प्रायश्चित्तमाम्नातं ॥ यद्येकं यूपमुपस्पृशेदेष ते वायो इति ब्रूयादिति ॥ तदिदमृत्विग्यजमानादिकालीने वैदिकस्पर्शे भवति कु
तः तत्प्रकरणादिति चेन्मैवं ॥ यूपा वै यज्ञस्य दुरिष्टमामुंचते यद्यूपमुपस्पृशेद्यज्ञस्य दुरिष्टमामुंचेत्तस्माद्यूपो नोपस्पृश्य इति
प्रतिषिध्य पश्चात्प्रायश्चित्ताम्नानात् ॥ प्रतिषेधश्च लौकिकस्पर्शविषयः वैदिकस्य विहितत्वात् ॥ तस्माल्लौकिकस्पर्शे प्रायश्चित्तं
॥ ॥ चतुर्थाधिकरणमारचयति ॥ ॥ पाशपाशान्द्वयोः पश्वोरेको मंत्रोथवा द्वयं ॥ कएकत्वे द्वयत्वे किमेकस्योहोकयोर्द्वयोः ॥
एकेनैव कृतार्थत्वादेको मंत्रस्तदापि च ॥ अविकारेण बह्वर्थ एकार्थः समवायतः ॥ प्राकृतत्वादुभावूह्य एकोत्रार्थविवक्षया ॥
बह्वर्थोप्यूह्यो नीत्युद्वयोः स्वेच्छकल्पितः ॥ ज्योतिष्टोमे अग्नीषोमीयपशावेकवचनांतबहुवचनांतौ द्वौ पाशमंत्रौ भिन्नयोः
शाखयोराम्नातौ ॥ अदितिः पाशं प्रमुमोक्त्वेतमित्येकत्र अदितिः पाशान्प्रमुमोक्त्वेतानित्यपरत्र तावुभौ पशुद्वयोपेतायां
विकृतौ चोदकेनातिदिष्टौ ॥ सा च विकृतिरेवमाम्नायते ॥ मैत्रं श्वेतमालभेत वारुणं कृष्णमपां चौषधीनां च संधावन्नकाम
इति तत्रैकेनैव मंत्रेण चरितार्थत्वान्न द्वयोरतिदेश इत्याद्यः पक्षः ॥ तदाप्यविकृतस्य प्रयोक्तुं शक्यत्वाद्बहुवचनांतो मंत्रो युक्तः
प्रकृतावेकस्मिन्पशावसमवेतार्थः तथा बहुवचनस्य विकृतावनूहनीयत्वादित्येकः पक्षः ॥ तादृग्बहुवचनापतत्वादेव मंत्रो

प्यसाव समवेतार्थः प्रकृतौ भवति॥ एकवचनांतस्तु मंत्रः प्रकृतौ समवेतार्थत्वाद्विकृतावतिदिश्यतां॥ सचद्विवचनांतत्वेनोहनी
यइति पक्षांतरं॥ प्रकृतौ विद्यमानयोः रुभयोर्मंत्रयोर्विकृतावतिदेशस्य वारयितुमशक्यत्वादेकमंत्रपक्षस्यावांतरत्वेनोपन्यस्ता
वुभावपि पक्षावयुक्तौ॥ मंत्रद्वयातिदेशपक्षेत्वेकवचनांतः प्रकृतौ समवेतार्थतयाविकृतावूहनीयः॥ बहुवचनांतोयथावस्थित
एवा पाठनीय इति पूर्वः पक्षः॥ लोके वेदे वा बहुवचनस्य द्वयोरर्थयोरकृतशक्तित्वाद्विवचनांततयासोप्यूहनीय इति राद्धांतः॥
॥ ॥ पंचमाधिकरणमारचयति॥ ॥ उत्कृष्य्योनवामंत्रो बह्वर्थो संगतत्वतः॥ उत्कर्षोनविकल्प्योसौ गुणत्वन्याय कल्पना॥
योयं पूर्वोदाहृता बहुवचनांतः पाशामंत्रस्तस्य प्रकरणादुत्कर्षो बहुपाशयुक्तेषु पशुगुणेषु कर्तव्यः॥ कुतः एकस्मिन्यशौ प्र
कृते तस्यानन्वितत्वादिदितिचेन्मैवं॥ नासावुत्कृष्य्यः किंत्वेकवचनांतेन मंत्रेण सह विकल्पनीयः॥ नहि पाशानित्यत्र प्रधा
नस्यांशस्यानन्वितत्वमस्ति प्रातिपदिकविभक्त्योः प्रातिपदिकं प्रधानं धर्मिवाचकत्वात्॥ विभक्तिस्तु कर्मत्वकरणत्वादि धर्म
वाचगुणत्वाद्गुणभूता तथा विभक्तिवचनयोर्विभक्तेः कर्मादिकारकवाचित्वात्प्राधान्यं॥ वचनस्य कारकगतसंख्याभिधायि
त्वाद्गुणत्वं तथा सति बहुवचनांते पाशशब्दे प्रातिपदिकं कर्मकारकविभक्तिश्चैकस्मिन्नपि पाशेन संगच्छेते गुणभूते तु बहु
वचने लक्षणावृत्तिः कल्पनीया पाशावयवगतं बहुत्वं लक्ष्यत इति॥ तस्माद्गुणभूतं वचनमात्रमनुसृज्य कृत्स्नस्य मंत्रस्य प्रक
रणपाठेन बाधनीयः किंतु प्राधानानुसारेण मंत्रयोः समानबलत्वाद्विकल्पः कर्तव्यः॥ ॥ षष्ठाधिकरणमारचयति॥ ॥
पत्नीमितिद्विपत्न्यादावूह्योनो वोह्यतेर्थतः॥ नोपदेशस्य सामान्यादतिदेशाप्रवर्तितः॥ दर्शपूर्णमासयोर्मंत्र आम्नायते॥
पत्नीसंनह्येति तत्रैकपत्नीकस्य यजमानस्य प्रयोगे समवेतार्थ एकवचनांतः पत्नीशब्दः सचद्विपत्निक बहुपत्नीकस्य च
प्रयोगेर्थवशादूहनीय इति चेत् मैवं॥ किमुपदेशप्राप्तस्योहः अतिदेशप्राप्तस्य वा॥ नाद्यः॥ उपदेशस्य सर्वप्रयोगसाधार
णत्वात्॥ यद्येकपत्नीकप्रयोगार्थमेवायं मंत्रोपदेशः स्यात्तदानीमेकवचनं विवक्ष्येत नत्वेवमस्ति॥ अन्यथा द्विपत्नीक
बहुपत्नीकप्रयोगयोर्मंत्र एव नोपदिश्येत॥ तत्र कुतऊहानूहचिंतावकाशः॥ साधारणे तूपदेशे सर्वप्रयोगसमवेतार्थत
या पत्नीपदे प्रातिपदिकं कर्मधारकविभक्तिश्चेत्युभयमेव पाशन्यायेन विवक्षितं॥ एकवचनं त्वदृष्टार्थं तथा च सर्वप्रयोगे
समवेतार्थतया पत्नीपदेषु यथावस्थितएव पठनीयः॥ नाप्यतिदेशप्राप्तस्योह इति द्वितीयः पक्षः॥ द्विबहुपत्नीकप्रयोगयो
रविकृतित्वेनातिदेशायोगात् तस्मादत्र नास्त्यूहः॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ कुर्यानो वैष विकृतावूह्यो पाठेन

पाशवत्॥ नादृष्टछांदसत्वाभ्यां पासछांदसता नहि॥ एष एकवचनांतः पत्नीवंतोविकृतौ द्विबहुपत्नीकप्रयोगयोरूहनी
यः॥ कुतः पाठाभावात्॥ प्रकृतावर्थानुसारेण प्राप्तो प्यूहः सर्वप्रयोगसाधारणेन मंत्रपाठेन बाधितः॥ विकृतौ तु बाधकं
स्य पाठस्याभावेनास्मदायत्ते प्रयोगेर्थानुसारेणोहो युक्तः अत एव पूर्वत्र द्विपशुकायां विकृतावेकवचनांतो बहुवचनां
तश्च पाशामंत्र ऊहित इति चेत् मैवं॥ पत्नीमित्येकवचनस्याविवक्षितत्वेन प्रकृतावदृष्टार्थतया यथावस्थितपाठसति वि
कृतावप्यदृष्टार्थं यथावस्थितस्यैव पठितव्यत्वात्॥ अथोच्येत॥ प्रकृतौ छांदसत्वेन व्यत्ययेनैकवचनमेव द्वित्वबहुत्वयो
रप्यर्थयोर्वर्तत इति एवं तर्हि विकृतावप्यूहमंतरेणैव द्वित्वबहुत्वाभिधानान्माभूदूहः॥ नचैवं पाशोप्यूहो माभूदिति शंकनी
यं प्रकृतावेकवचनबहुवचनयोः कस्मिन्नेव पाशे वैदिकप्रयोगदर्शनात्॥ द्वित्वे तदभावात्॥ तस्मात्पाशस्योहो विकृ
तौ न तु पत्नीपदस्य॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ अग्नीषोमीयवत्सवनस्था तुल्यविधयो यदि॥ प्रास्माइति त
दा मंत्रे पत्नीन्यायेन नोहतं॥ अग्निष्टोमाख्य षोडश्यतिरात्ररूपास्तु ज्योतिष्टोमस्य संस्था स्वकोत्तरसंख्याः सवनीयाः
पशव आम्नाताः॥ आग्नेयः पशुरग्निष्टोम आलभ्य ऐंद्राग्नस्त्वथ्ये द्वितीय ऐंद्रो वृष्णिः षोडशिनि तृतीयः सारस्वती मेष्य
तिरात्रे चतुर्थ इति॥ त एते सवनीयपशवो ग्नीषोमीयपशुना समानविधयो न तु तद्विकृतय इति कस्यचित्पूर्वपक्षिणो
मतं॥ तदेवाभ्युपगम्य कृत्वा चिंता क्रियते॥ अध्रिगु प्रैष मंत्रे प्रास्मा अग्निं भरतेति वाक्ये पुल्लिंग चतुर्थ्येकवचनांत इदं
शब्दः पठितः॥ तस्य मेष्यां स्त्रीलिंगतया नास्त्यूह इति प्रथमपादे निर्णीतं॥ इह त्वेकवचनस्य पशुत्वबहुत्वयोः पत्नीश
ब्दवत्पूर्वोत्तरपक्षौ द्रष्टव्यौ॥ अर्थानुसारेण द्विवचनबहुवचनयोरूह इति पूर्वः पक्षः॥ उपदेशस्य साधारणत्वेन सर्वत्र
समवेतार्थयोः प्रातिपदिकविभक्त्योरेवविवक्षितत्वेनैकवचनस्याविवक्षितत्वात् कथंचित् विवक्षितत्वेपि छंदसेन वच
नव्यत्ययेन द्व्यर्थबह्वर्थवाचित्वान्नास्त्यूह इति राद्धांतः॥ ॥ नवमाधिकरणमारचयति॥ ॥ व्रीहिप्रतिनिधावूहो व्रीही
णामिति नास्ति वा॥ अर्थादूहो न सादृश्यादंशयानां साधनत्वतः॥ श्रुतस्य द्रव्यस्यापचारे भूयोवयवसामान्योपेतं द्रव्यां
तरं तस्य प्रतिनिधिर्भवति॥ तद्यथा व्रीहीणामपचारे नीवारास्तेषां स्थाने निविशंते॥ तदेतत्षष्ठेध्याय एव स्थितं॥ प्रति
निहितेषु नीवारेषु व्रीहीणां मेधेत्ययं मंत्र ऊहितव्यः कुतः अर्थानुसारादिति चेत् मैवं॥ नीवारे च रोनीवाराणां साधनत्वे

349
1945

नविहितानांव्रीहिस्थानीयाभवतिमंत्रःस्योहः इहतुननीवाराःसाधनत्वेनविहिताः किंतुभूयोवयवसादृश्यद्वाराप्राप्यंते॥त
तोवयवनाभिवसाधनत्वंतथासतीव्रीह्यवयवेष्वविकारेणयथाव्रीहिशब्दः तथानीवारावयवेष्वपिप्रवृत्तेर्नास्त्यूहः॥ ॥
दशमाधिकरणमारचयति॥ ॥द्विपक्षोचक्षुराद्यूहोनवोहः पशुभेदतः॥तेजोमात्रस्यसूर्यादावेकीभावादनूहनं॥अग्नी
षोमीयपशावध्रिगुप्रैषसंबंधिचक्षुरादीनांसूर्यादिसंसर्गआम्नायते।सूर्यंचक्षुर्गमयतात्॥वातंप्राणमन्ववसृजतात्॥
दिशःश्रोत्रमित्यादिःमैत्रश्वेतमालभेतवारुणंकृष्णमितिविहितयोर्द्वयोः पश्वोर्मंत्रगताश्चक्षुरादिशब्दाद्विवचनांतत्वेनो
हनीयाः कुतः पशुभेदनचक्षुरादीनांभिन्नत्वादितिचेन्नैवं॥ नखल्वत्रेंद्रियाधिष्ठानंशरीरगतंगोलकंचक्षुःशब्देनविवक्षितंतद्वि
वक्षायानेकस्मिन्नपिपशौगोलकभेदादेकवचनांतचक्षुःशब्दस्यान्वयप्रसंगात्॥गोलकस्यसूर्यादिप्राप्त्यसंभवाच्च॥यत्तुरूप
दर्शनादिसामर्थ्यलक्षणंतेजोमात्रंतदत्रचक्षुरादिशब्दैर्विवक्षितं॥तच्चपश्वनेकत्वेपिततोनिर्गत्यसूर्यादावेकीभूतत्वात्समुद्रप्र
विष्टनदीवत्तद्भेदेनावतिष्ठतेतस्मान्नास्त्यूहः॥ ॥एकादशाधिकरणमारचयति॥ ॥एकधेत्यविकारःस्याद्व्यासोवासह
त्वतः॥आद्योमैवंप्राकृतस्यसकृत्वस्योचितत्वतः॥तस्मिन्नेवाध्रिगुप्रैषेश्रूयते॥एकधास्यत्वचमाछ्यतादिति॥छिंधीत्यर्थःत
त्रद्वयोः पश्वोरेकधेत्यस्यशब्दस्यनास्तिविकारः॥कुतःतस्यशब्दस्यसकृत्ववाचित्वात्॥एकधागाःपाययतीत्यत्रयोगपद्येन
प्रयोगदर्शनात्॥पश्वनेकत्वेपित्वगुत्पाटनस्यैककालीनत्वंबहुपुरुषकर्तृकस्यघटइतिप्राप्तेब्रूमः॥प्रकृतावेकस्मिन्पशौयौ
गपद्यलक्षणोर्थोनसंभवति॥ततःसकृत्वंतस्यशब्दस्यार्थः त्वगीयमवयवशोनबहुकृत्वोछेत्तव्याकिंतुसर्वापिसकृदेकप्रय
त्नेनेत्युक्तंभवति।यत्प्रतिप्रकृतौसकृत्वंतदेवंविकृतावुचितं॥ततःप्रतिपशुसकृत्वमभिधातुमेकधेत्ययंमंत्रोभ्यसितव्यः॥
॥ ॥द्वादशाधिकरणमारचयति॥ ॥अविकारोविकारोवास्यान्मेधपतिशब्दयोः॥विकारस्वामिदेवार्थएकार्थोवेतिमे
पिकिं॥स्वाम्यर्थोदेवतार्थोवास्याद न्यायत्वतोभ्रमः॥अर्थसत्वाद्विकारोत्रद्वावर्थौशब्दयोर्द्वयोः॥मंत्रैक्यादर्थएकोत्रस्वाम्य
स्मिंजाययाद्विता॥देवार्थापीर्द्वेवएकोधिष्ठानेद्विःद्विधेरणं॥अध्रिगुप्रैषनिगदस्यादाविदमाम्नायते॥दैव्याःशमितारउ
तमनुष्याआभरध्वंउपनयतमेध्यादुरआशासानामेधपतिभ्यांमेधमितिशाखांतरेतुमेधपतयेमेधमिति॥अयमर्थः॥श
मितारःपशुघातिनोद्विविधाःदैव्यामानुषाश्चतानुभयान्संबोध्यहोताकर्तव्यविशेषान्निर्दिशतिप्रारंभःकर्तव्यःमेधोयज्ञः

तद्योग्यान्पदुरःपदार्थानूहिंसाहेतूनिहानयतकिंकुर्वतःयज्ञपतिभ्यांयज्ञपतयेवायज्ञमाशासानाइतितत्रैकवचनांतस्यमेध
पतिशब्दस्यद्विवचनांतस्यचबहुपशुयुक्तास्वविकृतिष्वनूहऊहोवेतिसंशयः॥ऊहपक्षेपिकिमेकवचनांतस्ययजमानोर्थो
द्विवचनांतस्याग्नीषोमौदेवावर्थइत्येवमर्थभेदः॥किंवाशब्दद्वयस्यैकएवार्थइतिसंशयः॥एकार्थत्वपक्षेपियजमानएवार्थो
देवतेवेतिसंशयः॥तत्राग्नीषोमीयपशौयजमानोग्नीषोमौचेतित्रयोमेधस्यपतयः॥तेद्वैकवचनस्यद्विवचनस्यचाम्ना
तनिगदत्वेनप्रकृतौविवक्षितस्यवचनस्यविकृतावनूहइत्याद्यःपक्षः प्रकृतौसमवेतार्थत्वसंपादयितुंशक्येसत्यन्यायनि
गदत्वाभावाद्विकृतावूहः कर्तव्यइतिद्वितीयःपक्षः अस्मिन्द्वितीयपक्षेपिविकृतावुपन्यस्तप्रकारेणार्थभेदाद्विकृतिषुबहुय
जमानयुक्तास्वहीनादिषुयजमानानुसारेणैकवचनांतमूहनीयः॥अनेकपशुयुक्तासुविकृतिषुदेवतानुसारेणद्विवचनां
तमूहनीयः॥सोयंशाखाविकल्पेनप्रथमःपक्षःशाखाभेदेनपाठभेदेपिमंत्रभेदाभावादर्थभेदोनयुक्तःकिंत्वेकएवार्थइति
पक्षांतरंतदपिदेवतायाःसंप्रदानत्वेनस्वामित्वाभावान्मेधपतिशब्दयोग्यतानास्तीतियजमानएवतत्रशब्दार्थः॥तस्मिंश्च
यजमानेस्वतएकत्वंजायायासहद्वित्वमित्येकवचनद्विवचनेउभेअपिसमवेतार्थे॥ततोयजमानद्वयोपेतायांविकृतावेकवचनां
तोद्वित्वेनोहनीयः॥द्विवचनांतोबहुत्वेनेतिपूर्वःपक्षःमेधस्ययजमानार्थत्वंनैवाशासनीयंतस्यसिद्धत्वात्॥देवतार्थत्वंत्वा
शासनीयंततोमेधमाशासानाइत्येतद्देवतायांसमवेतार्थंसंप्रदानस्याप्युद्देश्यत्वेनप्राधान्यान्मेधपतित्वमविरुद्धं॥देवता
कारेणैकत्वादग्नित्वसोमत्वाकारेणद्वित्वाच्चैकवचनद्विवचनेउपपन्नेतस्माद्देवतानुसारेणविहितावूहइतिराद्धांतः॥ ॥त्रयो
दशाधिकरणमारचयति॥ ॥आदित्येष्वेकवाप्येषऊह्योनोवोह्यतेन्यवत्॥गणार्थत्वादनूहोतोविकल्पःप्रकृताविव॥प्रजा
पशुसंपत्तिकामस्यबहुदेवत्यःपशुराम्नायते॥यःकामयेतप्रथमेयपशुभिःप्रप्रजयाजायेयेतिसएतामविंवशामा
दित्येभ्यःकामायालभेतेतिवशाःवंध्याकामायकामुकेभ्यइत्यर्थः॥अत्रचोदकप्राप्तोमेधपतयइत्येकवचनांतःश
ब्दआदित्यानांबहुत्वाद्बहुवचनांतत्वेनोहनीयः॥यथामेधपतिभ्यामितिद्विवचनांतऊह्यतेयथानापाशइत्येकवचनां
तऊह्यतेतद्वदितिचेन्नैवं॥प्रकृतावग्नीषोमयोर्गणेकत्वमेकवचनांतोब्रूते॥आदित्यानामपिगणेकत्वंसमानमित्यनूहः॥
तस्मादविकृतएकवचनांतइतरेणसहप्रकृताविवात्रापिविकल्प्यते॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥कृष्णग्रीवा

श्री०
१२५

251
1945

दिकेऽहे नोहो वास्यन पूर्ववत्॥ देवत्वं न गणस्यात ऊहो बहुभिधित्सया॥ यूपैकादशिन्यामग्न्यादिदेवकाः पशव आम्नाताः ऐन्द्रा
ग्नेयेन वा पयति मिथुनं सारस्वत्या करोतिरेतः सौम्येन दधाति प्रजनयति पौष्णेनेत्यादिना॥ ते च स्वनामभिरन्यत्राम्नाताः॥ आ
ग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः इत्यादिना तत्रास्यैकवचनांतस्य मेधपतिशब्दस्यादित्येष्विव नो
हइति चेन्मैवं॥ वैषम्यात् आदित्यगणस्य तत्र देवत्वं॥ इह त्वेकैकस्यैव पृथग्देवत्वं॥ अतो बहून्देवानभिधातुं बहुवचनांतत्वमू
हनीयं॥ ॥इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे नवमाध्यायस्य तृतीयः पादः॥ ॥ चतुर्थपादस्य प्रथमाधिकर
णमारचयति॥ ॥ षड्विंशतिर्वंक्रयोऽस्येत्यनूहः स्यादुतोह्यते॥ ऊहेऽपि वचनान्यत्वमस्येत्यावर्त्यतेऽथवा॥ षड्विंशतेरुताभ्यासः समस्ते
किं भवेदुत॥ अनूहो करणत्वेन दृष्टलाभान्न इहनं॥ संख्यायाश्च पशोर्युक्तेर्वंक्रीणां मुख्यतावशात्॥ अमी पक्षा युज्यतेऽत्य समासअनु
ष्ठितिशेषतः॥ अध्रिगुप्रैषवाक्यमिदमाम्नायते॥ षड्विंशतिरस्य वंक्रयस्ता अनुष्ठ्योच्यावयतादिति॥ अयमर्थः॥ वंक्रयो वक्राणि पार्श्व
स्थीनि तान्यस्य पशोः षड्विंशतिसंख्यानि॥ एकैकस्मिन्पार्श्वे त्रयोदशानामस्थ्नां सत्वात्॥ ताश्च वंक्रीरनुष्ठ्यानुष्ठायानुक्रमेण गणयि
त्वेति यावत्॥ उच्च्यावयतादुद्धरतादिति॥ सोऽयं मंत्रो वंक्रीणामुद्धरणे करणतया न वियुक्तः किंतु संज्ञपनात् प्राक् पशोर्नीयमाने
होत्रा प्रत्युच्यते॥ ततोऽसमवेतार्थत्वादनूह इत्याद्यः पक्षः अकरणत्वेऽपि नादृष्टार्थत्वं शमितृणामुद्धरणीयार्थस्मारकत्वेन दृष्टार्थत्ला
भात्॥ तस्मात्प्रकृतौ समवेतार्थत्वाद्विकृतावूहः॥ तदापि चत्वारः पक्षाः॥ तत्र संख्या मुख्यत्वेन प्रकाशया तेन द्वयोः पश्वोर्द्विगुणी
तां षड्विंशतिसंख्यां प्रकाशयितुं द्विवचनांततया षड्विंशतिशब्द ऊहनीय इत्याद्यः पक्षः॥ पशोश्चोदितत्वेन मुख्यत्वात्तद्वाचकं स
र्वं तमस्येति पदं पश्वनुसारेणावर्तनीयमिति द्वितीयः पक्षः युक्तिर्योगः षड्विंशतिसंख्यायाः पशूनां सह संबंधस्तस्य मुख्यत्वा
त्प्रति पशुविभक्तां संख्यां प्रकाशयितुं षड्विंशतिपदस्याभ्यास इति तृतीयः पक्षः॥ अत्र सर्वत्र मुख्यानुसारेण पदांतराण्यूहनी
यानि॥ संख्येयानां वंक्रीणां मुख्यत्वाच्छासामियत्ता समस्य वक्तव्या॥ ततो द्विपं चाशदन योर्वंक्रयः अष्टसप्ततिरेषां वंक्रय इ
त्येवं यथायोगमूहनीयमिति चतुर्थः पक्षः॥ अयमेव सिद्धांतो वाक्यशेषानुगुण्यात्॥ ता अनुष्ठ्योच्यावयतेति वाक्यशेषः स च व्याख्या
तः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥ न चतुस्त्रिंशदित्येष निषेधो नियतो न वा॥ गिरापदवदाद्यः स्यान्नेवकारद्वत्वतः॥
निषेधः प्राप्तिपूर्वोतः प्रापकोत्रानुमीयते निषेधकप्रापकाभ्यां चतुस्त्रिंशद्विकल्प्यते॥ अश्वमेधे त्रयः सवनीयाः पशवः

253
1941

क्रताः॥ अश्वस्तूपरो गोमृगस्ते प्राजापत्या इति तेष्वश्वस्य चतुस्त्रिंशद्वंक्रयः तथा च मंत्रः चतुस्त्रिंशद्वाजिनो देवबंधोर्वंक्रीरश्व
स्य स्वधितिः समेतीति वाजी गंधर्ववाहको जातिविशेषः॥ अत एव आम्नायते॥ हयो भूत्वा देवानवहदर्वासुरान्वाजी गंधर्वानि
ति॥ देवबंधुर्देवानां प्रियः स्वधितिः छेदनहेतुः शस्त्रमित्यर्थः॥ एवं सत्यध्रिगुप्रैषविशेषोऽयमाम्नायते॥ चतुस्त्रिंशदिति ब्रूया
त्॥ षड्विंशतिरित्येव ब्रूयात् इति॥ सोऽयं चतुस्त्रिंशद्वाजिन इत्यादिका या ऋचः प्रतिषेधो गिरापदनिषेधवन्नित्यो न तु विक
ल्पितः॥ यथा न गिरा गिरेति ब्रूयादैरं कृत्वोद्गेयमित्यत्र गिरापदनिषेधपुरःसरमिरापदे विहिते सति निषिद्धस्य नित्यनिवृत्तिः तथा
चतुस्त्रिंशन्मंत्रनिषेधपुरःसरं षड्विंशतिमंत्रे विहिते सति नित्यनिवृत्तिर्निषेधस्येति चेन्मैवं॥ षड्विंशतिरित्येव ब्रूयादित्ये
वकारेणाविधित्वप्रत्ययबाधात्॥ षड्विंशतिमंत्रस्तावच्चोदकप्राप्तत्वान्न विधेयः॥ तस्य च चतुस्त्रिंशन्मंत्रेणापवादप्रसक्तौ स
चतुस्त्रिंशदित्यपवादकं मंत्रं प्रतिषिध्य चोदकप्राप्तस्यानपोदितत्वेन यथापूर्वमवस्थानमनूद्यतइत्येवमर्थस्तु चपि तु मेवका
रः प्रयुक्तः गिरापददृष्टांतस्तु विषमः॥ अप्राप्तत्वादिरापदं तत्र विधीयते तेन च विहितेन पाठप्राप्ते गिरापदे बाधिते स बाधो
न गिरा गिरेति प्रतिषेधेनानूद्यते॥ ततो दृष्टांते निषेधानुवादो दार्ष्टांतिके विध्यनुवाद इति महद्वैषम्यं॥ ननु विधिवाक्यस्यैव का
रस्यानुवादत्वे सति न चतुस्त्रिंशदित्यस्मिन्निषेधे कृत्स्नवाक्यतात्पर्यान्निषिद्धस्य नित्यनिवृत्तिः स्यात् मैवं॥ प्रापकस्यापि
सद्भावेन निषेधप्राप्तिभ्यां चतुस्त्रिंशन्मंत्रस्य विकल्पितत्वात्॥ अथोच्येत॥ चतुस्त्रिंशद्वाजिन इत्येवं मंत्रः केवलं स्वरूपेणैव
पठितः तत्र स्याध्रिगुप्रैषवत्॥ प्रापकं किंचिदस्तीति। तन्न॥ प्रापकवचनस्य कल्पनीयत्वात्॥ अन्यथा प्रसक्त्यभावेन प्र
तिषेधानुपपत्तेः तस्मात्प्रसंजकेनोपजीव्येनानुमितविधिना प्रत्यक्षनिषेधेन च समानबलतया चतुस्त्रिंशदित्ययं
मंत्रोऽश्वस्याध्रिगुप्रैषे विकल्प्यते॥ ॥तृतीयाधिकरणमारचयति॥ ॥ पृथग्वचनमश्वस्य स्यादन्याभ्यां समस्य वा॥ आ
द्यः पदेन निषिद्धत्वविशेषो नियतो यतः॥ वंक्रीयत्तानुक्तिदोषाद्गेवात्र निषिध्यते॥ पक्षे प्राप्तः प्राकृतोऽस्मिन् समस्योक्तिः पु
रा यथा॥ पूर्वोक्ताश्वस्य तूपरगोमृगाभ्यां समस्य वंक्रीयत्ता न वक्तव्या॥ किंतु पृथगेव॥ कुतः यस्माच्चतुस्त्रिंशद्वाजिन इत्ययं मंत्र
विशेषोऽश्वस्य नियतः॥ ननु प्रत्यक्षनिषेधेनानुमितविधिना च विकल्पः पूर्वमुक्तः तन्न ऋचो निषेधाभावात्॥ न चतुस्त्रिंशदि
ति ब्रूयादित्यत्रापि प्रथमपदमात्रं निषिध्यते॥ ननु निषेधस्य प्रसक्तिपूर्वकत्वमुपजीव्य विधिरनुमितः॥ तत्रानुमापकस्य निषे

धस्याभावेनानुमेयस्यविधेरप्यभावाच्चतुस्त्रिंशदित्यस्या ऋचः प्राप्तिरेवनास्ति॥ तत्रकुतोनियतिरितिचेतन॥ प्रकरणपा
मंत्रलिंगाभ्यांविनियोगविद्धेरनुमेयत्वात्तस्मादेननमंत्रेणाश्वस्य पृथग्वचनमिति प्राप्तेब्रूमः॥ यदिचतुस्त्रिंशदित्येक
वपदंनिषिध्येततदातस्याभृचीवंक्रीणामियत्तानोच्येत ननुषड्विंशतिरित्येवब्रूयादित्यनेनवाक्येन संख्यावाचिपदांतर
प्रक्षेपविधिनादियत्तोच्यइतिचेतन॥ तस्यवाक्यस्यैव कारणविधिशक्तेः कुंठितत्वात॥ तस्मान्न पदमात्रस्यनिषेधः
तुकृत्स्नायाऋचः तथासति पूर्वोक्तविकल्पस्य तदवस्थत्वाद्विशेषविधिपक्षे पृथग्वचनंकर्तव्यं॥ तन्निषेधपक्षेचोद
कप्राप्तेप्राकृतेध्रिगुप्रैषप्रथमाधिकरणन्यायेन समस्यवक्तव्यं॥ तत्रतूपरगोमृगयोः प्रत्येकं षड्विंशतित्वादश्वस्यचतुस्त्रिं
शत्वात्समानेनषडशीतिरेषांवंक्रयइत्येवमूहनीयं॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ पक्षीवपाश्रवो रूकोरलयोर
विशेषतः॥ पक्षीवपासंनिधानाद्भ्रांतिछेदनिषेधतः॥ अध्रिगुप्रैषेववचनमिदमाम्नायते॥ वनिष्ठुमस्यमाराविष्टउलूकं
न्यमानाइतिवनिष्ठुर्वपासमीपवर्ति कश्चित्पवर्गविशेषः तंमाराविष्ट। तस्यवलनंमाकुरुत॥ व्यत्ययेनलकारस्यरेफ
शेषोभिधीयते॥ कुतःरलयोरविशेषात्। पर्यंकः पल्यंकः रोमणिलोमानीत्यादिदर्शनात॥ अत्रोलूकशब्देनककाविरोधीकश्चिदुलूकनामापक्षि
क्षिसदृशंवनिष्ठुविवेकेन मन्यमाना माराविष्टेतिवाक्यार्थः तस्मादुलूकः पक्षीति प्राप्तेब्रूमः॥ उलूकशब्देनात्रवपालक्ष्यते
कुतः वनिष्ठसंनिधानात॥ सतिहिसंनिधावुलूकत्वभ्रांतिर्वनिष्ठौसंभवतिभ्रांति प्राप्तंचलवनमत्रनिषिध्यते॥ उलूकंमन्य
माना। वनिष्ठुंमाराविष्टेत्युक्तत्वात॥ वपालवनकालेभ्रांत्यावनिष्ठोर्यल्लवनं तस्यनिषेधेसति दृष्टोर्थोलभ्यते॥ भ्रांतिनि
र्णीतस्यदृष्टत्वात्पक्षेतुवनिष्ठोर्लवनमेवनास्ति॥ तच्चायुक्तंहृदयाद्यंगवल्लविंतव्यत्वात॥ वनिष्ठुमग्नीधेषडवत्तं संपाद
यतीत्याद्यनुष्ठानविधानात॥ ततोलवननिषेधस्यासमवेतार्थत्वेनादृष्टार्थोमंत्रपाठः प्राप्नुयात॥ तस्माद्वपसंवंधेनउ
लूकशब्दः यद्यपिवपायामप्रसिद्धः शब्दः तथाप्युरुविस्तीर्णमूकोमेदोयत्रेत्यवयवार्थद्वारा मेदस्विन्यांवपायांवुक्तः
उलूकशब्दः॥ एवंसत्यनेकवपास्वपिकृतिछेकवचनांतउरूकशब्दउहनीयः॥ ॥ पंचमाधिकरणमारचयति॥ ॥प्रश
सेत्यसिरर्थः स्यात्कृतिर्वाछेदनादसिः॥ स्कृतिः कार्त्स्न्यायवाह्वोः स्यात्स्वधितिश्छेदसाधनं॥ अध्रिगुप्रैषेवाक्यांतरमाम्ना

तंप्रशसावाहूइति॥ तच्चशसुहिंसायामित्यस्माद्धातोः सोपसर्गादुत्पन्नस्यसकारांतप्रातिपदिकस्य तृतीयेकवचनांतस्य
प्रशसेतिरूपंभवतितस्यासेर्वाचकं॥ तदेतत्केनचिद्ब्राह्मणवाक्येनचानूद्यते॥ दशप्रशाजानिष्ठाहशासमाहरेत्यसिंवैशासइ
त्याचक्षतइति॥ सोयमसिर्बाह्वोः छेदनहेतुः॥ तस्माद्दृष्टार्थलाभादसिः प्रशसेत्यस्य पदस्यार्थइतिचेतुमैवं॥ शसस्तुतावि
त्यस्माद्धातोरयमुत्पन्नः प्रशसावित्यस्यद्वितीयाद्विवचनांतस्यशब्दस्य छांदसऔकारलोपआकारादेशेचकृते प्रशसेतिभ
वति॥ बाह्वोः प्रशस्तत्वंनाम कार्त्स्न्यं॥ प्रशस्तौबाहूरुणुतादित्यक्तेनिःशेषेणाछेत्तव्यौबाहूइतिदृशोदृष्टार्थोलभ्यते॥ नात्रछे
दनसाधनत्वमसेः भवति॥ स्वधितेस्तत्साधनत्वेनविहितत्वात्तस्मात्कृतिस्वस्यशब्दस्यार्थः तथासतिबाहूद्धेबद्धबच
नांतत्वेन प्रशसेतिपदमूहनीयं॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ सादृश्यमुतसाकल्यंश्येनाद्युक्त्याविवक्षितं॥ प्रसिद्ध
संनिधेराद्यस्तत्त्वादखिलोहृतिः॥ अध्रिगुप्रैषवचएनैतदाम्नायते॥ श्येनमस्यवक्षः कृणुतादिति॥ तत्रयथामीपीठ
पिंडाः सिंहाः क्रियंतामित्युक्ते प्रसिद्धसिंहसंन्निधानात्पिष्टपिंडेषु सिंहसादृश्यंकर्तव्यंतथा प्रतीयते॥ तथैवास्यपशोः श्ये
नंकृणुतादित्यत्रश्येनसादृश्यंकर्तव्यंतथाप्रतीयते॥ ततोवक्षउद्धृत्यकर्तनादूपायेपेनेक्षचरणचंच्वादिकंसंपाद्यश्येनसं
स्थानंकर्तव्यमितिप्राप्तेब्रूमः॥ वक्षसिश्येनसादृश्यंस्वतएवपूर्वमस्तितोयभातंननश्यतितआसाकल्येनोद्धरणीयमितिवि
विवक्षयाश्येनेशब्दः प्रयुज्यते॥ तथासतिहविरधिकंभवति॥ अंसादिवनेनन्यायेनसाकल्यविवक्षयातत्रूपकोक्तिर्द्रष्ट
व्या॥ एतदेवाभिप्रेत्यश्रूयते॥ गात्रंगात्रमस्यानूनंकृणुतादिति॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ ज्योतिष्मतीभवेन्नो
वादर्शार्थोधृतलोपने॥ निमित्तसत्वात्स्यान्नाग्निहोत्रार्थोधृतिवर्जनात्॥ अग्निहोत्रप्रक्रियायामिदमाम्नायते॥ अग्न
येज्योतिष्मतेपुरोडाशमष्टाकपालंनिर्वपेत्यस्याग्निरुद्धृतोद्भुतेग्निहोत्रउद्वायेदिति॥ प्रतिदिनमग्निहोत्रंहोतुंगार्हपत्या
दुद्धृत्याहवनीयेग्निः प्रक्षिप्यते सोयमुद्धृतोग्निः कदाचिदहुतेग्निहोत्रेयदिशाम्यत्तदानीमियमिष्टिः प्रायश्चित्तमित्यर्थः॥
नत्रदर्शपूर्णमासार्थमुद्धृतस्याप्यग्नेः शांतौसेयंज्योतिष्मतीष्टिर्भवेत॥ कुतः अग्न्युद्वानस्यसद्भावादितिचेन्मैवं॥ अग्नि
होत्रार्थोद्धृतस्यैवाग्नेरुद्वानंनिमित्तमितिप्रकरणादवगम्यते॥ अनयाचेष्ट्याग्निहोत्रार्थेवाग्निः पुनरुत्पाद्यते॥ तथा
सत्यग्निहोत्रस्येयमिष्टिः सामयिकमंगंभवति॥ अतोग्निहोत्रार्थोद्धृतोद्वानस्यनिमित्तस्याभावान्नैमित्तिकीष्टिर्नप्र

255
1945

वर्तते॥ ॥अष्टमाधिकरणमारचयति॥ ॥धार्योद्धाने सास्ति नो वा सर्वार्थत्वे न विद्यते॥ गतश्रीत्वनिमित्तं तत्परार्थत्वान
विद्यते॥ इदमाम्नायते॥ धार्यो गतश्रीय आहवनीय इति॥ गतश्रीशब्दार्थस्तत्रैव श्रूयते॥ त्रयो ह वै गतश्रियो ब्राह्मणः
शुश्रुवान् ग्रामणी राजन्य इति॥ औवौ गोतमो भारद्वाज इति कल्पसूत्रकारः गतश्रीभिर्ध्रियमाणस्याहवनीयस्य सर्व
कामार्थत्वे सत्यग्निहोत्रार्थत्वमप्यस्तीति तदुद्धाने साज्योति ष्मतीष्टिर्विधत इति चेन्नैवं॥ न ह्यस्य धारणेग्निहोत्रं निमित्तं
किंतु गतश्रीत्वं सर्वकर्मसमुदायस्य चोदनया कदाचिदप्यचोदितत्वात्सर्वार्थत्वं शंकितुमप्यशक्यं॥ गतश्रीत्वं निमित्तीकृ
त्य धृतोग्निः प्रसंगात्सर्वकर्मस्वप्युकुर्वन् अग्निहोत्रेप्युपकारोतीति चेत्॥ उपकरोतु नाम नैतावता प्रायश्चित्तस्य निमित्तं ल
भ्यते॥ अग्निहोत्रार्थमुद्धृतस्योद्धानं तन्निमित्तं॥ न चात्र तदस्ति॥ किंत्वन्यस्य यस्य कस्यचित्कर्मणोर्थे समुद्धृतस्योन्निमित्तं लभ्य
ते॥ अग्निहोत्रार्थ सुद्धृतस्योद्धानं तन्निमित्तं गतश्रीत्वनिमित्तं साधारणं क्रियते तस्मान्निमित्ताभावान्नास्ति सेष्टिः॥ ॥नव
माधिकरणमारचयति॥ ॥दर्शार्थोद्धरणे वाचेत्यादिर्नो वा समंत्रकं॥ कर्तुस्यान्न निमित्तस्य कालस्यात्र विवर्जनात्॥ अस्त्य
ग्निहोत्रे वह्न्युद्धरण मंत्रः वाचा त्वा होत्रा प्राणेनाद्ध्वर्युणा चक्षुषाध्वर्युणा मनसा ब्रह्मणा श्रोत्रेणाग्नीधैतैस्त्वा पंचभिर्देवै ऋ
त्विग्भिरुद्धरामीति॥ सोयं मंत्रो दर्शपूर्णमासार्थे पिवह्न्युद्धरणे पठितव्यः कुतः॥ तदुद्धरणस्याग्निहोत्रेप्यंगत्वात्॥ उद्धृते
हि तस्मिन्नग्नौ पर्णाणि सायं प्रतिपदि प्रातश्चाग्निहोत्रमनुष्ठीयते॥ यदि तत्र मंत्रो न पठ्यते तदानीमग्निहोत्रांगमुद्धरणं
विगुणं स्यात्॥ ततः समंत्रकं कर्तुं मंत्रः पठनीय इति चेन्नैवं॥ अग्निहोत्रांगे समंत्रकाग्न्युद्धरणे निमित्तस्य कालस्याप्र
वान्नैमित्तिकं मंत्रकोद्धरणं नास्ति॥ ॥दशमाधिकरणमारचयति॥ ॥प्रदेयधर्माः स्युर्नो वा पयसि प्रायणीयगो॥ च
रुवत्स्युः पाकहेतुः सप्तम्या स्युर्न्न ते ततः॥ ज्योतिष्टोमे श्रूयते॥ आदित्यः प्रायणीयः पयसि चरुरिति तत्र चरुपयसो रुभ
योर्देवता संबंधेन प्रदेयद्रव्यत्वसाम्याद्यथा चरौ निर्वापावघातादयः समंत्रकाः प्रदेयद्रव्यधर्मा अनुष्ठीयंते॥ तथा पय
सि समंत्रकवत्सापाकरणादयः प्रदेयद्रव्यधर्मा अनुष्ठेया इति चेन्नैवं॥ आधारवाचिन्या पयसीति सप्तम्याश्रपणहेतुत्वाव
गमात्॥ ततो न ते धर्माः कर्तव्याः किंतु प्रणीयता धर्मा उत्पवनादयः तत्र कर्तव्याः॥ ॥एकादशाधिकरणमारचयति॥ ॥
पयो दध्नारभ्युदयेन ते स्युर्वा पुरेषते॥ प्रवृत्तत्वाद्देवयोगमात्रोक्तेः संतितेन्यपत्॥ अभ्युदयेष्टिरेवमाम्नायते विवाएतं प्र

या पशुभिरर्द्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदेति त्रेधा तंडुलान्विभजेद्ये मध्यमाः स्युस्ता
नग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं येणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते च
रुमिति॥ अयमर्थः॥ यस्य यजमानस्य दर्शकर्मार्थे हविर्भागत्वाच्चतुर्दश्यां निरुप्तं भवति॥ ततउषसि पूर्वस्यां दिशि चंद्रमा अभ्युदे
ति तं यजमानमध्वर्युः प्रजया पशुभिश्च वियोजयति॥ तदीयं च वैरिणं वर्द्धयति तत प्रवृत्तेस्मिं दर्शकर्मणि चंद्रोदयं निमित्तीकृत्य
पूर्वदेवतापतनयनेन तंडुलानां देवतांतरसंबंधः कर्तव्य इति तदिदं षष्ठेध्याये निर्णीतं॥ इह तु पूर्वोक्तप्रायणीयन्यायेन सप्तमी
द्विष्टयोर्दधिघृतयोः प्रदेयद्रव्यधर्मा न कर्तव्याः किंतु प्रणीता धर्मा इति प्राप्ते ब्रूमः॥ विषमो दृष्टांतं प्रायणीयस्य पूर्वमप्राप्तत्वा
द्रव्यं देवताश्रपणाया धारभूतं पयश्चेत्येवमनेके गुणा विशिष्टं क्रमे केनवाक्येन विधातुं शक्यं॥ इह तु कर्मणः प्रवृत्तत्वात्तस्मिन्क
र्मणि तंडुलानां नैमित्तिको देवतांतरसंबंधक एव गुणो विधातुं शक्यते॥ न तु दधिश्रृतयोः प्रणीतार्थत्वं गुणांतरं अनेकगुणविधौ
वाक्यभेदप्रसंगात्॥ तस्मात्तंडुलवत्प्रदेयत्वेन प्रवृत्तयोर्दधिश्रृतयोः प्रदेयधर्माः कर्तव्याः॥ ॥द्वादशाधिकरणमारचयति॥
॥ ॥न्यायः पशुकामेष्टौ प्रापणीयन योथवा॥ अल्पश्रुतित्वात्स्यादाद्यो पूर्वकर्मत्वतोंतिमः॥ इदमाम्नायते॥ यः पशुकामः
स्यात्सोमावास्यामिष्ट्वा वत्सानपाकुर्यादिति॥ तत्रेदमपरमाम्नातं॥ ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्या
द्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधितिचरुं येणिष्ठास्तान्विष्णवे शिपिविष्टाय श्रृते चरुमिति॥ तत्राभ्युदयेष्ट्या समानश्रुतित्वा
त्तेनैव न्यायेन सप्तम्याश्रपणाधारत्वावगमात्॥ प्रणीता धर्मा एवात्र कार्याः॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥मिश्र
णे पयआदीनां सोमधर्मा न वाग्रिमः॥ प्रदातुं मेलनान्नैवं संस्कारार्थत्वतः श्रुतेः॥ ज्योतिष्टोमे पयःप्रभृतिभिर्द्रव्यैर्ग्रहपा
त्रनिष्ठस्य सोमस्य मिश्रयणमाम्नातं॥ पयसा मैत्रावरुणं श्रीणाति सक्तुभिर्मंथिनं धानाभिर्हारियोजनं हिरण्येभ्येनः शुक्रमा
ज्येन पत्नीवतमिति॥ तत्र मिश्रणं सोमेन सह प्रदानार्थं॥ ततः प्रदेयस्य सोमस्य ये धर्माः क्रयादयः ते पयःप्रभृतिषु कर्तव्या इ
ति चेन्नैवं॥ मेलनस्य सोमसंस्कारार्थत्वात्॥ मैत्रावरुणमित्यादिभिर्द्वितीयाश्रुतिभिः सोमस्य प्राधान्यं गम्यते॥ पयसेत्यादिभिस्तृती
याश्रुतिभिः पयःप्रभृतीनां तादर्थ्यं ततः संस्कारकाणां प्रदेयत्वाभावान्न तद्धर्माः संति॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥स्प
र्शः परस्वदालंभो यागो वोत्सर्गतोग्रिमः॥ द्रव्यदेवान्वयात् यागो गरीतिविधिरुत्तरः॥ अश्वमेधे समाम्नायते॥ ईशानाय परस्वत

आलभेतेपर्यग्निकृतानारण्यानुत्सृजंतीतिपरस्वच्छब्देनारण्याः पशवोषाः उच्यंतेतेषामालंभः स्पर्शमात्रं कुतः पर्यग्निकृतानां
तेषापशूनामुत्सर्गविधानात्॥ यागपक्षेतदसंभवादितिचेन्मैवं॥ द्रव्यदेवतान्वयेनयागत्वावगमात्॥ ईशानायेतिदेवतायानिर्दे
शः परस्वतइतिद्रव्यस्यानहियागमंतरेणद्रव्यदेवतयोरन्वयः संभवति॥ पर्यग्निकृतोत्सर्गवाक्येनकृप्तोपकारप्राकृतपर्यग्निक
रणांतांगरीतिर्विधीयते तथाप्रत्यक्षविहितयानिराकांक्षईशानप्रयोगवचनोनचोदकमपेक्षते॥ तस्मादालंभोयागः इतरस्तत्र
गुणविधिः॥ ॥पंचदशाधिकरणमारचयति॥ ॥आज्येनशेषमित्युक्तौद्रव्यप्रतिनिधिर्भवेत्॥ कर्मान्यद्वाग्निमस्त्यागशेष
संस्थापनोक्तिभिः॥ अंगरीत्यासमाप्तत्वाद्देवतात्यनुवर्तनात्॥ साम्याछेषः संस्थितस्तुयागआलंभनादिवत्॥ त्वाष्ट्रं पात्नीवतं
मालभेतेतिप्रकृत्यपर्यग्निकृतंपात्नीवतमुत्सृजतीतिश्रुतं॥ तत्रपुनः श्रूयते॥ आज्येनशेषंसंस्थापयतीतितदिदमाज्यंपशुद्रव्यस्य
प्रतिनिधिर्भवेत्॥ कुतः उत्सर्गशेषसंस्थापनशब्दैस्तदवगमात्॥ पर्यग्निकरणादूर्ध्वंपशुद्रव्यस्यत्यागमभिधायाज्येनेतिद्रव्यां
तरंपशुस्थानीयं॥ स्थानभूतमुद्दिश्यचोदकप्राप्तमुत्तरकालीनमंगजातंतेनद्रव्येणसमापनीयमितिविधीयतइतिप्राप्तेब्रूमः॥
पूर्वाधिकरणन्यायेनांगरीत्यापत्नीवतः पशुः समाप्तः॥ यदीपात्नीवतंआलभेतेतिविहितस्यकर्मणः समाप्तिर्नस्यात्॥ केव
लंपशुद्रव्यत्यागः क्रियतेतदाविहितोद्रव्यदेवतासंबंधरूपोयागोनानुष्ठितस्यात्॥ ततोदेवतामुद्दिश्यत्यागोवश्यंकर्तव्यः॥ तथा
सतिपशुसाधनकेयागेमुख्येनपशुनैवसाधितेकुतः प्रतिनिधिः देवतोद्देशेत्यागस्यचोत्पत्तिवाक्येनैवसिद्धत्वात्पर्यग्निकरणो
त्सर्गवाक्येनांगरीतिविधानेसंस्थापनीयः शेषानकोप्यस्तितस्मादाज्यवाक्येनकर्मांतरंविधीयते॥ देवतातुपात्नीवतशब्दस्या
नुवृत्त्यालभ्यतेकर्मांतरत्वेपिशेषत्वमुपचर्यतेपश्वाज्यद्रव्यकयोः पूर्वोत्तरकर्मणोः पत्नीवदाख्यायादेवतायाएकत्वेनाव्यव
हितानुष्ठानेनचोपक्रमोपसंहारसदृशत्वात्॥ संस्थितिक्रियायाश्चालंभनिर्वापादिवद्योगोविवक्ष्यतेलिंगप्रत्ययश्चापूर्वभा
वनामभिधत्तेतस्मादाज्यद्रव्यकंपत्नीवद्देवताकंशेषवत्पशुयागसमनंतरभाविकर्मांतरमत्रविधीयते॥ ॥इतिश्रीमाधवी
येजैमिनिन्यायमालाविस्तरेनवमाध्यायस्यचतुर्थः पादः॥ ॥समाप्तश्चाध्यायः॥ ॥रूपांतरत्वाद्दासन्नंनवमेस्थितमू
हनं॥ निवृत्तित्वाद्विप्रकृष्टोदशमेबाधउच्यते॥ अतिदिष्टपदार्थस्यरूपांतरमूहनं॥ ततः सन्निकृष्यते॥ बाधस्तुपदार्थनि
वृत्तिः ततोविप्रकृष्यतेतस्मान्नवमदशमयोरध्याययोः पूर्वोत्तरभावउपपन्नः॥ ॥दशमाध्यायस्यप्रथमपादेप्रथमाधि

259
1945

करणेप्रथमवर्णकमारचयति॥ ॥वेदिःस्वयंकृतेत्यादौप्राकृतंसर्वमाचरेत्॥ लुप्तार्थबाध्यतांवाद्यश्चोदकप्रापितत्वतः॥
अपेक्षासन्निधियोग्यत्वहानेरुद्धननादिकं॥ बाध्यतेपेक्षितंसर्वंचोदकेनातिदिश्यतां॥ रत्निनामेतानिहवींषिभवंतीतिवाक्ये
नराजसूयेरत्निनामकदेवानांसंबंधानिकानिचिद्धवींषिदर्शपूर्णमासेष्टिविकृतिरूपाणिविहितानितेषुमैत्राबार्हस्पत्य
हविषिश्रूयते॥ स्वयंकृतावेदिर्भवति॥ स्वयंदिनंबर्हिः स्वयंकृतइध्मइति इष्टावुद्धननखननपरिलेखनामभिः क्रियावि
शेषैर्वेदिर्निष्पाद्यतेस्फ्यनोत्तमांत्वचमुद्धंतिदेवस्यसवितुः सवइतिखनतिस्फ्येनवेदिंपरिगृह्णातीतितद्विधानात्॥ द
र्शस्यघोषदसीत्यस्मिन्ननुवाकेप्रोक्तैर्मंत्रैदात्रच्छिन्नंबर्हिः संपाद्यतेत्रीन्परिधीनित्यादिमंत्रोपेताभिः क्रियाभिरिध्मः सि
ध्यतिविकृतिरूपेतुहविः षुद्धननाद्यपेक्षांवारयितुंस्वयमित्युक्तं॥ यथास्थितएवभूप्रदेशोवेदित्वेनस्वीकर्तव्यः इध्माबर्हि
षीअपिस्वतएवछिन्नेशास्त्रीयछेदननिरपेक्षेग्रहीतव्ये॥ इत्यर्थः॥ तत्रप्रकृतौसप्रयोजनानामुद्धननादीनांविकृतौप्रयो
जनंलुप्यते॥ उद्धननादिकृतस्यवेद्युपकारस्यस्वयंशब्देननिवारितत्वात्॥ बर्हिरास्तरणहविरासादनादयोवेदिधर्माविद्य
तावप्यलुप्तार्थाः तत्रसंशयः किंलुप्तार्थमलुप्तार्थंचसर्वमंगजातंविकृतावनुष्ठेयंउतलुप्तार्थंवर्जनीयमितिचोदकस्यसा
धारणत्वात्सर्वमनुष्ठेयमित्याद्यपक्षेप्राप्तेसिद्धांतंब्रूमः॥ अंगीह्यंगैरुपकृतः फलंसाधयतितत्रासत्यंगिन्यंगकृतउपका
रेसाक्षादपेक्षाउपकारद्वारात्वंगेषुप्रत्यासंनश्चांगिनंप्रत्यंगेभ्यउपकारःयोग्यतापिसाक्षादपेक्षांपूरयितुमुपकारस्यै
वास्तिनत्वंगानांवेदिनिष्पादनलक्षणदृष्टोपकारयुक्तानिप्रकृतावुद्धननाद्यंगानिविकृतौतुवेद्याः स्वतः सिद्धत्वेननिष्पा
दनोपकारोलुप्यतेततउपकारद्वारकेष्वाकांक्षासंनिधियोग्यत्वान्युद्धननाद्यंगेषुहीयंते॥ तस्मादुद्धननादीनिनानुष्ठेया
नि॥ सोयंचोदकप्रापितस्योद्धननाद्यनुष्ठेयत्वप्रत्ययस्यभ्रांतित्वेननिश्चयोबाधइत्युच्यते॥ चोदकस्यत्वलुप्तोपकारे
रुपकारद्वारेणाकांक्षासंनिधियोग्ययुक्तैर्हविरासादनाद्यंगैश्चरितार्थतासंपाद्यते॥ ॥द्वितीयवर्णकमारचयति॥ ॥
अवघातः कृष्णलानामस्तिनोवास्तिपाकवत्॥ प्रत्यक्षोन्नयाचरेत्पाकमघातेतुनास्तिसा॥ विकृतिरूपाणांकाम्येष्टीनां
कांडेपठ्यते॥ प्राजापत्यंघृतेचरुंनिर्वपेच्छतकृष्णलमायुष्कामइति॥ कृष्णलशब्दः स्वर्णशकलवाचीप्रकृतौव्रीहीन
वहंतीतिपुरोडाशहेतूनांव्रीहीणामवघातोविहितः सोत्रचरुहेतूनांकृष्णलानांचोदकवशादस्तिनोवेतिसंदेहः अस्ती

तिपूर्वपक्षप्रतिज्ञाविदुषीकरणंतत्रकृतउपकारः लुप्तेप्युपकारेतत्स्त्रार्यापाकवदितिनिदर्शनंलुप्तेपिलिङ्केदनोपकारेपा
कः प्रतिवादिनोभिमतः तद्वदवघातोप्यस्तु घृतेप्यपचतीति प्रत्यक्षोत्तया पाकोप्युपगतः अवघातेनुसोक्तिर्नास्तीतिवैष
म्यात्‌दवघातोनास्ति॥ ॥ तृतीयवर्णकमारचयति॥ ॥ वैश्वदेवस्यतंत्रेयः पक्षेविस्मुः सकिंपुराआवाह्योवानवावाह्यआग्ने
यांगातिदेशनात्‌॥ वैश्वदेवावाहनस्यकालस्याश्लेषवर्जनात्‌॥ विष्णुयागस्यसंदेहाविष्णोरावाहनंनहिकाम्येष्टिर्वंश्रूयते॥
वैश्वदेवंचरुंनिर्वपेद्भ्रातृव्यवांस्तंबर्हिषदं कृत्वाभिमृश्यास्फ्यनव्यूहेदिदमहंचामुंचव्यूहामीतियंद्विष्यात्तंध्यायन्यद ध्यावमृजे
तयचस्फ्यमाश्लिष्येत्तद्विष्णावुरुक्रमायावद्येदिति॥ अस्यायमर्थः॥ शत्रुक्षयार्थोयंचरुः तस्यप्रकृतिभूतादाग्नेयपुरो
डाशाद्विशेषउच्यते॥ पुरोडाशशेषंयागोत्तरकालेबर्हिष्यवस्थाप्यचतुर्णामृत्विजांभक्षविभागायहस्तेनचतुर्द्धाकुर्यात्‌॥ त
त्रइदंब्रह्मणइदंहोतुरिदमध्वर्योरिदमग्नीधइतितत्रअग्नानुक्त्वाअग्न्यपदिशेत्‌॥ अत्रचरुकर्मत्वान्नहस्तेनविभागः किंतुती
क्ष्णाग्रेणशाम्यास्फ्यनामकेनयज्ञायुधद्वयेनमंत्रेणेदमिदमहंब्रह्मभागंव्यूहामीत्येवमादिरूपंपठितिदित्येतावान्विशेषः य
दिकदाचिच्चरुलेशोव्यूहनकालेभूमौपतेत्‌॥ यज्ञायुधेवालिप्येततदातपतितंलिप्तंचरुलेशंतीव्रपराक्रमायशत्रुक्षयसम
र्थायविष्णवेवदेत व्यूहनकालेवदानकालेचशत्रुंक्षीणंध्यायेदिति॥ तत्रवैश्वदेविकतंत्रमध्येचरुलेशःस्याधःपातोश्ले
षणपक्षेवैष्णवयागोविहितः॥ अतोवैश्वदेविकेनुष्ठी तान्याघारप्रयाजाज्यभागादीन्यंगानिवैष्णवेपिप्रसंगादुपकुर्वंतीतिनपृ
थक्क्रियंते॥ आवाहनंत्वनुष्ठानवैषम्येणनप्रसंगात्सिद्ध्यतिविश्वांन्देवानावाहेतितत्रावाहनंअत्रतुविष्णुमावहेतिवैषम्यंसा
मिधेनीप्रयाजयोर्मध्यकालेहोत्रादेवतावाहनार्थोनिगदः पठ्यते॥ सोयंवैश्वदेवावाहनस्यकालः नखलुतदानींविष्णुःप्रस
क्तः प्रयाजाज्यभागप्रधानयागनारिष्ठहोमचतुर्धारणेष्वनुष्ठितेष्वाश्लेषणपक्षेवैष्णवयागस्यप्राप्स्यमानत्वात्‌॥ अतोप्रस
क्तोपिविष्णुर्भविष्यद्यागसिद्ध्यैपूर्वस्मिन्काल आवाह्यनवेतिसंदेहः॥ अवाह्यश्चोदकवशादितितावत्प्राप्तं॥ नचवैष्णवस्य
वैश्वदेवविकृतित्वान्नास्तिचोदकइतिशंकनीयंतयोरुभयोरप्यग्न्याधेयविकृतित्वेनोभयत्राप्याग्नेयांगानामतिदेशात्‌॥
तस्मान्मान्यानाविप्रादीनामतिमंत्रेणभोजनार्थगमनादर्शनात्‌॥ मान्यतमायादेवतायाअनावाहनेहविःस्वीकारत्वस्य
दूरापेतत्वादप्रसक्तोपिविष्णुर्भविष्यद्यागसिद्ध्यर्थमावाह्यइतिप्राप्तेब्रूमः॥ किंवतुर्द्धीकरणादूर्ध्वमावाह्यतेकिंवाप्रयोजनः

261
1961

पुरा॥ नाद्यः अकालेकृतमकृतंस्यादितिन्यायेनावाहनस्यनिरर्थकत्वात्‌॥ नद्वितीयः विष्णुयागनिमित्तस्यभविष्यदाश्ले
षणस्यपाक्षिकत्वेननैमित्तिकस्यविष्णुयागस्यापिपाक्षिकत्वात्‌॥ तथासत्ययागपक्षेकृतमावाहनमनर्थायैवस्यात्‌॥
नहिनिमंत्रितोविप्रादिरभ्योजितःसंतुष्यति॥ प्रत्युतशपत्येव॥ एतदेवाभिप्रेत्यश्रूयते॥ देवताभ्योवाएषआवृश्च्यतेयो
यक्ष्यइत्युक्त्वानयजतइतियागपक्षेतुविनाप्यावाहनंयागउपपद्यतेकदाचिदनिमंत्रितानामपिपूज्यानांस्नेहातिशये
नस्वयमेवभोक्तुमागच्छतांलोकेदृष्टत्वात्‌॥ तस्मान्नास्तिविष्ण्वावाहनं॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ आरंभ
णीयासोमांगदीक्षणीयादिषुवानवा॥ अलोपादादिमोत्याःस्यादारंभद्वारलोपनात्‌॥ दर्शपूर्णमासयोरारप्स्यमानःपुरु
षसंस्कारार्थमारंभणीयेष्टिर्विधीयते॥ आग्नावैष्णवमेकादशकपालंनिर्वपेद्दर्शपूर्णमासावारप्स्यमानइतिसेयंसोमया
गांगभूतासुदीक्षणीयादिषुदर्शपूर्णमासेष्टिविकृतिषुकर्तव्यानवेतिसंदेहः॥ दर्शपूर्णमासेष्ट्यंगभूतायाआरंभणीयायाः
तासुप्रयाजादिवच्चोदकप्राप्तायालोपकारणाभावात्कर्तव्येत्याद्यः पक्षः किमारंभणीयात्रक्रियमाणासतीसोमयाग
मारप्स्यमानस्यसंस्कारःस्यात्‌॥ किंवादीक्षणीयामारप्स्यमाणस्यनाद्यःसोमयागस्यदर्शपूर्णमासविकृतित्वाभावेन
सोमयागमारप्स्यमानस्यचोदकेनान्वारंभणीयायाअप्राप्तत्वात्‌॥ नद्वितीयः अंगानांदीक्षणीयादीनांपृथगारंभा
संभवात्‌॥ ननुदीक्षणीयायास्तंत्रंप्रकल्पयतीतिकल्पसूत्रकारैःपृथगारंभोभिहितः॥ मैवं॥ आस्यारंभस्यपुरुषसंस्का
रार्थेष्टिंप्रत्यप्रयोजकत्वात्‌॥ अन्यथाततःप्रागनुष्ठितानामृत्विग्वरणादीनामसंस्कृतपुरुषानुष्ठानंप्रसज्येततस्मादारं
भस्यद्वारलोपादारंभणीयालुप्यतइत्यंतिमःपक्षोभ्युपगंतव्यः॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ साकिमस्त्यनु
मत्यादौनवांगिन्यस्तुपक्रमात्‌॥ संघस्योपक्रमेणेष्टेद्वारस्तुलोपान्नसाभवेत्‌॥ अनुमत्यैपुरोडाशमष्टाकपालंनिर्वपतीत्या
दिनाराजसूयेदर्शपूर्णमासेष्टिविकृतयोविहिताः॥ तासुसारंभणीयास्तिनवेतिसंशयः॥ दीक्षणीयादिवदनुमत्यादीनाम
न्यांगत्वाभावात्‌॥ सोमयागवत्सर्वासामंगित्वेनोपक्रमसंभवात्‌॥ तद्द्वारेणारंभणीयास्तीतिपूर्वःपक्षः यद्यप्यंगीभूताअ
नुमत्यादयः तथाप्येकैकस्याइष्टेःपृथगारंभोनास्तिअन्यथाप्रधानेष्वाग्नेयादिष्वारंभणीयायाःषट्कृत्वोनुष्ठानंप्रसज्ये
त॥ अथोच्यतप्राधानानांषण्णामाग्नेयादीनांसंघस्यदर्शपूर्णमासेष्टित्वात्तस्यैकआरंभइतितर्ह्यत्रापीष्टिपशुसोमदर्वि

होमद्रूपाणामनेकेषां प्राधानानां संघस्यरालसूर्यत्वात्संघस्यैवोपक्रमोस्तु॥ नचासौ संघो दर्शपूर्णमासविकृतिः येनतत्रारंभणी
या शंक्येत॥ अस्तिचापरः सर्वारंभार्थोयागः॥अग्निष्टोममग्नेर्ज्योतिष्टोममाहरतीतिज्योतिष्टोमार्वातरसंस्थाभेदरूपस्याग्निष्टो
मस्याम्नानात्॥ तस्मादनुमत्यादिविशिष्टिष्वारंभद्वारस्यलोपात्सारंभणीयानभवेत्॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥तस्यां
सास्तिनवांगत्वेप्यस्याः पृथगुपक्रमात्॥अस्तिमैवंवचोशक्केर्विधानेचातिदेशने॥ येयमारंभणीया सापीष्टित्वाद्दर्शपूर्णमास
विकृतिः अतस्तस्यामपिदर्शपूर्णमासयोरिवारभ्यमानपुरुषसंस्कारायसानुष्ठेयानवेतिसंशयः॥चोदकप्राप्तत्वादनुष्ठेया
ननुसोमांगदीक्षणीयादिवदस्यादर्शपूर्णमासांगत्वेनारंभद्वारंलुप्यतेनवैषम्यात्॥ जर्तिलिग्वरणादिना सोममारभ्यानुतिष्ठत
पुरुषस्यानुष्ठानमध्येदीक्षणीयाप्रवर्तते॥दर्शपूर्णमासारंभस्त्वारंभणीयायामनुष्ठितायां पश्चात्संपद्यते॥ ततोदर्शपूर्णमा
सोपक्रमोसोपक्रमादन्य आरंभणीयोपक्रमइतिद्वारसद्भावादारंभणीयामारभ्यमानस्वसंस्कारार्थमन्यामारंभणीयांकुर्या
त्॥ अनवस्थातुल्लोकसिद्धबीजांकुरादिदृष्टांतेनसमाधेयेवंप्राप्तेब्रूमः॥आरंभणीयायामारंभणीयांतरंनकर्तव्यं॥कुतः
अंगांतरवादतिदेशुमशक्यत्वात्॥तथाहिप्रकृतौसमिधोयजतीत्यादिवाक्यैः प्रयाजाद्यंगानांस्वरूपमुपदिश्यते॥ प्रकरणेन
चांगांगिभावोबोध्यतेततः सौर्यंचरुंनिर्वपेद्ब्रह्मवर्चसकामइत्यादिकायांविकृतौ।वनिर्वापलिंगानुमितंचोदकवाक्यमेवं
प्रवर्तते॥ इष्टिवत्सौरोप्रयाजाद्यंगान्यनुष्ठेयानीति॥एवंचसत्यारंभणीयायावक्तव्यं॥ किमाग्नावैष्णवमेकादशकपालंनिर्व
पेद्दर्शपूर्णमासावारभ्यमानइत्येतद्वाक्यंसमिदादिवाक्यवदंगभूतामारंभणीयांविदधातुकिंवायथासौर्यादिवाक्यमंगा
तिदेशमनुमापयति॥ दर्शपूर्णमासांगभूतायामारंभणीयायामन्यस्याआरंभणीयायाअतिदेशमनुमापयतुउतोभयंकरो
त्विति नाद्यः अंगविधावुपक्षीणत्वेनातिदेशानुमानेशक्त्यभावात्॥ नद्वितीयअविहितत्वेनादृष्टमयोग्यस्यांगस्यातिदेश
स्याभावात्॥ नतृतीयः वाक्यभेदापत्तेः नन्वनेनन्यायेनसौर्यवाक्येपिवाक्यभेदः॥प्रसज्येत॥एकस्यैववाक्यस्ययाग
विध्यंगातिदेशयोः प्रवृत्तत्वात्॥ मैवं॥वाक्यद्वयसद्भावात्प्रत्यक्षंवाक्यंयागविधायकं॥अनुमितंवाक्यमातिदेशकंतर्हि
शपिताद्दशावाक्यद्वयंभवत्विति चेत्॥बाढं।अतएवारंभणीयायांप्रयाजाद्यंगान्यनुष्ठीयंते॥ तद्वदारंभणीयांतररूपमपं
गमनुष्ठीयतामितिचेत्।न॥दर्शपूर्णमासप्रकरणेप्रयाजाद्यंगविधायकसमिदादिवाक्यवदारंभणीयांतररूपांगविधा

स्थानीयत्वं अतिदेशायसौर्यवाक्यस्थानीयत्वंचेत्याकारद्वयंवर्णनीयं॥ तथासत्यावृत्तिलक्षणोवाक्यभेदः केनवार्येततस्मादारं
भणीयायामारभ्यमानपुरुषसंस्कारायारंभणीमातरंनकर्तव्यं॥ ॥पंचमाधिकरणमारचयति॥ ॥ यूपाहुतिः खलेवाल्यां
कार्यानोवातिदेशतः॥ कार्याहोमश्छेदनार्थोनाछेद्याभावात्सयुज्यते॥ अस्तिसाद्यस्कोनामकः कश्चित्यागः सद्यस्क्रियानुक्रियाप
रिक्रियावास्वर्गकामइतितद्विधानात्॥संतिसाद्यस्काः पशवः सहपशूनालभतइतिश्रुतेः तेषुपशुषुवेदस्यत्तरवेदियूपाः शास्त्री
यसंस्कारनिरपेक्षाएवगृह्यंते॥अतएवाश्वलायनआहः॥साद्यस्केपूर्ववेदिः खलेवालीयूपइति॥ खलेबलीवर्दबंधनाय
निखातोमेढिः खलेवालीतेषांचपशूनामग्नीषोमीयपशुविकृतित्वात्तदीययूपकार्याः पशुनियोजनादयः खलेवाल्यांक्रियंते
तथाप्रकृतौयूपमासुंगमिष्यतः पुरुषस्याहुतिर्विहिता॥ यूपमछेष्यताहोतव्यमितितांचाहुतिमापस्तंबोदर्शयति॥उरु
विष्णाविक्रमस्वेतिस्रुवेणाहवनीयेयूपाहुतिंजुहोतीति॥सेयमाहुतिः खलेवाल्यांकार्यानवेतिसंशयः तद्धर्मातिदेशात्
पशुनियोजनादिवकार्येतिपूर्वःपक्षः॥ यूपमछेतिवाक्यस्यायमर्थः॥ मयूपंखादिरादिकाष्ठविशेषंशास्त्रीयछेदनादिसं
स्कारैर्यूपीकर्तुंकाष्ठस्यशास्त्रीयछेदनयोग्यतायेहोमः कर्तव्यइति॥ नहिखलेवाल्याः शास्त्रीयछेदनमस्तिपूर्वमेवछिन्न
स्यकाष्ठस्यकृषीवलैः खलेनिखातत्वात्॥ ततः छेदनद्वारलोपादाहुतिर्नविद्यते॥ ॥ षष्ठाधिकरणमारचयति॥ ॥तस्यां
स्थाण्वाहुतिः कार्यानवास्थाणोविधानतः॥कर्तव्योपकरोत्यारात्पशौसाप्रकृताविव॥ यूपीयाश्वनस्थाणुद्वारासौयू
पसंस्कृततः॥ स्वग्वत्तत्संभवात्सेयमयूपाद्विनिवर्तते॥ अग्नीषोमीयप्रकरणेस्थाण्वाहुतिंजुहोतीतिश्रूयते॥ यूपेच्छेदनेन
त्यवशिष्टंवृक्षमूलंकाष्ठंयूपत्वेनस्थाणुरित्युच्यते॥ तत्राहुतिविशेषएवंश्रूयतेवनस्पतेशतवल्शोविरोहेत्याश्वनेजुहोती
ति॥ सेयमाहुतिस्तस्यांलैखवाल्यांकार्यानवेतिसंशयः स्थाणुमुपजीव्याहुतिविधानात्। खलेवाल्यामपिस्थाणुत्वात्॥ सा
कर्तव्या॥ नचलैखवाल्याः शास्त्रीयसंस्काराभावेनाहुतिर्व्यर्थेतिशंकनीयं॥पशावारादुपकारकत्वात्॥ यथाप्रकृतौ
यूपाद्वियोजितस्याश्वनस्थाणोरसंस्कार्यत्वेनपशावुपकारस्तद्वदितिप्राप्तेब्रूमः॥ आवृश्च्यतेस्मादित्याश्वनम
वसिष्टंवृक्षमूलंनखलुस्थाणुमात्रमाश्वनमात्रंवोपजीव्येयमाहुतिः प्रवृत्ताकिंतर्हियूपप्रकरणबलेनयूपीयाश्व
श्वनस्थाणुत्वमुपजीव्यप्रवृत्ता॥ ततस्तद्वारेणासावाहुतिर्यूपसंस्कृतिस्यात्तथाचदृष्टसंस्कारसंभवत्यदृष्टमारादुप

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY
263
1945

कारकत्वं कल्पयितुमयुक्तं॥ नच यूपवियोजितस्थाणुगतातिशयेन यूपसंस्कारो न संभवति॥ यूपसंबंधित्वेन तत्संभवात्
॥ तथाचार्यस्य देवदत्तस्य शिरसोवतारितायामपि स्रजः शिष्यणशिरसि चिदेशेवस्थापनं तत्संबंधादाचार्यस्यैव संस्कारायाव
कल्प्यते तद्वत्॥ अतो यूपसंस्कारार्थेयमाहुतिरयूपात्मिकायाः स्वलेवात्यानिवर्तते॥ ॥ सप्तमाधिकरणमारचयति॥
॥ ॥ अंत्यः प्रयाज आरात्किमुपकार्यथ संस्कृतिः॥ स्वाहाकारेति देवाक्तेमात्वन्मंत्रवर्णनात्॥ आद्योमैवंचतुर्थ्यादेरभावा
द्याग पात्रके॥ विधिस्तयात्र सौर्यादावर्थ्योग्न्यादिनिवर्तनं॥ दर्शपूर्णमासेष्टौ पंचमः प्रयाज एवमाम्नायते॥ स्वाहाकारं
यजतीति स किमिष्टे राराडुपकारकः उताज्यभागादिषु यक्ष्यमाणानामग्न्यादिदेवतानां संस्कारक इति संशयः तत्र स्वा
हाकारशब्देन योज्यते यागस्य तदाकांक्षणात्॥ नच प्रत्यक्षवचनमुपेक्ष्य मंत्रवर्णाद्देवताकल्पनमुचितं॥ नन्वेवं सति
विधिमंत्रयोर्वैयधिकरण्यं प्रसज्येत॥ विधिना हि स्वाहाकाराख्या देवता विहिता मंत्रे तु यक्ष्यमाणाज्यभागादावग्न्या
दिदेवताः प्रतीयंते॥ स्वाहाग्निं स्वाहा सोमं स्वाहा प्रजापतिं स्वाहाग्नीषोमावित्यादिकोहि तन्मंत्रः नायं दोषः मातृशब्दव
न्मंत्रवर्णिकाग्न्यादिशब्दानामनेकार्थत्वसंभवात्॥ यथा मातृशब्दः प्रस्थानादिना धान्यस्य मातरं जननीं वा चष्टे॥ तथा
ग्न्यादिशब्दाः स्वाहाकाराख्यदेवतामाचक्ष्यतां॥ नच स्वाहाकाराख्यदेवतयैव संस्क्रियतामिति वाच्यं॥ स स्कृतायास्त
स्या अन्यत्रोपयोगाभावात्॥ तस्मादिष्टेराराडुपकारक इत्याद्यः पक्षोभ्युपगंतव्यः मैवं चतुर्थ्या तद्धितेन वा सर्वत्र देवताऽवि
धीयते॥ नचात्र तौ विद्येते॥ किंचायं विधिर्देवतायागावुभौ विधत्ते देवताविशिष्टयागं वा॥ देवतामात्रं वा यागमात्रं वा नाद्यः वाक्य
भेदापत्तेः॥ न द्वितीयः गौरवप्रसंगात्॥ न तृतीयः अप्राप्तस्य यागस्याननुवाद्यत्वे सति तदनुवादेन देवताविध्ययोगात्॥ त
स्माच्चतुर्थः परिशिष्यते॥ तत्र च द्वितीयांतस्वाहाकारशब्दः पौर्णमासीयजेतइत्यादाविव कर्मनामधेयं भविष्यति॥ त
स्मादाज्यभागादिदेवतासंस्कारः उत्तमप्रयाजः एवंच सति सौर्यादिविकृतिषु उत्तमप्रयाजमंत्रे प्रधानदेवतावाच्यग्न्या
दिपदपरित्यागो बाधविचारांतर्गतस्यास्याधिकरणस्य फलं भविष्यति॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ आज्य
भागायआग्नेयः किंमुख्याग्नेः स संस्कृतिः॥ आराडुतोपकारी स्यात्पूर्वन्यायेन संस्कृतिः॥ निगदेग्नेर्द्विरुक्तत्वाद्विध
यिकपदोक्तितः॥ उपकारीतेन सोग्निः सौर्यादौ न निवर्तते॥ दर्शपूर्णमासयोराम्नायते॥ आज्यभागावग्नीषोमाभ्यां यजती

265/1945

ति॥ तयोः प्रथम आग्नेयः द्वितीयः सौम्यः तत्र सौम्यस्य नास्ति संदेहः प्रधानदेवतास्वकेवलस्य सोमस्याभावात्॥ अग्निस्तुके
वल आग्नेयपुरोडाशेपि विद्यते॥ तस्मादाग्नेय आज्यभागः पुरोडाशदेवताया अग्नेः संस्कार उतेष्टेराराडुपकारक इति संदिह्यते॥
तत्र यथोत्तमः प्रयाजो मंत्रोक्तानां यक्ष्यमाणदेवतानां संस्कारः तथा प्रथममाज्यभागोप्यग्निमग्न आवहेति निगदोक्तस्य प्र
धानयागदेवतारूपस्याग्नेः संस्कार इति पूर्वः पक्षः॥ अत्रोच्यते॥ निगदस्तावदेवं पठ्यते अग्निमावाह सोममावाह अग्निमाव
हेति॥ अस्यायमर्थः॥ भोआहुत्यधिकरणभूताग्ने हविर्ग्राहिणआज्यभागद्वयाष्टाकपालपुरोडाशदेवतारूपानग्निः सोमाग्नि
रित्येतांस्त्रीनिहस्थानावहेति॥ तत्र पुरोडाशदेवतारूपादग्नेः प्रथममाज्यभागदेवतारूपोग्निरन्य इति गम्यते॥ अन्यथा वाह्यस्याग्नेरेक
स्य द्विरुक्तिवैयर्थ्यात्॥ सतः प्रथमाज्यभागइज्यमानस्याग्नेः पुरोडाशदेवताभावात्तत्संस्कारकत्वमयुक्तं॥ किंचाज्यभागवि
धावग्नीषोमाभ्यां यजतीति देवताद्वयं समस्तेनैकेन पदेनोच्यते॥ तत्र यथा सोमस्य यागं प्रति गुणत्वं भवताभ्युपगतं तथाग्नेरप्य
भ्युपगंतव्यं तच्च संस्कारपक्षे विरुद्धं॥ संस्कार्यत्वेन प्राधान्यावश्यंभावात्॥ तस्मात्संस्कारपक्षासंभवात्प्रथमाज्यभागोद्वि
तीयाज्यभागवदिष्टेराराडुपकारकः एवंच सति सौर्यागेपि प्रथमाज्यभागोग्निर्न निवर्तत इति बाधापवादविचारफलं भ
विष्यति॥ ॥ नवमाधिकरणमारचयति॥ ॥ उपकारी संस्कृतिर्वा पुरोडाशः पशुदैवतः॥ तद्धितोक्त्याद्ययोर्देवभेदादुपकृतिम
ता॥ संदंशान्निश्चिते गत्वेदृष्टोर्थः॥ स्मृतिसंस्कृतिः देवांतरं चेद्विकृतावग्नीषोमानिवर्तिनं॥ ज्योतिष्टोमांगभूताग्नीषोमीय
पशोरुच्यते॥ अग्नीषोमीयस्य वपायां प्रचर्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपतीति॥ तत्र पशावुक्तो यः पु
रोडाशः स किं पशोराराडुपकारकः उत पशुदेवतासंस्कारक इति संदेहः तत्राग्नीषोमीयं पशुमालभेतेति पशुविधौ तद्धिते
नाग्नीषोमदेवताया यथा गुणत्वं पशोर्विधीयते॥ तथा पुरोडाशे तथा सति विधिभेदेन विधेयदेवताभेदात्संस्कारो नयुक्तः गुण
त्वं च संस्कार्यत्वाविरोधीति पूर्वोक्तं॥ तस्मात्पशोराराडुपकारक इति प्राप्ते ब्रूमः॥ देवताभेदवादिनस्तावदिदं वक्तव्यं॥ पशुपु
रोडाशस्वल्पकयोः किं स्वतंत्रो यागो किं वांगांगिरूपौ तत्रापि किमंगं किं वांगीति तत्र पशुधर्मैरुभयतः संदष्टस्य पुरोडाशस्य
स्वतंत्रत्वांगित्वयोः पशुप्रकरणपाठबाध्येतत्वदभिमतमुपकारत्वं च न सिध्येत्॥ अंगत्वेपि दृष्टसंभवाद्दृष्टकल्पनमन्या
य्यं संभवति च त्वत्र दृष्टं पुरोडाशवाक्यगतेन तद्धितांतपदेन पशुवाक्यविहिताया देवताया अनुवादे सति तदीयस्मरणपूर्वक
निर्वापेण पशुदेवतायाः संस्क्रियमाणत्वात्॥ एवंच सति पशुवाक्ये गुणत्वेन मतीतायाअपि देवतायाः पुरोडाशवाक्येप्राधा

अ० कर० माला० न्यायगमात्संस्कार्यत्वमविरुद्धं॥ तस्मात्प्रकृदेवतासंस्कारः पुरोडाशः॥ एवं च सत्यग्नीषोमीयपशुविकृतौ वायव्यपशावग्नीषोमी
यदेवतायां निवृत्तायां तदीयपुरोडाशोपि निवर्तत इति बाधः फलिष्यति॥ ॥दशमाधिकरणमारचयति॥ ॥सौर्यं चरौ चरुः स्थाली
१३३ किं वान्नं लौकिकोक्तितः॥ स्थाल्यस्याश्रपणयोग्यं कपालविकृतित्वतः॥ विद्धश्रुतिप्रसिद्ध्यान्नं देवतातद्धिताङ्कितः॥ योग्यत्वेन प्रदे
यं तत्पुरोडाशवद्विवक्ष्या॥ सौर्यं चरुं निर्वपेदित्यादिवाक्यचरुशब्दः किं स्थाली। उत किं वोदनमिति संदेहः॥ तत्र लौकिका आढ्यम
त आकुमारीभ्यः सर्वेपि स्वस्वदेशीयभाषाप्रसिद्ध्या यत्किंचित्तकारवकाराद्यक्षरमुपरि प्रक्षिप्य चरुशब्देमल्पपात्रपाकादिकरण
ताम्रादिमेव प्रयुंजते॥ निघंटुकाराश्चोखा स्थाली इत्येवमादीन्येव शब्दान् पर्यायत्वेन पठंति॥ तस्माच्चरुशब्दः स्थाली। किं चौदनस्य
अदनीयत्वाभावेन पुरोडाशवत् प्रदानयोग्यता न स्यात्॥ तर्हि माभूत्पुरोडाशविकृतित्वं पुरोडाशाधिष्ठानकपालविकृतित्वं तु भवि
ष्यति॥ श्रपणयोग्यतायाः सद्भावात् यथा कपालेषु हविः श्रप्यते तथा स्थाल्यामपि श्रपयितुं शक्यते तस्माच्चरुः स्थालीति प्राप्ते ब्रूमः॥
अन्नमेव चरुशब्देनोच्यते॥ कुतः श्रुतिप्रसिद्धेः आदित्यः प्रायणीयश्चरुरिति विधायकवाक्यशेषे ह्यदितिमोदनेनेत्योदनश
ब्देन चरुरनूद्यते॥ यदि भाष्यान्ने चरुशब्दः क्वापि न प्रयुज्येत तथापि ओदनविशेषवाची चरुशब्दोस्तु तत्र विद्वत्प्रसिद्धेः विद्वांसो याज्ञि
काः शब्दैकगम्यधर्मव्यवहारिणः॥ शब्दार्थाविव्यवेतात्पर्यवंतो न वस्त्रावितां तरुष्मपक्केजीवतंडुले विशदसिद्ध ओदने च
रुशब्दं प्रयुंजते॥ सत्योदनवाचित्वे सौर्यमिति तद्धितोप्युपपद्यते॥ यथाग्नेयमिति तद्देवतातद्धितसंयुक्तः पुरोडाशः प्रदेयद्रव्यं
तथा चरुरपि॥ अन्ये च निघंटुकारा हव्यपाके चरुः पुमानिति पठंति॥ तस्माच्चरुशब्दोन्नवाची॥ ॥एकादशाधिकरणमार
चयति॥ ॥चरुः कपाले पक्तव्यः क्वापि वा पिठरेथवा॥ कपालेचोदकप्राप्तेरनपूपत्वतः क्वचित् स्थाल्यां चरुत्वयोग्यत्वात्क
टाहयोग्यता न हि॥ चिंताद्वयफलं त्वत्र पेषणादिनिवर्तनं विषयसंशयनिर्देशकं पूर्वार्द्धस्य श्लोकार्थः॥ यथा प्रकृतौ पुरोडाशस्य अ० २४
कपाले पाकः तथा विकृतौ चरोरित्याद्यः पूर्वः पक्षः॥ पुरोडाशस्यापूपत्वात्कपालगतोष्मणा पाकः संभवति चरुस्त्वोदनत्वा १३३
दुदकगतोष्मणा पक्तव्यः॥ अतो प्राप्तत कार्यत्वाच्चोदकप्राप्तिर्नास्तीति यद्युच्येत तर्हि अनपूपस्य चरोरुदकधारणयोग्ये क
टाहप्रदादौ यत्र क्वापि पाक इति द्वितीयः पूर्वः पक्षः॥ निरुप्तानां मुष्टिचतुष्टयपरिमितानां तंडुलानामल्पेनैव पात्रेण पक्तुं यो
ग्यत्वाच्चरोः स्थाल्यामेव पाक इति राद्धांतः पूर्वत्र चरुरोदन इति चिंतितं तन्नलोदने॥ पेषणादिरस्ति॥ अतः पेषणादिनिवृत्तिः॥
पूर्वचिंतायाः साक्षात्फलं तद्द्वारेण चरुनिष्पादकस्थालीचिंताया अपि फलमित्युपचर्यते॥ पेषणादीन्यनुक्रामति॥ पेषणं

267
1945

यवनं वापस्तापश्चोपहितिः प्रथा॥ मार्जुनाध्यूहनज्वालास्तथाव्युद्धत्यसादनं॥ पेक्षणं चूर्णनं॥ यवनं पिष्टस्योदकमिश्रणं॥ वा
प उदकश्रपणाय पिष्टस्य पात्रे प्रक्षेपः॥ तापः कपालानामंगारैः प्रतापनं॥ उपहितिरंगारेषु कपालस्थापनं॥ प्रथा कपाले घृतस्था
पितस्य पुरोडाशस्य हस्तसंघट्टनेन सर्वेषु कपालेषु प्रसारणं मार्जुनं श्लक्ष्णीकरणं॥ अध्यूहनं भस्मनांगारैश्चोपर्याच्छादनं ज्वाला
दर्भपुंजीलैः प्रज्वालनं॥ व्युद्धृत्यसादनं कपालेभ्यः पुरोडाशं पृथक्कृत्यांतर्वेद्यवस्थापनं॥ ननु पेषणादिनिवृत्तेः पूर्वाधिकरणद्व
यफलत्वे किमिति सूत्रकारः प्रत्येकं सूत्रैर्विचारितवानित्याशंक्य मंदमिति व्युदासयेत्याह॥ एतानि मंदप्रज्ञस्य कर्तव्यानीति वि
भ्रमः॥ अपूपस्यैव योग्यानीत्येतत्सूत्रैर्निरूपितं॥ ॥इति माधवीये जैमिनिन्यायमालाविस्तरे दशमाध्यायस्य प्रथमः पादः॥
द्वितीयपादस्य प्रथमाधिकरणमारचयति॥ ॥नास्त्यस्ति वा कृष्णलेषु पाकः श्रौतोप्यसंभवी॥ अदृष्टार्थतया सस्यादोष्ठो
तुस्कन्नसंभवत्॥ घृतेश्रपयतीति प्रत्यक्षश्रुति विहितोपि पाको विक्लेदनायोग्येषु न कर्तव्य इति पूर्वः पक्षः॥ दृष्टस्य विक्लेदनस्यासं
भवेप्यदृष्टार्थः पाकः कर्तव्यः॥ अन्यथा विधिवैयर्थ्यापत्तेः यदा तु पाकशब्द औष्ण्यवाची तदा न कोपि विवादः॥ ॥द्वितीयाधिक
रणमारचयति॥ ॥उपस्ताराभिघारौ स्तस्तेषु नो वाद्यं भवेत्॥ अदृष्टार्थमसंसक्तिः दृष्टं तन्नेति लुप्यते॥ तेषु कृष्णलेषुपस्तरणमभि
घारणं चेत्येतदुभयं पाकवददृष्टार्थं कर्तुमिति पूर्वः पक्षः॥ न तावत्यायकदत्र प्रत्यक्षविधिरस्ति चोदकस्तु दृष्टद्वारमपेक्षते॥ प्रकृता
वुपस्तरणाभिघारणयोर्दृष्टार्थत्वात्॥ सूक्ष्माणां पुरोडाशावयवानां कचित्संसक्तिं निवारयितुं तदुभयं क्रियते॥ कृष्णलानां तु संस
क्तिप्रसंग एव नास्ति॥ अतस्तन्निवारणलक्षणं द्वारं नास्तीत्युपस्तरणाभिघारणद्वयं लुप्यते॥ ॥तृतीयाधिकरणमारचयति॥ ॥
भक्षो नास्त्यस्ति वा तेषु नास्ति प्रीतेरभावतः॥ चुश्चकाकारनिर्देशनवचनात्स्यात्प्रदानवत्॥ यथा पुरोडाशे प्राशित्रादिभागो भक्ष्यते
न तथा तेषु कृष्णलेषु भक्षोस्ति प्रीतिरूपस्य दृष्टद्वारस्याभावादिति पूर्वः पक्षः॥ चुश्चकाकारं भक्षयंती निर्धयंतो भक्षयंतीति
प्रत्यक्षवचनमाम्नायते॥ इक्षुदंडभक्षणेन तद्रसस्वीकारे चयः शब्दविशेषस्तस्यानुकरणं चुश्चषेति घृतेनिरुप्तेषु कृष्णलेषु
यल्लिप्तमाज्यं तदनेनैव लुमिव बलाच्चुश्चकाकारं कृत्वा तदाज्यं निःशेषणापिबंतो भक्षयेयुरित्यर्थः॥ अनदनीयद्रव्याणामपि कृष्णला
नां यथा वचनात्प्रदानं तद्वदभक्ष्याणामपि भक्षणं भवेत्॥ ॥चतुर्थाधिकरणमारचयति॥ ॥सकृत्सहत्वयोरेकमेकधेत्य
तमेव वा॥ एकं नियामकाभावादवाधादंत्यमेव हि॥ तत्रैव कृष्णलभक्षणे श्रूयते॥ एकधा ब्रह्मण उपहरंतीति॥ तत्रैकधेत्यत्र धा
प्रत्ययः प्रकारवाची सन्नेकवारमित्यमुमर्थं वा बहूनां सहभावं वा ब्रूते॥ उपहारो भक्षणाय समर्पणं॥ एकधेत्यनेन शब्देन सकृत्त्व

हत्वयोरन्यतरद्विवक्षितंउतसहत्वमेवेतिसंशयः॥ नियामकाभावादुभयोर्मध्येयत्किंचिदन्यतरदितिपूर्वः पक्षः॥ अबाधोत्रनिया
मकः प्रकृताविडाप्राशित्रचतुर्द्धाकरणशंयुवाककालेषुचतुर्वारभक्षणसिद्ध्यचत्वारउपहाराउपहाराःउपदिष्टाः॥ अत्रापितेचो
दकप्राप्ताः तत्रसकृत्वपक्षउपरितनास्त्रयउपहारास्तत्तत्कालविशेषाश्चबाध्येरन्॥ सहत्वपक्षेकालविशेषाएवबाध्यंते॥ नतु
यउपहारातस्मादित्यपक्षन्नूपंसहत्वमेवैकधेत्यस्यशब्दस्यार्थः॥ ॥ पंचमाधिकरणमारचयति॥ ॥ सर्वंब्रह्मणइत्यत्रब्रह्मभाग
स्यसर्वता॥ अन्यभागस्याविवाधोभागांतरमबाधितुं॥ सर्वत्वमन्यभागीयंब्रह्मणेत्रविधीयते॥ स्वभागीयंचोदकात्तंबाध्यतामन्य
लक्षणं॥ कृष्णभक्षणएवेदमपरंश्रूयते॥ सर्वंब्रह्मणेपरिहरतीति॥ परिहारः समर्पणं॥ आह्वसहितानामृत्विजामेकेकस्यचतुर्षुकाले
षुचत्वारोभक्षभागाश्चोदकप्राप्ताः॥ तत्रसर्वताकिंब्रह्मसंबंधिचतुर्भागविषया॥ उतेतरसंबंधिभागचतुष्टयविषयापीतिसंदेहः॥
अध्वर्युप्रभृतीनामृत्विजांयेयेचत्वारोभागास्तेषांबहूनामबाधनायाद्यः पक्षोभ्युपगंतव्यः॥ तत्रैषावचनव्यक्तिः ब्रह्मसंबधमनूद्य
सर्वत्वपरिहारयोरेकमनुवादंतर्भाव्येतरद्विधेयंयद्भ्रणसर्वंतत्परिहरतियत्ब्रह्मणेपरिहरतितत्सर्वमिति॥ उभयथापिविधेर्ब्रह्मभा
गमात्रेपर्यवसानाच्चोदकप्राप्ताअन्यभागाः अबाधिताभविष्यंतीतिपूर्वः पक्षः॥ सर्वत्वपरिहारावनूद्यब्रह्मसंबंधोत्रविधीयते॥ यत्प
रिहर्तव्यंसर्वंतद्ब्रह्मणइतिवचनव्यक्तिः तत्रब्रह्मगानामितरभागानांचयत्सर्वत्वंतस्यब्रह्मसंबंधेसतिब्रह्मभागानांब्रह्मसंबंधस्यचो
दकादेवप्राप्तत्वात्तत्रानर्थकोविधिरन्यभागानांब्रह्मसंबंधविधानेपर्यवस्यतितस्मादन्येषांभक्षणंबाध्यते॥ ॥ षष्ठाधिकरणमार
यति॥ ॥ युगपत्स्वस्वकालेवातत्सर्वंभक्षयेदयं॥ अविलंबादादिमोत्यस्तंतंकालमबाधितुं॥ अतीतेनाधिकरणद्वयेनयुगपत्सर्वंब्रह्मणे
समर्पयेदित्युक्तं॥ तत्रभक्षयितुंयुगपत्समर्पितस्यसर्वस्यमध्येकियदमपिभक्षयित्वावशेषितस्याविलंबेकारणाभावाद्युगपदित्यादिमः
पक्षः प्राप्नोति॥ चोदकप्राप्तस्यतत्तत्कालस्याबाधोविलंबेकारणाभावाद्युगहेतुः तस्मात्स्वकालइत्ययं पक्षोभ्युपगंतव्यः॥ ॥स **श्रीः२९**
प्तमाधिकरणमारचयति॥ ॥ चतुर्द्धाकृतिर्निर्दिष्टोतद्भक्षेस्तानवाग्रिमः॥ चोदकात्तोतुबद्धर्थव्यवस्थार्थत्वतोत्रन॥ प्रकृतौपुरोडाशं **१३८**
चतुर्द्धाकृत्वापश्चादिदंब्रह्मणइत्यादिनातत्तद्भागानिर्दिष्टाः॥ तौचतुर्द्धाकरणनिर्दिष्टौ पूर्वोब्रह्मभक्षेचोदकवशाद्विद्येतेइत्यग्रिमः
पक्षः प्राप्नोति॥ तत्रचतुर्द्धाकरणंबहूनामृत्विजांविभागार्थनिर्दिष्टोभागानामसांकर्यार्थः॥ अत्रतुब्रह्मणएकत्वात्ताबुभौनविद्येते
॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ ऋत्विग्दानमदृष्टार्थमानत्यैवाग्रिमः श्रुतेः॥ वैरूप्यान्नियमान्मैवदृष्टत्वादानतेः श्रुतिः
भृत्यैवचनियमादेतदद्रष्टंस्याद्विरूपता॥ वचनात्तेनसत्रेषुस्वामिनांनभृतिः क्वचित्॥ ऋत्विग्भ्योदक्षिणांददातीतिप्रकृतौश्रूयते॥ तत्कि

मदृष्टार्थमानत्यर्थंवेतिसंशयः॥ भृत्यापरिक्रीयवशीकारआनतिः॥ अदृष्टार्थंतत्स्यात्॥ अन्नहिरण्यादीनामदृष्टार्थेत्यागेदानशब्द
स्यप्रसिद्धत्वात्॥ यद्यत्रदानंभृतिःस्यात्तदानीमल्पाधिककर्मानुरूपेणद्रव्यंदेयं॥ वैरूप्येत्वत्रदृश्यते॥ स्वल्पकर्मणित्रैधातवीयेस
हस्रंदेयं॥ अधिकर्मण्यृतपेयेस्वल्पंसोमचमसमात्रंदीयते॥ तथाद्वादशशतादिपरिमाणनियमोमंत्रवत्वनियमश्चभृतौनोपपद्यते॥
कर्मकरानुमत्यान्यूनाधिकभावसंभवात्॥ तक्षरजकादिभृतौमंत्राद्दर्शनाच्च॥ तस्माददृष्टार्थमित्यग्रिमः पक्षः प्राप्नोतिमैवं॥ आनतेर्दृष्ट
प्रयोजनत्वात्॥ दानस्यातिरिक्तदृष्टार्थायांभृतावप्यस्तिभृतिर्देयेतिप्रयोगात्॥ परिमाणमंत्रवत्वनियमाददृष्टमस्तुदृष्टस्याभावात्॥
वैरूप्यंतुवचनबलादभ्युपगम्यते॥ दक्षिणायाभृतिरूपत्वंप्रत्यक्षवेदवाक्यादप्यवगम्यते॥ दीक्षितमदीक्षितादक्षिणापरिक्रीताऋत्वि
जोयाजयेयुरिति॥ तस्मादृत्विग्दानमानत्यर्थं॥ एवंचसतिसत्रेष्वृत्विजांयजमानत्वाद्भृतिरूपादक्षिणानकापिदेयेत्येतद्विचारफ
लंद्रष्टव्यं॥ ॥ नवमाधिकरणमारचयति॥ ॥ प्रयायप्रतिपत्त्यैवाचमसेडादिभक्षणं॥ क्रयायपूर्ववन्मैवंयागीयस्तत्ववर्जना
त्॥ अक्रीतयजमानस्यभक्षसत्वाच्चतेनसा॥ प्रतिपत्तिः संस्कृतत्वात्सत्रेषुननिवर्तते॥ अस्तिसोमेचमसभक्षः अस्तिचेष्टाविडाप्रा
शित्रादिभक्षः तत्रभक्षणक्रीतानामृत्विजामानतिसंभवाद्दक्षिणान्यायेनक्रयार्थंभक्षणमितिपूर्वः पक्षः॥ यागदेवतायैसंकल्पितेद्र
व्येस्वत्वमलभमानोनतेनक्रेतुंशक्नोति॥ किंचयजमानपंचमाः समपद्भूयेडांभक्षयंतीत्यक्रीतस्यापियजमानस्यभक्षःश्रूयतेत
स्मादृचर्यादृत्विजामपिभक्षणंनक्रयार्थमितिगम्यते॥ तस्मात्प्रतिपत्त्यर्थोभक्षः तेनक्रयार्थत्वाभावेनपरिशिष्यमाणासाप्रतिपत्ति
र्यागोपयुक्तद्रव्यसंस्कारत्वेनसत्रेषुनबाध्यते॥ ॥ दशमाधिकरणमारचयति॥ ॥ ऋत्विजांवरणंसत्रेकार्यंनोवात्रसोमवत्॥ का
र्यमेवंस्वकर्मत्वात्क्रयार्थाप्रकृतौवृत्तिः॥ अग्निहोतेत्यादिमंत्रैः सोमेवरणमृत्विजामाम्नातंसोमवत्सत्रेपितत्कार्यं अन्यथावरणर
हितानामृत्विक्ताभावात्सत्रंनसिद्ध्येत॥ अतएवतत्सिद्धयेसत्रप्रकरणेरेयेयजमानास्तऋत्विजइतिस्वतः प्रवृत्तानपियजमानानन्नूद्य
वरणसाध्यमृत्विक्त्वंतेषुधातव्यमिति॥ तस्मादृत्विग्वरणंसत्रेकार्यमेवं॥ सत्रेह्यनुष्ठातॄणांसर्वेषांस्वकर्मनहिस्वकर्मणिक्रयार्थं
वरणमपेक्ष्यते॥ क्रयार्थंहिप्रकृतौवरणंदानमेवक्रयार्थंवरणंत्वदृष्टार्थमितिचेत्॥ न॥ वरणस्यभविष्यद्दानसूचनेनोत्साहज
ननार्थत्वात्॥ अन्यथाकरणकालेकश्चित्कोप्याण्यादक्षिणाइत्यृत्विजांप्रश्नः कथंसंगच्छेत॥ नचसत्रासिद्धिः शंकनीयातत्रैव
कर्त्र्यं॥ ऋत्विक्त्वंनामकिंकर्मकरत्वंउतयागकर्तृत्वमितिआद्येकर्मकराणांस्वामित्वाभावेनयेयजमानास्तऋत्विजः इतिवचनंवि
रुद्ध्येत॥ द्वितीयेतुस्वतएवयागंकर्तुंप्रवृत्तत्वाद्वरणमंतरेणाप्यृत्विक्त्वंसिद्ध्यतिईदृशमेवार्त्विज्यंवचनेनविधीयते॥ तस्माद्दानवत्

269
1941

वरणंसत्रेलुप्यते॥ ॥एकादशाधिकरणमारचयति॥ ॥क्रयः कार्योनवासत्रेनिषेधात्कृतिकल्पनं॥नित्यानुवादेनार्कुर्वेनक्रयोवरणे
यथा॥ सत्कारपुरःसरमृत्विग्भिर्होत्रेत्यादि प्रार्थनावरणंतच्चवरणंचिकीर्षुर्यजमानोवरणीयेभ्योब्राह्मणेभ्यः सोमंब्रूयात॥ तेभ्यः सोमंप्राहेत्या
पस्तंबवचनात॥ सोमाभिधानप्रकारश्चात्रकल्पदर्शितः॥ज्योतिःष्टोमेनाग्निष्टोमसंस्थेनरथंतरपृष्ठेनगवांद्वादशशतंदक्षिणेनाहंय
क्ष्येतत्रत्वमुद्गाताभवेति॥ तत्रदेयदक्षिणाद्रव्यनिश्चयेनब्राह्मणाः स्वकीयाः कर्मविशेषनियोक्तुंयोग्याभवंति॥ सोयंक्रयः सचप्रकृ
ताविवसत्रेकार्यः नचदक्षिणादानस्यनिराकृतत्वेनदेयद्रव्यनिश्चयेलुप्तेसतितत्साध्यः क्रयोपिलुप्येतेतिशंकनीयंनिषेधमुपजीव्य
क्रयानुष्ठानस्यकल्पयितुंशक्यत्वात॥तथाहिनह्यत्रगोदीयतेनवासोनहिरण्यमितिसत्रेगवादिदानंनिषिध्यतेतस्यचनिषेधोसत्याप्रसक्तौन
संभवति॥ ततः सोमदेयद्रव्याणांसत्रेदानप्रसक्तिरभ्युपेया॥ सोमेचदेयद्रव्याण्येवंश्रूयंते॥ गौश्चाश्विश्चाश्वतरश्चगर्दभश्चायवश्चव्रीह
यश्चयवाश्चतिलाश्चमाषाश्चतस्यद्वादशशतंदक्षिणेति॥ तत्रगोवस्त्रहिरण्यानांविशेषतोनिषेधेनद्रव्यांतराणांचोदकप्राप्तानामभ्य
नुज्ञाप्रतीयते॥ ततोदेयद्रव्यसद्भावात्क्रयः कर्तव्यइतिपूर्वः पक्षः नह्यत्रगोदीयतइत्यनेननिषेधोनविधीयते॥ किंतुपूर्वोक्तेननिर्णयेनप्रा
प्तएवदानाभावोनूद्यते॥अदक्षिणानिसत्राणीत्याहुर्नह्यत्रगोदीयतइतिश्रुतौपरोक्तकपन्यासस्यप्रसिद्धिवाचकहिशब्दस्यचप्राप्तिगमक
त्वात॥ तस्मान्नित्यानुवादस्यकल्पकत्वाभावाद्वरणवत्तदधीनाभूतः क्रयोपिनकर्तव्यः॥ ॥द्वादशाधिकरणमारचयति॥ ॥सत्रांगं
स्यान्नवापृष्ठशमनीयोयथांगता॥सौत्रामण्यादिवन्नैवंत्यागादूर्ध्वंविधानतः॥श्रूयमाणादक्षिणेयंपूर्वपक्षेत्रधर्मवत॥ परिक्रया
र्थासिद्धांतेनिमित्तंस्यात्समापनं॥ अस्तिसोमविकृतिः पृष्ठशमनीयनामकोयागः सत्रादुदवसायपृष्ठशमनीयेनसहस्रदक्षिणे
नयजेरन्निति॥उदवसायेत्यनेनल्यप्प्रत्ययेनसत्रसमाप्तेः पूर्वकालत्वंसत्रपृष्ठशमनीययोरेककर्तृकत्वंचप्रतीयते॥ तथासत्यग्निं
चित्वासौत्रामण्यायजेतवाजपेयेनेष्ट्वाबृहस्पतिसवेनयजेतसंस्थाप्यपौर्णमासीमिंद्रायवैमृधायपुरोडाशमेकादशकपालंनिर्वपतीत्यत्रसौ
त्रामण्यादीनांयथाग्निचयनाद्यंगत्वंतथापृष्ठशमनीयस्यसत्रांगताभविष्यति॥अंगत्वेसतिश्रूयमाणासहस्रदक्षिसत्रेप्विवपरिक्रया
र्थानभवतीत्यदृष्टार्थताभ्युपगम्यते॥ फलंचनकल्पयितव्यं॥सत्रफलेनैवफलवत्त्वसिद्धेरितिपूर्वः पक्षः॥उदवसानशब्दस्यत्याग
वाचित्वात्सत्रत्यागादूर्ध्वंविधीयमानः कथंसत्रांगंभवेत॥ अग्निंचित्वेत्यादौत्यागशब्दोनास्तीतिवैषम्यं॥ एककर्तृकत्वपूर्वका
लत्वेतुनिमित्तविवक्षयाप्युपपद्येते॥सत्रसमापनंनिमित्तीकृत्यविधानेगृहदाहेष्टिवत्फलंनरपेक्ष्याद्विश्वजिन्न्यायेनफलंक
ल्पनीयं॥सत्वेवमनंगत्वेसोमवद्दक्षिणापरिक्रयार्थादक्षिणायाः श्रौतत्वेनालोपः पूर्वोत्तरपक्षयोः समानोन्यायेनाप्यलोपःसि

द्धांतेविशिष्यते॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥तत्रर्त्विजः सत्रिणः किमन्येवास्युरन्येयुक्तितः॥ तएवयष्टृभेदेपिक्रीतत्वा
दृत्विजःपरे॥ तस्मिन्पृष्ठशमनीयेसत्रिणामेवार्त्विज्यंउदवसायेतिल्यबंतशब्देनकर्तैक्यप्रतीतेरितिपूर्वः पक्षः॥उदवसाययजे
रन्नितिसमभिव्याहारात्सत्रिभिः सहक्रत्वंयष्टॄणांप्रतीयते॥ नचर्त्विजोयष्टारः॥ यजमानेनतेषांदक्षिणाक्रीतत्वात॥ तस्मादृ
त्विजः सत्रिभ्योन्ये॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥संभूयैकैकशोवात्रयष्टृताद्योल्ययुक्तितः॥ द्वियागवद्बहुत्वस्यप्राप्ते
रंत्योस्तुसोमवत॥ अस्मिन्पृष्ठशमनीयेसत्रिणांसंभूयायजमानत्वंउतप्रत्येकमितिसंशयः संभूयेत्याद्यः पक्षः प्राप्नोति॥कुतः य
जेरन्नितिबहुवचननिर्देशात॥ एतेनराजपुरोहितौसायुज्यकामौयजेयातामित्यत्रोपादेयगतद्वित्वस्यविवक्षितत्वादुभौसंभूय
यष्टारौतद्वदत्रापिस्यात॥मैवं॥उदवसायेत्यत्रोदवसत्तॄणांसत्रिणांयद्बहुत्वंप्राप्तंतदेवतस्मानाधिकृतेनयजेरन्नित्यनेनानू
द्यतेशत्वागोविधीयते॥ द्वियागेतुद्वित्वमप्राप्तत्वेनविधीयमितिवैषम्यं॥ तत्रग्रहंसंमार्ष्टीत्यत्रग्रहैकत्वमिवोद्देश्यगतत्वा
द्यजेरन्नितिबहुत्वमविवक्षितं॥ एवमपीछयाद्विशोबहुशोवायष्टृशक्यत्वादेकैकशोननियतइतिचेत॥ न॥ चोदकेनतन्नियम
सिद्धेः सोमतद्दर्शनात्तस्मात्तेसत्रिणः प्रत्येकंयजेरन्नित्यंसः पक्षोत्रास्तु॥ ॥पंचदशाधिकरणमारचयति॥ ॥अश्वाः पुरुष्या
वानंत्येधर्मार्थेवानतिर्यतः॥ इष्टिर्नसत्रंधर्मार्थेसत्रादंगंबहिर्नहि॥ सारस्वतसत्रेकामेष्टावश्वांपुरुषांधेनूदकेदत्वेति॥तुरगमनु
ष्यागोजातीयानांस्त्रीणांदक्षिणात्वेनदानंश्रुतं॥ तच्चानत्यर्थं॥ कुतः इष्टेरसत्रत्वात्सत्रत्वेतुयजमानानामेवार्त्विज्याद्दानसाध्य
क्रयाभावेनतत्साध्यमानमनमपिनस्यात इष्टिस्तुनसत्रंतल्लक्षणाभावात॥ आसीरन्नुपेयुरित्यनयोरन्यतरचोदनात्तल्लक्षणं॥इ
हत्विष्टिलक्षणानिर्वपतीचोदनापठ्यते॥ अग्नयेकामायाष्टाकपालंनिर्वपतीति॥ इष्टौचयजमानादृत्विजांपृथक्त्वादानत्यर्थंदान
मितिपूर्वपक्षः॥धर्मार्थंदानं॥ कुतः इष्टेः स्वरूपेणासत्रत्वेपिसत्रांगत्वेनतदंगेष्विवेष्टावप्यस्यांयजमानानामेवार्त्विज्यात॥ न
नुद्वादशाहः सत्राणांप्रकृतिः॥ नचतत्रकामेष्टिरस्ति॥अतोनसत्रचोदकेनेष्टौयजमानार्त्विज्यप्राप्तिः इष्टिचोदकेनत्वन्यएव
र्त्विजः प्राप्नुवंति॥ मैवंसत्रप्रयोगांतःपातित्वेनप्रसंगाद्यजमानकर्तृकत्वसिद्धेः॥ तस्मादत्रदानमदृष्टार्थं॥ ॥षोडशाधिकर
णमारचयति॥ ॥क्रियेधर्मायवाद्वेष्येदानंस्याद्दक्षिणोक्तितः॥ क्रयायमेवंद्वेष्यत्वन्नर्त्विजोधर्मस्तुतत्तः॥ दर्शपूर्णमासयोः
श्रूयते॥ यदिपत्नीः संयाजयत्कपालमभिजुहुयाद्वैश्वानरंद्वादशकपालंनिर्वपेत्तस्यैकहायनीगौर्दक्षिणातांद्वेष्यायदद्यादिति॥
अत्रयजमानेनद्वेषणीयेपुरुषेयद्दानंतत्क्रयार्थंदक्षिणाशब्देनव्यवहृतानांप्रकृतौक्रयार्थत्वदर्शनादितिपूर्वः पक्षः॥नताव

231
1945

द्दर्विर्होद्वेष्यत्वं युक्तं ॥ ऋत्विगाचार्योनाभिचरितव्याविति शास्त्रात् ॥ यस्त्वद्वेष्यः पुरुषः नासावृत्विक्त्वाभावेन यागेकर्मकरत्वाभा
वात्क्षयमर्हति ॥ तस्मादिदं दानमदृष्टार्थं ॥ ॥ सप्तदशाधिकरणमारचयति ॥ ॥ अस्थियागः किमस्थ्नांस्याज्जीवतां वास्थिश
ब्दतः ॥ अस्थ्नामेवमनर्हत्वाल्लक्षं ते जीविनोस्थितः ॥ इदं श्रूयते ॥ यदि सत्रायसंदीक्षितानां प्रमीयेताथतं दग्ध्वास्थीनि कृष्णाजिनेस्थीन्यु
पनह्य योस्य नेदिष्ठः स्यात्तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरंस्ततः संवत्सरेस्थीनि याजयेयुरिति ॥ अत्र संवत्सरे तीते सोयागः श्रु
तः ॥ स त्वास्थीन्येव कर्तॄणि कुतः अस्थिशब्दस्य तत्र मुख्यत्वात् ॥ मैवं ॥ अचेतनानामस्थ्नां यष्टुमनर्हत्वात् ॥ जीवतामप्यश्रुतत्वाद
युक्तोयं याग इति चेत् । न ॥ अस्थिशब्दस्य तल्लक्षणत्वात् ॥ एतदस्थिमता सह पुरुषेण पूर्वं यष्टुं प्रक्रांतत्वेन लक्ष्यलक्षकयोरस्ति सं
बंधः जीवतां यष्टृत्वे याजयेयुरित्युक्ताणिजर्थभूताः केस्युः ॥ न खल्वत्रान्ये संभवंति ॥ अस्य यागस्य सत्रांगत्वादिति चेत् ॥ तर्हि परस्प
रयाजकाः संतु ॥ तस्माज्जीवतामयं यागः ॥ ॥ अष्टादशाधिकरणमारचयति ॥ ॥ अस्थिकर्तृमते चिंतां पंचकं स्याज्जपादिकं ॥
नवा तच्चोदकात्कुर्युर्नकुर्वीरन्नसंभवात् ॥ अस्थीनि कर्तॄणीति पूर्वाधिकरणपूर्वपक्षिणो मतं तदनुसारेणाधिकरणपंचकं कृत्वा चिंता
रूपेण प्रवर्तते ॥ प्रकृतौ यजमानस्य मंत्रजपः केशश्मश्रुवपनं दीक्षानियमा इत्येवमादयः कर्तव्याः संति तत्सर्वं चोदकप्राप्तमस्थीनि
कुर्युरिति पूर्वः पक्षः ॥ अचेतनानां तदसंभवान्न कुर्वीरन्निति सिद्धांतः ॥ ॥ एकोनविंशाधिकरणमारचयति ॥ ॥ औदुंबरीमानशा
कस्पर्शौ तानास्तितद्वयं ॥ पूर्ववन्नेति चेन्नैव मचेतन्येपि संभवात् ॥ प्रकृतावौदुंबर्याः शाखाया यजमानप्रमाणत्वं तथा शकट
हस्य यजमानस्पर्शः तावुभावचेतनानामस्थ्नां जपादिवन्न विद्येते इति पूर्वः पक्षः अचेतनेरपिदंडेनैवमांतुं स्प्रष्टुं च शक्यत्वाद्विद्ये
ते इति सिद्धांतः ॥ ॥ विंशाधिकरणमारचयति ॥ ॥ वृष्टिकामः सदोनीचैरिति कामोस्ति वा न वा ॥ विद्यते स्पर्शवत्कामश्चेतनस्य
स्ततो नहि ॥ यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचैः सदो मिनुयादित्यत्र सदो नामकस्य मंडपस्य नीचमानेन गुणेन वृष्टि
फलतीत्युक्तं तस्यां वृष्टौ कामस्पर्शवदस्थ्नां विद्यत इति मंदप्रज्ञस्य पक्षः कामस्य चेतनधर्मत्वान्नास्तीति सिद्धांतः ॥ ॥ एकविं
शाधिकरणमारचयति ॥ ॥ सूक्तवाकाशासनं स्यान्न वान्नित्यप्रवर्तितः ॥ स्यान्नैवं फलनिर्देशात्फलेच्छास्थ्नां न युज्यते ॥ इदं
द्यावापृथिवी भद्रमभूदित्यादिः सूक्तवाको होत्रा पठ्यते ॥ तत्रैवं श्रूयते ॥ आशास्तेयं यजमानोसौ आयुराशास्ते सुप्रजास्त्वमा
शास्त इत्यादिः तत्र सूक्तवाकगतो यो यजमानाशासनप्रतिपादको मंत्रभागस्तमस्थियज्ञे होता पठेन्नवेति संशयः ॥ अस्थियज्ञ
गतायाः प्रायणीयादेरिष्टेः प्रस्तरप्रहरणमंगं तस्य नित्यत्वात्तस्मिन्विनियुक्तस्य सूक्तवाकमंत्रस्य नित्यवृत्तत्वात्तद्भागपाठोपि

273
1945

स्यादिति पूर्वः पक्षः यथा स्वर्गकाम इत्यत्र कर्मियोगेन साध्यता प्रतीतेः स्वर्गशब्देन फलनिर्देशः एवमाशासनयोगादायुरादिशब्दैः फ
लं निर्दिश्यते ॥ फलेच्छा चास्थ्नां न युक्ता तस्मात्तद्भागपाठो बाध्यते ॥ ॥ द्वाविंशाधिकरणमारचयति ॥ ॥ होतृकामो भवेन्नो वा हो
तुर्जीवनतो भवेत् ॥ यजमानेष्टमेवासौ कामयेत्तेन नास्त्यसौ ॥ प्रकृतावस्ति होतृकामः यं कामयेत तयसीयां त्वयादित्युक्त्वेस्तरांतस्यैव
षट्कुर्यादित्यादिः सोस्थियज्ञेप्यतिदिश्यतां ॥ कामयितुर्होतुर्जीवतस्तत्संभवादिति पूर्वः पक्षः ॥ यां वै कांचयज्ञ ऋत्विज आशिषमा
शासते यजमानायैवैतामाशिषमाशासत इति श्रुतेर्यजमानेष्टमेव होत्रा कामयितव्यं ॥ अस्थीनां त्वचेतनान्येष्टुं न शक्नुवंति तस्मा
दत्र नास्ति होतृकामः ॥ तदेतदधिकरणपंचकं जीवतामयं याग इत्यस्मिन्सिद्धांति पक्षे विरुद्धं ॥ अचेतनत्वमुपजीव्य प्रवृत्तत्वात्
तस्मात्तत्पक्षे चोदकप्राप्तानां यथोक्तधर्माणां नास्ति बाधः ॥ ॥ त्रयोविंशाधिकरणमारचयति ॥ ॥ सर्वस्वारो मृते रूर्ध्वं त्यजतां
वा समाप्यतां ॥ त्यजतां स्वाम्यभावेन प्रैषादन्यैः समाप्यतां ॥ सर्वस्वाराख्यः क्रतुरेवं श्रूयते ॥ मरणकामो ह्येतेन यजेत यः कामयेता
नामयः स्वर्गं लोकमियामिति तस्य च क्रतोस्तृतीयसवने यजमानअग्निप्रवेश आम्नायते ॥ आर्भवे स्तूयमाने औदुंबरीं दक्षिणेन
देशेनाहतेन वाससा परिवेष्ट्य ब्राह्मणाः समापयत मे यज्ञमिति संप्रैष्य संविशतीति तस्य संशयपूर्वोत्तरपक्षौ विस्पष्टौ ॥ ॥ च
तुर्विंशाधिकरणमारचयति ॥ ॥ किं कार्यमत्र किं बाध्यमिति प्राश्ने तदुत्तरं ॥ क्रत्वर्थमस्थिवत्कार्यं बाध्यते मृतकर्तृकं ॥ मरणा
र्ध्वं समापनीयः सर्वस्वारशेषविषयः बाध्याबाध्यानध्यवसायः संशयः अनध्यवसायस्य संशयत्वं न्यायविद्भिर्दर्शितं ॥ अ
नवधारणत्वाविशेषादूहानध्यवसाययोर्न संशयादर्थांतरभाव इति विप्रतिपत्त्यभावान्नास्त्यत्रेति पूर्वः पक्षः ॥ यद्यानि
प्रामिकाभावादिच्छया किमपि कार्यं किमपि बाध्यमिति पूर्वः पक्षः ॥ अस्थिकर्तृत्वमते शफकस्पर्शादिकं क्रत्वर्थयोग्यत्वात्का
र्यं मृतयजमानकर्तृकं मंत्रजपादिकमयोग्यत्वाद्बाध्यमिति निर्णीतं ॥ एवमत्रापि यद्योग्यं क्रत्वर्थं तत्कार्यं यदयोग्यं यज
मानकर्तृकं तद्बाध्यं ॥ ॥ पंचविंशाधिकरणमारचयति ॥ ॥ मृतेः प्रागायुराशीर्नो स्याद्वानो मृतिकामनात् ॥ प्रागार्भ
वाज्जीवनार्थमायुराशासनं भवेत् ॥ होत्रा पठितव्ये सूक्तवाके योयमायुराशास्त इति भागो यजमानविषयः ॥ स किं सर्व
स्वारे यजमानमरणात्पूर्वं वर्जनीयः पठितव्यो वेति संशयः ॥ मुमूर्षोर्यजमानस्यायुर्निरपेक्षत्वेनार्थलोपाद्वर्जनीय इति पू
र्वः पक्षः ॥ आर्भवाख्यस्य पवनस्य स्तूयमानत्वं यजमानस्य मरणकालः ततः पूर्वं जिजीविषुत्वात्पठितव्यः ॥ ॥ षड्विंशाधि

अ० कर० माला० करणमारचयति॥ ॥ आत्रेयदानचुर्याज्यावृत्तीसत्रेपुनाचरेत॥ कुर्याद्वानतिलोपान्नोधर्मार्थीक्रियतांद्वयं॥ प्रकृतौहिरण्यमात्रे
यायददातीतिश्रुतंक्रतुयाज्यावरणंचास्ति॥ तदुभयंसत्रेपुनःकर्तव्यंद्वारभूयाया अनंतेलुप्तत्वात॥ यद्यप्यात्रेयः कर्मकरेभ्यो
१३१ बहिर्भूतः तथापितद्दानेनयजमानस्योदीर्ध्यं पर्श्यंनऋत्विजोधनकामा आनतामवंति॥ वरणस्वचानर्थत्वमृत्विग्वरणेप्रा
रंभकालीनेप्रसिद्धं॥ तस्मादानत्यर्थमुभयंनाचरेदिति पूर्व पक्षः॥ प्रथमवरणेनैवानतिसिद्धेः कालांतरेवरणमदृष्टार्थंधनका
मानामपिकर्मकर्तृणांप्रारंभकालेस्वयमंगीकृतायाभृतेरधिकंधननलभ्यतद्दत्वात्रेयदानदर्शनंनानतिकरं॥ तस्माददृष्टार्थमु
भयंकर्तव्यं॥ ॥ सप्तविंशाधिकरणमारचयति॥ ॥ लुप्यतेपवमानेष्टौनिर्वापः क्रियतेथवा॥ लुप्यतेसाधनाभावोत्तेनमुख्यो
नलुप्यते॥ आधानप्रकरणगतायांपवमानेष्टौनिर्वापसाधनंनास्ति अग्निहोत्रहवणीहि प्रकृतौनिर्वापसाधनंसाचनाधानका
लेसंभवति॥ अग्निहोत्रस्याधानोत्तरकालीनत्वेनतद्धोमसाधनभूतायास्तस्याअपितथात्वादितिप्राप्तेब्रूमः॥ मुख्योनिर्वापः तंप्रति
गुणभूताग्निहोत्रहवणी॥ नहिगुणलोपेनमुख्यलोपमर्हति॥ किंचाधानकालेस्वरूपेणाविद्यमानायाअग्निहोत्रहवण्याःसा
धनत्वंदूरापेतं॥ ततःसाधनाभावात्योदिनुपन्यासः॥ तस्मान्ननिर्वापोलुप्यते॥ ॥अष्टविंशाधिकरणमारचयति॥ ॥ शरावैःस
प्तदशभिर्यश्चरुस्तत्रमुष्टयः॥ चत्वारः संतिनोवातस्यादर्कंमुष्टिसंख्ययोः॥ ॥ तत्किमाद्यश्चोदितत्वाच्छरावापूरणान्नसः॥ द्वितीयोस्त्वि
तिचेन्मैवंद्विलोपेबाधगौरवात॥ तृतीयोस्त्वेकलोपात्रधर्मः संख्येवलुप्यतां॥ क्रियायोगान्नतद्धर्मः आद्यास्यात्सागृहीतां॥ प्रकृ
तौचतुरोमुष्टीन्निर्वपतीतिमुष्टितत्संख्येश्रुते॥ तथावाजपेयेविकृतिरूपः सप्तदशशरावश्चरुश्रुतः॥ तत्रचरौकिंमुष्टिसंख्येद्वे अ
पिविद्येते॥ किंवाद्वेअपिनविद्येते॥ आहोस्विदुभयोरेकमस्त्यन्यन्नास्ति॥ यदेकंतदापिकिं॥ मुष्टिरथकिंवासंख्येवेतिसंशयः॥ चो
दकप्राप्तरूभयमस्तीत्याद्यः पक्षः प्राप्नोति॥ चतुर्भिर्मुष्टिभिः सप्तदशशरावपूरणसमर्थस्यचरोरनिष्पत्तेःसपक्षोनयुक्तः॥
तर्हि मुष्टितत्संख्येद्वे अपिबाध्येइतिद्वितीयः पक्षोस्त्विति चेत मैवं॥ एकतरबाधेनैवपूरणाभावपरिहारेसिद्धेतिसद्वयोर्बाधेगौर श्रीः१
वप्रसंगात॥ नन्वत्रोपदिष्टेनशरावद्रव्येणातिदिष्टंमुष्टिद्रव्यंबाध्यते॥ तथासप्तदशसंख्ययाचतुः संख्याबाध्यतद्वत्कुभयबा १३१
धोवश्यंभावी। मैवं॥ भिन्नविषयत्वेनबाधासंभवात॥ शरावसप्तदशसंख्ययागसंबंधेमुष्टिचतुःसंख्यतुनिर्वापसंबंधेइति
विषयभेदः॥ कथंतर्ह्यत्रबाधप्रसंगः॥ अन्यथानुपपत्तेरितिवादामः अनुपपत्तिश्चपूरणासंभवेनदर्शिता॥ पूरणंचैकबाधनाप्यु

275
1945

पपद्यते॥ मुष्टिबाधेयथोचितंचतुःसंख्योपेतैः कुडवादिभिःपूर्त्तिस्यात॥ चतुःसंख्याबाधेयथोचितमधिकंसंख्योपेतैर्मुष्टि
भिःपूर्त्तिर्भविष्यति॥ एवंतर्ह्येकपॅलोपइतितृतीयः पक्षोस्तु॥ तत्रसंख्याधर्मः मुष्टिर्धर्मी॥ तथासतिमुष्टौलुप्तेसतिनिराश्रय
स्याधर्मस्यासिद्धेः संख्यालोपोवश्यंभावी॥ संख्यायांतुलुप्तायांमुष्टिःशक्योत्यवरुणातुंतस्मात्संख्येवलुप्यतामितिप्राप्तेब्रूमः॥
चतुःसंख्यातावन्नमुष्टिनान्वेतिकर्मकारकवाचिद्वितीयाविभक्त्यंतस्यचतुःशब्दस्यसकर्मकेणनिर्वपतिधातुनासांदन्वया क्षा
त॥ अतःश्चतुःसंख्यानमुष्टिधर्मः॥ पार्ष्ठिकान्वयेनतुमुष्टिविशेषणंभविष्यति॥ संख्यामुष्ट्योः क्रियासंबंधेसमानेसत्यपिप्र
थमश्रुतत्वात्सानुगृह्यते॥ चरमश्रुतत्वेनदुर्बलोमुष्टिर्बाध्यतइतिराद्धांतः॥ ॥एकोनत्रिंशाधिकरणमारचयति॥ ॥धेनुर्वत्स
र्षभाश्छागगाविवागुणकीर्तनात॥ अजातिदिष्टस्यैकमेवंगोजात्यकगुणान्वितः॥ पशुविकृतिषुश्रूयते॥ द्यावापृथिव्यांधेनुमालभे
तमारुतंवत्समैंद्रंवृषभमिति॥ तत्रधेनुशब्देनवप्रसूतिकामाचष्टे॥ वत्सशब्दोबालंऋषभशब्दःपुमांसं॥ तथासतिगुणवाचिनं
एतेशब्दाअतिदिष्टमजद्रव्यमबाधित्वातदेवद्रव्यं॥ यथोक्तगुणविशिष्टंवदंति॥ गोस्तनप्रत्यक्षमिहश्रूयते॥ नाप्यतिदिश्यते
॥ प्रकृतावनुपदिष्टत्वात॥ अतोनगांविशिंषंतीतिपूर्वः पक्षः॥ नखल्वेतेयथोक्तगुणसामान्यवाचिनः॥ किंतर्हिगोगतानेवत
गुणानाहुः अतस्तेशब्दाअजेनुपपन्नाः संतोनुपदिष्टमनतिदिष्टमपिगांमुख्यवृत्याविशिंषंतश्छागंबाधंतइतिराद्धांतः॥ ॥
त्रिंशाधिकरणमारचयति॥ ॥ वायव्यंश्वेतमित्यत्रयः कोपिछागएववा॥ विशेषानुक्तितः कोपिछागएवास्तबाधनात॥
वायव्यंश्वेतमालभेतभूतिकामइत्यत्रश्वेतशब्दस्य धेन्वादिशब्दवज्जातिविशेषगुणवाचित्वाभावाद्यंकंचिदपिपशुंश्वेतगु
णकंसमर्पयतीतिपूर्वः पक्षः॥ चोदकप्राप्तस्याजस्यबाधकारणाभावात्तमेवसमर्पयतीतिराद्धांतः॥ ॥ एकत्रिंशाधिक
रणमारचयति॥ ॥ खलेवालीतंडुलयोःखादिरव्रीहतानवा॥ यूपोक्तेर्मुख्यर्थंउद्देशात्खादिरीहिंसा॥ अवघाताद्यबाधार्थं
व्रीहतातंडुलेष्वपि॥ प्रत्यक्षवचनत्वार्थकार्यंयूपे॥ नलक्ष्यतांअंतरेणहविर्द्वयोगान्नात्रातिदेशनं॥ ननियंतुंशक्यतेतत्खा
दिरव्रीहतातयोः॥ खलेवालीयूपोभवतीतिसाद्यस्क्रेश्रुतं॥ तथादधिमधुघृतमापोधानास्तंडुलास्तत्संसृष्टंप्राजापत्यमि
तिचित्रायागेश्रुतं॥ तत्रप्रकृतौयद्यूपस्यखादिरत्वं॥ यच्चतंडुलानांव्रीहिसंबंधित्वं॥ तदुभयमनयोर्विकृत्योरस्तिनवे
तिसंशयः॥ तत्रयात्खलेवालीसायूपोभवतीत्येवमुद्देश्यविधेयभावेयूपशब्दस्यमुख्यवृत्तिर्नसिद्ध्येत॥ यूपाकृतिरास्त्री

यतस्तक्षणादिसंस्काररहितायाः खलेवाल्यायूपशब्दवाच्यत्वासंभवात्॥ अतो यूपशब्देन यूपकार्यं पशुनियोजनादिकं लक्ष
णीयं स्यात्॥ यो यूपः स खलेवालीत्येवमुद्दिश्यविधेयभावेन संस्कृतस्य खादिरयूपस्य खलेवालित्वे नस्थापयितुं शक्यत्वान्नक
स्यापि शब्दस्य लक्षणावृत्तिः॥ तस्मादस्ति खलेवाल्याः खादिरत्वं तथा चोदकप्राप्तावघाता द्यबाधार्थं च तंडुलेष्वपि व्रीहित्वमस्ती
ति पूर्वः पक्षः॥ यूपमुद्दिश्य खलेवालीत्वविधाने यूपशब्दस्य वा हितयोः खलेवालीशब्दभवतिशब्दयोरेकस्य नैरंतर्यपाठस्य
कल्प्यत्वेन वाक्यं परोक्षं स्यात्॥ ततः प्रत्यक्षवाक्यपरित्यागाद्वरं यूपशब्दस्य मुख्यवृत्तिमात्रहानं॥ तथा सति खलेवाल्या पशुनि
योजनादिकं कार्यमिति वाक्यार्थः संपद्यते॥ तत्र कुतो यूपः कुतस्तरां तदीयं खादिरत्वं॥ तथा तंडुलानां पेषणाद्यवसंपवनादिरहिता
नामेव प्रजापतिर्देवतासंबंधोऽत्र श्रूयते॥ प्रकृतौ तु पेषणादिपरंपरयातन्निष्पन्नस्य तंडुलस्यैकाय पुरोडाशस्य देवतासंबंधः अतो
समानत्वान्नात्र चोदकातिदेशः॥ तथा सति खादिरत्वं व्रीहित्वनियमस्तावाद्यांकाचि खलेवालीतंडुलाश्वयकेचित्सत्विति राद्धां
तः॥ ॥ द्वात्रिंशाधिकरणमारचयति॥ ॥ खलेवाल्यां जोषणं च छेदनं तक्षणं तु यो॥ स्युर्नवा चोदकास्स्युर्नो वैयर्थ्याच्चावि
रोधतः॥ जोषणं प्रीतिपूर्वको यूपीयस्य वृक्षस्य लक्षणलक्षितत्या सव्यव्यनिश्चयः॥ तल्लक्षणानि चापस्तंबेनोक्तानि॥ समे जा
तमशाखा वेजं कुपर्णशाखमप्रतिमुक्ताग्रमसुषिरमित्यादीनि जोषणादयः खलेवाल्यां चोदकप्राप्ता अपि नो कर्तव्याः॥ कुतः
वैयर्थ्यात्॥ पूर्वसिद्धाया एव खलेवाल्या यूपकार्यविनियोगमात्रेण शास्त्रार्थस्य कृतत्वादन्यज्जोषणादिकं कृतमप्यनर्थकं॥
अपि च तक्षणादीनि यूपत्वसंपादकानि॥ खलेवाली तु न यूपः किंत्वयूपकेवलं यूपकार्यमतिदिश्यते तस्मात्तक्षणादीनि तत्र
न कर्तव्यानि॥ किंच यथा वृक्षस्य छेदनादिना वृक्षत्वमपैति तथा खलेवालीत्वमवापयेत्॥ न हि वरघातावकन्योद्वाहः जो
षणस्य तु वृक्षत्वदशायां कर्तव्यस्य न खलेवालीत्वदशायां प्राप्तिरस्ति॥ तस्माज्जोषणादयो न संति॥ ॥ त्रयस्त्रिंशाधिक
रणमारचयति॥ ॥ पर्यूहणाद्यंजनादि नस्यात्स्याद्वात्र पूर्ववत्॥ तस्माद्दृष्टादृष्टभावादविरोधाच्च तद्भवेत्॥ संति प्रकृतौ प
र्यूहणादयः तथा च कल्पसूत्रकारः॥ ब्रह्म वनिं त्वा क्षत्रवनिमिति प्रदक्षिणं पांशुभिः पर्यूह्य ब्रह्म दृंह क्षत्रं दृंहेति मैत्रा
वरुणो दंडेन समं भूमि परिदृंहणं कृत्वाद्भ्यंभयपृथिवीमित्यद्भिः परिषिंचतीति अस्ति चांजन प्रोक्षणादि तन्नेदं तदुभयविधि
धमत्र खलेवाल्यां नास्ति अयूपत्वेन छेदनादिवत्तन्निवृत्तेरिति पूर्वः पक्षः॥ न तावदेतदुभयं छेदनादिवद्व्यर्थं बलीवर्द्दो

श्रीः
१३८

दिभिश्चालितस्य संभवः पर्यूहणादिभिर्दृढीकारस्य दृष्टप्रयोजनस्य संभवात्॥ अंजनादिकं प्रकृतावि वादृष्टार्थं॥ न चैतेनोभयेन खले
वालीत्वमपैति॥ तस्मादयूपत्वेऽपि सार्थमविरुद्धं च तद्भवेत्॥ ॥ चतुस्त्रिंशाधिकरणमारचयति॥ ॥ भाष्यकारमतेनाह॥ ॥ नावघाते
वघातो वा धानानां वा विनष्टये॥ न नाशः क्रमबाधे तो वघातो नात्र बाध्यते॥ महापितृयज्ञे हविः किंचिच्छ्रूयते॥ पितृभ्यो बर्हिषद्भ्यो धा
ना इति॥ धानाशब्देन भृष्टं धान्यमभिधीयते॥ तासां धानानामवघाते सति सक्तुभावापत्तेर्द्धानात्वमेव विनश्यते॥ अतस्तासामविनाश
यनास्त्यवघात इति पूर्वः पक्षः॥ धाना अवहंतव्या इतिह्यत्र चोदकवाक्यं तस्मिंश्च वाक्ये भर्जनसंपादितं धानात्वं पूर्वभावि पश्चाभावी अ
वघात इति क्रमः प्रतीयते तं क्रमं बाधित्वा प्रथमतोऽवघाते सति नास्ति धानात्वनाशः अवघातस्य पदार्थस्य बाधाद्वरं तद्धर्मस्य क्रमस्य मा
त्रस्य बाधनं तस्मादवघातः कर्तव्यः॥ ॥ तदेवान्यधिकारणं वार्त्तिककारमतेनारचयति॥ ॥ पेषणं नूतनं मंथे प्राकृतं वा क्रमांतरा
त्॥ नूतनं प्राकृतं धर्ममात्रबाधस्य लाघवात्॥ महापितृयज्ञ एव श्रूयते॥ पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मंथमिति॥ मृतवत्साधे
नुरभिवान्या द्रवद्रव्ये प्रक्षिप्य मथिताः सक्तवो मंथं तत्र यत्पेषणं तन्न प्राकृतं॥ कुतः क्रमव्यत्यासात्॥ प्रकृतौ हि प्रथमतः पेषणं पश्चात्पु
रोडाशश्रपणं अत्र तु प्रथमतः श्रपणेन धानाः संपाद्य पश्चात्सक्तुभावाय पेषणं॥ तस्मान्नूतनमिदमिति प्राप्ते ब्रूमः॥ चोदकप्राप्तप्राकृतपे
षणतत्क्रमयोरुभयोर्बाधे गौरवात्क्रममात्रं बाध्यं॥ पेषणपदार्थस्तु स एवेति॥ तद्धर्मा दृषदि निमंत्रेद् इत्यादयो द्रष्टव्याः॥ ॥ इति श्री इयं मोवदीर्ज
माधवीये जैमिनिन्यायमालाविस्तरे दशमाध्यायस्य द्वितीयः पादः॥ ॥ तृतीयपादस्य प्रथमाधिकरणमारचयति॥ ॥ प्रयाजैकाद
शत्वादिविशेषविधिभिर्युते॥ पश्वादौ सामिधेन्यादिर्विध्यंतो नास्ति वास्त्यसौ॥ विशिष्टांगविधौ नासौ चोदकस्याप्रवृत्तितः॥ लाघवाद्गुण
मात्रस्य विधेः सोऽस्त्यतिदेशतः॥ अग्नीषोमीयपशावेकादश प्रयाजाः श्रुताः चातुर्मास्येषु नव प्रयाजाः वायव्यपशौ हिरण्यगर्भ इत्याघा
रमंत्र इत्यादिभिर्युतेषु पश्वादिषु प्राकृतेतिकर्तव्यता सामिधेन्यादिर्नास्ति कुतः संख्यामंत्रादिगुणविशिष्टस्य प्रयाजाघाराद्यंगस्य प्रत्य
क्षविधौ सत्युपदिष्टेनैवांगेन निराकांक्षे पश्वादौ चोदकस्याप्रवृत्तेरिति पूर्वः पक्षः॥ पश्वादिविधिस्तावदितिकर्तव्यतामाकांक्षति त
त्र प्राकृतांगान्यतिदेश्यवातदाकांक्षापूर्यतां विधास्यमानान्यंगांतराण्युपदिश्यवेतिवीक्षायां प्राकृतोपकारकतया प्राकृतांगाति
देश एव न्याय्यः॥ ततश्चातिदेशतः प्राप्तप्रयाजाद्यंगमनूद्य गुणमात्रविधौ लाघवं भवति गुणविशिष्टांगविधौ गौरवं स्यात् तस्मात्सं
ख्यांतरमंत्रांतराभ्यां पूर्वयोः संख्यामंत्रयोर्बाधेऽपि प्रयाजाघारसामिधेन्यादीतिकर्तव्यता प्राप्नोतीत्येतदेवातिदेश इति राद्धांतः॥ ॥

273
1945

अ० कर० माला०
१३८

द्वितीयाधिकरणमारचयति॥ ॥ हिरण्यगर्भ आघारे पूर्वस्मिन्नुत्तरे वा लिंगाद्यो समलिंगं कृत्स्नकार्याद्यातोंतिमे॥ वायव्य पशौ हिरण्यग
र्भः समवर्तताग्र इत्याघारमाघारयतीति श्रुतो मंत्रः पूर्वस्मिन्नाघारे स्यात॥ कुतो मंत्रलिंगात॥ प्रकृतो प्राजापत्यः पूर्वमाघारः अस्मिन्नपि मं
त्रे हिरण्यगर्भशब्देन प्रजापतिरभिधीयते॥ प्रजापतिर्वै हिरण्यगर्भ इति वाक्यशेषादिति प्राप्ते ब्रूमः॥ अंतिम आघारे यं मंत्रः कुतः कृत्स्नका
र्यत्वात॥ प्राकृता वमंत्रकः प्रथम आघारः प्रजापतिं मनसा ध्यायन्नाघारयतीति ध्यानमात्रस्याभिधानात॥ द्वितीयमाघार यतीत्य मं
त्रकं साक्षादेव श्रुतं द्वितीयत्वाघारे ऊर्ध्वो अध्वर इत्याद्यो द्वौ मंत्रौ विहितः अतो मंत्रकार्यं तत्र कृत्स्नं तस्माद्द्वितीयाघारे हिरण्यगर्भ मंत्र विधिः
य तु प्रजापतिर्देवतालिंगं तद्द्वेषि समानं इंद्रापि हि प्रजानां पतिः तस्मादूर्ध्वो अध्वर इति मंत्रं बाधित्वा हिरण्यादि मंत्रः तत्र विधीयते॥ ॥
तृतीयाधिकरणमारचयति॥ ॥ किमुत्करासादनं च परिधौ च नियोजनं॥ कर्मांतरे प्राकृतयोर्गुणो बाध्यो स्त्व संभवात॥ पृथुतामुत्क
राग्रस्य परिधेश्च स्तब्धविधर्तौ॥ आश्रित्य संभवात्कर्तुं गुणो तौ ला घवान्मतौ॥ सौमिकेषु चातुर्मास्येषु श्रूयते॥ उत्करे वाजिनमासादय
ति परिधौ पशुं नियुंजीत वि एते आसादननियोजने प्राकृताभ्यां अन्यकर्मणी विधीयेते इत्याद्यः पक्षो युक्तः कुतः प्राकृतयोरत्यंतमसं
भवात वेदे उद्धृतानां पांसूनां तीक्ष्णाग्रो राशिरुत्करः नहि तत्र वाजिनाख्यनीरस्यासादनं भवति नाप्यंगुष्ठीवदणीयसि परिधौ पशु
नियोक्तुं शक्यते ततः प्राकृतस्य दृष्टप्रयोजनस्यासंभवाद्दृष्टार्थं तदेतत्॥ सदृशो आसादननियोजने कर्मांतर विधीयेते इति प्राप्ते ब्रू
मः॥ प्रयाजैकादशत्वादिवल्लाघवात प्राकृतयोरेव वाजिनासादनपशुनियोजनयो उत्कर परिधि गुणो विधीयेते न च तीक्ष्णाग्र
त्वेपि मूर्ध्यं चेग्रवदयोग्यत्वं मृद्राशेरग्रस्य पृथुत्वेन स्वल्प पात्रासादनयोग्यत्वात॥ परिधिश्च वैश्यकवेद्योमिव नाणीयात॥ किंतु स्त
वेर्याख्यविधस्तस्माद्गुणविधिः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ षड्ढिर्दीक्षयतीत्यग्निगतं प्राकृतबाधकं समुच्चितं वा बाध
कं स्यात॥ कार्यैक्यात बाध्यतः॥ अग्नेहोमांगता कृत्स्ना रतिदिष्टेन तुल्यता॥ विनाशत्रिंशद्वादशत्वासिद्ध्ये स्यात समुच्चयः॥ अग्निच
यने दीक्षाहुतयः श्रूयंते षड्ढिर्दीक्षयतीति प्रकृतावपि स्रुवेण चतस्रो जुहोति दीक्षितत्वायेत्यादीना दीक्षाहुतयः षड्ढिहिताः तत्र मं
त्रा भिन्नाः आकूत्यै प्रयुजेग्नये स्वाहेत्यादयः प्राकृता मंत्राः आकूतिमग्निं प्रयुजं स्वाहेत्यादयो वैकृताः तत्र वैकृतमाकूतिमंत्र षट्कं
किं प्राकृतस्य बाधकं किंवा प्राकृतेन समुच्चितमिति संशये बाधकमिति तत्त्व आपं कुतः कार्यैक्यात् दीक्षणीयेष्ट्यंगभूताहुत्युपकार
कत्वलक्षणं यत्कार्यं प्राकृतानां मंत्राणां तदेव वैकृतानामपि॥ न च विकृतौ तत्र प्रतीतेरिति शाक्यं॥ स्वाहांत रूपेण लिंगेन मंत्राणा
माहुत्युपकारकत्वप्रतीतेः आकूतीनां च षड्ढिर्दीक्षयतीति वाक्येन दीक्षणीयांगत्वप्रतीतेः तस्मात श्रूयमाणे मंत्रे रतिदिष्टानां

श्री
१३८

279
1945

बाध इति पूर्वः पक्षः॥ अग्नेर्मंत्राणां स्वरूपं यद्यपि प्रत्यक्ष श्रुति सिद्धं तथापि होमांगत्वं लिंगेन कल्पनीयं॥ तथा चातिदेश कल्प्ये मं
त्रे स्तुल्य बलत्वात॥ न बाध्य बाधकता एवमपि न समुच्चये प्रमाणमस्तीति चेत॥ अस्त्येव द्वादशाजुहोतीति संख्याविधानेन तत्सिद्धेः
न च वैकृतानामेव रूप्या मावृत्त्या संख्या सिध्यतीति वाच्यं॥ आवृत्तेरश्रुतत्वात॥ न च सा कल्पयितुं शक्यते॥ अन्यथापि संख्योपप
त्तेः तस्मात्समुच्चय इति राद्धांतः॥ ॥ पंचमाधिकरणमारचयति॥ ॥ एकादिना समुच्चेयं पुनर्निष्कृत इत्यदः॥ बाधकं वा समुच्चेयं
मुभयीरिति कदीरणात॥ आधानदक्षिणोपेत मुभयीरित्यनूद्यते॥ ददातीत्यविधायित्वात्कार्यैक्यात॥ बाधकं भवेत॥ आधाने विक
ल्पिता गो द्रव्य दक्षिणा द्रव्यांतर दक्षिणाश्च बहवः श्रूयंते एकादेया षट् देया द्वादश देया इत्यादिना पुनराधाने तु पुनर्निष्कृतो रथो द
क्षिणेत्यादि श्रुतं॥ भग्नः सन्पुनः समाहितः पुनर्निष्कृतः सेयं पुनर्निष्कृतादि दक्षिणा किमतिदिष्टायेकादि दक्षिणया समुच्चीयते उ
त नो बाधत इति संशयः उभयीर्ददात्याग्न्याधेयिकीश्चेत्युक्तत्वात समुच्चय इति पूर्वः पक्षः॥ ददातीति वर्तमाननिर्देशस्य विधित्वा
भावादाधानकाले पूर्वं दत्तं पुनराधानकाले दीयमानं च मिलित्वोभयीरित्यनूद्यते दक्षिणात्वरूपस्य कार्यस्यैकत्वादुपदिष्टमतिदि
ष्टस्य बाधकं॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ वासो वत्सं समुच्चय मान्वाहार्येण बाधना वा॥ अविरोधात्समुच्चये यं न कार्यैक्याद्वि
रोधतः॥ आग्रयणे श्रूयते॥ वासो दक्षिणा वत्सः प्रथमजो दक्षिणेति तदेतदाकृतेनान्वाहार्येण सह विरोधाभावात॥ समुच्चीयत इ
ति मंदः पूर्वः पक्षः एककार्यत्वेन विरोधित्वान्न समुच्चयः किंतु बाधत इति राद्धांतः॥ ॥ सप्तमाधिकरणमारचयति॥ ॥ अन्वाहार्यस्य
धर्मोत्र न कार्यः क्रियतेथवा॥ न तद्धर्मत्व तन्नैवं साधनं पृथगुक्तितः॥ मंत्यन्वाहार्यधर्मास्तान्कल्पसूत्रकार उदाजहार॥ दक्षिणा सद्य
उपहर्तवा इति संप्रेष्यति॥ ये ब्राह्मणा उत्तरतस्तान्यजमानो आह॥ दक्षिणत एतेति तेभ्योन्वाहार्यं ददाति ब्राह्मणा अयं व ओदन इति
प्रतिगृह्णीत उत्तरतः परीतेति संप्रेष्यतीति सोयं धर्मो च [illegible] सोवत्सेन कार्यः तस्यान्वाहार्यनिमित्तत्वात्मैवं अन्वाहार्यस्य दक्षिणा निरू
पत्वेनानतिसाधनत्व प्रयुक्तत्वात्तेन धर्माः क्रियंते न तु साधनत्वं वासो वत्सेपि समानं॥ तस्मादत्रापि संति ते धर्माः॥ ॥ अष्टमाधिक
रणमारचयति॥ ॥ पाकोस्ति नो वा वत्से स्यादन्वाहार्यस्य दर्शनात्॥ न वत्सनाशाद्दृष्टो ती दक्षिणा मांसदानतः॥ अन्वाहार्ये पा
कोस्ति पूर्वन्यायेन तद्धर्मातिदेशाद्वत्सेपि पाकः स्यादिति चेत॥ न। वत्सनाश प्रसंगात॥ अस्त्विति चेत॥ न॥ तथा सति मांसदानेन
श्रुतहान्यश्रुतकल्पने प्रसज्येयातां तस्मान्नास्ति वत्से पाकः॥ ॥ नवमाधिकरणमारचयति॥ ॥ वाससि नवापाको विना

भावतोस्त्यसौ॥ वैयर्थ्यादप्यशक्यत्वात्पाकोवासमिनोचितः वाससउष्णोदकेदभांडप्रक्षेपेणवत्तस्यैवविनाशोनास्ति तस्मादन्वा
हार्यवत्पाकोस्तीतिचेत्।न॥ ओदनत्वार्थोहि पाकः नहिवाससः सहश्रप्यमानस्यौदनतासंभवतिनचपाकः कर्तुंशक्य
तेनतक्षोदकसंयोगः पाकशब्दस्यार्थः किंतर्हि तंदुलादीनांविक्लित्तिजनयितुं पुरुषप्रयत्नः नचवाससस्यास्तिविक्लित्तिः तस्मादतिदि
ष्टः पाकोबाध्यते॥ ॥दशमधिकरणमारचयति॥ ॥अभिघारोस्तिनोवात्रशक्यत्वात्वत्सवाससोः॥ अस्त्यन्वाहार्यवन्नैवंस्यादु
तायाअसंभवात्॥स्पष्टोर्थः॥ ॥एकादशाधिकरणमारचयति॥ ॥दक्षिणाद्वादशशतंतस्यत्वेतद्गवादिषु सर्वेषुकपृथिवि[illegible]प्रत्ये
कंमिलितेषुवा॥ संख्यागुणस्यप्रत्येकंगवाद्यन्वयतोग्निमः॥वाक्यभेदान्नतत्किन्तुमिलितेषुसमुच्चयात्॥ प्रस्थाद्यैर्वाचप्यतोधान्यै
सर्वेषानसमुच्चयः॥असर्वत्वेपिपक्षेपिपशवोवैकमेववा॥ संख्योचित्येन पशवोनेकतस्यैत्यनन्वयात्॥ एकत्वेप्यत्रयत्किंचि
न्माषावागावएवपतःकिंचिंनियमाभावान्माषाः संनिहितत्वतः॥माषानिराकृतागावः प्राथम्याच्चोपकारतः॥तस्येतिवाक्याद्गो
द्रव्यंनयुक्तंप्रकृतःकुतः॥संख्यांतरंचेद्विकृतौस्याद्गवांबाधतामियं॥ज्योतिष्टोमेदेयद्रव्याण्यनुक्रम्यसंख्याविशिष्टादक्षिणाभि
धीयते॥ गौश्चाश्वश्चाश्वतरश्चगर्दभश्चाजाश्चावयश्चव्रीहयश्चयवाश्चतिलाश्चमाषाश्चतस्यद्वादशशतंदक्षिणेतिद्वादशाधि
कंशतं॥तत्रसंशयः सेयंसंख्याकिंगवादिसर्वद्रव्यविषयाकिंवाकतिपयविषया॥ सर्वत्वपक्षेपिप्रतिद्रव्यमियंसंख्याउतमिलिता
नां तत्रगवादिद्रव्याणिप्रधानानिसंख्यातद्गतोगुणः प्रतिप्रधानंचगुणावृत्तिर्न्याय्यातस्माद्गवादिद्रव्येषुप्रत्येकमियंसंख्येतिप्र
थमपक्षगतेप्रथमेशास्त्रविकल्पेप्राप्तेब्रूमः॥ नेतद्युक्तंवाक्यभेदप्रसंगात्॥ अतोनमिलितानामियंसंख्येतिद्वितीयशास्त्रवि
कल्पोभ्युपगंतव्यः॥ तथासतिसमुच्चयवाचिनश्चशब्दाः अनुगृह्यंते एतदप्ययुक्तंअनौचित्यात्॥ नहिव्रीहियवादिधान्येषुद्वा
दशाधिकशतांतर्गतद्विजादिसंख्योचिता परिच्छेदस्यप्रस्थद्रोणादिभिः व्रीहिव्रीजैः प्रयोजनाभावात्॥ प्रस्थादिकरवार्यादिसंख्या
तत्रोचितानचेयमत्रश्रुतात्मान्मिलितानांसर्वेषांसमुच्चयइत्ययंपक्षोनयुक्तः कतिपयद्रव्यविषयासंख्येत्यस्मिन अपि
पक्षेकिंगवाद्याः षड्विधाः पशवः किंवागवादिद्रव्येष्वेकंद्रव्यंतत्रपशुषुश्रूयमाणायाः संख्यायाउचितत्वात्॥ पशवइतिप्राप्ते ॥श्रीः ९
ब्रूमः॥ नैतद्युक्तंतस्यद्वादशशतंदक्षिणेत्यत्रतस्येत्येकवचनांतेनवर्णोगवादिपशूनांमन्वेतुमयोग्यत्वादेकत्वपक्षेकिंय १४०
त॥ किंचिदेकंकिंवामाषद्रव्यंउतगोद्रव्यंतत्रनियामकाभावाद्यत्किंचिदितिप्राप्तेतंनसंनिधेर्नियामकत्वाभावात्॥ माषस्य

281
1945

तस्यद्वादशशतंदक्षिणेतिमाषासंहिताः तर्ह्येकमाषद्रव्यमितिचेत्।न॥ प्रस्थानादिपरिमाणसंख्यौचित्येननिराकृतत्वात्तस्मात्॥ गोद्र
व्यमितिपक्षः परिशिष्यते॥ प्रथममश्रुतत्वोपकारोततत्रनियामकोअस्तिहिग्रहानुपकारः ऋत्विजः प्रतिग्रहीतुर्गव्येनाज्यक्षीरादिना
ग्निहोत्रदर्शपूर्णमासादिसिद्धेः नतुतस्यप्रकृतस्यकृतोद्वादशशतंदक्षिणेत्यन्वयात्॥ गोद्रव्यंनप्रतीयतइतिचेत्॥न॥ यद्गोद्रव्यंतस्य
द्वादशशतमितिवाक्येनततुप्रतीतेः॥ वाक्यंहिप्रकरणाद्बलीयः॥तस्माद्गवांद्वादशशतमितिसिद्धांतः॥ विकृतिषुयत्रगोर्दक्षिणाया
संख्यांतरंश्रुतंतत्रस्योक्तोसंख्यायाबाधोविचारफलं॥ ॥द्वादशाधिकरणमारचयति॥ ॥गोदानेविहितेथद्यनियतिर्वापिमपिकिं॥
अविभागोविभागोवानियमानुक्तितोग्रिमः॥अविभागोबहुत्वोक्तेबहुत्वन्नविवक्षितं॥विभागोस्वामिभिः स्वत्वसिद्धेर्लिंगंचदृश्यते॥
पूर्वोक्तएषगवांदानसंशयः ऋत्विग्भ्योदेयानामुक्तसंख्यानांगवांविभागाविभागयोः यजमानेच्छैवप्रयोजिकाउतास्त्यन्यतरनियतिः
यदापिनियतिस्तदाप्यविभागोविभागोवाविभागत्वनियामकस्यानुक्तत्वात्इच्छेतितावत्प्राप्ते॥ ऋत्विग्भ्योदक्षिणांददातीतिबहुवच
नश्रवणेनसमूहस्यप्रतिग्रहीत्वादविभागइतिपक्षांतरंग्रहेकत्ववदुद्देश्यगतत्वाद्बहुत्वंनविवक्षितमित्येकैकः प्रतिगृहीता॥ तथासति
विभागोयश्चंभावीसमुदायददाविभजत्वितिमंत्रेविभागलिंगंदृश्यते॥ तस्माद्विभागनियमोराद्धांतः॥ ॥त्रयोदशाधिकरणमारच
यति॥ ॥सविभागः समोनोवाविशेषाश्रवणात्समः॥ वैषम्यंस्याद्यथायासमैवंतद्यात्।समाख्यया॥ पूर्वोक्तः सविभागः समःस्या
त्।कुतः वैषम्यहेतोर्विशेषस्याश्रवणात्साम्यहेतुषुलौकिकोन्याय्यश्च॥ लोकेहिपुत्राणांपितृधनेसमोविभागोदृष्टः॥ तस्मात्समइत्येकः
पक्षः॥ कर्मकरेषुप्रयासानुरूपेणभृतितारतम्यंदृष्टंतद्वदत्रापीतिद्वितीयः पक्षः॥ द्वादशाहेदीक्षायामेवंसमाख्यायते॥ अर्द्धिनोदीक्षय
पादिनोदीक्षयतीतिअर्द्धयेषामृत्विजांतेर्द्धिनएवंपादिनोयोजनीयाः॥ तद्विशेषोयाज्ञिकमुखादवगंतव्यः॥ ततःश्रौतसमाख्यानु
रूपेणकेषांचिदर्द्धंकेषांचित्पाद इत्यादिविशेषयोविभागइतिराद्धांतः॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥भृताग्निधेनुर्बाधे
तगाः किंवाकृत्स्नदक्षिणाधेन्वाविशेषितत्वात्गादक्षिणैकत्वतोखिलं॥अतीताभ्यामधिकरणाभ्यांबाधोपाद्यातत्वेनप्रकृतोद
क्षिणानिरूपिता॥अत्रविकृतौबाधोनिरूप्यते॥ अथैषभूरितिभूनाकमेकाहविशेषमुपक्रम्यधेनुर्दक्षिणेति॥ सेयंधेनुर्गोमात्रंबा
ध्यते॥कुतोयागोः साधेनुरितिविशेषयितुंयोग्यत्वात्॥ नह्ययोश्वः साधेनुरितिविशेषणंयुज्यते॥ तस्माद्गोविशेषविशेषरूप
याधेन्वाप्राकृतस्यगोसामान्यस्यैवबाधोनतरस्येतिप्राप्तेब्रूमः॥ इयंधेनुरखिलांदक्षिणांबाधते॥ कुतः गवादीनांमाषांतानांस

अ॰ क॰ र॰ माला॰ वेषामेकदक्षिणारूपत्वात् दक्षिणेत्येकवचनमिह प्रयुज्यते॥ गोश्चेत्यादयः समुच्चयवाचिनः चशब्दा एकत्वस्वोपपद्यंते॥ आ
१४१ नतिश्चैवं सत्यत्यंतस्फलभायदि दक्षिणाभिद्येत तदातीमकयेवानतिसिद्धिरितरासां वैयर्थ्यं दुर्वारं तस्मान्निखिलदक्षिणाबाधः॥
॥ ॥ पंचदशाधिकरणमारचयति॥ ॥ एकां पंचेति कृत्स्ना वा गोसंख्यां वा निवर्तयेत्॥ स्याद्याद्यो दक्षिणायोगात् मैवं व्यवहित
त्वतः॥ इदं श्रूयते॥ यस्य सोममपहरेयुरेकां गां दक्षिणां दद्यादभिदग्धे पंचमा इति तदिदं संख्याविशिष्टं द्रव्यं विधीयमानं गवा
श्वादिदक्षिणां कृत्स्नां निवर्तयेत्॥ तस्य दक्षिणाशब्दयोगेन कार्यैकत्वात् मैवं॥ विशिष्टविधौ गौरवात्॥ गवां प्राप्तत्वात्॥ सं
ख्यामात्रं विधेयं॥ तस्य च गोपदेन व्यवधानान्न दक्षिणायोगोस्ति यागे तु गोगतां वो विरोधिनीं पूर्वप्राप्तसंख्यामेव निवर्तये
न त्वंन्यत् किंचिदिति राद्धांतः॥ ॥ षोडशाधिकरणमारचयति॥ ॥ त्रिवत्सेनर्षभो बाधः कृत्स्नं वा क्रयसाधनं॥ ऋषभः पुंगवत्वा
न क्रयो द्वेवाविधानतः॥ साद्यस्क्रे वर्षत्रयोपेतो गौः श्रूयते त्रिवत्सः॥ सोऽसोमक्रयणइति प्रकृतौ वज्ञया क्रीणाति हिरण्येन क्री
णाति ऋषभेण क्रीणातीत्यादिना क्रयसाधनान्याम्नातानि तत्र पुंगवत्वसाम्येन बाध्यमृषभमात्रमिति पूर्वः पक्षः॥ नैतद्युक्तं कु
तः क्रयमुद्दिश्य त्रिवत्सविधानात् सोऽउत्वोदृशेन तद्विधावग्नीषोमीयादावपि त्रिवत्सः प्रसज्येत तस्मात् कृत्स्नं क्रयसाधनं बाध्यं॥ ॥
सप्तदशाधिकरणमारचयति॥ ॥ किं प्रकाशो बाधकोस्तः कृत्स्नं स्यान विशिष्टयोगतः॥ अश्वमेधे श्रूयते हिरण्मयौ प्राकाशावध्वर्यु
वे ददातीति प्रकाशौ दीपस्तंभावित्येके दर्पणावित्यपरे तौ किं प्राकृतस्य दक्षिणाद्रव्यस्य कृत्स्नस्य बाधकौ उताध्वर्युभागस्यैव तत्र प्रा
काशौ ददाति कर्मकारकवाचि द्वितीया श्रुतिकृते न दान संबंधेन प्रकाशावध्वर्यये इति वाक्यकृत पुरुषसंबंधे पादिते सति देयद्रव्यप्र
तीतेः देयांतरस्य कृत्स्नस्य बाध इति पूर्वः पक्षः॥ अध्वर्यवे ददातीति संप्रदानवाचि चतुर्थीश्रुतिकृतस्य दानक्रियासंबंधस्या प्रवल श्री७
पवदितुमशक्यत्वात्॥ संप्रदानविशिष्ट दानक्रियया संबंधे द्वितीयाश्रुतेरविरोधात्॥ अध्वर्युभागस्यैव बाध इति राद्धांतः॥ ॥
अष्टादशाधिकरणमारचयति॥ ॥ श्यावाश्वो ब्रह्मसत्रस्य बाधको निखिलस्य वा॥ आद्यः प्रकाशवन्मैवं धेनुवत्वोपि नात्यगः १४१
अन्युपहव्यनामक एकोहविशेषः॥ तत्र श्रूयते॥ अश्वः श्यावो रुक्मललाटो दक्षिणा स ब्रह्मणे देय इति प्राकाशवच्छ्यावस्यानावब्रह्म
भागस्यैव बाधक इति पूर्वः पक्षः॥ दक्षिणाशब्दसंयोगाद्धेनुन्यायेन कृत्स्नस्य बाधकः॥ उपरितनं न तु ब्रह्मणे देय इति वाक्यांत
णात स्यार्थस्य ब्रह्मस्य व्यतिरिक्तपुरुषांतरसंबंधो बाध्यते तथा सति पुरुषांतरस्यानिर्दिष्टोपदिष्ट दक्षिणाद्रव्य बाधाल्लौकिकदानादि

नाकेनचिदुपायेनानतिः सिद्ध्यति॥ ॥ एकोनविंशाधिकरणमारचयति॥ ॥ किं सोमवचसो ब्रह्मभागहा युत कृत्स्नकृत्॥ परकृता
निंदया सर्वप्रसक्तेर्ब्रह्मभागाहमू॥ निंदेयं न निषेधाय चमसस्कृतयत्वसौ॥ श्यावाश्ववत्सर्वदेयं पुरुषांतरबाधकः॥ ऋतपेये श्रूयते
औदुंबरः सोमवचमसो दक्षिणा धिसे यायसगोत्राय ब्रह्मणे देय इति सायं सोमचमसो ब्रह्मभागमेव बाधते कुतः यत्प्रशूनं द द्यात्सोन्नूत्सं
कुर्यादिति परकृतदाननिंदया सर्वदानप्राप्तेः तस्मान्न सर्वबाधक इति प्राप्ते ब्रूमः॥ नात्र निषेधाय परकृतनिंदोच्यते॥ किं तु विधित्सितसोम
चमसस्तुत्यर्थोयमर्थवादः तेन निंदाया सर्वप्रसंजकत्वं नास्ति तस्मात्सर्वप्रसक्तिरूपाया अभ्यधिकाशंकाया निराकृतत्वात्॥ पूर्वा
धिकरणन्यायेनात्र निर्णयो द्रष्टव्यः॥ ॥ तस्मिन्नेवाधिकरणे कृत्वाचिंतारूपं विचारं बुद्धिव्युत्पादनाय रचयति॥ ॥ पूर्वोक्तनिर्णयं
पूर्वपक्षयित्वैकवाक्यतां॥ भ्रात्याकृत्वा दक्षिणां तां ब्रह्मभागं निवर्तयेत्॥ शावाश्वाधिकरणे रुक्मललाटो दक्षिणेत्यस्य ब्रह्मणे देय
इत्यस्य चांतराले सत्यनिरुक्त इति वाक्यांतरं पठितं तेन व्यवधानादिस्य शावाक्यभेदः॥ इह त्वव्यवधानादेकं वाक्यमिति एकवाक्य
तायां तु चमसशब्दस्य दक्षिणाशब्देन ब्रह्मशब्देन च संबंधे सति कृत्स्नदक्षिणायाः पुरुषांतरस्य च निवृत्तिः तथा सति पूर्वोक्तसिद्धां
त एवात्र पूर्वपक्षीभवति दक्षिणामुद्दिश्य चमस एको विधेयः॥ तस्य ब्रह्मसंबंधोपरो विधेयः ततोर्थभेदात्॥ वाक्यभेदो दुर्वारः तस्मा
द्दक्षिणाशब्देनातादृशां लक्षयित्वा ब्रह्मसंबंधिदक्षिणाशमनूद्य चमसमात्रविधानात्तद्भागस्यैव निवृत्तिः॥ ॥ कृत्वाचिंतामुद्घाटय
ति॥ दक्षिणोक्तिः क्रतौ दृष्टा सर्वत्रासौ न लक्षिता वाक्यभेदश्च दुर्वारो युक्तोतः पूर्वनिर्णयः॥ प्रायेण वैदिकव्यवहारे दक्षिणाशब्दः
क्रतुविषय एव दृष्टो न तु पुरुषविषये ततः क्रतुदक्षिणारूपः चमसः सर्वा क्रतुदक्षिणां निवर्तयेत्॥ वाक्यभेदस्तु विस्पष्टं भासमा
नः॥ शोकं कुशामवलंब्य न्यायविदा न निवारयितुं युक्तः स्यात् कृत्स्नदक्षिणापुरुषांतरयोर्बाध इत्ययमेव सिद्धांतो युक्तः॥ ॥
विंशाधिकरणमारचयति॥ ॥ यजुर्युक्तोध्वर्युभागं बाधते यमयत्युत॥ बाधः प्रकाशवन्मैवं पक्षप्राप्तेर्नियम्यते॥ वाजपेये श्रूय
ते॥ यजुर्युक्तं रथमध्वर्यवे ददातीत्यस्यायमर्थः॥ रथशाकटदासीनिष्कानी सप्तदशद्रव्याणि प्राकृतगवाश्वादिदक्षिणाद्रव्यबाध
कान्यत्र विहितानि तेषु प्रतिद्रव्यं सप्तदशसंख्या विहिता॥ ततो रथाः सप्तदश तेषु मुख्यं रथं यजमानारोहणायेंद्रस्य वज्रोसीत्यादिभि
र्यजुर्वेदोक्तैर्मंत्रैः सज्जीकरोति सोयं यजुर्युक्तो रथः तं दक्षिणाकाले ध्वर्यवे ददाति प्राकाशावध्वर्यवे ददातीत्यत्र यथा चोदकप्राप्त
स्याध्वर्युभागस्य बाध एवमत्रापि न तु सप्तदशद्रव्यविधानेनैव प्राकृतद्रव्यबाधसिद्धिः॥ बाढं तथाप्यद्धिनः यदि नः इत्यादि समा

283
1945

स्त्या आपिताविषयविभागविशेषक्लृप्तिः साम यजुर्युक्त रथन्तरभागविशेषाविधानाद्बाध्यते॥ तस्मादध्वर्योन रथन्तरभागो
स्ति नापि शाकटदास्यादिभाग इति पूर्वः पक्षः नैतद्युक्तं प्राकाशादृष्टान्तवैषम्यात्॥ अत्यन्तमप्राप्तो हि प्रकाशो तत्र विधेयो यजुर्युक्त
रथस्तु पक्षे प्राप्तः॥ तथा हि सप्तदशारथान्ददातीत्युक्ते कस्य को रथ इति जिज्ञासायां यजमानेच्छायाः नियामकत्वात्॥ यदाध्वर्य
वे दातुमिच्छति तदा प्राप्नोति यदा नेच्छति तदा न प्राप्नोतीति पक्षे प्राप्नोति॥ ततो यो यजुर्युक्तो रथः सोध्वर्यवे वश्यं देय इति नियम्य
ते तेन कस्याप्यनेन बाधः॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे दशमाध्यायस्य तृतीयः पादः॥ ॥ चतुर्थपादस्य
प्रथमाधिकरणमारचयति॥ ॥ नक्षत्रेष्टूपहोमादि नारिष्टादेर्निवर्तकः॥ समुच्चितो वा कार्यैक्यादाद्योन्त्यो पूर्वभेदतः॥ संतिनक्ष
त्रेभ्यः स्वाहा कृत्तिकाभ्यः स्वाहा॥ अंबायै स्वाहा दुलायै स्वाहेत्यादयः उपहोममंत्राः प्रकृतौ प्रधानहोमादूर्ध्वं नारिष्टहोमो
विहितः॥ नारिष्टान्होमान् जुहोतीत्युक्तत्वात्॥ दशातन्तुर्वा यज्ञ यदिया इत्यादयः॥ तत्र मंत्रा अयमेको विषयः॥ तथाश्वमेधे श्रूय
ते लोहितोष्णीषा लोहितवसना निविता ऋत्विजः प्रचरंतीति प्रकृतावुपवीतं विहितं उपव्ययत इति॥ अयं द्वितीयो विषयः॥ तथा
ऽध्वर इदेश्रूयते॥ मधुव्रतानं धृतं वै निप्रकृतौ क्तं पयो ब्राह्मणस्य व्रतं यवागू राजन्यस्यामीक्षा वैश्यस्येत्ययं॥ तृतीयो विषयः
यः तत्रोपहोमनिवितमधुव्रतानि क्रमेण नारिष्टहोमोपवीतपयोव्रतानां निवर्तकानि कुतः कार्यैक्यात्॥ उपहोमनारिष्टहोम
योस्तावज्जुहोति शब्दैक्यत तदर्थैक्याभ्यां कार्यैक्यं प्रतीयते॥ अशनपयोव्रतयोः शब्दभेदेप्यर्थभेदो नास्तीति निवीतोपवी
तयोः शब्दार्थभेदेपि विहितशब्दस्मारितं॥ कार्यमेकं स्यात्तस्माद्बाध इति पूर्वः॥ भवतु नामदृष्टार्थेषु कार्यैक्यदृष्टो बाधः॥ उ
दाहृतानि त्वपूर्वार्थानि अपूर्वं च विध्येकगम्यं तथा विधिभेदेन भिद्यते तस्मात्समुच्चयोत्फलगंतव्यः॥ न च निवीतोपवीतयो
र्विरोधः शंकनीयः॥ वासोभ्यां तदुभयोपपत्तेः नापि पयोव्रतस्य दृष्टार्थत्वं॥ अल्पेन पयसा तृप्तिपुष्ट्यसंभवात्॥ उदाह
रणद्वये त्वत्वाचिंतितास्तु॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ समुच्चेयं शरमयं कौशेनोत्यस्य बाधकं॥ प्राचुर्यस्यावि
धेराद्यो मैवं प्रतिपदोक्तितः॥ सोमारौद्रं चरुं निर्वपेत॥ कृष्णानां व्रीहीणां अभिचरं नित्य शरमयं बर्हिर्भवतीति तद्विदं प्रकृ
तेन कुशबर्हिषा समुह समुच्चीयते कुतः मयट्शब्देन शरप्राचुर्यस्य विधानाद्बाधेनापि तदुपपत्तेरिति पूर्वः पक्षः॥ नित्यं
वृद्धशरादिभ्य इति सूत्रेण शरशब्दादिकारार्थो मयट् प्रत्ययः प्रतिपदोक्तः॥ अतः तं परित्यज्य प्राचुर्यार्थोन ग्रहीतुं शक्यः किं

च प्राचुर्ये र्थे कार्यांतरं कल्पनीयं स्यात् तस्मात् कुशबर्हिषा बाध इति राद्धांतः॥ ॥ तृतीयवर्णकमारचयति॥ ॥ रथ
दुंदुभितद्घोषौ किं बर्हिर्मंत्रयोः क्रमात्॥ बाधकावुत तद्घोष एक एव हि बाधकः॥ रथघोषस्य यं द्वंद्व स्तोनोभौ बाधकौ न
तत घोषाभ्यामिति वा घोषे लक्षणया वा प्रयुज्यते॥ पूर्वपक्षे न्यदीयोपि शब्दो शास्त्र घोषो नाद्य रथे सति॥ सिद्धांते रथदुंदुभ्या
रेव घोषप्रयोजकः॥ वाजपेये श्रूयते॥ रथघोषेण माहेंद्रस्य स्तोत्रमुपाकरोति दुंदुभिघोषेण माहेंद्रस्य स्तोत्रमुपाकरोती
ति॥ प्रकृतौ त्वेवं श्रूयते॥ उपावर्तध्वमिति बर्हिर्भ्यां स्तोत्रमुपाकरोति॥ उपाकरणं नाम स्तोत्रं प्रतिप्रेरणं॥ तत्र रथद्रव्य दुंदु
भिद्रव्यद्वयं बर्हिर्द्रव्यस्य बाधकं घोषो मंत्रस्य बाधक इति नावप्राप्तं॥ रथश्च घोषश्चेति द्वंद्वसमासे चोभयोः प्राधान्या
त्॥ नैतद्युक्तं॥ इतरेतरयोग द्वंद्वे रथघोषाभ्यामिति द्विवचनप्रसंगात्॥ समाहारद्वंद्वे तु घोषशब्दस्य समाहारलक्षक
तया मुख्यवृत्तिर्हीयेत रथस्य घोष इति तत्पुरुषसमासे मुख्यवृत्तिर्न हीयते॥ किंच द्वंद्वे न्यदीय घोषोत्र प्रसज्यते॥ रथस्य
घोष इति तत्पुरुषसमासे मुख्यवृत्तिर्न हीयते॥ तत्रापि रथस्य प्राधान्यं हीयत इति चेन्न॥ तत्समाहारेपि समानं तस्मात् घो
षो द्रव्यमंत्रयोर्बाधकः॥ ननु यद्युभयं बाधकं यदि वैकं सर्वथा द्रव्यमंत्रो बाध्यते॥ तत्र को तिशय इति चेत्॥ उच्यते पूर्वप
क्षे स्वयमध्वर्युष्यन्नपि रथः॥ सद्भावमात्रेण बार्हिष्मिवर्तयति॥ घोषश्च रथेनाविशेषितत्वात्॥ अन्यदीयापि घोषो मंत्रं
निवर्तयेत्॥ सिद्धांते तु नान्यघोष इत्यतिशयः॥ ॥ तृतीयाधिकरणमारचयति॥ ॥ बार्हस्पत्यादयः किंस्युः प्राकृतग्र
हबाधकाः॥ समुच्चिता उताद्योस्तु कार्यैक्यात् ग्रहलिंगतः॥ समुच्चयः प्रमाणाभ्यां प्राकृतो यथा विधेयो क्तेन लिंगत
श्चो लिंगं स्फुरग्रहः॥ बृहस्पतिसवे श्रूयते॥ बार्हस्पत्यं ग्रहं गृह्णातीति विषुवत्यर्कं गृह्णातीति महाव्रते शुक्रं गृह्णातीति अश्व
मेधे श्रूयते सौवर्णराजताभ्यां महिमानौ गृह्णातीति तत्र बार्हस्पत्यादयो ग्रहाः प्राकृतानामैंद्रवायवादिग्रहाणां बाधकाः कु
तो होमनिष्पादनलक्षणस्य कार्यस्यैकत्वात्॥ ग्रहशब्दसंयोगः कार्यैक्य गमकत्वात्॥ तस्मात् बाध इति प्राप्ते ब्रूमः॥
यथा प्रकृतौ प्रथमचोदितस्यैंद्रवायवग्रहस्य पश्चाच्चोदितानां मैत्रावरुणादिग्रहाणां च समुच्चयः॥ तथात्रोपदिष्टानां
मतिदिष्टानां समुच्चयः स्यात्॥ अथोच्येत प्राकृतानां परस्परमेककार्यत्वे मानाभावात्॥ प्रत्युत प्रयोगवचनेन संभूयका
रित्वावगमाद्युक्तः समुच्चय इति तर्ह्यत्रापि समानं यागनिष्पादकत्वं तु प्रयोगवचनप्रापितत्वात् संहतानामेव तत्वेकैक

श्री ॰
१४२

285
1945

स्यअर्केण यजेत ग्ना ऋेण यजेत्येवं पृथक् पृथग्योगे ग संबंधाभावात॥ ग्रहशब्दो पूर्वौविधेयग्रहणक्रियां ब्रूते॥ न तु प्रकृतौ कृत्स्ना
यं पदार्थमनुवदतीये न लिंगं स्यात्॥ किंच वाजपेये सोमग्रहाम्सुराग्रहाश्चेत्यतिदिष्टानां उपदिष्टानां च समुच्चयार्थमुच्यमानश्च श
ब्दः सर्वत्र समुच्चयं गमयतितस्मान्न बाधः॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ प्राजापत्यैः पशूनां किं वा धोयद्वा समुच्चयः॥ अ
क्रियार्थाः पशुश्रुतिः स्याल्लिंगं तत्रास्ति बाधनं॥ पशुनुद्दिश्य संख्या या देवस्य च विधौ भिदा॥ कर्मान्यत्वं न्यादा द्रोधनाच्च समुच्चयः
॥ वाजपेये श्रूयते॥ सप्तदश प्राजापत्यान्पशूनालभत इति तैरेतैः प्राकृत पशूनामाग्नेयादीनां बाधः स्यात्॥ कुतः पशुत्वलिंगात्॥
न हि पशुशब्दो ग्रहशब्दवद पूर्वौविधेयक्रियां ब्रूते ये न लिंगत्वं हीयतेति प्राप्ते ब्रूमः॥ किमत्र प्राकृतपशुनुवादेन सप्तदशसंख्या
प्रजापतिदेवता चेति गुणद्वयं विधीयते॥ आहोस्विद्विशिष्टमन्यत्कर्मनाद्यः वाक्यभेदापत्तेः द्वितीये तु न पशुशब्दो लिंगं तत्तो
ग्रहन्यायो योजनीयः किंच रोधनमेवमाम्नायते ब्रह्मवादिनो वदंति नाग्निष्टोमो नोक्थ्यः न षोडशी नातिरात्रः अथ कस्माद्वाजपेये
सर्वे यज्ञक्रतवोवरुध्यंत इति पशुभिरिति ब्रूयात्॥ आग्नेयं पशुमालभते॥ अग्निष्टोममेव तेनावरुंधे॥ ऐंद्राग्नेनोक्थ्यं॥ ऐंद्रेण षो
डशिनस्तोत्रं॥ सारस्वत्यातिरात्रं॥ मारुत्या बृहत्स्तोत्रं॥ एतावंतो वै यज्ञस्य क्रतवः तान्पशुभिरेवावरुंध इति अस्मिन्नवरोध
ना प्रायेचोदकप्राप्ताग्नेयादि पशुसद्भावस्य सिद्धवदनुवादात्॥ समुच्चयो वगम्यते॥ ॥ पंचमाधिकरणमारचयति॥ ॥आ
मेनाहुतिभिर्बाध्या अनुयाजा उत वा त्रिमः॥ त्रित्वात्लिंगाद्विशिष्टत्वभेदात्मध्ये क्रियातोत्तिमः॥ सांग्रहणीयेष्टौ श्रूयते॥ आमनमस्या
मनस्य देवा ये सजाता इति तिस्र आहुतीति एताभिस्तिसृभिराहुतिभिः प्राकृताः॥ त्रयोनुयाजा बाध्याः कुतः त्रित्वलिंगात् पूर्वाधि
करणे सप्तदशसंख्याविशिष्ट प्राकृतपशुभावेन माभूत्बाध्यत्वं इह तु त्रित्वविशिष्टत्वादनुयाजा बाध्यंतां यद्वा तदनुवादेन त
त्र गुणविधानात्॥ प्राकृतमंत्रबाधक इति पूर्वः पक्षः॥ किं त्रित्वमनूद्य मंत्रसहिता आहुतयो विधीयंते आहोस्वित्त्रित्वविशिष्टा
आहुतिरआद्ये त्रित्वमन्यादिष्वपि सत्वेनान्वयान्न लिंगं द्वितीये विशेषणविशेष्ययोर्भेदेन वाक्यं भिद्यते तस्मात्कर्मांतरं विधा
नान्न बाधः किं तर्हि समुच्चयः॥ तत्र मध्ये क्रियालिंगं तथा चाम्नायते पुरस्ताद्वा परिष्टाद्वा जुहुयात्॥ बर्हिरात्मन्सजातीयानदध्या
त॥ यन्मध्यतो जुहोति मध्यत एव सजातीयान्धारयत इति तस्मादामनहोमाना मनुयाजैः सह समुच्चयः॥ ॥ षष्ठाधिकरणमारच
यति॥ ॥ पत्न्याद्युपगायतीं तृत्विजां विनिवर्तकाः॥ न वाद्यः समागानोपच्छयः कांडादिजस्ततः॥ तदनं दुंदुभीविहितं विपरी ॰ नां

श्री० १४३

287
1945

र्तनं॥ उपगानं भवेत्तेनयोग्यं वीणादिजं ततः॥ गवामयने महाव्रतनामेकाहस्तत्र श्रूयते॥ पत्नय उपगायंतीति॥ तत्र पत्नयः उपगा
यंत्यः प्राकृतानां ऋत्विजां उपगातॄणां निद्दिश्कः दुंदुभयो नदंतीति दुंदुभिगानानामनंतरं विहितानां चितावि परीवर्तमानानां इदमुपगा
नं कर्मांतरं न च शारीरमेव गानं तस्येदमुपगानं॥ दुंदुभिनदनस्याशारीरत्वा पत्नीभिः क्रियमाणमुपगानमिति। तंत्रिगानेपि गान
प्रयोगात्॥ किंच कांडवीणादिभिः पत्नीभिः क्रियमाणमुपगानं दुंदुभिगानसजातीयं॥ तस्मात्पत्न्यान्त्विक् निवर्तिकाः॥ ॥
सप्तमाधिकरणमारचयति॥ ॥ अभ्यंगो वा नवीभूतः किं बाध्यो गोल्गुलवादिभिः॥ न वाद्योल्पजैकत्वात् न द्रौत्यस्ते हभेदतः॥ अ
स्यज्ञनाभ्यंजनसंज्ञक एकोनपंचाशद्रात्रः सत्रविशेषः तत्र श्रूयते गोल्गुलवेत प्रातः सवने भ्यंजते पैलुदानवेण माध्यंदिन सवने
सोगंधिकेन तृतीय सवन इति प्रकृतौ तु नवनितेनाभ्यंक्तेति श्रुतं सोमभ्यंगो बाध्यः॥ के पर्जन्यस्य शारीरगतस्नेहकार्यस्याभेदे
कत्वादिति पूर्वः पक्षः नैतद्युक्तं कुतः कार्यभेदात्गोल्गुवादि ले पजन्यकार्यं चंदनादि वत्सुगंधत्वं तावतील स्नेहाद्विन्नं किंच नाव
नीतो दीक्षा कालीन इतरः सत्याकालीनः तस्मात्। बाध्याभावात् समुच्चयः॥ ॥ अष्टमाधिकरणमारचयति॥ ॥ तार्प्याहत
वस्त्रस्य बाधकं स्यान्न चाप्यिमः॥ गुह्याच्छादनकार्यकरद्वयाग्यत्वात्समुच्चयः॥ ॥ महाव्रते श्रूयते॥ तार्प्यं यजमानः परिधत्ते दर्भम
यं पत्नीति प्रकृताव हतं वासः परिधत्त इति घृताक्ताः कंबला स्तार्प्यमित्युच्यते॥ ताभ्यां तार्प्यदर्भमयाभ्यां दंपत्योरहतं वस्त्रं बाध्यते॥
कुतः परिधत्त इत्यनेन प्रकृतिलिंगेन गुह्याच्छादनलक्षणस्य कार्यस्यैकत्वावगमात्॥ मैवं तार्प्यदर्भमयो गुह्यमाच्छादयितुमयो
ग्यत्वात्॥ परिधानं त्वत्रोपरितनं प्रावरणं तस्मात्कार्यभेदात्समुच्चयः॥ ॥ नवमाधिकरणमारचयति॥ ॥ बाध्यं श्लो
कादिना ज्यादिनो वा ध्यस्तोत्रलिंगतः देशसाम्नार्थिधोभेदो विशिष्याच्च समुच्चयः॥ महाव्रते श्रूयते॥ श्लोकेन पुरस्तात्सद
सः स्तुवतेत्यनुश्लोकेन पश्चादित्यादि तत्र श्लोकानुश्लोकादिनामकैः सामभिः कृतान्याज्यपृष्ठादिस्तोत्रगतानि रथंतरवा
मदेव्यादिनामकानि सामानि बाध्यानि कुतः स्तुवत इति प्रकृतिलिंगदर्शनात्॥ प्रकृतावाज्यैः स्तुवते पृष्ठैः स्तुवत इति हि श्रुतं॥
नैतत्सारं किमत्र स्तुतिमनूद्य देशसामगुणो विधीयेत किं वा गुणद्वयविशिष्टास्तुतिः नाद्यः वाक्यभेदापत्तेः द्वितीये तु कार्य
भेदेन बाधाभावात्समुच्चयः स्यात्॥ ॥ दशमाधिकरणमारचयति॥ ॥ समुच्चीयते कौत्सादि यद्वा प्राकृतबाधकं॥ स्तु
त्यभावादादिमोंत्यो लिंगप्रकरणद्वयात्॥ विकृतिविशेषे श्रूयते॥ कौत्सं भवति काण्वं भवतीत्यादि तदेतत्कौत्सादिनामकं

साम प्राकृतेन साम्नासमुच्चीयते॥ कुतः प्राकृतस्य स्तुतिलिंगस्याभावेन कार्येक्याभावात् मेवं॥ प्रकरणात् कृत्स्नं गते सत्युग
क्षराद भिव्यक्तिसामर्थ्येन लक्षणेन प्राकृत लिंगेन कार्येक्यावगमात् बाधकं॥ ॥एकादशाधिकरणमारचयति॥ ॥नतु स
र्वबाधकं सर्वमेकद्व्याद्यनेकितोथवा॥ अविशेषादादिमोंत्यएकाद्यनेकिविशेषतः॥ तत्पूर्वोक्तकौत्सादिसामविषयः तत्रकिं कौ
त्सं साम प्राकृतसर्वसामनिवर्तकं का एव मपि तथैत्यैकैकस्य सर्वनिवर्तकत्वमुच्यते॥ अहोस्विदेकवचनांतं निर्दिष्टं एकस्य
निवर्तकं द्विवचनांतनिर्दिष्टं द्वयोर्बहुवचनांतनिर्दिष्टानि॥ बहूनां तत्र नियामकाभावादाद्यः पक्षः प्राप्नोति एकादिवचन
रूपाणां श्रुतीनां नियामकत्वादंत्यः पक्षोभ्युपगंतव्यः॥ तथाहि कौत्सं भवति वासिष्ठ स्य जनित्रे भवतः॥ कौ चानि भवंती
ति निवर्तकेषु श्रूयमाणान्येक द्विबहुवचनानि निवर्त्यानामपि तेतर॥ संख्यायत्वं प्रत्यासत्या बोधकं किंचैवं सत्य बाधितस
मविषयश्चोदकोनुगृहीतो भवति कृत्स्नबाधे तु सर्वश्चोदको निरुध्येत तस्मान्न सर्वबाधः॥ ॥द्वादशाधिकरणमारचयति
॥ ॥स्तोमस्थयोर्वृद्धवृद्ध्योः प्राकृतं किं निवर्तते॥ अवृद्धावेव वाद्यः स्यात् सामात्यत्क पयोगतः॥ अवृद्धावुपयोगा त्प्रा
कृतस्य निवर्तकं॥ वृद्धिं प्रत्युपयोगित्वाद्वृद्धौ तु नानिवर्तकं॥ सति हि वृद्ध स्तोमका अवृद्ध रूढ स्तोमकाश्च विकृतिरूपाः क्रतवः
तत्रोभयत्रापि यानि सामात्कपदिष्टानि तैरतिदिष्टानां साम्नां निवृत्तिः स्यात॥ अन्यथा सामोत्पत्तिवैयर्थ्यादिति पूर्वः प
क्षः सिद्धांतस्पष्टार्थः॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥क्वापि स्तोत्र रुचिः क्वापि स्यादावापस्तथा स्तुतिः॥ पवमान
बृगायत्र्यादि श्रवेताविशेषतः॥ आद्यो नापरिसंख्यानादत्रत्ये वेति तद्विधेः॥ विध्यंतरारोषभूतमपूर्वे तद्विधीयते॥ अ
वृद्धस्तोमकेषु प्राकृतस्यादिष्टस्य साम्न उद्वापः॥ प्रत्यक्षोपदिष्टानामावापः वृद्ध स्तोमकेष्वावाप एवेति पूर्वाधिकरणस्थि
तं तावत् आवापोद्वापौ यश्चिन कस्मिंश्चित् स्तोत्रयस्यां कस्यांचिद्रौचि स्यातां कुतः नियामकाभावादिति पूर्वः पक्षः॥ नो स
च्चैतद्युक्तं एवकारणप्रकृत पवमान व्यतिरिक्तेषु आज्यादि स्तोत्रेषु गायत्रीबृहत्यनुष्टुब्व्यतिरिक्तास्वृक्षु आवापोद्वापयोः
परिसंख्यातत्वात्॥ एवमाकारश्चैवमाम्नायते त्रीणि हवैयज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् चात्रह्येवावपंत्यत ए
कुद्वपंत्तिइति ननु माभूतामन्यत्रावापोद्वापौ विवक्षित दशेषु कथं प्राप्नुवतइति चेत॥ अनेन वाक्येन तद्विधानादितिब्रूमः॥
न चायमर्थवादः अनन्यशेषत्वात॥ नाप्यनुवादः अपूर्वार्थत्वात॥ तस्मात्पवमाने ष्वेव गायत्र्यादिष्वावापोद्वापौ॥ ॥चतु

श्रीः ८
१४४

र्दशाधिकरणमारचयति॥ ॥पर्यायेणापि देवोक्तिः वैधेनैव पदेन वा॥ अर्थाभेदादिमोंत्यस्यात् शब्दापूर्वान्वयित्वतः॥ दर्शपूर्ण
मासयोर्यो निगमास्तेष्वग्न्यादिदेवताः किं पावक शुच्यादिना येन केनापि पर्यायेणाभिधेयाः किं वा तत्र विध्युद्देशगतेनाग्न्यादिपदे
नैवेति संशयः॥ तत्र शब्दोर्थप्रत्यायनार्थः तत्पर्यायाणां स्वरूपेण भेदेप्यर्थभेदाभावात॥ येन केनाप्यभिधानमिति पूर्वः पक्षः॥ यत्र ह्य
र्थं कार्यमासाद्यते तत्र शब्दोर्थोप्रत्यायनार्थो भवति॥ यत्र पुनः शब्द एव कार्ये तत्र कार्यसंबंधार्थं शब्द एव प्रत्यापयितव्यः॥ तद्यथा
देवदत्तो गोरखाति शायमुत्पादयितुं राजसभायामाचार्योपाध्यायादिशब्दैः संव्यवहरंति। पितृ मातृ मातुलादयश्च तत्तत्संबंधविशे
षवाचिशब्देन यथानुव्यंति न तथास्य नामग्रहेण प्रत्युत कुप्यंत्येव तद्वदत्रापि अग्न्यादिवैधशब्द एव कार्यमासक्तं विधिं विनायं
गदेवतयोः संबंधाभावात॥ विधिकृते तु तत्संबंधे शब्दस्य प्रयोजकत्वं दुर्वारम् तत एवायाट् स्वाहाकारोज्जित्यादिति निगमेषु नियमेन
वैधा एवाग्न्यादिशब्दाः प्रयुज्यंते अयाडग्नेः प्रियाधामानि स्वाहाग्निं स्वाहा अयाट् सोमस्य प्रियाधामानि स्वाहाग्निं स्वाहा सो
मं अग्नेरहमुज्जितिमनूज्जेषं सोमस्याहमुज्जितिमनुज्जेषमित्यादिना तस्माद्वैधपदैरेव तद्देवताभिधानं॥ ॥पंचमाधिकरणमा
रचयति॥ ॥सौर्यादि निगमे कोपि शब्दः स्याद्वैध एव वा॥ चरौ सूर्यान्वयादाद्यः प्रयोगान्वयतोंतिमः॥ सौर्यं चरुं निर्वपेदित्यादि
विकृतिषु चोदकात्प्रतिदिष्टायेग मास्तेष्वग्न्यादिशब्दरूढाने सूर्यादिगमोप्यर्थप्रत्यायकः शब्द ऊहितव्यः॥ स चार्थ आदित्या
दिना पर्यायेणापि प्रत्यापयितुं शक्यते॥ वैधस्तु सूर्यशब्दः॥ चरुयाग एवान्वितः न त्वग्न्यादिशब्दवन्निगमेषु पठितः तस्माद्यः
कोपीति प्राप्ते ब्रूमः॥ अत्र सौर्यं चरुं निर्वपदिति प्रयोगवचनेन सूर्यान्वयो भवति॥ ननु सौर्या अग्नि वरुणः कारकविभक्तिर्हि द्विती
या सा चाख्यातेन संबध्यते न नाम्ना सति च प्रयोगान पेक्ष्य याज्यापुरोनुवाक्ययोर्निगमेषु यत्र प्रयोगो न पेक्षितः॥ तत्र सर्वत्र सूर्य
शब्द एव प्रयुक्तः॥ प्रकृतावपि निगमेन नार्थमात्रविवक्षयाग्निशब्दः प्रयुज्यते किं तर्हि वैधशब्द विवक्षयापि तथा सत्यतिदेशो
पि वैधशब्दविषय एव भविष्यति॥ तस्मात् सूर्यशब्द एव प्रयोक्तव्यः॥ ॥षोडशाधिकरणमारचयति॥ ॥निगमे पावकाग्ने
किमग्निस्यादथवोभ क्षयं॥ अग्निश्चोदकतामेवं विध्योग्निसगुणोयतः॥ आधाने श्रूयते॥ अग्नये पवमानाय पुरोडाशमष्ट
कपालं निर्वपदग्नये पावकायाग्नये शुचय इति तत्र गुणगुणिनोः पावकाग्न्योर्मध्ये ग्निशब्द एव निगमे प्रयोक्तव्यः॥ कुतः
तस्यैव चोदकप्राप्त मंत्रपठितत्वात मैवं॥ पावकगुणयुक्तस्याग्नेः वैधत्वं न सर्वप्रयोगेषु तथैव प्राप्तत्वात॥ तस्मात् शब्दद्वयं

289
1945

पठितव्यं॥ ॥सप्तदशाधिकरणमारचयति॥ ॥इध्मन्वत्त्वादिगुणकादेवो वाच्याथ केवलः॥आद्योदेवगुणत्वेनमेवं मंत्रगुणत्वतः॥आ
धानपवमानेष्टिष्वाज्यभागौ प्रकृत्यश्रूयते॥ इध्मन्वानाग्नेयः कार्यः पावकवान्॥ सौम्यइति तत्रनिगमेषु इध्मन्वंतमग्निमाहा पावक
वंतं सोममावहेत्येवं सगुणोदेवो वक्तव्यः कुतः॥ इध्मन्वंतादेर्देवगुणत्वात॥ तथाहि श्रूयते॥ इध्मन्वानाग्नेयः कार्यः पावकवान्॥ सौम्य
इति नखल्वाज्यभागस्य देवताद्वारेणविना साक्षातइध्मन्वन् शब्दसंभवति तस्माद्देवगुणत्वात॥ सगुणदेवोवक्तव्यः मेवं॥ इध्मन्वंता
या मंत्रगुणत्वात॥ नह्यत्राग्नेयः शब्दो यागपरः किंतु मंत्रपरः संभवति मंत्रस्य साक्षादेव इध्मन्वन्शब्दयोगः अग्निस्तोमेन
र्धयेत्यस्मिन्मंत्रे वृद्धिवाचेः युक्तत्वात॥ इध्मन्वंताविधिनाचाग्नेयं मंत्रांतरं निवर्त्यते न च तद्धितांत आग्नेयपदउपसर्जनीभूतो
देवतावाचकाग्निशब्दो इध्मन्वच्छब्देन विशेष्टुमर्हति तस्मात्केवलोऽग्निशब्दो निगमेपठितव्यः॥ ॥अष्टादशाधिकरणमारच
यति॥ ॥किं गोवनस्पती केनाप्युतोऽत्राविधिशब्दतः॥ वक्तव्यौ निगमादूर्दो विधेर्दृष्टस्तथोऽग्निमः॥ तद्द्वयमार्थिकस्तं तु प्राप
ये चोदकोनहि॥ उस्रा प्रकरणाम्नानाद्धेधत्वेन वनस्पतिः॥ ज्योतिष्टोमे पशुः श्रूयते॥ गोरानुबंध्य इति तथा पशोस्विष्टकृद्वि
कारः पठितः एषदाज्येन वनस्पतिं यजतीति तावेतौ गोवनस्पतीनिगमेषु येन केनापि पर्यायशब्देन वक्तव्यौ कुतः प्रकृतौ विधिनि
गमयोर्भेददर्शने न वेधशब्दनियमाभावात॥ तथाह्याग्नीषोमीय पशुरनुबंध्यस्य प्रकृतिः तत्र पशुशब्दो वेध मग्नीषोमीयं पशु
मालभेतेति तद्विधानात निगमेषु छागशब्दः छागस्य वपाया मेदसोनुब्रूहीति॥ तथा वनस्पतीयागस्य स्विष्टकृद्यागः प्र
कृतिः तत्र स्विष्टकृतशब्दः सहितोऽग्निशब्दो वेधः अग्निं स्विष्टकृतं यजतीति विधानात॥ निगमेषु केवलोऽग्निशब्दः पठितः यदेव्या
ऋत्विजस्ताभिरग्ने इति सत्येवं विनिगमभेदे वेधशब्दनियमस्य प्रकृतावभावाद्विकृतावपि तदभावे सति येन केनाप्यभिधानमिति
पूर्वः पक्षः प्रकृतौ यद्यपि विधिनिगमभेदः॥ स आर्थिको न तु शाब्दः॥ अतश्चोदको न तं भेदमतिदिशति॥ तथा सति पूर्वोक्ताश्व
दीनि निगमन्यायेन विधिशब्दः प्राप्नोति॥ ततो वनस्पतिशब्द एव निगमेषु प्रयोक्तव्यः॥ न चैव मानुबंध्यनिगमे वेधो गोश
ब्दः प्राप्नुयादिति शङ्क्यं॥ तत्रोस्राशब्दस्य साक्षादाम्नानत्वात॥ उस्राया वपाया मेदसोनुब्रूहीति तस्मादुस्राशब्दो वक्तव्य
इति सिद्धांतः॥ ॥एकोनविंशाधिकरणमारचयति॥ ॥किमग्निवरुणोस्विष्टकृच्छब्देनाविवर्जितौ॥ वक्तव्यौ सहि
तौ वाद्यो रूढत्वादगुणात्किंतः कदाचित्तत्त्वत्वान्स्विष्टमितियोगाद्गुणे सति। पावकानग्निनयमात्र वक्तव्यो सगुणाविमौ॥

291
1945

अवभृथेश्रूयते॥ अग्नीवरुणौ स्विष्टकृतौ यजतीति तत्र निगमेषु स्विष्टकृत॥ शब्दवर्जितौ अग्नीवरुणौ वक्तव्यौ॥ कुतः स्विष्टकृत
शब्दस्य योगासंभवेन वक्रो रूढस्य गुणवाचित्वाभावात॥ स्विष्टकृतवानित्येवं भूतार्थे क्विप्प्रत्ययविधानात्तादृशो योगो वक्तव्यः॥
न चासावत्र संभवति स्विष्टस्य करिष्यमाणत्वात्। रूढौ तु कार्याकार्यलक्षणयास्विष्टकृत्कार्येऽग्नीवरुणावितिवचनव्यक्तिः संपद्येत
तस्मात स्विष्टकृतशब्देन वर्जितावितिप्राप्ते ब्रूमः॥ तेन सहितौ वक्तव्यौ कुतोऽस्मिन्प्रयोगे स्विष्टस्य करिष्यमाणत्वेऽप्यतीतप्रयोगे स्वि
ष्टत्वेन योगसंभवे कृतसंयोगं परित्यज्य कृत्यरूढ्याश्रयणायोगात्ततः पावकत्वगुणयुक्ताग्निवत॥ स्विष्टकृतगुणयुक्तौ वक्तव्यौ॥ ॥
विंशाधिकरणमारचयति॥ ॥स्विष्टकृत्त्वगुणो लोप्यो याग एवास्विद्विलेषु वा॥ यजन्त्वयाद्यागएव प्रयोगान्वयतोऽत्तिमः॥ पशु
पुरोडाशोस्विष्टकृति गुणरहितः केवलोऽग्निश्रूयते॥ अग्निं यजतीति तत्र गुणरहितस्याग्नेः यजिधानुनान्वयाद्याग एव स्विष्ट
कृत्यगुणो लोप्यः मेवं यजतिशब्दस्य प्रयोगवचनत्वादखिलेषु निगमप्रयोगेषु सोलोप्यः॥ ॥एकविंशाधिकरणमारचयति
॥ ॥अनुयाजोऽतिमायो सोकिमारादुपकारकः स्विष्टकृतसंस्कृतिर्वाद्योनुयाजांतरसाम्यतः॥ स्विष्टकृत्त्वगुणस्याग्नेः प्रत्य
भिज्ञार्थतत्वतः॥ दृष्टार्थत्वाच्च संस्कारो भवेदंत्यः प्रयाजवत॥ दर्शपूर्णमासयोः त्रयोनुयाजाः समाम्नाताः तत्र प्रथमद्वि
तीयानुयाजवत्तृतीयोऽप्यारात॥ उपकारक इति पूर्वः पक्षः॥ अस्ति प्रधानहोमनारिष्टहोमानंतरभावी प्राशित्रादिलक्षण्य
त॥ प्राचीनः पुरोडाशादिद्रव्यकः स्विष्टकृद्धोमः सर्वेषां हविषामुत्तरार्धात्सकृतस्विष्टकृदवद्यतीत्यादिना तदभिधानात॥
प्राशित्रादिलक्षणोत्तरकालीनेष्वाज्यद्रव्यकेषु अनुयाजेषु तृतीये स्विष्टकृत्त्वगुणस्याग्नेः प्रत्यभिज्ञा अस्ति देवो अग्निः स्वि
ष्टकृतदिति तन्मंत्रपाठात॥ सा च पूर्वस्विष्टकृद्देवतास्मरणसंस्कारे सत्यर्थवती स्यात॥ प्रथमद्वितीययोस्तु नास्ति सेति वै
षम्यं किंच संस्कारपक्षे दृष्टार्थः तृतीयस्यात॥ तस्मादंत्यप्रयाजवदंत्योनुयाजः संस्कारः॥ ॥द्वाविंशाधिकरणमारच
यति॥ ॥अन्वाहेत्यर्थकर्म स्यात्संस्कारो वार्थकर्मता शास्त्रवत॥ कार्यताज्ञानादृष्टार्थत्वेन संस्कृतिः तिष्ठन्याज्यामन्वा
हासीनः पुरोनुवाक्यामिति दर्शपूर्णमासयोः श्रुतं तदेतच्छस्त्रादिवदर्थकर्म स्यात॥ यथा स्तौति शंसतीत्यत्र कर्तव्यता प्रती
तः स्तोत्रशस्त्रयोरर्थकर्मत्वं तथानुवचनस्यापि मैवं चोदितदेवतास्मरणसिद्धेरन्वाहेति तद्विधानं व्यर्थं एवं तर्हि प्राप्तमनु
वचनमनूद्यतिष्ठन्नासीन इति स्थितासनगुणो विधीयेते॥ ॥त्रयोविंशाधिकरणमारचयति॥ ॥मनोतामंत्रऊहो

स्तिवायव्येनास्तिवास्त्वसौ॥ आग्नेयवतिवचनं प्रकृतौ सार्थकं यतः॥ अग्नीषोमावग्निनैवलक्षितौ वचनं विना॥ अनर्थकं
तत्रौ वाक्याद्विकृतावूहवारणं॥ त्वंह्यग्ने प्रथमो मनोतेत्ययं मनोतामंत्रोग्नीषोमीयपशौ पठितः॥ वायव्यपशावयं चोद
कप्राप्तत्वंहि वायो प्रथमदृत्येवमूहोस्तियच्चवचनं यद्यन्यदेवत्यः पशुः राग्नेय्येवमनोता कार्येतितिवत्॥ प्रकृतौ पठितं तत्र वच
न सार्थकं किंचिदेवत्यं पशावेकदेवत्यवत् मंत्रस्य प्रकरणपठितस्यायोग्यत्वशंकायां पुनर्विधानार्थत्वात्॥ मेवं॥ छत्रिणो
गच्छंतीत्यादिवन्मंत्रगतस्याग्निशब्दस्याग्नीषोमलक्षकत्वेनायोग्यत्वशंकाया अनूद्यात॥ अतः प्रकृतानर्थकं तद्वाक्यं
विकृतावूहनिवारणेन चरितार्थं भवतितस्माद् ऊहो नास्ति॥ ॥ चतुर्विंशाधिकरणमारचयति॥ ॥ बृहद्रथंतरे कीययो
नौ कण्वरथंतरं॥ रथंतरस्यैकयोनौ वा स्वयोनावुतानिमः॥ चोदकस्याविशेषेण द्वितीयो नामसाम्यतः॥ अनंगत्वान्नाति
देशः स्वयोनौ पठितत्वतः॥ वैश्यस्तोमे पृष्ठस्तोत्रे सामशेषो विहितः॥ कण्वरथंतरं पृष्ठं भवतीति प्रकृतौ पृष्ठस्तोत्रे बृह
द्रथंतरे तत्र बृहद्रथंतरयोरन्यतरस्य साम्नो योनौ कण्वरथंतरं गेयं कुतः॥ चोदकप्राप्तस्तयोर्विशेषनियामकाभावात्॥
अथवा रथंतरस्यैवयोनौ गेयं कुतः रथंतर इति नामसाम्यस्य धर्मातिदेशार्थत्वेन नियामकत्वं नैतद्युक्तं॥ बृहद्रथंतरसाम्ना
रेव प्रकृतासंगत्वेन विधानं न तु तद्योन्याः अतो नास्ति तयोरतिदेशात् प्राप्तिः तस्मात् स्वयोनौ गेयमिति परिशिष्यते तत
प्राप्तिश्च सामगानामुत्तराग्रंथे पाठादवगंतव्या॥ एवं सति श्रुतहान्यश्रुतकल्पने न भविष्यतः॥ ॥ पंचविंशाधिकरण
मारचयति॥ ॥ संदेहनिर्णयो पूर्ववद्योनावुत्तरयो ऋचोः॥ योनित्यागः समश्चेन्नो तच्च शब्देन बाधनात्॥ एकं साम तृचे क्रि
यत इति श्रुतेः कण्वरथंतरसाम्न ऋचांत्रयमाश्रयः॥ तत्रैका स्वयोनिः इतरे द्वे स्वयोन्युत्तरे एवं बृहद्रथंतरसाम्नोर्द्रष्टव्यं
तत्र बृहदुत्तरयो रथंतरोत्तरयोर्वातिदेशात् प्राप्तविशेषेण स्वेच्छया गेयमित्याद्यः पक्षः नामसाम्यात्॥ रथंतरयोरेव गेय
मिति द्वितीयः पक्षः प्रकृत्यात्तचः साक्षादंगत्वाभावेपि सामद्वारकमंगत्वमंगीकृत्य चोदकप्राप्त्या पक्षद्वयोपन्यासः॥ यो
निवदुत्तरयोरपि चोत्तरा ग्रंथे पठितत्वात्॥ स्वयोन्युत्तरयोर्गेयमिति द्वितीयः पक्षो राद्धांतः बृहदुत्तरयोः स्वयोन्युत्तरयो
र्वा गीयतां सर्वथापि स्वयोन्यूकृत्यागऋगंतरपरिग्रहश्च समानः तथा सति चोदकोत्र प्रापक इति पूर्वपक्षिणोप्यधिक
शंकातच्च शब्द समानछंदस्कानामेकदेवत्यानामृचांत्रये प्रसिद्धः अतस्तच्चश्रुत्या प्रत्यक्षया चोदकस्यानुमेयस्य बाधः

श्री॰
१४६

293
1945

तिराद्धांताशयः॥ ॥ षड्विंशाधिकरणमारचयति॥ ॥ आग्नेयेषु ग्रहेषूहो नास्ति वा स्त्युत शास्त्रयोः॥ संस्कारत्वादस्तिमैवमर्थक
र्मत्वनिर्णयात्॥ अग्निष्टुदाख्य एकाह श्रूयते॥ आग्नेया ग्रहा भवंतीति तेषु चोदकप्राप्तयोर्नानादेवतयोस्स्तुतशास्त्रयोः संस्का
रकर्मत्वं भ्रमेणास्त्यूह इति वदंतं प्रत्येत तदुत्तरं द्वितीयाध्याये तयोरर्थकर्मत्वस्य निर्णीतत्वात्॥ नास्त्यूह इति॥ ॥ सप्तविंशाधि
करणमारचयति॥ ॥ चातुर्मास्यातिदिष्टेषु निगमेष्वाज्ययानिति विक्रियेत न वाद्योपि किं स्यात् दध्याज्यपानिति॥ दधिपानी
तिवायद्वेत्येवं स्यात् पृषदाज्यपान॥ द्रव्यद्वयोक्ते राद्यस्याद्दधिमात्रहविष्ट्वतः द्वितीयः स्यात्तृतीयोस्तु द्रव्यांतरविधानतः॥ गुणे
दध्नाचित्रिताज्यतो विक्रीयेत नहि चातुर्मास्येषु चोदकेन वाहनस्वाहाकाराद्याक्षाषणनिगमा अतिदिष्टाः तत्राज्यपशब्दः प्र
युक्तः देवानाज्यपानावह स्वाहा देवा आज्यपान॥ अयाड्देवानामाज्यपानां प्रिया धामानि देवा आज्यपा आज्यमजुषंतेति सोम
माज्यपशब्दो विक्रीयेत न वेति संशयः विकारोपि त्रिविधः तत्र दध्याज्यपानित्याद्यस्तावत् प्राप्नोति कुतः॥ अत्र पृषदाज्यं गृह्णा
ति द्वयं वा इदं सर्पिश्चैव दधि चेति द्रव्यद्वयस्योक्तत्वात्॥ आज्यस्योपस्तरणार्थमभिघारणार्थत्वेन हविः शेषत्वाद्धविष्ट्वं नास्तीति
दध्येव हविः ततो दधिपानिति द्वितीयः पृषदाज्यशब्देन द्रव्यांतरमुत्पद्यते॥ तेन चानूयाजा इज्यंते ततः पृषदाज्यायानिति तृ
तीयः पक्षः पृषत्वं नाम चित्रता साचाज्यगतो गुणः स च दधिमेलनेन निष्पन्नः तस्मादाज्यस्यैव द्रव्यत्वादाज्यपशब्दो एता एव
निगमाः पठितव्याः॥ ॥ इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे दशमाध्यायस्य चतुर्थः पादः॥ ॥ पंचमपादस्य
प्रथमाधिकरणमारचयति॥ ॥ प्राकृतानामेकदेशः कोपि स्यादाद्य एव वा॥ अविशेषेण कोप्याद्यः पूर्वेणास्यैव बोधनात्॥
प्रकृतावाग्नेयमष्टाकपालमित्यष्टसंख्याकानि कपालानि विहितानि विकृतिषु द्यावापृथिव्यमेककपालं आश्विनं द्विकपालं वै
श्वदेवं द्विकपालमित्यादिषु ष्टानामेकदेशः तत्राध्योमध्यमोंत्यो वा पः प्रकोप्येकदेश इच्छया स्वीकार्यः आहोस्वीदाद्य एवैकदेशः॥ नि
यामकाभावाद्यः कोपीति प्राप्ते ब्रूमः॥ अच्चतुर्थात् कर्मणोभिसमीक्षेतेदं करिष्यामीदं करिष्यामीत्युक्तत्वात्॥ अनुक्रमेण स्मृत्वानु
ष्ठियानि तत्र प्रकृतानुक्रम एवं विधः उपवेषनामकेन काष्ठविशेषेण प्रथममंगारविशेषं संम्यगवस्थाप्य ध्रुवमसीति मंत्रेणतस्मिं

अ० क० माला०

नं गारपुरोडाशाकपालमुपदधातीति सोयमनुक्रमः चोरकप्राप्तः तथैवस्मर्यते तत्रांगारकवस्थापनेन पूर्वपदार्थेनानंतराभा
वि प्रथमाकपालोपधानमेव बुद्धावुपस्थाप्यते तेन च द्वितीयं न च प्रथमद्वितीययोर्विशेषाभावः द्वितीयस्याधिध्रुमसीति मंत्रः
प्राचीनदेशश्च विशेष्यते सत्येवं क्रमे नियमे प्रतीतपरित्यागाप्रतीतस्वीकारयोरयुक्तत्वात्॥ आद्य एवैकदेशः स्वीकार्यः॥
अवशिष्टस्तु प्रयोजनाभावाल्लुप्यते एकां सामिधेनीमन्वाहेत्यस्मिन्नपि च दशसामिधेन्येदशो द्विरात्रत्रिरात्रादिषु द्वादशा
हैकदेशेषु चायमेव न्यायो योजनीयः॥ ॥ द्वितीयाधिकरणमारचयति॥ ॥ तृचाद्यास्तु तृचेवाद्येति सृष्विति युच्यते गि
मः॥ त्रिश्छंदस्त्वात् प्राकृतं तत्तत्क्रमादकृत्चो[illegible]खिलः॥ एवं संख्यायाश्च व्यतिषंगविधानादेकत्रिकनामकः कश्चि
त् क्रमात् क्रतुर्भवति स चैवं श्रूयते॥ अथैक एकत्रिकः॥ नस्यैकस्यां बर्हिष्पवमानं तिसृषु होतुराज्यमेकस्यां मैत्रावरुणस्य
तिसृषु ब्राह्मणाच्छंसिनः एकस्यामच्छावाकस्य तिसृषु माध्यंदिनः पवमान इति शंसति प्रकृतौ माध्यंदिनपवमानस्य त्रयः
स्तृचाः उच्चा ते जातमित्ययं प्रथमो गायत्रीछंदस्कः पुनानः सोमेत्ययं द्वितीयो बृहस्पतीछंदस्कः प्रतुद्रवेत्ययं तृतीयः त्रि
ष्टुप्छंदस्कः एतदेवाभिप्रेत्य श्रुतं त्रिश्छंदा आवापो माध्यंदिनः पवमान इति एवं सत्येकत्रिकस्य माध्यंदिनपवमाने ति
सृष्विति यदुक्तं तत्र त्रयाणां तृचानामाद्यास्तिस्र ऋचो ग्रहीतव्याः किं वा प्रथमतृचस्थाः क्रमपरिपठिता इति संशयः॥
तत्र त्रिछंदस्त्वश्रुत्या प्रबलया दुर्बलं पाठक्रमं बाधित्वा प्रथमपक्षो गृह्यत इति प्राप्ते ब्रूमः॥ यदेतत्त्रिःछंदस्त्वं तदेतत्प्रा
कृतं तत्र छंदत्रयोपेतस्यात् तृचत्रयस्योपदिष्टत्वात् विकृतावपि तत् सर्वमतिदिष्टमिति चेत् बाढं अत एव पाठक्रमोप्य
तिदिष्टः तथा सति प्रक्रांतगायत्रीछंदस्कस्य तृचस्य समाप्तौ सत्यां पश्चाद् बृहतीछंदस्के तृचे प्रथमया ऋचः प्रारंभा
वसरः स चारंभस्तिसृष्विति विशेषविधानेन बाध्यते॥ तस्मादाद्यस्तृचो निखिलो ग्रहीतव्यः॥ ॥ तृतीयाधिकरणमा
रचयति॥ ॥ तृचे स्यादृचि केवेस्यां धूर्गानं प्रकृताविव॥ तृचे भवेदिहैकस्यां स्तुत्यावृत्तिविधानतः॥ एकत्रिक एव क्र
तौ व्यतिव्यतिषंगेणैकस्यां तिसृषु च स्तोत्रेषु संपाद्यमानेषु यद् धूर्गानं तत्॥ किं तृचे स्यात् आहोस्विदेकस्यामृचीति सं
शयः॥ तच्च चोदकेन तृचे भवेदिति प्राप्ते ब्रूमः॥ इहैकत्रिकक्रतौ वेकस्यामृचि धूर्गानं भवेत्॥ कुतः आवृत्तं धूर्षु स्तुव

श्री २

295/1945

तद्यादावृत्तिविधानात्। ननु तृचे गाने पि साम्नस्त्रिरावृत्तिर्भवेत्। आवृत्तेनस्तुवंतेति विशेषणत्वात्। गुणसंकीर्तनपरः पदसमूहः स्तुतिः तच्चाव
र्तितं चावृत्तिं विना तिसृष्वृक्षु न सिध्यति तस्मादेकस्यां धूर्गानं॥ ॥ चतुर्थाधिकरणमारचयति॥ ॥ द्विरात्रादौ द्वादशाहे प्रायणीयादितः
क्रमः। आद्यंतौ वर्जयित्वा वा विशेषाभावतो ग्रिमः। द्वादशाहद्वितीयस्य द्विरात्रे प्रथमत्वतः। जागतस्यांतरायाच्च विध्यंतो दशरात्रगः। अहीनस्व
पस्य द्वादशाहस्य विकृतयो द्विरात्रादयः तेषु किं द्वादशाहस्य प्रथममहः प्रायणीयसंज्ञकमारभ्य क्रमेण विध्यंतः प्रवर्तते किं वा प्रायणीयोद
यनीयावंतौ वर्जयित्वा तन्मध्यगतस्य दशरात्रस्य विध्यंतः प्रवर्तत इति संशयः। ईदृशमहरुपादेयमीदृशं वर्जनीयमिति विशेषनियमाभा
वादादित आरभ्य प्रवर्तत इति पूर्वः पक्षः। द्विरात्रप्रकरण एवाम्नायते। यत्प्रथमं तद् द्वितीयं यद्द्वितीयं तत् तृतीयं तामिति। अयमर्थः। यत् द्विरा
त्रस्य यत्प्रथममहननुष्ठेयं तद् द्वादशाहस्य द्वितीयमिति। एवमुत्तरत्रापि योज्यं तदेतत् प्रायणीयवर्जने लिंगं। तथा जगतीमतर्यंतीति
जागतस्यांतरायआम्नायते तच्च वर्जने लिंगं एवमादिभिर्लिंगैः उभयं वर्जयित्वा वशिष्टस्य विध्यंतो यत्र यावान् पेक्षितः तत्र तावान् प्रव
र्तत इत्यवगंतव्यः॥ ॥ पंचमाधिकरणमारचयति॥ ॥ धूपने वपने चाग्नौ सप्त चोक्ताश्चतुर्दश। किमघारंभनियमः किं वारंभो निजे
च्छया। कपालवत् क्रमः प्राप्तः काश्चित् प्रकरणोदितः। व्यर्थाः स्युस्तेन मंत्राणामारंभोत्र विकल्पितः। अग्निचयने मंत्रा आधूननार्था आव
पनार्थाश्च बहवः पठिताः प्रयोगे तु एकादशसंख्या विहिता सप्तभिराधूनोति चतुर्दशभिर्वपतीति। तत्र प्रथमाधिकरणोक्तकप
ल सामिधेन्यादिन्यायेन प्रथमपठितस्यैव मंत्रस्योपक्रमः प्राप्नोति तदयुक्तं। कुतः यथोक्तसंख्यातिरिक्तानां प्रकरणपठितमंत्राणां वैयर्थ्यप्रसंगा
त्। प्रकरणेन क्रमं बाधित्वा निजेच्छया प्रथमतो मध्यतो वोपक्रम्य विहितसंख्यापूरणीया॥ ॥ षष्ठाधिकरणमारचयति॥ ॥ स्तोमसंधिः
किमभ्यासादागमाद्वाग्निमोयतः। न कृत्यमश्रुतं मैवं संख्यावापादिलिंगतः। त्रिवृत्स्तोमकः क्रतुरेवमाम्नायते। एकविंशेनातिरात्रेण प्रजा
कामेन याजयेत्त्रिणवेनौजस्कामं त्रयस्त्रिंशेन प्रतिष्ठाकाममिति प्रकृतिगतेभ्यः त्रिवृत्पंचदशादिस्तोमेभ्यो विलक्षणा एकविंशत्रिणवत्रयस्त्रिं
शस्तोमास्तेषु किं प्राकृतानां साम्नामभ्यासाद् वृद्धिर्भवति किं वा सामांतरागमादिति संशयः अश्रुतस्य सामागमस्य कल्पयितुमशक्यत्वाद
भ्यासाद्वृद्धिरिति प्राप्ते ब्रूमः। अभ्यासोपि न साक्षात् श्रुतः। किं त्वेकविंशादिसंख्यापूरणाय कल्प्यते। संख्या च द्रव्यगताभिन्नद्रव्यैरेव पूर्यते
न त्वेकद्रव्यावृत्त्या न ह्यष्टकृत्व एकं घटमानीय मद्गृहे संत्यष्टौ घटा इति कश्चिद्व्यवहरति तत्र स्तोमावयवद्रव्यगतासंख्यांतरवयवभूतानां साम्नां
परार्थानां भेदं गमयति स च भेदः सामांतरागमे लिंगं अत्रैवावपंतीति। आवापोद्देशेन देशविशेषविधिपरं लिंगं सामांतरोत्पत्त्यर्थं

वत्वमस्य लिंगं। तस्मादागमवृध्दिः॥ ॥सप्तमाधिकरणमारचयति॥ ॥किं बहिष्पवमानोर्ध्वसाम्नः। किं वर्च आगमः। साम्नः पूर्वोक्ति
तो मेवं सामैकत्वपराकृतः प्रकृतौ प्रातः सवने बहिष्पवमानस्याविवृध्दस्तोमः। तस्य विकृतिषु वृध्दौ सत्यां पूर्वोक्तरीत्या सामांतरागमे प्राप्ते
ब्रूमः। एकं हि त्रसामेति बहिष्पवमानं प्रकृत्य सामैकत्वमाम्नायते। अतो न सामांतरागमः संभवति। एवं तर्ह्यभ्यासेन संख्यापूरणम
स्त्विति न शंकनीयं। पराकु बहिष्पवमानेन स्तुवंतीति पराशब्देनाभ्यास प्रतिषेधात्। तस्मादृच आगमः॥ ॥अष्टमाधिकरणमारच
यति॥ ॥सामिधेनी विवृध्दौ किं आगमोभ्यस्यतामुत आगमः। पूर्ववनैव मभ्यास प्रकृतित्वतः। तत्राप्याद्यंतयोर्यावत्पूर्त्यभ्यासो
यथोक्तिवा अन्यस्यागमतः पूर्तिः पूरणार्थत्वतोग्रिमः। त्रित्वं न पूरणायोक्तमन्यथाप्यत्र पूरणात्। विवक्षितमबाधित्वाभ्यवेत्पूरण
मागमात्। दर्शपूर्णमासयोः पंचदश सामिधेनीर्विधाय काम्यास्तत ऊर्ध्वं विधीयंते। एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येत्यादिना
यथा बहिष्पवमाने स्वगागमः तथात्रापि इति प्राप्ते ब्रूमः। एकादशभिः पठिताभिः पंचदश संख्याया अपूर्तावृगंतरागमेनेन तत्पू
रणं न तत्कृतं किंतु तत्पूरणाया अभ्यासो विहितः त्रिः प्रथमामन्वाह त्रिरुत्तमामिति। अतः काम्यानामप्यभ्यासेन पूरणं युक्तं। अभ्या
सपक्षेपि यावत्कृतोभ्यासि सत्येकविंशति संख्यापूर्यतां तावत्कृत्वः प्रथमोत्तमे अभ्यसनीये। कुतः। विहितस्य त्रिरभ्यासस्य पूरणा
र्थत्वप्रदर्शनान्नैवं। नहि त्रित्वं पूरणार्थे विहितं प्रथमायाद्विरभ्यासेनापि पंचदश संख्याः पूरणात्। आतो विवक्षितं त्रित्वं तथा सति
तदबाधाय प्रथमोत्तमौ त्रिवारमभ्यस्य षण्णामृचामागमेनैकविंशति संख्या पूरणीया॥ ॥नवमाधिकरणमारचयति॥
विकृतौ प्रकृतौ वा स्यात् षोडश्युत्कर्षतोग्रिमः। अविरुध्देन वाक्येनानुत्कर्षात्प्रकृतावसौ। ज्योतिष्टोमप्रकरणे श्रूयते यएवं विद्वा
न् षोडशिनं गृह्णातीति सोयं षोडशिग्रहो विकृतौ निविशते कुतः प्रबलेन वाक्येन तस्य ग्रहस्य प्रकरणादुत्कृष्यमाणत्वात्। उत्त
रे हं द्विरात्रस्य गृह्यते मध्यमेहं त्रिरात्रस्येति हि वाक्यं द्विरादीनां च विकृतित्वं प्रसिध्दं। अतः प्रकरणं बाधित्वा विकृतौ निवेश इति
प्राप्ते ब्रूमः। अत्यग्निष्टोमे राजन्यस्य गृह्णीयादित्यन्यद्वाक्यमस्ति तेन प्रकृतिभूतेग्निष्टोमे निविशते न चात्र प्रकरणबाधः। अ
ग्निष्टोमस्य ज्योतिष्टोमावांतर संस्थारूपत्वेन ततोनन्यत्वात् नन्वेवं सति चोदकेनैकाहद्विरात्रादिषु प्राप्तत्वात्पुनर्विधिवाक्यं व्य
र्थमिति शंकनीयं अहर्विशेषसंबधाय राजन्यादिनिमित्तनैरपेक्ष्योपपत्तेः तस्मात् प्रकृतौ निवेशः॥ दशमाधिकरणमारचय श्रीर

ति॥ ॥उक्थ्याग्रहणतः सस्यात् केवलाग्रयणादुत। आद्य उक्तिद्वयादंत्य उक्थ्योर्ध्वत्वविधित्वतः। सपूर्वतः षोडशी वचनद्वयबलेनोक्
थ्यपात्रादाग्रयणपात्राच्च गृहीतव्यः उक्थ्यान्निगृह्णाति षोडशिनमित्येकं वाक्यमग्रयणात्तु बलेन गृह्णाति षोडशिनमिति द्वितीयवाक्यं
अत्रोच्यते। आग्रयणपात्रादेव गृहीतव्यः। कुतः उक्थ्यवाक्यस्योत्तरकालविधिपरत्वात् तं परां चमुक्थ्यान्निगृह्णातीत्यूर्ध्वकालवाचि
नः पराक्शब्दस्य प्रयोगात्। ततो नोभयस्मादूहणं॥ ॥एकादशाधिकरणमारचयति॥ ॥सवनेषु तृतीये वा सग्राह्योत्स्याद्भवेत्त्रिषु
तु निंदितत्वात्तृतीयस्य विधेस्तत्रैव गृह्यतां। सपूर्वोक्तषोडशिग्रहः त्रिषु सवनेषु भवेत् कुतः सवनत्रयस्योक्तत्वात्। षोडशिनं प्रत्याम्नाय
ते प्रातः सवने ग्राह्यः मध्यंदिन सवने ग्राह्यः तृतीय सवने ग्राह्य इति। नैतत्सवनद्वयस्यार्थवादत्वेन तृतीयसवनस्योक्तत्वादत एव वा
क्यशेषे सवनद्वयं निंदित्वा तृतीय सवनं विधीयते। यत्प्रातः सवन इत्यादिना सवनद्वये वज्रपातदोषोभिहितः तृतीयसवने ग्रा
ह्यः सर्वेषु सवनेषु गृह्णातीति प्रशंसापूर्वकं विहितं तस्मात्तृतीय सवन एव षोडशिग्रहः॥ ॥द्वादशाधिकरणमारचयति॥
अग्निष्टोमोक्थ्यसंबंधी षोडश्यस्तु तराःस्त्रकः। तदुक्तो वाग्रिमः प्राप्तः तत्तत्संख्याम बाधितुं। स्तोत्रं भवत्येकविंशं हरिवच्छस्यते तक्ष
इष्यते ह्यन्य संस्थात्वं स्तुतशस्त्रयुतत्वतः। षोडशिनं प्रकृत्याम्नायते। अप्याग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थे ग्राह्य इति सोयम
ग्निष्टोमोक्थ्य संस्थयो विहितः षोडशिग्रहस्तु तराःस्त्र वर्जितो भवितुमर्हति अन्यथा तदीयाभ्यां स्तुतशस्त्राभ्यां क्रतुसमाप्तौ षोडशि
संस्थात्वं प्रसज्येत अग्निष्टोमसंस्थात्वं च बाधेत तत्संबंधि समाप्त्यभावादिति प्राप्ते ब्रूमः। एकविंशस्तोत्रं भवति। प्रतिष्ठित्यैवह
रिवच्छस्यत इति षोडशिनी प्रत्यक्षविधिर्नास्तु तराःस्त्रे विहिते किंच ग्रहं वा गृहीत्वा चनमसंवोन्नीय स्तोत्रमुपाकरोतीति ग्रहण चम
सोभयनयोस्तत्र निमित्तत्वं श्रुतं न हि सति निमित्ते नैमित्तिकत्यक्तुं शक्यं तस्मात्। पूर्वसंस्थात्वहानिमन्यसंस्थात्वं चाभ्युपेत्य स्तुत
शस्त्रयुतत्वं द्रष्टव्यं॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥द्विरात्रेंगिरसा षोडश्यप्राप्तः किं विधीयते। परिसंख्यायते वाद्यः
चोदकात्तु शीघ्रबुध्दितः। अनारभ्यविधेः प्राप्ते परिसंख्यातिदेशतः। विकल्पो न्यद्विरात्रेषु प्रोक्तं दृत्तिकृतो मतं। संति बहवो द्विरा
त्राः। तत्रांगिरसां द्विरात्रे श्रूयते वैरवानसं पूर्वेहनि साम भवति षोडश्युत्तर इति सोयं षोडश्यप्राप्तः सन्विधीयते न च चोदकात्। प्राप्ति
शंकनीया प्रत्यक्षवचनस्य शीघ्रप्रवृत्तेः चोदकस्त्वनुमानिकत्वेन विलंबत इति प्राप्ते ब्रूमः। माभूच्चोदकः अस्ति ह्यनारभ्याधीतं प्र
त्यक्षं विध्यंतरं उत्तमेहं द्विरात्रस्य गृह्यत इति तेन सर्वेषु प्राप्तः सन्नांगिरसां द्विरात्र एव नान्येषु द्विरात्रेष्विति परिसंख्यायते ततोंगि

297
1945

रसांहिरात्रेनियमेनषोडशीग्रहयतेइतरेष्वतिरात्रविकृतित्वेनादेशाद्विकल्पते।तदेदद्भिन्नकारमतं॥ ॥तदेवाधिकरणंभाष्यमतेना
रचयति॥ परिसंख्यापूर्वपक्षोनसाधुःकाान्निदोषतः।प्राप्तस्यैवानुवादेनविधेयःसनगम्यते।इतिकारस्यसिद्धांतरूपायाःपरि
संख्यायाःभाष्यकारमतेपूर्वःपक्षः।सिद्धांतस्तषोडश्यत्तरमयंविधिरेवनसंभवतिविधित्सितवैरवानससाहीनस्यवाक्यशेषत्वे
नार्थवादत्वात्।अतःपरिसंख्यात्वंदोषत्रयोपेतंनात्रकल्पनीयंप्राप्तस्यविध्यर्थस्यपरित्यागः।अप्राप्तस्यनिषेधार्थस्यस्वीका
रःअन्यत्रप्राप्तस्यबाधइतिदोषत्रयं॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥किंचतुर्थेष्वहीनस्यग्रहोनानागतेषुवा।वीप्सैक
वचनाभ्यांस्यादेकस्मिन्नेवसग्रहः।चतुर्थाष्टमतापत्तेर्नानाहीनेषुसग्रहः।आद्यैकवचनंवीप्सान्यायप्राप्तानुवादिनि।षोडशिनंप्र
कृत्यामनंतिचतुर्थेचतुर्थेहन्यहीनस्यगृह्यतइतिसोयमेकस्मिन्नेवाहीनिप्रथममारभ्यगणितेचतुर्थेहनिग्राह्यः।पुनरपिप्रपंच
ममारभ्यगणितेचतुर्थेहनिग्राह्यः।एवंसतिवीप्साचरितार्थाभविष्यति।नानाहीनगतचतुर्थदिवसाभिवक्षायांचतुर्थेहनीत्ये
तावतैवतत्सिद्धेर्वीप्सानर्थिका।अहीनस्यैकवचनंबहुषुनोपपन्नमितिप्राप्तेब्रूमः।एकाहीनपक्षेचतुर्थेचाष्टमेचेत्येवमु
च्येतएकवनंतुनानाहीनपक्षेजात्यभिप्रायंवीप्साबहुप्रदेशगतचतुर्थदिनस्यन्यायप्राप्तंबहुत्वमनुवदतितस्मान्नानाहीनेषुच
तुर्थेसग्रहः॥ ॥पंचदशाधिकरणमारचयति॥ ॥प्रकृतौविकृतौवास्याद्ग्रहेष्वाग्रयणाग्रता।आद्यःप्रकरणाद्दंत्योजगत्सा
मत्वसंभवात्।ज्योतिष्टोमप्रकरणेश्रूयते।यदिरथंतरसमासोमस्यादैंद्रवायवाग्रान्गृह्णीयात्।यदिबृहत्सामाशुक्राग्रान्
यदिजगत्सामाआग्रयणाग्रादिति।अयमर्थः।माध्यंदिनसवनेपृष्ठस्तोत्रेरथंतरनामकंसामस्यात्सोमयागस्यसोरथंतरसामए
वमितरत्रापीतितत्रजगत्सामकेसोमेग्रहणामाग्रयणादित्वंप्रकरणपाठात्।प्रकृतौनिवेश्यतइत्याद्यःपक्षः।जगन्नामकस्यसा
म्नःकाथभावाज्जगत्याम्त्युत्पन्नस्यतुसाम्नोविकृतिषुविषुवन्नामकेमुख्येहनिसंभवाद्विकृतौनिविशते॥ ॥द्वितीयवर्णकमा
रचयति॥ ॥बृहद्रथंतरेकंकिंद्वयंवानरथंतरंयद्वाजगत्यामुत्पन्नंतत्सामाग्निमोभवेत्।ज्योतिष्टोमस्यतादृक्त्वादविक श्री१५
ल्पायत्तुद्वयंजगत्वंसर्वतात्रास्तितदुक्तिर्व्यर्थतादोतं।रथंतरजगतशब्दाद्विप्रकृष्टात्रलक्षणा।जगत्यांचितितंसामेत्येतस्यात
संनिकर्षतःपूर्वोदाहृतवाक्येजगन्नामकंसामयस्यसोमस्यासोजगत्सामेत्यत्रजगद्विशेषणेनविशिष्यमाणसाम्निचतु
र्थःसंशयः।तत्रबृहद्रथंतरयोन्यतरत्स्यात्कुतःरथंतरसाम्नाबृहत्साम्नावेतिज्योतिष्टोमस्यान्यतरसामसाध्यत्वमवगमा

त्।जगतशब्दस्यजगतिप्रवर्तते।ज्योतिष्टोमेनेतिस्तुत्यत्वात्तत्रसंभवतीतिप्रथमःपक्षः।नैतद्युक्तंविकल्पप्रसंगात्।सचाष्टदोषतस्तस्मात्सामद्वयस
मुच्चयोप्युपगंतव्यः।उदाहृतवाक्येचविकारार्थोद्रष्टव्यःजगतशब्दश्चकृत्स्नवाचीकृत्स्नत्वंचात्रास्तिएकस्यापिसाम्नःपरित्यक्तत्वयपरिशेषेणे
तिद्वितीयःपक्षः।एतदप्ययुक्तंयदिजगत्सामेत्यस्यद्व्युक्तेर्वैयर्थ्यप्रसंगात्तत्रान्यतरपक्षस्यैंद्रवायवाग्रत्वशुक्राग्रत्वाभ्यांअभरुध्दत्वेनसमुच्चयप
क्षस्येवाग्रयणत्वायपरिशेषेणपुनस्तदुक्तिर्व्यर्थाचाशब्दश्चविकल्पेमुख्योत्रबाध्येततस्माद्रथंतरमेवात्रस्यात्।तद्योनामीशानमस्यजगतइ
तिजगतशब्दश्रवणेनसामत्वसंभवादितितृतीयःपक्षः।तदप्ययुक्तंतत्रसमर्थपरंजगत्पदं।शब्दपरत्वेनोपलभ्यतेतेनचशब्देनशब्देपेताम्
चमुपलक्ष्यतयाचततिछंसोब्योपलक्षणीयामितिविप्रकर्षःतस्माज्जगत्यामुत्पन्नंसामेतिचतुर्थःपक्षोभ्युपगंतव्यः।यद्यपिछंदोवाविनाज
गतीशब्देनतत्ककम्त्वमुपलक्ष्यतयासामोपलक्षणीयंतथापिसंनिकृष्यतेजगच्छब्दश्चवैदिकोजगतीपर्यायःतस्माच्चतुर्थपक्षोराद्धांतः।
षोडशाधिकरणमारचयति॥ ॥उपवत्स्यग्रवतोस्तोगोसवेयदिवानहि।सत्येविकल्पआहोस्विदुपवत्सेवकेवला।विकल्पोहिनिमित्तला
त्व्याघातस्यातसमुच्चयेरथंतरस्यमुख्यत्वादुपवत्स्येवयुज्यते।एकैकस्यनिमित्तत्वंप्रकृतावत्रतुद्वये।मिलितेपृष्ठतातस्मान्निर्निमित्तेउभेनाहि
गोसवादिषुक्रतुषुरथंतरपृष्ठबृहत्पृष्ठयोःसमुच्चयोविहितः।गोसवउभेकुर्यादित्यादिनाप्रकृतौत्विदमाम्नातंउपवतिरथंतरपृष्ठस्यप्रतिप
दंकुर्यादग्रवतींबृहत्पृष्ठस्येतितेइमेउपशब्दाग्रशब्दवत्याम्चौपृष्ठद्वयस्यादिभूतेगोसवादिष्वतिदेशतःप्राप्तेविकल्प्येतेकुतःतन्निमित्तयोः
पृष्ठयोर्द्विविधत्वात्नचात्रसमुच्चयःशंकनीयःस्तोत्रद्वयोःप्राथम्यस्यव्याहतत्वात्।तस्माद्विकल्पइत्येकःपूर्वःपक्षः।प्रथमश्रुतत्वेनरथंतर
स्यमुख्यत्वादुपवतीमेवप्रातिपदंकुर्यादितिद्वितीयःपूर्वःपक्षः।प्रकृतावितरेतरनिरपेक्षमेवनिमित्तं।अत्रतुमिलितस्यैवपृष्ठत्वंतथासति
प्राकृतस्यनिमित्तत्वस्यात्राभावेनैमित्तिकेप्रतिपदावपिनस्तः॥ ॥सप्तदशाधिकरणमारचयामि॥ ॥पुरोपांशोरुतस्वस्यस्थानेस्या
दैंद्रवायवःआद्योग्रत्वविधेर्मैवंधारायुक्ताग्रतोक्तितः।ज्योतिष्टोमेश्रूयतेऐंद्रवायवाग्रान्गृह्णीतइतिमंत्रकांडब्राह्मणकांडयोर्ग्रहणामयं
पाठःक्रमःउपांशुग्रहःप्रथमःअंतर्यामग्रहोद्वितीयःऐंद्रवायवग्रहस्तृतीयःमैत्रावरुणग्रहश्चतुर्थइत्यादितत्रैंद्रवायवस्याग्रत्ववि
धानादुपांशुग्रहात्पूर्वमेवग्रहणमितिपूर्वःपक्षः।नैतद्युक्तंअग्रत्वस्यधाराग्रहापेक्षत्वात्ऐंद्रवायवादयोधाराग्रहास्तद्वास्येधारयाग्
ह्णातीतिश्रुतत्वात्एवंसतिपाठक्रमोनबाध्येततस्मादैंद्रवायवस्वस्यैवस्थानेग्रहीतव्यः॥ ॥अष्टादशाधिकरणमारचयति॥ ॥

299
1945

सर्वादौस्वस्यवास्थानेकाम्यस्यैंद्रवायवः।पुनर्विधेरादिमोत्थः कामायेतद्विधानतः।ज्योतिष्टोमेएवश्रूयते।ऐंद्रवायवग्राग्रान्गृह्णीयाद्यःका
मयेतयथापूर्वंप्रजाःकल्पेरन्निति सोयंकाम्यःऐंद्रवायवः सर्वेषामुपांश्वप्रभृतीनांग्रहाणामादौस्यात्कुतः धाराग्रहादित्वस्यपूर्वमेवसिद्धो
सत्यांपुनरप्यग्रताविधानादितिप्राप्तेब्रूमः।नात्रसर्वाग्रत्वंविधातुंशक्यंधाराग्रहाणांप्रकृतत्वात्अतोयथाप्राप्ताग्रत्वोपेतानांधाराग्रहाणां
कामसंयोगोत्रविधीयतइति।स्वस्थानएवायंग्रहः॥ ॥एकोनविंशाधिकरणमारचयति॥ ॥संस्थानेप्रतिकर्षोवाशुक्रादेःपूर्ववद्भवेत्
स्थानेमेवंतदग्रत्वात्प्राप्तिःसप्रतिकृष्यतां।तत्रैवश्रूयतेशुक्राग्रान्गृह्णीयादभिचरतोमंथ्यग्रान्गृह्णीयादभिचर्यमाणस्येत्यादिः पूर्व
न्यायेनशुक्रादीनांस्वस्थानेग्रहणमितिप्राप्तेब्रूमः।ऐंद्रवायवस्यधाराग्रहाग्रहत्वंस्वस्थानेपाठादेवप्राप्तंशुक्रादीनांनूतनंनेतिवैषम्यंत
थासतिविधीयमानाग्रत्वंपाठक्रमबाधमंतरेणानुपपन्नत्वात्प्रतिकृष्यते॥ ॥विंशाधिकरणमारचयति॥ ॥सर्वादावैंद्रवायवा
दौवात्रविशेषतः।सर्वादावाशयादैंद्रवायवादौध्रुतेरपि।सपूर्वोक्तप्रतिकर्षःसर्वेषामुपांश्वादीनांग्रहणामादौयुक्तःकुतःविशेषाश्रव
णात्सामान्यतःशक्ताग्रश्रवमनपेक्षितत्वात्।सर्वमुख्यंनैतदेवंप्रकृतौधाराग्रहान्नाश्रित्यफलायशुक्राग्रत्वेद्यविधानात्किंचधारये
युस्तंयंकामायगृह्णीयुरैंद्रवायवाग्रान्गृहीत्वासादयेदितिश्रूयतेतत्रकाम्यस्यशुक्रादेर्धारणानंतरमैंद्रवायवस्यग्रहणंविवक्षितार्थेलिंग
तस्मादैंद्रवायवादौप्रतिकर्षः॥ ॥एकविंशाधिकरणमारचयति॥ ॥नापकर्षोपकर्षोवासादनस्याश्रुतत्वतः।नमेवंग्रहशेषत्वा
न्नचाशक्तेर्ग्रहांतरं।सर्वत्रग्रहान्गृहीत्वासाद्यंतेतथासतियत्रकामस्यग्रहणस्यापकर्षः।तत्रसादनस्यापकर्षोनशंकनीयः।कु
तःअश्रुतत्वात्शुक्राग्रानित्ययशब्देनयथाग्रहणस्यापकर्षःश्रूयतेनतथासादनापकर्षप्रतिपादकःकश्चित्शब्दोस्तितस्मान्नापकर्षःनैत
द्युक्तंसादनस्यग्रहशेषत्वात्।तच्चशेषत्वमशक्तेरवगम्यते।ननुपूर्वग्रहमसादयित्वाग्रहांतरंग्रहीतुंशक्यंअतोग्रहणापकर्षेतच्छेषस्तंसा
दनमपकृष्यते॥ ॥द्वाविंशाधिकरणमारचयति॥ ॥प्रदानस्यापकर्षोस्तिनवासादनवद्भवेत्।प्रदानस्यतुमुख्यत्वान्नापकर्षोत्रयुः
ज्यते।पूर्वोक्तकाम्यानांग्रहाणांग्रहणापकर्षानुसारेणसादनस्ययथापकर्षःतद्वत्प्रदानस्यापीतिचेन्नवैषम्यात्सादनंहिग्रहणशेषःप्रदानं
तुनतथाप्रत्युतग्रहणमेवप्रदानस्यशेषः।अतएवशेषानुसारेणशेषिणोपकर्षोयुक्तः॥ ॥त्रयोविंशाधिकरणमारचयति॥ ॥त्र्यनीकाया ॥श्री१८

मैंद्रवायवशुक्राग्रानुवादता।परिसंख्यावार्थवादोवाविधिर्वानहित्रयः।वैयर्थ्येनत्रिदोषत्वात्लक्षणापत्तितस्तथाविधिराग्रयणाग्रत्वा
नैमित्तिकोहिसःअस्तिद्वादशाहेत्र्यनीकाऐंद्रवायवाग्रौप्रायणीयोदयनीयौदशमंचाहःअथेतरेषांनवानांअह्नामैंद्रवायवाग्रंप्रथमम

301
1941

हःअथशुक्राग्रमथाग्रयणाग्रंअथैंद्रवायवाग्रमथशुक्राग्रंअथाग्रयणाग्रंअथशुक्राग्रमथाग्रयणाग्रमितितत्रद्वादशाहगतेषुद्विती
यतृतीयचतुर्थेषुत्रिष्वहःसुक्रमेणैंद्रवायवाग्रत्वशुक्राग्रत्वाग्रयणाग्रत्वानिविहितानितेषामाद्यंरथंतरनिमित्तंद्वितीयंबृहन्निमित्तंएतच्च
प्रकृतौव्यवस्थितमुभयत्रचोदकप्राप्तंतत्रचतुर्धासंशयःअनुवादोवापरिसंख्यावाअर्थवादोवाविधिर्वेतितत्रप्राप्तत्वादनुवादइतिचेत्
नवैयर्थ्यापत्तेःतर्हिगुणांतरपरिसंख्यास्तीतिचेन्नदोषत्रयापत्तेःचतुर्थेहन्यप्राप्तस्याग्रहणाग्रत्वस्यप्रशंसार्थोयमर्थवादइतिचे
न्नलक्षणावृत्तिप्रसंगात्तस्मादाग्रयणाग्रत्वेयथाविधिस्तथेतरयोरपिद्रष्टव्यः।नचप्राप्तत्वादविधिरितिवाच्यंअस्यविधेर्नैमि
त्तिकत्वाभ्युपगमात्।रथंतरादिनिमित्तकयोरेवहिचोदकेनप्राप्तिःप्रयोजनंद्वादशाहविकृतिषुयत्रक्वापिरथंतरादिनिमित्ताभावे
पिऐंद्रवायवाग्रत्वसिद्धिः॥ ॥चतुर्विंशाधिकरणमारचयति॥ ॥व्यूढोपिप्रकृतिःकिंवाविकृतिस्याद्द्विष्टवत्विधिसाम्यादादिमो
न्योलिंगात्कामविधेरपिद्विविधोहिद्वादशाहःसमूढोव्यूढश्चतत्रसमूढःपूर्वमुदाहृतःअथव्यूढःउदाह्रियते।ऐंद्रवायवाग्रोप्रा
यणीयोदयनीयौअथेतरेषांदशानामह्नांऐंद्रवायवाग्रंप्रथममहःअथशुक्राग्रंअथद्वेआग्रयणाग्रेअथैंद्रवायवाग्रंअथद्वेशुक्रा
ग्रेअथाग्रयणाग्रंअथद्वेऐंद्रवायवाग्रेइतितत्रसमूढस्यतावत्प्रकृतिगमविवादंतद्वद्व्यूढोपिकिंप्रकृतिःकिंवासमूढस्यविकृ
तिरितिसंशयेप्रकृतिरितिप्राप्तंकुतः।विधिसाम्यात्।यथासमूढप्रकारःक्रत्वर्थोविहितःतथाव्यूढप्रकारोपिनचात्रकश्चिद्विशेषो
स्तियेनतयोःप्रकृतिविकृतिभावोनिश्चीयेतनचप्रकारद्वयस्यप्राकृतित्वमदृष्टचररथंतरबृहत्पृष्ठयोःज्योतिष्टोमप्रकारयोःतद्द
र्शनादितिपूर्वःपक्षःव्यूढःसमूढस्यविकृतिःकुतःलिंगदर्शनात्।ऐंद्रवायवस्यवाएतदायतनंतच्चतुर्थमहरितिव्यूढेश्रूयते।ए
तच्चविकृतित्वेसतिभवतिनान्यथातथाहिव्यूढेप्रायणीयोदयनीयव्यतिरिक्तेषुदशस्वहस्सुयच्चतुर्थंयदाग्रयणाग्रत्वंनैंद्रवायवस्या
यतनंसमूढेतुयदहनवानामह्नांमध्येत्रिकादित्वादैंद्रवायवाग्रंतच्चव्यूढस्यविकृतितायांचोदकेनप्राप्यमाणंविधिसिद्धाग्रय
णाग्रत्वतयेत्यूह्यतइतियुक्तं।किंचयःकामयेतबहुस्यांप्रजायायेतिकामायव्यूढोविधीयतेतथासतिसमूढवत्।क्रत्वर्थवि
ध्यभावाद्रथंतरबृहत्पृष्ठरथंतरवैषम्येणविकल्पितप्रकृतित्वंनास्तिनत्समूढस्यद्वादशाहस्यविकृतिर्गवामयनंसंवरस्तत्र

तत्रत्र्यनीकचोदकेनप्राप्तात्रीण्यनीकानीआग्राण्येंद्रवायवशुक्राग्रयणरूपाणियस्यांक्रियायांसात्र्यनीकातयाविकृतिरहर्गणेषुतयो
रन्यतरस्यातिदेशः पूर्वःपक्षिणः प्रयोजनंसमूढस्यैवातिदेशः सिद्धांते॥ ॥पंचविंशाधिकरणमारचयति॥ ॥दंडाकलितवसने
त्र्यनीकावृत्तिरिष्यते।स्वस्थानवृत्तिरथवास्यादाद्योहर्विवक्षयानविवक्षावाक्यभेदात्त्र्यनीकैस्तपूरणं।एकैकवृत्त्यानायिनातेनैकैकं
विवर्धते।अस्तिसमूढस्यद्वादशाहस्यविकृतिगवामयनंसंवत्सरसत्रंतत्र्यनीकाचोदकेनप्राप्तानित्रीण्यनीकानिआग्राण्येंद्रवायव
शुक्राग्रयणरूपाणियस्यांक्रियायांसात्र्यनीकातयाचत्रिःपरिवृत्तयाद्वादशाहस्याद्यंतयोःप्रायणीयोदयनीययोःअह्नोर्मध्येवर्तमा
नेषुदशसुहस्सुदशमव्यतिरिक्तानिनवसंख्याकान्यहानिपूरितानिअतःसंवत्सरसत्रेपिप्रायणीयोदयनीयमध्यवर्तीनिपूरयितव्यानि
तत्पूरणंचयथोक्तायाःत्रिःपरिवृत्तायाःनवदिवसयुक्तायास्त्र्यनीकायाःसकृदावृत्तिमंतरेणनसिध्यतीत्यावृत्तिःप्राप्तातस्यांचेद्विविध्यं
तत्पूरणंचयथोक्तायाःत्रिःपरिवृत्तायाःनवदिवसयुक्तायाः...भागैःसहितंकृत्स्नदंडंपुनःपुनरावर्तयंतिनत्वेकैकंभागंतथानवदिवसना
विघ्नंतदंडस्यावृत्त्याभ्रमावाकलयितव्यायामादिमध्यावसानाभागैःसहितंकृत्स्नदंडंपुनःपुनरावर्तयंतिनत्वेकैकंभागंतथानवदिवसना
मावृत्तिरित्येकःप्रकारःयथाध्येतारःप्रपाठकमावर्तयितुकामाएकैकंभागमसकृत्पठंत्येतिथानवदिवससमूहवर्तिएकैकस्याह्नोसकृद
नुष्ठानमित्यपरःप्रकारःतत्राद्यस्तावत्प्राप्नोतिकुतःअहःशब्दस्यविवक्षितत्वात्।एकैकंभागंऐंद्रवायवाग्रंप्रथममहरुत्कर्षोहःशब्दो
थशुक्राग्रमथाग्रयणाग्रमित्याद्युक्तवाक्येषुअनुषज्यतेयथोक्ताग्रत्वविशिष्टानांअह्नांक्रमविशेषश्चाथशब्देननियम्यतेतथासति
यथैंद्रवायवाग्नमिकाहनैरंतर्येणासकृदावर्त्यतेतदानीमथशुक्राग्रमहरित्यादिकंबाध्येत।तस्मात्क्रमयुक्तानामग्रत्वविशेषोपेता
नांअह्नांनवानांचोदकप्राप्तानांतथैवानुष्ठानेसतिपुनःपुनश्चोदकेनतथैवप्राप्तेदंडकलितवदावृत्तिरितिपूर्वःपक्षः।नाहःशब्दोत्र
विवक्षितःकुतःवाक्यभेदप्रसंगात्।ऐंद्रवायवाग्रंप्रथमंभवति।तच्चाहरित्याहःसंघातानिवृत्तयेवाक्यंभेत्तव्यंप्रसज्येतअहःशब्दत्वावि
वक्षितेसतिअष्टभिरथशब्दैःयथोक्ताग्रत्वानामेवानंतर्यंनियम्यतेतथासतिद्वितीयपर्यायेविहितस्याग्रयणाग्रत्वस्योपर्यैंद्रवायवाग्र
त्वंनानुष्ठातुंशक्यं।तदनुष्ठानाभावेचस्वस्थानविवृध्यैवप्रायणीयोदयनीयांतरालपूर्तिर्भवतिपूरयितव्यमंतरालंनवधाविभज्यप्रथमभा
गगतेष्वहस्स्वैंद्रवायवाग्रत्वंद्वितीयभागगतेषुशुक्राग्रत्वंइत्यनेनक्रमेणानुष्ठातव्यंसेयंस्वस्थानविवृद्धिःस्वस्यैंद्रवायवाग्रस्यस्थानंशु
क्राग्रत्वात्पूर्वभावित्वंतत्रप्रकृताविकस्मिन्नहनिभवतिइहतुबहुष्वहस्सुवितितदृद्धिः।नच्यनीकाचोदकाप्राप्तप्रत्यक्षविहितातुसातस्यामुक्तो

श्रीः

विचारस्यादितिवार्तिककृदीरितं॥ ॥षड्विंशाधिकरणमारचयति॥ ॥व्यूढेभक्षादिमंत्राणांअर्थानांवाव्यतिक्रमः।मंत्राणामेवाद्यःस्यादविशेषणकीर्त
नात्।छंदसांव्यत्ययःश्रोक्तोनार्थानांतेनमंत्रगाः।गायत्र्याद्याविपर्यासोऽर्थेस्तुतिःप्रशस्तये।व्यूढेद्वादशाहेभक्षपवमानतदुभयंमंत्रपरिधिकपाल
निचोदकप्राप्तानितत्रभक्षमंत्रेषुसवनत्रयगतेषुगायत्रछंदसस्त्रिष्टुप्छंदोजगतीतिछंदसइतिपदत्रयंश्रुतं।तथापवमानत्रयविषयेषुअन्वारोहमंत्रे
षुगायत्रछंदास्त्रिष्टुप्छंदाजगतीछंदाइतिश्रुतं।तथापरिधिस्तावकेऽर्थवादःपठ्यते।गायत्रोमध्यमःपरिधिःत्रैष्टुभोदक्षिणोजागतउत्तरइतितथाकपा
लविषयंवाक्यंपठ्यते।अष्टाकपालःप्रातःसवनएकादशकपालोमाध्यंदिनीयोद्वादशकपालस्तृतीयसवनिकइतिअत्राष्टत्वादिभिस्तिसृभिसंख्या
भिर्गायत्र्यादिछंदांसितत्तदक्षरसंख्याद्वारेणोपस्थाप्यंतेएवंस्थितेसतिव्यूढप्रकरणेछंदोव्यतिक्रमःपठ्यतेछंदांसिवान्योन्यस्यलोकमभिध्यायंगाय
त्रीत्रिष्टुभःत्रिष्टुप्जगत्यांजगतीगायत्र्याइतितत्रसंशयःसोयंछंदोव्यतिक्रमोभक्षपवमानपरिधिकपालरूपाणामर्थानामुभयविधमंत्रगतछंदोवा
चिशब्दानांचकर्तव्यः।किंवातेषांशब्दानामेवेतितत्रमंत्रगतानामेवेतिविशेषाश्रवणात्सर्वत्रव्यतिक्रमइत्याद्यःपक्षःतेनगायत्रशब्दनिर्दिष्टःप्रातः
सवनीयोभक्षःत्रैष्टुभशब्दितस्यमाध्यंदिनीयभक्षस्यस्थानेसचतृतीयसवनस्यस्थानेसोपिप्रातःसवनीयस्थानेतथाबहिष्पवमानोमध्यंदिनसव
नेमाध्यंदिनपवमानस्तृतीयसवनेआर्भवपवमानःप्रातःसवनेतथास्थाविष्ठःपरिधिःदक्षिणतःअणीयान्द्राघीयानुत्तरतःअणिष्ठोह्रसिष्ठोमध्य
मःतथाष्टाकपालोमाध्यंदिनसवनएकादशकपालस्तृतीयसवनेद्वादशकपालःप्रातःसवनेसोयमर्थव्यतिक्रमः।मंत्रद्वयशब्देष्वप्येवंयो
जनीयमितिप्राप्तेब्रूमः।छंदांसिवाइतिवाक्येअर्थानांव्यतिक्रमोनोक्तःअतोमंत्रगतगायत्र्यादिशब्दानामेवव्यतिक्रमःयस्त्वर्थेषुगायत्र्यादिश
ब्दप्रयोगःप्रशंसार्थःभक्षार्थानांमुख्यछंदस्त्वमावादितिराद्धांतः॥ ॥इतिमाधवीयेजैमिनिन्यायमालाविस्तरेदशमस्याध्यायस्यपंचमःपादः।
षष्ठपादप्रथमाधिकरणमारचयति॥ ॥सामैकस्यांत्रचेवास्यादाद्यःस्वाध्यायवद्भवेत्।वचनाल्लिंगसंयुक्तात्स्तोत्रेसामत्र्चेभवेत्।पवमाना
उपष्ठादिस्तोत्रेषुयद्विहितंरथंतरबृहदित्यादिसमाध्यतरएकस्यामृच्यधीयतेतत्किंस्तोत्रप्रयोगकालेप्येकस्यामृचिगेयंकिंवात्रचेगेय
मितिसंशयःअध्ययनस्यानुष्ठानार्थत्वात्यथाध्ययनमेकस्यांसाचिसाम्नःकृतंतथैकस्यामेवसामगेयमितिपूर्वपक्षः।उत्तराक्षरेणप्रथमा
यास्सचःप्रस्तौतिद्व्यक्षरेणोत्तरयोरितितिसृष्वृक्षुप्रस्तोत्रागातव्योभागोनिरूप्यतेतदिदंत्रचस्यलिंगंसकृत्सामैवाचमिथुनीसंभवावेत्या
दावृग्देवतासामदेवतयोःसंवादरूपेऽर्थवादेसामदेवतेकामयंद्वेस्त्रियौचप्रत्याख्यायतिस्त्रसंयोगत्विकारतदिदमपरंलिंगंताभ्यांलिंगाभ्या
मुपबृंहितादेकंसामत्रचेक्रियतेस्तोत्रीयमितिवचनात्त्रचेगातव्यं॥ ॥द्वितीयाधिकरणमारचयति॥ ॥स्वर्देरुशब्देवीक्षणेचकिं
स्यादंगांगित्वाथवा।मलिनावधितायोक्ततेनवाक्येनतद्विधेःप्रतिशब्देनावधिर्हिद्योत्योवाक्यंनाभिधते।सत्येवंमीलनस्यास्यविधिर्नोत्त

अ॰क॰ २॰ रथोभवेत्।अस्तिरथंतरसाम्नोयोनावभित्वाशूरेत्येतस्यामृचिस्वर्दृकृशब्दः ईशानमस्यजगतःस्वर्दृशमित्याम्नातः।अस्तियोद्गातुःकत्तात्वे
रथंतरेप्रस्तूयमानेसंमीलयेत्स्वर्दृशंप्रतिवीक्षेतेतिश्रुतिःअत्रसंशयः।किंस्वर्दृक्शब्दोच्चारणवीक्ष्यमाणयोःअंगांगिभावोत्रविधीयतेकिंवावि
१५२ धीयमानेसंमीलनावधित्वेनस्वर्दृक्शब्दोच्चारणंनिर्दिश्यतइतितत्रसंमीलनवाक्याद्वीक्षणवाक्यंभिन्नंततोनमीलनावधित्वेनान्वयःसंभ
वतीतिकिंचवीक्ष्येतेतिलिङ्प्रत्ययोत्रविधायकःश्रूयते।ततःस्वर्दृक्शब्दोच्चारणंवीक्षणांगंवीक्षणंवातदंगमित्यंगांगिभावोभ्युपगतव्यः।त
थासतिस्वर्दृक्शब्दरहितयोःस्तुतयोःस्तोत्रीयमानेरथंतरेविहितसंमीलनानुवृत्तिःफलिष्यतीतिपूर्वःपक्षः।स्वर्दृशंप्रतीत्यनेनकर्म
प्रवचनीयेनप्रतिशब्देनस्वर्दृक्शब्दोच्चारणस्यमीलनकालावधित्वंद्योत्यते।नचात्रभिन्नवाक्यंएकवाक्यत्वसंभवात्।तथाहिविरो
धपरिहारायस्वतएवप्राप्तत्वात्।वीक्षणंनविधेयंतथासतीस्वर्दृक्शब्दोच्चारणात्।संमीलयेदित्येकंवाक्यंसंपद्यतेएवंसत्युक्तस्तरयोर्स्तो
त्रेमीलनविध्यभावःफलिष्यतीतिसिद्धांतः॥ ॥तृतीयाधिकरणमारचयति॥ ॥गवामयनिकेपृष्ठ्येषडहेप्रत्यहंद्वयं॥बृहद्रथंत
रंचेतिभवेत्किंचित्क्वचिद्दिने।द्वंद्वगर्भबहुव्रीहेराद्योत्योपिसमोप्यसौ।अन्योन्यनिरपेक्षस्यचोदकादंतिमोभवेत्।द्वादशाहेपृष्ठ्यःष
डहःउत्पन्नतत्रषण्णामथक्रमेणरथंतरबृहद्वैरूपवैराजशाक्वररैवतानिसामानिविहितानिगवामयनेतुविकृतिरूपोयःपृष्ठ्यःषड
हःतत्रश्रूयते।पृष्ठ्यःषडहोबृहद्रथंतरसामेति।चोदकप्राप्तयोर्बृहद्रथंतरयोःपुनर्विधानाद्वैरूपादिनिवृत्तिःततःशिष्यमाणंबृहद्र
थंतरसामद्वयंकिंप्रत्यहंकर्तव्यं।किंवाकेषुचिदहस्सुबृहत्केषुचिद्रथंतरमितिसंशयःबृहद्रथंतरंचबृहद्रथंतरेतेचसामनीयस्येतिद्वंद्वगर्भेतबहुव्री
हावितरेतरयोगद्वंद्वेनसाम्नोःसाहित्यंप्रतीयतेततःप्रतिसामद्वयमितिपूर्वःपक्षःतेसामनीयस्याद्द्वयंद्वंद्वोयदन्यपदार्थत्वंतराभवतुत्वमेवस्या
त्द्वंद्वतुषडहोन्यपदार्थःतथासतिषडहद्वयोःसाम्नोःसाहित्यंसिद्धांतेपिसमानंप्रकृतौतुतयोःसाम्नोरन्योन्यनिरपेक्षत्वादिहापिनिरपेक्षमेव
सामचोदकेनाप्यतिदिश्यतेतस्मात्केषुचिदहःसुकिंचित्किंचित्सामेतिसिद्धांतः॥ ॥चतुर्थाधिकरणमारचयति॥ ॥स्युरेकादशिनाःकिंवा
प्रायणीयोदयनीययोःप्रत्येकमखिलाःकिंवाविभज्याःस्युस्तयोरभीउद्देश्ययोःप्रधानत्वात्प्रत्येकंपशवोखिलाः।तदेरत्योशतवद्भागः श्रीः८
शिष्टत्वासंतितांतिमो।द्वादशाहेश्रूयते।एकादशिनात्प्रायणीयोदयनीययोरतिरात्रयोरालभेरन्नितितत्रएतेपशवएकादशापिप्रायणीयेह
निकर्तव्याःतथोदयनीयेपिसर्वेकर्तव्याःकुतःप्रायणीयोदयनीययोरुद्देश्यत्वेनप्राधान्यात्प्रधानंचांगावृत्तेर्युक्तत्वात्इतिपूर्वःपक्षः।वच
नांतरेणविहितानामेकादशानांप्रकरणेनद्वादशांगत्वेसिद्धेसतिदेशाकांक्षायांतात्पर्यतश्रुत्युद्दिश्यमायणीयोदयत्वेनविधीयतेतत्कुतउद्देश्य
त्वंकुतस्तरांप्राधान्यंकुतस्तमांपश्वावृत्तिःएवंसतियथाशतदेवदत्तयज्ञदत्तयोःविधीयतामित्युक्तेदेवदत्तेपंचाशद्विधीयतेयज्ञदत्तेपंचा

श्वादितिविभागःयथाप्रायणीयेपंचपशवउदयनीयेपंचेतिविभागोयुक्तःयस्त्ववशिष्टएकःपशुरंतिमःसप्रत्यासन्नत्वादंतिमेहन्युदयनीयेकर्त
व्यः॥ ॥पंचमाधिकरणमारचयति॥ ॥किंसर्वपृष्ठेसर्वाणिपृष्ठदेशीयथोकिंवा।पृष्ठशब्दात्पृष्ठदेशेवचनानुव्यवस्थितिः।इदमाम्नायतेविश्व
जितिसर्वपृष्ठइतिषडहेषड्स्वहःसुक्रमेणरथंतरंबृहद्वैरूपमित्यादिभिःषड्भिःसामभिःपृष्ठस्तोत्रंनिष्पादितंतानिसर्वाणिपृष्ठसामानियस्मिन्
विश्वजितिसोयंसर्वपृष्ठःतत्रमाध्यंदिनपवमानेमैत्रावरुणसाम्नोरंतरालरूपेपृष्ठस्तोत्रदेशेकिंसर्वाणिपृष्ठसामानिकार्याणिकिंवायथावचनंदेशव्य
वस्थितिसंशयःपृष्ठकार्यगमकेनपृष्ठशब्देनपृष्ठदेशोप्राप्तेवचनेनदेशविशेषोव्यवस्थाप्यते।वचनंचैवमाम्नायतेपवमानेरथंतरंकरोत्यभीवेबृ
हन्मध्यइतराणिवैरूपंहोतुःपृष्ठंवैराजंब्रह्मसामशाक्वरंमैत्रावरुणसामरैवतमच्छावाकसामेतिवचनंहिन्यायाद्बलीयःतस्माद्देशविशेषोव्य
वस्थितः॥ ॥षष्ठाधिकरणमारचयति॥ ॥कात्स्न्याद्वैरूपवैराजेउक्थ्यषोडशिनोःकुत।पृष्ठेस्यात्सतुसंयोगाद्द्योस्यःपृष्ठलिंगतः।इदमा
म्नायते।उक्थ्योंचैरूपंसामाएकविंशःषोडशिवैराजसामेतिकृत्स्नेउक्थ्येवैरूपंसामकृत्स्नेषोडशिनिवैराजंवैरूपंसामयस्मिन्नुउक्थ्येक्रतौ
वैराजंसामयस्मिन्षोडशिनिक्रतावित्येवंक्रतुसंबंधप्रतीतेःमैवंप्रकृतौरथंतरंसामबृहत्सामेत्येवंविधस्यनिर्देशस्यपृष्ठस्तोत्रविष
यत्वदर्शनादत्रापितंनिर्देशेनपृष्ठलिंगेनपृष्ठकार्येवैरूपवैराजंचभवितुमर्हति।क्रतुसंबंधपृष्ठद्वारेणोपपद्यते॥ ॥सप्तमाधिकरणमा
रचयति॥ ॥त्रिवृदग्निष्टुदित्येतत्सर्वत्रस्तोमएववा।आद्यस्त्रैगुण्यवाचित्वादंत्यस्तोमेस्वरूढितः।एवंश्रूयतेत्रिवृदग्निष्टुदग्निष्टोमइति
किंत्रिवृत्त्वमग्निष्टुतिक्रतौसर्वेषुसाधनेषुबंध्यतेकिंवास्तोममात्रसंबंधित्वं।त्रिरद्वज्जुरित्यादौत्रिवृत्शब्दस्यत्रैगुण्यवाचित्वदर्शना
त्।अत्रापिक्रतुसाधनेषुयासंख्याश्रूयतेसासर्वात्रित्वेनक्रियतइतिप्राप्तेब्रूमःयद्यपित्रिवृत्शब्दोवयवप्रसिध्यालोकेत्रैगुण्यंब्रूतेत
थापिवेदेरूढ्यास्तोमवाचीत्रिवृद्वहिष्पवमानइत्युक्तःस्तोत्रीयाणांनवानामृचामनुक्रमेणतत्स्तोमविषयमेवत्रित्वं॥ ॥अष्टमाधि
करणमारचयति॥ ॥संभवादेकद्वयोरेकंपृष्ठंयद्वासमुच्चितं।एवंप्राप्तेरुक्तद्विश्वजितावान्यत्रचेतरत्।वचनाद्विश्वजित्येतिसाम्नीद्वि
स्तोत्रयोर्द्वयोःनिराक्तितस्पष्टरवसाहिसंस्यात्पुनर्विधिः।इदमाम्नायतेसंभवउभेकुर्यादभिहितावेकाहउभेबृहद्रथंतरेकुर्यादिति
किमत्रबृहद्रथंतरयोरेकंपृष्ठस्तोत्रावितरदन्यस्तुतौस्यात्किंवासमुच्चितमुभयंपृष्ठस्तोत्र।इतिसंशयःप्रकृतौद्वयोर्विकल्पित
त्वादेकस्मिन्प्रयोगएकस्यपृष्ठत्वादन्यत्रापितथात्वंयुक्तंतथासत्यवशिष्टंसामसर्वपृष्ठविश्वजिन्न्यायेनस्तोत्रांतरेप्रयोक्तव्यमि
तिपूर्वःपक्षः।तादृग्वचनाभावेनात्रविश्वजिद्वैषम्यात्प्रकृतिवद्विकल्पेसतिपुनर्विधानवैयर्थ्यात्समुच्चयइतिराद्धांतः॥ ॥
नवमाधिकरणमारचयति॥ ॥त्रयस्त्रिंशारंभणेकिंतदंतेमधुभोजनं।षडहांतेथवाद्यःस्यात्सान्निध्याद्वाक्यतोतिमः॥

305
1945

अ.क.र.

पृष्ठः षडहो द्वितीयस्त्रयस्त्रिंशात् । त्रयस्त्रिंशादिश्चेति द्वादशाहे त्रिवृत्पंचदशसप्तदश एकविंशः त्रिणवत्रयस्त्रिंशा इत्येते स्तोमैर्युक्ता
न्यहानि षड्विहितानि सोयं त्रयस्त्रिंशांतः क्वचिद्विकृतो व्यस्तो तेन त्रयस्त्रिंशादिस्त्रिवृदंतः पृष्ठ्यषडहः स त्रयस्त्रिंशारंभणः त्रिवृदुत्तमः का
र्य इति तत्र मधुभोजनं चोदकप्राप्तं तच्च प्रकृतौ विहितं त्रयस्त्रिंशाहस्त्वनुष्ठितेरनंतरं कृतमित्यत्रापि सांनिध्यात्त्रयस्त्रिंशांते कर्तव्य
मिति प्राप्ते ब्रूमः । संस्थितः पृष्ठ्ये षडहे मध्वाशयेत् । घृतं वेति वाक्येन प्रकृतौ षडहप्रयोगस्यांते मधुभोजनं विहितं त्रयस्त्रिंशसंनि
धिस्तु नांतरीयकः । अतोत्रापि षडहावसाने कर्तव्यत्वात् त्रिवृत्संनिधौ तदनुष्ठानं ॥ ॥दशमाधिकरणमारचयति॥ ॥अ
भ्यस्ते षडहे मुक्तिं मन्यसे किंनवाग्रिमः । स्तोत्रशस्त्रादिवन्मैवं संस्थिते तद्विधानतः । आवृत्तं पृष्ठ्यमुपयंतीति श्रूयते तत्र षडहावृत्तौ य
था स्तोमादीन्यावर्तंते तथा मधुभोजनमपीति प्राप्ते ब्रूमः । संस्थिते षडहे भोजनं विधीयते संस्थानाम पुनः षडहविशेषव्यापाराभावः
अतः षडहावृत्तेः मधुभोजनं सकृदेव कार्यं ॥ ॥एकादशाधिकरणमारचयति॥ ॥सर्वांते प्रतिमासं वा पृष्ठ्यांते मधुभोजनं । स
र्वांते मधुवन्मैवं संस्थितीनां पृथक्कृतः । गवामयने श्रूयते । चत्वारोभिप्लवाः षडहाः पृष्ठ्यः षडहः समासद्वितीयः सततीयः सच
र्थः स पंचम इति तत्र षडह पंचकरूपे मासेभ्यस्यमाने पृष्ठ्योप्यावर्तते तथा सति पूर्वन्यायेन नीवृत्तेषु पृष्ठ्येषु सर्वेषु समाप्तेषु अंते मधु
भोजनमिति प्राप्ते ब्रूमः । प्रतिमासं संस्थितानां पृष्ठ्यानां पृथक्त्वान्मधुभोजनमपि प्रतिमासमावर्तनीयं ॥ ॥द्वादशाधिकरणमार
चयति ॥ ॥मध्वभक्ष्यं भक्ष्यते वा सत्रिभिर्ब्रह्मचारिणः । निषिद्धत्वाद्यदि मांस्यः पुंस्क्रत्वर्थविभेदतः सत्रात्मकद्वादशाहे पृष्ठ्यषड
हे संस्थिते मधु अभक्ष्यं कुतः सत्रिणां दीक्षितत्वेन ब्रह्मचारित्वात् । ब्रह्मचारिणां च मधुमांसं निषेधाविति चेन्मैवं निषेधस्य पु
मर्थत्वेन भक्षणविधेः क्रत्वर्थत्वेन च विषयभेदात् । तस्मात्सत्रिभिर्भक्षणीयं ॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥मान
सं किंनु हर्भिन्नमंगं वा दशमेहनि । भिन्नं स्तुत्यादिनांगं तत् विसर्गोक्त्यादिभिर्भवेत् । द्वादशाहे मानसं ग्रहणं श्रूयते । अनया त्वा
पात्रेण समुद्रं रसया प्रजापतये जुष्टं गृह्णामीति मानसं प्राजापत्यं गृह्णातीत्ययमर्थः । पृथिवीपात्रं समुद्रः सोमश्चंद्रमाः प्रजा
पतिर्देवता एवं विशिष्टस्य ग्रहस्य ग्रहणे मनः साधनं तदिदं मानस इति एतच्च द्वादशेभ्यो भिन्नमहः त्रयोदशेहनि कर्तव्यो या
गविशेषः कुतः स्तुत्यादिभ्यो मानसेन द्वादशाहस्य स्तुतिरेवमाम्नायते द्वादशाहस्य ह तरसानि छंदांतानि मानसेनाप्यायय
तीति स्तुतिसाधनं च मानसं स्तोत्रव्याद्भिन्नं भवितुं युक्तं तथा व्यपदेशभेदोपि श्रूयते वाग्वै द्वादशाहो मनो मानसमिति एवमा

श्री:

पत्निभिर्नमहरिति प्राप्ते ब्रूमः । दशमस्याह्नो ग्रंगत्वात् । विसर्गोत्तरादिभ्य एष वै दशमस्याह्नो विसर्गो यन्मानसमिति । विसर्गोक्तिः इयं
च दशमाहांगत्वं गमयति अहरंतत्वे द्वादशाहसमाख्या च । विरुध्यते अंगभूतेनापि मानसस्तुतिव्यपदेशभेदादिकमुपपद्यते तस्मा
दंगं ॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥सत्रमेकः करोत्याहो बहवः प्रकृताविव । एकः कुर्यादिहासीरन्नित्युक्त्या बहवो मताः
द्वादशाहादिसत्रस्य ज्योतिष्टोमप्रकृतिः । तत्र कर्त्रैक्याच्चोदकेन सत्रेपि कर्त्रैक्यप्राप्तिः प्रत्यक्षवचनात् बहवोभ्युपेयाः ॥ ॥पंचदशाधि
करणमारचयति॥ ॥ऋत्विजोन्ये त्रयष्टभ्यः स्युस्त एवोत चोदकात् । अन्ये यष्टार एव स्युः प्रत्यक्षवचनादिभिः । अत्र सत्रे किं यजमा
नेभ्यो व्यतिरिक्ता ऋत्विजः कर्तव्याः किं वा यजमाना एवा ऋत्विजः ज्योतिष्टोमे यजमानादन्येषामृत्विक्त्वादन्ये स्युरिति प्राप्ते ब्रूमः
ये यजमानास्ते ऋत्विज इति प्रत्यक्षवचनाद् दक्षिणाति सत्राणीति आकृतिरिति दक्षिणाराहित्यश्रवणाद् ध्वर्युर्गृहपतिं दीक्षयि
त्वा ब्रह्माणं दीक्षयति तत उद्गातारमित्यादिना ब्रह्मोद्गात्रादिसमाख्या संयोग दीक्षासंयोगयोः आर्त्विज्यं यजमानत्वं द्योतयो प्रतिमा
नाच्च यजमाना एव ऋत्विजः ॥ ॥षोडशाधिकरणमारचयति॥ ॥अहीनसत्रयोर्लक्ष्म नैवो नास्त्यस्ति वा न हि । आवृत्तिसाम्यादास्या
दिज्यादीभ्यां तयोर्भिदा । अस्ति द्वादशाहस्याहीनत्वं सत्रत्वं च तत्रैवं चिंत्यते किमहीनसत्रयोर्लक्षणभेदो नास्त्युतास्तीति तत्र नास्तीति ताव
त् । प्राप्तं कुतः ज्योतिष्टोमावृत्तिरूपस्य समानत्वात् । यथा द्विरात्रादीनामेकादशरात्रांतानामहीनानां आवृत्तो ज्योतिष्टोमस्वरूपं तथा
त्रयोदशरात्राणां सत्राणामिति प्राप्ते ब्रूमः । आसीरन्नुपेयुरिति चोदनाद्वयं यजमानबहुत्वं च सत्रलक्षणं यजति चोदनायजमाना
यबहुत्वानियमाच्चोत्तावेहीनलक्षणं वैदिकप्रयोगेषु तयोरव्यभिचारादिति राद्धांतः ॥ ॥सप्तदशाधिकरणमारचयति॥ ॥अयुता
दि प्रत्यहं स्यात् सकृद्वा क्यानुसारतः । आद्यो भवेत्प्रयोगोंगीतदेक्येन सकृद्भवेत् । अस्ति पौंडरीकः पौंडरीकेणैकादशरात्रेण स्वराज्य
कामो यजेतेति तद्विधानात् । तत्र श्रूयते अयुतं पौंडरीके दद्यात् अश्वमेकादशसहस्रमिति तत्र गवायुतमश्वसहस्रं प्रत्यहं दातव्ये कुतः दक्षिणा
या अहरंगत्वेन प्रधानमावर्तनीयत्वादिति प्राप्ते ब्रूमः । अहर्गणरूपस्य पौंडरीकस्य प्रयोगो दक्षिणांगं प्रत्यंगी स च एकः अतः सकृदेव दानं ॥
अष्टादशाधिकरणमारचयति॥ ॥सकृत्किं प्रत्यहं वास्य नयनं तत्र चोत्तमे । सर्वस्य वा विभक्तस्य सकृत्संस्कार ईप्सितः । प्रतिमाध्यंदिनं चोद
कप्राप्तेः प्रतिदिनं तदा सर्वं नेयं तदेकत्वाद्विभज्य द्वादशाहवत् पौंडरीके सकृदेव दातव्यं गवायुतमश्वसहस्ररूपं दक्षिणाद्रव्यं परस्तित

307
1945

स्यनयनादिसंस्कारः चोदकप्राप्तः प्रकृतौ माध्यंदिने सवने दक्षिणा नीयंत इति तद्विधानत्वेन नयनमिह सकृत्कार्यं किं वा प्रत्यहमित्येकः
संशयः। नयोक्तमे पक्षे प्रत्यहं किं दक्षिणाद्रव्यस्य सर्वस्य नयनं किं वा द्वादशस्वहःसु गवामेकैकं एकादशे द्व्यश्वसहस्रमिति द्वितीयः
संशयः। तत्र सकृन्नयनमिति तावत्प्राप्तं। कुतः तावतैव चिकीर्षितसंस्कारस्य सिद्धत्वात्। अथ वा प्रतिमाध्यंदिनं सवनं चोदकप्राप्तेः
समानत्वात् प्रत्यहं नयनं कर्तव्यं तदापि गवायुताश्वसहस्रतद्रूपस्य द्रव्यस्यैकदक्षिणारूपत्वात्। सर्वं नेयमिति पूर्वः पक्षः। विभज्य नेयं कु
तः द्वादशाहविकृतित्वात् द्वादशाहे चान्वहं विभज्य नीतत्वादिति राद्धांतः॥ ॥एकोनविंशाधिकरणमारचयति॥ ॥मनोस्त्रचः सामि
धेन्यः सर्वाः पंचदशैव वा। अविशेषेण पूर्वोऽस्त्रः कार्यास्त्वं चदशैव ताः। कश्चिद्विकृतिशेषे श्रूयते मनोस्त्रचः साधेन्यो भवंतीति। तत्र विशे
षाश्रवणात् स्त्रचो यावत्यो मनुसंबधिन्यः स्त्रक्संहितायामाम्नाताः ताः सर्वाः सामिधेन्यः कार्या इति प्राप्ते ब्रूमः। अग्निसमिधनमासा
मृचां कार्यं तच्च प्रकृतौ पंचदशभिः सिद्धमित्यत्रापि चोदकवशात् पंचदशैवोपादेयाः। विंशाधिकरणमारचयति॥ ॥उपावहरणं मान
मपि क्षाप्यपतवाससि। क्वापि स्यात्प्रांशुभावाय वचनाद्ध्रासतोभयं। ज्योतिष्टोमे सोमस्योपावहरणं मानं च श्रुतं तदुभयं संपादनप्रयत्ने
न विनास्वत एव लब्धेन केनापि साधनेन कर्तव्यं। मैवं वाससि मिनोति वाससा चोपावहरतीति वचनेन वाससो विहितत्वात्॥ एकविंशा
धिकरणमारचयति॥ ॥नान्यद्ध्रासोहर्गणे स्यात्स्याद्वानस्यादनुक्तितः। चोदकात्प्रत्यहं कार्याद्ध्रासोतरं भवेत्। द्वादशाहादावहर्गणे चोद
कप्राप्ते कस्मान्मानोपावहरहेतोर्वाससोन्यद्ध्रासोनुक्तत्वात्। न संपादनीयमिति प्राप्ते ब्रूमः। प्रत्यहं सोमस्योपावहरणं चोदकेन प्राप्तं
तच्चोपावहरणरूपं कार्यं वासोभेदं विना न सिध्यति हर्विर्द्धाने शकटे वस्त्रिताद्ध्रासोपनीतसोमात्। कियंतमपि सोमभारमेकैकस्याह्नः पर्या
प्तं प्रत्यह्नः स्योपावहर्तुं वासोंतरं संपादनीयं॥ ॥द्वाविंशाधिकरणमारचयति॥ ॥तत्किं मानेहृतेनाद्यः प्रकृतावेकतत्क्षणात्। अ
र्थासंदेश्यंतं नोत्स्याद्ध्रतोस्यात्सार्थकत्वतः। यदेतद्ध्रासोंतरमहर्गणे संपाद्यं तत्किं मानकाले उतोपावहरणकाल इति संशयः। प्र
कृतौ मानोपावहरणयोः वस्त्रैकदर्शनादिहापि तदेक्यसिद्धये मानकाले वासोंतरं संपाद्यमिति पूर्वपक्षः। प्रकृतौ येन सोमेमितस्ते
नैवोपाहरणमर्थसिद्धं। क्रियानिवसोमः शकटे वस्त्रापनीयः क्रियाने वोपावहर्तव्य इति सोमद्वयाभावात्। अर्थसिद्धस्यैक्य
स्य वाचनिकत्वाभावात् न चोदकेनातिदेशास्ति अतोहर्गणमानहेतोर्वाससः शकटे वस्त्रितत्वात्। उपावहरणे वासोंतरस्य सार्थ श्रीः
कत्वादुपावहरणकाले तत्संपाद्य॥ ॥इति माधवीये जैमिनिन्यायमालाविस्तरे दशमस्याध्यायस्य षष्ठः पादः॥ ॥सप्तमपाद

स्य प्रथमाधिकरणमारचयति॥ ॥पशुः कृत्स्नोप्येको हविः किं वा प्रत्यंगं हविरन्यता। आद्यश्चोदनया भेदमवदानपृथक्कृतः। अग्नीषोमीयं पशुमा
लभेतेत्यत्र कृत्स्नस्य पशोरेकं हविष्ट्वं युक्तं। कुतः अग्नीषोमदेवताप्रतिद्रव्यत्वेन पशोश्चोदितत्वात्। न हि हृदयाद्यंगं साक्षात्सत्त्वं भवतीति प्राप्ते ब्रूमः।
हृदयस्याग्रेवद्यति अथ जिह्वाया अथ वक्षस इत्यवद्यति दोष्णोवद्यति पार्श्वयोश्चावद्यतीत्यादिना हृदयाद्यंगानामवदानानि पृथगाम्नायंते अव
दानं च हविष्टप्रयोजकः संस्कारः पुरोडाशादौ होतुमवदीयमानत्वदर्शनात् हविः शब्दश्च कर्मणि व्युत्पत्त्या होमयोग्यं द्रव्यं ब्रूते पश्वाकृतिश्चोदना
नुहृदयाद्यंगद्वारेण देवतासंबंधादुपपद्यते तस्मात्प्रत्यंगं हविर्भेदः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥एकेनांगेन सर्वैर्वा यद्वैकादशभि
र्यजिः। एकेन यागसंसिद्धे हविषां भेदतोखिलैः। एकादशभिरन्येषां परिसंख्या भवेयतः। नत्रिदोषागत्यभावादष्टतोक्तेश्च सोचिता। प्रत्यंगं
हविर्भेदस्थिते सति त्रेधा योगे संशयः। तत्रानिर्दिष्टविशेषेण येन केनाप्यंगेन यागः। कर्तव्यः तावतैव यागस्य सिद्धत्वादित्येकः पक्षः। चोदित
पश्वंगत्वं परिगणितेषु हृदयादिषु अन्येषु चांसशिरःप्रभृतिषु मानं ततो हृदयादिवदंसादीनां हविर्भेदत्वाद्यागमंतरेणाक्रियमानत्वलक्षण
हविष्ट्वापर्यवसानात् सर्वैरंगैर्याग इति द्वितीयः पक्षः। हृदयादिभिरेकादशभिरेवांगैर्यागः कर्तव्यः कुतः अन्येषामंसादीनां परिसंख्यातत्वा
चोदकेन सर्वेषामंगानां अवदाने प्राप्ते हृदयादिवाक्येनांसादयः परिसंख्यायंते। ननु परिसंख्यायां विधिः स्वार्थं जह्यात् परार्थं कल्पते प्रा
प्तं बाधेतेति दोषत्रयं प्रसज्जेत प्रसज्यतां नाम सति हि गत्यंतरे तेषां दोषत्वं परिसंख्यायास्तु तेत्रयः स्वरूपमिति कृत्वा न दोषतां भजते कि
चिद्यानि मांसांतराण्यभिमृशति यानि कानि कानीति तेषां चिन्मांसानां मप क्वत्वमुच्यते पाकस्तु हविषां मांसस्य प्रतिनियतः। तस्मादसंतत्तो
क्तिरंसादिपरिसंख्यां गमयति एतदेवाभिप्रेत्यांसादिप्रतिषेधः श्रुत्यावर्णितः नांसयोरवद्यति न शिर इत्यादिना तस्मादेकादशभिरेव या
गः॥ ॥तृतीयाधिकरणमारचयति॥ ॥इज्यान्नैषैर्वान्यंगैः स्विष्टकृता कृतिः। आद्यः प्रकृतिवन्मैवं पूर्वार्धैस्कृति शेषतः। यशेष्वय
ते। त्र्यंगैः स्विष्टकृतं यजतीति तत्रेज्यार्थानां हृदयाद्येकादशांगानां शेषैः केश्चित्र्यंगैरित्याशेषभूतैः स्विष्टकृद्योतव्यः कुतः प्रकृताविज्या
शेषविशेषेण पुरोडाशेन स्विष्टकृतो कृतत्वादत्रापि चोदकेन तथात्वं इति प्राप्ते ब्रूमः। दोष्णः पूर्वार्धादग्नये समवद्यति गुदस्य मध्यतः श्रो
ण्या जघनत इति वाक्यशेषेण हृदयादिभ्यः एकादशभ्योन्यानि स्विष्टकृते साम्नायंते न च हृदयादिष्वपि गुदादीनि आम्नातानि इति शं
कनीयं तानि वयस्य कल्पस्त्रकारेण दर्शितत्वात् हृदयं जिह्वा वक्षो यकृन्मृत्क्नो सव्यं दोरुभे पार्श्वे दक्षिणा श्रोणिर्गुदतृतीयमि
ति सोविष्टकृतानीति तस्मादनिज्याशेषैरंगैः स्विष्टकृद्धोमः॥ ॥चतुर्थाधिकरणमारचयति॥ ॥होतुर्नियम्यते ध्रुप्राक् किं वैडा 309/1945

अ॰क॰र॰मा॰

विकरोतिसा। अनग्निभिरितिप्राप्ते होतुः पक्षे नियम्यते। अनुवादो नास्ति वाक्यं प्रापिकापरिशिष्टगीः। नाध्वर्युरित्रतेनेडाहोतुर्विक्रियते
तया। पशावेवश्रूयते अध्वर्युर्होत्रेहरतीति अध्वर्युर्हृदयादिभ्यो न्यदंगं तत्रेयं होतुरेव नान्यस्येति नियम्यते कुतः पक्षे प्राप्तत्वात्। तथाहि हृद
दयादीनि ज्याशेषान् भक्षणार्थं पात्रे निक्षिप्यानि ज्याशेषानपि तत्र निक्षेपेत् अनग्निभिरिडां वर्धयंतीति श्रवणात्। तस्मिन् च भक्षणे प्र
यतमाने विभज्यमाने सेयमध्वर्युर्होतुः कदाचित् प्राप्नोति कदाचिदन्यस्य ततो नियंतव्येति प्राप्ते ब्रूमः। वर्तयंतीति वर्तमानोपदेशे
ना नास्ति वाक्यमनुवादः प्रापकं तु परिशिष्टवाक्यं तच्चैवमाम्नायते अथ यद्यस्य शिष्यते तत्तत्सम वत धाना मानयति हृदयं जिह्वा वक्षइत्या
रभ्य वनिष्ठुमित्येतदंतं न वतस्मिन्वाक्ये ध्वर्युर्पठिता ततो प्राप्तत्वाद्विधीयमानया होतुरिडाभागोन्यो बाधते तत्रयं वचनव्यक्तिः यद्धोत्रे
हरंतीति तदध्वर्युरिति तस्माद्विकारः॥ ॥पंचमाधिकरणमारचयति॥ ॥वनिष्ठुरपि तद्वात्स्याप्राप्तिः प्राशनतो यदि। इडासंस्कार एवा
यं भक्षो विक्रियते ततः। पथा वेवश्रूयंते वनिष्ठुमग्नीध्र इति अध्वर्युर्यद्वनिरपिहृदयादिव्यतिरिक्तमंगं ततः संशयपूर्वोत्तरपक्षास्त
दूर्योजनीयाः। अधिकारिकात्वेषा इडापात्रे हृदयादि प्राप्तत्ववाक्ये वनिष्ठुरपि पठितः। पक्षे प्राप्त च नियम्यत इतिउपस्तरणादिवत्।
प्रासनमिडायाः संस्कार एव न त्वेतावता वनिष्ठोर्भक्षत्वप्राप्तिरित्यप्राप्तविधेः पूर्ववद्विकारः इत्यन्यत्त्रशंकायां उत्तरं॥ ॥षष्ठाधिकरण
मारचयति॥ ॥मैत्रावरुणनाम्नोस्त्विभक्षो नास्त्यस्ति वा नहि। अप्राकृतत्वादध्वर्युर्होत्रंतर्भावितोदिसः। अत्र पशौ मैत्रावरुणनाम्न इ
डाभक्षो नास्ति कुतः। प्रकृतौ वरुणस्याभावेन चोदकप्राप्त्यभावात् मैवं मैत्रावरुणः प्रैषाभिषान्वाहेति प्रैषानुवचने तस्य विधीयते।
तत्र प्रैषकार्यणा द्युयावंतर्भावः अनुवचनकार्येण च होतारितितस्मादस्ति भक्षः॥ ॥सप्तमाधिकरणमारचयति॥ ॥द्विभाग एक
भागो वा द्विभागः स्याद्विकर्मतः। एकपुंमैक्यतो नोचेद्वैषम्यं प्रकृतावपि। समैत्रावरुणः कर्मोपाधिना द्विभाग इति चेत् न पुरुषैक्यो
पाधिना भागस्याप्येकस्यादन्यथा प्रकृतावपि कर्मतारतम्यानुसारेण भागतारतम्यं प्रसज्येतः॥ ॥अष्टमाधिकरणमारचयति।
प्रतिप्रस्थातुरत्रास्ति भक्षो नो वा वपामसो। पचत्यतोस्ति नो पत्न्या वपा सर्वाकृतायतः। अत्र पशौ प्रतिप्रस्थातुरिडाभक्षोस्ति कुतः श्री:
अध्वर्युकर्मणो वपायाकस्य तनकृतत्वात् मैवं। भक्षयितुं वपाशेषस्याभावात्॥ ॥नवमाधिकरणमारचयति॥ ॥गृहमेधीय
के त्वाज्यभागाविस्यनुवादगीः। सचोदकविधिर्वार्थवादो वाधिककर्म वा। परिसंख्यातसंकोचश्चोदकोन्यत्र वाथवा। अपूर्वं गृ
हमेधीयं स्याद्वा तो लुप्तचोदकं। अनुवादः पुनः श्रुत्याद्वितीयः सार्थतावशात्। निर्वापर्व चोदस्य लिंगत्वेन सहायकृत्। आद्ये नैव तति

ष्टेरेष्टिकस्य प्रशंसनं। विध्येकवाक्यता नास्तिते नात्रांगांतरे विधिः। प्रत्यभिज्ञाततो गस्य परिसंख्येतरस्य हि। चोदकस्य च संकोचो
गांतरपरो भवेत्। व्यापारे स्यौक्या चोदकस्य स्वार्थसंहरणं भवेत्। वैरूप्याच्च निरर्थत्वादपूर्वं कर्म युज्यते। आज्यभागेति नाम्न्योप
कारकृति स्मृते रिह। नापनादि समंतस्माल्लुप्यते तेन चोदकः। मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदनं इति विहिते गृहमेधी
ये श्रूयते आज्यभागौ यजनीति तत्राष्टधा संशयः। चोदकप्राप्तयोरेवाज्यभागयोरिह पुनः श्रवणादनुवादोयमित्याद्यः पक्षः तथा
सति वैयर्थ्यप्रसंगात् सार्थकत्वाय चोदकेन ह्वाक्ययोर्मिलितयोरत्राज्यभागविधायकत्वमभ्युपेतव्यं औषधिद्रव्यनिर्वापाद्यो
यथा प्रकृतिगताः संतावेकृतावपि श्रूयमाणाश्चोदकस्य लिंगं तथाज्यभागावपि लिंगत्वेन सहाभूतौ ततो मीलितयोर्विधायकत्वमि
ति द्वितीयः पक्षः गृहमेधीये क्षश्रुतस्यौदनस्यैवौषधिद्रव्यतया लिंगत्वसिद्धेर्नास्ति लिंगांतरापेक्षा ततस्मात्प्रकृतावेष्टो ऊ
त त्वाज्यभागकर्मण इह पुनः श्रवादत्वेन तत्प्रशंसार्थमिति तृतीयः पक्षः भिन्नप्रकरणे श्रुतस्य विध्येकवाक्यत्वायोगादर्थवादत्व
मयुक्तं ततश्चोदकप्राप्तादाज्यभागादिकर्मणोधिकमाज्यभागरूपमंगांतरमिह विधीयते चतुर्थः पक्षः ऐष्टिकयोराज्यभागयोरिह प्र
त्यभिज्ञानान्नांगांतरयुक्तं तस्मादाज्यभागावतिरिक्तस्य प्रयाजाद्यंगस्य परिसंख्यानार्थमिदमाज्यभागवचनमिति पंचमः पक्षः आ
ज्यभागवाक्येन ताद्विधिरूपस्वार्थस्त्यज्येत प्रयाजादिरूपनिषेधोन्यार्थः परिगृह्येत चोदकप्राप्तं च प्रयाजानुष्ठानं बाध्येतेति दोष
त्रयप्रसंगान्न परिसंख्या युक्ता तेन प्रत्यक्षरूपात्स्मादाज्यभागवाक्यादानुमानिकं चोदकवाक्यमाज्यभागव्यतिरिक्तप्रयाजाद्यंगे
षु संकोचनीयमिति षष्ठपक्षः। यदि चोदकस्य प्रत्येकमगं पृथक् व्यापारास्युः तदा प्रयाजाद्यंगगोचरे व्यापारे स्तेषामतिदेशः स्थिष्य
ति। आज्यभागगोचरस्यानेकप्रत्यक्षविधिना बाधितत्वान्न चोदकातिदेश इत्येवं संकोचो वर्णयितुं शक्यते। इह तु शब्दबुद्धिकर्मणां
विरम्य व्यापाराभावादिति न्यायेनैक एव चोदकस्य व्यापारः तथा सति युगपदतिदेशो नातिदेशश्चाविरुद्धधर्मत्वं प्रसज्येत। तस्मा
त्प्रयाजाद्यंगेषु संकोचो न युक्तः तेन चोदको त्राज्यभागकर्मणि संकोचनीयः न चोक्तदोषापत्तिः अस्य संकोचस्योपसंहाररूप
त्वात्। आज्यभागयोरेव शास्त्रस्य चोदकस्य ज्ञानं शक्तिज्ञानमुपसंहारः तथा सत्याज्यभागातिदेशो व्याप्ततस्य चोदकस्य कोना
मातिदेशानि वृत्तिरूपविरुद्धधर्मप्रसंगः तत्राज्यभागकर्मणि चोदकावस्थापनमिति सप्तमः पक्षः पुरोडाशं चतुर्धा करोतीति आ
ग्नेयं चतुर्धा करोतीति अनयोरुभयोरपि प्रत्यक्षवचनत्वेन सरूपत्वादत्रोपसंहारः। इह तु प्रत्यक्षपरोक्षयोर्वचनचोदकयोर्वि

311
1945

रूपत्वात्।नातौयुक्तः।किंच प्रत्यक्षवचनेनैवान्यभागविधिसिद्धेश्चोदककल्पनानिरर्थकातस्मादुपसंहारोनयुक्तः तस्माद्गृहमेधीयो
नचोदकेनान्यांगानिगृह्णातीइतिइतिकर्तव्यताकांक्षातुप्रत्यक्षवचनेनैवपूर्यतेएवंसत्यकदोषत्वाभावादयमष्टमःपक्षोभ्युपगंतव्यः।ननु
सांग्रहण्यामिष्टौप्रत्यक्षवचनविहितैरामनहोमैःसहचोदकातिदिष्टानामनुयाजानांसमुच्चयोंगीकृतःतद्वदत्रापिविधीयमानयोराज्यभागयो
श्चोदकप्राप्तैःप्रयाजाद्यंगैःसर्वैःसहसमुच्चयोस्तुनवैषम्यात्।प्रकृताबाज्यभागयोरुपकारःकृप्तःसोत्रनामसाम्येनस्मार्यते।तत्रप्रकृतो
पकारैरनुयाजाद्यंगैश्चोदकेनसहसातिदिष्टैःसंपूर्यतेततनोविधिवैयर्थ्यपरिहारायामनहोमेषूपकारैःकृप्तेसन्निपश्चात्प्रवर्तमानःसमु
च्चित्वानुष्ठापयतितत्तोवैषम्यात्कृप्तोपकाराज्यभागाविधायकेनानेप्रत्यक्षवचनेनगृहमेधीयेचोदकोलुप्यतेतस्मादविकृतिरूपंसांगमपूर्व
कर्मात्वविधीयतइतिसिद्धांतः॥ ॥दशमाधिकरणमारचयति॥ ॥कार्यंनत्रान्यदंगंनोकार्यंवान्यानपेक्षणात्।नकार्यविहितत्वेनका
र्यंस्विष्टकृदादिकं।तत्रगृहमेधीयआज्यभागाभ्यामेवनिराकांक्षत्वाद्न्यस्विष्टकृदादिकंतकार्यमितिचेत् आज्यभागवद्विहितत्वात्अ
न्यस्विष्टकृतेसमपद्यतइडामुपह्वयतइतिविहितंतस्माद्युक्तंकर्तव्यं॥ ॥एकादशाधिकरणमारचयति॥ ॥तत्रैवपरिसंख्येत्प्राशि
त्राद्यस्तिवानवा।अस्तीडादर्शनान्नैवंतदुक्त्याशास्त्रनेतरत्।गृहमेधीयेस्विष्टकृदाज्यभागादृष्टधासंशयंहृदिनिधायपरिसंख्यार्थपंच
मंपक्षमनुपेक्ष्यैवंकृत्वाचिंतावतारितातत्रप्राशित्रादिभक्षणंनपरिसंख्यातंअस्तिकुतःभक्षणार्थस्येडोपह्वानस्यतत्रदर्शनादितिप्रा
प्तेब्रूमः।अत्रगृहमेधीयेतदिडाभक्षणंवचनबलेनास्तुस्विष्टकृदाज्यप्रापितस्यपरिसंख्यानस्यवचनेनदूरीनिवारितत्वादितरत्
प्राशित्रादिभक्षणंपरिसंख्यातत्वंनास्ति॥ ॥द्वादशाधिकरणमारचयति॥ ॥प्रायणीयातिथ्ययोःकिंविकल्पःशंय्विडांतयोःनियमोवाविक
ल्पस्यान्निषेधपरिसंख्यया।शंय्विडांतत्ववाक्याच्चनियतोविधिमात्रतः।नित्यानुवादोनञ्वाक्यंदोषबाधुल्यमन्यथा।ज्योतिष्टोमेश्रूयते।
शंय्वंताप्रायणीयासंतिष्ठतेनपत्नीःसंयाजयंतीतिइडांतातिथ्यासंनिहितेनानुयाजान्यजतीतिश्रूयतेयत्तदोहोतातत्संदोभिरितिमंत्रंजपति
तदानीमध्वर्युःपरिधानग्रोप्रक्षिपतितदाहकल्पसूत्रकारः।जनुच्यमानेसंयुवाकूभाहवनीयेपरिधान्प्रहरतीतिततोहविःशेषभक्षितेषुपत्नीः
संयाजयंतीतिक्रमःतथाप्राधानयागनारिष्टहोमप्राशित्रादिभक्षणेडाभक्षणान्याजसूक्तवाकशंयुवाकइत्यद्यस्तनःप्रयोगक्रमःपत्नी
संयाजानामुपरिफलीकरणहोमप्रायश्चित्तहोमकपालोद्वासनेनेष्टिःसमाप्यतेएवंस्थितेविकृतिरूपायाःप्रायणीयेष्टेःशंयुवाकांतत्व
मातिथ्येष्टेरिडाभक्षणांतत्वंचविकल्पितंस्यात्ततःनिषेधवाक्यविधिवाक्याभ्यांप्रकारद्वयप्रतीतितथाहिशंय्वंतत्वेडांतत्वविधिनैवो
श्री:

313/1945

परितनपत्नीसंयाजानुयाजानिषेधेषुनर्निषेधवचनंपरिसंख्यार्थंपत्नीसंयाजाद्यतिरिक्तोनास्तिनिषेधइतिपरिसंख्यातेनप्रकृतिवद
थाप्राप्तंकपालोद्वासनस्यमनयोरिष्टयोःप्रतीयतेविधिवाक्येनचशंय्विडांतत्वंतेनव्रीहियववद्विकल्पइतिप्राप्तेब्रूमः।विधिमात्रस्या
नुवदन्नैशंय्वंतत्वंइडांतत्वंचतयोःप्रतिनियतंपत्नीसंयाजाद्यभावस्तथासिद्धः।ततोनत्रपदयुक्तमुपरितनंप्रतिषेधवाक्यंनित्यानु
वादःपत्नीसंयाजाद्यकरणाल्लाघवंभवतिअन्यथाबहवोदोषाःप्रसज्येरन्विकल्पेतावदष्टौदोषाःप्रसिद्धाःपरिसंख्यायांचत्रयोदोषाःवि
धिपरिसंख्याभ्यांपरिसंख्याभ्यांवाक्यभेदोपरदोषःततःशंय्विडांतत्वंनियतं॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥तत्रैवशंय्वंतेपू
र्वंपरेवास्वेच्छयाथवा।परेदाबाधवापूर्वाएवाद्यौद्विविधेतः।विषेधस्वार्थवत्वात्तस्यरएथानुवादगीः।पूर्वोक्तवाक्यतायातिपूर्वएवाविरो
धतः।प्रायणीयातिथ्ययोरेवांतत्वेननिर्णीतेशंय्विडेपुनःसंदिह्यतेप्रकृतौद्विविधेशंय्विडेपत्नीसंयाजेभ्यःपुरस्तादुपरिष्टाच्चविहितेत
तेचात्रचोदकप्राप्तेतत्रद्विविधश्रुतेरर्थचोदनातिरिक्तेसतिविशेषनियामकाभावादिच्छयास्वीयेकोइत्येकःपक्षःयदिप्रायणीयपूर्वे
शंय्वंताअतिथ्याचपूर्वेडांतास्यात्।तदानीमंतत्वविधिनैवताभ्यामूर्ध्वमप्राप्तानांपत्नीसंयाजानामनुयाजानांचतेषामनिवारिता
न्निषेधोनर्थःस्यात्परयोःशंय्विडयोरंतत्वेताभ्यांशंय्विडाभ्यांपूर्वप्राप्तानांतेषामनिवारणात्।तन्निवारणायसार्थकोनिषेधः।
तस्मात्परेएवशंय्विडेग्राह्येइतिद्वितीयःपक्षः।निषेधोयंइत्यनुवादइत्युक्तंसचपूर्वयोःशंय्विडयोरंतत्वेप्येकवाक्यतामापद्यार्थ
वादत्वेनोपपद्यतेअसंजातविरोधित्वाद्धिपूर्वेशंय्विडेतस्मात्तेएवग्राह्येइतिराद्धांतः॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥उपस
त्सुनिषिद्धेभ्यःशिष्टंसर्वंकिमाचरेत्।यावदुक्तमुताद्यस्तुचोदकस्यानिवारणात्।स्रौवाघारेपुनःश्रुत्याशिष्टस्यपरिसंख्यया।अपू
र्वार्थत्वतोवांत्योनुवादोत्रनिषेधगीः।ज्योतिष्टोमेविहितास्पसत्सुपठ्यतेअप्रयाजास्ताअननूयाजाइतितत्रनिषेधात्प्रयाजानानुया
जान्वर्जयित्वावशिष्टंचोदकप्राप्तमंगजातंसर्वमाचरणीयमितिप्राप्तेब्रूमः।प्रकृतौविहिताएवाघारःपुनरिहविधीयतेसचचोद
कप्राप्तमंगजातमन्यत्सर्वंपरिसंचष्टेअन्यथापुनर्विधानवैयर्थ्यात्ननुपुनर्विधानंप्रतिप्रसवार्थंअतएवश्रुतितत्रस्रौवाघारमभा
वशंकानिराकरणपूर्वकंविदधातिनान्यामाकृतिपुरस्ताज्जुहुयात्यदन्यामाकृतिंपुरस्ताज्जुहुयादन्यन्मुखंकुर्यात्स्रुवेणाघारमाघा
रयतीतिअयमर्थःस्रौवाघारःसर्वत्रयज्ञमुखंतथासतियदिकश्चिन्मंदउपसत्प्रयोगादौस्रावाघारेघामुहुत्वात्तस्यस्थानेकांचिद
न्यामाकृतिंजुहुयात्तदामुखव्यत्यासेनप्रत्यवायंप्राप्नुयात्स्रौवएवाघारआदौकर्तव्यइतिनैतत्फलंचोदकप्राप्तस्याघारस्यका

अ० क० २०

रणमंतरेण। कस्मादत्राविशंकाया अयुक्तत्वात्तस्मात्परिसंख्यार्थ एव पुनर्विधिः। आकृत्यंतरनिंदानुतच्छेषभूतोऽर्थवादः। यदि परिसंख्या त्रिदोषे
त्युच्यते तर्हि गृहमेधीयवदपूर्वकर्मस्तु सोऽप्रयाजादिनिषेधो नित्यानुवादः सर्वथा यावदुक्तमत्रानुष्ठेयं॥ ॥पंचदशाधिकरणमारचयति॥ ॥किं
स्यादवभृथे बर्हिर्वर्जं सर्वमुताचरेत्। यावदुक्तं प्रयाजानुयाजबर्हिर्निषेधतः॥ आद्योऽस्तु मंत्रावाज्यभागौ त्यापरिसंख्यया। अंत्येनायं गु
णः प्राप्तेरपूर्वत्वेन वांतिमः। ज्योतिष्टोमगतेऽवभृथे प्रयाजप्रथमानुयाजत्रयो बर्हिर्योगो वर्जयित्वावशिष्टं चोदकप्राप्तं सर्वमनुष्ठेयं कुतः अ
प बर्हिषः प्रयाजान्यजति अपबर्हिषावनुयाजौ यजतीति बर्हिर्योगद्वयमात्रवर्जनादगमादिति प्राप्ते ब्रूमः अग्नू मंत्रावाज्यभागौ यजतीति परि
संख्यानादुक्तमेवानुष्ठेयं अथोच्यते चोदकप्राप्तावाज्यभागावनूद्याग्नूशब्दोपेतमंत्रद्वयरूपस्य गुणस्यात्र विधानान्न परिसंख्येति मैवं।
लिंगत्रमन्यामेव मंत्रयोः प्राप्तत्वात् अतः परिसंख्यया गृहमेधीयवदुपसद्वदपूर्वकर्मत्वेन वा यावदुक्तमनुष्ठेयं॥ ॥षोडशाधिकरणमारच
यति॥ ॥बृहत्पवः खादिरत्वविकल्पा नियता उत। विकल्पाश्चोदकप्राप्तेर्नियताः स्युः पुनर्विधेः॥ क्वचिद्ग्रुतौ श्रूयते। बृहत्पृष्ठं भवतीति तथा
तथीये श्रूयते यवमयो मध्य। इति वाजपेये श्रूयते खादिरो यूपो भवतीति तत्र बृहद्रथंतरयोर्व्रीहियवयोः खादिरबैल्वादीनां च प्रकृतौ विक
ल्पितत्वादत्रापि चोदकेनाविकल्पिता इति चेन्न पुनर्विधानवैयर्थ्यात् परिसंख्यातु दुष्टत्वात् नरांकनीया तस्मान्नियता कोद्यंतरं त्वर्थान्निवर्तते॥
सप्तदशाधिकरणमारचयति॥ ॥काम्येष्टिषु द्रव्यदेवं प्राकृतं न निवर्तते। निवर्तते वा न प्राप्तं विकल्पो वा समुच्चयः। उत्पत्तिशिष्टेनैवात्र निरा
कांक्षत्वतः कुतः। चोदकः शिष्ट एवास्य विषयोऽर्थान्निवर्तते। ऐंद्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इत्यादिषु प्राकृतयोरग्निदेवताष्टाकपाल
द्रव्ययोर्नास्ति निवृत्तिः कुतः चोदकेन प्राप्तत्वात् कृतयोरतिदिष्टयोर्द्रव्यदेवतयोर्विकल्पः समुच्चयो वास्तिस्तथा कर्तव्य इति प्राप्ते ब्रूमः उत्प
न्नस्य यागस्येतिकर्तव्यताकांक्षायां पश्चाच्चोदकस्यावस्थरसत उत्पत्तिशिष्टाभ्यां द्रव्यदेवताभ्यां यागस्य तद्विषया कांक्षा निवृत्ते नैतत्र चोदकस्या
वकाशोऽस्ति ननु सर्वद्याप्यत्र चोदकः कश्चित्प्रवर्तते कश्चिन्निवर्तत इत्येवं न संभवतीति चेत् मा भूत् संभवः न वयं तं निवृत्तिं ब्रूमः किंतु अ
ताभ्यां द्रव्यदेवताभ्यां अन्य एवांगकलापकस्य विषयः ततः प्राकृतयोर्द्रव्यदेवतयोरप्राप्तत्वादेव फलतो निवृत्तिरिति ब्रूमः तस्माद्रूपेतो विक
ल्पसमुच्चयौ॥ ॥अष्टादशाधिकरणमारचयति॥ ॥उदुंबरः खादिरेण समुच्चीयेत बाधकः। द्वयोर्निर्योजनाद्याद्यो निरपेक्षत्वतोंतिमः॥ प
शुकामो नानुष्ठेये सोमापौष्णपशावश्रूयते। औदुंबरो यूपो भवतीति तत्र चोदकप्राप्ते नखादिरेण सह श्रूयमाणस्योदुंबरस्य समुच्चयः का
र्यः कुतः द्वयोर्यूपयोः पशुनियोजनसंभवेन चोदकपरित्यागायोगादिति प्राप्ते ब्रूमः खादिरोदुंबरौ परस्परनिरपेक्षतया पशुनियोजनस्य
मो प्रमाणबलेन प्राप्तौ तयोः समुच्चयांगीकारे निरपेक्षत्वं परित्यजेत तस्मादुपदिष्टोदुंबरोतिदिष्टस्य खादिरस्य बाधकः॥ ॥एकोनविं

श्रीः

शाधिकरणमारचयति॥ ॥किंशुक्ला व्रीहयः पक्षे चोदकप्रापितान्यवात्। न बाधंते बाधंते गुणार्थो किरतोऽग्रिमः॥ वाक्यभेदो यागशुक्लगुण
योर्विधितो भवेत्। विशिष्टस्य विधौ कार्यमेकं वै बाधकं ततः॥ सौम्यं चरुं निर्वपेत् शुक्लानां व्रीहीणां ब्रह्मवर्चसकाम इत्यत्र चोदकप्राप्ता
व्रीहियवविकल्पो न बाध्यते कुतः अस्य व्रीहिवाक्यस्यातिदिष्टपाक्षिकव्रीह्यनुवादेन शुक्लगुणविधाने नार्थत्वे सति वाममंतरेणोपपन्नत्वादि
ति प्राप्ते ब्रूमः यागस्तावदप्राप्तत्वाद्विधेयः तत्र गुणोऽपि यदि पृथग्विधीयेत तदा वाक्यं भिद्येत शुक्लव्रीहिद्रव्यविशिष्टो यागोऽत्र विधीयते।
तथा सत्यतिदिष्टव्रीहियवयोर्यत्कार्यं तदेवोपदिश्यमानं शुक्लव्रीहीणां कार्यं तत उत्त शुक्लव्रीहयः पाक्षिकान्यवान् बाधंते॥ ॥विंशा
धिकरणमारचयति॥ ॥वपायामेव किंवान्येष्वपि पंचावदानता। वपोद्देशादाद्यपक्षो वदानोद्देशतोंतिमः॥ पशौ श्रूयते। यद्यपि तु
रवर्ती यजमानः पंचावत्तैव वपा कार्येति यजमानविशेषस्य चतुरवत्तित्वं गोत्रभेदेन स्मृतिकारैः पठ्यते जामदग्न्या वत्सविदा वार्ष्टिषे
ण श्वेतेनयः पंचावत्तिनः एतानन्ये सर्वे चतुरवत्तिन इति सर्वेषां यजमानानां गोत्रविशेषमपोद्य श्रूयमाणमिदं पंचावत्तित्वं वपामुद्दिश्य
विधानाद्वपायामेवेति प्राप्ते ब्रूमः अवदानस्य चोदकप्राप्तत्वेन विधेयत्वाभावादवदानमुद्दिश्य विधीयमाना संख्यावदानयुक्तेष्व
पि पश्वययवेषु प्रभवतीति सिद्धांतः॥ ॥इति माधवीये जैमिनिन्यायमालाविस्तरे दशमाध्यायस्य सप्तमः पादः॥ ॥अष्टमपादस्य प्र
थमाधिकरणमारचयति॥ ॥नार्षेयं वृणीतेत होतारं नानुयाजेष्विति दृश्यते। विकल्पः पर्युदासो वा स्यादाद्यो वचनद्वयात्॥ अन्याय्यत्वाद्वि
कल्पस्याविध्यंशाः सान्निषेधगीः। तेनानूयाजवाक्यस्थस्तदर्थं पर्युदस्यति॥ महापित्र्यज्ञे चोदकप्राप्तं वरणं प्रतिश्रूयते नार्षेयं वृणीते न होता
रमिति। तथानारभ्यवादे श्रूयते आश्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहे इति पंचाक्षरं द्व्यक्षरो वष
ट्कारः एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्त इति तत्रोक्तं नानूयाजेषु ये यजामहं करोतीति तत्र वरणस्य विधिप्रतिषेधौ चोदकप्र
त्यक्षवचनाभ्यां प्रतीयेते ये यजामह इति मंत्रस्य तु द्वाभ्यां प्रत्यक्षवचनाभ्यां विधिप्रतिषेधप्रतीतिः। तत्र विधायकप्रतिषेधकयो
र्द्वयोः प्रमाणयोर्न वैयर्थ्यं थ विकल्प इति प्राप्ते ब्रूमः अष्टदोषग्रस्तत्वाद्विकल्पोऽन्याय्यः ननु परस्परविरुद्धयोर्विधिनिषेधयोः स
मुच्चयस्याप्यसंभवात् का गतिरिति चेत् उच्यते निषेधत्वेन प्रतीयमानमिदं नेत्यनेन शब्देनोपेतं वाक्यं विधिवाक्यस्यांशो भविष्यति तथा
यदि नेत्ययं शब्दः करोति ना संबध्येत तदा ये यजामहं न करोतीत्येवं प्रतिषेधः स्यात् यदि वृणीते इत्यत्राख्यातप्रत्ययेन संबध्येत तत
दा वरणं न कर्तव्यमिति निषिध्यते न त्वेवं संबध्यते किं त्वनूयाजपादेन कृधातुना च संबध्यते तथा सत्यनूयाजव्यतिरिक्तेषु यागेषु ये
यजामहः कर्तव्यः वरणं व्यतिरिक्तमंगजातमनुष्ठेयमिति ये यजामहवरणपर्युदासे न विधेरेवाविशेषितत्वे सति प्रतिषेधवाक्यस्य

315
1945

कस्यचिदभावान्नविकल्पः।शंकितुमपिशक्यः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥नसोमेध्वरइत्युक्तो निषेधः पर्युदस्यते।उतार्थवा
दोवाद्यःस्यादसमस्तपदोक्तितः।सोमेप्रसक्तिरंगेष्टावविकल्पायमध्यमः।नवास्त्वत्रसमासस्यनियमःपाणिनेर्मते।पुरेतस्मात्सो
मयागाआज्यभागप्रसक्तितः।नपर्युदासः किंत्वर्थवादोदृष्टांतवर्णनात्।दर्शपूर्णमासयोराज्यभागप्रकृत्यतानपशौकरोतीतिप्रति
षिध्यपश्चान्नसोमेध्वरइत्येवमाम्नायतेतत्रायंप्रतिषेधःस्यात्कुतःनशब्दस्यसोमशब्देनसहसमस्तत्वाभावात्आब्राह्मणमाको
रयत्स्वधर्मंकरोतीत्यादिषुपर्युदासप्रदेशेषुसमस्तत्वदर्शनात्व्यस्तोयंनकारःक्रियापदेनान्वितआज्यभागानुष्ठानंप्रतिषेधति
ननुपशौरिष्टिविकृतित्वनचोदकआज्यभागौप्रसंजयतिसोमस्यत्वविकृतित्वान्नास्तितत्प्रसक्तिरितिचेत्बाढंतथापिसोमांग
भूतास्वदीक्षणीयादिष्विष्टिषुयाप्रसक्तिःसैवांगिनिसोमेप्रसक्तिर्भविष्यतितस्मात्प्रतिषेधःइत्याद्यःपक्षःचोदकप्रतिषेधाभ्यां
दीक्षणीयादावाज्यभागौकुर्यादित्येवंविकल्पस्यात्सचाष्टदोषग्रस्तःअतःपूर्वाधिकरणइवपर्युदासोस्तुतत्रकात्यायनमतेनस
मासनियमोपिपाणिनेर्मतेअनियमःतस्मात्सोमव्यतिरिक्तेकर्मण्याज्यभागौकार्यावितिमध्यमःपक्षःयथावरणेषुतद्यतिरि
क्तांगेषुचोदकेनप्रसक्तिसाधारण्येसतिवरणपर्युदासेनागांतरविषयेचोदकोव्यवस्थाप्यतेतथैवात्रापिपर्युदासावादिनापत्युराप्र
र्युदासनयेसोमइतरत्वंचसाधारण्यनाज्यभागप्रसक्तिर्वक्तव्यासाकिमुद्देशात्स्यात्अतिदेशाद्वाननप्रथमःप्रकरणेनदर्शपूर्णमा
सयोरवरुद्धस्याज्यभागोपपदस्यसोमेप्रसंजकत्वाभावात्नद्वितीयःअन्योन्याश्रयत्वप्रसंगात्उपदेशवाक्यार्थोतितस्यनिषेध
स्यशेषःसन्दृष्टांतोवर्ण्यतेयथानतोसोमेध्वरेकरोतितथातौनपशौकुर्यादितितदोर्थवादइतिसिद्धांतः॥ ॥तृतीयाधिकरणमा
रचयति॥ ॥नातिरात्रेपर्युदासोवादोवाथनिषेधनं॥आद्योनुयाजवन्नैवंविध्येकविषयत्वतः।अतएवार्थवादोपिनयुक्तःपरप्र
सामवत्।निषेधस्याद्विकल्पोत्रश्रीह्यादाविवयुज्यते।ज्योतिष्टोमस्यसंस्थाविशेषेश्रूयते।अतिरात्रेषोडशिनंगृह्णातिनातिरात्रेषोड
शिनंगृह्णातीतितत्रयथाप्रयाजमात्रविषयइत्यनूयाजपर्युदासेपिनविधेर्निर्विषयत्वंतर्हितपशौकरोतीत्यत्रनसोमइतिवदर्थ
वादोस्त्वितिचेत्नस्तुत्युस्तावयोर्विधिनिषेधयोरेकविषयत्वेनव्याहतिताद्वस्थ्यात्अपशवोवाअन्येगोअश्वेभ्यइतिअत्रपश्वंत
रनिषेधेनगोअश्वविधेस्तुतिर्दृष्टाइहतुषोडशिनिषेधनषोडशिनएवस्तुतौस्पष्टोव्याघातःतस्मात्प्रतिनिषेधइति।तृतीयपक्षो
स्तुनचात्रापिव्याघातःशंकनीयःअनुष्ठानविकल्पांगीकारेणभिन्नप्रयोगविषयत्वात्सत्स्वथएदोषेषुगत्यंतराभावाद्व्रीहि
यववद्विकल्पोभ्युपगंतव्यःतस्मात्प्रतिषेधइतिराद्धांतः॥ ॥चतुर्थाधिकरणमारचयति॥ ॥जर्तिलोक्तोचतुर्धाकिंविक

श्रीः

कल्पोथपयस्तुतिः॥ ॥विकल्पःपूर्ववन्नैवंवाक्यैक्यात्पयसासह।अग्निहोत्रेश्रूयते।जर्तिलयवाग्वाजुहुयात्गवीधुकयवाग्वाजु
हुयात्नग्राम्यान्पशून्हिनस्तिनारण्यान्अथोखल्वाहुरनाहुतिर्वैजर्तिलाश्चगवीधुकाश्चपयसाग्निहोत्रंजुहुयादिति।जर्तिलाअ
रण्यास्तिलाःगवीधुकावाआरण्यागोधूमाःतयोरुभयोर्विकल्पःअतएवअनाहुतिरितिपूर्वयोःपक्षयोर्द्विवितत्वाद्योमाभाव
स्तृतीयःपक्षःनचात्रजर्तिलगवीधुकयोरनाहुतिरित्येतेनपर्युदासःसंभवतिआहुतिपदान्वितस्यनञ्पदस्यजर्तिलगवीधु
कपदान्वयायोगात्पयोविधिःचतुर्थःपक्षः।एतेषांपरस्परविरुद्धानांचरुणातुगत्यंतराभावात्।षोडशिग्रहणाग्रहणवद्विकल्पइति
प्राप्तेब्रूमः।पयोविधिनासहजर्तिलादेरेकवाक्यत्वेनार्थवादत्वंयुक्तंग्राम्यपशुराहिंसाराहित्येनप्रशस्तयोरपिजर्तिलगवीधुकयोर
ग्निहोत्रंप्रत्याहुतित्वंनास्तिपयसस्तुतदस्तिइत्थंमहाभागंपयइतिश्रूयतेतस्मादर्थवादः॥पंचमाधिकरणमारचयति॥ ॥
अभिघारनिषेधोचहोमाहोमौविकल्पितौ।विधास्यमानशेषोवाविकल्पःइहतिसाम्यतः।निषेधस्यविधेश्चात्रमिमांस्यत्वेनव
र्णनात्।समिमांसावुभावर्थवादोस्त्वर्थेविधित्सिते।चातुर्मास्येषुत्र्यंबककसंयोगनत्र्यंबकनामकाएककपालाःपुरोडाशाबहवो
विहिताःतान्प्रकृत्यश्रूयतेअभिघार्यानभिघार्याइतिमीमांसतेब्रह्मवादिनइत्यादिआधानेश्रूयतेहोतव्यमग्निहोत्रंनहोतव्यमि
तिमीमांसंतेब्रह्मवादिनइत्यादि।अस्मिन्नुदाहरणद्वयेश्रुतिर्विचारार्थाअनयोरुदाहरणयोर्विधिनिषेधौवाचकशब्दाभ्यांश्रूय
माणत्वात्समानबलौ।ततःषोडशिग्रहणाग्रहणवद्विकल्पःनचजर्तिलवद्विधास्यमानस्तुत्यर्थत्वंशंकनीयंदृष्टांतस्यविषयत्वा
त्दृष्टांतेस्तावकाजर्तिलादेरन्यद्विधास्यमानंपयस्तस्यस्तुतिर्युक्ता।इहत्वुपक्रमेविहितायेवाभिघारहोमौमीमांसतेपुन
विधास्येतेअभिघार्याएवलक्षणीमेवहोतव्यमितिवाक्यशेषयोःपठ्यमानत्वात्नचतेनैवतत्स्यस्तु।तिःसंभवतिपुनर्विधानंत्वनु
वादत्वेनगुणार्थत्वेनचोपपद्यतेनिषेधस्यवुस्तावकत्वंदूरापेतंनहितस्यैवनिषेधनतदेवस्तोतुंशक्यते।तस्माद्विधिनिषेधौ
विकल्पार्थावितिप्राप्तेब्रूमः।इतिशब्देनमीमांसाप्रकारवादिनाविधिनिषेधयोर्मीमांस्यत्वंप्रतीयतेततोविधिनिषेधमीमांसा
विधित्सितार्थस्तुत्या।इत्थंमहाभागौविधित्सितार्थोयन्मीमांसयानिर्णेतव्यइतिश्रूयतेतस्मादेकवाक्यत्वादर्थवादः॥ ॥षष्ठा
धिकरणमारचयति॥ ॥उन्नेयोब्रह्मभागस्यनिषेधोविहितस्तुतिः।विकल्पितोवाप्यन्योपिवपोस्वेदत्रुवस्तुतिः।विध्यन

3/7
1945

अधि० र०

त्वयतोस्तोत्रंब्रह्मोद्गातातथास्तिं। विषयेक्याहिकस्तोत्रषोडशिग्रहवन्मतः।आधानेवामदेव्यादिसाम्नांगानानिविहितानि।आधानएवेदमपरमाम्नायतेउ
पवीतावारत्नस्याग्नेयोभवतियस्याग्न्याधेयेब्रह्मासामानिगायतीति।उपशब्दःसामीप्यंब्रूतेवितावितताःकालविलंबमंतरेणपरिसमाप्तस्यार्थः।अनया
निंद्याब्रह्मणःसामगाननिषेधउन्नीयते।सतिनिषेधउद्गातुर्विहितंवामदेव्यादिसामगानंस्तोति।ननुब्रह्मणःसामगानमप्रसक्तंततस्तन्निषेधोत्यंत
संभावितत्वात्शशविषाणवत्शून्यःनहिवंध्यापुत्रोवातद्वधोवासंभावयितुंशक्यते।तथासतिताहशेननिषेधेनकथंस्तोतिरितिचेत्।वपोत्खेदवदि
तिप्राप्तेब्रूमः।यथात्मनोवपामुत्खिदत्तित्यनेनात्यंतासंभावितार्थेनयथाप्राजापत्यस्यतूपरस्याजस्यविधिश्रूयते।तद्वदितिप्राप्तेब्रूमः।नेदंवाम
देव्यादिसामविधिनास्तोत्रंभवितुमर्हतिविधिनामनेकत्वेनस्वस्वसंनिधिपठितैरर्थवादैर्निराकांक्षत्वेनचतदन्वयायोगात्कातर्ह्यस्यवास्यस्यग
तिरितिचेत्।उच्यते।ब्रह्मशब्दोत्रविप्रत्वजातिद्वारेणोद्गातारंब्रूतेतस्यचगानंप्रसक्तंतस्मिन्निषेधेसतिविधिनिषेधाभ्यामेकविषयाभ्यामुद्गातुर्वा
गानंविकल्प्यते॥ ॥सप्तमाधिकरणमारचयति॥ ॥दीक्षितोनददातीतिप्राप्तंसर्वंनिषिध्यते।अतिदिष्टंतुमर्थंवापुमर्थंवोक्तितोग्रिमः।उपदेशा
र्थवत्वायमध्यमोत्योस्तुसंनिधेः।एकवाक्यत्वलोभस्त्वेतुमर्थपर्युदस्यतां।ज्योतिष्टोमेश्रूयतेदीक्षितोनददातिनजुहोतिनपचतीतितत्रयद्दाना
दिकंपुरुषार्थंयच्चक्रत्वर्थंतत्रापुपदिष्टमितिदिष्टंचतत्सर्वंप्रतिषिध्यतेकुतःनददातीत्यादिवचनस्यसामान्यरूपत्वादित्याद्यःपक्षः।उपदिष्टस्या
पिवप्रतिषेधेसत्युपदेशोव्यर्थःस्यादितिततोतिदिष्टंपुरुषार्थंचेत्येतदुभयमेवप्रतिषिध्यतेक्रत्वर्थत्वेनोपदिष्टदानादिकमनुष्ठेयमितिमध्यमः
पक्षः।नित्याग्निहोत्रदानादिकंपुरुषार्थत्वेनयत्प्रत्यक्षश्रुतावुपदिष्टंसज्योतिष्टोमकालेपिप्राप्तंयच्चातिदिष्टंदानादिकंतयोरुभयोर्मध्येप्रत्य
क्षोपदिष्टनिषेधस्योपदिष्टमेवसंनिहितमितिपुमर्थस्यैवात्रनिषेधः।नचनित्याग्निहोत्रदानादौविधिनिषेधयोःप्रवृत्याविकल्पःशंकनीयःभिन्न
विषयत्वात्क्रत्वर्थोनिषेधः।क्रतुकालेतदनुष्ठानंवारयतिपुरुषार्थस्तुविधिःकालांतरेतदनुष्ठापयतितस्मात्पुमर्थस्यनिषेधः।यदिप्रतिषेधपक्षे
वाक्यभेदःशंक्येततर्हिपुमर्थदानादिव्यतिरिक्तंक्रतुकालेनुष्ठेयमितिपर्युदासोस्तु॥ ॥अष्टमाधिकरणमारचयति॥ ॥विकल्पितोबाध्यतेवा
हवनीयःपदादिभिः।सामान्यस्यविशेषेणप्रत्यक्षोक्तित्वसाम्यतः।लिंगचोदकवद्बाधोनास्तितेनविकल्पितः।विशेषार्थेलक्षणास्यादतोमुख्योनबा
ध्यते।अनारभ्यश्रूयतेयदाहवनीयेजुहोतितेनसोस्याभीष्टःप्रीतइतिज्योतिष्टोमेश्रूयतेपदेजुहोतिवर्त्मनिजुहोतीति।राजसूयेश्रूयतेवल्मीकव श्री:
पामुत्खन्यजुहोतीतितथान्यत्रश्रूयतेगार्हपत्येपत्नीसंयाजान्जुहोतीतितत्रानारभ्यवादेहोमसामान्यमनूद्याहवनयोविहितःप्रकरणनिमित्तैः
पदादिवाक्यैस्तदनुबद्धाविशिष्टाहोमाविहिताःगार्हपत्यवाक्येनहोमविशेषमनूद्यगार्हपत्योविहितःतत्रपदादिहोमेषुसामान्यशास्त्रेणप्राप्तआ
हवनीयोविशेषशास्त्रप्राप्तैःपदादिभिःसहविकल्प्यतेकुतःउभयोःप्रत्यक्षवचनयोःक्रत्वर्थत्वेनसमबलत्वात्नह्यत्रगार्हपत्यमुपतिष्ठ
तइत्यत्रयथाश्रुत्यालिंगंबाध्यते।यथावाचोदकातिदिष्टानांकुशानामुपदिष्टैःशरैर्बाधःतथासामान्यस्यविशेषेणबाधोस्त्वितिचेत्।नैव

यस्मात्।लिंगंविलंबितत्वाद्दुर्बलंचोदकश्चानुमेयत्वाद्दुर्बलः।नत्वेवंसामान्यशास्त्रंविलंब्यतेनाप्यनुपमीयतेअतोदौर्बल्याभावाद्विकल्प्यइतिप्रा
प्तेब्रूमः।होमसामान्यस्यानुवादकंयत्शास्त्रंतत्सामान्येमुख्यत्वाद्धोमविशेषानुवादेलाक्षणिकतयादुर्बलंविशेषशास्त्रंतुव्याहत्याविधायकत्वा
त्प्रबलं।नचपदादिशास्त्रमपिहोमसामान्यमेवानूद्यपदादिविधायकत्वेनसमानबलंस्यादितिशंकनीयंप्रकरणनियमितत्वेनविशिष्टविधाय
कस्यसामान्यानुवादायोगात्।तस्मात्प्रबलेनविशिष्टेनसामान्यंबाध्यते॥ ॥नवमाधिकरणमारचयति॥ ॥सामिधेनीसाप्तदश्यंवैमृधादावपू
र्वगीः।संस्तुतिर्वोपकारस्यक्लृप्त्याद्योस्त्वाज्यभागवत्॥सामिधेन्यःश्चोदकाप्ताःसाप्तदश्यंतुवैमृधे।पुनर्वाक्येनसंहार्यमनारभ्योक्तिचोदितं।
अनारभ्यकिंचिदाम्नायतेसप्तदशसामिधेनीरनुब्रूयादितितथावैमृधेध्वरकाल्यायांपशौचातुर्मास्येषुमित्रविंदायामाग्रयणेष्यादौचपु
नःसाप्तदश्यंविहितंयद्यप्यनारभ्याधीतानांप्रकृतिगामित्वंन्याय्यंतथापिप्रकृतेनपंचदश्येनावरुद्धत्वाद्विकृतिषुचतन्निविशतेतथासतिवैमृ
धादिषुविकृतिष्वनारभ्यवादप्राप्ताःसप्तदशसामिधेन्यःप्राकरणिकेनविधिनापुनर्विधीयमानाग्रहमेधीयाज्यभागवत्कृतोपकारत्वेनेति
कर्तव्यताकांक्षांपूरयंत्यश्चोदकलोपमंत्योवैमृधादरपूर्वकर्मतांगमयतिसाप्तदश्यंत्वनारभ्यवादप्राप्तमनूद्यतइतिप्राप्तेब्रूमः।वैमृधादिषुसा
मिधेन्यआज्यभागवन्नविधीयंतेकिंतुचोदकप्राप्ताप्तास्ताअनूद्यसाप्तदश्यंविधीयतेतच्चसाप्तदश्यंवैमृधादिप्रकरणेष्वाम्नातैर्विधिभिःकास्मि
चिदेवविकृतिषुप्राप्तमनारभ्यवादेनतुसर्वास्तुविकृतिषुतत्रानारभ्यवचोविलंब्यतेप्रथमंविधेयस्यसाप्तदश्यस्यसामिधेनीसंबं
धमवबोध्यान्यथानुपपत्त्याक्रतुप्रवेशंपरिकल्प्यप्रकृतौपंचदश्यपराहतत्वेनविकृतिषुसर्वासुनिवेशःक्रियतइतिविलंबःप्राकरणिके
विधिभिःसामिधेनीसंबंधएवबोधनीयः।क्रतौतद्विशेषेचप्रवेशोनकल्पनीयःप्रत्यक्षप्रकरपाठेनैवतत्सिद्धेः।तत्रसाप्तदश्यस्यवैमृ
धादिविकृतिविशेषसंबंधेसहसाप्रतिपन्नेसंपन्नेसतितद्विरोधात्सर्वविकृतिसंबंधोनकल्पयितुंशक्यःअनारभ्यवादस्तुवैमृधादिषुप्राप्त
स्तनित्यानुवादोस्तु।यद्वाप्राकरणिकविधिर्वैमृधादिषुसाप्तदश्यप्रापकःअनारभ्यवादस्तुप्राप्तस्यपांचदश्यस्यबाधकःसर्वथापित्वलु
र्धिकरणवदुपसंहारवचनत्वाभाज्यभागवदपूर्वकर्म॥ ॥दशमाधिकरणमारचयति॥ ॥स्वाहेत्युक्तिर्दर्विहोमेसंहारस्यान्नवाग्रिमः।
पूर्वन्यायान्नतन्मंत्रेस्वाहाकारविधित्वतः।विधित्वेपिनियम्यस्यान्नव्यत्यासवषट्कृतां।होमांतरेवषट्कारस्वाहाकारविकल्पनं।अनार
भ्यश्रूयतेवषट्कारेणस्वाहाकारेणवादेवेभ्योन्नंप्रदीयतइतिदर्विहोमविशेषेश्रूयतेपृथिव्यैस्वाहाअंतरिक्षायस्वाहेत्यादितत्रपूर्वाधि
करणेयथानारभ्यविहितस्यसाप्तदश्यस्यप्राकरणिकविधिनोपसंहारःतथोपसंहारेसतिहोमांतरेषुनास्तिस्वाहाकारइतिप्राप्तेब्रूमः
पृथिव्यैस्वाहेतिमंत्रपाठो।यंनतत्रस्वाहाकारोनारभ्याधीतब्राह्मणवाक्येनैवविधीयतेनखलुयमादित्याअंशुमाप्याययंतीत्यादियाज्या

319/1945

अ॰ क॰ मा॰ मंत्रगता आदित्यादिशब्दाः कस्यचिदर्थस्य विधायका दृष्टाः यथा सिद्धार्थवाची आदित्यशब्दो न विधीयते यथा वा क्रिया। वाचित्वेपि वर्तमानार्थआ
प्याययंतीति शब्दो न विधायकस्तथा दैविकहविर्विषयोदत्तमित्यस्मिन्नर्थे वर्तमानः स्वाहाशब्दो नोच्चारणं विदधाति तथा सत्युपसंहारोपसंहा
राञ्अन्याहुतिब्राह्मणोक्तन्यायेन स्वाहा पृथिव्या इत्यपि पाठः प्राप्नोति तत्र पृथिव्यै स्वाहेत्येव पठेदिति नियम्यते। अर्थाद्धत्वा सोनि वर्त्यते तस्माद्
१६९ विधित्वयोरुपसंहाराभावेन होमांतरेष्वनारभ्य विहितो वषट्कारस्वाहाकारयोर्विकल्पः स्थितो भवति॥ ॥एकादशाधिकरणमारचयति॥ ॥
नातिदेशोतिदेशो वा वह्न्यातिग्राह्ययोर्न सः। विकृतौ पुनरुक्तत्वादेषोंगांतरवद्भवेत्। प्रकृतेर्विकृतीनां च साम्याय स्यात्तु नर्व चः। साम्ये च गुणका
मानां प्रवृत्तिः प्रकृताविव। इदं श्रूयते। य एवं विद्वानग्निं चिनुत इति उपस्तंभनं वा एतद्यज्ञस्य यदतिग्राह्या इत्यतिग्राह्यसंज्ञिका ग्रहा यज्ञस्यो
पष्टंभकत्वादनुष्ठेया इत्यर्थः अत्र चीयमानस्याग्नेरिति ग्राह्यमाणानां च विकृतिष्वतिदेशो वास्ति कुतः पुनरुक्तिवैयर्थ्यप्रसंगात् विकृतौह्येवं पुन
रुच्यते। अथातोग्निमग्निष्टोमेनानुयजति तमुक्थ्येन तमतिरात्रेण तं द्विरात्रेणेत्यादि अयमर्थः इष्टकाचितमग्निमनु तस्मिंश्चितेग्नावग्निष्टो
माद्यनुष्ठानमिति तत्राग्निष्टोमः प्रकृतिरुक्थ्यादयो विकृतयः यदि विकृतिषु चोदकश्चित्यमग्निमतिदिशेत् तदानीमुक्थ्यादिषु चोदकादेव
तत्प्राप्तः पुनर्विधानमनर्थकं स्यात् अतिग्राह्याश्च विकृतिषु पुनर्विधीयंते। पृष्ठ्ये गृह्णीयात्। उक्थ्ये गृह्णीयात्। तस्मात्पुनर्विधानार्थवत्त्वा
य विकृतावग्न्यतिग्राह्यातिदेशो नास्तीति प्राप्ते ब्रूमः ऐंद्रवायवग्रहादीनामंगांतराणामुक्थ्यादिविकृतिषु यथातिदेशोभ्युपगतस्तथाग्नि
चयनस्यातिग्राह्याणां चातिदेशः स्यात्। न ह्यत्र खंडशः सकलप्रवर्तकश्चोदकः कानिचिदंगान्यतिदिश्येतराण्युपेक्षत इत्युक्तम्। अतिदेशप्राप्ता
नामपि पुनर्विधानं प्रकृतिसाम्यार्थं। यथा प्रकृतावग्न्यतिग्राह्ययोः प्रत्यक्षविधिस्तथा विकृतिष्वपीति तत्साम्यं न च साम्ये प्रयोजनाभावः।
गुणकामप्रवृत्तेस्तत्प्रयोजनत्वात् श्येनचितं चिन्वीत स्वर्गकाम इत्यादि श्येनाकारादिगुणफलभूतस्वर्गादिकामाः श्रुताः ते चोपदिष्टमा
श्रयमपेक्षंते। तस्माद्यथा तोग्निमिति वाक्येन प्रकृतावग्निष्टोमे कांश्चिदुक्थ्यादिविकृतिष्वग्निचयनलक्षण आश्रय उपदिश्यते।
अन्यास्तु वाजपेयादिविकृतिष्वपदिष्टस्याश्रयस्याभावादतिदिष्टस्य वानाश्रयत्वाद्गुणकामानां नास्ति प्रवृत्तिः तस्मात्पुनर्विधानवै
यर्थ्याभावादस्त्यतिदेशः॥ ॥द्वादशाधिकरणमारचयति॥ ॥चतुर्द्विर्वा पुरोडाशे वदानं होमतोक्तिनः। चतुर्मैवं सहाज्येन तस्य स्या
त्रानुवादतः। दर्शपूर्णमासयोराम्नायते चतुरवत्तं जुहोतीति तत्र किं पुरोडाशद्रव्यगतस्यावदानस्य चतुःसंख्या किं वा तत्र द्विसंख्या चतुष्टं
उपस्तरणाभिघारणार्थाभ्यामाज्यावदानाभ्यां सह संपद्यत इति संशयः। तत्र चतुरवत्तस्य द्वितीयाविभक्त्या होमकर्मत्वमुच्यते। न चो
पस्तरणाद्यर्थस्याज्यस्य होमत्वमस्ति तस्मात्पुरोडाशावदानस्यैव चतुर्धात्वमिति प्राप्ते ब्रूमः। न तावदत्र होमानुवादेन चतुरवत्तत्वं विधी

यते होमस्याप्राप्तत्वात्। नापि विशिष्टविधिः गौरवप्रसंगात् होममात्रे विधाने चतुरवत्तत्वं तु वाघ्नं तथा ज्येन्य सहितस्यैव युक्तं द्विर्हविषो व
द्यतीति विधिना पुरोडाशावदाने हित्वं स्यैव प्राप्तत्वात् तस्मात्पुरोडाशे द्विरवदानं॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥उपांशुयाजे किं
न स्यादवदानचतुष्टयं। स्याद्वाना स्वरूपसंहारान्नान्यत्क्लृप्तिर्वाक्यतोस्ति तत्। दर्शपूर्णमासयोः श्रुतं चतुरवत्तं नोपांशुयाजे। कुतः सामस्त्येव
उपसंहारात्। यथा सामस्त्यमनारभ्याधीतं परिगणितास्तु मित्रविंदादिविकृतिषु पुनः श्रूयमाणं तास्वेवोपसंहृतं एवमिहोपस्तरणाभि
घारणोपेते हविनिश्रूयमाणं तत्रैवोपसंहर्तव्यं। तथा च पुरोडाशसान्नाय्ययोस्तत्पर्यवस्यति। उपांशुयाजस्य तूपस्तरणादिराहित्यान्ना
स्ति चतुरवत्तमिति प्राप्ते ब्रूमः। योयमुपसंहारस्त्वनोदाहृतो वक्ता विधिः सोनुवाद इति पूर्वत्रोक्तं अत उपसंहारो न शंकितुं शक्यः मा भूदुपसं
हारस्तथाप्युपांशुयाजे चतुरवत्तं कथं सिध्यतीति चेत्। चतुरवत्तं जुहोतीति वाक्यादिति ब्रूमः। तस्मादस्त्युपांशुयाजे चतुरवत्तं॥ ॥चतुर्दशा
धिकरणमारचयति॥ ॥सप्त पक्षाः पुरोडाशाभ्यामेवेत्यधिकारिणः। शेषस्यात्र स्तुते मैवं कात्स्न्यैनित्यबाधनात्। कर्मांतरविधिर्मैवं प्र
त्यभिज्ञैवकारतः। णिजर्थस्याविधिर्वमैमा फल्यात्स्वार्थवर्जनात्। कालस्यास्तु विधिर्मैवं लक्षणायाः प्रसंगतः। ऐंद्राग्नेकविधिर्मैवं
वेषम्याच्चैवकारतः। कालो लाक्षणिकोप्यस्तु सार्थता चेति चेन्न तत्। स्तुत्यादिविध्येकवाक्यत्वात्सार्थत्वाच्चानुवादता। दर्शपूर्णमासयो
रिदमाम्नायते पुरोडाशाभ्यामेवासोमयाजिनं याजयेद्यावेतावाग्नेयश्चैंद्राग्नश्चेति तत्र षट् पक्षान् क्रमेणोपन्यस्य पूर्वं निरस्य सप्तम
वस्थापयति। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र योधिकारी श्रुतस्तस्यायं शेषः स्यात् कुतः तच्छ्रुतेः पुरोडाशसाधकस्य यागस्य यः
कर्ताधिकारवाक्ये श्रूयते स एवात्रासोमयाजिशब्देन विशेष्यत इति आद्यः पक्षः नैष युक्तः कात्स्न्यैनित्यत्वयोर्बाधप्रसंगात् त
था हि पुरोडाशाभ्यामेवेत्येवकारेण सान्नाय्योपांशुयाजयोर्व्यवच्छेदः तथा पुरोडाशद्वयस्याग्नेयस्यैंद्राग्नस्य चेति विशेषितत्वादग्नीषो
मीयस्यापि व्यवच्छेदः ततः कात्स्न्यं बाध्येत तथा सोमयाजिनमेवेत्यन्वयः तदानीं सोमयागादूर्ध्वं दर्शपूर्णमासव्यवच्छेदात् यावज्जीवादि
वाक्यप्राप्तं नित्यत्वं बाध्येत तस्माद्दर्शपूर्णमासाभ्यामन्य आग्नेयैंद्राग्नकर्मणी विधीयेते इति द्वितीयः पक्षः। यावेताविति प्र
सिद्ध्यानुवादेन दर्शपूर्णमासाभ्यामेव प्रत्यभिज्ञायेते पुरोडाशाभ्यामेवेत्येवकारश्च कर्मांतरपक्षेनर्थः स्यात्। तस्मात्प्रसिद्धकर्मा
नुवादेन याजयेदित्येषा णिजर्थः स्वार्थत्वं प्रति विधीयते एवकारस्य प्रयोजनं सान्नाय्यादि निरस्तमिति तृतीयः पक्षः सोप्यनुपप
न्नः। ऋत्विगामिफलस्य कस्याप्यश्रवणात्। न च विश्वजिन्न्यायेन कल्पयितुं शक्यं परार्थकर्मणि प्रवृत्तस्यार्थप्राप्तेरेवासंभवा
त् तस्मात्कालविधिरस्तु। सोमयागात्प्राचीने काले पुरोडाशाभ्यामेव याजयेत् न तु सान्नाय्येन सोयं चतुर्थः पक्षः एषोप्ययुक्तः

321/1945

अ०५०२०मा०

असोमयाजिशब्दस्य कालेलक्षणावृत्तिप्रसंगात् । तस्मादैंद्राग्नस्यैकस्य पौर्णमास्यामप्राप्तत्वेन विधिरस्तु । आग्नेयस्तु पौर्णमास्याममावास्यायां निप्रप्रा
प्तत्वादनूद्यत इति पंचमः पक्षः । सोप्ययुक्तः । सकृत्प्रयुक्तस्यैकस्य लिङ्प्रत्ययस्य विधित्वमनुवादत्वं चेति वैषम्यप्रसंगात् । एवकारश्चाऽनर्थः । तस्माद
गत्यालाक्षणिकमभ्युपेत्यापि कालस्यैव विधिरस्तु । तथाहि असोमयाजिनः सान्नाय्येतावत्प्रतिप्रसवः श्रूयते तदुभयमेव समनयेदिति यदा सोमयागो
नास्ति तदापि सं नयेदेवेत्यर्थः । तथासति सोमयाज्यसोमयाजिनोरुभयोरप्यमावास्यायां सान्नाय्यमैंद्राग्नपुरोडाशेन सह भिन्नविषयाभावाद्विकल्प्य
ति । सोयं विकल्पितः पुरोडाशः सोमयागात्प्रागेव पश्चात्तु सान्नाय्यमेवेत्यभिप्रेत्य कालो विधीयते तथासत्येतद्वाक्यं सार्थकं नान्यथेति षष्ठः पक्षः सोप्ययु
क्तः सान्नाय्येन तु सोमयाजिनाभिलक्ष्यस्य विधेस्तावकत्वे सत्येकवाक्यत्वलाभात्सार्थकत्वं चैवं सति भविष्यति तस्मादनुवादोयमिति सप्तमः पक्षः सम्यक्
पंचदशाधिकरणमारचयति ॥ ॥उपांशुयाजे यत्किंचिद्द्रव्ययाज्यमुताज्यमिमः । विशेषानुक्तितो मैवं ध्रौवाज्यस्य विधानतः ॥उपांशुयाजमंतराय
जतीत्यत्र द्रव्यविशेषस्यानुक्तत्वादैच्छिकं द्रव्यमिति चेन्मैवं । आज्यस्य श्रुतत्वात् । तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्निति
हिश्रुतं । नन्वेवमप्यनियतं किंचिदाज्यं स्यादिति शंकनीयं ध्रौवस्य विहितत्वात् । सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति विहितं विध्यश्र
वणेपि ध्रौवाज्यस्य सप्रयोजनत्वाय विपरिणामः कर्तव्यः ॥ ॥षोडशाधिकरणमारचयति ॥ ॥नेत्रयः कोपि देवस्तांत्रिको वाग्निमोभ
वेत् । अविशेषात्प्रकरणात्तांत्रिकोत्र नियम्यते । तत्रोपांशुयाजे का काचिद्देवता स्यात् । विष्णुरुपांशु यष्टव्य इत्यादेरर्थवादत्वेनाविधायकत्वात्
अन्यस्य देवताविधेरदर्शनात् । यागेन देवतामात्रस्यैव कल्पनाच्च मैवं । तत्रोपांशुयाजस्य दर्शपूर्णमासप्रकरणपठितत्वाद्दर्शपूर्णमासतंत्रम
ध्यपठित एव कश्चिद्देवः प्रत्यासत्त्योपांशुयाजे नियम्यते ॥ ॥सप्तदशाधिकरणमारचयति ॥ ॥कोपि देवस्तांत्रिकेषु नियतो वा न दापिकि
प्रजापतिरुताग्नस्यादग्नीषोमावुताथवा । विष्णुर्यद्वाग्निमुख्योन्य विकल्प्यं देवतात्रयं । कोप्यत्रानियमान्नैव मुपांशुत्वादियंत्रणात् । प्रजापति
रुपांशुत्वान्नतद्दृष्टीभावयोगतः । अग्निमुख्यतत्तोनैव तथाज्यादेरपाठतः । अग्नीषोमौ तदुक्तेनौ तत्राकालविधानतः । विष्णुर्याज्यादितस्तं न
प्राजापत्योक्तिबाधनात् । याज्यात्रैविध्यतः प्राप्ता विकल्प्यं तेत्र देवताः । विधिशेषार्थवादेपि प्राप्तं त्रयमनूद्यते । तांत्रिकदेवेषु नियामकाभा
वाद्यः कोपीति चेन्न । वक्ष्यमाणानामुपांशुत्वादीनां नियामकत्वात् । यत्किंचित्प्राजापत्यं यज्ञे क्रियत उपांश्वेव तत्क्रियत इति वचनादुपांशु
धर्मत्वसाम्येन प्रजापतिर्देवतेति चेत् । प्रजापतिं मनसाध्यायेदिति विधेस्तूष्णींभावस्यैव प्रजापतिधर्मत्वात् । प्रथमयागदेवतत्वेन मु
ख्यत्वादग्निर्देवतेति चेत् । उपांशुयाजक्रमेग्निविषयाया याज्यपाठात् । तावब्रूतामित्यादि पूर्वोदाहृतवाक्यादग्नीषोमौ देवतेति चेत् । न त
स्य वाक्यस्य पौर्णमासीकालविधायकत्वात् । कस्यांचिच्छाखायामुपांशुयाजक्रमेण वैष्णवयाज्यापुरोनुवाक्ययोः पाठाद्विष्णुर्देवते
ति चेत् । न तथा सति शाखांतरप्रोक्तयोः प्राजापत्ययोर्याज्यापुरोनुवाक्ययोर्बाधः प्रसज्येत तस्मान्नानाशाखासु पठिताभ्यां विष्णुप्राजाप

त्याग्नीषोमविषयाज्यापुरोनुवाक्याभ्यां प्राप्तास्तिस्रो देवता विकल्प्यंते । अत एवोपांशुयाजविधिशेषेर्थवादे ह्येतदेव प्राप्तं देवतात्रयमनूद्यते
विष्णुरुपांशु यष्टव्यो जामित्वाय प्रजापतिरुपांशु यष्टव्यो जामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वायेति तस्माद्देवताविकल्पः सिद्धांतः ॥
अष्टादशाधिकरणमारचयति ॥ ॥दर्शादर्वाग्गस्य कालो दर्श एवान्य एव वा । द्विपुरोडाशसांनिध्यादाद्ये दर्शेग्नितीयतः । विष्णुर्याज्योक्तितो युक्तो
मध्यमः पूर्णमाविधेः । स एककालो याज्याया उत्कर्षे पूर्णिमादिने । जामि वा एतद्यज्ञे क्रियते यदन्वंचौ पुरोडाशावुपांशुयाजमंतरा यजत्य
जामित्वायेति । पुरोडाशयोर्मध्ये स यागो विहितः पुरोडाशौ च पौर्णमास्यामाग्नेयाग्नीषोमीयौ अमावास्यायामाग्नेयैंद्राग्नौ ततो द्विपुरोडा
शसंनिधेः समानत्वाद्दर्शपूर्णिमा च उभयमुपांशुयाजस्य काल इत्याद्यः पक्षः अमावास्यायां प्रकृत्य याज्याकांडे आग्नेययाज्या अध
स्ताद्वैष्णवयाज्यायाः पाठात् । प्रकरणस्यासंनिधितः प्रबलत्वाद्दर्श एव काल इति मध्यमः पक्षः तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु
पौर्णमास्यां यजन्निति पौर्णमास्यास्तत्कालत्वेन विधानाद्वाचनिकस्य विधेः प्रबलत्वात्पौर्णमास्येव कालः तथासति वैष्णवयाज्याप्रक
रणादुत्कृष्यतां ॥ ॥एकोनविंशाधिकरणमारचयति ॥ ॥पुरोडाशैक्ययुक्तायां पौर्णमास्यामयं नहि । स्याद्वा नास्त्यंतरोक्तेः केलक्षका
ले स्त्विशंखवत् । सोमात्प्रागग्नीषोमीयपुरोडाशरहिता केवलाग्नेयपुरोडाशयुक्ता पौर्णमासी भवति स सोमेनेष्ट्वाग्नीषोमीयो भवतीति वा
क्येनाग्नीषोमयाः सोमयागोत्तरकालीनत्वावगमात् तस्यामुपांशुयाजो नास्ति कुतः उपांशुयाजमंतरायजतीति पुरोडाशद्वयांतरालवर्त
स्य गुणत्वेन विधानादिति प्राप्ते ब्रूमः । किं पुरोडाशावंतरालकालस्य विशेषणभूतौ उतोपलक्षणभूतौ नाद्यः अंतरालकालवत्तद्विशेषणयोः
पुरोडाशयोरुपांशुयाजगुणत्वप्रसंगात् । नन्वेतदस्तु उपांशुयाजवत्तयोरपि स्वातंत्र्येणैव फलान्वयात् द्वितीये तु शंखन्यायेनोपलक्षकस्याग्नी
ग्नीषोमीयपुरोडाशस्याभावमुपलक्षिते काले यागोस्ति यथा शंखध्वनिवेलायां राजसेवा प्रतिदिनमागंतव्यं इत्युक्ते कस्मिंश्चिद्दिने तं शंखं
धमतः पुरुषस्याभावेनोपलक्षकस्य ध्वनेरभावेप्युपलक्षिते तस्मिन्काले सेवकः समागच्छति तथात्रापि तद्द्रव्यं यदि तत्र कालोपलक्षकमन्य
देवव्यापारसूर्यगत्यादिकं संभाव्येत तर्हि अत्रापि संभवत्येवाग्नेयपुरोडाश उपलक्षकः तस्मादेव पुरोडाशायामपि पौर्णमास्यामस्त्युपांशुयाजः
॥इति माधवीये जैमिनिन्यायमालाविस्तरे दशमस्याध्यायस्याष्टमः पादः ॥ ॥समाप्तश्चाध्यायः ॥ ॥बाधाबाधविचारेण प्रयोगेस्मिनि
श्चिते सति । प्रयोगस्य विचारोथ तंत्ररूपो विचार्यते ॥ अनेन दशमैकादशयोरध्याययोः पूर्वोत्तरभाव उपपादितः ॥ ॥एकादशाध्याय
स्य प्रथमपादे प्रथमाधिकरणमारचयति ॥ ॥षड्यागानां फलं स्वर्गः प्रत्येकं तंत्रतोथवा । अद्यः पृथक्फलार्थित्वान्न संघस्य फलोक्तितः ॥

श्रीः

323
1945

अ॰ र॰ मा॰

१६८

दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रुतं फलमाग्नेयादिभिः षड्भिर्यागैः प्रत्येकमभिसंबध्यते। कुतः पृथगुत्पन्नत्वेन तथा परस्परनिरपेक्षाणां पृथ
गेव फलाकांक्षितत्वादिति चेत्। न तत्समूहवाचिना दर्शपूर्णमासशब्देन व्यवहृत्य संघस्यैव फलसंबंधबोधनात्। तस्मात्स्वर्गः तेषां फलं तंत्रेण तन्यते
विस्तार्यते बहूनामुपकारो येन सकृत्प्रवर्तितेन तादृशं तंत्रं तद्यथा बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपः तेषामुपकरोति न त्वनुलोपज भोजनादिवत्
प्रतिपुरुषमावृत्तमावापमपेक्षते एवं स्वर्गस्य तंत्रेण फलं॥ ॥द्वितीयाधिकरणमारचयति॥ ॥कार्यभेदेन वांगानां सौर्यचित्रादिवद्विराकर
णे व्यासंदेह कत्वं द्वारभेदो बहुत्वतः। यानि प्रयाजाज्यभागाद्यंगानि तेषां सर्वेषां करणं प्रत्युपकारभेदः स्यात् कुतः कार्यभेददर्शनात् यथा सौर्यं चरुं नि
र्वपेद्ब्रह्मवर्चसकामः श्चित्रया यजेत पशुकाम इत्यादिषु परस्परनैरपेक्ष्येण विहितानां सौर्यादीनां ब्रह्मवर्चसादिकार्यभेदस्तथा प्रयाजाज्यभागा
न्याजादीनां परस्परनिरपेक्षाणां करणोपकारा विद्यंते न चात्र पूर्वन्यायेन संघोपकारगमकं किंचिदस्तीति प्राप्ते ब्रूमः। करणाकांक्षानुसारिण
ध्यंगोपकारः कल्पनीयः करणं चस्वयमेवं सत्स्वस्य शक्त्युद्बोधनलक्षणमेकमेवोपकारमंगकलापमपेक्षते अंगबहुत्वं तु द्वारकार्यभेदेनोपपद्य
ते यथा तंडुलकाष्ठस्थाल्यादीनां कारकाणां द्वारभेदएवौदननिष्पादनलक्षणप्रधानकार्यमेकमेव तद्वदत्र द्वारभेदेऽप्युपकार एकः॥ ॥तृतीयाधि
करणमारचयति॥ ॥उपकारः स एकेन कैश्चिद्वा निखिलैरुत। आकांक्षापूरणादाद्यः फलाधिक्याय मध्यमः। कपोतवद्यौगपद्ये त्यागहोतोरभाव
तः। संभूय करणाकांक्षां पूरयंत्युपकारतः। योयं करणं प्रत्येक उपकारः पूर्वं निर्णीतः स एकेनांगेन सिध्यति करणस्यांगाकांक्षाया स्तावताप्रीत
त्वात्। यथा ग्रामगतैः सर्वैः कर्तव्यं करदानमेव राजकुले समागतः करोति कराकांक्षा च तावता राज्ञो निवर्तते। तथात्रापि दृष्टव्यं यद्येतदंतगमनु
ष्ठेयमिति विशेषनियामकं न स्यात् तर्हि विकल्पोस्त्वित्याद्यः पक्षः यथा यावंति कार्माणि सौर्यचित्रादीन्यनुतिष्ठति तावत्फलं प्राप्नोति तथांग
भूयस्त्वेन फलभूयस्त्वसंभवादिच्छया कानिचिदंगान्यनुष्ठेयानि तेष्वातिशयवानेकः करणोपकारो जायत इति मध्यमः पक्षः यथा खलेवी
जभक्षणाय कपोतपंक्तिर्युगपत्पतति तथा करणाकांक्षां पूरयितुसमर्थानि सर्वाण्यंगान्येकप्रयोगवचनपरिगृहीतत्वात् युगपत्प्राप्तानि ते
षु केषांचिपरित्यागे हेतुर्नास्ति तस्मात्सर्वाण्यंगानि संभूयैकस्योपकारस्य जननेन करणाकांक्षां पूरयंतीति सिद्धांतः। वार्तिककारो त्वपूर्वाधि
करणस्यैवैयर्थ्यं मन्यमानोस्मिन्नेवाधिकरणेंतर्भावयामास॥ ॥चतुर्थाधिकरणमारचयति॥ ॥काम्यकर्मप्रयोगः किं सकृदेवासकृ
द्वा। फलसिद्धेरादिमो यो भूयस्त्वेच्छानुसारतः। चित्रादिकाम्यकर्म सकृदेव प्रयोक्तव्यं तावतैव पश्वादिफलस्य सिद्धेर्यथा प्रयाजाद्यंगस
कृदेवानुष्ठीयते तद्वदिति प्राप्ते ब्रूमः। विषमो दृष्टांतः करणस्यांगेषु सकृदेवाकांक्षा इह तु पुरुषः स्वर्गपश्वादीन्भूयोभूयः कामयते अ
तः स्तदनुसारेण प्रयोगावृत्तिः॥ ॥पंचमाधिकरणमारचयति॥ ॥अवघातः सकृद्भूयो वा सकृद्विधिसिद्धितः। दृष्टा तंडुलनिष्पत्ति

श्रीः

स्तदंतोभ्यस्यतामयं। व्रीहीनवहंतीत्यसकृन्मुसलपातमात्रेण विधिप्रयुक्तस्य अपूर्वस्य सिद्धेर्नाभ्यास आवृत्तिरिति चेत् मैवं तंडुलनिष्पत्तेर्दृष्टप्र
योजनत्वेन तत्पर्यंतस्याभ्यासस्याकृतस्यापि कल्पनीयत्वात्। एवं तंडुलपेषणादावपि द्रष्टव्यं॥ ॥षष्ठाधिकरणमारचयति॥ ॥सर्वौषधावघा
तः किमावर्त्यः सकृदेव वा। आवर्त्यः पूर्ववन्नैवं दृष्टार्थस्यानिवर्तनात्। अग्निप्रकरणे श्रूयते। औदुंबरमूलूखलं सर्वौषधस्य पूरयित्वावहंति द्रु
त्य थेन दुपदधातीति। अत्रादृष्टमात्रप्रयोजनत्वात्सकृदेवावघातः॥ ॥सप्तमाधिकरणमारचयति॥ ॥अंगेभ्यासो न वा भूम्ना भ्यासो नांगे
पृथक्फलं। अंगावृत्त्यैव भूमान प्रयोगेंगं सकृद्भवेत्। एकस्मिन्यागे प्रयाजाद्यंगं फलभूमार्थिना भ्यसनीयं कारीर्यादेः काम्यस्य कर्मणोभ्यासेन
फलभूयस्त्वदर्शनादिति चेत् मैवं अंगोपकृतस्य प्रधानस्यैव फलं न ततोतिरिक्तस्य कस्यचिदभावात् यदि फलभूमानमर्थयेत् तदा सांगं प्रधानमा
वर्तनीयं न त्वंगमात्रावृत्या तत्सिध्यति ननूपकारमंगस्त्वमंगीकृत्य लक्षणं फलभूयस्त्वे पर्यवस्यति यथा सस्यादिषु कर्षणाद्यावृत्तिकृतो भूयानु
पकारः फलं वर्धयति तद्वदिति चेत् न तत्र दृष्टत्वात् इह त्वदृष्ट उपकारः शास्त्रादेवबोधव्यः न त्वत्र शास्त्रं उपकारभूयस्त्वायांगावृत्तिं कचित्ब्रू
ते तस्मादेकस्मिन्प्रयोगे सकृदेव प्रयाजाद्यंगानुष्ठानं॥ ॥अष्टमाधिकरणमारचयति॥ ॥कपिंजलेषु त्रित्वाद्या एच्छिका स्त्रित्वमेव वा। आद्यो
बहुत्वसाम्यान्नो त्रित्वेनैव कृतत्वतः। अश्वमेधे वसंताय कपिंजलानालभेत इत्यत्र त्रित्वचतुष्ट्वादिसंख्यानां सर्वासां बहुत्वसाम्यादिच्छया का
चिद्बहुत्वसंख्या स्वीकार्येति चेत्। न त्रित्वेनैव शास्त्रार्थस्य कृतत्वात्। यो हि चतुष्ट्वादिसंख्यामुपादत्ते तेनापि तदंतर्भूतं त्रित्वं वर्जयितुमश
क्यं त्रित्वमुपाददानेन त्वनंतर्भूतं चतुष्ट्वादिकं वर्जयितुं शक्यते। तेनावश्यंभावित्वेन प्रथमभावित्वेन लाघवेन च त्रित्व उपात्ते शास्त्रार्थसिद्धौ ततोधि
कपालिहिंसायां प्रत्यवायात्। तस्मात्रित्वमेवोपादेयं॥ ॥नवमाधिकरणमारचयति॥ ॥उत्तरास्तिस्र एवस्युर्यावत्त्वं वात्र पूर्ववत्। तिस्र
एव हविःकार्त्स्न्यापूर्वयोर्विधितोंतिमः। सान्नाय्ये दोहं प्रत्ययं श्रूयते वाग्यतः तिस्रो दोहयित्वा विसृष्टवाग् अन्वारभ्य तूष्णीमुत्तरा दोहयतीति
तत्रा तिस्रभ्य उत्तरा गावो यजमानस्य यावत्यः संति तासां मध्ये कपिंजलन्यायेन उत्तरा स्तिस्र एव गावो दोहनीया इति प्राप्ते ब्रूमः। नास्ये
तां रात्रिं पयसाग्निहोत्रं जुहुयात् कुमाराश्च न पयो लभेरन्निति वाक्येन विद्यमानस्य पयसो हविष्ट्वं धीयते तेन चात्र कुमाराणां पयो निषः प्र
तथा सति दृष्टार्थत्वपरित्यागेनादृष्टार्थत्वं कल्प्येत कुमाराश्च नेत्ययं चकारो ब्राह्मणापिशब्दार्थवाची प्रयुज्यमानः तदा व्यर्थः स्यात्। किं च बहु
दुग्धीन्द्राय देवेभ्यो हविरित्यस्मिन्नपि मंत्रे हविर्बाहुल्यं प्रतीयते ततः प्राप्ता सर्वोत्तरा दोहनमंत्राः पूर्वमन्वारंभणमात्रं विधीतेतस्मा
द्विधेय कपिंजलवैषम्यात् हविर्बाहुल्यार्थं सर्वा उत्तरा दोहनीयाः॥ ॥दशमाधिकरणमारचयति॥ ॥प्रत्यंगिकाद्यंगानि तंत्रे
णोतानि नो यतः। एकैकस्योपकार्यत्वं तस्मात्प्रत्यगनुष्ठितिः। विधानवदनुष्ठानं सकृदेवोपकारकं। तद्देशकालकर्तॄणामेकत्वान्

325
1945

अ॰क॰र॰मा॰

र्तकादिवत्। पौर्णमास्यां त्रीण्याग्नेयादीन्यंगीनि प्रयाजाज्यभागैरुपकार्याणि तेषु एकैकस्यांगिनमुपकारापेक्षित्वात् प्रतिप्रधानमंगानि पृथगनु
ष्ठेयानीति प्राप्ते ब्रूमः। यथा समिधो यजतीत्यादिविधानं सकृदेव प्रवृत्तं न त्वाग्नेयादित्रयोद्देशेन पृथक् प्रवर्तते तथानुष्ठानमपि सकृदेव प्रवर्तते
प्रवृत्तं सत्त्रयाणामुपकारकांक्षां पूरयति यथा बहूनां पुरतो नृत्यन्नर्तकः सर्वेषामौत्सुक्यं युगपन्निवर्तयति तद्वत्तदाग्नेयादिषु देशकालकर्तृ
णामेकत्वादंगानां तंत्रेणानुष्ठानं॥ ॥एकादशाधिकरणमारचयति॥ ॥कृष्णग्रीवद्वये तंत्रं पृथग्वा देवतैक्यतः। तत्र सौम्यव्यवायेन कालभेदात्
पृथग्भवेत्। काम्यपशुकांडे श्रूयते। आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं पुरोधायां स्पर्धमान इति अयमर्थः। ममै
व पौरोहित्यमस्तु नान्यस्येत्येवं स्पर्द्धोपेतो यो याजकः वर्णोपेतं पशुत्रयमालभेतेति तत्राद्यंतयोः कृष्णग्रीवयोः पश्वोर्देवतैक्यात्तंत्रेणानुष्ठा
नमिति चेत् मैवं। सौम्यपशुना व्यवधाने सति कालैक्यासंभवेन तंत्रासंभवात्। तस्मादावापः॥ ॥इति माधवीये जैमिनिन्यायमालाविस्तरे
एकादशाध्यायस्य प्रथमः पादः॥ द्वितीयपादस्य प्रथमाधिकरणमारचयति॥ ॥आग्नेयादिप्रधानस्थे देशे कालेच कर्तरि भेदः स्यादथवा
तंत्रमंगत्वात् द्रव्यदेववत्। उत्पत्तिविधिशेषत्वात् भेदः स्यादेकशब्दतः। विधिः प्रयोगशेषत्वादभेदेन तु तंत्रता। दर्शपूर्णमासयोर्देशकालक
र्तारो विहिताः। समे देशे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजेत अमावास्यायाममावास्यया यजेत दर्शपूर्णमासयोश्च
त्वार ऋत्विज इति। एते देशकालकर्तारोंगत्वाद्द्रव्यदेवतावदुत्पत्तिविधिशेषाः संतः प्रधानेष्वाग्नेयादिषु प्रतिप्रधानं भिद्यंत इति प्राप्ते ब्रूमः।
दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येकेन शब्देनाग्नेयादीनां पृथगुत्पन्नानामपि परस्परसहितानामेव फलसाधनत्वेन विधानादेकः
प्रयोगो गम्यते। तमेकं प्रयोगमापादकमेकं दर्शपूर्णमासशब्दमुपजीव्य देशादिविधानाद्देशादेः प्रयोगशेषा एव न तूत्पत्तिशेषः।
तस्मादेकस्मिन्प्रयोगे देशादीनां तंत्रेण संबंधः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥अंगेष्वेकेपि देशाद्याः किं वा ते देवतादिवत्। अन्व
यत्वादिकमेवं प्रयोगेन परिग्रहात्। प्रयाजाद्यंगेषु येके पि देशकालकर्तारः इच्छया कर्तव्यता कुतः अनन्वयात्। यथा प्रधानान्वितयोर्द्रव्य
देवतयोरंगेष्वन्वयो नास्ति तथा देशादीनामपीति प्राप्ते ब्रूमः। प्रयोगशेषत्वं देशादीनां न त्वाग्नेयादिविधिशेषत्वमित्युक्तं तथा प्रयोगे
ण च प्रधानवदंगान्यपि परिगृह्यंते। तस्मादेष्वेव देशाद्यः प्रधानानां तएवांगानामपि। ॥तृतीयाधिकरणमारचयति॥ ॥संघभेदे
तंत्रमंगं न वा कैत्र्यतोग्रिमः। न मुख्यकालभेदोत्र्या प्रयोगस्य पृथक्कृतः। इष्टौ विद्यमानानां षण्णां यागानां द्वाववांतरसंघौ। दर्शश्च
पौर्णमासश्च चातुर्मास्ये चत्वारः संघाः वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाः। एतादृशे विषये संघातानेकत्वे पि कर्मैक्या
त्प्रयोगैक्ये सत्यंगानां तंत्रेणानुष्ठानं युक्तं। न च पौर्णमास्यमावास्ययोः कालयोर्भेदेनांगभेदः शंकनीयः पशुवद्भेदोपपत्तेः। वपया

श्रीः

प्रातःसवने प्रचरंति पुरोडाशेन माध्यंदिने अंगेन तृतीयसवन इति वपापुरोडाशहृदयाद्यंगप्रचाराणां कालभेदे पि पश्वंगानां प्रयाजानां यथा नास्त्याव
त्तिः तद्वदत्रापीति प्राप्ते ब्रूमः। नांगतंत्रं युक्तं। कृतदर्शपूर्णमासकर्मणएकफलसाधनत्वेन स्वरूपत एकत्वेपि दर्शप्रयोगात्पूर्णमासप्रयोगस्य पृथ
क्त्वात्तत्र च पृथक्त्वं वाचनिकात् कालभेदादवगम्यते। पशुदृष्टांतस्तु विषमः। नहि मुख्यस्य पशुयागस्य भेदो विहितोस्ति वपादीनां तु प्रयाजा
द्यपेक्षया मुख्यत्वे प्यस्ति महद्वैषम्यं प्रयाजादिभ्यो वपादयो मुख्याः तेभ्यो वपाद्यवयवेभ्योवयवी पशुर्मुख्यः अत्रापि प्रयाजादिभ्य आग्नेयादयस्त
यो मुख्याः तेभ्योपि तेषां संघो दर्शो मुख्यः तस्य च दर्शस्य कालभेदो विधीयते। अमावास्यायाममावास्यया यजेतेति। तत्र यद्दर्शयागस्थानीयस्य पशु
यागस्य कालभेदो विधीयते इति चेत् भवेत्तदा साम्यं। न त्वेवं विधीयते। किंतु वपादिप्रचारस्यैव कालभेदो विधीयते। नहि प्रचारस्यांगभूतस्य मुख्य
यागत्वमस्ति येन प्रयोगभेद आशंक्येत। तस्मात्तु वैषम्येण मुख्यस्यैव दर्शस्य पूर्णमासस्य च कालभेदात्तस्या प्रयोगभेदे सति प्रयोगशेषाणां प्र
याजादीनामावृत्तिः एवं वैश्वदेवादिषु द्रष्टव्यं॥ ॥चतुर्थाधिकरणमारचयति॥ ॥अंगान्यध्वरकल्पायां प्रातःकालादिवर्तिषु। त्रिषु संघेषु
मंत्रेण स्युर्भेदेनाथवाग्रिमः। उषस्यशेषनिर्वापो तद्द्वारांगापकर्षणात्। प्रातर्निर्वापवैशिष्ट्यात् मुख्यकालाद्यभिन्नता। काम्येष्टिष्वध्वरकल्पाना
म काचिदिष्टिः तत्र प्रातःकाले त्रयाणां यागानामाग्नावैष्णवसारस्वतबार्हस्पत्यानां संघः पठितः। मध्याह्नापराह्णयोरपि तथैव पठितः अष्टाक
पाल एकादशकपाल द्वादशकपालैराग्नावैष्णवो विशेषितः। इतरत्समानं तत्र त्रिषु संघेषु प्रयाजाद्यंगानां तंत्रं कुतः पुरावाचः प्रवदितोर्निर्वपेत्सं
घस्य यागस्याशेषस्य रात्रौ सुप्तजनानां प्रबोधपूर्वकव्यापारात्। प्राचीन उषःकालेपकर्षे सति निर्वापवदंगांतराणामप्यपकर्षस्य प्रतिभासना
दिति प्राप्ते ब्रूमः। आग्नावैष्णवं प्रातरष्टाकपालं निर्वपेदिति सामान्यतो विहितोयः प्रातःकालीनो निर्वापः स एव सन्निहितत्वात् पुरावाच इति विशिष्य
ते। तस्मादुत्तरसंघनिर्वापोपि मुख्यत्वलाभाय तत्तत्कालयोः कर्तव्यः तद्वत्प्रयाजानामपि भेदेनानुष्ठानं॥ ॥पंचमाधिकरणमारचयति॥ ॥
प्राजापत्यवसानां किं भेदस्तंत्रमुताग्रिमः। पशुभेदाद्देवपाककालैक्याद्वन्तितोंतिमः। वाजपेये सप्तदश प्राजापत्यदेवताकाः पशवः तदंगैरा
नुसारेण वपाहोमो भिद्यत इति चेत्। मैवं। प्रजापतिरेक एव सप्तदशानां पशूनां देवता तथा पाकोपि सहैव क्रियते प्रदानस्यापि पाकउपलक्ष
णं प्रदानेपि साहित्यमस्ति कालश्चैकः याज्यानुवाक्यार्धर्चांतस्य कालत्वेन चोदकाद्दिदेशाद्वक्ष्यते च सह होमः तस्मात्तंत्रं॥ ॥षष्ठाधिकरणमारचय
ति॥ ॥एकादशिनांगे तंत्रं वा साहो मेथ भिन्नता। तत्रं शक्यत्वतो भेदो याज्यायार्धर्चभेदतः। एकादशिन्याग्नेयसारस्वतसौम्यादिपशुषु व
पाहोमस्य सह कर्तुं शक्यत्वात् तंत्रमिति प्राप्ते ब्रूमः। देवताभेदेन तत्तदंतरत्वान्न याज्यार्धर्चांतरकालानां भिन्नत्वेनानुष्ठाने योगपद्या
संभवाद्भेदः॥ ॥सप्तमाधिकरणमारचयति॥ ॥यूपैकादशिनी यूपाकृतेर्भेदोथ तंत्रता। समीपभेदाद्दास्त्वाद्यः सामीप्यं द्विगं यतः
यूपैकादशिनीचोदकप्राप्ता यूपाकृतिः प्रतियूपं भिद्यते कुतः यूपस्याग्निकेग्निमथित्वा यूपाकृतिं जुहोतीति तद्विधानात्सामीप्यानां

327
1945

चभेदान्नीतिप्राप्ते ब्रूमः। नतावदत्यंतंसामीप्यं संभवति यूपदाहप्रसंगात् अतो यावता व्यवधानेन भेददृष्टिर्गोचराभवतितावतादेशस्य समी
पत्वमभ्युपेतव्यं तेनदेशैक्यसंभवादाकृतेस्तंत्रत्वं॥ ॥अष्टमाधिकरणमारचयति॥ ॥किमवभृथेमुख्यमात्रं सांगमुताग्निमः। मुख्यत्वे
नात्वयामेवं प्रयोगेणतदन्वयात्। इदं श्रूयते। अप्स्ववभृथेनचरंतीति तत्र वारुणएककपालो वभृथशब्दवाच्यतान्मुख्यं कर्म। तेनमुख्ये
नांपामन्वयः श्रूयते। अतोद्व्यदेवतावदपांमुख्यमात्रांगत्वात् प्रधानस्यैवाप्स्वनुष्ठानं। आघाराज्यभागादीन्याहवनीयेनुष्ठेयानीति
प्राप्ते ब्रूमः स्यादेतदेवं यद्यप्स्ववभृथैरित्येतावदेवश्रूयते। इह त्वप्सु चरंतीति श्रवणादवभृथप्रयोगेनापामन्वयात् सांगं प्रधानम
प्सु कर्तव्यं॥ ॥नवमाधिकरणमारचयति॥ ॥मारुत्याः सार्धमन्याभिरंगतंत्रंभिदाथवा। प्रयोगैकत्वतस्तंत्रं भेदोदेशस्यभेदतः। व
रुणप्रघासेष्वाग्नेयादीनिनवहवींषिविहितानि तेषु मारुतिमामीक्षां प्रतिप्रस्थाता दक्षिणेविहारेनुतिष्ठति। इतराणि त्वष्टावध्वर्युरु
त्तरेविहारेनुतिष्ठति। तेषामष्टानांमारुत्याश्च प्रयोगैक्यात्तंत्रेणांगान्युभयवादिसंमतानि तथा तावत्स्वेव मारुत्या अपीत्यत्रापि तंत्रं प्राप्ते कुतः व
रुणप्रघासांतःपातित्वेन योगैक्यात् न त्वत्र विहारभेदआम्नातः पृथगग्नीप्रणयतः पृथग्वेदी कुरुतइति सोयं पृथगनुष्ठानाभा
वेव्यर्थः स्यात्। मैवं। हविरासादनमात्रे तदुपयोगात्। अष्टावध्वर्युरुत्तरे विहारेहवींष्यासादयति। मारुतीमेव प्रतिप्रस्थाता
दक्षिणस्मिन्निति तद्विधानात्तस्मात्तंत्रमिति प्राप्ते ब्रूमः। देशभेदात्प्रयोगभेदे सत्यंगानुष्ठानमपि भिद्यते न च तद्वेदस्य हविरासाद
नमात्रार्थता युक्ता तदासादनास्य दृष्टहोमार्थपरित्यागेनादृष्टार्थकल्पनात् न च प्रयोगभेदेनैवासादनभेदस्यापि सिद्धेर्वचनं
मनर्थकं स्यादिति वाच्यं। अव्यवस्थयप्रयोगप्राप्तौ तद्व्यवस्थार्थत्वात्। तस्माद्भेदेनांगानुष्ठानं। दशमाधिकरणमारचयति॥ ॥
कर्तृभेदोनवा तत्र भेदःस्यादंगभेदवत्। पंचर्त्विग्वचनादेवं द्वयोरुक्त्या व्यवस्थितिः। तत्र पूर्वोक्तेविषये प्रयोगभेदादाघाराद्यंगभेद
इवहोत्रग्नीध्रादीनां कर्तृणामपि भेद इति चेत्। मैवं। वाचनिकपंचसंख्याविरोधात्। अध्वर्युः प्रतिप्रस्थाता होता ब्रह्मा आग्नीध्रः पंचर्त्वि
जः चातुर्मास्येषु विहिता चातुर्मास्यानां यजमानानां पंचर्त्विज इति यद्याग्नेयाद्यष्टके मारुत्यां च होत्रादिभेदः स्यात्। तदा पंचसंख्याबा
धेत ननु पंचसंख्यासिध्यर्थमाग्नेयाद्यष्टके प्रस्थाता प्राप्नुयात् मारुत्यां चाध्वर्युः प्राप्त इति चेत्। सत्यं प्राप्तावेव तावुभावुभयत्र व्य
वस्थानुवचनाद्व विष्यति। तत्तु वचनं पूर्वत्रोदाहृतं तस्मान्नास्ति कर्तृभेदः॥ ॥एकादशाधिकरणमारचयति॥ ॥तंत्रैव पत्नीसंया
जादौ तंत्रं भिन्नताथवा। तंत्रमग्न्यैक्यतो मैवं कर्तृभेदानिवारणात्। तत्रैवाग्नेयाद्यष्टके मारुत्यां च गार्हपत्ये होतव्येषु पत्नीसंया
जादिषु तंत्रं युक्तं। कुतः गार्हपत्यस्यैकत्वात् न ह्याहवनीयवत् दक्षिणे विहारे गार्हपत्यः पृथगस्ति। तस्मात्तंत्रमिति प्राप्ते ब्रूमः। नता

श्रीः

वदत्र पूर्वोक्तः कर्तृभेदो निवारयितुं शक्यते तथासत्यध्वर्युणाकृताः पत्नीसंयाजाः प्रतिप्रस्थातृकर्तृका यां मारुत्यां कथमुपकुर्युः। त
स्मादध्वर्युप्रतिप्रस्थात्रोर्गार्हपत्ये पृथक् पृथक् पत्नीसंयाजाः कर्तव्याः॥ ॥द्वादशाधिकरणमारचयति॥ ॥पर्यग्निकरणे त्यागश्चालं
भोब्रह्मसामनि। कर्मशेषनिषेधश्च कर्मांतरविधिर्भवेत्। किमुत्कर्षो विशिष्टस्य आरण्यो नित्यवदादिमः। अदृष्टवाक्यभेदाप्तेर्द्व्याभेदेनवा
तिमः। वाजपेये सप्तदश प्राजापत्यान्पशून् प्रकृत्य श्रूयते। तान्पर्यग्निकृतानुत्सृजति ब्रह्मसाम्न्यालभत इति। तेषु सप्तदशसु पर्यग्निकरणे
नुष्ठिते सत्युत्तरकालभाविकर्मशेषः उत्सर्गशब्देन निषिध्यते अश्वमेधे पर्यग्निकृतानारण्यानुत्सृजंतीत्यत्र कर्मनिषेधस्य प्रतिपन्नत्वा
दत्रापि तथात्वेन सप्तदशपशवः पर्यग्निकरणांताः समापनीयाः। आलभतिना च ब्रह्मसामकाले कर्मांतरं विधीयत इति प्राप्ते ब्रूमः। क
र्मांतरविधौ सप्तदशपशुजन्यादृष्टभिन्नं किंचिददृष्टं कल्प्येत वाक्यभेदश्च प्राप्नुयात्। किंच ब्रह्मसाम्न्यालभत इत्यत्र द्व्यदेवतयोरश्रव
णान्न कर्मांतरविधिः संभवति तस्मात्पर्यग्निकरणानंतरमेव कर्तव्यस्य सप्तदशपशूनामालंभादिशेषस्य ब्रह्मसामकाल उत्कर्षो विधीय
ते तथा सत्यर्थप्राप्तपर्यग्निकरणानंतर भाविकर्मशेषव्यापारोपरम उत्सर्गशब्देनानूद्यते॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥
उक्तोत्सर्गः किमुत्कर्षः स्यागो वाद्योत्र पूर्ववत्। अन्त्यह त्रित्वयोरुक्तमाहपंचत्वयोर्विधिः। वाक्यभेदाद्विशिष्टानामन्येषां कर्मणां विधिः। त
स्मादारण्यवदत्र त्यागउत्सर्ग इष्यतां। अस्त्यहीनेषु पंचशारदीयनामकः कश्चित् पंचाहविशेषः स च पंचसु संवत्सरेष्वनुष्ठेयः तत्र
प्रथमे वत्सरे वैशाखानक्षत्रयुक्तायाममावास्यायां सप्तदश स्त्रीपशवः सप्तदशोक्षाणश्च विहिताः तेषु सर्वेषु पर्यग्निकृतेषु प्रोक्षितेषु च
सत्सु स्त्रीपशूनामालंभं पुंपशूनामुत्सर्गं चाम्नाय पुनर्द्वितीये तृतीये चतुर्थे च वत्सरे तथैवानुष्ठानमाम्नाय पश्चादाम्नायते। त्रीस्त्रीनेके
कस्मिन्नहन्यालभेरन् पंचोत्तमेहनीति तत्र वत्सरचतुष्टयगतास्वमावास्यासूक्तो यो यं पशूनामुत्सर्गः तत्र कर्मशेषत्यागो नभ
वति किं तूत्कर्षः कुतः त्रीस्त्रीनिति वाक्येनालंभस्याभिधानात् यथा पूर्वं प्राजापत्यानामालंभोत्कर्षस्तथात्रापि युज्यत इति प्राप्ते ब्रूमः
त्रींस्त्रीनेकैकस्मिन्नहन्यालभेरन्नित्यत्र पर्यग्निकरणानंतरभाविनं प्राप्तमालंभनमनूद्यैकाहत्वत्रित्वगुणयोर्विधौ वाक्यं भिद्येत
तथा पंचोत्तमाहत्वपंचत्वयोर्विधौ वाक्यभेदः। तस्मात्तद्गुणविशिष्टानामन्येषां कर्मणां विधिरभ्युपेयः। तथा सत्यारण्यपशुन्याये
न सप्तदशोक्षाणः पर्यग्निकरणप्रोक्षणाभ्यां समापनीयाः॥ ॥चतुर्दशाधि०॥ ॥दशपेयेभिषेचनीयतंत्रं भिदाथवा। क्रयसा
दित्यतस्तंत्रं कालभेदेन भिन्नता। राजसूये दशपेयाभिषेचनीयसंज्ञकौ द्वौ सोमयागौ तयोरंगानुष्ठानं तंत्रेण कार्यं कुतः क्रयसा

329/1945

अ० क० मा०

हित्यान्सह सोमो क्रीणात्यभिषेचनीयदशपेययोरिति श्रूयते। तथासत्यभिषेचनीयस्य दशपेयस्य सोमे क्रेतव्ये सति क्रयात्पूर्वभावि
नां दशपेयांगानामपकर्षात्तंत्रं स्यादिति प्राप्ते ब्रूमः। भिन्नकालीनयोरभिषेचनीयदशपेययोरंगानां भेदो युक्तः। संसृपाख्याभ्यो
दशभ्य इष्टिभ्यो ऊर्ध्वमपराह्णे दशपेयस्योपक्रमः। ताभ्यः प्राचीनेत्यंतव्यवहिते कालेऽभिषेचनीयः। न च क्रयसाहित्यमस्ति तद्योदीक्ष
यंति सह सोमं क्रीणंतीति दशपेये क्रयस्य मध्यस्कालत्वविधानात् सह सोमाभावित्यनेन क्रयार्थोपसंवादि साहित्यं विवक्षितं तस्मादुभयो
रंगानां भेदः॥ ॥पंचमाधिकरणमारचयति॥ ॥निष्कासावभृथे विप्रकर्षाय प्रतिपादनं। उतार्थकर्म पंक्तिवदाद्योऽवभृथत्वतः
कर्मांतरं तदापि स्यात्प्रतिपत्तिः प्रयाजवत्। प्राधान्यायार्थकर्म स्यात्तत्रावभृथधर्मकं। चातुर्मास्ययागेषु वरुणप्रघासेषु वारुणी
मामिक्षां प्रकृत्येदमाम्नायते। वारुण्या निष्कासेन तुषैश्चावभृथमवयंतीति अत्रायं प्रयोगप्रकारः। वरुणप्रघासेषु नवहर्वींषि
तेषष्ठमं हविर्वारुणी आमिक्षा युक्तं मेषं सर्वं नवमं हविः कायएककपालः। वारुण्यामामिक्षायां यवपिष्टनिर्मितं मेषमवदधातित
त आमिक्षायुक्तं मेषं सर्वमवदाय कृत्वा ततः कायएककपालेन प्रचर्य भांडलिप्तेन वारुण्या मिक्षानिष्कासेन तुषैश्चावभृथमनु
तिष्ठंतीति तत्र संशयः। किं वारुण्यामिक्षायाएकमंशं यवमयमेषसहितं पूर्वं प्रदाय पश्चादेककपालप्रचाराद्ध्वं निष्कासस्तत्पं सां
तरेण तुषैः प्रचरति यद्वा ईदृशस्य प्रचारस्य विप्रकर्षउत कर्मांतरं तत्रापि किं प्रतिपत्तिकर्म आहोस्विदर्थकर्मेति तत्र विप्रकर्ष इति ताव
त्प्राप्तं कुतः पशौ तथा दृष्टत्वात्। प्रातःसवने वपया प्रचर्य तृतीयसवने हृदयाद्यंगैः प्रचार इति। सवनीयपशौ यथा प्रचारविप्र
कर्षः तद्वदत्रापीत्याद्यः पक्षः। तथासत्यवभृथशब्दवैयर्थ्यप्रसंगात्। कर्मांतरमिति पक्षांतरं तदाप्यामिक्षाशेषस्य निष्कासस्या
स्मिन्कर्मणि हविष्ट्वायोगात्प्रयाजशेषन्यायेन प्रतिपत्तिः स्यात्। यथा प्रयाजशेषेण हवींष्यभिघारतीत्यत्र तच्छेषसंस्कर्तुम
भिघारणमेवमत्रापि निष्कासः संस्क्रियत इति प्राप्ते ब्रूमः। तस्मिन्पक्षे निष्कासस्य संस्कार्यद्रव्यत्वेन प्राधान्यान्निष्कासमिति द्वि
भक्तिव्यत्ययः स्यात्। अतोऽवभृथस्य प्राधान्यायार्थकर्मत्वमेष्टव्यं यदि चातुर्मास्येषु नास्त्यवभृथः तदा तद्धर्मातिदेशाय तन्ना
मनिर्देशोक्तिः। अन्यदीयद्रव्यशेषस्यापि कर्मांतरे विनियोगो वाचनिकः तस्मादर्थकर्म॥ ॥षोडशाधिकरणमारचयति॥
प्रायणीयस्य निष्कासे योनिर्वापोऽर्थकर्म तत्। निष्कासप्रतिपत्तिर्वोदयनीयस्य संस्कृतिः। उताद्यः पूर्ववन्नैवं मुख्यस्य प्रकृत
त्वतः। मध्योक्तेनोपयोक्तव्यसंस्कारस्य गुरुत्वतः। ज्योतिष्टोमे श्रूयते प्रायणीयस्य निष्कास उदयनीयमभिनिर्वपतीति अ

श्री:

त्र पूर्वन्यायेन निष्कासद्रव्यकमुदयनीयस्य समानधर्मकमन्यदर्थकर्मेत्याद्यः पक्षः। मुख्यस्येवोदयनीयस्य प्रकृतत्वादिन्नप्रकरणाम्नातावभृथधर्मा
तिदेशवदुदयनीयधर्मातिदेशासंभवान्नार्थकर्मत्वं तर्हि निष्कासः प्रतिपत्तिरिति मध्यमः पक्षोऽस्तु सोऽपि न संभवति तदुपयुक्तसंस्काराद् उपयोक्ष्यमा
णसंस्कारस्य गरीयस्त्वात् तस्मादुदयनीयस्य संस्कारः॥ ॥इति माधवीये जैमिनिन्यायमालाविस्तरे एकादशाध्यायस्य द्वितीयः पादः॥ तृतीय
पादस्य प्रथमाधिकरणमारचयति॥ ॥वेद्यादिर्मुख्यकाले स्यात्स्वकाले वेतरांगवत्। मुख्यकालेन पूर्वेद्युरित्याद्युक्तेः स्वकालतः। वेदिर्वेदश्च
बर्हिरित्यादेः संपादनरूपमंगानुष्ठानं प्रधानस्यैव काले कर्तव्यं। प्रयाजाद्यंगेषु मुख्येन सह देशकालकर्तॄणां ऐक्यस्य निर्णीतत्वादिति चेत्। मैवं। कालादि
भेदस्य वाचनिकत्वात्। वेद्याः अमावास्यायां वेदिं करोतीत्यादिकालभेदः। अवभृथेन चरंतीत्यादिदेशभेदः। अग्नीषोमीयत्रामण्यां च दक्षिणाभेदात्कर्तृभे
दः। दद्याद्दक्षिणेति सौत्रामण्यामुक्तं। तस्माद्वेद्यादिः स्वस्वकालादियोऽर्थाः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥प्रतिकर्म पृथक्त्वार्थमाधानं य
दि वा सकृत्। अन्यांगवत्तदर्थं स्यात् स्वकालत्वसमत्वतः। वसंते ब्राह्मणोऽग्निमादधीतेति विहितमाधानं प्रयाजाद्यंगवत्प्रतिकर्म पृथक्त्वार्थमिति चेत्
मैवं। आधानस्य स्वातंत्र्येण वसंतादिकाले विहितत्वात्तत्कर्मकालेषु पृथगनुष्ठानायोगात्स्वकालेऽनुष्ठितस्य सर्वकर्मणि संबंधः समानः। न च प्रकरणेन
विशेषे नियंतुं शक्यः। आधानस्यानारभ्याधीतत्वात्। आहवनीये जुहोतीत्यादिवाक्येन लौकिकपाशुकसौमिकदार्विहोमेषु संबंधः साधारणः प्र
तीयते। तन्मात्रेणानुष्ठानं यद्यप्याधानं नेष्ट्यादिकर्मणां साक्षादंगं। तथापि पृथक्फलाभावादाहवनीयादिद्वारा कर्मोपकारत्वांगत्वमस्त्युपत्त्येयं चि
ता॥ ॥तृतीयाधिकरणमारचयति॥ ॥अग्नीषोमीयमुख्येषु यूपो भिन्नोऽथ तंत्रता। उपदेशातिदेशाभ्यां भिन्नो नो कालभेदतः। ज्योतिष्टोमेऽग्नीषो
मीयसवनीयानुबंध्यास्त्रयो विहिताः। तेषु यूपभेदो युक्तः। अग्नीषोमीये प्रत्यक्षवचनेन तदुपदेशादितरयोश्चोदकाभ्यामतिदेशादिति प्राप्ते ब्रूमः। न
तावदग्नीषोमीयस्य पशोः काले यूपस्योत्पत्तिः किंतु ततः प्रागेव यूपोत्पत्तिकालः दीक्षासु यूपं छिनत्ति क्रीते राजनीति तत्काल विधानात् तत आधा
नवत्सर्वार्थत्वं संभवति। यथा स्वकाले संपन्नमाधानं तत्तद्वाक्यविशेषैस्तेषु कर्मसु तथा स्वकाले छेदनादिना निष्पन्नो यूपः प्रत्यक्षचोदकोक्तिभ्यां
तत्र विनियुज्यते। तस्मात्तंत्रेण यूपः संपादनीयः॥ ॥चतुर्थाधिकरणमारचयति॥ ॥संस्कारास्तक्षणाद्याः किं भिन्नास्तंत्रेण वाग्रिमः। पशु
कालत्वतो मैवं यूपत्वापादकाग्रतः। तक्षणपर्यूहणादयो यूपसंस्काराः पशुकालीनत्वान्नियोजनादिवत्त्रिषु पशुषु भेदेन कर्तव्या इति चेन्मैवं। छे
दनवत्तक्षणादीनामपि यूपकालीनत्वात्। न खलु यूपनामकः कश्चिल्लोके प्रसिद्धः पदार्थोऽस्ति येन तस्य छेदनमात्रेण तद्विधिः कृतार्थो भवेत्। किंत
र्हि छेदनतक्षणादिना यूपसंज्ञामाविर्भावयेव विधीयते तथा सति यैः छेदनतक्षणादिभिः संस्कारैर्यूपत्वमापद्यते ते सर्वे छेदनकाल एवानुष्ठेयाः।
तस्मात्त्रिष्वपि पशुषु यूपछेदनवत्तक्षपर्यूहणादयस्तंत्रेणानुष्ठेयाः॥ ॥पंचमाधिकरणमारचयति॥ ॥स्वरुर्भिन्नोऽथवैकः स्यात्स्वकालत्व

331
1945

अ॰ र॰ मा॰

१६६

तोभिदा।प्राथम्यमेकशकलेतत्रं स्यादविशेषतः।शकलःस्वरुरित्युच्यते।सचत्रिषुपशुषुभिन्नः संपादनीयः कुतोस्यकालवान्नहियूपस्येवस्वरोः क
श्चित्प्रातिस्विकः कालः श्रूयते।ततः स्वरुणास्वधितिनावापशुमनक्तीत्यंजनकालीनत्वावगमात्।अंजनवद्भेद इति प्राप्ते ब्रूमः।यः प्रथमः परापत
त्ससस्वरुः कार्य इति प्राथम्यमेकस्मिन्नेवशकलेयुक्तंसचशकलो यूपकालीनः परशुविशेषसंबंधहेतुमलभमानो यूपवत्तंत्रेण सर्वेषु पशुषूपकरि
ष्यति॥ ॥षष्ठाधिकरणमारचयति॥ ॥अहर्गणे विषाणायास्त्यागो द्वौ किं विकल्प्यते।किंवानियम्यतेतौ द्वौसादाद्याबाधसाम्यतः।कंडूयनंनहस्ते
नश्रुतमर्थाचुतद्भवेत्।अतबाधाद्वरं तस्य बाधोतोंत्येनियम्यतां।कृष्णविषाणयाकंडूयतेर्नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यतीति ज्यो
तिष्टोमेश्रुतं प्रासनमहर्गणेद्विरात्रादौ चोदकप्राप्तं तच्च प्रथमे चरमे वाह्नीत्येवं विकल्प्यते।कुतः उभयत्र बाधसाम्यात्।यदि प्रथमेह्नि प्राश्येत्त
दानीमुत्तरेष्वहःसु चोदकप्राप्तं दक्षिणानयनात्प्राचीनं विषाणयाकंडूयनं बाध्येत चरमेह्नितत्प्राशने पूर्वेष्वहःसु दक्षिणानयनादूर्ध्वं हस्तेन कं
डूयनं चोदकप्राप्तं बाध्येत तस्मात्सम बलत्वेन विकल्प्य इति प्राप्ते ब्रूमः।नहि हस्तेन कंडूयनं किंचिदश्रुतं किंतु विषाणायां त्यक्तायां अर्थात्प्राप्य
तिकामं तस्य बाधोस्तु श्रुतं विषाणयाकंडूयनं न बाधितुं चरमेह्नि प्रासनं नियम्यते॥ ॥सप्तमाधिकरणमारचयति॥ ॥नानाबीजेषुयो
गेषु वाग्विसर्गश्च पूर्ववत्।शंकितेतद्विधानस्यादविधित्वेतुनत्तरं।राजसूये नानाविधबीजयुक्तायागाः श्रुताः अग्नये गृहपतये पुरोडाश
मष्टाकपालं निर्वपति।कृष्णानांव्रीहीणांसोमाय वनस्पतये श्यामाकं चरुमित्यादिना।प्रकृतौ प्रणीताप्रणयनकाले नियमिताया वाचो
हविष्कृदाह्वानकाले विसर्गः श्रुतः स चात्र चोदकप्राप्तः।तत्र प्रथमे चरमे वाह्नि विषिहविष्कृदाह्वानकाले वाग्विसर्गो विकल्पित इति।
पूर्वःपक्षः चरम एवेति राद्धांतः।अत्र येयं पूर्वपक्षिणोभ्यधिकाशंकाहस्तेन कंडूयनं न विहितं।वाग्विसर्गस्तु विहित इति तत्रेदमुत्तरं
विहितस्य वाङ्नियमस्याविधित्वेनायं हविष्कृदाह्वानकालीनो वाग्विसर्गो नूद्यते।रागप्राप्तत्वान्नासौ विधीयत इति तस्मात्प्रासनवद्विस
र्गोपि चरम एव कालनियम्यते॥ ॥अष्टमाधिकरणमारचयति॥ ॥पशुकाले पुरोडाशकाले वा वाग्विसर्जनं।तंत्रित्वादादिमो त्वस्याद्य
त्यमात्कर्तृसंस्कृतिः।यद्यपि पशौ हविष्कृदाह्वानं नास्ति तथापि कृत्वाचिंतेयं तत्र पशोर्हविष्कृदाह्वानकाले वाग्विसर्जनीया।कुतः प
शोः तंत्रित्वात्पशुपुरोडाशस्य प्रसंगित्वेन पशावनुष्ठिते रेवांगैरुपकारसिद्धेरिति प्राप्ते ब्रूमः।वाग्यमो नादृष्टार्थः किंतु कर्तृसंस्कारार्थः
तथासति पुरोडाशे तदभावे सत्यसंस्कृतकर्त्रा तदनुष्ठानं प्रसज्यतेतस्मान्नियतां वाचं पुरोडाशस्य हविष्कृदाह्वानकालेविसृजेत्॥
नवमाधिकरणमारचयति॥ ॥किं मंत्रिमोकः सर्वांते मुख्यांते वाग्निमेयतः।योगे सर्वार्थतामेवं मुख्यार्थो सोंतदंतिमः।अग्निचय
नेयोगविभागावग्रश्रुतौ।अग्निंयुनज्मीतिमंत्रहोमो यागः।इमंस्तनमितिमंत्रहोमो विमोकः।सच सांगप्रधानविषयः सप्तर्वप्रयो

श्री:

338/1945

गांते कर्तव्यः।कुतः योगस्य सर्वार्थत्वेन मध्ये तद्विमोकासंभवादिति प्राप्ते ब्रूमः।पंचभिर्युनक्ति पांक्तो यज्ञो यावानेव यज्ञस्तस्वैत्येनेन
मोचने यज्ञप्राप्तिवचनेन योगस्य प्रधानार्थत्वावगमात्।प्रधानकर्मणोंते विमोकं कुर्यात्॥ ॥एतदेवाधिकरणं वार्तिककारमते
रचयति॥ ॥व्यत्यस्तौ तावुभौ पक्षावुत्सावविशेषतः।सर्वार्थत्वं गुणे भाति सर्वांते तो विमोचनं।प्रधानांते विमोक इति यो भाष्यसि
द्धांतः स एवात्र पूर्वः पक्षः अग्निं युनज्मि शवसा घृतेनेति जुहोत्यग्निमेव तद्युनक्तीत्येतद्योगस्योत्पत्तिवाक्यं पंचभिर्युनक्तीति गु
णविधिः तत्र नावुत्पत्तौ प्रधानगामी योग इत्यस्यार्थस्य गमको विशेषो नास्ति गुणविधिशेषेपि यज्ञशब्दो न प्रधानमात्रत्वमाच
ष्टे किंतु सांगं तस्माद्योगस्य सर्वार्थत्वाद्विमोकोपि सर्वांते कर्तव्यः॥ ॥दशमाधिकरणमारचयति॥ ॥उपसत्कालसुब्रह्मण्याह्वा
णो भिद्यते न वा।प्रधानभेदाद्भेदस्यात्कालभेदान्न भिद्यते।अहर्गणे षूपसत्कालीनं सुब्रह्मण्याह्वानं प्रधानभेदाद्भिद्यत इति चे
त्।न पूर्वकालीनतया यूपन्यायेन तंत्रत्वात्। ॥एकादशाधिकरणमारचयति॥ ॥सुत्याकालीनमह्वानं तंत्रं स्याद्भिद्यते तथ
वा।यूपाद्भुति नयात्तंत्रं सुत्याकालतयाभिदा।अहर्गणेषु प्रथमसुत्यासंनिधौ कृतमपि सुब्रह्मण्याह्वानं सर्वेष्वहःसूपकरोति
यथा यूप एकादशिन्यां द्वयोश्चेरे क्रियमाणाप्याहुतिः सत्यप्यर्थादेकयूपसंनिधौ सर्वेषामुपकारस्तद्वदिति प्राप्ते ब्रूमः।अन्यसु
त्याकालीनेनाह्वानेनात्र नास्त्युपकारः कालविशेषस्यापि तत्प्रयोजकत्वात् अन्यथा ग्रहादीनामपि तंत्रापत्तेः।तस्मादाह्वानं
भिद्यते। ॥द्वादशाधिकरणमारचयति॥ ॥देशपात्रर्त्विजोन्यस्मिन्प्रयोगेन्यउतैच्छिकाः।भुक्त्यर्थपणवत्तेन्ये वासोवत्ते
च्चैच्छिकाः।समे यजेतेत्युक्तो देशः जुह्वादीनि पात्राणि अध्वर्युप्रमुखाश्चर्त्विजः ते चैकस्मिन्प्रयोग उपकृतत्वान्निरिष्टकत्वान्न
प्रयोगांतरमर्हंति इष्टान्निर्गता निरिष्टाः।कुत्सिता निरिष्टा निरिष्टकाः प्रयोगानर्हा इत्यर्थः।यथा भोजन उपयुक्तं कदलीपला
शादिपर्णं पुरस्यात्त्यापि न पुनः शिष्टास्तत्स्वीकुर्वंति तथात्राप्यन्ये देशादयः प्रयोगांतरे संपाद्या इति प्राप्ते ब्रूमः।यथा वस्त्रं
पूर्वदिने प्रावरणायोपयुक्तमपि दिनांतरे निरिष्टकं न भवति।शिष्टास्तद्वासो दिनांतरे स्वीकुर्वंति।तद्वदत्रापि द्रष्टव्यं इदं निरि
ष्टकमिदं नेत्यत्र शिष्टाचार एव प्रमाणं शिष्टाश्च देशादिनियमे न तत्त्यजंति तस्मादैच्छिकाः॥ त्रयोदशाधिकरणमारचयति
माभूदन्यत्वनियमः पात्रे तंत्रं किमैच्छिकं।नियतं वाग्निमोदेशवैन्मैवं प्रतिपत्तितः।देशपात्रर्त्विजां साधारण्येनान्यत्वनि

र्यमेनिवारितेसतिपुनः पात्रांतरेषुनियमानिमसङ्गबाधिष्यते। प्रथमप्रयोगेयान्युपयुक्तानिपात्राणितान्येवप्रयोगांतरेष्विति नियमोनास्ति
उतास्तीतिसंशयः यथादेशेकर्तृषुचनएवेतिनियमोनास्तिएछिकस्योक्तत्वात् तथापात्रेष्वपीतिचेत् मैवं। आमरणंपात्राणांधारणं। यता
व। आहिताग्निमग्निभिर्दहंतियज्ञपात्रैश्चेतिप्रतिपत्तिविधानेनामरणंधारणमवगम्यते। ननुपात्रैरितितृतीययाअर्थगुणभावावग
माअर्थकर्मेदंननुप्रतिपत्तिः तथासतिपात्रांतरैरपिदाहसिद्धेर्नधारणनियमइतिचेत्। मैवं। दक्षिणेपाणौजुहूमासादयतीतिद्वितीयया
प्रतिपाद्यत्वावगमात्। पूर्वेषामेवधारणंतस्मात्सर्वेषुप्रयोगेषुपात्राणांतंत्रं॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥किंपौर्णमासमारभ्य
यद्वाधीनमियंधृतिः। प्रकृत्यर्थतयायः स्यान्मरणानियमात्परः। अनारभ्याधीतानांपात्राणांप्रकृतगामितयापौर्णमासीमारभ्यधारण
मितिप्राप्तेब्रूमः। आधानकालेपवमानेष्टिषुचोदकप्राप्तत्वात् पात्राण्याधानमारभ्यधारयितव्यानि। अन्यथाधानपौर्णमास्योर्मध्येय
जमानस्यकदाचिन्मरणेपात्राभावेनदाहाभावप्रसंगात्। तस्मादाधानमारभ्यधारणमित्ययंपरमः पक्षोभ्युपगंतव्यः॥ ॥पंचदशाधि
करणमारचयति॥ ॥प्राजापत्यप्रचारः किमार्भवेशास्त्रिसोमतः। ऊर्ध्वंवाविकृतौचोनपरस्तात्सर्वसोमतः। आर्भवेचोदकात्तुल्यासति
भ्यांतदतत्परः। श्रुतिबाधस्तदातस्मात्तृतीयोविकृतित्वतः। पशवोनाहिसोमस्यविकाराअविशेषतः। उक्तत्वात्सर्वसोमानामुपरिष्टात्प्र
चार्यते। वाजपेयेसप्तदशप्राजापत्यपशुप्रचारस्यकालेचतुर्धासंशयः तत्रतावदयंप्रयोगक्रमः। तृतीयसवनेप्रथममार्भवः पवमानः
ततोवैश्वदेवपर्यंताः शस्त्रवंतः सोमाः ततोशस्त्रेष्ववतिष्ठेषुसोमग्रहेषुप्रचीर्णेष्वग्निष्टोमसाम्नऊर्ध्वमुक्थ्यादयः सोमविकाराइतिए
वंस्थितेप्राजापत्यपशूनामार्भवकालेप्रचारकुतः प्रकृतौतस्यपशुप्रचारकालत्वेनचोदकप्राप्तत्वादित्याद्यः पक्षः। उपरिष्टात्सोमानांप्रा
जापत्यैश्चरंतीतिवचनेनसोमग्रहप्रचारादूर्ध्वः कालोविधीयते। यदिप्रातः सवनमाध्यंदिनसवनसोमेभ्यऊर्ध्वत्वमार्भवकालस्यास्ती
तियोत्स्येततदाचोदकेनैवतत्कालेप्राप्तेर्वचनमर्थकंस्यात्। अतस्तृतीयसवनगतसोमानामुपरीतिवक्तव्यंयदितत्रसर्वसोमानामुप
रीतिविवक्ष्येततदाचोदकप्राप्तः कालोविप्रकृष्यतेततः प्रत्यासत्तयेशस्त्रिणांवैश्वदेवग्रहांतानांसोमानामुपरीतिद्वितीयः पक्षः। उपरि
ष्टात्सोमानामित्यविशेषप्रवृत्ताश्रुतिः कतिपयसोमोर्ध्वत्वविवक्षायांबाध्येततस्माच्छस्त्रवतांतद्रहितानांचसोमानामुपरिष्टादग्नि
ष्टोमयज्ञायज्ञीयसाम्नासंस्थितेसप्रचारः कार्यः तस्यविकृतिकालत्वात् प्राजापत्यपशूनांचविकृतिरूपत्वादितितृतीयः पक्षः सो
मविकाराणामेवायंकालः पशवस्तुनसोमविकाराः तस्माद्विशेषवचनानुसारेणप्रकृतानांवैकृतानांचसर्वेषांसोमानामुपरिष्टा

प्राजापत्यपशुप्रचारइतिराद्धांतः॥ ॥षोडशाधिकरणमारचयति॥ ॥सवनीयपुरोडाशदेवोत्कर्षोनविद्यते। अस्तिवापशुवत्तंगत
त्वान्यथाभावितोस्तिसः। ज्योतिष्टोमेसवनीयपशुस्तत्रसवनीयपुरोडाशाः प्रसंगीतास्मिंश्चपुरोडाशेदेवताआम्नाताः। भ्अग्निरिंद्रायहृ
रिवतेधानाः पूषण्वतेकरंभमित्यादिनातत्रदेवतावाचिनांहरिवदिंद्रपूषण्वदिंद्रादिपदानामुत्कर्षोविषयः। तस्यन्नैवंसंभावनासवनी
यपशौस्तावदनूयाजाउत्कृष्यंते। आग्निमारुतादूर्ध्वमनूयाजैश्चरंतीत्यनुयाजानामाग्निमारुतशस्त्रादधस्तनंस्वकालं। निवार्योर्
ध्वकालस्यविहितत्वादुत्कृष्टेष्वनुयाजेषुतदुत्तरकालीनः सूक्तवाकोप्यर्थादुत्कृष्यते। तस्मिंश्चसूक्तवाकेदेवतावाचीनिपदानिप्रयोक्त
व्यानिनचप्रसंगिनः पुरोडाशस्यपृथक्सूक्तवाकोस्तिततः पशुबंधिसूक्तवाकोत्कर्षेणपुरोडाशसंबंधिदेवतावाचिपदोत्कर्षः संभा
वितः सचोत्कर्षेनास्तीतितावत्प्राप्तेब्रूमः तासांदेवतानांपशवंगत्वान्मैवंसूक्तवाकमंतरेणपृथगुच्चारितांदेवतावादानांअन्वयाभावा
त्सूक्तवाकेत्वस्त्यन्वयः। तथाहि अग्निमद्यहोतारमवृणीतायंयजमानइत्यस्मिन्याश्रुकेसूक्तवाकेभ्अयमिंद्रायहरिवतेधानायंय
जमानइत्यस्त्यन्वयः तस्मादुत्कर्षोस्तीतिसिद्धांतः॥ ॥इतिश्रीमाधवीयेजैमिनिन्यायमालाविस्तरेएकादशाध्यायस्यतृतीयःपा
दः॥ चतुर्थपादस्यप्रथमाधिकरणमारचयति॥ ॥सोमापौष्णादिकेतंत्रमंगानामुतभिन्नता। तंत्रंफलैक्यतोमैवंदक्षिणाकर्तृभेद
तः। राजसूयेश्रूयते। सोमापौष्णएकादशकपालऐंद्रापौष्णश्चरुः सोमापौष्णश्चरुः श्यामोदक्षिणेति आग्नावैष्णवएकादश
कपालऐंद्रावैष्णवश्चरुर्वैष्णवस्त्रिकपालोवामनोदक्षिणेतितत्रद्वयोस्त्रिकयोस्तंत्रेणानुष्ठानंकुतः कृत्स्नस्यराजसूयस्यफलैक
त्वेनतदेकदेशयोरनयोरपिफलैकत्वात्। नचदर्शपूर्णमासयोरिवात्रकालभेदोस्तियेनापवादः शंक्येतेतिप्राप्तेब्रूमः। श्यामवा
मनयोर्दक्षिणयोर्भेदेनताभ्यामानतानांकर्तॄणांभेदादंगानिभिद्यंते॥ ॥द्वितीयाधिकरणमारचयति॥ ॥राजसूयेप्रक्र
मस्थकर्तारोनियतानकिं। नियतावादक्षिणानांभेदादनियताअमी। अनेकसमुदायात्मराजसूयायतेद्धताः। आद्यौतेननियम्यं
तेविशेषेदक्षिणाभिदा। राजसूयस्योपक्रमेकर्तारः तएवासमाप्तेर्नियम्यंते। कुतः दक्षिणादिभेदेनकर्तृभेदस्यपूर्वमुक्तत्वात्
तथाचयथादक्षिणयायेपरिक्रीतास्तेतदीयंकर्मानुतिष्ठंतुइतरस्मिन्कर्मणिदक्षिणांतरेणतेचान्येवापरिक्रीयतामितिप्राप्तेब्रू
मः। अनेनराजसूयसंज्ञकेनकर्मसमुदायेनमांयाजयेत्येवमाद्येयजमानेनदत्तत्वात्तस्मात्तएवकर्तारः ईदृशमेववरणं

न्याय्यं समुदायस्यैकफलत्वात्। प्रतिकर्मपृथग्वरणे गौरवात्कदाचिद्गृहीतस्यानामत्स्यभेविघ्नप्रसंगात्कर्तृत्वेपि कर्तृत्वधर्मविशेषेदक्षि
णाभेद उपयुज्यते पूर्वकर्तृत्वाधिष्ठानभूताएववामनेन क्रीताः संत आग्नावैष्णवादित्रिकं कुर्युः अयुतेन क्रीताः संतोभिषेचनीयमितिकर्तृ
धर्मविशेषःतस्मान्निर्णयताः॥ तृतीयाधिकरणमारचयति॥ ॥अवेष्टावंगतंत्रत्वंभेदोवालिंगतोग्रिमः।नोत्पत्तौदक्षिणाभेदाल्लिंगबा
ह्यप्रयोगगं।राजसूयप्रकरणे श्रूयते दिशामवेष्टयोभवंतीति। ताश्चावेष्टय उत्पत्तिवाक्यैरेवमाम्नायंते।आग्नेयमष्टाकपालंनिर्वपतिहि
रण्यंदक्षिणेंद्रमेकादशकपालमृषभोदक्षिणावैश्वदेवंचरुंपिशंगीपष्ठौहीदक्षिणामैत्रावरुणीमामिक्षांवशादक्षिणाबार्हस्पत्यंचरुं
शितिपृष्ठोदक्षिणेतिताःस्ववेष्टिषुतंत्रेणांगानामनुष्ठानं कुतः।तल्लिंगाद्यदिब्राह्मणोयजेतबार्हस्पत्यंमध्येविधायाहुतिमाहुतिंहुत्वा
तमभिघारयेद्यदिराजन्यऐंद्रंयदिवैश्योवैश्वदेवमितितत्रमध्येनिधानंप्रयोगैक्यलिंगंतदैक्याच्चतंत्रमितिप्राप्तेब्रूमः।उत्पत्तिगते
नदक्षिणाभेदेनप्रयोगभेदावगमादंगानांभेदःलिंगंतुबहिःप्रयोगविषयंअस्तिचप्रयोगद्वयंराजसूयप्रकरणपाठादंतःप्रयोगए
कः नचप्रकरणादुत्कर्षः कर्तुंशक्यः राजसूयांगभूतदिग्व्यवस्थापननिमित्तोन्मादपरिहारत्वेपणार्थवादेतत्संबंधावगमात्।तथा
चश्रूयतेईश्वरोवाएषदिशोनून्मादितोःयंदिशोनुव्यास्थापयंतिदिशामवेष्टयोभवंतिदिक्ष्वेवप्रतितिष्ठत्यनुन्मादायेतिराजसू
याद्बहिःप्रयोगस्तुएतयान्नाद्यकामंयाजयेदितिविहितःनचासौराजसूयांतःपातीतिवाच्यंयदिब्राह्मणइत्यादिनावर्णसंयोगा
वगमात्।राजसूयेचब्राह्मणवैश्ययोरपिनधिकारात्बहिःप्रयोगतंत्रमतःप्रयोगभेदइतिनिर्णयः॥ ॥चतुर्थाधिकरणमारचयति
पवमानेष्टिहविषांतंत्रभेदोथवाग्रिमः।साध्यदेशाद्यभेदान्नोकाम्यभेदोक्तितोंतिमः।आधानप्रकरणेपठ्यतेअग्नयेपवमानायाष्टा
कपालंनिर्वपेदग्नयेपावकायाग्नयेशुचयइतितैरेतैर्हविःसाध्यस्याग्नेरेकत्वाद्देशाद्यभेदाच्चांगानांतंत्रमितिप्राप्तेब्रूमः।यःकाम
येतोत्तरंवसीयान्श्रेयान्स्यामितितस्याग्नयेपवमानायनिरूप्याथपावकायशुचयेचानेहविषीसमानबर्हिषीनिर्वपेदिति श्रीः
वचनात्काम्यस्यहविषोंगभेदःउत्तरयोस्तंत्रंनित्यप्रयोगेतुत्रयाणांतंत्रं। ॥पंचमाधिकरणमारचयति॥ ।द्वादशाहेसदी
क्षोपसदहर्दिनमानकं।शतत्रयंद्वादशवाषट्त्रिंशाद्यग्रिमोयतः।एकैककर्मणोह्नोस्यज्योतिष्टोमविकारता।एकैकंतदनुष्ठा
नंदिनानांपंचविंशतिःअह्नांद्वादशतात्सुत्यामध्यपक्षस्तदापिकिं।कार्याद्वादशसाद्यस्काःचतुष्काणामुतत्रिकां।एकैकस्येवया

यागस्यविकृतित्वादिहादिमः।अमुख्यकालांगबाधाच्चतुष्कंभिद्यतेत्रिधा।दीक्षाउपसदस्सुत्याःप्रत्येकंद्वादशश्रुताः।सांगस्यद्वादशाहस्यषट्त्रिंशाद्व
वसामताः।द्वादशाहस्यैकैकमहःपृथक्कर्मतस्मिंश्चसदीक्षणीयस्यसोपसत्कस्यससुत्यस्यज्योतिष्टोमस्यविध्यंतोतिदिष्टःअतिदिष्टानांदीक्षाणा
मुपसदांचप्राकृतसंख्याबाधनात्पृथक्कृद्वादशत्वंश्रूतंततोदीक्षोपसदर्थंचतुर्विंशतिर्दिनानिसुत्यार्थमेकंदिनमितिपंचविंशतिरीदृशस्यकर्मवि
शेषस्याह्नोद्वादशभिरावृत्तिभिःशतत्रयंस्यादित्याद्यःपक्षः।तथासत्यह्नांद्वादशत्वंश्रूयमाणंबाध्येततस्माद्द्वादशदिवसाइतिमध्यमःपक्षोभ्युपेत
व्यः।तदापिदीक्षोपसद्भ्यामुपेतस्यैकैकस्याह्नःसांगज्योतिष्टोमविकारत्वात्तत्सर्वंसद्यएवकर्तव्यमित्येकःपक्षःप्रकृतौदीक्षोपसदोर्मुख्यकालत्वा
गेवानुष्ठितत्वादिहापितथैवानुष्ठानंप्राप्तंतच्चमुख्यकालेअनुष्ठानेबाध्येततस्मादंगद्वयस्यप्रधानस्यचद्वादशदिनानिविभज्यानुष्ठानमितिपक्षां
तरंद्वादशाहस्यद्वादशदीक्षाद्वादशोपसदद्वादशसुत्याइत्यंगयोर्मुख्यवत्पृथग्द्वादशत्वश्रुत्याषट्त्रिंशतिसिद्धिराद्धांतः॥ ॥षष्ठाधिकरणमार
चयति॥ ॥सवनीयादिकंतत्रसकृत्स्यादुद्रियतेथवा।प्रयोगैक्यात्सकृन्नैवंमुख्यकालेविधानतः।तत्रद्वादशाहेसवनीयपश्वादिकमंगंदीक्षा
दिवत्सकृदेवानुष्ठेयंकुतःद्वादशाहेनप्रजाकामंयाजयेदितिप्रयोगैकत्वावगमादितिचेत्।मैवं।दीक्षादीनामप्यस्मिन्कालेनुष्ठेयत्वात्।सव
नीयादिकंतुमुख्यस्यकालेनुष्ठेयंअतोमुख्यकालानांभेदादावृत्तिरिद्यते॥ ॥सप्तमाधिकरणमारचयति॥ ॥उपसत्कालआह्वानंद्वादशाहेवि
कारभाक्।नवाघउपलक्ष्यत्वादत्राह्नाप्रकृतावित्र।सुत्यानमनामात्रस्यविवक्षाप्रकृतौतत।विकारमंतरेणात्रतत्सिध्येत्तेनतंत्रता।उपसत्
कालेयत्सुब्रह्मण्याह्वानंप्रकृतावस्तितद्द्वादशाहेचोदकप्राप्तंतस्यमुख्यकालादन्यःकालइतिकृत्वातत्रपूर्वनिर्णीतंइदानीमन्यात्रऊहरू
पोविकारस्तत्रावापपर्यवसायीतिविचार्यतेविकृतौप्रथमोपसद्दिनमारभ्यत्रयोदशेह्निप्रथमसुत्याचतुर्दशेह्निद्वितीयसुत्यैवंक्रमेणचतुर्वि
शेह्निचरमसुत्याभवति।तथासतिप्रकृतौचतुरहइतिसंख्याविशिष्टेनाहःशब्देनसुत्यायाउपलक्षितत्वादत्रापिद्वादशानांसुत्यानामहःश
ब्देनोपलक्षणीयत्वेसतितद्विशेषणभूतचतुःसंख्यास्थानेयथोचितंत्रयोदशचतुर्दशादिसंख्यानामूहनीयत्वेनविकारोभवति।ततोवि
शेषणभेदेनविशेष्यस्याहःशब्दस्यापिद्वादशकृत्वआवृत्तावर्थात्सुब्रह्मण्याह्वानस्यावापःस्यादितिप्राप्तेब्रूमः।प्रकृताविंद्रस्यसुत्या
गमनमात्रंविवक्षितं।चतुरहत्वंतत्रप्राप्तमनूद्यतेउभयथैवसूक्तायांसुत्यामागच्छचतुरहआगच्छेतिवाक्यंभिद्येततत्रापित्रयोदशाहेसुत्या
मागच्छेतिवाक्यंभिद्येततथात्रापित्रयोदशाहेसुत्यामागच्छेत्येवंविधंविकारमंतरेणचतुरहेसुत्यामागच्छेत्येवाह्वानेपिचतुरहशब्दस्या
विवक्षितार्थत्वात्सुत्याकारेणद्वादशानामेकत्वादशेषसुत्यागमनंसिध्यतितस्मादूहरूपविकाराभावात्सकृदावर्तितंतंत्रंसुष्ठु॥अष्टमा
धिकरणमारचयति॥ ॥प्राजापत्येषुकुंभ्यादौभेदोनोवांगभेदतः।भेदोमैवमशेषांगश्रवणादोप्रभुत्वतः।वाजपेयेसप्तदशप्राजापत्यप

335
1945

अ॰क॰र॰मा॰

त्यपशुषु कुंभ्यादि हृदयस्य स्वस्य वपाश्रपण्याश्च भेदः स्यात् तत्तत्पश्वंगानां भिन्नत्वात् । मैवं। पश्वंगानां चरुत्वेपि प्रोढं कुंभ्यादेर्हृदयार्थे श्रपणादौ
प्रभुत्वात् तस्मात्तंत्रं॥ ॥नवमाधिकरणमारचयति॥ ॥किमेकादशिनेषु स्य कुंभ्यादेर्भिन्नता न वा। असंदेहाय भेदो न लिंगादेवास्य सिद्धितः ॥भि
न्नदेवताकेष्वेकादशिनेषु पशुष्वेककुंभीपाके सति किमंगं कां देवतां प्रत्युपाकृतस्य पशोः संबंधीति संदेहे सति प्रदानं सांकर्यं ततस्मात् कुंभ्यादे
रावापद्धतिचेत् मैवं। चिह्नकरणमात्रेण संदेहापागमसिद्धौ लाघवादस्मादत्रापि तंत्रं॥ ॥दशमाधिकरणमारचयति॥ ॥तत्तंत्रं हेयमुत नो
चिह्नं नास्तिवसात्वतः। हेयं नो प्रतिपत्तित्वात् सांकर्येणाप्यदोषतः। एकादशिनेषु कुंभ्यादेर्यत्तंत्रं निर्णीतं तत्परित्याज्यं। कुतः अंगानामिव
वसानां चिह्नकरणासंभवेन सांकर्यप्रसंगादिति चेत् मैवं। वसाहोमस्य प्रतिपत्तिकर्मत्वेन द्रव्यं प्रति योजकत्वाभावेन तद्वपाश्रपणा
र्थकुंभीभेदप्रयोजकत्वस्य दूरापेतत्वात्। नच्चात्र द्रव्यसांकर्यं दोषाय भवति व्यवस्थापकप्रमाणाभावात्। ननु तत्तद्देवताविषयया ज्या
र्धर्चांतरेषु भिन्ना होमाः पूर्वं निर्णीताः। बाढं। तथैवार्धर्चांतितत्र हूयंतां किमायातं द्रव्यसांकर्यं तस्मात् कुंभ्यादेरिव तंत्रं न त्याज्यं॥ ए
कादशाधिकरणमारचयति॥ ॥भिन्नजातिषु कुंभ्यादेस्तंत्रं भेदो थवाग्रिमः। पूर्ववत्साकं वैषम्ये साहित्यासंभवाद्विदा। एकजातिपशु
षु यथा कुंभ्यादेस्तंत्रं पूर्वोक्तं तथात्रापीति चेत् मैवं। अवेरंगानि सह साप्यं ते अजाद्यंगानि तु शिलेबेन ततः साहित्यासंभवात् कुंभ्या
देर्भेदः। ॥द्वादशाधिकरणमारचयति॥ ॥तंत्रं च चतुष्कपालानां भेदो वा नन्महत्वतः। कुंभ्यादीनां तंत्रतामिवं भेदः स्यान्न कृतायिवा। दृश्य
यते। यावतोप्यान्प्रतिगृह्णीया त्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति यथा प्राजापत्येषु कुंभ्या महत्वेन तंत्रं तथात्रापि तंत्रमिति चेत्
मैवं। प्रकृतौ प्रतिपुरोडाशं कपालभेदेन तद्भेदकस्यैव चोदकप्राप्तेः किं चात्यंतविशालेषु कपालेषु चतुर्षु पुरोडाशानां च तेष्ववस्थापि
तेष्वेकस्य कपालस्यैकदेशे पुरोडाशस्यैकस्य समाप्तेर्न कोपि पुरोडाशश्चतुःकपालः सिध्येत्। तस्मात्प्रतिपुरोडाशं कपालचतु
ष्कभेदः॥ त्रयोदशाधिकरणमारचयति॥ ॥अवघातार्थमंत्रः किमसकृत्सकृदेव वा। प्रकारभेदादावृत्तिः कर्मैक्येन सकृद्भवे
त्। अवरक्षोदिवः सपत्नं वध्यासमित्यहवंतीत्यवघातो विहितो मंत्र आवर्तनीयः। कुतः अवघातस्य प्रहाररूपत्वात् प्रहाराणां
च भिन्नत्वादिति प्राप्ते ब्रूमः। तंडुलनिष्पत्तिपर्यंतत्वेनाखिलप्रहाराभ्यासयुक्तस्यावघातस्यैककर्मत्वात्तत्रविनियुक्तस्य मंत्र
स्यावघातोपक्रमे सकृदेव पाठः॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥नानाबीजेषु तन्मंत्रः सकृद्वासकृदग्रिमः। विशेषाग्रह
णाद्वैवमवघातस्य भेदनः। नानाबीजेष्टौ बीजानामवघातस्यांगभूतो मंत्रोपमे तदर्थ इति विशेषस्याग्रह्यमाणत्वात् सकृद

श्रीः

दोप्रयोज्य इति चेन्मैवं। अवघातानां भिन्नत्वेन समंत्रत्वाय प्रत्यवघातं मंत्रस्यावर्तनीयत्वात्॥ ॥पंचदशाधिकरणमारचयति॥ ॥निर्वापा
दिषु तन्मंत्राः सकृद्देदनवाग्रिमः। द्रव्यकर्मैक्यतामेवं संस्कारस्य पृथक्कृतः। दर्शपूर्णमासयोर्निर्वापो बर्हिर्लवनं वेदिस्तरणाज्यग्रहणं धावत्वयः क्रि
ताः। चतुरो मुष्टीन्निर्वपति। अयुजो युजो वा मुष्टीन् लुनाति त्रिधातु पंचधातु वा वेदिं स्तृणाति चतुर्जुह्वां गृह्णातीति तेषु निर्वापादि मंत्रा विहिता देवस्य
त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति बर्हिर्देवसदनं दामीति ऊर्णाम्रदसं त्वा स्तृणामीति शुक्रं त्वा शुक्रायां धा
म्ने धाम्ने देवेभ्यो यजुषे यजुषे गृह्णामीति चेत्। मंत्राणां द्रव्यैक्यात् कर्मैक्याच्च व्रीह्यवघातन्यायेन सकृत्पाठ इति प्राप्ते ब्रूमः। समंत्रकप्रथम
मुष्टिनिर्वापेणये संस्कृतास्तंडुलास्तेभ्योन्ये मुष्ट्यंतरनिर्वापेण संस्कार्याः अतस्तत्संस्कारसिद्ध्ये नानाबीजन्यायेन मंत्रावृत्तिः। एवं लवनादिषु
योज्यं॥ ॥षोडशाधिकरणमारचयति॥ ॥वेदिप्रोक्षणमंत्रः किमावर्त्यः सकृदेव वा। आद्यस्यान्त्यप्रोक्षणात्रित्वसंस्कार्यैकत्वतः सकृत्। वेद्यास्त्रिः
प्रोक्षणं विहितं तत्र मंत्र आम्नायते। वेदिरसि बर्हिषे त्वेति तत्र त्रिः प्रोक्षणक्रियाया आवृत्त्या तन्मंत्रस्याप्यावृत्तिरिति चेत् मैवं। संस्कार्याया वेद्या
एकत्वेन समंत्रकप्रथमप्रोक्षणेन तत्संस्कारसिद्धौ पुनर्मंत्रवैयर्थ्यात्। प्रोक्षणक्रियावृत्तिस्तु वाचनिकीति वैषम्यं॥ ॥सप्तदशाधिकरण
मारचयति॥ ॥एककालीनबह्वंगकंडूमंत्रभिदा न वा। अंगभेदान्मंत्रभेदो निवृत्त्यैकत्वतो नसः। ज्योतिष्टोमे कृष्णविषाणया कंडूयत इति प्र
कृत्याधनोपेते कंडूयने स्फापिप्पलाभ्यम् इत्यादिको यं मंत्रो विहितः। तत्र युगपद्बहुष्वंगेषु त्पन्नायाः कंडूया अपनयनार्थं यो प्रत्यंगमभ्यस्यमाने कं
डूयने मंत्राभ्यासः कर्तव्यः कुतः कंडूयितव्यानामंगानां भिन्नत्वादिति प्राप्ते ब्रूमः। नह्यंगशेषो मंत्रः येन तद्भेदमभ्यस्येत किं तर्हि कंडूनिवृत्तये य
त्कार्यं कंडूयनं तदेव कृष्णविषाणाविशिष्टत्वाकारेण विधीयते विधीयमानस्य तस्य कंडूयनस्य शेषो मंत्रः तेन च कंडूयनेनात्मनि निर्दुःख
त्वलक्षणः संस्कार उत्पद्यते। तत्र संस्कार्यस्यात्मन एकत्वात् सकृन्मंत्रपाठेन तत्संस्कारसिद्धेरवघातवन्मंत्रस्य नावृत्तिः कंडूयनं तु दृष्ट
प्रयोजनपर्यंतं प्रत्यंगं नानाबीजावघातक्रियावदावर्तता। तस्मात् सकृदेव कंडूयनं॥ ॥अष्टादशाधिकरणमारचयति॥ ॥स्वप्नादि
मंत्र आवर्त्यो नो वाद्यो स्त्वंतरायनः। कृत्स्नोद्देशप्रवृत्तत्वान्निमित्तभेदतः सकृत्। दीक्षितस्य स्वप्न नद्युत्तरणवृष्टिच्छेदनामेध्यदर्शनानि नि
मित्तकाः स्तन्मंत्रजपाः पठिताः। त्वमग्ने व्रतपा असीत्यादिः स्वप्नमंत्रः। देवीरापो अपां नपादित्यादिर्नदीतरणमंत्रः। उंदतीर्बलं धत्तेत्यादिर्वृ
ष्टिच्छेदनमंत्रः अबद्धं मन इत्यादिरमेध्यदर्शनमंत्रः। यदि निद्रामध्ये प्रबोधे रत्यैर्व्यवधीयेत। नदी च बहुस्रोतोयुक्ता द्वीपैः वृष्टिश्च विच्छेदैः
अमेध्यानि च देशैः तदा तैरंतरायैर्निमित्तेषु भिद्यमानेषु नैमित्तिका मंत्रा आवर्तनीयाः इति प्राप्ते ब्रूमः। रात्रिगतां कृत्स्नां निद्रामुद्दिश्य मं
त्राभिधानान्निमित्तमेकं एवमितरत्रापि योज्यं तस्मान्नास्त्यावृत्तिः॥ ॥एकोनविंशाधिकरणमारचयति॥ ॥प्रयाणे प्रत्यहं मंत्रो भिन्नो
नो वात्र विश्रमैः। प्रयाणभेदाद्भिन्नो नो गत्यैक्यादानिवृत्तितः। भद्रादभिश्रेय इत्यादिः प्रयाणमंत्रः तस्य विश्रमभेदेन निर्गमभेदाद्भ

332
1948

रइति प्राप्ते ब्रूमः। दीक्षितस्य निर्गमनादारभ्य पुनः प्रवेशपर्यंतं विश्रामव्यवधानेपि प्रयोजनैक्यादेकमेव प्रयाणं ततो नमंत्रावृत्तिः॥ विंशा
धिकरणमारचयति॥ ॥तंत्रेणोपरवेमंत्रोभिधीयतेवाबहूक्तितः। तंत्रं बहूक्तिः पृतार्थाभिन्नो सौख्येयभेदतः॥ संति ज्योतिष्टोमे पंचमपादे चतुष्ट
याकारा बाहुमात्राः खाता उपरवानामकाश्चत्वारो गर्ताः तदीयखनने मंत्रे बहुवचनं श्रूयते। रक्षोहणो वलगहनो वैष्णवान्खनामीति तत्र प्र
त्युपरवं मंत्रावृत्तौ नोपपद्यते। तस्मात्तंत्रमिति प्राप्ते ब्रूमः। एकस्मिन्नपि बहुवचनं पूजार्थमाचार्यादिष्विव प्रयोक्तुं शक्यं। खेयास्तूपरवा
भिन्नाः ततः खननभेदेन तदंगभूतो मंत्र आवर्तनीयः॥ ॥एकविंशाधिकरणमारचयति॥ ॥हविष्कृदादिमंत्राणां सवनीयादिगामिनां
तंत्रं न वा सहत्वार्थे तंत्रं नो कालभेदतः॥ सवनीयेषु पुरोडाशेषु हविष्कृन्मंत्रश्चोदकप्राप्तः प्राजापत्येषु पशुषु अभिगुप्रैषमंत्रः कृष्णग्रीवयोः
पश्वोरनुवाक्या मनोतामंत्रौ हविष्कृदेहीति हविष्कृन्मंत्रः दैव्याः शमितार इत्यधिगुप्रैषमंत्रः॥ अग्ने नय सुपथेति पुरोनुवाक्या त्वं ह्यग्ने प्रथ
मो मनोतेति मनोतामंत्रः॥ एते चतुर्विधा मंत्राः स्वस्वविषये तंत्रेण पठनीयाः तथा सति सवनीयपुरोडाशानां सहोपक्रमो नुगृह्यते एवमु
दाहरणांतरेष्वपि तत्र प्राजापत्याः पशवः ऋतुपशुभिः सहोपक्रांताः अतो द्विविधेष्वपि पशुषु तंत्रं कृष्णग्रीवौ च सहोपक्रांतौ अतः तयोः
पुरोनुवाक्यायाः तंत्रं तथा मनोतामंत्रस्यापीति प्राप्ते ब्रूमः॥ सवनत्रयगतानां पुरोडाशानां तावत्कालभेदः सुसिद्धः। ऋतुपशवः प्रा
तरारभ्यंते। प्राजापत्यास्तु पर्यग्निकृता उत्सृष्टं विलंब्य ब्रह्मसामकाले आलभ्यंते द्वयोः कृष्णग्रीवयोः मध्ये सौम्यः पशुरालभ्यते। ततः स
र्वत्र कालभेदेनानुष्ठानभेदात् तदंगभूतेषु मंत्राणामावृत्तिः॥ ॥इति माधवीये जैमिनिन्यायमालाविस्तरे एकादशाध्यायस्य चतुर्थः पा
दः॥ समाप्तश्चाध्यायः॥ ॥तंत्रं ह्यद्योद्देशकत्वादेकादश उदीरितं। प्रसंगोन्योद्देशकत्वाज्जघन्यः संनियोज्यते। अभ्यर्हितं पूर्वमिति
न्यायमाश्रित्य तंत्रप्रसंगप्रतिपादकयोरेकादशद्वादशाध्याययोः पूर्वोत्तरभावउपपादितः। तंत्रप्रसंगयोलक्षणभेदोप्यनेन सूचि
तो भवति। उभयोद्देशेन सकृदनुष्ठानं तंत्रं अन्योद्देशेनान्यदीयस्यापि सहानुष्ठानं प्रसंग इति तद्भेदः। तस्य प्रसंगस्य प्रतिपादके
द्वादशाध्याये प्रथमपादस्य प्रथमाधिकरणमारचयति। ॥पश्वर्थानुष्ठितैर्नास्ति पुरोडाशउपक्रिया। अस्ति वा विध्यभावा
न्नाद्यर्थतस्त्वस्तु लौकिकवत्। अग्नीषोमीये पशौ यानि चोदकप्राप्तानि प्रयाजादीन्यंगान्यनुष्ठितानि तैः पुरोडाशे उपकारो नास्ति कु
तः उपकारबोधकस्य विधेरभावात् चोदकस्तु दर्शपूर्णमासवत् पशुरनुष्ठेय इत्येवं रूपत्वात् पशावेव तदुपकारं बोधयति। ननु
पशुपुरोडाशस्यापीष्टिविकृतित्वात्तत्रापि चोदकोस्तीति चेत् बाढं अत एव भिन्नचोदकबलात् पुरोडाशोपकाराय प्रयाजाद्यंगा

श्रीः

नि पृथगनुष्ठेयानीति प्राप्ते ब्रूमः। यद्यपि पश्वर्थैः पशुपुरोडाशस्योपकार इत्येतादृशं शास्त्रं नास्ति तथापि अयमुपकारोर्थप्राप्तो नवि
निवारयितुं शक्यते। यथा प्रदीपस्य वैदिकार्थं निर्मितस्यार्थसिद्धमार्गप्रकाशकत्वमनिवार्यं तथा पशुतंत्रमध्ये नुष्ठीयमानस्य पु
रोडाशस्य पश्वर्थैरंगैरुपकारः केन वार्यते तस्मादन्यार्थैरप्यस्त्युपकारः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥आज्यभागौ पुरोडा
शे न स्तः स्तो वास्य चोदकः। लुप्तस्तस्तौ न तौ भेवं प्राप्तो गांशालौ स्यपनात्। तौ न पशौ करोतीति निषेधादाज्यभागयोः पशावभावे
न पुरोडाशे प्रसंगसिद्धिर्नास्ति ततस्तौ विचार्यते पशुपुरोडाशे आज्यभागौ नेति प्राप्ते कुतः पशुपुरोडाशविषयस्य चोदकस्य लु
प्तत्वादन्यथा प्रयाजादीनामपि पुनरनुष्ठानापत्तेरिति प्राप्ते ब्रूमः नतावत्पुरोडाशे चोदको लुप्यते बाधकाभावात् पूर्वोक्तप्रसंगसि
द्धिस्तु प्रयोगवचनमेव बाधते। न चोदकं अन्यथा प्रयाजादीनां पुरोडाशांगकत्वाभावेन प्रसंगसिद्धेरप्यवक्तव्यत्वात्। ननु प्रयो
गबाधौ प्रयाजाभागौ न स्त इति चेत्। न आज्यभागौ प्रतिबाधिकायाः प्रसंगसिद्धेरभावात्। ततः प्रसंगसिद्धांगविषयप्रयोगां
गस्यैव बाधादबाधितेन प्रयोगवचनांशेनाज्यभावनुष्ठाप्येते यथा देवदत्ते यज्ञदत्तयानमारूढे देवदत्तयानं निवर्तते। न तु वस्त्रा
लंकारादिबाधनं॥ ॥तृतीयाधिकरणमारचयति॥ ॥सोमे वेद्यां कृतायां यदिष्टिप्रकृतिकं भवेत्। तत्र कार्येष्टिकी वेदिर्न वा वेदि
स्तु सौमिकी। प्रचाराय हविःसादनार्था कार्येष्टिकी पृथक्। मैवं सादनमप्यत्र कर्तुं शक्यं ततो न सा। सांगप्रधानहविःप्रचारा
य कृतायां सौमिक्यां महावेद्यामेवेष्टिप्रकृतिकहविषां सादयितुं शक्यत्वात् पृथगैष्टिकी वेदिर्न कार्या॥ ॥चतुर्थाधिकरणमारचय
ति। ॥सौम्यचर्वादिहोमः किं सौमिकैरैष्टिकैः कृत। कार्यसिद्धेः सौमिकैः स्याद्वैगुण्यादिहैष्टिकैः॥ सोमे ग्रहचमसेषु प्रयुक्तेषु प्र
वर्तमाने सौम्यचरौ सवनीयपुरोडाशेषु च सौमिकैर्ग्रहचमसैर्होमः कुतः तैर्होतुं शक्यत्वेन कार्यसिद्धेरिति चेत् मैवं। वैगुण्यप्रसंगा
त्। जुहूस्रुवादिभिः कर्तव्यस्य ग्रहादिभिः कृते वैगुण्यं स्यात् विद्यंते सोमप्रयुक्ताः ऐष्टिकस्रुवादयः तस्माद्वैगुण्यार्थमैष्टिके
र्होमः॥ ॥पंचमाधिकरणमारचयति॥ ॥श्रप्यः पशुपुरोडाशः शामित्रे यादि चोदिते। शालामुखीयमाम्नाय पशुतंत्रगतत्वतः
श्रपणं विहितं गार्हपत्ये सो त्र प्रयुज्यते। प्राग्वंशपूर्वभागे त्वहो मे वैगुण्यहानये। अग्नीषोमीयादिपशुः शामित्रे ग्नौ श्रप्यते। तत्र
पशुतंत्रमध्यपाती पशुपुरोडाशोपि तत्रैव श्रपणीय इति चेत् मैवं। प्रकृतौ पुरोडाशश्रपणं गार्हपत्ये विहितं स च गार्हपत्यः सो

339
1941

मेप्रयुक्तः प्राचीनवंशशालाख्या अंतःपूर्वभागे प्रवर्तमानस्य शालामुखीय नाम्ना विहितस्य पूर्वप्रसिद्धस्याहवनीयोत्तरवेदिनिष्
नेरूर्ध्वं गार्हपत्यत्वात्। तस्माद्वैगुण्यायतत्रश्रपयितव्यं॥ ॥षष्ठाधिकरणमारचयति॥ ॥शालामुखीयवह्नौ किं श्रप्यतां कौंडपायिने। किंवा प्राजहितेवह्नौ
चोदकप्राप्तितोग्रिमः। प्राग्वंशपश्चिमो वह्निर्भवेत्प्राजहितोनसः। अग्निहोत्रेति नाम्नास्तो नाम्नास्तो लिंगतो बली। कुंडपायिनामयनगतेग्निहोत्रे यच्छ्रपणं त
च्छालामुखीये कर्तव्यं। कुतः चोदकेन प्राप्तत्वात्। तथाहि प्रकृतिभूतेग्निहोत्रे गार्हपत्ये श्रपणं विहितं शालामुखीयश्च पूर्वमाहवनीयोपि सोमे गार्हपत्यः संप
न्नः शालामुखीय एवोत ऊर्ध्वं गार्हपत्यः इतिश्रुतेः सच द्वादशाहगवामयनपरंपरया चोदकेनात्र प्राप्तः तस्मात्तत्र श्रपणमिति प्राप्ते ब्रूमः। प्राचीनवंशप
श्चिमवह्नेः पूर्वप्रसिद्धमुख्य गार्हपत्यस्य प्राजहितइति पूर्वाचार्यसंज्ञा। सच प्राजहितोग्निहोत्रनाम्नात्रातिदिश्यते। नामातिदेशश्च शीघ्रबुध्दिहेतुतया
लिंगातिदेशात्प्रबलः ताल्लिंगपरंपरातिदेशात्प्रबल इति वक्तव्यं तस्मात्प्राजहिते श्रपणं॥ ॥सप्तमाधिकरणमारचयति॥ ॥हविर्धानोर्ध्वकाले किं सोषधा
र्थमतोंतरं। नास्त्यस्ति वानशक्तत्वाद्देशभेदादि नांतिमः। ज्योतिष्टोमहविर्द्धाननामकयोः प्रवर्तनादूर्ध्वमोषधद्रव्यकाणां पुरोडाशानां निर्वापायतयोरेव
शक्तत्वाच्छकटांतरमन्वेष्यमिति चेत्। नदेशभेदात् महावेद्यां मंत्रपूर्वकं प्रवर्त्य हविर्धानमंडपे हविर्धानाख्ये शकटे स्थापिते निर्वापस्तु गार्हपत्यात्पश्चि
मदेशे किंचास्य त्रितीयं शकटं अनांसि प्रवर्तयंतीति बहुवचनोक्तेः तस्माच्छकटांतरे निर्वापः॥ ॥अष्टमाधिकरणमारचयति॥ ॥दीक्षाजागरणं
प्रायणीयादौ तद्भवेन्नवा। अदृष्टार्थत्तस्तत्स्यान्नरक्षार्थत्वतोन्यदा। दीक्षाकालादन्यकाले यद्यपि प्रायणीयादिकं तथाप्यदृष्टार्थं जागरणं प्रसंगा
त् सिध्यतीति चेत्। नतस्य रक्षार्थत्वात् ततः कालांतरे पृथक् कर्तव्यं॥ ॥नवमाधिकरणमारचयति॥ ॥विहारभेदे निर्वापमंत्रादेस्तंत्रतानवा। तं
त्रं द्वयोः स्मृतेः सिध्येरुत्तमोस्यात् पृथक् भवेत्। वरुणप्रघासेष्वध्वर्युप्रतिप्रस्थात्रोर्विहारभेदेपि मंत्रैकेन वपठ्यमाने पूर्वयोरर्थस्मृतिसिद्धेस्तंत्र
मिति चेन्न निर्वपामीत्युक्तमपुरुषार्थस्य पाठमंतरेण स्मृत्यभावात् तस्मादुभयोः पृथक् पाठः॥ ॥दशमाधिकरणमारचयति॥ ॥अन्वाधानं दी
क्षणीयादिषुस्यान्नास्ति वास्तितत्। चोदकान्नास्ति सोमिक्य विहारेण ध्वतत्ततः। दीक्षणीयादिष्वन्वाधानं चोदकर्तव्यं चोदकप्राप्तत्वादिति चेन्न अ
ग्निधारणार्थमन्वाधानं तच्च धारणं दीक्षणीयादिभ्यः प्राचीनेन सोमिकेनैव विहरणेन सिद्धं। तस्मादन्वाधानं नास्ति॥ ॥एकादशाधिकरणमार
चयति॥ ॥व्रतोपायनमेषास्ति नवा चोदकतोस्ति तत्। उपेतस्यापरित्यागे विरोधान्नास्ति तत्पुनः। सत्यवचनव्रतचर्यादिसंकल्परूपं व्रतं सोमार्थं
पूर्वमुपेतं तच्चासोमसमाप्तिन परित्यक्तं तत्र पुनरुपायनं विरुध्यते। अग्ने व्रतपते व्रतं चरिष्यामीति अयं उपायनमंत्रः। नहि चर्यमाणे व्रते
चरिष्यामीति प्रयोगः संभवति। तस्मात्प्रसंगात्सिद्धं व्रतं॥ ॥द्वादशाधिकरणमारचयति॥ ॥परिग्रहायदेवानामन्वाधानं भवेन्नवा। प्रसि
द्धत्वाद्वनेनैवं वैश्वदेवेन सिध्यतः। धारणार्थमन्वाधानं प्रसंगात्सिध्यतु नाम देवतापरिग्रहार्थत्वसिद्धत्वात्पुनः कर्तव्यं। अन्वाधानमंत्रस्य देव

तापरिहार्थत्वमपि दर्शपूर्णमासयोराम्नायते। ममाग्ने वर्चो विहवेष्वस्त्वित्यग्निं गृह्णामीति निगतयत्तं देवतापरिग्रहस्याप्यत्राविद्यमानत्वात्। तथाचश्रूय
ते। आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणोग्निरवमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता एवोभयतः प
रिगृह्य दीक्षतइति। प्रधानदेवतानामेवात्र परिग्रहो नांगदेवतानामिति चेत्। एवमपि वैश्वदेवतापरिग्रहेण सर्वदेवतापरिग्रहः सिध्यति विश्वशब्
दस्य सर्वशब्दपर्यायत्वात्। तस्मान्न पृथगन्वाधानं॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥पत्नीसंनहनं कार्यं चोदकादिति चेन्नतत्। बंधवा
सोधारणयोर्योक्त्रबंधनसिध्धितः। यद्यदृष्टार्थं बंधः यद्वा वासोधारणं दृष्टप्रयोजनं तदुभयमपि सोमिकेन योक्त्रबंधनेन सिध्यति। योक्त्रेण
पत्नीं संनह्यतीति सोमे विधीयते। तस्मात्प्रसंगात्सिद्धं पत्नीसंनहनं। ॥चतुर्दशाधिकरणमारचयति॥ ॥आरण्याशनमत्रास्ति चोदक
प्राप्ततो यदि। दृत्यर्थत्वेन तत्सिद्धं सोमप्रोक्तात्पयोव्रतात्। स्पष्टोर्थः। ॥पंचदशाधिकरणमारचयति॥ ॥यजमानगताभक्ष्यानसंस्तारण्य
वघादि। नवत्यर्थाद्वमेकिंतु कर्तव्याः प्रतिपत्तये। इडाप्राशित्रभक्षाणां प्रतिपत्त्यर्थत्वं षष्ठे निरूपितं। षोडशाधिकरणमारचयति॥ ॥अन्वा
हार्योत्र दातव्यो नवाद्यः सोममात्रगाः। गवादिदक्षिणाय स्मान्नानत्वंतरवर्जनात्। गौश्चाश्वस्येत्यादिदक्षिणाः प्रधानस्यैव नत्वंगानां दक्षिणाः
सोमस्येत्यभिधानात्। अतइष्टिषु चोदकप्राप्तोन्वाहार्यो दातव्यः इति चेन्मैवं। सोमप्रयोगमध्यपातिनां तु पृथगंगत्वाभावात्। तस्मान्न दा
तव्यः॥ ॥सप्तदशाधिकरणमारचयति॥ ॥ऋत्विक्कुभक्षातिवर्तेरन् यद्यन्वाहार्यवन्नतत् यजमानवदेतेषां कार्यत्वात्प्रतिपत्तये। दूरं
च प्रतिपत्त्यर्थत्वं दशमाध्याये वर्णितं॥ अष्टादशाधि॰॥ ॥नैतासु वरणो होतुरस्ति वानास्त्यभावतः। नास्त्यन्वाहार्यवद्धर्मकत्वादत्रोष्टि
वद्भवेत्। यथैतास्विष्टिषु पृथगंगत्वाभावादन्वाहार्यो नास्ति तथा होतुर्वरणमपि नास्तीति चेत्। नवरणस्य धर्मार्थत्वात्। दर्शपूर्णमासेष्ट
वपि धर्मार्थमेव वरणं वरणात्प्रागपि सामिधेनीषु होतुः प्रवृत्तत्वात्। नहि प्रवृत्तस्य पुनरनरानतिः कर्तव्या। तस्मात्प्रकृतावि वात्रापि धर्मा
र्थं वरणं नत्वानत्यर्थं न सौमिकवरणेनास्य प्रसंगात्सिद्धिः॥ ॥एकोनविंशाधिकरणमारचयति॥ ॥आतिथ्यादिगते बर्हिष्युक्षणादि
पृथक् द्रुवा। आद्योतंत्रं प्रसंगत्वान्नप्रसंगान्निवारणात्। यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्येति श्रुतं। तच्च बर्हिस्त्रयाणां
साधनमिति चतुर्थे निरूपितं। तस्मिन्साधारणे बर्हिषि प्रोक्षणादिसंस्कारः प्रतिकर्म पृथगनुष्ठेयः कुतः तंत्रप्रसंगयोरत्रासंभवा
त्। नतावत्तंत्रमस्ति दर्शगतया गत्रयवदेककालीनत्वात्। नापि प्रसंगः एकस्यतंत्रस्य मध्ये तयोरपठितत्वादिति प्राप्ते ब्रूमः। बर्हिष
एकत्वात्सकृत्प्रोक्षणादिभिः संस्कारे पुनः प्रोक्षणाद्यपेक्षा नास्ति तेच प्रोक्षणादयः प्राथम्यादातिथ्यायां कार्याः तत उपसत्स्वग्नीषोमी

श्रीः

341
(845)

अ॰र॰मा॰ येच प्रसंगासिद्धिर्निवारयितुंशक्यते॥ ॥विंशाधिकरणमारचयति॥ ॥तत्रस्तरणमंत्रस्य प्रसंगोयदिवाभिदा।आद्यः प्रोक्षणवन्मैवंदेश
स्तरणभेदतः।तस्मान्नातिथ्याबर्हिर्बिर्ऊर्णाम्रदसंत्वास्तृणामीतिआस्तरणमंत्रस्याग्नीषोमीयेप्रसंगासिद्धिः स्यात्।प्रोक्षणादौतद्दर्श
१७२ नक्षितिचेत्मैवं।आतिथ्यायाः प्राग्वंशोदेशः।अग्नीषोमीयस्योत्तरवेदिः ततोदेशभेदेनस्तरणभेदेसतितत्संनिपातिनो मंत्रस्याप्यावा
र्तनीयत्वात्॥ ॥एकविंशाधिकरणमारचयति॥ ॥संनाहेहरणे मंत्रावावर्त्यौकिंनवाग्रिमः।पूर्ववन्नेदृशंकार्यप्रकृतौतदभावतः।आ
तिथ्यादेशेवस्थितंबर्हिःसंनह्याग्नीषोमीयदेशेयदानीयतेतदासन्नहनेहरणेचद्वयोःसंनहनं बृहस्पतेस्त्वाहरामीतियोमंत्रौतौस्तरण
मंत्रवदावर्तनीयावितिचेत्।मैवं।प्रकृतौलवनदेशादानयनेकार्येतौमंत्रौदृष्टौनतुगार्हपत्यादाहवनीयंप्रत्यायनेकार्येअतोत्रापिप्रा
ग्वंशादुत्तरवेदिंप्रत्यानयनेतौमंत्रौनचोदकात्प्राप्नुतः॥ ॥इतिमाधवीयेजैमिनिन्यायमालाविस्तरेद्वादशाध्यायस्यप्रथमःपादः॥
द्वितीयपादस्यप्रथमाधिकरणमारचयति॥ ॥सर्वार्थोवैदिकार्थोवाविहारशक्तिमत्वतः।आद्यःप्रत्यक्षवचनैर्निराकांक्षत्वतोग्रिमः।वि
हारोगार्हपत्यादिस्त्रिविधोग्निःसचनुःकृत्वाल्लौकिकदहनपवनवैदिकाग्निहोत्रादिव्यवहारार्हइतिचेत्।मैवं।गार्हपत्येहवींषिश्रपयं
तिदक्षिणाग्नावन्वाहार्यंपचंतिआहवनीयेजुह्वतीत्येताद्दृशैः प्रत्यक्षवचनैर्निराकांक्षाणांगार्हपत्यादीनांलौकिककार्येत्वायोगात्।तस्मा
दग्निहोत्रादिवैदिकार्थोविहारः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥सवनीयपुरोडाशोतिदिष्टोनोतविधृते।अन्त्यःपिधानतो
नस्यादेवसंस्कृतयोभवेत्।अग्नीषोमीयपशौविहितोयःपुरोडाशःसछिद्रपिधानार्थःस्मार्षिरोहवाएताहिंपशुर्यर्हिवपामुत्खिद
तिव्रीहिमयःपुरोडाशोभवति।अपिहित्याअछिद्रतायाइतिश्रुतेःसचपुरोडाशःसवनीयेपशौचोदकप्राप्तोपिनकर्तव्यः।सवनीयैर्वि
हितैरेवपुरोडाशैस्तच्छिद्रपिधानात्।अनुसवनीयंसवनीयःपुरोडाशानिरूप्यंतेपिहित्याअछिद्रतायाइत्युक्तत्वादितिप्राप्तेब्रूमः।पु
रोडाशोस्यपशुदेवतासंस्कारार्थत्वंदशमस्यप्रथमपादेनिरूपितं।पिधानवाक्यंत्वर्थवादः।तस्माच्चोदकप्राप्तःपुरोडाशःकर्तव्यः।तृ
तीयाधिकरणमारचयति॥ ॥सवनीयपुरोडाशेस्यादाहुतिर्हविष्कृतः।नवातिदेशात्स्यान्मैवंपश्वाह्वानात्प्रसाधितः।पशौकृ
तेनहविष्कृदाह्वानेनपुरोडाशादिष्वपिप्रसक्तत्वात्।नास्त्याह्वानंयद्यप्योषधार्थंहविष्कृदाह्वानंपशौनास्तितथाप्येषाकृतावि
ता॥ ॥चतुर्थाधि॰॥ ॥अस्त्याहुतिश्चरौसोम्येनास्तिवापशुपाकतः।निवृत्त्वादास्तिमैवमनिवृत्तेःपुरोस्थितेः।तृतीयसवने
यसोम्यचर्वादयःतेषुहविष्कृदाह्वानंपुनःकर्तव्यंसकृदाहूतायास्तस्याःपशुपाकेनिष्पन्नेसतिनिवृत्तत्वादितिचेत्मैवं।प्रकृ

श्रीः

343/1941

तौपत्नीसंयाजेभ्यऊर्ध्वंहविष्कृतःपत्न्याउत्थानवाक्येनपशावपितःपूर्वंनिवृत्त्यभावात्।तस्मात्तत्कालीनेषुसोम्यचर्वादिषुनास्ति
पुनराह्वानं। ।पंचमाधिकरणमारचयति। ॥निशियज्ञेदर्शतंत्रेनोतास्येतन्नदर्शगंतंत्रमध्येविध्यभावादस्त्वर्थ्यातद्विधानतः।
अग्नयेरक्षोघ्नेपुरोडाशमष्टाकपालंनिर्वपेद्योरक्षोभ्योबिभीयादितिविधायेदमाम्नातं।अमावास्यायांनिशियजेतेति।एतस्मिन्
यज्ञेदर्शयागस्यांगतंत्रंनप्रसज्यते।कुतःदर्शकर्मणस्तंत्रमध्येराक्षोघ्नस्यविध्यभावात्।यत्रत्वमावास्यायामितिपदंतत्काल
परं।कर्मपरत्वेलक्षणापत्तेः।अतोनवाक्यात्तंत्रमध्येविधिःप्रकरणंतुभिद्यते।काम्येष्टिकांडएतस्याःपाठादितिप्राप्तेब्रूमः।माभू
द्वाक्येनप्रकरणेनवातंत्रमध्येविधिःप्रकरणंतुभिद्यतांतथाप्यमावास्याकालेदर्शकर्मणःप्रक्रांतत्वेननिशिक्रियमाणोयागो
र्थवशाद्दर्शकर्मतंत्रमध्यपातीभवति।तस्मादस्तिप्रसंगसिद्धिः॥ ॥षष्ठाधिक॰॥ ॥आरंभणीयासौर्यादौनोतस्यांनप्र
योगवत्।क्रत्वर्थानप्रयोगार्थाक्रत्वारंभेततोभवेत्।दर्शपूर्णमासयोःप्रथमप्रथमप्रयोगस्यैवोपक्रमआरंभणीयानप्रयो
गांतरस्येतिनवमेनिर्णीतंआदौकृतस्यकर्तृसंस्कारस्ययावज्जीवपर्याप्तत्वाद्यथानप्रयोगांतरआरंभणीयातथायावज्जी
वलक्षणप्रकृतिकालमध्यपातिनांसौर्यादिविकृतीनांनास्तितदपेक्षाइतिप्राप्तेब्रूमःक्रत्वर्थाहिसानप्रयोगार्थाक्रत्वंतराणिहि
सौर्यादीनिततःप्रयोगांतरवैषम्यात्सौर्यादौसाकर्तव्या।नयावज्जीवकालप्रकृत्यंगंकर्तृधर्मत्वेनद्वितीयेनिर्णीतत्वात्।अतोनो
क्तोरक्षोघ्नन्यायोत्रप्रसरतितस्मान्नात्रप्रसंगः॥ ॥सप्तमाधिकरणमा॰॥ ॥यापंचदशरात्रस्यसुब्रह्मण्याद्यकालगा॥
आग्नेयीस्यात्किमैंद्रीवाप्रथमाह्नानुगुण्यतः।आग्नेयीप्रथमंवाहोविरोधानुदयाद्बलि।नबह्वनुग्रहादैंद्रीकुलार्थत्यागिनीति
तः।पंचदशरात्रस्याग्निष्टुत्प्रथममहः।तस्यचैकाहरूपोग्निष्टुत्प्रकृतिःतत्रोपसत्कालीनसुब्रह्मण्याह्वानार्थमियमाग्नेयी
विहिताततेदेतत्प्रकृतिरूपेप्रथमेहनिचोदकतःप्राप्नोतिइतरेषुचतुर्दशस्वहःसुस्वस्वप्रकृत्यनुसारेणऐंद्रीप्राप्ताउ
पसत्कालीनायाश्चसुब्रह्मण्यायाअहर्गणेषुतंत्रंनिर्णीतंतथासत्यत्रोपसत्कालीनसुब्रह्मण्यायामाग्नेय्यैंद्र्योःकलहप्र
सावसंजातविरोधितयाप्रबलस्यप्रथमस्याह्नआनुगुण्येनाग्नेयीकार्येतिप्राप्तेब्रूमः।बहूनामह्नामनुग्रहायैंद्री
कार्या।त्यजेदेकंकुलस्यार्थइतिन्यायेनबहुत्वमपिप्राबल्यकारणं॥ इदमेवाधिकरणंवार्तिककाराभिमतेनोदाह

अ० क० ८० रणेनारचयति॥ ॥सप्तयागसमूहस्य ब्रह्मवर्चसकामस्य चातुर्मास्यवत्। वार्त्रघ्नावाज्यभागावर्थप्रथमत्वाद्धीयेयोः दर्शधर्मातिदेशेन प्राप्तावाज्यभागाविति यतः। घृतं मधीपइले
षांबहूनां बलितो चिता। काम्येष्टिकांडे श्रूयते। आग्नेयमष्टाकपालं पुरोडाशमष्टाकपालं निर्वपेदैंद्रं पयस्याग्नेयं पुरोडाशमेकादश कपालं दधि मधुघृतमापो धाना तत्सं
सृष्टं प्राजापत्यं पशुकाममाइति तेषां च सप्तयागानां प्रयोगे स्यादाज्यभागौ तत्रेणानुष्ठेयौ तिथिंद्रयागएँद्राग्नविकृतिः दधियागः सान्नायविकृतिः। तदुभया
नुसारेण दर्शधर्मातिदेशादाज्यभागयोः पुरोनुवाक्ये वृधन्वत्यावेवो प्राकृतः मधुघृतमापइत्येतद्द्रव्यकात्स्न्येयोयागाउपांशुयाजविकृतयः तत्रितयानु
सारेण पूर्णमासधर्मातिदेशात् वार्त्रघ्नावेवो प्राप्नुतः तत्रैंद्रयागः प्राजापत्ययागात् पूर्वपठितः। दधिद्रव्यं च मधुघृतादिकद्रव्येभ्यः पूर्वं पठितः अतः प्राब
ल्याद्वृधन्वत्याविति प्राप्ते ब्रूमः। यद्यपि धर्मेमुख्यस्य प्रथममवगम्यते तथापि भूयसामनुग्रहाय पश्चाद्बाध्यते तस्माद्वार्त्रघ्नौ॥ ॥अष्टमाधिक०॥ ॥
आग्नावैष्णवसारस्वतयोरिष्ट्योर्मुख्यं। आज्योनियामकाभावाद्दत्यं प्राथम्यतो भवेत्॥ आग्नावैष्णवमेकादशकपालं निर्वपेत् सरस्वत्याज्यस्य यजे
तेतिश्रूयते। तत्राग्नावैष्णवस्यैंद्राग्नविकृतित्वेन सारस्वताज्यस्य चोपांशुयाजविकृतित्वेनाज्यभागमंत्रविकल्पे नियामकाभावादिति चेन्मैवं। आग्नावै
ष्णवस्य प्रथमपठितत्वेन मुख्यत्वात्तज्जमनुष्ठानं युक्तं॥ ॥नवमाधिक०॥ ॥यद्दृष्ट्यार्षपशुनेत्याडौदीक्षाकालिथसोमकः। आद्यः प्राथम्यतो मैवं प्रधा
नस्य बलित्वतः। यदृष्ट्यापशुना सोमेन वा यजेत सोमावास्यायां पौर्णमास्यां वेति श्रूयते तत्रांगभूतायादीक्षणीयेष्टेः प्रधानभूतायाः सुत्यायाश्चैक
मेव पर्वदिनं वचनाद्भासेते तच्चविरुद्धं एकादीक्षातिस्र उपसदः पंचमीप्रसुत इत्युपसद्भिः तयोर्मध्ये व्यवधानावगमात्। तत्र पूर्वोक्ताग्नावै
ष्णववत्प्रथमेष्टेः प्रथमपठितत्वाद्दीक्षणीयेष्टिः पर्वण्यनुष्ठेयात दनुसारेणादिनांतरे सुत्यायाउत्कर्ष इति प्राप्ते ब्रूमः प्रधानत्वात्। सुत्यैव दर्शेनु
ष्ठेयात दनुसारेणाशेषभूतादीक्षादिनांतरे प्रकृष्यते॥ ॥दशमाधिकरणमा०॥ ॥पश्वर्थपरिधौ स्वीयधर्मेयद्वादिधर्मता। मुख्यत्वादादिमोत्स्या
न्नियोजनविधानतः। पशुमस्तु चातुर्मास्येषु परिधौ पशुं नियुंजंतीति श्रूयते। तत्र मार्जनादयः परिधेः स्वकीयधर्मास्त एव मुख्यत्वात्तास्मि
न्ननुष्ठेया न तु प्रोक्षणादयो यूपधर्माः तेषां परिधिं प्रत्यमुख्यत्वादिति प्राप्ते ब्रूमः। यथाग्निपरिधानार्थत्वेन मार्जनादीनां परिधिधर्माणामनु
ष्ठानं तथा यूपकार्ये नियोजने परिधिविधानेन यूपधर्माणां प्रोक्षणादीनामप्यनुष्ठानं युक्तं। ततोद्विधर्मत्वं॥ ॥एकादशाधिकरणा०॥ ॥ श्रीः
विरोधेतक्षणाद्यत्र कार्यं नोवा पतेयज्ञो। यूपासक्तिः स्तत् कार्यं न तद्रूपोपमर्दनात्। त्वक्सहितत्वोक्रूयणत्वादयः परिधिधर्मास्तेषां विरोधि
नस्तक्षणोक्रूयणत्वादयो यूपधर्माः ते च यागे प्रत्यासन्नाः। यागनिष्पादकस्य पशोरंगे यूपे वर्तमानत्वात्त्वक्सहितत्वादयस्तु न यागस्य
निष्पादकं हविः हविष आधारोग्निः अग्नेरंगं परिधिः परिधौ च वर्तमानत्वात्। तस्मात्तक्षणादय एवकार्या इति प्राप्ते ब्रूमः। तक्षणादि
ना परिधिस्वरूप उपमर्दिते सति कुत्र पशुनियोजनं क्रियेत तस्मान्न कार्याः॥ ॥द्वादशाधिकर०॥ ॥सवनीयपुरोडाशाः प्रा
तःसवनिगाः स्त्रयः। सवनीयपशुस्तत्र तंत्रित्वं किं विकल्प्यते। पशोरेवोनियमो हेत्वभावाद्विकल्प्यते। पुनः प्रैषात्स्वरूप्रासाद्यशोरे

रेवाहितं त्रता। यदीयतंत्रमध्येर्थांतरं सतंत्री अर्थांतरं प्रसंगितया सति प्रातःकालीनसवनीयपुरोडाशानां सवनीयपशोश्च मध्ये तंत्रित्वमस्त्येवे
तिनियमे हेतुर्नास्ति उभयत्र प्रत्यक्षांगोपदेशाभावात्। चोदकप्राप्तेश्च समानत्वात् माध्यंदिनतृतीयसवनद्वयगतानां पशुतंत्रमध्य उपक्रमात्
प्रसंगित्वमेव न तु तंत्रित्वमिति निश्चेतुं शक्यते। पशोः प्रातःकालीनानां चोपक्रमेपि पौर्वापर्यं न ज्ञायते। तस्माद्विकल्पेन तंत्रित्वमिति प्राप्ते ब्रूमः
सवनीयपशौ चोदकप्राप्ते मैत्रावरुणप्रैषमंत्रे पाठविकारः प्रत्यक्षमाम्नायते ओँअमुं यजमान इति पाठस्य यं स्थाने तास्तृतीयजमान इत्यवि
शेषितत्वात्तथा सोमांते स्वरोः प्रतिपत्तिः प्रत्यक्षमाम्नायते। संस्थिते यज्ञे प्रस्तरं हरति स्वरुं वा यज्ञं वेशसायेति तस्मात्पशुस्तंत्री पुरोडाशा
नां तूपक्रमे पश्चाद्भावित्वनिश्चयाभावेपि समाप्तिपूर्वभावित्वनिश्चयेन मध्यपातित्वात् प्रसंगित्वं॥ ॥त्रयोदशाधिक०॥ ॥प्रकृतिर्वि
कृतिर्वा स्यात्तंत्रिणी प्रकृतीर्यतः। नित्यासा उपदिष्टांगा मैवं कामबलित्वतः। यद्व्यापशुनेत्यादिशास्त्रात्प्रकृतिविकृत्योः नित्यकाम्येष्ट्योपर्य
ण्येवानुष्ठेयतया सहप्रयोगे सति यावज्जीवकर्तव्यत्वाद् गोपदेशयुक्तत्वाच्च प्रबला प्रकृतिर्दर्शपूर्णमासेष्टिस्तंत्रिणी जीवनमध्यपातित्वाच्चो
दकप्रवृत्तेरुपदेशापेक्षत्वाच्च दुर्बलासौर्यादिविकृतिः प्रसंगिनीति प्राप्ते ब्रूमः। काम्यस्य शीघ्रप्रवर्तकत्वादनुष्ठाने प्रबला विकृतिरेव तंत्रिणी।
यद्यपि विकृतिरेकाहकाला प्रकृतिर्बहुकाला तथापि सहप्रयोगं कृत्वापि चिंतितं॥ ॥चतुर्दशाधिकरणमारचयति॥ ॥बर्हिराग्रयणे किं
चित्प्रसूनं वा बहुत्वतः। प्राथम्याच्चाग्रिमो मैवमलोपात्कांस्यभोजिवत्। ऐंद्राग्नवैश्वदेवद्यावापृथिवीयायागा आग्रयणेष्टौ प्रयुज्यंते। तत्रैंद्रा
वैश्वदेवयोर्बर्हिर्मात्रं चोदकप्राप्तं तत्प्रकृतौ बर्हिर्विशेषस्यानुक्तत्वात्। द्यावापृथिव्येतु स्वप्रकृत्यनुसारेण प्रसूनं बर्हिरिति दिश्यते। लूनशे
यान्न्यूनत्वात्पुनरुत्थानं वा। तत्राग्रयणेष्टौ किंचिद्बर्हिर्मात्रं कर्तव्यं। ऐंद्राग्नवैश्वदेवयोरनेकत्वेन प्राथम्येन च तदनुगुणस्यन्याय्यत्वादिति
प्राप्ते ब्रूमः। बर्हिरंतरस्वीकारे द्यावापृथिव्ये प्रमाणाप्राप्तः प्रसूनत्वनियमो लुप्येत। प्रसूनस्वीकारे चैंद्राग्नवैश्वदेवयोर्न किंचिल्लुप्यते।
तस्मादलोपाय कांस्यभोजिन्यायेन प्रसूनमेव कर्तव्यं। शिष्यस्य कांस्यभोजनव्रतमस्ति गुरोस्तु तन्नास्ति तयोः सहभोजने यथोपसर्ज
नभूतं शिष्यमनुसृत्य तमलोपयितुं कांस्यमाद्रियते तथात्रापि द्रष्टव्यं॥ ॥पंचदशाधिकरणमारचयति॥ ॥द्यावापृथिव्यस्तंत्रीस्या
त्सर्वेवा तंत्रिणो ग्रिमः। प्रैषन्यायात्प्रसूनस्य तंत्रित्वापादकत्वतः। प्रसूनत्वं नोपदिष्टमविरोधात्समाश्रितं। तंत्रित्वमायितो शक्तं नातः सर्वे
प्रतंत्रिणः। यथा मैत्रावरुणप्रैषमंत्रविकारः पशुसंबंधी सन्पशोस्तंत्रित्वमापादयति तथा प्रसूनत्वं द्यावापृथिव्यसंबंधित्वाद्द्यावापृथि
व्यस्य तंत्रित्वमापादयतीति प्राप्ते ब्रूमः। उक्तप्रैषमंत्रविकारः प्रत्यक्षः श्रुतः इदं प्रसूनत्वमतिदिष्टत्वान्न तंत्रितामापादयितुं क्षमं।

345
1945

जै॰अ॰३॰२॰ नच प्राबल्याभावे कथं तदाश्रयमिति वाच्यं ऐंद्राग्नादिनासहविरोधाभावमात्रेण तदाश्रयणात् तस्मादेकस्य तंत्रित्व नियमाभावेनाग्नेदिवत्सर्वे
१०७५ ष्वत्रतंत्रिण॥ ॥इति माधवीये जैमिनिन्यायमालाविस्तरे द्वादशाध्यायस्य द्वितीयः पादः॥ तृतीयपादस्य प्रथमाधिकरणमारचयति॥
त्वग्वाससोरष्टरात्रे विकल्पो नियमोथवा। समुच्चयो त्र नामातिदेशसाम्याद्विकल्प्यते। मुख्येन त्वगेव स्याद्वासएव बहुत्वतः। योग्यत्वेन व्यवस्थ
याउभयोः स्यात्समुच्चयः। अष्टरात्रे विश्वजित्प्रथममहः। तस्मिन्प्रकृतिभूतादेकाहाद्विश्वजितः परिधानार्थो वसस्त्वक् प्राप्नोति नाम्नातस्यातिदे
शात् अथ भद्ध्याद्युदेत्यवत्सत्वचं परिधत्तइति प्रकृतौ विधानात् ततो ज्योतिर्नामकोभिप्लवः षडहः तत्र प्रकृते ज्योतिष्टोमादहतं वासो नाम्नातिदि
श्यते। ततो भिजिदष्टममहः तत्रापि चोदकाद्वासः प्राप्नोति तत्रद्वयोर्नामातिदेशयोः समबलत्वादष्टस्वहःस्तु त्वग्वाससोर्वैकल्पिकत्व इति प्राप्ते ब्रूमः। प
क्षः। इतरेषामाह्नां बहुत्वेन प्रबलत्वाद्वासएवेत्यपरः पक्षः। कौपीनत्वे वासो योग्यं। त्वक्तु प्रावरणे योग्या तस्मात्सर्वानुग्राहकेण समुच्चयेनात्र
प्रसंगोपोह्यत इति सिद्धांतः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥स्वाधर्म्यमनुनिर्वापेष्वस्ति नोवा बहुत्वतः। अस्तिमैवं तत्र मध्ये विहितत्वात्प्रसंगि
ता। अग्नौ श्रूयते। अग्नीषोमीयस्य पशुपुरोडाशमनु देवस्य वांहवींषि निर्वपतीति तत्र हविषामष्टानां बहुत्वेन पुरोडाशाद्बलवत्वात्तंत्रित्वं ततः स्व
धर्माएवते अनुष्ठेयाः। ननु पुरोडाशधर्मेण प्रसंगासिद्धिरिति चेन्मैवं। प्रत्यक्षेण पुरोडाशतंत्रमध्ये विधानेन प्राप्तस्य प्रसंगित्वस्य युक्तिमात्रेण
वारयितुमशक्यत्वात्। साधर्म्यं नास्ति॥ ॥तृतीयाधिक०॥ ॥स्रुक्स्रुवद्वयआघारे विकल्प्यं तेन वाग्निमः। एकार्थत्वाद्दृष्टार्थभेदात्संभवतो
ति मः। दर्शपूर्णमासयोराम्नायते। स्रुक्सुमाघारयतीति तेषां स्रुवत्वादीनामाघारोपघारद्वारा कार्यस्यैकत्वाद्विकल्प इति चेन्मैवं। दृष्टत्वारभे
दाच्छिसंततमाघारयभावेप्यदृष्टद्वारभेदात्सहानुष्ठानं संभवाच्च न विकल्पः॥ ॥चतुर्थाधिक०॥ ॥समुच्चयो यवव्रीह्योर्विकल्पो वात्र पूर्वव
त्। आद्योमैवं नैरपेक्ष्याददृष्टाभेदतोंतिमः। अष्टदोषनिदानविकल्पपरिहाराय प्रयोगवचनानुग्रहाय च समुच्चयः स्यात्। स्रुवाघारध
र्मवदृष्टस्य कल्पयितुमशक्यत्वात्। तर्हि स्वदृष्टभेद इति चेत् एकपुरोडाशनिष्पादिनमंतरेणान्यस्य कार्यस्यादर्शनात्। नच पेषणादौ दृ
षदुपलयोरिव समुच्चयः शंकनीयः। तद्वत्परस्य सापेक्षत्वाभावात्। अतएव व्रीहिभिर्यजेतेति त्यक्तनिरपेक्षणो व्रीहिर्णयागसाधनत्वं
विधीयते। एवं यवैर्यजेतेत्यत्रापि तस्माद्विकल्पः॥ ॥पंचमाधिकर०॥ ॥वैश्वानरे पाथिकृते साहित्यं वा विकल्पनं। साहित्यं स्याददृष्टाय श्री:
विकल्पः स्यात्समाधये। विहितयोर्दर्शपूर्णमासयोः कदाचिदननुष्ठाने प्रायश्चित्तं श्रूयते। वैश्वानरं द्वादशकपालं निर्वपेदमावास्यां वा पौ
र्णमासं वातिपातयेति। अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपातयेदिति च। अत्र
पूर्ववत्। दृष्टप्रयोजनाभावाददृष्टार्थमुभयं समुच्चित्यानुष्ठेयमिति चेन्मैवं यत्तद्वैगुण्यसमाधेर्दृष्टप्रयोजनत्वादन्योन्यनिरपेक्षयो

व्रीहियववद्विकल्पः एवमग्नयजुः सामवेदेषु विहितस्याननुष्ठानान्निषिद्धस्याचरणाद्वा यद्यत्र वैगुण्यं। तत्र वैगुण्यमात्रस्य समाधानाय निरपेक्षाणि प्रा
यश्चित्तानि विहितानि भूः स्वाहेति गार्हपत्ये जुहुयात् भुवः स्वाहेति दक्षिणाग्नौ जुहुयात् स्वः स्वाहेत्याहवनीये जुहुयात् भूर्भुवः स्वाहेत्याहवनीये जुहुयादि
ति तान्येतानि विकल्प्यंते प्रत्येकं वैगुण्यसमाधानक्षमत्वात्॥ ॥षष्ठाधिकरणमारचयति॥ ॥भिन्नस्कंनादिहोमादेर्विकल्पो वा समुच्चयः। विकल्पः पू
र्ववन्मैवं विदोषो विहितत्वतः। यज्ञपात्रभेदनहविर्द्र्व्यस्कंदनादिनिमित्तेषु श्रूयते। भिन्ने जुहोतीत्यादि तत्र वैगुण्यसमाधानार्थत्वात्पूर्ववद्विकल्प
इति चेन्मैवं। दोषसंयोगमनुपपन्नस्य भेदनादिनिमित्तमेवोपजीव्य विहितत्वात्। अतो नैमित्तिकानामेनेकेषां प्रयोगवचनपरिगृहीतत्वेन समुच्चयः
॥सप्तमाधिकरणमारचयति॥ ॥स्वरो मंत्रे भाषिकः किं स्यात्प्रावचनिकोथवा। ब्राह्मणोक्तेराद्यिमोंत्यः तदुक्तेलक्षणत्वतः। तत्तरीयब्राह्मणस्वरो
भाषिक इत्युच्यते। तदुक्तमाचार्यैः छंदोगा बह्वृचाश्चैव तथा वाजसनेयिनः। उच्चनीचस्वरं प्राहुः स वै भाषिक उच्यत इति सोयं भाषिकः। क्रतौ मंत्रे
षु प्रयोक्तव्यः ब्राह्मणे नोक्तत्वात् मंत्रविनियोगस्य लिंगेन सिद्धत्वात्स्वरविशेषविधानाय ब्राह्मणे मंत्रः उपादीयत इति प्राप्ते ब्रूमः। नहि ब्राह्मणे मं
त्रः। पठ्यते किंतु पठनसिद्धस्वरायापेतं मंत्रकांडे समुत्पन्नं मंत्रमुपलक्षयितुं यितदुपलक्षणसमर्थानि मंत्रोपक्रमसदृशानि कानिचिदक्षराण्युच्चार्य
ते। इमामगृभ्णन्रशनाम् तस्येत्यस्याभिधानीमादत्त इति। एवमेवाभिप्रायं द्योतयितुं क्वचिच्छब्दांतरेणोपपद्यते तद्यथा सावित्राणि जुहोति प्रसूत्या
इत्यौतियत्र लिंगासिद्धो विनियोगः तत्र ब्राह्मणमनुवादकमस्तु। तस्मात्प्रावचनिकः स्वरः क्रतौ प्रयोक्तव्यः॥ ॥नवमाधिकरणमारचयति॥ ॥
ब्राह्मणोत्पन्नमंत्रस्यात्रे स्वर्यैभाषिकोथवा। आद्योन्यमंत्रवन्मैवं स्वरांतरविवर्जनात्। वानस्पत्योसीत्ययं मंत्रो ब्राह्मण एवोत्पन्नः। तं प्रोहेद्धान
स्पत्योसीत्याम्नानात्। नचास्य मंत्रस्य कस्यचित्प्रावचनिकस्वरोस्ति। तस्माद्भाषिकस्वरः॥ ॥दशमाधि०॥ ॥यदा कदाचिन्मंत्रांते वाक
र्मानियमाद्भवेत्। आद्यो मैवं कृत्स्नजन्यस्मृतेरंगत्वतोंतिमः। इषेत्वेतिमंत्रः शाखाच्छेदकरणं इमामगृभ्णन्निति रशनादानेइत्यादिमंत्रेव
द्धासंशयः। किं मंत्रादौ कर्म कर्तव्यमुतागृभ्णन्रशनामित्येवंविधस्य कर्मप्रकाशमंत्रपदस्योच्चारणकाले किंवायस्य कस्यचित्पदस्य
काले आहोस्विन्मंत्रांते अथवा तथापि किंचित्कालं विलंब्येति तत्र नियामकाभावाद्यदा कदाचिदिति प्राप्ते ब्रूमः। कृत्स्नमंत्रजन्यमर्थस्मरणं क
र्मणोंगं तत्र समाप्तेः पूर्वं नोदेति विलंबे तु स्यन्नं स्मरणं विनश्यति ततः परिशेषान्मंत्रांते कर्म संनिधीतत्॥ ॥एकादशाधिकर०॥ ॥मंत्रा
दौ किं वसोर्धारां मंत्रांते वात्र संस्थिते। आद्यो होमेषु सांतत्याद्द्वादशांतेषु तद्धुतिः। अग्नौ किंचित्कर्म विहितं संततां वसोर्धारां जुहोतीति
तत्र सांतत्यमविछिन्नत्वं तच्च मंत्रकर्मणो सहोपक्रमे समुत्पद्यते। तस्मान्मंत्रादौ कर्म संनिपात इति प्राप्ते ब्रूमः। तस्मिन्वसोर्धाराख्ये कर्मणि
द्वादशद्वादशानि जुहोतीति तं द्वादशभिर्मंत्रवाक्यैः संपाद्यमेकमाकृतिस्वरूपं द्वादशं। तद्यथा वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे

347/1945

अ॰ क॰ मा॰

धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च इत्येतैर्द्वादशभिर्मंत्रैराज्येरेकाहुतिर्होतव्या। ईदृशा उत्तराहुत
यः प्राणश्च मे पानश्च म इत्यादिभिर्निष्पाद्यंते च होमा द्वादश तेषु मध्ये मध्ये विलंबाभावः। सांतत्यं न तु मंत्रकर्मणोः सहोपक्रमः तस्मात्पूर्वन्याये
न मंत्रांते कर्मसंनिपातस्य नास्ति कश्चिद्विघ्नः॥ ॥द्वादशाधिकरणमारचयति॥ ॥आघारे मंत्रसाहित्यं धारावासंततागिर्भः। कर्मैकत्वान्नाज्य
धारानैरंतर्यस्य संभवात्॥ संततमाघारयतीत्यत्र पूर्ववदाहुतिनैरंतर्यं न संभवति आहुतेरेकत्वात्। अतो मंत्रकर्मसाहित्यस्यैव संततशब्दार्थ
त्वात् मंत्रादौ कर्मोपक्रम इति चेन्मैवं। स्रार्यमाणाज्यबिंदुनैरंतर्यस्य शब्दार्थत्वसंभवात् न च प्रयाजाद्याहुतिष्वपि नैरंतर्यमस्तीति शंक
नीयं तत्र विच्छिद्य विच्छिद्य बिंदुपातेति कर्मवैकल्याभावात्। अत्र तु न तथेति वैषम्यं न तथा सत्याघारायया वदाज्यं जुह्वा ग्रहीतं तत्सर्वं नैरंतर्येण विच्छे
दे नाहवनीये पातनीयमिति संततशब्दार्थः। यदि मंत्रकर्मणोः सहोपक्रमस्तदानीमनेन मंत्रेणेतिवत् तृतीयाश्रुत्युक्तं पूर्वकाललक्षणं मंत्रस्य कार
णत्वं हीयते तस्मात्पूर्ववन्मंत्रांते संनिपातितः॥ ॥त्रयोदशाधिक०॥ ॥पूषाद्येकार्थमंत्राणां साहित्यं वा विकल्पना। आद्यः शक्यत्वतो नैवं
मंत्रांते संनिपाततः। पुरोडाशविभागे त्रयो मंत्राः श्रुताः पूषा वां विभजतु भगो वां विभजतु अर्यमा वां विभजतु इति। तत्र समुच्चित्यानुष्ठातुं
शक्यत्वात् समुच्चय इति चेन्मैवं। प्रथममंत्रांते कर्मणः संनिपाते सति मंत्रांतरे प्रयोजनाभावात्। तस्माद्विकल्पः व्रीहियवयोर्निर्णीतस्यैव विक
ल्पस्यायं प्रपंचः॥ ॥चतुर्दशाधिक०॥ ॥चतुर्भिरभ्रिमित्यत्र विकल्पो वा समुच्चयः। विकल्पः पूर्ववन्नैवं समूहे करणत्वतः॥ अत्र श्रूयते।
चतुर्भिरभ्रिमादत्त इति पूर्वोक्तविभागमंत्रवत् प्रतिमंत्रं पृथक्करणत्वं नास्ति। चतुःसंख्यया समूहे करणत्वप्रतीतेः तस्मान्मंत्रांते कर्मसंनिपा
तस्य बाधेनैव समुच्चयः स्यात्। न च पूर्वस्यैकैकस्य मंत्रस्यांते संनिपातो न स्यादिति शंकनीयं। वाचनिकसंख्यया न्यायसिद्धस्य तस्य
बाधितत्वात्॥ ॥पंचदशाधिक०॥ ॥प्रथमंत्रौ समुच्चेयौ विकल्प्यौ वा चतुष्टवत्। आद्य उक्तिद्वयान्नैवं समुच्चित्योदीरणात्॥ उरु प्रथस्वे
ति पुरोडाशं प्रथयति उरु ते यज्ञपतिः प्रथतामिति पुरोडाशं प्रथयतीति ब्राह्मणेन पुरोडाशप्रथने द्वौ मंत्रौ विनियुक्तौ तस्य च मंत्रविनियो
गस्य मंत्रलिंगेनैव सिद्धत्वाद्ब्राह्मणागतं वचनद्वयं चतुःसंख्यावगतसमुच्चये पर्यवस्यतीति चेन्मैवं। तस्मिन्वचनद्वये मंत्रयोः परस्पर
नैरपेक्ष्यप्रतिभासेन समुच्चयस्यायुक्तत्वात्। अतो लिंगसिद्ध एवार्थोऽनूद्यत इति व्रीहियववद्विकल्पः॥ ॥षोडशाधिकरणमारचय
ति॥ ॥उद्दिवेत्युच्छ्रयस्वेति विकल्पो वा समुच्चयः। विकल्पः स्मारकत्वैक्यादाकार्यत्वतोऽन्तिमः॥ यूपस्योच्छ्रयणे करणभूत एषो मंत्रोऽ
ध्वर्युणा पठ्यते उद्दिवं स्तभानांतरिक्षं पृण दृंहस्व पृथिवीमुपरेणा दृंहीः। उच्छ्रियमाणाय यूपाय प्रेषितेन होत्रा मंत्रः पठ्यते। उच्छ्रयस्व वनस्पते वर्ष्मन्

श्रीः

349 / 1945

पृथिव्या अधीति अनयोर्मंत्रयोर्यूपोच्छ्रयणस्मारणमेकमेव कार्यं तस्माद्विकल्प इति चेन्मैवं। करणमंत्र उच्छ्रयणं करोतीत्येवं स्मारयति।
होत्रस्तु क्रियमाणमुच्छ्रयणमनुवदन्नध्वर्योर्यूपोच्छ्रयणं कर्तव्यमित्येवंविधां स्मृतिं जनयति तत्र स्मार्यस्योच्छ्रयणस्यैकत्वेपि कर्तव्य
मित्यस्य करोमीत्यस्य च स्मृतिप्रकारस्यान्यत्वात् कार्यैक्याभावेन समुच्चयः॥ ॥द्वितीयाधिकरणमारचयति॥ ॥उच्छ्रयस्व समि
द्धस्येत्यादीनां किं विकल्पनं। समुच्चयो वा कार्यैक्यादाद्योऽनुस्यूततयेतिमः॥ उच्छ्रयस्वेत्युगेका समिद्धस्य श्रयमाण इति द्वितीया। ऊर्ध्व
ऊ षु ण इति तृतीया। ऊर्ध्वो नः पाहीति चतुर्थी। ता एताः क्रियमाणमनुवदंत्यो होत्रा पठ्यंते। तासां यूपोच्छ्रयणकर्तव्यतास्मरणस्य कार्य
स्यैकत्वाद्विकल्प इति चेन्मैवं। प्रथममंत्रेणोत्पन्नायाः स्मृतेरुत्तरोत्तरमनुस्यूतेः पृथक्प्रयोजनत्वात्तस्मात्समुच्चयः॥ ॥इति मा
धवीये जैमिनिन्यायमालाविस्तरे द्वादशाध्यायस्य तृतीयः पादः॥ ॥चतुर्थपादस्य प्रथमाधिकरणमारचयति॥ ॥सारस्व
तीमनूच्येति विकल्पोऽथ समुच्चयः। जपैक्यादादिमोंत्यस्यात्प्रकारस्य विभेदतः॥ दीक्षितस्य वाड्डियमानात्पूर्वं जपाय मंत्राः श्रूयंते सा
रस्वतीमनूच्य वाग्यतः स्यादिति एवमाग्नावैष्णवीं बार्हस्पत्यामुदाहार्यं अत एव सूत्रकारः। अथ वैकेषामाग्नावैष्णवीं सारस्वतीं बृहस्प
त्यामुत्तमामनूच्य वाग्यतः स्यादिति। तत्रानुवचनशब्दादभिधेयस्य जपकार्यस्यैकत्वाद्विकल्प इति प्राप्ते ब्रूमः। जपस्यादृष्टार्थत्वे
नादृष्टप्रकारभेदे सति कार्यनानात्वात्। एवं सूक्तवाक्शीरभिधानमंत्रेषु सजातीयैः समुच्चयो द्रष्टव्यः॥ ॥द्वितीयाधिकरणमार
चयति॥ ॥इदं वादिद्वयोः किं स्यात्साहित्यं वा विकल्पनं। साहित्यं पूर्ववन्नैवं देवताबोधनैक्यतः॥ ऐंद्रबार्हस्पत्ये कर्मणि इदं वा
मास्ये हविः प्रियमिंद्राबृहस्पती इत्यादिके याज्यापुरोनुवाक्ये द्विविधे आम्नाते तयोः सारस्वत्यावत्समुच्चय इति चेन्मैवं। दृ
ष्टप्रयोजनस्य देवताबोधनस्यैकत्वात्। तस्माद्विकल्पः॥ तृतीयाधिकरणमारचयति॥ ॥पुरोनुवाक्यान्वयाज्या विकल्प्या
वा समुच्चिता। पुरोबाधः समाख्यातो वचनाच्च समुच्चयः। देवताप्रकाशनकार्यस्यैकत्वात् याज्ययोर्यथा विकल्पः तथैवैक
युग्मगतयोरिति चेन्मैवं। पुरोनुवाक्येति समाख्यायोत्तरकालीनयाज्यामंतरेणानुपपत्तेः। किंच पुरोनुवाक्यामनूच्य या
ज्यया जुहोतीति प्रत्यक्षेण हविःप्रधानकार्यभेदोक्तिपुरःसरं साहित्यं विधीयते तस्मात्समुच्चयः॥ तृतीयाधिक०॥ ॥कथ

णेष्वपिविकल्पः स्यात्साहित्यंवाग्निमोयतः। कार्यैस्यमानेतर्लाभादेशोक्तेश्च समुच्चयः। अजयाक्रीणातिवास साक्रीणातिहिरण्येनक्री
णातिइत्यादिनावहूनिसोमक्रयणसाधनानिद्व्याण्याम्नातानितेषांकार्यैक्याद्विकल्पइतिचेन्नैवं। बहुभिर्द्रव्यैर्विक्रेतुरानतेः सोतल
भ्याद्दशभिः क्रीणातीतिसंख्योक्तेश्च समुच्चयः। चतुर्थाधिकरणमारचयति॥ ॥गुदोपयजनेकिंस्याद्विकल्पोथसमुच्चयः। आ
द्यस्याद्दर्थकर्मत्वान्नदोषप्रतिपन्नितः। अग्नीषोमीयेगुदेनोपयजतीतिश्रुतेरेकादशिनेषुतच्चोदकप्राप्तंतत्रोपयजनस्यार्थ
कर्मत्वंगुदेनेतितृतीयाश्रुत्याप्रतीयते। तस्यचार्थकर्मणएकेनसिद्धत्वादेकादशानांगुदानांविकल्पइतिचेन्नैवं। प्रयाजशेषन्या
येनतृतीयाश्रुतिविपरिणामेसतिशेषप्रतिपत्तिसंस्कारविधानात्। तस्मात्समुच्चयः॥ पंचमाधिक॰॥ ॥एकादेयासमुच्चेयंविक
ल्पावाद्यआनतेः। सोलभ्यादंतिमोनेरपेक्षात्संख्यांतरादपि। आधानेश्रूयते। एकादेयाषड्देयाद्वादशदेयाइत्यादितत्रसो
मत्रयणन्यायेनानतेः सोलभ्यात्समुच्चयइतिचेत् मैवं। संख्यानांव्रीह्यादिवत्परस्परनैरपेक्षावगमात् समुच्चयेश्रूयमाणा
भिः संख्यांतरस्यदुर्वारत्वाच्चतस्माद्विकल्पः॥ षष्ठाधिकरण॰॥ ॥समुच्चयोजाघनीनांनवाद्योगुदवन्नतत्। प्रकृतौनि
यमादर्थकर्मातोत्रतथात्वतः। एकादशिनादिगणेषुजाघन्यापत्नीसंयाजनंचोदकप्राप्तंतत्रप्रतिपत्तिकर्मत्वाज्जाघनी
नांगुदानामिवसमुच्चयइतिचेत्। मैवं। दर्शपूर्णमासयोः पत्नीसंयाजरूपेर्थकर्मण्याज्यआघनीद्रव्येविकल्पेनविहितेते
चाभेअग्नीषोमीयपशौचोदकेनप्राप्तेतत्रजाघन्यांप्राप्तायांपुनरपिजाघन्यापत्नीःसंयाजयतीतिविहितंसचपुनर्विधिःस्व
वैयर्थ्यपरिहारायातिदेशप्राप्तमर्थकर्मत्वंनिवार्यप्रतिपत्तिकर्मत्वंप्रापयतीतिपूर्वपक्षीकृत्यविकल्पेनातिदिष्टायाजाघन्या
नियमेनपुनर्विधेश्चरितार्थत्वान्नार्थकर्मत्वंनिवारणीयमितिसिद्धांतनीयं॥ततः प्रकृतावग्नीषोमीयपशावर्थकर्मत्वेनवि श्री:
कृतिष्वर्थकर्मणश्चैकयाजाघन्यानिष्पत्तेर्गुददृष्टांतासंभवाजाघनीनांविकल्पः। ॥सप्तमाधिकरण॰॥ नित्यवाल्पो द्योकाम्यव
ह्निः संयुज्यतेथबाधकः। कार्यभेदाद्दादिमोत्यः काम्येनान्यप्रसंजनात्। अग्निचयनेकर्मण्युखांनिष्पाद्यतस्यामुखायाम
ग्निर्ध्रियतेसनित्योनित्योग्निः तत्प्रकरणेकाम्योवह्निः पठ्यतेवृक्षाग्राज्ज्वलतोब्रह्मवर्चसकामस्याहृत्यादवदध्यादितितत्र
नित्यस्याग्नेर्होमः कार्यः काम्यस्यतुफलायधारणंअतः कार्यभेदात्समुच्चयइतिप्राप्तेब्रूमः। फलायधृतेनैवाग्निनाहोमस्या

पिप्रसंगासिद्धेर्नित्योबाध्यते। तथासतिकामिनोवह्न्यंतरमकामिनोनित्योग्निरितिव्यवस्थितोविकल्पः॥अष्टमाधिक॰॥ ॥
सोग्निराहवनीयोवानाद्यआकृतियोगतः। अन्योन्याश्रयतोमैवंसंस्काराच्चेनसोत्रहि। सपूर्वोक्तः काम्योवह्निराहवनीयो
भवितुमर्हतिकुतः तन्निर्वचनस्याकृतियोगस्यतस्मिन्संभवात्। आगत्यकृत्यतेस्मिन्नित्याहवनीयातेचात्रकाम्याकृतयः। तस्मा
दाहवनीयधर्मागतश्रीधारणाद्यः तत्रकर्तव्याः तत्रकल्पसूत्रकारेणदर्शिताः नक्तमाहवनीयंधारयतिनित्योगतश्रियइ
तिपरस्पराश्रयत्वंअथाधानसंस्काराद्दाहवनीयत्वंतद्यत्रास्यसंस्कारस्याभावान्नास्याहवनीयत्वं। ॥नवमाधिकरण॰॥ ॥
अस्याधानादिनोवात्रसर्वशेषत्वतोस्तितत्। नसंस्कृतस्थानपातान्मथनस्यात्रसंभवात्। अत्रपूर्वोक्तेवह्नावाधानादिकमस्तिकुतः
आधानस्यसर्वकर्मशेषत्वात्। नैतद्युक्तं। आधानादिभिः संस्कृतंनित्यमग्निंबाधित्वातस्यस्थानेवस्थितत्वेनाग्न्युत्पादकसंस्कारा
नुपयोगात्। नचज्वलतोवृक्षाग्रादाहृतस्यारणिमंथनेनोत्पत्तिः संभवतितस्मान्नास्याधानादिकं। ॥दशमाधिकर॰॥ ॥
धृतिर्विकल्पितोरव्यस्यकिंवानैवास्तिधारणं। निषेधात्कल्प्यविधितःश्चाद्योनप्राप्तिवारणात्। अग्निचयनेयोयंनित्योग्निरु
ख्यः स्तस्यसार्वकालिकंधारणंविकल्पितंकुतः विधिप्रतिषेधयोरुभयोःसद्भावात्। प्रतिषेधस्तावदेवंश्रूयते। नप्रतिसमि
ध्योयत्प्रतिसमिध्योभ्रातृव्यमस्मैजनयेदितिसोयंप्रतिषेधःप्राप्तिमंतरेणानुपपन्नःप्रापकंविधिंकल्पयति। तस्माद्विकल्पइ
तिचेत् नेतद्युक्तं प्रतिषेधस्यान्यथाप्युपपन्नत्वात्। आहवनीयविषयंनित्यंधारणं। गतश्रियोयद्विहितंतच्चोदकेनोख्ये
ग्नौप्रापितत्वात्प्रतिषिध्यते। तथासतिविधेरकल्पितत्वात् केवलेनप्रतिषेधेधानेरणाभावएवइतिनियमः॥ एकादशा॰॥ ॥
शुक्रस्पर्शादिकंसत्रेसर्वेषामुतकस्यचित्। अविशेषाद्दादिमोत्यस्तावतैवार्थसिद्धितः। शुक्रंयजमानोन्वारभते। यजमाने
नसम्मितोदुंबरीभवतीतिविहितंयत्तत्सत्रेसर्वेषांयजमानानांभवेत्। ततः यजमानस्यसर्वाविशिष्टत्वादितिचेन्मैवं। ए
केनकृतेसतिप्रयोजनस्यशुक्रग्रहसंस्कारादेःसिद्धत्वात्। नह्येतेयजमानसंस्कारार्थाः येनप्रतियजमानमावर्तेरन्त
स्मादेकएवकुर्यात्। ॥द्वादशाधिकरमा॰॥ ॥अहीनेसत्रवत्सुक्स्पर्शैक्येसोनियम्यते। नवाद्यःसंभवान्मैवंविशेषा
नवधारणात्। यथासत्रेयजमानेष्वेकएवशुक्रग्रहंस्पृशतितथाहीनेप्येकएवेतिपूर्वन्यायेनास्थितेसतिएकःकिंनिय

357
194

अ·क·र·
१७७

नः उतयः कोपीति संशये सति नियमसत्रे वक्ष्यमाणत्वादिहाविनियमः मंदः पूर्वः पक्षः। विशेषस्यावधारयितुमशक्यत्वाद्यः कोपि
तिराध्यांतः॥ ॥त्रयोदशाधिकरणमारचयति॥ ॥कश्चिद्गृहपतिर्वास्यात्सत्रे कश्चिदहीनवत्। इतरेषां तदार्त्विज्यादविलंबार्थ
मंतिमः। पूर्वोक्तेनाहीनन्यायेन सत्रेपि यः कोपि शक्रस्पर्शादिकं कुर्यादिति चेन्मैवं। गृहपतिव्यतिरिक्तानां तदानीमार्त्विज्यकार्ये
षु व्यावृत्तानां शक्रस्पर्शाद्यसंभवात्। विलंबे त्वार्त्विज्यशुक्रस्पर्शयोर्विहितमेककालीनत्वं हीयेत तस्मादविलंबार्थं गृहपतिरेव तत्कु
र्यात्। ॥चतुर्दशाधिकरणमारचयति॥ ॥अंजनाद्या गृहपतेः सर्वेषां वा समाख्यया। आद्यो नो फति संस्काराः सर्वेषां पलिनां
मतः। अंजनाभ्यंजनादयो गृहपतेर्युक्ताः संस्काराधिक्येन गृहपतित्वसमाख्याया उपपन्नत्वादिति चेन्मैवं। फलित्वप्रयोज
का एते संस्काराः फलि च सर्वेषां यजमानानामस्ति यत्तु गृहपतेः फलाधिक्यं श्रूयते भूयिष्ठामृद्धिमाप्नोतीति च तद्वाचनिकं न तु सं
स्काराधिक्यकृतं। समाख्या त्वंतरेणापि संस्काराधिक्यमृत्विजामिव कर्मकरत्वादुपपद्यते। तस्मात्सर्वेषामंजनाद्याः कार्याः॥ पंचदशा
धिकरणमारचयति॥ ॥यजमानार्त्विज्ययोः किं बलवत्पूर्वमुत्तरं। उताद्यश्चोदकप्राप्तेरंत्यः प्रत्यक्षतो विधेः। सत्रे याजमानार्त्विज्यक
र्मणोरेकदा प्राप्तिस्तत्र याजमानं बलवच्चोदकेन प्राप्तत्वादिति चेन्मैवं। ये यजमानास्ते ऋत्विज इत्यार्त्विज्यस्य प्रत्यक्षविहितत्वात्तस्मा
दार्त्विज्यं बलवत्। ॥षोडशाधिकरणमारचयति॥ ॥आर्त्विज्यं किंतु वर्णत्रयं विप्रयोग्यं वा यिमः। विद्यावत्त्वात्तदुक्तं ब्राह्म
णस्यैव तत्स्मृतः। विप्रक्षत्रियवैश्यानामधीतवेदांगानां विद्यावत्त्वादार्त्विज्यमस्तीति चेत् तन्न। स्मृतिषु विप्रस्यैवार्त्विज्यस्मर
णात्। तथा च याज्ञवल्क्यः। प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथेति। एवं स्मृत्यंतराण्युदाहरणीयानि तस्माद्विप्रस्यैवार्त्वि श्रीः
ज्यं॥ ॥वेदानां स्थितिकृत्पुरोहरिहरो भूत्तत्र कृज्जैमिनिस्तद्भाष्यं शबरोभ्यधात्कृदितवांस्तद्विस्तरं माधवः॥ सोयं निखिलजनपु
त्रजनकं प्रकृताधिपत्यस्थितिर्दीर्घायुः सह बंधुभिर्विजयतामाचंद्रमातारकं॥ ॥इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे द्वा
दशोध्यायः॥ ॥ छ ॥ श्रीः ॥ ग्रंथसंख्या श्लोकसहस्रदश॥ १००००॥ छ ॥ श्रीः ॥ छ

353
1945

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अ०र०मा०

१७८

॥इतिअधिकरणरत्नमालासमाप्ता॥ ॥

श्रीः

१७८

354/1945